# Taittirīya-Brāhmaṇa

## Edited by Subramania Sarma

## Chennai 2005

## Preface

The following text is the first stage on a workable electronic text of the Taittirīya Brāhmaṇa. I also felt that such a work could also lay the foundation for all future research work on the Taittirīya Brāhmaṇa, as a critical edition is the most basic of building blocks for any good research. Though this is by no means a critical edition, I hope to bring it to perfection. There are a few more texts of the Taittirīya Śākhā which will become available as and when they are ready.

This is the first time that the Sanskrit text of the Taittirīya Brāhmaṇa with accents is available via the Internet. This throws open many new vistas for researchers and Indologists for study. I am aware of the fact that this and other related works are delayed beyond any reasonable means. This delay is due to factors over which I have no control.

The extant printed versions of the texts suffered some major drawbacks. Firstly, they were based on MSS lying around in various Indological institutions mostly in Devanāgarī. Works in languages such as Grantha were ignored, even though everyone accepts that the Taittirīya Śākhā is one best preserved. The Grantha texts have also played a crucial role in this.

Another drawback is the non-representation of all accents in texts as it was felt that these should be learnt only from the Guru. This brings us to the next problem area. Most editions have ignored the wisdom preserved in the oral traditions.

The current work has attempted to rectify these defects and produce a clean text.

Though detailed lists were prepared for editing the texts, it could not be strictly adhered to due to limitations imposed by Unicode. These have however been documented. Another area where the current text is deficient is in the area of variants, which have been totally ignored. The additional passages appearing in the Andhra (Telugu) texts have also been ignored. Wherever sufficient material was not available, those areas to have been documented but not yet pointed out in the text.

I will attempt to produce these and the Pratīkas as separate documents.

The entire work was made possible only by the kind guidance and financial assistance of Mr. Ulrich Stiehl, to whom the entire Indological community should be indebted. He has brought a lifetime of experience from the print industry to bear on this project and assisted in developing the fonts as per requirements. My thanks also to Mr. Gopalakrishnan Santhanam who helped in the proofreading of the texts.

My thanks are also due to Mr. Vijayaraghavan Bashyam, Shri R. Sundar, Mr. Ravi Mayavaram, and Mr. Lakshmi Narasimhan for their financial support for the project.

Despite any problems that may exist in these electronic texts they are potentially so valuable. I hope that this work forms a basis on which better works can be done. The purpose of this work will have been achieved if Indologists and scholars start using this as a benchmark text.

The following works were used in the producing this text:

- Taittirīya Brāhmaṇa text, with the commentary of Bhatta Bhaskara Mishra - Mahadeva Sastry, A and Srinivasacharya, L - Vols. 1-4, Mysore Govt. Library Series, 1908-1913, MLBD reprint
- Taittirīya Brāhmaṇam - Godbole, V.S. et al. 1934 - Anandasrama Sanskrit Series 37 (3 Vols).
- Taittirīya Brāhmaṇam - 3 Vols. - Nag Prakashan, Delhi
- Taittirīya Brāhmaṇam - G.K. Seetharaman - Your Family Friend Delhi.
- Taittirīya Brāhmaṇa (Edition in Grantha) - Heritage India Educational Trust, Chennai 2004 (Reprint).

Despite close scrutiny and vigilance, a few errors could have crept in owing to my lack of concentration. Users are requested to make note of and forward these to srothriyan@sarma.com.

I also thank the people at Omkarananda Ashram who have generously put their Itranslator software in the public domain thereby making this project feasible.

I conclude by thanking the various institutions and individuals who have lent, procured or presented to me various versions of the texts and also by once again thanking Mr. Ulrich Stiehl for having made this project possible.

Subramania Sarma

Copyright Notice:

© Copyright by Subramania Sarma, Chennai 2005. All rights reserved.

No part of this work may be reproduced, stored in a retrieval system, or transmitted, in any form or by any means, electronic, mechanical, photocopying, recording, internet, or otherwise, without the prior written permission of the author of this work.

# Taittirīya-Brāhmaṇa

# Book 1, Chapter 1

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[1-1-1-1]]**

ब्रह्म॒ संध॑त्तं॒ तन्मे॑ जिन्वतम्।
क्ष॒त्रꣳ संध॑त्तं॒ तन्मे॑ जिन्वतम्।
इष॒ꣳ॒ संध॑त्तं॒ तां मे॑ जिन्वतम्।
ऊर्ज॒ꣳ॒ संध॑त्तं॒ तां मे॑ जिन्वतम्।
र॒यिꣳ संध॑त्तं॒ तां मे॑ जिन्वतम्।
पुष्टि॒ꣳ॒ संध॑त्तं॒ तां मे॑ जिन्वतम्।
प्र॒जाꣳ संध॑त्तं॒ तां मे॑ जिन्वतम्।
प॒शून्त्संध॑त्तं॒ तान्मे॑ जिन्वतम्।
स्तु॒तो॑सि॒ जन॑धाः।
दे॒वास्त्वा॑ शु॒क्र॒पाः प्रण॑यन्तु॥ १॥

((brahma̱ saṃdhȧttaṃ̱ tanmė jinvatam |
kṣa̱tram̐ saṃdhȧttaṃ̱ tanmė jinvatam |
iṣa̱m̐ saṃdhȧttaṃ̱ tāṃ mė jinvatam |
ūrja̱m̐ saṃdhȧttaṃ̱ tāṃ mė jinvatam |
ra̱yim̐ saṃdhȧttaṃ̱ tāṃ mė jinvatam |
puṣṭi̱m̐ saṃdhȧttaṃ̱ tāṃ mė jinvatam |
pra̱jām̐ saṃdhȧttaṃ̱ tāṃ mė jinvatam |
pa̱śūntsaṃdhȧttaṃ̱ tānmė jinvatam |
stu̱tȯsi̱ janȧdhāḥ |
de̱vāstvȧ śukra̱pāḥ praṇȧyantu || 1 ||))

**[[1-1-1-2]]**

सु॒वीरा॑ः प्र॒जाः प्र॑ज॒नय॒न्परी॑हि।
शु॒क्रः शु॒क्रशो॑चिषा।
स्तु॒तो॑सि॒ जन॑धाः।
दे॒वास्त्वा॑ मन्थि॒पाः प्रण॑यन्तु।
सु॒प्र॒जाः प्र॒जाः प्र॑ज॒नय॒न्परी॑हि।
म॒न्थी म॒न्थिशो॑चिषा।
सं॒ज॒ग्मा॒नौ दि॒व आ पृ॑थि॒व्याऽऽयुः॑।
संध॑त्तं॒ तन्मे॑ जिन्वतम्।
प्रा॒णꣳ संध॑त्तं॒ तं मे॑ जिन्वतम्।
अ॒पा॒नꣳ संध॑त्तं॒ तं मे॑ जिन्वतम्॥ २॥

((su̱vīrā̱̍ḥ pra̱jāḥ prȧja̱naya̱nparīhi |
śu̱kraḥ śu̱kraśȯciṣā |
stu̱tȯsi̱ janȧdhāḥ |
de̱vāstvȧ manthi̱pāḥ praṇȧyantu |
su̱pra̱jāḥ pra̱jāḥ prȧja̱naya̱nparīhi |
ma̱nthī ma̱nthiśȯciṣā |
saṃ̱ja̱gmā̱nau di̱va ā pṛ̍thi̱vyā''yu̍ḥ |
saṃdhȧttaṃ̱ tanmė jinvatam |
prāṇam̐ saṃdhȧttaṃ̱ taṃ mė jinvatam |
a̱pā̱nam̐ saṃdhȧttaṃ̱ taṃ mė jinvatam || 2 ||))

**[[1-1-1-3]]**

व्या॒नꣳ संध॑त्तं॒ तं मे॑ जिन्वतम्।
चक्षु॒ः संध॑त्तं॒ तन्मे॑ जिन्वतम्।
श्रोत्र॒ꣳ॒ संध॑त्तं॒ तन्मे॑ जिन्वतम्।
मन॒ः संध॑त्तं॒ तन्मे॑ जिन्वतम्।
वाच॒ꣳ॒ संध॑त्तं॒ तां मे॑ जिन्वतम्।
आयु॑ः स्थ॒ आयु॑र्मे धत्तम्।
आयु॑र्य॒ज्ञाय॑ धत्तम्।
आयु॑र्य॒ज्ञप॑तये धत्तम्।
प्रा॒णः स्थ॑ः प्रा॒णं मे॑ धत्तम्।
प्रा॒णं य॒ज्ञाय॑ धत्तम्॥ ३॥

((vyā̱nam̐ saṃdhȧttaṃ̱ taṃ mė jinvatam |
cakṣu̱ḥ saṃdhȧttaṃ̱ tanmė jinvatam |
śrotra̱m̐ saṃdhȧttaṃ̱ tanmė jinvatam |
mana̱ḥ saṃdhȧttaṃ̱ tanmė jinvatam |
vāca̱m̐ saṃdhȧttaṃ̱ tāṃ mė jinvatam |
āyu̍ḥ stha̱ āyu̍rme dhattam |
āyu̍rya̱jñāyȧ dhattam |
āyu̍rya̱jñapȧtaye dhattam |
prā̱ṇaḥ sthȧḥ prā̱ṇaṃ mė dhattam |
prā̱ṇaṃ ya̱jñāyȧ dhattam || 3 ||))

**[[1-1-1-4]]**

प्रा॒णं य॒ज्ञप॑तये धत्तम्।
चक्षु॑ः स्थ॒श्चक्षु॑र्मे धत्तम्।
चक्षु॑र्य॒ज्ञाय॑ धत्तम्।
चक्षु॑र्य॒ज्ञप॑तये धत्तम्।
श्रोत्र॑ꣳ स्थ॒ः श्रोत्रं॑ मे धत्तम्।
श्रोत्रं॑ य॒ज्ञाय॑ धत्तम्।
श्रोत्रं॑ य॒ज्ञप॑तये धत्तम्।
तौ दे॑वौ शु॒क्राम॒न्थिनौ॑।
क॒ल्पय॑तं॒ दैवी॒र्विश॑ः।

क॒ल्पय॑तं॒ मानु॑षीः ॥ ४ ॥

((prā̱ṇa̱m ya̱jñapa̍taye dhattam ।
cakṣu̍ḥ stha̱ścakṣu̍rme dhattam ।
cakṣu̍rya̱jñāya̍ dhattam ।
cakṣu̍rya̱jñapa̍taye dhattam ।
śrotra̱m̐ stha̱ḥ śrotra̱m me dhattam ।
śrotra̱m ya̱jñāya̍ dhattam ।
śrotra̱m ya̱jñapa̍taye dhattam ।
tau de̍vau śukrāmanthinau ।
ka̱lpaya̍ta̱m daivī̱rviśa̍ḥ ।
ka̱lpaya̍ta̱m mānu̍ṣīḥ ॥ 4 ॥))

**[[1-1-1-5]]**

इ॒षमू॒र्जम॒स्मासु॑ धत्तम्।
प्रा॒णान्प॒शुषु॑।
प्र॒जां मयि॑ च॒ यज॑माने च।
निर॑स्तः॒ शण्ड॑ः।
निर॑स्तो॒ मर्कः॑।
अप॑नुत्तौ॒ शण्डा॒मर्कौ॑ स॒हामुना॑।
शु॒क्रस्य॑ स॒मिद॑सि।
म॒न्थिनः॑ स॒मिद॑सि।
स प्र॑थ॒मः सङ्कृ॑ति॒र्विश्वक॑र्मा।
स प्र॑थ॒मो मि॒त्रो वरु॑णो अ॒ग्निः।
स प्र॑थ॒मो बृह॒स्पति॑श्चिकि॒त्वान्।
तस्मा॒ इन्द्रा॑य सु॒तमाजु॑होमि ॥ ५ ॥
न॒यन्त्व॒पान॑ꣳ सन्ध॑त्तं॒ तं मे॑ जिन्वतं प्रा॒णं य॒ज्ञाय॑ धत्तं॒ मानु॑षीर॒ग्निर्द्वे च॑ ॥ १ ॥

((iṣa̱mūrja̍ma̱smāsu̍ dhattam ।
prā̱ṇānpa̱śuṣu̍ ।
pra̱jām mayi̍ ca̱ yaja̍māne ca ।
nira̍sta̱ḥ śaṇḍa̍ḥ ।
nira̍sto̱ marka̍ḥ ।
apa̍nuttau̱ śaṇḍā̱markau̍ sa̱hāmunā̍ ।
śu̱krasya̍ sa̱mida̍si ।
ma̱nthina̍ḥ sa̱mida̍si ।
sa pra̍tha̱maḥ saṃkṛ̍tirvi̱śvaka̍rmā ।
sa pra̍tha̱mo mi̱tro varu̍ṇo a̱gniḥ ।
sa pra̍tha̱mo bṛ̱haspati̍ścaki̱tvān ।
tasmā̱ indrā̍ya su̱tamāju̍homi ॥ 5 ॥
na̱ya̱ntva̱pāna̍m̐ saṃdha̍tta̱m taṃ me̍ jinvata̱m prā̱ṇa̱m ya̱jñāya̍ dhatta̱m mānu̍ṣīra̱gnirdve ca̍ ॥ 1 ॥))

**[[1-1-2-1]]**

कृत्ति॑कास्व॒ग्निमाद॑धीत।
ए॒तद्वा अ॒ग्नेर्नक्ष॑त्रम्।
यत्कृत्ति॑काः।
स्वाया॑मे॒वैनं॑ दे॒वता॑यामा॒धाय॑।
ब्र॒ह्मव॒र्च॒सी भ॑वति।
मुखं॒ वा ए॒तन्नक्ष॑त्राणाम्।
यत्कृत्ति॑काः।
यः कृत्ति॑कास्व॒ग्निमा॑ध॒त्ते।
मुख्य॑ ए॒व भ॑वति।
अथो॒ खलु॑ ॥ १ ॥

((kṛtti̍kāsva̱gnimāda̍dhīta ।
e̱tadvā a̱gnernakṣa̍tram ।
yatkṛtti̍kāḥ ।
svāyā̍me̱vaina̍m de̱vatā̍yāmā̱dhāya̍ ।
bra̱hma̱va̱rca̱sī bha̍vati ।
mukha̱m vā e̱tannakṣa̍trāṇām ।
yatkṛtti̍kāḥ ।
yaḥ kṛtti̍kāsva̱gnimā̍dha̱tte ।
mukhya̍ e̱va bha̍vati ।
atho̱ khalu̍ ॥ 1 ॥))

**[[1-1-2-2]]**

अ॒ग्नि॒न॒क्ष॒त्रमित्यप॑चायन्ति।
गृ॒हान्ह॒ दाहु॑को भवति।
प्र॒जाप॑ती रोहि॒ण्याम॒ग्निम॑सृजत।
तं दे॒वा रोहि॒ण्यामाद॑धत।
ततो॒ वै ते सर्वा॒न्रोहा॑नरोहन्।
तद्रोहि॒ण्यै रोहिणि॒त्वम्।
यो रोहि॒ण्याम॒ग्निमा॑ध॒त्ते।
ऋ॒ध्नोत्ये॒व।
सर्वा॒न्रोहा॑न्रोहति।
दे॒वा वै भ॒द्राः सन्तो॒ऽग्निमाधि॑त्सन्त ॥ २ ॥

((a̱gni̱na̱kṣa̱tramityapa̍cāyanti ।
gṛ̱hān ha̱ dāhu̍ko bhavati ।
pra̱jāpa̍tī rohi̱ṇyāma̱gnima̍sṛjata ।
ta̱m de̱vā rohi̱ṇyāmāda̍dhata ।
tato̱ vai te sarvā̱nrohā̍narohan ।
tadrohi̱ṇyai rohiṇi̱tvam ।
yo rohi̱ṇyāma̱gnimā̍dha̱tte ।
ṛ̱dhnotye̱va ।
sarvā̱nrohā̍nrohati ।
de̱vā vai bha̱drāḥ santo̱'gnimādhi̍tsanta ॥ 2 ॥))

**[[1-1-2-3]]**

तेषा॒मना॑हितो॒ऽग्निरासी॑त्।

अथै᳚भ्यो वा॒मं वस्वपा᳚क्रामत्।
ते पुन॑र्वस्वो॒राद॑धत।
तत॒ो वै तान् वा॒मं वसू॒पाव॑र्तत।
यः पु॒रा भ॒द्रः सन्पापी॑या॒न्त्स्यात्।
स पुन॑र्वस्वोर॒ग्निमाद॑धीत।
पुन॑रे॒वैनं॑ वा॒मं वसू॒पाव॑र्तते।
भ॒द्रो भ॑वति।
यः का॒मये॑त॒ दान॑कामा मे प्र॒जाः स्यु॒रिति॑।
स पूर्व॑यो॒ः फल्गु॑न्योर॒ग्निमाद॑धीत॥ ३॥

((teṣā̠manā̍hito̠'gnirāsī̎t |
athai̎bhyo vā̠maṃ vasvapā̎krāmat |
te puna̍rvasvo̠rāda̍dhata |
tato̠ vai tān vā̠maṃ vasū̠pāva̍rtata |
yaḥ pu̠rā bha̠draḥ sanpāpī̍yā̠ntsyāt |
sa puna̍rvasvora̠gnimāda̍dhīta |
puna̍re̠vainaṃ̍ vā̠maṃ vasū̠pāva̍rtate |
bha̠dro bha̍vati |
yaḥ kā̠maye̍ta̠ dāna̍kāmā me pra̠jāḥ syu̠riti̍ |
sa pūrva̍yo̠ḥ phalgu̍nyora̠gnimāda̍dhīta || 3 ||))

**[[1-1-2-4]]**

अ॒र्य॒म्णो वा ए॒तन्नक्ष॑त्रम्।
यत्पूर्वे॒ फल्गु॑नी।
अ॒र्य॒मेति॒ तमा॑हु॒र्यो ददा॑ति।
दान॑कामा अस्मै प्र॒जा भ॑वन्ति।
यः का॒मये॑त भ॒गी स्या॒मिति॑।
स उत्त॑रयो॒ः फल्गु॑न्योर॒ग्निमाद॑धीत।
भग॑स्य॒ वा ए॒तन्नक्ष॑त्रम्।
यदुत्त॑रे॒ फल्गु॑नी।
भ॒ग्ये॑व भ॑वति।
का॒ल॒क॒ञ्जा वै नामासु॑रा आसन्॥ ४॥

((a̠rya̠mṇo vā e̠tannakṣa̍tram |
yatpūrve̠ phalgu̍nī |
a̠rya̠meti̠ tamā̍hu̠ryo dadā̍ti |
dāna̍kāmā asmai pra̠jā bha̍vanti |
yaḥ kā̠maye̍ta bha̠gī syā̠miti̍ |
sa utta̍rayo̠ḥ phalgu̍nyora̠gnimāda̍dhīta |
bhaga̍sya̠ vā e̠tannakṣa̍tram |
yadutta̍re̠ phalgu̍nī |
bha̠gye̍va bha̍vati |
kā̠la̠ka̠ñjā vai nāmāsu̍rā āsan || 4 ||))

**[[1-1-2-5]]**

ते सु॑व॒र्गाय॑ लो॒काया॒ग्निम॑चिन्वत।
पुरु॑ष॒ इष्ट॑का॒मुपा॑दधा॒त्पुरु॑ष॒ इष्ट॑काम्।
स इन्द्रो᳚ ब्राह्म॒णो ब्रु॒वा॑ण॒ इष्ट॑का॒मुपा॑धत्त।
ए॒षा मे॑ चि॒त्रा नामेति॑।
ते सु॑व॒र्गं लो॒कमा॒प्रारो॑हन्।
स इन्द्र॒ इष्ट॑का॒मावृ॑हत्।
तेऽवा॑कीर्यन्त।
ये॑ऽवाकी᳚र्यन्त।
त ऊर्णा॒वभ॑योऽभवन्।
द्वावुद॑पतताम्॥ ५॥

((te su̍va̠rgāya̍ lo̠kāyā̠gnima̍cinvata |
puru̍ṣa̠ iṣṭa̍kā̠mupā̍dadhā̠tpuru̍ṣa̠ iṣṭa̍kām |
sa indro̎ brāhma̠ṇo bruvā̍ṇa̠ iṣṭa̍kā̠mupā̍dhatta |
e̠ṣā me̍ ci̠trā nāmeti̍ |
te su̍va̠rgaṃ lo̠kamā̠prāro̍han |
sa indra̠ iṣṭa̍kā̠māvṛ̍hat |
te'vā̍kīryanta |
ye̍'vākī̎ryanta |
ta ūrṇā̠vabha̍yo'bhavan |
dvāvuda̍patatām || 5 ||))

**[[1-1-2-6]]**

तौ दि॒व्यौ श्वाना॑वभवताम्।
यो भ्रातृ॑व्यवा॒ंत्स्यात्।
स चि॒त्राया॑म॒ग्निमाद॑धीत।
अ॒व॒कीर्यै॒व भ्रातृ॑व्यान्।
ओजो॒ बल॑मिन्द्रि॒यं वी॒र्य॑मा॒त्मन्ध॑त्ते।
व॒सन्ता᳚ ब्राह्म॒णो᳚ऽग्निमाद॑धीत।
व॒स॒न्तो वै ब्रा᳚ह्म॒णस्य॒र्तुः।
स्व ए॒वैन॑मृ॒तावा॒धाय॑।
ब्र॒ह्म॒व॒र्च॒सी भ॑वति।
मुख॒ं वा ए॒तदृ॑तू॒नाम्॥ ६॥

((tau di̠vyau śvānā̍vabhavatām |
yo bhrātṛ̍vyavā̠ṃtsyāt |
sa ci̠trāyā̍ma̠gnimāda̍dhīta |
a̠va̠kīryai̠va bhrātṛ̍vyān |
ojo̠ bala̍mindri̠yaṃ vī̠rya̍mā̠tmandha̍tte |
va̠santā̎ brāhma̠ṇo̎'gnimāda̍dhīta |
va̠sa̠nto vai brā̎hma̠ṇasya̠rtuḥ |
sva e̠vaina̍mṛ̠tāvā̠dhāya̍ |
bra̠hma̠va̠rca̠sī bha̍vati |
mukha̠ṃ vā e̠tadṛ̍tū̠nām || 6 ||))

[[1-1-2-7]]

यद्व॑स॒न्तः।
यो व॒सन्ता॒ऽग्निमा॑ध॒त्ते।
मुख्य॑ ए॒व भ॑वति।
अथो॒ योनि॑मन्तमे॒वैनं॒ प्रजा॑त॒माध॑त्ते।
ग्री॒ष्मे रा॑ज॒न्य॑ आद॑धीत।
ग्री॒ष्मो वै रा॑ज॒न्य॑स्य॒र्तुः।
स्व ए॒वैन॑मृ॒तावा॒धाय॑।
इ॒न्द्रि॒या॒वी भ॑वति।
श॒रदि॒ वैश्य॒ आद॑धीत।
श॒रद्वै वैश्य॑स्य॒र्तुः॥ ७॥

((yadvás̱antaḥ ।
yo va̱santā̱'gnimádha̱tte ।
mukhyá e̱va bhávati ।
atho̱ yonímantame̱vainam̱ prajáta̱mādhátte ।
grī̱ṣme rája̱nyá ādádhīta ।
grī̱ṣmo vai rája̱nyásya̱rtuḥ ।
sva e̱vainámr̥̱tāvā̱dhāyá ।
i̱ndri̱yā̱vī bhávati ।
śa̱radi̱ vaiśya̱ ādádhīta ।
śa̱radvai vaiśyásya̱rtuḥ ॥ 7 ॥))

[[1-1-2-8]]

स्व ए॒वैन॑मृ॒तावा॒धाय॑।
प॒शु॒मान्भ॑वति।
न पूर्व॑योः फल्गु॑न्योर॒ग्निमाद॑धीत।
ए॒षा वै ज॑घ॒न्या॑ रात्रिः॑ संवत्स॒रस्य॑।
यत्पूर्वे॒ फल्गु॑नी।
पृ॒ष्टि॒त ए॒व सं॑वत्स॒रस्या॒ग्निमा॒धाय॑।
पा॒पीया॑न्भवति।
उत्त॑रयो॒राद॑धीत।
ए॒षा वै प्र॑थ॒मा रात्रिः॑ संवत्स॒रस्य॑।
य॒दुत्त॑रे॒ फल्गु॑नी।
मु॒ख॒त ए॒व सं॑वत्स॒रस्या॒ग्निमा॒धाय॑।
व॒सी॑यान्भवति।
अथो॒ ख॒लु॑।
य॒देवैनं॑ य॒ज्ञ उ॑प॒नमे᳚त्।
अथाद॑धीत।
सैवास्य॒र्द्धिः᳚॥ ८॥

((sva e̱venámr̥̱tāvā̱dhāyá ।
pa̱śu̱mānbhávati ।
na pūrváyo̱ḥ phalgúnyora̱gnimādádhīta ।
e̱ṣā vai jágha̱nyá rātríḥ saṃvatsa̱rasyá ।
yatpūrve̱ phalgúnī ।
pr̥̱ṣṭi̱ta e̱va sáṃvatsa̱rasyā̱gnimā̱dhāyá ।
pā̱pīyānbhavati ।
uttárayo̱rādádhīta ।
e̱ṣā vai prátha̱mā rātríḥ saṃvatsa̱rasyá ।
ya̱duttáre̱ phalgúnī ।
mu̱kha̱ta e̱va sáṃvatsa̱rasyā̱gnimā̱dhāyá ।
va̱sīyānbhavati ।
atho̱ kha̱lú ।
ya̱devainaṃ́ ya̱jña úpa̱namě̱t ।
athādádhīta ।
saivāsya̱rddhíḥ ॥ 8 ॥
khalvádhitsanta̱
phalgúnyora̱gnimādádhītāsannapatatāmr̥̱tū̱nām
vaiśyásya̱rturuttáre̱ phalgúnī̱ ṣaṭcá ॥ 2 ॥))

[[1-1-3-1]]

उ॒द्धन्ति॑।
य॒दे॒वास्या॑ अ॒मे॒ध्यम्।
त॒दप॑ हन्ति।
अ॒पोऽवो᳚क्षति॒ शान्त्यै᳚।
सिक॑ता॒ निव॑पति।
ए॒तद्वा अ॒ग्नेर्वै᳚श्वान॒रस्य॑ रू॒पम्।
रू॒पेणै॒व वै᳚श्वान॒रमव॑रुन्धे।
ऊ॒षान्निव॑पति।
पुष्टि॒र्वा ए॒षा प्र॒जन॑नम्।
यदू॒षाः᳚॥ १॥

((uddhánti ।
yade̱vāsyá ame̱dhyam ।
tadapá hanti ।
a̱po'vŏkṣati̱ śāntyaĭ ।
sikáta̱ nivápati ।
e̱tadvā a̱gnervaĭśvāna̱rasyá rū̱pam ।
rū̱peṇa̱iva vaĭśvāna̱ramavárundhe ।
ū̱ṣā̱nnivápati ।
puṣṭi̱rvā e̱ṣā pra̱janánam ।
yadū̱ṣāḥ̆ ॥ 1 ॥))

[[1-1-3-2]]

पु॒ष्ट्यामे॒व प्र॒जन॑नेऽग्निमाध॑त्ते।
अथो॑ सं॒ज्ञान॑ ए॒व।

सं॒ज्ञान॑ꣳ ह्ये॑तत्प॑शू॒नाम्।
यदू॒षाः᳚।
द्यावा॑पृथि॒वी स॒हास्ता᳚म्।
ते वि॑य॒ती अ॑ब्रूताम्।
अस्त्वे॒व नौ᳚ स॒ह य॒ज्ञिय॒मिति॑।
यद॒मुष्या॑ य॒ज्ञिय॒मासी᳚त्।
तद॒स्याम॑दधात्।
त ऊषा॑ अभवन्॥ २॥

((puṣṭyā̍meva pra̱janane̱'gnimādhatte ।
atho̍ sa̱mjñāna̍ e̱va ।
sa̱mjñāna̱g̐̍ hye̍tatpa̍śū̱nām ।
yadū̱ṣā̎ḥ ।
dyāvā̍pṛthi̱vī sa̱hāstā̎m ।
te vi̍ya̱tī a̍brūtām ।
astve̱va nau̍ sa̱ha ya̱jñiya̱miti̍ ।
yada̱muṣyā̍ ya̱jñiya̱māsī̎t ।
tada̱syāma̍dadhāt ।
ta ūṣā̍ abhavan ॥ 2 ॥))

**[[1-1-3-3]]**

यद॒स्या य॒ज्ञिय॒मासी᳚त्।
तद॒मुष्या॑मदधात्।
तद॒दश्च॒न्द्रम॑सि कृ॒ष्णम्।
ऊषा᳚न्नि॒वप॑न्न॒दो ध्या॑येत्।
द्यावा॑पृथि॒व्योरे॒व य॒ज्ञिये॒ऽग्निमाध॑त्ते।
अ॒ग्निर्दे॒वेभ्यो॒ निला॑यत।
आ॒खू रू॒पं कृ॒त्वा।
स पृ॑थि॒वीं प्रावि॑शत्।
स ऊ॒तीः कु॑र्वा॒णः पृ॑थि॒वीमनु॒ सम॑चरत्।
तदा॑खुकरी॒षम॑भवत्॥ ३॥

((yada̱syā ya̱jñiya̱māsī̎t ।
tada̱muṣyā̍madadhāt ।
tada̱daśca̱ndrama̍si kṛ̱ṣṇam ।
ūṣā̎nni̱vapa̍nna̱do dhyā̍yet ।
dyāvā̍pṛthi̱vyore̱va ya̱jñiye̱'gnimādha̍tte ।
a̱gnirde̱vebhyo̱ nilā̍yata ।
ā̱khū rū̱paṃ kṛ̱tvā ।
sa pṛ̍thi̱vīṃ prāvi̍śat ।
sa ū̱tīḥ ku̍rvā̱ṇaḥ pṛ̍thi̱vīmanu̱ sama̍carat ।
tadā̍khukarī̱ṣama̍bhavat ॥ 3 ॥))

**[[1-1-3-4]]**

यदा॑खुकरी॒षꣳ सं॑भा॒रो भव॑ति।
यदे॒वास्य॒ तत्र॒ न्य॑क्तम्।
तदे॒वाव॑रुन्धे।
ऊर्ज॒ं वा ए॒तꣳ रसं॑ पृथि॒व्या उ॑प॒दीका॒ उद्दि॑हन्ति।
यद्व॒ल्मीक᳚म्।
यद्व॑ल्मीकव॒पा सं॑भा॒रो भव॑ति।
ऊर्ज॑मे॒व रसं॑ पृथि॒व्या अव॑रुन्धे।
अथो॒ श्रोत्र॑मे॒व।
श्रोत्र॒ꣳ ह्ये॑तत्पृ॑थि॒व्याः।
यद्व॒ल्मीकः॑॥ ४॥

((yadā̍khukarī̱ṣag̐̍ sa̱mbhā̱ro bhava̍ti ।
yade̱vāsya̱ tatra̱ nya̍ktam ।
tade̱vāva̍rundhe ।
ūrja̱ṃ vā e̱tag̐̍ rasa̍ṃ pṛthi̱vyā u̍pa̱dīkā̱ uddi̍hanti ।
yadva̱lmīkā̎m ।
yadva̍lmīkava̱pā sa̱mbhā̱ro bhava̍ti ।
ūrja̍me̱va rasa̍ṃ pṛthi̱vyā ava̍rundhe ।
atho̱ śrotra̍me̱va ।
śrotra̱g̐̍ hye̍tatpṛ̍thi̱vyāḥ ।
yadva̱lmīka̍ḥ ॥ 4 ॥))

**[[1-1-3-5]]**

अब॑धिरो भवति।
य ए॒वं वेद॑।
प्र॒जाप॑तिः प्र॒जा अ॑सृजत।
तासा॒मन्न॒मुपा᳚क्षीयत।
ताभ्यः॒ सूद॒मुप॒ प्राभि॑नत्।
ततो॒ वै तासा॒मन्नं॒ नाक्षी॑यत।
यस्य॒ सूदः॑ संभा॒रो भव॑ति।
नास्य॑ गृ॒हेऽन्नं॑ क्षीयते।
आपो॒ वा इ॒दमग्रे॑ सलि॒लमा॑सीत्।
तेन॑ प्र॒जाप॑तिरश्राम्यत्॥ ५॥

((aba̍dhiro bhavati ।
ya e̱vaṃ veda̍ ।
pra̱jāpa̍tiḥ pra̱jā a̍sṛjata ।
tāsā̱manna̱mupā̎kṣīyata ।
tābhya̱ḥ sūda̱mupa̱ prābhi̍nat ।
tato̱ vai tāsā̱manna̱ṃ nākṣī̍yata ।
yasya̱ sūda̍ḥ sa̱mbhā̱ro bhava̍ti ।
nāsya̍ gṛ̱he'nna̍ṃ kṣīyate ।
āpo̱ vā i̱damagre̍ sali̱lamā̍sīt ।
tena̍ pra̱jāpa̍tiraśrāmyat ॥ 5 ॥))

**[[1-1-3-6]]**

क॒थमि॒दꣳ᳚ स्या॒दिति॑।
सो॑ऽपश्यत्पुष्करप॒र्णं तिष्ठ॑त्।
सो॑ऽमन्यत।
अस्ति॒ वै तत्।
यस्मि॑न्नि॒दमधि॒तिष्ठ॒तीति॑।
स व॑रा॒हो रू॒पं कृ॒त्वोप॒ न्य॑मज्जत्।
स पृ॑थि॒वीम॒ध आ᳚र्च्छत्।
तस्या॑ उप॒हत्योद॑मज्जत्।
तत्पु॑ष्करप॒र्णे᳚ऽप्रथयत्।
यदप्र॑थयत्॥ ६॥

((ka̠thami̠dam̐̐ syā̠diti̍ ।
so̍'paśyatpuṣkarapa̠rṇam tiṣṭha̍t ।
so̍'manyata ।
asti̠ vai tat ।
yasmi̍nni̠damadhi̠tiṣṭha̠tīti̍ ।
sa va̍rā̠ho rū̠paṃ kr̥̠tvopa̠ nya̍majjat ।
sa pr̥̍thi̠vīma̠dha ā̎rcchat ।
tasya̍ upa̠hatyoda̍majjat ।
tatpu̍ṣkarapa̠rṇe̎'prathayat ।
yadapra̍thayat ॥ 6 ॥))

**[[1-1-3-7]]**

तत्पृ॑थि॒व्यै पृ॑थिवि॒त्वम्।
अभू॒द्वा इ॒दमिति॑।
तद्भूम्यै॑ भूमि॒त्वम्।
तां दिशो॑ऽनु॒ वात॒ः सम॑वहत्।
ताꣳ शर्क॑राभिरदृꣳ᳚हत्।
शं वै नो॑ऽभू॒दिति॑।
तच्छर्क॑राणाꣳ᳚ शर्क॒रत्वम्।
यद्व॑रा॒हवि॑हतꣳ᳚ संभा॒रो भव॑ति।
अ॒स्यामे॒वाछं॑म्बट्कारम॒ग्निमाध॑त्ते।
शर्क॑रा भवन्ति॒ धृत्यै᳚॥ ७॥

((tatpr̥̍thi̠vyai pr̥̍thivi̠tvam ।
abhū̠dvā i̠damiti̍ ।
tadbhūmyai̍ bhūmi̠tvam ।
tāṃ diśo'nu̠ vāta̠ḥ sama̍vahat ।
tām̐ śarka̍rābhiradr̥m̐̐hat ।
śaṃ vai no̍'bhū̠diti̍ ।
taccharka̍rāṇām̐ śarkara̠tvam ।
yadva̍rā̠havi̍hatam̐ saṃbhā̠ro bhava̍ti ।
a̠syāme̠vāchá̍mbaṭkārama̠gnimādha̍tte ।
śarka̍rā bhavanti̠ dhr̥tyai̎ ॥ 7 ॥))

**[[1-1-3-8]]**

अथो॑ शं॒त्वाय॑।
सरे॑ता अ॒ग्निरा॒धेय॒ इत्या॑हुः।
आपो॒ वरु॑णस्य॒ पत्न॑य आसन्।
ता अ॒ग्निर॒भ्य॑ध्यायत्।
ताः सम॑भवत्।
तस्य॒ रेत॒ः परा॑ऽपतत्।
तद्धिर॑ण्यमभवत्।
यद्धिर॑ण्यमु॒पास्य॑ति।
सरे॑तसमे॒वाग्निमाध॑त्ते।
पुरु॑ष॒ इन्न्वै स्वाद्रेत॑सो बीभत्सत॒ इत्या॑हुः॥ ८॥

((atho̍ śa̠ṃtvāya̍ ।
sare̍tā a̠gnirā̠dheya̠ ityā̍huḥ ।
āpo̠ varu̍ṇasya̠ patna̍ya āsan ।
tā a̠gnira̠bhya̍dhyāyat ।
tāḥ sama̍bhavat ।
tasya̠ reta̠ḥ parā̍'patat ।
taddhira̍ṇyamabhavat ।
yaddhira̍ṇyamu̠pāsya̍ti ।
sare̍tasame̠vāgnimādha̍tte ।
puru̍ṣa̠ innvai svādreta̍so bībhatsata̠ ityā̍huḥ ॥ 8 ॥))

**[[1-1-3-9]]**

उ॒त्त॒र॒त उपा॑स्य॒त्यबी॑भत्सायै।
अति॒ प्रय॑च्छति।
आर्ति॑मे॒वाति॒प्रय॑च्छति।
अ॒ग्निर्दे॒वेभ्यो॒ निला॑यत।
अश्वो॑ रू॒पं कृ॒त्वा।
सो᳚ऽश्व॒त्थे सं॑वत्स॒रम॑तिष्ठत्।
तद॑श्व॒त्थस्या᳚श्वत्थ॒त्वम्।
यदा᳚श्व॑त्थः संभा॒रो भव॑ति।
यदे॒वास्य॒ तत्र॒ न्य॑क्तम्।
तदे॒वाव॑रुन्धे॥ ९॥

((u̠tta̠ra̠ta upā̍sya̠tyabī̍bhatsāyai ।
ati̠ praya̍cchati ।
ārti̍me̠vāti̠praya̍cchati ।
a̠gnirde̠vebhyo̠ nilā̍yata ।
aśvo̍ rū̠paṃ kr̥̠tvā ।
so̎'śva̠tthe saṃ̍vatsa̠rama̍tiṣṭhat ।
tada̍śva̠tthasyā̎śvattha̠tvam ।
yadāśva̍tthaḥ saṃbhā̠ro bhava̍ti ।
yade̠vāsya̠ tatra̠ nya̍ktam ।
tade̠vāva̍rundhe ॥ 9 ॥))

**[[1-1-3-10]]**

दे॒वा वा ऊर्जं॒ व्य॑भजन्त।
तत॑ उदु॒म्बर॒ उद॑तिष्ठत्।
ऊर्ग्वा उ॑दु॒म्बरः॑।
यदौदु॑म्बरः संभा॒रो भव॑ति।
ऊर्ज॑मे॒वाव॑रुन्धे।
तृ॒तीय॑स्यामि॒तो दि॒वि सोम॑ आसीत्।
तं गा॑य॒त्र्याह॑रत्।
तस्य॑ प॒र्णम॑च्छिद्यत।
तत्प॒र्णो॑ऽभवत्।
तत्प॒र्णस्य॑ पर्ण॒त्वम्॥ १०॥

((dẹvā vā ūrjaṃ̱ vyábhajanta ।
tatá udu̱mbara̱ udátiṣṭhat ।
ūrgvā údu̱mbaráḥ ।
yadaudúmbaraḥ saṃbhā̱ro bhaváti ।
ūrjámẹvāvárundhe ।
tṛ̱tīyásyāmi̱to di̱vi somá āsīt ।
taṃ gáya̱tryāhárat ।
tasyá pa̱rṇamácchidyata ।
tatpa̱rṇó'bhavat ।
tatpa̱rṇasyá parṇa̱tvam ॥ 10 ॥))

**[[1-1-3-11]]**

यस्य॑ प॒र्णम॒यः॑ संभा॒रो भव॑ति।
सो॒म॒पी॒थमे॒वाव॑रुन्धे।
दे॒वा वै ब्रह्म॑न्नवदन्त।
तत्प॒र्ण उपा॑शृणोत्।
सु॒श्रवा॒ वै नाम॑।
यत्प॑र्णम॒यः॑ संभा॒रो भव॑ति।
ब्र॒ह्म॒व॒र्च॒समे॒वाव॑रुन्धे।
प्र॒जाप॑तिर॒ग्निम॑सृजत।
सो॑ऽबिभे॒त्प्र मा॑ धक्ष्यतीति॑।
तꣳ श॒म्या॑ऽशमयत्॥ ११॥

((yasyá parṇa̱mayáḥ saṃbhā̱ro bhaváti ।
sọma̱pīthamẹvāvárundhe ।
dẹvā vai brahmánnavadanta ।
tatpa̱rṇa upáśṛṇot ।
su̱śravā̱ vai nāmá ।
yatpárṇa̱mayáḥ saṃbhā̱ro bhaváti ।
bra̱hma̱va̱rca̱samẹvāvárundhe ।
pra̱jāpátira̱gnimásṛjata ।
só'bibhẹtpra má dhakṣya̱tīti ।
taṁ śa̱myá'śamayat ॥ 11 ॥))

**[[1-1-3-12]]**

तच्छ॒म्यै॑ शमि॒त्वम्।
यच्छ॑मी॒मयः॑ संभा॒रो भव॑ति।
शान्त्या॒ अप्र॑दाहाय।
अ॒ग्नेः सृ॒ष्टस्य॑ य॒तः।
विक॑ङ्कतं॒ भा आ॑र्च्छत्।
यद्वैक॑ङ्कतः संभा॒रो भव॑ति।
भा ए॒वाव॑रुन्धे।
सहृ॑दयो॒ऽग्निरा॒धेय॒ इत्या॑हुः।
म॒रुतो॒ऽद्भिर॒ग्निम॑तमयन्।
तस्य॑ ता॒न्तस्य॒ हृद॑य॒माच्छि॑न्दन्।
साऽशनि॑रभवत्।
यद॒शनि॑हतस्य वृ॒क्षस्य॑ संभा॒रो भव॑ति।
सहृ॑दयमे॒वाग्निमाध॑त्ते॥ १२॥
ऊषा॑ अभवन्नभवद्व॒ल्मीको॑ऽश्राम्य॒दप्र॑थय॒द्धृत्यै॑ बीभत्सथ॒
इत्या॑हू रुन्धे पर्ण॒त्वम॑शमयदच्छिन्द॒ꣳस्त्रीणि॑ च॥ ३॥

((tacchạmyai śami̱tvam ।
yacchámī̱mayáḥ saṃbhā̱ro bhaváti ।
śāntyā̱ aprádāhāya ।
a̱gneḥ sṛ̱ṣṭasyá ya̱taḥ ।
vikáṅkataṃ̱ bhā árcchat ।
yadvaikáṅkataḥ saṃbhā̱ro bhaváti ।
bhā ẹvāvárundhe ।
sahṛ́dayọ'gnirā̱dheya̱ ityáhuḥ ।
ma̱rutọ'dbhira̱gnimátamayan ।
tasyá tā̱ntasya̱ hṛdáya̱mācchíndan ।
sā'śanírabhavat ।
yada̱śaníhatasya vṛ̱kṣasyá saṃbhā̱ro bhaváti ।
sahṛ́dayamẹvāgnimādhátte ॥ 12 ॥
ūṣá
abhavannabhavadva̱lmīkó'śrāmya̱daprá̱thaya̱ddhṛty
aí bībhatsatha̱ ityáhū rundhe
parṇa̱tvamáśamayadacchinda̱ṁstrīṇí ca ॥ 3 ॥))

**[[1-1-4-1]]**

द्वा॒द॒शसु॒ विक्रा॒मेष्व॒ग्निमाद॑धीत।
द्वाद॑श॒ मासाः॑ संवत्स॒रः।
सं॒व॒त्स॒रादे॒वैन॑मव॒रुध्याध॑त्ते।
यद्द्वा॑द॒शसु॒ विक्रा॒मेष्वा॒दधी॑त।
परि॑मित॒मव॑रुन्धीत।
चक्षु॑र्निमि॒त आद॑धीत।

इ॒यद्द्वाद॑शविक्रा॒मा३ इति॑।
परि॑मितं॒ चै॒वाप॑रिमितं॒ चाव॑रुन्धे।
अनृ॑तं॒ वै वा॒चा वद॑ति।
अनृ॑तं॒ मन॑सा ध्यायति॥ १॥

((dvā̱da̱śasu̍ vikrā̱meṣva̱gnimāda̍dhīta ।
dvāda̍śa̱ māsā̎ḥ sa̱ṃvatsa̱raḥ ।
sa̱ṃva̱tsa̱rāde̱vaina̍mava̱rudhyādha̍tte ।
yaddvā̍da̱śasu̍ vikrā̱meṣvā̱dadhī̍ta ।
pari̍mita̱mava̍rundhīta ।
cakṣu̍rnimita̱ āda̍dhīta ।
iya̱ddvāda̍śavikrā̱mā3 iti̍ ।
pari̍mitaṃ ca̱ivāpa̍rimita̱ṃ cāva̍rundhe ।
anṛ̍ta̱ṃ vai vā̱cā va̍dati ।
anṛ̍ta̱ṃ mana̍sā dhyāyati ॥ 1 ॥))

**[[1-1-4-2]]**

च॒क्षुर्वै᳚ स॒त्यम्।
अद्रा३गित्या॑ह।
अद॑र्श॒मिति॑।
तत्स॒त्यम्।
यश्चक्षु॑र्निमिते॒ऽग्निमा॑ध॒त्ते।
स॒त्य ए॒वैन॒माध॑त्ते।
तस्मा॑दाहि॑ताग्नि॒र्नानृ॑तं वदेत्।
नास्य॑ ब्राह्म॒णोऽना᳚श्वान्गृ॒हे व॑सेत्।
स॒त्ये ह्य॑स्या॒ग्निराहि॑तः।
आ॒ग्नेयी वै रात्रिः॥ २॥

((cakṣu̱rvai sa̱tyam ।
adrā3gityā̍ha ।
adā̍rśa̱miti̍ ।
tatsa̱tyam ।
yaścakṣu̍rnimite̱'gnimā̍dha̱tte ।
sa̱tya e̱vaina̱mādha̍tte ।
tasmā̱dāhi̍tāgni̱rnānṛ̍taṃ vadet ।
nāsya̍ brāhma̱ṇo'nā̎śvāngṛ̱he va̍set ।
sa̱tye hya̍syā̱gnirāhi̍taḥ ।
ā̱gne̱yī vai rātri̍ḥ ॥ 2 ॥))

**[[1-1-4-3]]**

आ॒ग्ने॒याः प॒शवः॑।
ऐ॒न्द्रमहः॑।
नक्तं॒ गार्ह॑पत्यमाद॑धाति।
प॒शूने॒वाव॑रुन्धे।
दिवा᳚ऽऽहव॒नीय᳚म्।
इ॒न्द्रि॒यमे॒वाव॑रुन्धे।
अ॒र्धोदि॑ते॒ सूर्य॑ आहव॒नीय॒माद॑धाति।
ए॒तस्मि॒न्वै लो॒के प्र॒जाप॑तिः प्र॒जा अ॑सृजत।
प्र॒जा ए॒व तद्यज॑मानः सृजते।
अथो॑ भू॒तं चै॒व भ॑वि॒ष्यच्चाव॑रुन्धे॥ ३॥

((ā̱gne̱yāḥ pa̱śava̍ḥ ।
ai̱ndramaha̍ḥ ।
nakta̱ṃ gārha̍patya̱mādā̍dhāti ।
pa̱śūne̱vāvā̍rundhe ।
divā̎''hava̱nīyā̎m ।
i̱ndri̱yame̱vāvā̍rundhe ।
a̱rdhodi̍te̱ sūrya̍ āhava̱nīya̱mādā̍dhāti ।
e̱tasmi̱nvai lo̱ke pra̱jāpa̍tiḥ pra̱jā a̍sṛjata ।
pra̱jā e̱va tadyaja̍mānaḥ sṛjate ।
atho̍ bhū̱taṃ ca̱iva bha̍vi̱ṣyaccāvā̍rundhe ॥ 3 ॥))

**[[1-1-4-4]]**

इडा॒ वै मान॒वी य॑ज्ञानूका॒शिन्या॑सीत्।
साऽशृ॑णोत्।
असु॑रा अ॒ग्निमाद॑धत॒ इति॑।
तद॑गच्छत्।
त आ॑हव॒नीय॒मग्र॒ आद॑धत।
अथ॒ गार्ह॑पत्यम्।
अथा᳚न्वाहार्य॒पच॑नम्।
साऽब्र॑वीत्।
प्र॒तीच्ये॑षा॒ꣳ श्रीर॑गात्।
भ॒द्रा भू॒त्वा परा॑भविष्य॒न्तीति॑॥ ४॥

((i̱ḍā̱ vai mā̍na̱vī ya̍jñānūkā̱śinyā̍sīt ।
sā'śṛ̍ṇot ।
asu̍rā a̱gnimādā̍dhata̱ iti̍ ।
tadā̍gacchat ।
ta ā̍hava̱nīya̱magra̱ ādā̍dhata ।
atha̱ gārha̍patyam ।
athā̎nvāhārya̱pacā̍nam ।
sā'brā̍vīt ।
pra̱tīcye̍ṣā̱gͫ śrīrā̍gāt ।
bha̱drā bhū̱tvā parā̍bhaviṣya̱ntīti̍ ॥ 4 ॥))

**[[1-1-4-5]]**

यस्यै॒वम॒ग्निरा॑धी॒यते᳚।
प्र॒तीच्य॑स्य॒ श्रीरे॑ति।
भ॒द्रो भू॒त्वा परा॑भवति।
साऽशृ॑णोत्।

दे॒वा अ॒ग्निमाद॑धत॒ इति॑।
तद॑गच्छत्।
तँ᳚ऽन्वाहार्य॒पच॑न॒मग्र॒ आद॑धत।
अथ॒ गार्ह॑पत्यम्।
अथा॑हव॒नीय᳚म्।
साऽब्र॑वीत्॥ ५॥

((yasyai̠vama̠gnirā́dhīyatē̈ |
pra̠tīcyá̍sya̠ śrīré̍ti |
bha̠dro bhū̠tvā parā́bhavati |
sā'śṛ̠ṇot |
de̠vā a̠gnimādá̍dhata̠ iti̍ |
tadá̍gacchat |
tē̈'nvāhārya̠pacá̍na̠magra̠ ādá̍dhata |
atha̠ gārhá̍patyam |
athā́havа̠nīyä̍m |
sā'brá̍vīt || 5 ||))

**[[1-1-4-6]]**
प्राच्यै॑षा॒ꣳ श्रीर॑गात्।
भ॒द्रा भू॒त्वा सु॑व॒र्गं लो॒कमे᳚ष्यन्ति।
प्र॒जां तु न वे॑त्स्यन्त॒ इति॑।
यस्यै॒वम॒ग्निरा॑धी॒यते᳚।
प्राच्य॑स्य॒ श्रीरे॑ति।
भ॒द्रो भू॒त्वा सु॑व॒र्गं लो॒कमे॑ति।
प्र॒जां तु न वि॑न्दते।
साऽब्र॑वी॒दिडा॒ मनु᳚म्।
तथा॒ वा अ॒हं तवा॒ग्निमाधा᳚स्यामि।
यथा॒ प्र प्र॒जया॑ प॒शुभि॑र्मिथु॒नैर्जनि॒ष्यसे᳚॥ ६॥

((prācyé̍ṣā̠m̐ śrīrá̍gāt |
bha̠drā bhū̠tvā sú̍va̠rgaṃ lo̠kamē̈ṣyanti |
pra̠jāṃ tu na vé̍tsyanta̠ iti̍ |
yasyai̠vama̠gnirā́dhīyatē̈ |
prācyá̍sya̠ śrīré̍ti |
bha̠dro bhū̠tvā sú̍va̠rgaṃ lo̠kamé̍ti |
pra̠jāṃ tu na vi̍ndate |
sā'brá̍vī̠diḍā̠ manü̍m |
tathā̠ vā a̠haṃ tavā̠gnimādhā̈syāmi |
yathā̠ pra pra̠jayā́ pa̠śubhi̍rmithu̠nairjá̍ni̠ṣyasē̈ || 6 ||))

**[[1-1-4-7]]**
प्र॒त्य॒स्मिन्लो॒के स्था॒स्य॒सि॑।
अ॒भि सु॑व॒र्गं लो॒कं जे॒ष्यसीति॑।
गार्ह॑पत्य॒मग्र॒ आद॑धात्।
गार्ह॑पत्यं॒ वा अनु॑ प्र॒जाः प॒शवः॒ प्रजा॑यन्ते।
गार्ह॑पत्येनै॒वास्मै᳚ प्र॒जां प॒शून्प्राज॑नयत्।
अथा᳚न्वाहार्य॒पच॑नम्।
ति॒र्य॑ङ्ङि॒व वा अ॒यं लो॒कः।
अ॒स्मिन्ने॒व तेन॑ लो॒के प्रत्य॑तिष्ठत्।
अथा॑हव॒नीय᳚म्।
तेनै॒व सु॑व॒र्गं लो॒कम॒भ्य॑जयत्॥ ७॥

((pratya̠sminlo̠ke sthā̠syasi̍ |
a̠bhi sú̍va̠rgaṃ lo̠kaṃ je̠ṣyasīti̍ |
gārhá̍patya̠magra̠ ādá̍dhāt |
gārhá̍patya̠ṃ vā anú̍ pra̠jāḥ pa̠śava̠ḥ prajā́yante |
gārhá̍patyenai̠vāsmai̋ pra̠jāṃ pa̠śūnprājá̍nayat |
athā̈nvāhārya̠pacá̍nam |
ti̠ryaṅṅi̍va̠ vā a̠yaṃ lo̠kaḥ |
a̠sminne̠va tená̍ lo̠ke pratyá̍tiṣṭhat |
athā́havа̠nīyä̍m |
tenai̠va sú̍va̠rgaṃ lo̠kama̠bhyá̍jayat || 7 ||))

**[[1-1-4-8]]**
यस्यै॒वम॒ग्निरा॑धी॒यते᳚।
प्र प्र॒जया॑ प॒शुभि॑र्मिथु॒नैर्जा॑यते।
प्रत्य॒स्मिँल्लो॒के ति॑ष्ठति।
अ॒भि सु॑व॒र्गं लो॒कं ज॑यति।
यस्य॒ वा अय॑थादेवतम॒ग्निरा॑धी॒यते᳚।
आ दे॒वता᳚भ्यो वृश्च्यते।
पापी॑यान्भवति।
यस्य॑ यथादे॒वतम्।
न दे॒वता᳚भ्य॒ आ वृ॑श्च्यते।
वसी॑यान्भवति॥ ८॥

((yasyai̠vama̠gnirā́dhīyatē̈ |
pra pra̠jayā́ pa̠śubhi̍rmithu̠nairjā́yate |
pratya̠smim̐llo̠ke ti̍ṣṭhati |
a̠bhi sú̍va̠rgaṃ lo̠kaṃ já̍yati |
yasya̠ vā ayá̍thādevatama̠gnirā́dhīyatē̈ |
ā de̠vatā̈bhyo vṛścyate |
pāpi̍yānbhavati |
yasyá̍ yathādeva̠tam |
na de̠vatā̈bhya̠ ā vṛ̍ścyate |
vasi̍yānbhavati || 8 ||))

**[[1-1-4-9]]**
भृगू॑णां त्वाऽङ्गिरसां व्रतपते व्रतेनाद॑धामीति
भृग्व॒ङ्गि॒रसा॒माद॑ध्यात्।

आदित्यानां त्वा देवानां व्रतपते व्रतेनादधामीत्यन्यासां ब्राह्मणीनां प्रजानाम्।
वरुणस्य त्वा राज्ञो व्रतपते व्रतेनादधामीति राज्ञः।
इन्द्रस्य त्वेन्द्रियेण व्रतपते व्रतेनादधामीति राजन्यस्य।
मनोस्त्वा ग्रामण्यो व्रतपते व्रतेनादधामीति वैश्यस्य।
ऋभूणां त्वा देवानां व्रतपते व्रतेनादधामीति रथकारस्य।
यथादेवतमग्निराधीयते।
न देवताभ्य आ वृश्च्यते।
वसीयान्भवति॥ ९॥
ध्यायति वै रात्रिश्चावरुन्धे
भविष्यन्तीत्यब्रवीज्जनिष्यसेऽजयद्वसीयान्भवति नव च॥ ४॥

((bhṛgūṇām tvā'ṅgirasām vratapate vratenādadhāmīti bhṛgvaṅgirasāmādadhyāt |
ādityānām tvā devānām vratapate vratenādadhāmītyanyāsām brāhmaṇīnām prajānām |
varuṇasya tvā rājño vratapate vratenādadhāmīti rājñaḥ |
indrasya tvendriyeṇa vratapate vratenādadhāmīti rājanyasya |
manostvā grāmaṇyo vratapate vratenādadhāmīti vaiśyasya |
ṛbhūṇām tvā devānām vratapate vratenādadhāmīti rathakārasya |
yathādevatamagnirādhīyate |
na devatābhya ā vṛścyate |
vasīyānbhavati || 9 ||
dhyāyati vai rātriścāvarundhe
bhaviṣyantītyabravījjaniṣyase'jayadvasīyānbhavati nava ca || 4 ||))

**[[1-1-5-1]]**

प्रजापतिर्वाचः सत्यमपश्यत्।
तेनाग्निमाधत्त।
तेन वै स आर्ध्नोत्।
भूर्भुवः सुवरित्याह।
एतद्वै वाचः सत्यम्।
य एतेनाग्निमाधत्ते।
ऋध्नोत्येव।
अथो सत्यप्राशूरेव भवति।
अथो य एवं विद्वानभिचरति।
स्तृणुत एवैनम्॥ १॥

((prajāpatirvācaḥ satyamapaśyat |
tenāgnimādhatta |
tena vai sa ārdhnot |
bhūrbhuvaḥ suvarityāha |
etadvai vācaḥ satyam |
ya etenāgnimādhatte |
ṛdhnotyeva |
atho satyaprāśūreva bhavati |
atho ya evaṃ vidvānabhicarati |
stṛṇuta evainām || 1 ||))

**[[1-1-5-2]]**

भूरित्याह।
प्रजा एव तद्यजमानः सृजते।
भुव इत्याह।
अस्मिन्नेव लोके प्रतितिष्ठति।
सुवरित्याह।
सुवर्ग एव लोके प्रतितिष्ठति।
त्रिभिरक्षरैर्गार्हपत्यमादधाति।
त्रय इमे लोकाः।
एष्वेवैनं लोकेषु प्रतिष्ठितमाधत्ते।
सर्वैः पञ्चभिराहवनीयम्॥ २॥

((bhūrityāha |
prajā eva tadyajamānaḥ sṛjate |
bhuva ityāha |
asminneva loke pratitiṣṭhati |
suvarityāha |
suvarga eva loke pratitiṣṭhati |
tribhirakṣarairgārhapatyamādadhāti |
traya ime lokāḥ |
eṣvevainam lokeṣu pratiṣṭhitamādhatte |
sarvaiḥ pañcabhirāhavanīyām || 2 ||))

**[[1-1-5-3]]**

सुवर्गाय वा एष लोकायाधीयते।
यदाहवनीयः।
सुवर्ग एवास्मै लोके वाचः सत्यꣳ सर्वमाप्नोति।
त्रिभिर्गार्हपत्यमादधाति।
पञ्चभिराहवनीयम्।
अष्टौ संपद्यन्ते।
अष्टाक्षरा गायत्री।
गायत्रोऽग्निः।
यावानेवाग्निः।

तमाध॑त्ते॥ ३॥

((su̱va̱rgāya̱ vā e̱ṣa lo̱kāyādhi̍yate |
yadā̍hava̱nīya̍ḥ |
su̱va̱rga e̱vāsmai̍ lo̱ke vā̱caḥ sa̱tyam̐ sarva̍māpnoti |
tri̱bhirgārha̍patya̱māda̍dhāti |
pa̱ñcabhi̍rāhava̱nīya̎m |
a̱ṣṭau sam̱pa̍dyante |
a̱ṣṭākṣa̍rā gāya̱trī |
gā̱ya̱tro̎'gniḥ |
yāva̍ne̱vāgniḥ |
tamādha̍tte || 3 ||))

**[[1-1-5-4]]**

प्र॒जाप॑तिः प्र॒जा अ॑सृजत।
ता अ॑स्मात्सृ॒ष्टाः परा॑चीरायन्न्।
ताभ्यो॒ ज्योति॒रुद॑गृह्णात्।
तं ज्योति॒ः पश्य॑न्तीः प्र॒जा अ॒भिस॒मावर्॑तन्त।
उ॒परी॑वा॒ग्निमु॒द्गृ॑ह्णीयादु॒द्धर॑न्न्।
ज्यो॑तिरे॒व पश्य॑न्तीः प्र॒जा यज॑मानम॒भिस॒मावर्॑तन्ते।
प्र॒जाप॑ते॒रक्ष्य॑श्वयत्।
तत्परा॑ऽपतत्।
तदश्वो॑ऽभवत्।
तदश्व॑स्याश्व॒त्वम्॥ ४॥

((pra̱jāpa̍tiḥ pra̱jā a̍sṛjata |
tā a̍smātsṛ̱ṣṭāḥ parā̍cīrāyann |
tābhyo̱ jyoti̱ruda̍gṛhṇāt |
taṃ jyoti̱ḥ paśya̍ntīḥ pra̱jā a̱bhisa̱māva̍rtanta |
u̱parī̍vā̱gnimu̱dgṛ̍hṇīyādu̱ddhara̍nn |
jyo̍tire̱va paśya̍ntīḥ pra̱jā
yaja̍mānama̱bhisa̱māva̍rtante |
pra̱jāpa̍te̱rakṣya̍śvayat |
tatparā̍'patat |
tadaśvo̍'bhavat |
tadaśva̍syāśva̱tvam || 4 ||))

**[[1-1-5-5]]**

ए॒ष वै प्र॒जाप॑तिः।
यद॒ग्निः।
प्रा॒जा॒प॒त्योऽश्व॑ः।
यदश्व॑ं पु॒रस्ता॒न्नय॑ति।
स्वमे॒व चक्षु॒ः पश्य॑न्प्र॒जाप॑ति॒रनूदे॑ति।
व॒ज्री वा ए॒षः।
यदश्व॑ः।
यदश्व॑ं पु॒रस्ता॒न्नय॑ति।
जा॒ताने॒व भ्रातृ॑व्या॒न्प्रणु॑दते।
पु॒नरा॒वर्त॑यति॥ ५॥

((e̱ṣa vai pra̱jāpa̍tiḥ |
yada̱gniḥ |
prā̱jā̱pa̱tyo'śva̍ḥ |
yadaśva̍ṃ pu̱rastā̱nnaya̍ti |
svame̱va cakṣu̱ḥ paśya̍nprajāpa̍ti̱ranūde̍ti |
va̱jrī vā e̱ṣaḥ |
yadaśva̍ḥ |
yadaśva̍ṃ pu̱rastā̱nnaya̍ti |
jā̱tāne̱va bhrātṛ̍vyā̱npraṇu̍date |
puna̱rāva̍rtayati || 5 ||))

**[[1-1-5-6]]**

ज॒नि॒ष्यमा॑णाने॒व प्रति॑नुदते।
न्या॑ह॒वनी॑यो॒ गार्ह॑पत्यमकामयत।
नि गार्ह॑पत्य आह॒वनी॑यम्।
तौ वि॒भाज॒ं नाश॑क्नोत्।
सोऽश्व॑ः पूर्व॒वाड्भू॒त्वा।
प्राञ्च॒ं पूर्व॒मुद॑वहत्।
तत्पूर्व॒वाह॑ः पूर्व॒वाट्त्वम्।
यदश्व॑ं पु॒रस्ता॒न्नय॑ति।
विभ॑क्तिरे॒वैन॑यो॒ः सा।
अथो॒ नाना॑वीर्या॒वे॒वैनौ॑ कुरुते॥ ६॥

((ja̱ni̱ṣyamā̍ṇāne̱va prati̍nudate |
nyā̍hava̱nīyo̱ gārha̍patyamakāmayata |
ni gārha̍patya āhava̱nīya̎m |
tau vi̱bhāja̱ṃ nāśa̍knot |
so'śva̍ḥ pūrva̱vāḍbhū̱tvā |
prāñca̱ṃ pūrva̱muda̍vahat |
tatpū̎rva̱vāha̍ḥ pūrvavā̱ṭtvam |
yadaśva̍ṃ pu̱rastā̱nnaya̍ti |
vibha̍ktire̱vaina̍yo̱ḥ sā |
atho̱ nānā̍vīryāve̱vainau̍ kurute || 6 ||))

**[[1-1-5-7]]**

यदु॒पर्यु॑परि॒ शिरो॒ हरे॑त्।
प्रा॒णान् विच्छि॑न्द्यात्।
अ॒धोऽध॒ः शिरो॑ हरति।
प्रा॒णानां॑ गोपी॒थाय॑।
इ॒यत्यग्रे॑ हरति।
अथे॒यत्यथे॑यति।
त्रय॑ इ॒मे लो॒काः।

ए॒ष्वे॑वैनं॑ लो॒केषु॑ प्रति॑ष्ठित॒माध॑त्ते।
प्र॒जाप॑तिर॒ग्निम॑सृजत।
सो॑ऽबिभे॒त्प्र मा॑ धक्ष्य॒तीति॑॥ ७॥

((yaduparyupari śiro haret |
prāṇān vicchindyāt |
adho'dhaḥ śiro harati |
prāṇānāṃ gopīthāya |
iyatyagre harati |
atheyatyatheyati |
traya ime lokāḥ |
eṣvevainaṃ lokeṣu pratiṣṭhitamādhatte |
prajāpatiragnimasṛjata |
so'bibhetpra mā dhakṣyatīti || 7 ||))

**[[1-1-5-8]]**

तस्य॑ त्रे॒धा म॑हि॒मानं॒ व्यौ॑हत्।
शान्त्या॒ अप्र॑दाहाय।
यत्त्रे॒धाऽग्निरा॑धी॒यते॑।
म॒हि॒मान॑मे॒वास्य॒ तद्व्यू॑हति।
शान्त्या॒ अप्र॑दाहाय।
पु॒नरा॑वर्तयति।
म॒हि॒मान॑मे॒वास्य॒ संद॑धाति।
प॒शुर्वा॑ ए॒षः।
यदश्वः॑।
ए॒ष रु॒द्रः॥ ८॥

((tasya tredhā mahimānaṃ vyauhat |
śāntyā apradāhāya |
yattredhā'gnirādhīyate |
mahimānamevāsya tadvyūhati |
śāntyā apradāhāya |
punarāvartayati |
mahimānamevāsya saṃdadhāti |
paśurvā eṣaḥ |
yadaśvaḥ |
eṣa rudraḥ || 8 ||))

**[[1-1-5-9]]**

यद॒ग्निः।
यदश्व॑स्य प॒दे॑ऽग्निमा॑द॒ध्यात्।
रु॒द्राय॑ प॒शून॒पि॑दध्यात्।
अ॒प॒शुर्यज॑मानः स्यात्।
यन्नाक्र॒मये॑त्।
अन॑वरुद्धा अस्य प॒शवः॑ स्युः।
पा॒र्श्वत आक्र॑मयेत्।
यथाऽऽहि॑तस्या॒ग्नेरङ्गा॑रा अभ्यव॒वर्ते॑रन्न्।
अव॑रुद्धा अस्य प॒शवो॒ भव॑न्ति।
न रु॒द्रायापि॑दधाति॥ ९॥

((yadagniḥ |
yadaśvasya pade'gnimādadhyāt |
rudrāya paśūnapidadhyāt |
apaśuryajamānaḥ syāt |
yannākramayet |
anavaruddhā asya paśavaḥ syuḥ |
pārśvata ākramayet |
yathā''hitasyāgneraṅgārā abhyavavarterann |
avaruddhā asya paśavo bhavanti |
na rudrāyāpidadhāti || 9 ||))

**[[1-1-5-10]]**

त्रीणि॑ ह॒वीꣳषि॒ निर्व॑पति।
वि॒राज॑ ए॒व विक्रा॑न्तं॒ यज॑मा॒नोऽनु॒ विक्र॑मते।
अ॒ग्नये॒ पव॑मानाय।
अ॒ग्नये॑ पाव॒काय॑।
अ॒ग्नये॒ शुच॑ये।
यद॒ग्नये॒ पव॑मानाय नि॒र्वप॑ति।
पु॒नात्ये॒वैन॑म्।
यद॒ग्नये॑ पाव॒काय॑।
पूत ए॒वास्मि॑न्न॒न्नाद्यं॑ दधाति।
यद॒ग्नये॒ शुच॑ये।
ब्र॒ह्म॒व॒र्च॒सम॒ेवास्मि॑न्नु॒परि॑ष्टाद्दधाति॥ १०॥
ए॒नमा॒ह॒व॒नीयं॑ धत्तेऽश्व॒त्वं व॑र्तयति कुरु॒त इति॑ रु॒द्रो द॑धाति॒
यद॒ग्नये॒ शुच॑य॒ एकं॑ च॥ ५॥

((trīṇi havīꣳṣi nirvapati |
virāja eva vikrāntaṃ yajamāno'nu vikramate |
agnaye pavamānāya |
agnaye pāvakāya |
agnaye śucaye |
yadagnaye pavamānāya nirvapati |
punātyevainam |
yadagnaye pāvakāya |
pūta evāsminnannādyaṃ dadhāti |
yadagnaye śucaye |
brahmavarcasamevāsminnupariṣṭāddadhāti || 10 ||
enamāhavanīyaṃ dhatte'śvatvaṃ vartayati kuruta
iti rudro dadhāti yadagnaye śucaya ekaṃ ca || 5 ||))

**[[1-1-6-1]]**

दे॒वा॒सु॒राः संय॑त्ता आसन्न्।

ते दे॒वा वि॑ज॒यमु॑प॒यन्तः॑।
अ॒ग्नौ वा॒मं वसु॒ संन्य॑दधत।
इ॒दमु॑ नो भविष्यति।
यदि॑ नो जे॒ष्यन्तीति॑।
तद॒ग्निर्नोत्सह॑मशक्नोत्।
तत्त्रे॒धा विन्य॑दधात्।
प॒शुषु॒ तृती॑यम्।
अ॒प्सु तृती॑यम्।
आ॒दि॒त्ये तृती॑यम्॥ १॥

((de̱vāsu̱rāḥ saṃya̍ttā āsann ।
te de̱vā vi̍ja̱yamu̍pa̱yanta̍ḥ ।
a̱gnau vā̱mam vasu̱ saṃnya̍dadhata ।
i̱damu̍ no bhaviṣyati ।
yadi̍ no je̱ṣyantīti̍ ।
tada̱gnirnotsaha̍maśaknot ।
tattre̱dhā vinya̍dadhāt ।
pa̱śuṣu̱ tṛtī̍yam ।
a̱psu tṛtī̍yam ।
ā̱di̱tye tṛtī̍yam ॥ 1 ॥))

**[[1-1-6-2]]**

तद्दे॒वा वि॒जित्य॑।
पुन॒रवा॑रुरुत्सन्त।
तेँऽग्नये॒ पव॑मानाय पुरो॒डाश॑म॒ष्टाक॑पालं॒ निर॑वपन्।
प॒शवो॒ वा अ॒ग्निः पव॑मानः।
यदे॒व प॒शुष्वासी॑त्।
तत्तेनावा॑रुन्धत।
तेँऽग्नये॑ पाव॒काय॑।
आपो॒ वा अ॒ग्निः पा॑व॒कः।
यदे॒वाप्स्वासी॑त्।
तत्तेनावा॑रुन्धत॥ २॥

((tadde̱vā vi̱jitya̍ ।
puna̱ravā̍rurutsanta ।
tē̍'gnaye̱ pava̍mānāya puro̱ḍāśa̍ma̱ṣṭāka̍pālam̱ nira̍vapan ।
pa̱śavo̱ vā a̱gniḥ pava̍mānaḥ ।
yade̱va pa̱śuṣvāsī̍t ।
tattenāvā̍rundhata ।
tē̍'gnaye̍ pāva̱kāya̍ ।
āpo̱ vā a̱gniḥ pā̍va̱kaḥ ।
yade̱vāpsvāsī̍t ।
tattenāvā̍rundhata ॥ 2 ॥))

**[[1-1-6-3]]**

तेँऽग्नये॒ शुच॑ये।
अ॒सौ वा आ॑दि॒त्योँऽग्निः शुचि॑ः।
यदे॒वादि॒त्य आसी॑त्।
तत्तेनावा॑रुन्धत।
ब्र॒ह्म॒वा॒दिनो॑ वदन्ति।
त॒नुवो॒ वावैता अ॑ग्न्या॒धेय॑स्य।
आ॒ग्ने॒यो वा अ॒ष्टाक॑पालोऽग्न्या॒धेय॒मिति॑।
यत्तं नि॒र्वपे॑त्।
नैतानि॑।
यथा॒ऽऽत्मा स्यात्॥ ३॥

((tē̍'gnaye̱ śuca̍ye ।
a̱sau vā ā̍di̱tyō̍'gniḥ śuci̍ḥ ।
yade̱vādi̱tya āsī̍t ।
tattenāavā̍rundhata ।
bra̱hma̱vā̱dino̍ vadanti ।
ta̱nuvo̱ vāvaitā a̍gnyā̱dheya̍sya ।
ā̱gne̱yo vā a̱ṣṭāka̍pālo'gnyā̱dheya̱miti̍ ।
yattam̱ ni̱rvapē̍t ।
naitāni̍ ।
yathā̱''tmā syāt ॥ 3 ॥))

**[[1-1-6-4]]**

नाङ्गा॑नि।
ता॒दृगे॒व तत्।
यदे॒तानि॑ नि॒र्वपे॑त्।
न तम्।
यथाऽङ्गा॑नि॒ स्युः।
नात्मा।
ता॒दृगे॒व तत्।
उ॒भया॑नि स॒ह नि॒रुप्या॑णि।
य॒ज्ञस्य॑ सात्म॒त्वाय॑।
उ॒भयं॒ वा ए॒तस्यैँन्द्रि॒यं वी॒र्य॑माप्यते॥ ४॥

((nāṅgā̍ni ।
tā̱dṛge̱va tat ।
yade̱tāni̍ ni̱rvapē̍t ।
na tam ।
yathā'ṅgā̍ni̱ syuḥ ।
nātmā ।
tā̱dṛge̱va tat ।
u̱bhayā̍ni sa̱ha ni̱rupyā̍ṇi ।
ya̱jñasya̍ sātma̱tvāya̍ ।
u̱bhaya̱ṃ vā e̱tasyē̍ndri̱yaṃ vī̱ryā̍māpyate ॥ 4 ॥))

**[[1-1-6-5]]**

योँऽग्निमा॑ध॒त्ते।

ऐ॒न्द्रा॒ग्नमेका॑दशकपा॒लमनु॒निर्व॑पेत्।

आ॒दि॒त्यं च॒रुम्।

इ॒न्द्रा॒ग्नी वै दे॒वाना॒मया॑तयामानौ।

ये ए॒व दे॒वते॒ अया॑तयाम्नी।

ताभ्या॑मे॒वास्मा॑ इ॒न्द्रि॒यं वी॒र्य॑मव॑रुन्धे।

आ॒दि॒त्यो भ॑वति।

इ॒यं वा अदि॑तिः।

अ॒स्यामे॒व प्रति॑तिष्ठति।

धे॒न्वै वा ए॒तद्रेत॑ः॥ ५॥

((yŏ'gnimádhatte ।
aindrāgnamekádaśakapālamanunirvápet ।
ādityaṃ carum ।
indrāgnī vai devānāmayátayāmānau ।
ye eva devate ayátayāmnī ।
tābhyámevāsmá indriyaṃ vīryámavárundhe ।
ādityo bhávati ।
iyaṃ vā aditiḥ ।
asyāmeva pratitiṣṭhati ।
dhenvai vā etadretáḥ ॥ 5 ॥))

**[[1-1-6-6]]**

यदाज्य॑म्।

अ॒न॒डु॒ह॑स्तण्डु॒लाः।

मि॒थु॒नमे॒वाव॑रुन्धे।

घृ॒ते भ॑वति।

य॒ज्ञस्या॒लूँक्षान्तत्वाय।

च॒त्वार॑ आर्षे॒याः प्राश्ञ॑न्ति।

दि॒शामे॒व ज्योति॑षि जुहोति।

प॒शवो॒ वा ए॒तानि॑ ह॒वीꣳषि॑।

ए॒ष रु॒द्रः।

यद॒ग्निः॥ ६॥

((yadājyám ।
anaduhástaṇḍulāḥ ।
mithunamevāvárundhe ।
ghṛte bhávati ।
yajñasyālūkṣāntatvāya ।
catvārá ārṣeyāḥ prāśnánti ।
diśāmeva jyotiṣi juhoti ।
paśavo vā etāni havīṃṣi ।
eṣa rudraḥ ।
yadagniḥ ॥ 6 ॥))

**[[1-1-6-7]]**

यत्स॒द्य ए॒तानि॑ ह॒वीꣳषि॑ नि॒र्वपे॑त्।

रु॒द्राय॑ प॒शून॑पि॑ दध्यात्।

अ॒प॒शुर्यज॑मानः स्यात्।

यन्नानु॑नि॒र्वपे॑त्।

अन॑वरुद्धा अस्य प॒शव॑ः स्युः।

द्वा॒द॒शसु॒ रात्री॒ष्वनु॒ निर्व॑पेत्।

सं॒व॒त्स॒रप्र॑तिमा॒ वै द्वाद॑श॒ रात्र॑यः।

सं॒व॒त्स॒रेणै॒वास्मै॑ रु॒द्रꣳ शम॑यि॒त्वा।

प॒शून॑व॑रुन्धे।

यदेक॑मेकमे॒तानि॑ ह॒वीꣳषि॑ नि॒र्वपे॑त्॥ ७॥

((yatsadya etāni havīṃṣi nirvapet ।
rudrāyá paśūnapi dadhyāt ।
apaśuryajámānaḥ syāt ।
yannānúnirvapet ।
anávaruddhā asya paśaváḥ syuḥ ।
dvādaśasu rātrīṣvanu nirvápet ।
saṃvatsaraprátimā vai dvādáśa rātráyaḥ ।
saṃvatsareṇaivāsmai rudraṃ śámayitvā ।
paśūnavárundhe ।
yadekámekametāni havīṃṣi nirvapet ॥ 7 ॥))

**[[1-1-6-8]]**

यथा॒ त्रीण्या॒वप॑नानि पू॒रये॑त्।

ता॒दृक्तत्।

न प्र॒जन॑न॒मुच्छिꣳ॑षेत्।

एक॑ं नि॒रुप्य॑।

उत्त॑रे॒ सम॑स्येत्।

तृ॒तीय॑मे॒वास्मै॑ लो॒कमुच्छिꣳ॑षति प्र॒जन॑नाय।

तं प्र॒जया॑ प॒शुभि॒रनु॒ प्रजा॑यते।

अथो॑ य॒ज्ञस्यै॒वैषाऽभिक्रा॑न्तिः।

र॒थ॒च॒क्रं प्रव॑र्तयति।

म॒नु॒ष्य॒र॒थेनै॒व दे॑वर॒थं प्र॒त्यव॑रोहति॥ ८॥

((yathā trīṇyāvapánāni pūrayet ।
tādṛktat ।
na prajanánamucchiṃṣet ।
ekaṃ nirupyá ।
uttáre samásyet ।
tṛtīyámevāsmai lokamucchiṃṣati prajanánāya ।
taṃ prajayá paśubhiranu prajáyate ।
athó yajñasyaivaiṣā'bhikrāntiḥ ।
rathacakraṃ pravártayati ।

ma̱nu̱ṣya̱ra̱thenai̱va de̍vara̱thaṃ pra̱tyava̍rohati || 8 ||))

**[[1-1-6-9]]**

ब्र॒ह्म॒वा॒दिनो॑ वदन्ति।
हो॒त॒व्य॑मग्निहो॒त्रा३ं॑न हो॑त॒व्या३मिति॑।
यद्यजु॑षा जुहु॒यात्।
अय॑थापू॒र्वमाहु॑ती जुहुयात्।
यन्न जु॑हु॒यात्।
अ॒ग्निः परा॑भवेत्।
तू॒ष्णीमे॒व हो॑त॒व्य॒म्।
य॒था॒पू॒र्वमाहु॑ती जु॒होति॑।
नाग्निः परा॑भवति।
अ॒ग्नीधे॑ ददाति॥ ९॥

((bra̱hma̱vā̱dino̍ vadanti |
ho̱ta̱vya̍magniho̱trā̱m3na ho̍ta̱vyā3miti̍ |
yadyaju̍ṣā juhu̱yāt |
aya̍thāpūrva̱māhu̍tī juhuyāt |
yanna ju̍hu̱yāt |
a̱gniḥ parā̍bhavet |
tū̱ṣṇīme̱va ho̍ta̱vya̍m |
ya̱thā̱pū̱rvamāhu̍tī ju̱hoti̍ |
nāgniḥ parā̍bhavati |
a̱gnīdhe̍ dadāti || 9 ||))

**[[1-1-6-10]]**

अ॒ग्निमु॑खाने॒वर्तून्प्री॑णाति।
उ॒प॒बर्ह॑णं ददाति।
रू॒पाणा॒मव॑रुद्ध्यै।
अश्वं॑ ब्र॒ह्मणे॑।
इ॒न्द्रि॒यमे॒वाव॑रुन्धे।
धे॒नुꣳ होत्रे॑।
आ॒शिष॑ ए॒वाव॑रुन्धे।
अ॒न॒ड्वाह॑मध्व॒र्यवे॑।
वह्नि॒र्वा अ॑न॒ड्वान्।
वह्नि॑रध्व॒र्युः॥ १०॥

((a̱gnimu̍khāne̱vartūnprī̍ṇāti |
u̱pa̱barha̍ṇaṃ dadāti |
rū̱pāṇā̱mava̍ruddhyai |
aśva̍ṃ bra̱hmaṇe̍ |
i̱ndri̱yame̱vāva̍rundhe |
dhe̱nuṃ hotre̍ |
ā̱śiṣa̍ e̱vāva̍rundhe |
a̱na̱ḍvāha̍madhva̱ryave̍ |
vahni̱rvā a̍na̱ḍvān |
vahni̍radhva̱ryuḥ || 10 ||))

**[[1-1-6-11]]**

वह्नि॑नैव वह्नि॑ य॒ज्ञस्याव॑रुन्धे।
मि॒थु॒नौ गावौ॑ ददाति।
मि॒थु॒नस्याव॑रुद्ध्यै।
वासो॑ ददाति।
स॒र्व॒ दे॒व॒त्यं॑ वै वास॑ः।
सर्वा॑ ए॒व दे॒वताः॑ प्रीणाति।
आ द्वाद॒॑शभ्यो॑ ददाति।
द्वाद॑श॒ मासाः॑ संवत्स॒रः।
सं॒व॒त्स॒र ए॒व प्रति॑तिष्ठति।
काम॑मू॒र्ध्वं देय॑म्।
अप॑रिमित॒स्याव॑रुद्ध्यै॥ ११॥
आ॒दि॒त्ये तृ॒तीय॑म॒प्स्वासी॒त्तत्तेनाव॑रुन्धत॒ स्यादा॑प्यते॒ रेतो॒ऽग्निरेक॑मेकमे॒तानि॑ ह॒वीꣳषि॑ नि॒र्वपे॑त्प्र॒त्यव॑रोहति ददात्यध्व॒र्युर्देय॒मेकं॑ च॥ ६॥

((vahni̍naiva vahni̍ ya̱jñasyāva̍rundhe |
mi̱thu̱nau gāvau̍ dadāti |
mi̱thu̱nasyāva̍ruddhyai |
vāso̍ dadāti |
sa̱rva̱ de̱va̱tya̍ṃ vai vāsa̍ḥ |
sarvā̍ e̱va de̱vatā̎ḥ prīṇāti |
ā dvā̍da̱śabhyo̍ dadāti |
dvāda̍śa̱ māsā̎ḥ saṃvatsa̱raḥ |
sa̱ṃva̱tsa̱ra e̱va prati̍tiṣṭhati |
kāma̍mū̱rdhvaṃ deyā̎m |
apa̍rimita̱syāva̍ruddhyai || 11 ||
ā̱di̱tye tṛ̱tīya̍ma̱psvāsī̱ttattenāva̍rundhata̱ syādā̎pyate̱ reto̱'gnireka̍mekame̱tāni̍ ha̱vīꣳṣi̍ ni̱rvape̎tpra̱tyava̍rohati dadātyadhva̱ryurdeya̱mekaṃ̍ ca || 6 ||))

**[[1-1-7-1]]**

घ॒र्मः शिर॒स्तद॒यम॒ग्निः।
संप्रि॑यः प॒शुभि॑र्भुवत्।
छ॒र्दिस्तो॒काय॒ तन॑याय यच्छ।
वात॑ः प्रा॒णस्तद॒यम॒ग्निः।
संप्रि॑यः प॒शुभि॑र्भुवत्।
स्व॒दि॒तं तो॒काय॒ तन॑याय पि॒तुं प॑च।
प्राचीम॒नु॒ प्र॒दिश॒ं प्रेहि॑ वि॒द्वान्।

अ॒ग्नेर॑ग्ने पु॒रो अ॑ग्निर्भ॑वे॒ह।
विश्वा॑ आशा॑ दी॒द्या॑नो॒ विभा॑हि।
ऊर्जँ नो धेहि द्विप॒दे॒ चतु॑ष्पदे॥ १॥

((gha̱rmaḥ śira̱stada̱yama̱gniḥ ।
sa̱mpri̍yaḥ pa̱śubhi̍rbhuvat ।
cha̱rdisto̱kāya̱ tana̍yāya yaccha ।
vāta̍ḥ prā̱ṇastada̱yama̱gniḥ ।
sa̱mpri̍yaḥ pa̱śubhi̍rbhuvat ।
sva̱di̱taṃ to̱kāya̱ tana̍yāya pi̱tuṃ pa̍ca ।
prācī̱manu̍ pra̱diśa̱m prehi̍ vi̱dvān ।
a̱gnera̍gne pu̱ro a̍gnirbhave̱ha ।
viśva̱ āśa̱ dīdya̍no̱ vibha̍hi ।
ūrja̍ṃ no dhehi dvi̱pade̱ catu̍ṣpade ॥ 1 ॥))

**[[1-1-7-2]]**
अ॒र्कश्चक्षु॒स्तद॒सौ सू॒र्य॒स्तद॒यम॒ग्निः।
संप्रि॑यः प॒शुभि॑र्भुवत्।
यत्ते॑ शुक्र शु॒क्रं वर्च॑ः शु॒क्रा त॒नूः।
शु॒क्रं ज्योति॒रज॑स्रम्।
तेन॑ मे दीदिहि॒ तेन॒ त्वाऽऽद॑धे।
अ॒ग्निना॑ऽग्ने ब्रह्म॑णा।
आ॒न॒शे व्या॑नशे॒ सर्व॒मायु॒र्व्या॑नशे।
ये ते॑ अग्ने शि॒वे त॒नुवौ॑।
वि॒राट्च॑ स्व॒राट्च॑।
ते मा वि॑शता॒ं ते मा॑ जिन्वताम्॥ २॥

((a̱rkaścakṣu̱stada̱sau sūrya̱stada̱yama̱gniḥ ।
sa̱mpri̍yaḥ pa̱śubhi̍rbhuvat ।
yatte̍ śukra śu̱kraṃ varca̍ḥ śu̱krā ta̱nūḥ ।
śu̱kraṃ jyoti̱raja̍sram ।
tena̍ me dīdihi̱ tena̱ tvā''da̍dhe ।
a̱gninā̍'gne̱ brahma̍ṇā ।
ā̱na̱śe vyā̍naśe̱ sarva̱māyu̱rvyā̍naśe ।
ye te̍ agne śi̱ve ta̱nuvau̍ ।
vi̱rāṭca̍ sva̱rāṭca̍ ।
te mā vi̍śatā̱m te mā̍ jinvatām ॥ 2 ॥))

**[[1-1-7-3]]**
ये ते॑ अग्ने शि॒वे त॒नुवौ॑।
स॒म्राट्चा॑भि॒भूश्च॑।
ते मा वि॑शता॒ं ते मा॑ जिन्वताम्।
ये ते॑ अग्ने शि॒वे त॒नुवौ॑।
वि॒भूश्च॑ परि॒भूश्च॑।
ते मा वि॑शता॒ं ते मा॑ जिन्वताम्।
ये ते॑ अग्ने शि॒वे त॒नुवौ॑।
प्र॒भ्वी च॒ प्रभू॑तिश्च।
ते मा वि॑शता॒ं ते मा॑ जिन्वताम्।
यास्ते॑ अग्ने शि॒वास्त॒नुव॑ः।
ताभि॒स्त्वाऽऽद॑धे।
यास्ते॑ अग्ने घो॒रास्त॒नुव॑ः।
ताभि॑र॒मुं ग॑च्छ॥ ३॥
चतु॑ष्पदे जिन्वतां त॒नुव॒स्त्रीणि॑ च॥ ७॥

((ye te̍ agne śi̱ve ta̱nuvau̍ ।
sa̱mrāṭcā̍bhi̱bhūśca̍ ।
te mā vi̍śatā̱m te mā̍ jinvatām ।
ye te̍ agne śi̱ve ta̱nuvau̍ ।
vi̱bhūśca̍ pari̱bhūśca̍ ।
te mā vi̍śatā̱m te mā̍ jinvatām ।
ye te̍ agne śi̱ve ta̱nuvau̍ ।
pra̱bhvī ca̱ prabhū̍tiśca ।
te mā vi̍śatā̱m te mā̍ jinvatām ।
yāste̍ agne śi̱vāsta̱nuva̍ḥ ।
tābhi̱stvā''da̍dhe ।
yāste̍ agne gho̱rāsta̱nuva̍ḥ ।
tābhi̍ra̱muṃ ga̍ccha ॥ 3 ॥
catu̍ṣpade jinvatāṃ ta̱nuva̱strīṇi̍ ca ॥ 7 ॥))

**[[1-1-8-1]]**
इ॒मे वा ए॒ते लो॒का अ॒ग्नय॑ः।
ते यद॒व्या॑वृत्ता आधी॒येर॑न्न्।
शो॒चये॑यु॒र्यज॑मानम्।
घ॒र्मः शिर॒ इति॒ गार्ह॑पत्य॒माद॑धाति।
वात॑ः प्रा॒ण इत्य॒न्वाहा॒र्य॒पच॑नम्।
अ॒र्कश्चक्षु॒रित्या॑हव॒नीय॑म्।
तेनै॒वैना॒न्व्याव॑र्तयति।
तथा॒ न शो॑चयन्ति॒ यज॑मानम्।
र॒थ॒न्त॒रम॒भिगा॑यते॒ गार्ह॑पत्य आधी॒यमा॑ने।
राथ॑न्तरो॒ वा अ॒यं लो॒कः॥ १॥

((i̱me vā e̱te lo̱kā a̱gnaya̍ḥ ।
te yadavyā̍vṛttā ādhī̱yeran̍ ।
śo̱caye̍yu̱ryaja̍mānam ।
gha̱rmaḥ śira̱ iti̱ gārha̍patya̱māda̍dhāti ।
vāta̍ḥ prā̱ṇa itya̍nvāhārya̱paca̍nam ।
a̱rkaścakṣu̱rityā̍havanī̱ya̍m ।
tenai̱vainā̱nvyāva̍rtayati ।
tathā̱ na śo̍cayanti̱ yaja̍mānam ।
ra̱tha̱nta̱rama̱bhigā̍yate̱ gārha̍patya ādhī̱yamā̍ne ।
rātha̍ntaro̱ vā a̱yaṃ lo̱kaḥ ॥ 1 ॥))

**[[1-1-8-2]]**

अ॒स्मिन्ने॒वैनं॑ लो॒के प्रति॑ष्ठित॒माध॑त्ते।
वा॒म॒दे॒व्यम॒भिगा॑यत उद्ध्रि॒यमा॑णे।
अ॒न्तरि॑क्षं॒ वै वा॑मदे॒व्यम्।
अ॒न्तरि॑क्ष ए॒वैनं॑ प्रति॑ष्ठित॒माध॑त्ते।
अथो॒ शान्ति॑र्वै वा॑मदे॒व्यम्।
शा॒न्तमे॒वैनं॑ पश॒व्य॑मुद्ध॑रते।
बृ॒हद॒भिगा॑यत आहव॒नीय॑ आधी॒यमा॑ने।
बार्ह॑तो॒ वा अ॒सौ लो॒कः।
अ॒मुष्मि॑न्ने॒वैनं॑ लो॒के प्रति॑ष्ठित॒माध॑त्ते।
प्र॒जाप॑तिर॒ग्निम॑सृजत॥ २॥

((a̱sminne̱vainaṃ̍ lo̱ke prati̍ṣṭhita̱mādha̍tte ।
vā̱ma̱de̱vyama̱bhigā̍yata uddhri̱yamā̍ṇe ।
a̱ntari̍kṣa̱ṃ vai vā̍made̱vyam ।
a̱ntari̍kṣa e̱vainaṃ̍ prati̍ṣṭhita̱mādha̍tte ।
atho̱ śānti̍rvai vā̍made̱vyam ।
śā̱ntame̱vainaṃ̍ paśa̱vya̍muddha̍rate ।
bṛ̱hada̱bhigā̍yata āhava̱nīya̍ ādhī̱yamā̍ne ।
bārha̍to̱ vā a̱sau lo̱kaḥ ।
a̱muṣmi̍nne̱vainaṃ̍ lo̱ke prati̍ṣṭhita̱mādha̍tte ।
pra̱jāpa̍tira̱gnima̍sṛjata ॥ 2 ॥))

**[[1-1-8-3]]**

सोऽश्वो॒ वारो॑ भू॒त्वा परा॑ङैत्।
तं वा॑रव॒न्तीये॑नावारयत।
तद्वा॑रव॒न्तीय॑स्य वारवन्तीय॒त्वम्।
श्यै॒तेन॑ श्ये॒ती अ॑कुरुत।
तच्छ्यै॒तस्य॑ श्यै॒त॒त्वम्।
यद्वा॑रव॒न्तीय॑मभि॒गाय॑ते।
वा॒र॒यि॒त्वैवै॒नं प्रति॑ष्ठित॒माध॑त्ते।
श्यै॒तेन॑ श्ये॒ती कु॑रुते।
घ॒र्मः शिर॒ इति॒ गार्ह॑पत्य॒माद॑धाति।
स॒शी॑र्षाणमे॒वैन॒माध॑त्ते॥ ३॥

((so'śvo̱ vāro̍ bhū̱tvā parā̍ṅait ।
taṃ vā̍rava̱ntīye̍nāvārayata ।
tadvā̍rava̱ntīya̍sya vāravantīya̱tvam ।
śyai̱tena̍ śye̱tī a̍kuruta ।
tacchyai̱tasya̍ śyai̱ta̱tvam ।
yadvā̍rava̱ntīya̍mabhi̱gāya̍te ।
vā̱ra̱yi̱tvaivaina̱ṃ prati̍ṣṭhita̱mādha̍tte ।
śyai̱tena̍ śye̱tī ku̍rute ।
gha̱rmaḥ śira̱ iti̱ gārha̍patya̱mādā̍dhāti ।
saśī̍rṣāṇame̱vaina̱mādha̍tte ॥ 3 ॥))

**[[1-1-8-4]]**

उपै॑नमु॒त्त॑रो य॒ज्ञो न॑मति।
रु॒द्रो वा ए॒षः।
यद॒ग्निः।
स आ॑धीयमा॑न ईश्व॒रो यज॑मानस्य प॒शून् हिꣳसि॑तोः।
संप्रि॑यः प॒शुभि॑र्भुव॒दित्या॑ह।
प॒शुभि॑रे॒वैनꣳ॑ संप्रि॑यं करोति।
प॒शू॒नामहिꣳ॑सायै।
छ॒र्दिस्तो॒काय॒ तन॑याय य॒च्छेत्या॑ह।
आ॒शिष॑मे॒वैतामाशा᳚स्ते।
वात॑ः प्रा॒ण इत्य॑न्वाहार्य॒पच॑नम्॥ ४॥

((upai̍na̱mutta̍ro ya̱jño na̍mati ।
ru̱dro vā e̱ṣaḥ ।
yada̱gniḥ ।
sa ā̍dhīyamā̍na īśva̱ro yajā̍mānasya pa̱śūn hiṁsi̍toḥ ।
sampri̍yaḥ pa̱śubhi̍rbhuva̱dityā̍ha ।
pa̱śubhi̍re̱vainaṁ̍ sampri̍yaṃ karoti ।
pa̱śū̱nāmahiṁ̍sāyai ।
cha̱rdisto̱kāya̱ tana̍yāya ya̱cchetyā̍ha ।
ā̱śiṣa̍me̱vaitāmāśā̎ste ।
vāta̍ḥ prā̱ṇa itya̍nvāhārya̱paca̍nam ॥ 4 ॥))

**[[1-1-8-5]]**

सप्रा॑णमे॒वैन॒माध॑त्ते।
स्व॒दि॒तं तो॒काय॒ तन॑याय पि॒तुं प॒चेत्या॑ह।
अन्न॑मे॒वास्मै᳚ स्वदयति।
प्राची॒मनु॑ प्र॒दिशं॒ प्रेहि॑ वि॒द्वानित्या॑ह।
विभ॑क्तिरे॒वैन॑योः॒ सा।
अथो॒ नाना॑वीर्या॒वे॒वैनौ॑ कुरुते।
ऊर्जं॑ नो धेहि द्वि॒पदे॒ चतु॑ष्पद॒ इत्या॑ह।
आ॒शिष॑मे॒वैतामाशा᳚स्ते।
अ॒र्कश्चक्षु॒रित्या॑हव॒नीय᳚म्।
अ॒र्को वै दे॒वाना॒मन्न᳚म्॥ ५॥

((saprā̍ṇame̱vaina̱mādha̍tte ।
sva̱di̱taṃ to̱kāya̱ tana̍yāya pi̱tuṃ pa̱cetyā̍ha ।
anna̍me̱vāsmai̎ svadayati ।
prācī̱manu̍ pra̱diśa̱ṃ prehi̍ vi̱dvānityā̍ha ।
vibha̍ktire̱vaina̍yo̱ḥ sā ।
atho̱ nānā̍vīryāve̱vainau̍ kurute ।
ūrjaṃ̍ no dhehi dvi̱pade̱ catu̍ṣpada̱ ityā̍ha ।
ā̱śiṣa̍me̱vaitāmāśā̎ste ।
a̱rkaścakṣu̱rityā̍hava̱nīyā̎m ।

a̱rko vai de̱vānā̱mannam̐ ॥ 5 ॥))

**[[1-1-8-6]]**

अन्न॑मे॒वाव॑रुन्धे।
तेन॑ मे दीदि॒हीत्या॑ह।
समि॑न्ध ए॒वैन॑म्̐।
आ॒न॒शे व्या॑नश॒ इ॒ति त्रिरु॒दि॑ङ्गयति।
त्रय॑ इ॒मे लो॒काः।
ए॒ष्वे॑वैनं॑ लो॒केषु॒ प्रति॑ष्ठित॒माध॑त्ते।
तत्तथा॒ न का॒र्य॑म्̐।
वीङ्गि॑त॒मप्र॑तिष्ठित॒माद॑धीत।
उ॒द्धृत्यै॒वाधाया॑भि॒मन्त्रिय॑ः।
अवी॑ङ्गितमे॒वैनं॒ प्रति॑ष्ठित॒माध॑त्ते।
वि॒राट्च॑ स्व॒राट्च॒ यास्ते॑ अग्ने शि॒वास्त॒नुव॒स्ताभि॒स्त्वाऽऽद॑ध॒ इत्या॑ह।
ए॒ता वा अ॒ग्नेः शि॒वास्त॒नुव॑ः।
ताभि॑रे॒वैनꣳ॒ सम॑र्धयति।
यास्ते॑ अग्ने घो॒रास्त॒नुव॒स्ताभि॑र॒मुं ग॒च्छेति॑ ब्रूया॒द्यं द्वि॒ष्यात्।
ताभि॑रे॒वैनं॒ परा॑भावयति॥ ६॥
लो॒को॑ऽसृजतैन॒माध॑त्तेऽन्वाहार्य॒पच॑नं दे॒वाना॒मन्न॑मे॒नं॒
प्रति॑ष्ठित॒माध॑त्ते॒ पञ्च॑ च॥ ८॥

((anna̍me̱vāva̍rundhe ।
tena̍ me dīdi̱hītyā̍ha ।
sami̍ndha e̱vainam̐ ।
ā̱na̱śe vyā̍naśa̱ iti̱ trirudi̍ṅgayati ।
traya̍ i̱me lo̱kāḥ ।
e̱ṣve̍vainaṃ lo̱keṣu̱ prati̍ṣṭhita̱mādha̍tte ।
tattathā̱ na kā̱ryam̐ ।
vīṅgi̍ta̱mapra̍tiṣṭhita̱mādā̍dhīta ।
u̱ddhṛtyai̱vādhāyā̍bhi̱mantriya̍ḥ ।
avī̍ṅgitame̱vainaṃ̱ prati̍ṣṭhita̱mādha̍tte ।
vi̱rāṭca̍ sva̱rāṭca̱ yāste̍ agne
śi̱vāsta̱nuva̱stābhi̱stvā''da̍dha̱ ityā̍ha ।
e̱tā vā a̱gneḥ śi̱vāsta̱nuva̍ḥ ।
tābhi̍re̱vainam̱̐ sama̍rdhayati ।
yāste̍ agne gho̱rāsta̱nuva̱stābhi̍ra̱muṃ ga̱ccheti̍
brūyā̱dyaṃ dvi̱ṣyāt ।
tābhi̍re̱vainaṃ̱ parā̍bhāvayati ॥ 6 ॥
lo̱ko̍'sṛjataina̱mādha̍tte'nvāhārya̱paca̍naṃ
de̱vānā̱manna̍menaṃ̱ prati̍ṣṭhita̱mādha̍tte̱ pañca̍ ca
॥ 8 ॥))

**[[1-1-9-1]]**

श॒मीग॒र्भाद॒ग्निं म॑न्थति।
ए॒षा वा अ॒ग्नेर्य॒ज्ञिया॑ त॒नूः।
तामे॒वास्मै॑ जनयति।
अदि॑तिः पु॒त्रका॑मा।
सा॒ध्येभ्यो॑ दे॒वेभ्यो॑ ब्रह्मौद॒नम॑पचत्।
तस्या॑ उ॒च्छेष॑णमददुः।
तत्प्राश्ञा᳚त्।
सा रेतो॑ऽधत्त।
तस्यै॑ धा॒ता चा᳚र्य॒मा चा॑जायेताम्।
सा द्वि॒तीय॑मपचत्॥ १॥

((śa̱mīga̱rbhāda̱gniṃ ma̍nthati ।
e̱ṣā vā a̱gnerya̱jñiyā̍ ta̱nūḥ ।
tāme̱vāsmai̍ janayati ।
adi̍tiḥ pu̱trakā̍mā ।
sā̱dhyebhyo̍ de̱vebhyo̍ brahmauda̱nama̍pacat ।
tasyā̍ u̱ccheṣa̍ṇamadaduḥ ।
tatprāśñā̎t ।
sā reto̍'dhatta ।
tasyai̍ dhā̱tā cā̎rya̱mā cā̍jāyetām ।
sā dvi̱tīya̍mapacat ॥ 1 ॥))

**[[1-1-9-2]]**

तस्या॑ उ॒च्छेष॑णमददुः।
तत्प्राश्ञा᳚त्।
सा रेतो॑ऽधत्त।
तस्यै॑ मि॒त्रश्च॒ वरु॑णश्चाजायेताम्।
सा तृ॒तीय॑मपचत्।
तस्या॑ उ॒च्छेष॑णमददुः।
तत्प्राश्ञा᳚त्।
सा रेतो॑ऽधत्त।
तस्या॒ अꣳश॑श्च॒ भग॑श्चाजायेताम्।
सा च॑तु॒र्थम॑पचत्॥ २॥

((tasyā̍ u̱ccheṣa̍ṇamadaduḥ ।
tatprāśñā̎t ।
sā reto̍'dhatta ।
tasyai̍ mi̱traśca̱ varu̍ṇaścājāyetām ।
sā tṛ̱tīya̍mapacat ।
tasyā̍ u̱ccheṣa̍ṇamadaduḥ ।
tatprāśñā̎t ।
sā reto̍'dhatta ।
tasyā̱ am̐śa̍śca̱ bhaga̍ścājāyetām ।
sā ca̍tu̱rthama̍pacat ॥ 2 ॥))

**[[1-1-9-3]]**

तस्या॑ उ॒च्छेष॑णमददुः।
तत्प्राश्ञा᳚त्।
सा रेतो॑ऽधत्त।
तस्या॒ इन्द्र॑श्च॒ विव॑स्वाꣳश्चाजायेताम्।
ब्र॒ह्मौ॒द॒नं प॑चति।
रेत॑ ए॒व तद्द॑धाति।
प्राश्ञन्ति ब्राह्मणा ओ॑द॒नम्।
यदाज्य॑मु॒च्छिष्य॑ते।
तेन॑ स॒मिधो॒ऽभ्यज्याद॑धाति।
उ॒च्छेष॑णा॒द्वा अदि॑ती॒ रेतो॑ऽधत्त॥ ३॥

((tasyā̍ u̱ccheṣa̍ṇamadaduḥ ।
tatprāśña̎t ।
sā reto̍'dhatta ।
tasya̱ indra̍śca̱ viva̍svām̐ścājāyetām ।
bra̱hmau̱da̱naṃ pa̍cati ।
reta̍ e̱va tadda̍dhāti ।
prāśñanti brāhmaṇā o̍da̱nam ।
yadājya̍mu̱cchiṣya̍te ।
tena̍ sa̱midho̱'bhyajyāda̍dhāti ।
u̱ccheṣa̍ṇā̱dvā adi̍tī̱ reto̍'dhatta ॥ 3 ॥))

**[[1-1-9-4]]**

उ॒च्छेष॑णादे॒व तद्रेतो॑ धत्ते।
अस्थि॒ वा ए॒तत्।
यत्स॒मिध॑ः।
ए॒तद्रेत॑ः।
यदाज्य᳚म्।
यदाज्ये॑न स॒मिधो॒ऽभ्यज्या॒दधा॑ति।
अस्थ्ये॒व तद्रेत॑सि दधाति।
ति॒स्र आद॑धाति मिथु॒नत्वाय॑।
इय॑तीर्भवन्ति।
प्र॒जाप॑तिना यज्ञमु॒खेन॒ संमि॑ताः॥ ४॥

((u̱ccheṣa̍ṇāde̱va tadreto̍ dhatte ।
asthi̱ vā e̱tat ।
yatsa̱midha̍ḥ ।
e̱tadreta̍ḥ ।
yadājya̎m ।
yadājye̍na sa̱midho̱'bhyajyā̱dadha̍ti ।
asthye̱va tadreta̍si dadhāti ।
ti̱sra āda̍dhāti mithuna̱tvāya̍ ।
iya̍tīrbhavanti ।
pra̱jāpa̍tinā yajñamu̱khena̱ saṃmi̍tāḥ ॥ 4 ॥))

**[[1-1-9-5]]**

इय॑तीर्भवन्ति।
य॒ज्ञ॒प॒रु॒षा॒ संमि॑ताः।
इय॑तीर्भवन्ति।
ए॒ताव॒द्वै पुरु॑षे वी॒र्य᳚म्।
वी॒र्य॑संमिताः।
आ॒र्द्रा भ॑वन्ति।
आ॒र्द्रमि॑व॒ हि रेत॑ः सि॒च्यते᳚।
चि॒त्रि॑यस्याश्व॒त्थस्याद॑धाति।
चि॒त्रमे॒व भ॑वति।
घृ॒तव॑तीभि॒राद॑धाति॥ ५॥

((iya̍tīrbhavanti ।
ya̱jña̱pa̱ru̱ṣā̱ saṃmi̍tāḥ ।
iya̍tīrbhavanti ।
e̱tāva̱dvai puru̍ṣe vī̱rya̎m ।
vī̱rya̍saṃmitāḥ ।
ā̱rdrā bha̍vanti ।
ā̱rdrami̍va̱ hi reta̍ḥ si̱cyate̎ ।
citri̍yasyāśva̱tthasyāda̍dhāti ।
ci̱trame̱va bha̍vati ।
ghṛ̱tava̍tībhi̱rāda̍dhāti ॥ 5 ॥))

**[[1-1-9-6]]**

ए॒तद्वा अ॒ग्नेः प्रि॒यं धाम॑।
यद्घृ॒तम्।
प्रि॒येणै॒वैनं॒ धाम्ना॒ सम॑र्धयति।
अथो॒ तेज॑सा।
गा॒य॒त्रीभि॑र्ब्राह्मणस्याद॑ध्यात्।
गा॒य॒त्रच्छ॑न्दा॒ वै ब्रा᳚ह्म॒णः।
स्वस्य॒ छन्द॑सः प्रत्यय॒नस्त्वाय॑।
त्रि॒ष्टुग्भी॑ राज॒न्य॑स्य।
त्रि॒ष्टुप्छ॑न्दा॒ वै रा॑ज॒न्य॑ः।
स्वस्य॒ छन्द॑सः प्रत्यय॒नस्त्वाय॑॥ ६॥

((e̱tadvā a̱gneḥ pri̱yaṃ dhāma̍ ।
yadghṛ̱tam ।
pri̱yeṇa̱ivainaṃ̱ dhāmnā̱ sama̍rdhayati ।
atho̱ teja̍sā ।
gā̱ya̱trībhi̍rbrāhma̱ṇasyāda̍dhyāt ।
gā̱ya̱traccha̍ndā̱ vai brā̎hma̱ṇaḥ ।
svasya̱ chanda̍saḥ pratyaya̱nastvāya̍ ।
tri̱ṣṭugbhi̍ rāja̱nya̍sya ।
tri̱ṣṭupcha̍ndā̱ vai rā̍ja̱nya̍ḥ ।

svasya̱ chandásaḥ pratyayana̱stvāyá || 6 ||))

**[[1-1-9-7]]**

जग॑तीभि॒र्वैश्य॑स्य।
जग॑तीछन्दा॒ वै वैश्य॑ः।
स्वस्य॒ छन्द॑सः प्रत्ययन॒स्त्वाय॑।
तꣳ सं॑वत्स॒रं गो॑पायेत्।
सं॒व॒त्स॒रꣳ हि रेतो॑ हि॒तं वर्ध॑ते।
यद्ये॑नꣳ संवत्स॒रे नोप॒नमे॑त्।
स॒मिधः॒ पुन॒राद॑ध्यात्।
रेत॑ ए॒व तद्धि॒तं वर्ध॑मानमेति।
न मा॒ꣳसम॑श्नीयात्।
न स्त्रि॒यमुपे॑यात्॥ ७॥

((jagátībhi̱rvaiśyásya |
jagátīchandā̱ vai vaiśyáḥ |
svasya̱ chandásaḥ pratyayana̱stvāyá |
taṁ sáṃvatsa̱raṃ gópāyet |
saṃva̱tsa̱raṁ hi retó hi̱taṃ vardháte |
yadyénaṁ saṃvatsa̱re nopa̱namét |
sa̱midha̱ḥ puna̱rādádhyāt |
retá e̱va taddhi̱taṃ vardhámānameti |
na mā̱ṁsamáśnīyāt |
na striya̱mupéyāt || 7 ||))

**[[1-1-9-8]]**

यन्मा॒ꣳसम॑श्नीयात्।
यत्स्त्रिय॑मु॒पेयात्।
निर्वी॑र्यः स्यात्।
नैन॑म॒ग्निरुप॑नमेत्।
श्व आ॑धा॒स्यमा॑नो ब्रह्मौद॒नं पच॑ति।
आ॒दि॒त्या वा इ॒त उत्त॒माः सु॑व॒र्गं लो॒कमा॑यन्न्।
ते वा इ॒तो यन्त॒ं प्रति॑नुदन्ते।
ए॒ते खलु॒ वावादि॒त्याः।
यद्ब्रा॑ह्मणाः।
तैरे॒व स॒न्त्वं गच्छति॥ ८॥

((yanmā̱ṁsamáśnīyāt |
yatstriyámupe̱yāt |
nirvī́ryaḥ syāt |
nainámа̱gnirupánamet |
śva ádhā̱syamáno brahmauda̱naṃ pácati |
ā̱di̱tyā vā i̱ta úttamāḥ súvargam lo̱kamáyann |
te vā i̱to yanta̱m pratínudante |
e̱te khalu̱ vāvādi̱tyāḥ |
yadbrā́hma̱ṇāḥ |
taire̱va sa̱ntvaṃ gácchati || 8 ||))

**[[1-1-9-9]]**

नैन॒ं प्रति॑नुदन्ते।
ब्र॒ह्म॒वा॒दिनो॑ वदन्ति।
क्वा॑ सः।
अ॒ग्निः का॒र्य॑ः।
यो॑ऽस्मै प्र॒जां प॒शून्प्र॒ज॒नय॒तीति॑।
श॒ल्कैस्ताꣳ रात्रि॑म॒ग्निमि॑न्धीत।
तस्मि॑न्नुपव्यु॒षम॒रणी॒ निष्ट॑पेत्।
य॒थर्ष॒भाय॑ वाशि॒ता न्या॑विच्छा॒यति॑।
त॒दृगे॒व तत्।
अ॒पो॒दूह्य॒ भस्मा॒ग्निं मन्थति॥ ९॥

((naina̱m pratínudante |
bra̱hma̱vā̱dinó vadanti |
kvá saḥ |
a̱gniḥ kā̱ryáḥ |
yó'smai pra̱jām pa̱śūnprája̱naya̱tītí |
śalkai̱stāṁ rātrímа̱gnimíndhīta |
tasmínnupavyu̱ṣama̱raṇī̱ niṣṭápet |
yathárṣa̱bhāyá vāśi̱tā nyávicchā̱yatí |
ta̱dṛge̱va tat |
a̱po̱dūhya̱ bhasmā̱gnim mánthati || 9 ||))

**[[1-1-9-10]]**

सैव साऽग्नेः सन्त॑तिः।
तं म॑थि॒त्वा प्राञ्च॒मुद्ध॑रति।
सं॒व॒त्स॒रमे॒व तद्रेतो॑ हि॒तं प्रज॑नयति।
अना॑हि॒तस्तस्या॒ग्निरित्या॑हुः।
यः स॒मिधो॒ऽना॑धाया॒ग्निमा॑धत्त इति॑।
ताः सं॑वत्स॒रे पु॒रस्ता॒दाद॑ध्यात्।
सं॒व॒त्स॒रादे॒वैन॑मवरु॒ध्याध॑त्ते।
यदि॑ संवत्स॒रे नाद॒ध्यात्।
द्वा॒द॒श्यां॑ पु॒रस्ता॒दाद॑ध्यात्।
सं॒व॒त्स॒रप्र॑तिमा॒ वै द्वाद॑श॒ रात्र॑यः।
सं॒व॒त्स॒रमे॒वास्याहि॑ता भवन्ति।
यदि॑ द्वा॒द॒श्यां॑ नाद॒ध्यात्।
त्र्य॒हे पु॒रस्ता॒दाद॑ध्यात्।
आहि॑ता ए॒वास्य॑ भवन्ति॥ १०॥

द्वि॒तीय॑मपच्च॒तु॒र्थम॑पच॒दिदि॑ती॒ रेतो॑ऽधत्त॒ संमि॑ता
घृ॒तव॑तीभि॒राद॑धाति राज॒न्य॑ः स्वस्य॒ छन्द॑सः
प्र॒त्यय॒नस्त्वाये॑याद्गच्छति मन्थति॒ रात्र॑यश्च॒त्वरि॑ च॥ ९॥

((saiva sā'gneḥ santátiḥ |
taṃ máthi̱tvā prāñca̱muddhárati |
sa̱ṃva̱tsa̱rame̱va tadretó hi̱taṃ prajánayati |
anā́hita̱stasyā̱gnirityā́huḥ |
yaḥ sa̱midho'nádhāyā̱gnimádha̱tta ití |
tāḥ saṃvatsa̱re pu̱rastā̱dādádhyāt |
sa̱ṃva̱tsa̱rāde̱vainámava̱rudhyādhátte |
yadí saṃvatsare nāda̱dhyāt |
dvā̱da̱śyāṃ̐ pu̱rastā̱dādádhyāt |
sa̱ṃva̱tsa̱raprátimā̱ vai dvādáśa̱ rātráyaḥ |
sa̱ṃva̱tsa̱rame̱vāsyāhitā bhavanti |
yadí dvāda̱śyāṃ̐ nāda̱dhyāt |
trya̱he pu̱rastā̱dādádhyāt |
āhítā e̱vāsyá bhavanti || 10 ||
dvi̱tīyámapaccatu̱rthamápaca̱daditī̱ retó'dhatta̱
saṃmitā ghṛtavátībhi̱rādádhāti rāja̱nyáḥ svasya̱
chandásaḥ pratyayana̱stvāyéyādgacchati manthati̱
rātráyaścatvarí ca || 9 ||))

**[[1-1-10-1]]**

प्र॒जाप॑तिः प्र॒जा अ॑सृजत।
स रि॑रिचा॒नो॑ऽमन्यत।
स तपो॑ऽतप्यत।
स आ॒त्मन्वी॒र्य॑मपश्यत्।
तद॑वर्धत।
तद॑स्मा॒त्सह॑सो॒र्ध्वम॑सृज्यत।
सा वि॒राड॑भवत्।
तां दे॑वासु॒रा व्य॑गृह्णत।
सो॑ऽब्रवीत्प्र॒जाप॑तिः।
मम॒ वा ए॒षा॥ १॥

((pra̱jāpáti̱ḥ pra̱jā ásṛjata |
sa riricā̱nó'manyata |
sa tapó'tapyata |
sa ā̱tmanvī̱ryámapaśyat |
tadávardhata |
tadásmā̱tsahásordhvamásṛjyata |
sā vi̱rāḍábhavat |
tāṃ dévāsu̱rā vyágṛhṇata |
sŏ'bravītpra̱jāpátiḥ |
mama̱ vā e̱ṣā || 1 ||))

**[[1-1-10-2]]**

दोहा॑ ए॒व यु॒ष्माक॒मिति॑।
सा त॒तः प्राच्यु॒द॑क्रामत्।
तत्प्र॒जाप॑ति॒ः पर्य॑गृह्णात्।
अथ॑र्व पि॒तुं मे॑ गोपा॒येति॑।
सा द्वि॒तीय॒मुद॑क्रामत्।
तत्प्र॒जाप॑ति॒ः पर्य॑गृह्णात्।
नर्य॑ प्र॒जां मे॑ गोपा॒येति॑।
सा तृ॒तीय॒मुद॑क्रामत्।
तत्प्र॒जाप॑ति॒ः पर्य॑गृह्णात्।
शꣳस्य॑ प॒शून्मे॑ गोपा॒येति॑॥ २॥

((dohā́ e̱va yu̱ṣmāka̱mití |
sā tata̱ḥ prācyudákrāmat |
tatpra̱jāpáti̱ḥ paryágṛhṇāt |
athárva pi̱tuṃ mé gopā̱yetí |
sā dvi̱tīya̱mudákrāmat |
tatpra̱jāpáti̱ḥ paryágṛhṇāt |
naryá pra̱jāṃ mé gopā̱yetí |
sā tṛ̱tīya̱mudákrāmat |
tatpra̱jāpáti̱ḥ paryágṛhṇāt |
śáṃ̐sya pa̱śūnmé gopā̱yetí || 2 ||))

**[[1-1-10-3]]**

सा च॑तु॒र्थमु॒द॑क्रामत्।
तत्प्र॒जाप॑ति॒ः पर्य॑गृह्णात्।
सप्र॑थ स॒भां मे॑ गोपा॒येति॑।
सा प॑ञ्च॒ममु॒द॑क्रामत्।
तत्प्र॒जाप॑ति॒ः पर्य॑गृह्णात्।
अहे॑ बुध्निय॒ मन्त्रं॑ मे गोपा॒येति॑।
अ॒ग्नीन् वाव सा तान्व्य॑क्रमत।
तान्प्र॒जाप॑ति॒ः पर्य॑गृह्णात्।
अथो॑ प॒ङ्क्तिमे॒व।
प॒ङ्क्तिर्वा ए॒षा ब्रा॑ह्म॒णे प्रवि॑ष्टा॥ ३॥

((sā cáturthamudákrāmat |
tatpra̱jāpáti̱ḥ paryágṛhṇāt |
saprátha sa̱bhāṃ mé gopā̱yetí |
sā páñca̱mamudákrāmat |
tatpra̱jāpáti̱ḥ paryágṛhṇāt |
ahé budhniya̱ mantraṃ́ me gopā̱yetí |
a̱gnīn vāva sā tānvyákramata |
tānpra̱jāpáti̱ḥ paryágṛhṇāt |
athó pa̱ṅktime̱va |
pa̱ṅktirvā e̱ṣā brā́hma̱ṇe pravíṣṭā || 3 ||))

**[[1-1-10-4]]**

तामा॒त्मनो॑ऽधि॒ निर्मि॑मीते।

यद॒ग्निरा॑धी॒यते᳚।
तस्मा॑दे॒ताव॑न्तो॒ऽग्नय॒ आधी॑यन्ते।
पाङ्क्तं॒ वा इ॒दꣳ सर्व᳚म्।
पाङ्क्ते॑नै॒व पाङ्क्त॒ꣳ स्पृणोति।
अथ॑र्व पि॒तुं मे॑ गोपा॒येत्या॑ह।
अन्न॑मे॒वैतेन॑ स्पृणोति।
नर्य॑ प्र॒जां मे॑ गोपा॒येत्या॑ह।
प्र॒जामे॒वैतेन॑ स्पृणोति।
शꣳस्य॑ प॒शून्मे॑ गोपा॒येत्या॑ह॥ ४॥

((tāmā̱tmano'dhi̱ nirmímīte |
yada̱gnirā́dhīyatë |
tasmā́de̱tāvánto̱'gnaya̱ ādhī́yante |
pāṅktam̱ vā i̱dam̐ sarvä̀m |
pāṅkténai̱va pāṅktam̐̐ spṛṇoti |
athárva pi̱tum mé gopā̱yetyā́ha |
annáme̱vaitená spṛṇoti |
narýa pra̱jām mé gopā̱yetyā́ha |
prajāme̱vaitená spṛṇoti |
śam̐̐syá pa̱śūnmé gopā̱yetyā́ha || 4 ||))

**[[1-1-10-5]]**

प॒शूने॒वैतेन॑ स्पृणोति।
सप्र॑थ स॒भां मे॑ गोपा॒येत्या॑ह।
स॒भामे॒वैतेने॑न्द्रि॒यꣳ स्पृ॑णोति।
अहे॑ बुध्निय॒ मन्त्रं॑ मे गोपा॒येत्या॑ह।
मन्त्र॑मे॒वैतेन॒ श्रिय॑ꣳ स्पृणोति।
यद॑न्वाहार्य॒पच॑नेऽन्वाहा॒र्यं॑ पच॑न्ति।
तेन॒ सो᳚ऽस्या॒भीष्टः॑ प्री॒तः।
यद्गार्ह॑पत्य॒ आज्य॑मधिश्र॒यन्ति॒ संप॒त्नीर्या॒जय॑न्ति।
तेन॒ सो᳚ऽस्या॒भीष्टः॑ प्री॒तः।
यदा॑हव॒नीये॒ जु॒ह्व॑ति॥ ५॥

((pa̱śūne̱vaitená spṛṇoti |
saprátha sa̱bhām mé gopā̱yetyā́ha |
sa̱bhāme̱vaitenëndri̱yam̐̐ spṛ́ṇoti |
ahé budhniya̱ mantraḿ me gopā̱yetyā́ha |
mantráme̱vaitena̱ śriyam̐̐ spṛṇoti |
yadánvāhārya̱pacáne'nvāhā̱ryaḿ pacánti |
tena̱ sö'syā̱bhīṣṭáḥ prī̱taḥ |
yadgārhápatya̱ ājyámadhi̱śrayánti̱
sa̱mpatnī̈ryā̱jayánti |
tena̱ sö'syā̱bhīṣṭáḥ prī̱taḥ |
yadā́havanī̱ye̱ juhváti || 5 ||))

**[[1-1-10-6]]**

तेन॒ सो᳚ऽस्या॒भीष्टः॑ प्री॒तः।
यत्स॒भायां᳚ वि॒जय॑न्ते।
तेन॒ सो᳚ऽस्या॒भीष्टः॑ प्री॒तः।
यदा॑वस॒थेऽन्न॒ꣳ हर॑न्ति।
तेन॒ सो᳚ऽस्या॒भीष्टः॑ प्री॒तः।
तथा᳚ऽस्य॒ सर्वे᳚ प्री॒ता अ॒भीष्टा॒ आधी॑यन्ते।
प्र॒व॒स॒थमे॒ष्यन्ने॒वमुप॑तिष्ठे॒तैक॑मेकम्।
यथा᳚ ब्राह्म॒णाय॑ गृहेवा॒सिने॑ परि॒दाय॑ गृ॒हानेति॑।
ता॒दृगे॒व तत्।
पुन॑रा॒गत्योप॑तिष्ठते।
साऽभा॑गेयमे॒वैषां॒ तत्।
सा तत॑ ऊ॒र्ध्वारो॑हत्।
सा रोहि॒ण्य॑भवत्।
तद्रोहि॒ण्यै रोहि॑णि॒त्वम्।
रो॒हि॒ण्याम॒ग्निमाद॑धीत।
स्व ए॒वैनं॒ योनौ॒ प्रति॑ष्ठित॒माध॑त्ते।
ऋ॒ध्नोत्ये॑नेन॥ ६॥
एषा प॒शून्मे॑ गोपा॒येति॒ प्रवि॑ष्टा प॒शून्मे॑ गोपा॒येत्या॑ह॒ जु॒ह्व॑ति
तिष्ठते स॒प्त च॑॥ १०॥
ब्रह्म॒ संध॑त्तं कृत्ति॑का॒सूद्ध॑न्ति द्वाद॒शसु॑ प्र॒जाप॑तिर्वा॒चो
दे॑वासु॒रास्तद॒ग्निर्नोद्ध॑र्मः शिर॑ इ॒मे वै श॑मीग॒र्भात्प्र॒जाप॑तिः
स रि॑रिचा॒नः सतपः स आ॒त्मन्वी॒र्यं᳚ दश॑॥ १०॥
ब्रह्म॒ संध॑त्तं तौ दि॒व्यावथो॑ शं॒त्वाय॒ प्राच्यै॒षां यदु॒पर्यु॑परि
यत्स॒द्यः सोऽश्वो॒ऽवारो॑ भू॒त्वा जग॑तीभि॒रशी॑तिः॥ ८०॥

((tena̱ sö'syā̱bhīṣṭáḥ prī̱taḥ |
yatsa̱bhāyām̐̈ vijayánte |
tena̱ sö'syā̱bhīṣṭáḥ prī̱taḥ |
yadā́vasa̱the'nna̱m̐ haránti |
tena̱ sö'syā̱bhīṣṭáḥ prī̱taḥ |
tathä̀'sya̱ sarvë prī̱tā a̱bhīṣṭā̱ ādhī́yante |
pra̱va̱sa̱thame̱ṣyanne̱vamupátiṣṭhe̱taikámekam |
yathä̀ brāhma̱ṇāyá gṛhevā̱siné pari̱dāyá gṛ̱hānetí |
tā̱dṛge̱va tat |
punárā̱gatyopátiṣṭhate |
sā'bhā́geyame̱vaiṣām̱ tat |
sā tatá ū̱rdhvārṓhat |
sā rṓhi̱ṇyábhavat |
tadrṓhi̱ṇyai rṓhiṇi̱tvam |
ro̱hi̱ṇyāma̱gnimādádhīta |
sva e̱vainam̱ yona̱u pratíṣṭhita̱mādhátte |
ṛ̱dhnotyénena || 6 ||
e̱ṣā pa̱śūnmé gopā̱yeti̱ pravíṣṭā pa̱śūnmé))

gopā̱yetyā̍ha̱ juhva̍ti tiṣṭhate sa̱pta ca̍ || 10 ||
brahma̱ saṃdha̍ttam̱ kṛtti̍kā̱sūddha̍nti dvāda̱śasu̍
pra̱jāpa̍tirvā̱co de̍vāsu̱rāstada̱gnirnodgha̱rmaḥ śira̍
i̱me vai śa̍mīga̱rbhātpra̱jāpa̍ti̱ḥ sa ri̍ricā̱naḥ satapa̱ḥ
sa ā̱tmanvī̱ryaṃ̍ daśa̍ || 10 ||
brahma̱ saṃdha̍ttam̱ tau di̱vyāvatho̍ śam̱tvāya̱
prācye̍ṣām̱ yadu̱paryu̍pari̱ yatsa̱dyaḥ so'śvo̱'vāro̍
bhū̱tvā jaga̍tībhi̱raśī̍tiḥ || 80 ||))

# Taittirīya-Brāhmaṇa
# Book 1, Chapter 2

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[1-2-1-1]]**

उ॒द्ध॒न्यमा॑नम॒स्या अ॑मे॒ध्यम्।
अप॑ पा॒प्मानं॑ यज॑मानस्य हन्तु।
शि॒वा नः॑ सन्तु प्र॒दिश॒श्चत॑स्रः।
शं नो॑ मा॒ता पृ॑थि॒वी तोक॑साता।
शं नो॑ दे॒वीर॒भिष्ट॑ये।
आपो॑ भवन्तु पी॒तये᳚।
शं योर॒भि स्र॑वन्तु नः।
वै॒श्वा॒न॒रस्य॑ रू॒पम्।
पृ॒थि॒व्यां प॑रि॒स्रसा᳚।
स्यो॒नमावि॑शन्तु नः॥ १॥

((u̱ddha̱nyamā̍nama̱syā a̍me̱dhyam ।
apa̍ pā̱pmāna̱ṃ yaja̍mānasya hantu ।
śi̱vā na̍ḥ santu pra̱diśa̱ścata̍sraḥ ।
śaṃ no̍ mā̱tā pṛ̍thi̱vī toka̍sātā ।
śaṃ no̍ de̱vīra̱bhiṣṭa̍ye ।
āpo̍ bhavantu pī̱taye̎ ।
śaṃ yora̱bhi sra̍vantu naḥ ।
vai̱śvā̱na̱rasya̍ rū̱pam ।
pṛ̱thi̱vyā̱ṃ pa̍ri̱srasā̎ ।
syo̱namāvi̍śantu naḥ ॥ 1 ॥))

**[[1-2-1-2]]**

य॒दि॒दं दि॒वो य॒द॒दः पृ॑थि॒व्याः।
सं॒ज॒ज्ञा॒ने रोद॑सी सं॒ब॒भू॒व॒तुः।
ऊ॒षान्कृ॒ष्णम॑वतु कृ॒ष्णमू॒षाः᳚।
इ॒होभ॒यो᳚र्य॒ज्ञि॒यमा॒ग॑मि॒ष्ठाः।
ऊ॒तीः कु॑र्वा॒णो यत्पृ॑थि॒वीमच॑रः।
गु॒हा॒कार॑मा॒खु॒रू॒पं प्र॒तीत्य॑।
तत्ते॒ न्य॑क्तमि॒ह सं॒भर॑न्तः।
श॒तं जी॑वेम श॒र॒दः॒ सवी॑राः।
ऊर्जं॑ पृथि॒व्या रस॑मा॒भर॑न्तः।
श॒तं जी॑वेम श॒रदः॑ पु॒रू॒चीः॥ २॥

((ya̱di̱daṃ di̱vo ya̱da̱daḥ pṛ̍thi̱vyāḥ ।
sa̱ṃja̱jñā̱ne roda̍sī sa̱ṃba̱bhū̱va̱tu̍ḥ ।
ū̱ṣā̎nkṛ̱ṣṇama̍vatu kṛ̱ṣṇamū̱ṣā̎ḥ ।
i̱hobha̱yo̍rya̱jñi̱yamā̱ga̍mi̱ṣṭhāḥ ।
ū̱tīḥ ku̍rvā̱ṇo yatpṛ̍thi̱vīmaca̍raḥ ।
gu̱hā̱kāra̍mā̱khu̱rū̱paṃ pra̱tītya̍ ।
tatte̱ nya̍ktami̱ha sa̱ṃbhara̍ntaḥ ।
śa̱taṃ jī̍vema śa̱rada̱ḥ savī̍rāḥ ।
ūrja̍ṃ pṛthi̱vyā rasa̍mā̱bhara̍ntaḥ ।
śa̱taṃ jī̍vema śa̱rada̍ḥ pu̱rū̱cīḥ ॥ 2 ॥))

**[[1-2-1-3]]**

व॒म्रीभि॒रनु॑वित्तं॒ गुहा॑सु।
श्रो॒त्रं॑ त उ॒र्व्य॑बधिरा भवामः।
प्र॒जाप॑तिसृष्टानां प्र॒जाना᳚म्।
क्षुधोप॑हत्यै सुवि॒तं नो॑ अस्तु।
उ॒प॒प्रभि॑न्न॒मिष॒मूर्जं॑ प्र॒जाभ्यः॑।
सूदं॑ गृहे॒भ्यो॒ रस॒माभ॑रामि।
यस्य॑ रू॒पं बिभ्र॑दि॒मामवि॑न्दत्।
गुहा॒ प्रवि॑ष्टाꣳ सरि॒रस्य॒ मध्ये᳚।
तस्ये॒दं विह॑तमा॒भर॑न्तः।
अछ॑म्बट्कारम॒स्यां वि॑धेम॥ ३॥

((va̱mrībhi̱ranu̍vittaṃ guhā̎su ।
śrotra̍ṃ ta u̱rvyaba̍dhirā bhavāmaḥ ।
pra̱jāpa̍tisṛṣṭānāṃ pra̱jānā̎m ।
kṣudhopa̍hatyai suvi̱taṃ no̍ astu ।
upa̱prabhi̍nna̱miṣa̱mūrja̍ṃ pra̱jābhya̍ḥ ।
sūda̍ṃ gṛhebhya̱ rasa̱mābha̍rāmi ।
yasya̍ rū̱paṃ bibhra̍di̱māmavi̍ndat ।
guhā̱ pravi̍ṣṭāṃ̎ sari̱rasya̱ madhye̎ ।
tasye̱daṃ viha̍tamā̱bhara̍ntaḥ ।
achamba̍ṭkārama̱syāṃ vi̍dhema ॥ 3 ॥))

**[[1-2-1-4]]**

यत्प॒र्यप॑श्यत्सरि॒रस्य॒ मध्ये᳚।
उ॒र्वीमप॑श्य॒ज्जग॑तः प्रति॒ष्ठाम्।
तत्पुष्क॑रस्या॒यत॑नाद्धि जा॒तम्।
प॒र्णं पृ॑थि॒व्याः प्रथ॑नꣳ हरामि।
याभि॑रदृꣳ॑ह॒ज्जग॑तः प्रति॒ष्ठाम्।
उ॒र्वीमि॒मां वि॒श्वज॑नस्य॒ भ॒र्त्रीम्।
ता नः॑ शि॒वाः शर्क॑राः सन्तु॒ सर्वाः᳚।
अ॒ग्ने रेत॑श्च॒न्द्रꣳ हिर॑ण्यम्।
अ॒द्भ्यः संभू॑तम॒मृतं॑ प्र॒जासु॑।
तत्सं॒भर॑न्नुत्तर॒तो नि॒धाय॑॥ ४॥

((yatpa̱ryapa̍śyatsari̱rasya̱ madhye᳚ ।
u̱rvīmapa̍śya̱jjaga̍taḥ prati̱ṣṭhām ।
tatpuṣka̍rasyā̱yata̍nā̱ddhi jā̱tam ।
pa̱rṇaṃ pṛ̍thi̱vyāḥ pratha̍nag̍ṃ harāmi ।
yābhi̱radṛg̍ṃha̱jjaga̍taḥ prati̱ṣṭhām ।
u̱rvīmi̱māṃ vi̍śvaja̱nasya̱ bha̱rtrīm ।
tā na̍ḥ śi̱vāḥ śarka̍rāḥ santu̱ sarvā᳚ḥ ।
a̱gne reta̍ścandrag̍ṃ hira̍ṇyam।
a̱dbhyaḥ sa̱ṃbhū̍tama̱mṛtag̍ṃ pra̱jāsu̍ ।
tatsa̱ṃbhara̍nnuttara̱to ni̱dhāya̍ ॥ 4 ॥))

**[[1-2-1-5]]**

अ॒ति॒ प्र॒यच्छं॒ दुरि॑तिं तरेयम्।
अश्वो॑ रू॒पं कृ॒त्वा यद॑श्व॒त्थेऽति॑ष्ठः।
सं॒व॒त्स॒रं दे॒वेभ्यो॑ नि॒लाय॑।
तत्ते॒ न्य॑क्तमि॒ह सं॒भर॑न्तः।
श॒तं जी॑वेम श॒रदः॒ सवी॑राः।
ऊ॒र्जः पृ॑थि॒व्या अध्युत्थि॑तोऽसि।
वन॑स्पते श॒तव॑ल्शो॒ विरो॑ह।
त्वया॑ व॒यमि॒षमू॒र्जं मद॑न्तः।
रा॒यस्पो॒षे॑ण॒ समि॒षा म॑देम।
गा॒य॒त्रि॒या ह्रि॒यमा॑णस्य॒ यत्ते᳚॥ ५॥

((a̱ti̱ pra̱yaccha̱ṃ duri̍tiṃ tareyam ।
aśvo̍ rū̱paṃ kṛ̱tvā yada̍śva̱tthe'ti̍ṣṭhaḥ ।
sa̱ṃva̱tsa̱raṃ de̱vebhyo̍ ni̱lāya̍ ।
tatte̱ nya̍ktami̱ha sa̱ṃbhara̍ntaḥ ।
śa̱taṃ jī̍vema śa̱rada̱ḥ savī̍rāḥ ।
ū̱rjaḥ pṛ̍thi̱vyā adhyutthi̍to'si ।
vana̍spate śa̱tava̍lśo̱ viro̍ha ।
tvayā̍ va̱yami̱ṣa̱mūrja̱ṃ mada̍ntaḥ ।
rā̱yaspo̱ṣe̍ṇa̱ sami̱ṣā ma̍dema ।
gā̱ya̱tri̱yā hri̱yamā̍ṇasya̱ yatte᳚ ॥ 5 ॥))

**[[1-2-1-6]]**

प॒र्णम॑पत॒त्तृ॒तीय॑स्यै दि॒वोऽधि॑।
सो॑ऽयं प॒र्णः सो॑मप॒र्णाद्धि जा॒तः।
ततो॑ हरामि सोमपी॒थस्याव॑रुद्ध्यै।
दे॒वाना᳚ं ब्रह्मवा॒दं वद॑ता॒ं यत्।
उ॒पाश्रृ॑णोः सु॒श्रवा॒ वै श्रु॒तो॑ऽसि।
ततो॒ मामावि॑शतु ब्रह्मव॒र्चसम्।
तत्सं॒भर॒ग्ं॒स्तदव॑रुन्धीय सा॒क्षात्।
यया॑ ते सृ॒ष्टस्या॒ग्नेः।
हे॒तिम॒शम॑यत्प्र॒जाप॑तिः।
ता॒मि॒माम॒प्रदा॑हाय॥ ६॥

((pa̱rṇamapa̍tatṯṛtīya̍syai di̱vo'dhi̍ ।
so̍'ya̱ṃ pa̱rṇaḥ so̍mapa̱rṇāddhi jā̱taḥ ।
tato̍ harāmi somapī̱thasyava̍ruddhyai ।
de̱vānāg̍ṃ brahmavā̱daṃ vada̍tā̱ṃ yat ।
u̱pāśṛ̍ṇoḥ su̱śravā̱ vai śru̱to̍'si ।
tato̱ māmāvi̍śatu brahmavarca̱sam ।
tatsa̱ṃbhara̱g̍ṃstadava̍rundhīya sā̱kṣāt ।
yayā̍ te sṛ̱ṣṭasyā̱gneḥ ।
he̱tima̍śamayatpra̱jāpa̍tiḥ ।
tāmi̱māmapra̍dāhāya ॥ 6 ॥))

**[[1-2-1-7]]**

श॒मीग्ं॒ शान्त्यै॑ हराम्य॒हम्।
यत्ते॑ सृ॒ष्टस्य॑ य॒तः।
विक॑ङ्कतं॒ भा आ᳚र्छज्जातवेदः।
तया॑ भा॒सा संमि॑तः।
उ॒रुं नो॑ लो॒कमनु॒ प्रभा॑हि।
यत्ते॑ ता॒न्तस्य॒ हृद॑यमाच्छि॑न्दञ्जातवेदः।
म॒रुतो॒ऽद्भिस्त॑मयि॒त्वा।
ए॒तत्ते॒ तद॑शनेः संभ॑रामि।
सात्मा॑ अग्ने॒ सहृ॑दयो भवे॒ह।
चित्रि॑यादश्व॒त्थात्संभृ॑ता बृह॒त्यः॑॥ ७॥

((śa̱mīg̍ṃ śāntyai̍ harāmya̱ham ।
yatte̍ sṛ̱ṣṭasya̍ ya̱taḥ ।
vika̍ṅkata̱ṃ bhā ā᳚rchajjātavedaḥ ।
tayā̍ bhā̱sā sa̱ṃmi̍taḥ ।
u̱ruṃ no̍ lo̱kamanu̱ prabhā̍hi ।
yatte̍ tā̱ntasya̱ hṛda̍yamācchi̍ndañjātavedaḥ ।
ma̱ruto̱'dbhista̍mayi̱tvā ।
e̱tatte̱ tada̍śaneḥ sa̱ṃbha̍rāmi ।
sātmā̍ agne̱ sahṛ̍dayo bhave̱ha ।
citri̍yādaśva̱tthātsa̱ṃbhṛ̍tā bṛha̱tya̍ḥ ॥ 7 ॥))

**[[1-2-1-8]]**

शरी॑रम॒भि सङ्ँस्कृ॑ताः स्थ।
प्र॒जाप॑तिना य॒ज्ञमु॑खेन॒ संमि॑ताः।
ति॒स्रस्त्रि॒वृद्भि॒र्मि॑थु॒नाः प्रजा᳚त्यै।
अ॒श्व॒त्थाद्ध॑व्यवा॒हाद्धि जा॒ताम्।
अ॒ग्नेस्त॒नूं य॒ज्ञिया॒ग्ं॒ संभ॑रामि।
शा॒न्तयो॑निग्ं श॒मीग॑र्भम्।
अ॒ग्नये॒ प्रज॑नयि॒तवै᳚।
यो अ॑श्व॒त्थः श॒मीग॑र्भः।

आरुरोह त्वे सचा।
तं ते हरामि ब्रह्मणा॥ ८॥

((śarīramabhi saṃskṛtāḥ stha ।
prajāpatinā yajñamukhena sammitāḥ ।
tisrastrivṛdbhirmithunāḥ prajātyai ।
aśvatthāddhavyavāhāddhi jātām ।
agnestanūṃ yajñiyāṃ sambharāmi ।
śāntayoniṃ śamīgarbham ।
agnaye prajanayitave ।
yo aśvatthaḥ śamīgarbhaḥ ।
āruroha tve sacā ।
taṃ te harāmi brahmaṇā ॥ 8 ॥))

**[[1-2-1-9]]**

यज्ञियैः केतुभिः सह।
यं त्वा समभरञ्जातवेदः।
यथा शरीरं भूतेषु न्यक्तम्।
स संभृतः सीद शिवः प्रजाभ्यः।
उरुं नो लोकमनुनेषि विद्वान्।
प्रवेधसे कवये मेध्याय।
वचो वन्दारु वृषभाय वृष्णे।
यतो भयमभयं तन्नो अस्तु।
अव देवान् यजे हेड्यान्।
समिधाऽग्निं दुवस्यत॥ ९॥

((yajñiyaiḥ ketubhiḥ saha ।
yaṃ tvā samabharañjātavedaḥ ।
yathā śarīraṃ bhūteṣu nyaktam।
sa saṃbhṛtaḥ sīda śivaḥ prajābhyaḥ ।
uruṃ no lokamanuneṣi vidvān ।
pravedhase kavaye medhyāya ।
vaco vandāru vṛṣabhāya vṛṣṇe ।
yato bhayamabhayaṃ tanno astu ।
ava devān yaje heḍyān ।
samidhā'gniṃ duvasyata ॥ 9 ॥))

**[[1-2-1-10]]**

घृतैर्बोधयतातिथिम्।
आऽस्मिन् हव्या जुहोतन।
उप त्वाऽग्ने हविष्मतीः।
घृताचीर्यन्तु हर्यत।
जुषस्व समिधो मम।
तं त्वा समिद्भिरङ्गिरः।
घृतेन वर्धयामसि।
बृहच्छोचा यविष्ठ्य।
समिध्यमानः प्रथमो नु धर्मः।
समक्तुभिरज्यते विश्ववारः॥ १०॥

((ghṛtairbodhayatātithim।
ā'smin havyā juhotana ।
upa tvā'gne haviṣmatīḥ ।
ghṛtācīryantu haryata ।
juṣasva samidho mama ।
taṃ tvā samidbhiraṅgiraḥ ।
ghṛtena vardhayāmasi ।
bṛhacchocā yaviṣṭhya ।
samidhyamānaḥ prathamo nu dharmaḥ ।
samaktubhirajyate viśvavāraḥ ॥ 10 ॥))

**[[1-2-1-11]]**

शोचिष्केशो घृतनिर्णिक्पावकः।
सुयज्ञो अग्निर्यजथाय देवान्।
घृतप्रतीको घृतयोनिरग्निः।
घृतैः समिद्धो घृतमस्यान्नम्।
घृतप्रुषस्त्वा सरितो वहन्ति।
घृतं पिबन्त्सुयजा यक्षि देवान्।
आयुर्दा अग्ने हविषो जुषाणः।
घृतप्रतीको घृतयोनिरेधि।
घृतं पीत्वा मधु चारु गव्यम्।
पितेव पुत्रमभि रक्षतादिमम्॥ ११॥

((śociṣkeśo ghṛtanirṇikpāvakaḥ ।
suyajño agniryajathāya devān ।
ghṛtapratīko ghṛtayoniragniḥ ।
ghṛtaiḥ samiddho ghṛtamasyāannām ।
ghṛtapruṣastvā sarito vahanti ।
ghṛtaṃ pibāntsuyajā yakṣi devān ।
āyurdā agne haviṣo juṣāṇaḥ ।
ghṛtapratīko ghṛtayoniredhi ।
ghṛtaṃ pītvā madhu cāru gavyām ।
piteva putramabhi rakṣatādimam ॥ 11॥))

**[[1-2-1-12]]**

त्वामग्ने समिधानं यविष्ठ।
देवा दूतं चक्रिरे हव्यवाहम्।
उरुज्रयसं घृतयोनिमाहुतम्।
त्वेषं चक्षुर्दधिरे चोदयन्वति।
त्वामग्ने प्रदिव आहुतं घृतेन।
सुम्नायवः सुषमिधा समीधिरे।

स वा॑वृधा॒न ओष॑धीभिरु॒क्षि॒तः।
उ॒रु॒ज्र॒याꣳ॑सि॒ पार्थि॑वा॒ वि॒तिष्ठ॑से।
घृ॒तप्र॑तीकं च ऋ॒तस्य॑ धू॒र्षद᳚म्।
अ॒ग्निं मि॒त्रं न स॑मि॒धा॒न ऋ॑ञ्जते॥ १२॥

((tvāma̍gne samidhā̱nam ya̍viṣṭha |
de̱vā dū̱taṃ ca̍krire havya̱vāha̎m |
u̱ru̱jraya̍sam ghṛ̱tayo̍ni̱māhu̍tam |
tve̱ṣaṃ cakṣu̍rdadhire coda̱yanva̍ti |
tvāma̍gne pra̱diva̱ āhu̍taṃ ghṛ̱tena̍ |
su̱mnā̱yava̍ḥ su̱ṣa̱midhā̱ sami̍dhire |
sa va̍vṛdhā̱na oṣa̍dhībhirukṣi̱taḥ |
u̱rujrayā̍m̐si̱ pārthi̍vā̱ viti̍ṣṭhase |
ghṛ̱tapra̍tīkaṃ ca ṛ̱tasya̍ dhū̱rṣada̎m |
a̱gniṃ mi̱traṃ na sa̍midhā̱na ṛ̍ñjate || 12 ||))

**[[1-2-1-13]]**

इ॒न्धा॑नो अ॒क्रो वि॒दथे॑षु दी॒द्य॑त्।
शु॒क्रव॑र्णा॒मुदु॑ नो यꣳसते॒ धिय᳚म्।
प्र॒जा अ॑ग्ने॒ संवा॑सय।
आशा᳚श्च प॒शुभि॑ः स॒ह।
रा॒ष्ट्राण्य॑स्मा॒ आधे॑हि।
यान्यास᳚न्त्सवि॒तुः स॒वे।
म॒ही वि॒श्पत्नी॒ सद॑ने ऋ॒तस्य॑।
अ॒र्वाची॑ ए॒तं॑ धरु॒णे र॒यी॒णाम्।
अ॒न्तर्व॑त्नी॒ जन्यं॑ जा॒तवे॑दसम्।
अ॒ध्व॒राणा᳚ं जनयथः पु॒रो॒गाम्॥ १३॥

((indha̍no a̱kro vi̱dathe̍ṣu̱ dīdya̍t |
śu̱krava̍rṇā̱mudu̍ no yam̐sate̱ dhiya̎m |
pra̱jā a̍gne̱ saṃva̍saya |
āśā̎śca pa̱śubhi̍ḥ sa̱ha |
rā̱ṣṭrā̱ṇya̍smā̱ ādhe̍hi |
yānyāsā̎ntsavi̱tuḥ sa̱ve |
ma̱hī vi̱śpatnī̱ sada̍ne ṛ̱tasya̍ |
a̱rvācī̱ eta̍ṃ dharu̱ṇe rayī̱ṇām |
a̱ntarva̍tnī̱ janya̍ṃ jā̱tave̍dasam |
a̱dhva̱rāṇā̎m̐ janayathaḥ puro̱gām || 13 ||))

**[[1-2-1-14]]**

आरो॑हतं द॒शत॒ꣳ॒ शक्व॑री॒र्मम॑।
ऋ॒तेना᳚ग्न॒ आयु॑षा॒ वर्च॑सा स॒ह।
ज्योग्जीव॑न्त॒ उत्त॑रामुत्तरा॒ꣳ॒ समा᳚म्।
द॒र्श॑म॒हं पू॒र्णमा॑सं य॒ज्ञं यथा॒ यजै᳚।
ऋ॒त्विय॑वती स्थो अ॒ग्निरे॑तसौ।
गर्भं॑ द॒धाथां॒ ते वा॑म॒हं द॑दे।
तत्स॒त्यं यद्वी॒रं बि॑भृ॒थः।
वी॒रं ज॑नयि॒ष्यथ॑ः।
ते मत्प्रा॒तः प्रज॑निष्येथे।
ते मा॒ प्रजा॑ते॒ प्रज॑नयि॒ष्यथ॑ः॥ १४॥

((āro̍hataṃ da̱śata̱m̐ śakva̍rīrmama̍ |
ṛ̱tenā̎gna̱ āyu̍ṣā̱ varca̍sā sa̱ha |
jyogjīva̍nta̱ utta̍rāmuttarā̱m̐ samā̎m |
darśa̍ma̱haṃ pū̱rṇama̍saṃ ya̱jñaṃ yathā̱ yajai̎ |
ṛ̱tvi̍yavatī stho a̱gnire̍tasau |
garbha̍ṃ dadhāthā̱ṃ te va̍ma̱haṃ da̍de |
tatsa̱tyaṃ yadvī̱raṃ bi̍bhṛthaḥ |
vī̱raṃ ja̍nayi̱ṣyatha̍ḥ |
te matprā̱taḥ praja̍niṣyethe |
te mā̱ prajā̍te̱ praja̍nayi̱ṣyatha̍ḥ || 14 ||))

**[[1-2-1-15]]**

प्र॒जया॑ प॒शुभि॑र्ब्रह्मवर्च॒सेन॑ सुव॒र्गे लो॒के।
अनृ॑तात्स॒त्यमुपै॑मि।
मा॒नु॒षाद्दैव्य॒मुपै॑मि।
दैवीं॒ वाचं॑ यच्छामि।
शल्कै॑र॒ग्निमि॑न्धा॒नः।
उ॒भौ लो॒कौ स॑नेम॒हम्।
उ॒भयो᳚र्लो॒कयो॑र्ऋ॒द्ध्वा।
अति॑ मृ॒त्युं त॑राम्य॒हम्।
जात॑वेदो॒ भुव॑नस्य॒ रेत॑ः।
इ॒ह सि॑ञ्च॒ तप॑सो॒ यज्ज॑नि॒ष्यते᳚॥ १५॥

((pra̱jaya̍ pa̱śubhi̍rbrahmavarca̱sena̍ suva̱rge lo̱ke |
anṛ̍tātsa̱tyamupai̍mi |
mā̱nu̱ṣāddaivya̱mupai̍mi |
daivī̱ṃ vāca̍ṃ yacchāmi |
śalkai̍ra̱gnimi̍ndhā̱naḥ |
u̱bhau lo̱kau sa̍nema̱ham |
u̱bhayo̎rlo̱kayo̍rṛ̱ddhvā |
ati̍ mṛ̱tyuṃ ta̍rāmya̱ham |
jāta̍vedo̱ bhuva̍nasya̱ reta̍ḥ |
i̱ha siñca̱ tapa̍so̱ yajja̍ni̱ṣyate̎ || 15 ||))

**[[1-2-1-16]]**

अ॒ग्निम॑श्व॒त्थादधि॑ ह॒व्यवाह᳚म्।
श॒मीग॒र्भाज्ज॒नय॒न्यो म॑यो॒भूः।
अ॒यं ते॒ योनि॑र्ऋ॒त्विय॑ः।
यतो॑ जा॒तो अरो॑चथाः।

तं जा॒नन्न॑ग्न॒ आरो॑ह।
अथा॑ नो वर्धया र॒यिम्।
अपे॑त॒ वीत॒ वि च॑ सर्प॒ताता॑ः।
येऽत्र॒ स्थ पु॑रा॒णा ये च॒ नूत॑नाः।
अदा॑दि॒दं य॒मो॑ऽव॒सानं॑ पृथि॒व्याः।
अक्र॑न्नि॒मं पि॒तरो॑ लो॒कम॑स्मै॥ १६॥

((a̱gnimáśva̱tthādadhi̍ havya̱vāhăm |
śa̱mīga̱rbhājja̱naya̱nyo máyo̱bhūḥ |
a̱yaṃ te̱ yoni̍rṛ̱tviyáḥ |
yató jā̱to arócathāḥ |
taṃ jā̱nannágna̱ āróha |
athā̍ no vardhayā ra̱yim |
apéta̱ vīta̱ vi cá sarpa̱tātáḥ |
ye'tra̱ stha púrā̱ṇā ye ca̱ nūtánāḥ |
adā̍di̱daṃ ya̱mó'va̱sānaṃ́ pṛthi̱vyāḥ |
akránni̱maṃ pi̱taró lo̱kamásmai || 16 ||))

**[[1-2-1-17]]**
अ॒ग्नेर्भस्मा॑स्य॒ग्नेः पुरी॑षमसि।
सं॒ज्ञान॑मसि काम॒धर॑णम्।
मयि॑ ते काम॒धर॑णं भूयात्।
सं व॑ः सृजामि॒ हृद॑यानि।
सꣳसृ॑ष्टं॒ मनो॑ अस्तु वः।
सꣳसृ॑ष्टः प्रा॒णो अ॑स्तु वः।
सं या व॑ः प्रि॒यास्त॒नुव॑ः।
संप्रि॒या हृद॑यानि वः।
आ॒त्मा वो॑ अस्तु॒ संप्रि॑यः।
संप्रि॑यास्त॒नुवो॒ मम॑॥ १७॥

((a̱gnerbhasmā̍sya̱gneḥ purī̍ṣamasi |
sa̱ṃjñānámasi kāma̱dharáṇam |
mayi̍ te kāma̱dharáṇaṃ bhūyāt |
saṃ váḥ sṛjāmi̱ hṛdáyāni |
sa̍ṃsṛ̍ṣṭa̱ṃ manó astu vaḥ |
sa̍ṃsṛ̍ṣṭaḥ prā̱ṇo ástu vaḥ |
saṃ yā váḥ pri̱yāsta̱nuváḥ |
saṃpri̱yā hṛdáyāni vaḥ |
ā̱tmā vó astu̱ saṃpri̍yaḥ |
saṃpri̍yāsta̱nuvo̱ mamá || 17 ||))

**[[1-2-1-18]]**
क॒ल्पेतां॒ द्यावा॑पृथि॒वी।
कल्प॑न्ता॒माप॒ ओष॑धीः।
कल्प॑न्ताम॒ग्नय॒ः पृथ॑क्।
मम॒ ज्यैष्ठ्या॑य॒ सव्र॑ताः।
ये॑ऽग्नय॒ः सम॑नसः।
अ॒न्तरा द्यावा॑पृथि॒वी।
वास॑न्तिकावृ॒तू अ॒भि कल्प॑मानाः।
इन्द्र॑मिव दे॒वा अ॒भि संवि॑शन्तु।
दि॒वस्त्वा॑ वी॒र्ये॑ण।
पृ॒थि॒व्यै म॑हि॒म्ना॥ १८॥

((kalpétā̱m dyāvā̍pṛthi̱vī |
kalpántā̱māpa̱ oṣádhīḥ |
kalpántāma̱gnaya̱ḥ pṛthák |
mama̱ jyaiṣṭhyā̍ya̱ savrátāḥ |
yĕ'gnaya̱ḥ samánasaḥ |
a̱ntarā dyāvā̍pṛthi̱vī |
vāsántikāvṛ̱tū a̱bhi kalpámānāḥ |
indrámiva de̱vā a̱bhi saṃvi̍śantu |
di̱vastvā̍ vī̱ryéṇa |
pṛ̱thi̱vyai máhi̱mnā || 18 ||))

**[[1-2-1-19]]**
अ॒न्तरि॑क्षस्य॒ पोषे॑ण।
स॒र्वप॑शुमाद॑धे।
अजी॑जनन्नमृ॒तं मर्त्या॑सः।
अ॒स्रेमाणं॑ त॒रणिं॑ वी॒डुज॑म्भम्।
दश॒ स्वसा॑रो अ॒ग्रुव॑ः समी॒चीः।
पुमा॑ꣳसं जा॒तम॒भि सꣳर॑भन्ताम्।
प्र॒जाप॑तेस्त्वा प्रा॒णेना॒भि प्राणि॑मि।
पू॒ष्णः पोषे॑ण॒ मह्या॑म्।
दी॒र्घायु॒त्वाय॑ श॒तशा॑रदाय।
श॒तꣳ श॒रद्भ्य॒ आयु॑षे॒ वर्च॑से॥ १९॥

((a̱ntari̍kṣasya̱ poṣéṇa |
sa̱rvapáśu̱mādádhe |
aji̍janannamṛ̱taṃ martyā̍saḥ |
a̱sremāṇaṃ́ ta̱raṇiṃ́ vī̱ḍujámbham |
daśa̱ svasáro a̱gruváḥ samī̱cīḥ |
pumā̍ṃsaṃ jā̱tama̱bhi saṃ̍rábhantām |
pra̱jāpátestvā prā̱ṇenābhi̱ prāṇi̍mi |
pū̱ṣṇaḥ poṣéṇa̱ mahyăm |
dī̱rghāyu̱tvāyá śa̱taśā̍radāya |
śa̱taṃ́ śa̱radbhya̱ āyúṣe̱ varcáse || 19 ||))

**[[1-2-1-20]]**
जी॒वात्वै॒ पुण्या॑य।
अ॒हं त्वद॑स्मि॒ मद॑सि॒ त्वमे॒तत्।

ममा॑सि॒ योनि॒स्तव॒ योनि॑रस्मि।
ममै॒व सन्वह॑ ह॒व्यान्य॑ग्ने।
पु॒त्रः पि॒त्रे लो॑क॒कृज्जा॑तवेदः।
प्रा॒णे त्वा॒ऽमृत॒माद॑धामि।
अ॒न्ना॒दम॒न्नाद्या॑य।
गो॒प्तारं॒ गु॒प्त्यै॑।
सु॒गार्ह॒प॒त्यो वि॒दह॒न्नरा॑तीः।
उ॒षस॒ः श्रेय॑सीः श्रेयसी॒र्दध॑त्॥ २०॥

((jī̱vātvai puṇyā̍ya ।
a̱haṃ tvadā̍smi̱ madā̍si̱ tvame̱tat ।
mamā̍si̱ yoni̱stava̱ yonī̍rasmi ।
mama̱iva sanvahā̍ ha̱vyānyā̍gne ।
pu̱traḥ pi̱tre lo̍ka̱kṛjjā̍tavedaḥ ।
prā̱ṇe tvā̱'mṛta̱mādā̍dhāmi ।
a̱nnā̱dama̱nnādyā̍ya ।
go̱ptāra̱ṃ guptyai̎ ।
su̱gā̱rha̱pa̱tyo vi̱daha̱nnarā̎tīḥ ।
u̱ṣasa̱ḥ śreyā̍sīḥ śreyasī̱rdadhā̍t ॥ 20 ॥))

**[[1-2-1-21]]**
अग्ने॑ स॒पत्ना॒ꣳ अप॒ बाध॑मानः।
रा॒यस्पोष॒मिष॒मूर्ज॑म॒स्मासु॑ धेहि।
इ॒मा उ॒ मामुप॑ तिष्ठन्तु॒ राय॑ः।
आ॒भिः प्र॒जाभि॑रि॒ह संव॑सेय।
इ॒हो इडा॑ तिष्ठतु विश्वरू॒पी।
मध्ये॒ वसो॑र्दीदिहि जातवेदः।
ओज॑से॒ बला॑य॒ त्वोद्य॑च्छे।
वृष॑णे॒ शुष्मा॒यायु॑षे॒ वर्च॑से।
स॒प॒त्न॒तूर॑सि वृत्र॒तूः।
यस्ते॑ दे॒वेषु॑ महि॒मा सु॑वर्गः॥ २१॥

((agne̍ sa̱patnā̱ꣳ apa̱ bādhā̍mānaḥ ।
rā̱yaspo̱ṣami̱ṣa̱mūrjā̍ma̱smāsu̍ dhehi ।
i̱mā u̱ māmupā̍ tiṣṭhantu̱ rāyā̍ḥ ।
ā̱bhiḥ pra̱jābhi̍ri̱ha saṃvā̍seya ।
i̱ho iḍā̍ tiṣṭhatu viśvarū̱pī ।
madhye̱ vaso̎rdīdihi jātavedaḥ ।
ojā̍se̱ balā̍ya̱ tvodyā̍cche ।
vṛṣā̍ṇe̱ śuṣmā̱yāyu̍ṣe̱ varcā̍se ।
sa̱pa̱tna̱tūrā̍si vṛtra̱tūḥ ।
yaste̍ de̱veṣu̍ mahi̱mā su̍va̱rgaḥ ॥ 21 ॥))

**[[1-2-1-22]]**
यस्त॑ आ॒त्मा प॒शुषु॑ प्रवि॑ष्टः।
पु॒ष्टिर्या ते॑ मनु॒ष्ये॑षु पप्र॒थे।
तया॑ नो अग्ने जु॒षमा॑ण॒ एहि॑।
दि॒वः पृ॑थि॒व्याः पर्य॒न्तरि॑क्षात्।
वाता॑त्प॒शुभ्यो॒ अध्योष॑धीभ्यः।
यत्र॑ यत्र जातवेदः सं॒ब॒भूथ॑।
ततो॑ नो अग्ने जु॒षमा॑ण॒ एहि॑।
प्राची॒मनु॑ प्र॒दिशं॒ प्रेहि॑ वि॒द्वान्।
अ॒ग्नेर॑ग्ने पु॒रो अ॑ग्निर्भवे॒ह।
विश्वा॒ आशा॒ दीद्या॑नो॒ विभा॑हि॥ २२॥

((yastā̍ ā̱tmā pa̱śuṣu̱ pravi̍ṣṭaḥ ।
pu̱ṣṭi̱ryā te̍ manu̱ṣye̍ṣu papra̱the ।
tayā̍ no agne ju̱ṣamā̍ṇa̱ ehi̍ ।
di̱vaḥ pṛ̍thi̱vyāḥ parya̱ntari̍kṣāt ।
vātā̎tpa̱śubhyo̱ adhyoṣā̍dhībhyaḥ ।
yatrā̍ yatra jātavedaḥ saṃba̱bhūthā̍ ।
tato̍ no agne ju̱ṣamā̍ṇa̱ ehi̍ ।
prācī̱manu̍ pra̱diśa̱ṃ prehi̍ vi̱dvān ।
a̱gnerā̍gne pu̱ro ā̍gnirbhave̱ha ।
viśvā̱ āśā̱ dīdyā̍no̱ vibhā̍hi ॥ 22 ॥))

**[[1-2-1-23]]**
ऊर्जं॑ नो धेहि द्वि॒पदे॒ चतु॑ष्पदे।
अन्व॒ग्निरु॒षसा॒मग्र॑मख्यत्।
अन्वहा॑नि प्रथ॒मो जा॒तवे॑दाः।
अनु॒ सूर्य॑स्य पुरु॒त्रा च॑ र॒श्मीन्।
अनु॒ द्यावा॑पृथि॒वी आत॑तान।
विक्र॑मस्व म॒हाꣳ अ॑सि।
वे॒दि॒षन्मा॑नु॒षेभ्यः।
त्रि॒षु लो॒केषु॑ जागृहि।
यदि॒दं दि॒वो यद॒दः पृ॑थि॒व्याः।
सं॒वि॒दा॒ने रोद॑सी संब॒भूव॑तुः॥ २३॥

((ūrja̍ṃ no dhehi dvi̱pade̱ catū̍ṣpade ।
anva̱gniru̱ṣasā̱magrā̍makhyat ।
anvahā̍ni pratha̱mo jā̱tave̍dāḥ ।
anu̱ sūryā̍sya puru̱trā cā̍ ra̱śmīn ।
anu̱ dyāvā̍pṛthi̱vī ātā̍tāna ।
vikrā̍masva ma̱hāꣳ ā̍si ।
ve̱di̱ṣanmā̍nu̱ṣebhyaḥ ।
tri̱ṣu lo̱keṣu̍ jāgṛ̱hi ।
yadi̱daṃ di̱vo yada̱daḥ pṛ̍thi̱vyāḥ ।
sa̱ṃvi̱dā̱ne rodā̍sī saṃbabhū̱vatu̍ḥ ॥ 23 ॥))

**[[1-2-1-24]]**

तयो᳚ः पृ॒ष्ठे सी॑दतु जा॒तवे॑दाः।
श॒म्भूः प्र॒जाभ्य॑स्त॒नुवे᳚ स्यो॒नः।
प्रा॒णं त्वा॒ऽमृत॒ आद॑धामि।
अ॒न्ना॒दम॒न्नाद्या॑य।
गो॒प्तारं॒ गुप्त्यै᳚।
यत्ते॑ शुक्र शु॒क्रं वर्च॑ः शु॒क्रा त॒नूः।
शु॒क्रं ज्योति॒रज॑स्रम्।
तेन॑ मे दीदिहि॒ तेन॒ त्वाऽऽद॑धे।
अ॒ग्निना᳚ऽग्ने॒ ब्रह्म॑णा।
आ॒न॒शे व्या॑नशे॒ सर्व॒मायु॒र्व्या॑नशे॥ २४॥

((tayőḥ pṛ̱ṣṭhe sīdatu jā̱tavedāḥ I
śa̱mbhūḥ pra̱jābhyásta̱nuve̋ syo̱naḥ I
prā̱ṇaṃ tvā̱'mṛta̱ ādádhāmi I
a̱nnā̱dama̱nnādyáya I
go̱ptāraṃ̱ guptyai̋ I
yatté śukra śu̱kraṃ varcáḥ śu̱krā ta̱nūḥ I
śu̱kraṃ jyoti̱rajásram I
tená me dīdihi̱ tena̱ tvā''dádhe I
a̱gninā̋'gne̱ brahmáṇā I
ā̱na̱śe vyánaśe̱ sarva̱māyu̱rvyánaśe II 24 II))

**[[1-2-1-25]]**
नर्यं॑ प्र॒जां मे॑ गोपाय।
अ॒मृ॒त॒त्वाय॑ जी॒वसे᳚।
जा॒तां ज॑नि॒ष्यमा॑णां च।
अ॒मृते॑ स॒त्ये प्रति॑ष्ठिताम्।
अथ॑र्व पि॒तुं मे॑ गोपाय।
र॒समन्न॑मि॒हायु॑षे।
अद॑ब्धा॒योऽशी॑ततनो।
अ॒वि॒षं नः॑ पि॒तुं कृ॑णु।
शꣳस्यं॑ प॒शून्मे॑ गोपाय।
द्वि॒पादो॒ ये चतु॑ष्पदः॥ २५॥

((naryá prajā̱ṃ mé gopāya I
a̱mṛ̱ta̱tvāyá jī̱vase̋ I
jā̱tāṃ jáni̱ṣyamáṇāṃ ca I
a̱mṛte sa̱tye pratíṣṭhitām I
athárva pi̱tuṃ mé gopāya I
rasa̱mannámi̱hāyúṣe I
adábdhā̱yo'śītatano I
avi̱ṣaṃ naḥ pi̱tuṃ kṛ̱ṇu I
śaꣳ̐syá pa̱śūnmé gopāya I
dvi̱pādo̱ ye catúṣpadaḥ II 25 II))

**[[1-2-1-26]]**
अ॒ष्टाश॑फाश्च॒ य इ॒हाग्ने᳚।
ये चैक॑शफा आ॒शु॒गाः।
स॒प्रथ स॒भां मे॑ गोपाय।
ये च॒ सभ्या᳚ः सभा॒सद॑ः।
तानि॑न्द्रि॒यावत॑ः कुरु।
सर्व॒मायु॒रुपा॑सताम्।
अहे॑ बुध्निय॒ मन्त्रं॑ मे गोपाय।
यमृष॑यस्त्रैवि॒दा वि॒दुः।
ऋच॑ः सामा॑नि॒ यजूꣳ॑षि।
सा हि श्रीर॒मृता॑ स॒ताम्॥ २६॥

((a̱ṣṭāśáphāśca̱ ya i̱hāgne̋ I
ye caikáśaphā āśu̱gāḥ I
sapratha sa̱bhāṃ mé gopāya I
ye ca̱ sabhyā̋ḥ sabhā̱sadáḥ I
tānindri̱yāvátaḥ kuru I
sarva̱māyu̱rupásatām I
ahé budhniya̱ mantraṃ́ me gopāya I
yamṛ̱ṣáyastraivi̱dā vi̱duḥ I
ṛ̱ca̱ḥ sāmāni̱ yajūꣳ̐ṣi̱ I
sā hi śrīra̱mṛtā sa̱tām II 26 II))

**[[1-2-1-27]]**
चतु॑ःशिखण्डा युव॒तिः सु॒पेशा᳚ः।
घृ॒तप्र॑तीका॒ भुव॑नस्य॒ मध्ये᳚।
म॒र्मृ॒ज्यमा॑ना म॒हते॑ सौभ॑गाय।
मह्यं॑ धुक्ष्व॒ यज॑मानाय॒ कामा॑न्।
इ॒हैव सन्तत्र॑ स॒तो वो॑ अग्नयः।
प्रा॒णेन॑ वा॒चा मन॑सा बिभर्मि।
ति॒रो मा॒ सन्त॒मायु॒र्मा प्रहा॑सीत्।
ज्योति॑षा वो वैश्वान॒रेणोप॑तिष्ठे।
प॒ञ्च॒धाऽग्नीन्व्य॑क्रामत्।
वि॒राट्थ्सृ॒ष्टा प्र॒जाप॑तेः।
ऊ॒र्ध्वाऽऽरो॑हद्रोहि॒णी।
योनि॑र॒ग्नेः प्रति॑ष्ठितिः॥ २७॥
वि॒शन्तु॒ नः पु॒रू॒चीर्वि॑धेम नि॒धाय॒ यत्तेऽप्र॑दाहाय बृ॒हत्यौ᳚
ब्रह्म॑णा दुवस्यत वि॒श्ववा॑र इ॒मम॑ृञ्जते पु॒रो॒गां प्र॒जन॑यि॒ष्यथो᳚
ज॒नि॒ष्यते॒ऽस्मै॒ मर्म॑ महि॒म्ना वर्च॑से॒ दध॑त्सु॒वर्गो भा॑हि
संब॒भू॒वतु॒रायु॒र्व्या॑नशे॒ चतु॑ष्पदः स॒तां प्र॒जाप॑ते॒र्द्वे च॑॥ १॥

((catu̍ḥśikhaṇḍā yuva̱tiḥ su̱peśā̎ḥ |
ghṛtapra̍tīkā̱ bhuva̍nasya̱ madhye̎ |
ma̱rmṛ̱jyamā̍nā maha̱te saubha̍gāya |
mahya̍ṃ dhukṣva̱ yaja̍mānāya̱ kāmā̍n |
i̱haiva santatra̍ sa̱to vo̍ agnayaḥ |
prā̱ṇena̍ vā̱cā mana̍sā bibharmi |
ti̱ro mā̱ santa̱māyu̱rmā prahā̎sīt |
jyoti̱ṣā vo vaiśvāna̱reṇopa̍ti̱ṣṭhe |
pa̱ñca̱dhā'gnīnvya̍krāmat |
vi̱rāṭṭhsṛ̱ṣṭā pra̱jāpa̍teḥ |
ū̱rdhvā''ro̍hadrohi̱ṇī |
yoni̍ra̱gneḥ prati̍ṣṭhitiḥ || 27 ||
vi̱śa̱ntu̱ naḥ pu̱rū̱cīrvi̍dhema ni̱dhāya̱
yatte'pra̍dāhāya bṛha̱tyo̎ brahma̍ṇā duvasyata
vi̱śvavā̍ra i̱mamṛ̍ñjate puro̱gāṃ praja̍nayi̱ṣyatho̍
jani̱ṣyate̎'smai̱ mama̍ mahi̱mnā varca̍se̱
dadha̍tsuva̱rgo bhā̍hi sa̱ṃbabhū̱vatu̱rāyu̱rvyā̍naśe̱
catu̍ṣpadaḥ sa̱tāṃ pra̱jāpa̍te̱rdve ca̍ || 1 ||))

**[[1-2-2-1]]**

न॒वै॒तान्यहा॑नि भवन्ति।
न॒व वै सु॑व॒र्गा लो॒काः।
यदे॒तान्यहा॑न्युप॒यन्ति॑।
न॒वस्वे॒व त॒त्सु॑व॒र्गेषु॑ लो॒केषु॑ स॒त्रिण॑ः प्रति॒तिष्ठ॑न्तो यन्ति।
अ॒ग्नि॒ष्टो॒माः पर॑ः सामानः का॒र्या॑ इत्या॑हुः।
अ॒ग्नि॒ष्टो॒मसं॑मितः सुव॒र्गो लो॒क इति॑।
द्वाद॑शाग्निष्टो॒मस्य॑ स्तो॒त्राणि॑।
द्वाद॑श॒ मासा॑ः संव॒त्स॒रः।
तत्तन्न सूक्ष्यैँम्।
उ॒क्थ्या॑ ए॒व स॑प्तद॒शाः पर॑ः सामानः का॒र्या॑ः॥ १॥

((nava̱itānyahā̍ni bhavanti |
nava̱ vai su̍va̱rgā lo̱kāḥ |
yade̱tānyahā̍nyupa̱yanti̍ |
na̱vasve̱va tatsu̍vargeṣu̍ lo̱keṣu̍ sa̱triṇa̍ḥ
prati̱tiṣṭha̍nto yanti |
a̱gni̱ṣṭo̱māḥ para̍ḥ sāmānaḥ kā̱rya̍ ityā̍huḥ |
a̱gni̱ṣṭo̱masa̍ṃmitaḥ suva̱rgo lo̱ka iti̍ |
dvāda̍śāgniṣṭo̱masya̍ sto̱trāṇi̍ |
dvāda̍śa̱ māsā̎ḥ saṃvatsa̱raḥ |
tattanna sūrkṣyām|
u̱kthya̍ e̱va sa̍ptada̱śāḥ para̍ḥ sāmānaḥ kā̱ryā̎ḥ || 1 ||))

**[[1-2-2-2]]**

प॒शवो॒ वा उ॒क्थानि॑।
प॒शूनामव॑रुध्यै।
वि॒श्व॒जि॒द॒भि॒जि॒ता॑वग्निष्टो॒मौ।
उ॒क्थ्या॑ः सप्तद॒शाः पर॑ः सामानः।
ते सꣳस्तु॑ता वि॒राज॑म॒भि संप॑द्यन्ते।
द्वे च॒र्चाव॑ति॑ रिच्येते।
एक॑या॒ गौरति॑रिक्तः।
एक॒याऽऽयु॑रू॒नः।
सु॒व॒र्गो वै लो॒को ज्योति॑ः।
ऊर्ग्वि॒राट्॥ २॥

((pa̱śavo̱ vā u̱kthāni̍ |
pa̱śūnāmava̍rudhyai |
vi̱śva̱ji̱da̱bhi̱jitā̍vagniṣṭo̱mau |
u̱kthyā̍ḥ saptada̱śāḥ para̍ḥ sāmānaḥ |
te sa̎ṃstu̍tā vi̱rāja̍mabhi saṃpa̍dyante |
dve carcā̱vati̍ ricyete |
eka̍yā̱ gaurati̍riktaḥ |
eka̱yā''yu̍rū̱naḥ |
su̱va̱rgo vai lo̱ko jyoti̍ḥ |
ūrgvi̱rāṭ || 2 ||))

**[[1-2-2-3]]**

सु॒व॒र्गमे॒व तेन॑ लो॒कम॒भि ज॑यन्ति।
यत्प॒रꣳ॒ राथ॑न्तरम्।
तत्प्र॑थ॒मेऽह॑न्का॒र्य॑म्।
बृ॒ह॒द्द्वि॒तीये॑।
वै॒रू॒पं तृ॒तीये॑।
वै॒रा॒जं च॑तु॒र्थे।
शा॒क्व॒रं प॑ञ्च॒मे।
रै॒व॒तꣳ॒ ष॒ष्ठे।
तदु॑ पृ॒ष्ठेभ्यो॒ नय॑न्ति।
सं॒तन॑य ए॒ते ग्र॒हा॑ गृ॒ह्यन्ते॥ ३॥

((su̱va̱rgame̱va tena̍ lo̱kama̱bhi ja̍yanti |
yatpa̱ra̎ṃ rātha̍ntaram |
tatpra̍tha̱me'ha̍nkā̱ryam̎ |
bṛ̱haddvi̱tīye̎ |
vai̱rūpa̱ṃ tṛ̱tīye̎ |
vai̱rāja̱ṃ ca̍tu̱rthe |
śā̱kva̱ra̱ṃ pa̍ñca̱me |
rai̱va̱ta̎ṃ ṣa̱ṣṭhe |
tadu̍ pṛ̱ṣṭhebhyo̱ naya̍nti |
sa̱ṃtana̍ya e̱te gra̱hā̍ gṛ̱hyante || 3 ||))

**[[1-2-2-4]]**

अ॒ति॒ग्रा॒ह्या॑ः पर॑ः सामसु।
इ॒माने॒वैतैर्लो॒कान्त्सं त॑न्वन्ति।
मि॒थु॒ना ए॒ते ग्र॒हा॑ गृ॒ह्यन्ते।

अ॒ति॒ग्रा॒ह्या᳚ः पर॑ः सामसु।
मि॒थु॒नमे॒व तैर्यज॑माना॒ अव॑रुन्धते।
बृ॒ह॒त्पृ॒ष्ठं भ॑वति।
बृ॒हद्वै सु॑व॒र्गो लो॒कः।
बृ॒ह॒तैव सु॑व॒र्गं लो॒कं य॑न्ति।
त्र॒य॒स्त्रि॒ꣳ॒शि नाम॒ साम॑।
म॒ध्यन्दि॑ने॒ पव॑माने भवति॥ ४॥

((a̱tigra̱hya̎ḥ para̍ḥ sāmasu |
i̱māne̱vaitairlo̱kāntsaṃ ta̍nvanti |
mi̱thu̱nā e̱te graha̍ gṛ̱hyante |
a̱tigra̱hya̎ḥ para̍ḥ sāmasu |
mi̱thu̱name̱va tairyaja̍mānā̱ ava̍rundhate |
bṛ̱hatpṛ̱ṣṭhaṃ bha̍vati |
bṛ̱hadvai su̍va̱rgo lo̱kaḥ |
bṛ̱ha̱taiva su̍va̱rgaṃ lo̱kaṃ ya̍nti |
tra̱ya̱stri̱m̱̐śi nāma̱ sāma̍ |
madhya̍ndine̱ pava̍māne bhavati || 4 ||))

**[[1-2-2-5]]**

त्रय॑स्त्रिꣳश॒द्वै दे॒वता᳚ः।
दे॒वता॑ ए॒वाव॑रुन्धते।
ये वा इ॒तः परा᳚ञ्चꣳ संवत्स॒रमु॑प॒ यन्ति॑।
न है॑नं॒ ते स्व॒स्ति सम॑श्नुवते।
अथ॒ ये॑ऽमुतो॒ऽर्वाञ्च॑मुप॒ यन्ति॑।
ते है॑नꣳ॒ स्व॒स्ति सम॑श्नुवते।
ए॒तद्वा अ॒मुतो॒ऽर्वाञ्च॒मुप॑ यन्ति।
यदे॒वम्।
यो ह॒ खलु॒ वाव प्र॒जाप॑तिः।
स उ॑ वे॒वेन्द्र॑ः।
तदु॑ दे॒वेभ्यो॒ नय॑न्ति॥ ५॥
कार्या॑ वि॒राड्गृ॒ह्यन्ते॒ पव॑माने भव॒तीन्द्र॒ एकं॑ च॥ २॥

((traya̍strim̐śa̱dvai de̱vata̎ḥ |
de̱vata̍ e̱vāva̍rundhate |
ye vā i̱taḥ parā̎ñcam̐ saṃvatsa̱ramu̍pa̱ yanti̍ |
na hai̍naṃ̱ te sva̱sti sama̍śnuvate |
atha̱ ye̍'muto̱'rvāñca̍mupa̱ yanti̍ |
te hai̍nam̱̐ sva̱sti sama̍śnuvate |
e̱tadvā a̱muto̱'rvāñca̱mupa̍ yanti |
yade̱vam |
yo ha̱ khalu̱ vāva pra̱jāpa̍tiḥ |
sa u̍ ve̱vendra̍ḥ |
tadu̍ de̱vebhyo̱ naya̍nti || 5 ||
kārya̍ vi̱rāḍgṛ̱hyante̱ pava̍māne bhava̱tīndra̱ ekaṃ̍ ca || 2 ||))

**[[1-2-3-1]]**

सं॒त॒ति॒र्वा ए॒ते ग्र॒हा᳚ः।
य॒त्पर॑ः सामानः।
वि॒षू॒वान्दि॑वाकी॒र्त्य᳚म्।
यथा॒ शाला॑यै प॒क्ष॑सी।
ए॒वꣳ सं॑व॒त्स॒रस्य॒ प॒क्ष॑सी।
यदे॒तेन गृ॒ह्येर॑न्।
विषू॑ची संवत्स॒रस्य॒ पक्ष॑सी॒ व्यव॑स्रꣳसेयाताम्।
आर्ति॒मार्छे॑युः।
यदे॒ते गृ॒ह्यन्ते᳚।
यथा॒ शाला॑यै पक्ष॑सी मध्य॒मं व॒ꣳ॒श॒मभि स॑मा॒यच्छ॑ति॥
१॥

((saṃ̱ta̍ti̱rvā e̱te graha̎ḥ |
yatpara̍ḥ sāmānaḥ |
vi̱ṣū̱vāndi̍vākī̱rtya̎m |
yathā̱ śāla̍yai̱ pakṣa̍sī |
e̱vam̐ saṃ̍vatsa̱rasya̱ pakṣa̍sī |
yade̱tena gṛ̱hyera̍n |
viṣū̍cī saṃvatsa̱rasya̱ pakṣa̍sī̱ vyava̍sram̐seyātām |
ārti̱mārche̍yuḥ |
yade̱te gṛ̱hyante̎ |
yathā̱ śāla̍yai̱ pakṣa̍sī madhya̱mamaṃ va̱m̱̐śama̱bhi
sa̍mā̱yaccha̍ti || 1 ||))

**[[1-2-3-2]]**

ए॒वꣳ सं॑वत्स॒रस्य॒ पक्ष॑सी दि॒वाकी॒र्त्य॑म॒भि सं॑त॑न्वन्ति।
नाऽऽर्ति॒मार्छ॑न्ति।
ए॒क॒वि॒ꣳ॒शमह॑र्भ॑वति।
शु॒क्राग्रा॒ ग्रहा॑ गृह्यन्ते।
प्रत्यु॒त्त॑ब्ध्यै सय॒त्वाय॑।
सौ॒र्य॑ ए॒तदह॑ः प॒शुराल॑भ्यते।
सौ॒र्यो॑ऽतिग्रा॒ह्यो॑ गृह्यते।
अह॑रे॒व रू॒पेण॒ सम॑र्धयन्ति।
अथो॒ अह्न॑ ए॒वैष ब॒लिर्ह्रि॑यते।
स॒प्तैतदह॑रतिग्रा॒ह्या॑ गृह्यन्ते॥ २॥

((e̱vam̐ saṃ̍vatsa̱rasya̱ pakṣa̍sī divākī̱rtya̍ma̱bhi
saṃ̱ta̍nvanti |
nā''rti̱mārcha̍nti |
e̱ka̱vi̱m̱̐śamaha̍rbhavati |
śu̱krāgrā̱ graha̍ gṛ̱hyante |
pratyutta̍bdhyai saya̱tvāya̍ |

sau̱rya̍ e̱tadaha̍ḥ pa̱śurāla̍bhyate ।
sau̱ryo̍'tigrā̱hyo̍ gṛ̱hyate ।
aha̍re̱va rū̱pe̱ṇa̱ sama̍rdhayanti ।
atho̱ ahna̍ e̱vaiṣa ba̱lirhri̍yate ।
sa̱ptaitadaha̍ratigrā̱hya̍ gṛhyante ॥ 2 ॥))

**[[1-2-3-3]]**

स॒प्त वै शीर्॑ष॒ण्याः᳚ प्रा॒णाः ।
अ॒सावा॑दि॒त्यः शिरः॑ प्र॒जाना᳚म् ।
शी॒र्ष॒न्नेव प्र॒जाना᳚ँ प्रा॒णान्द॑धाति ।
तस्मा᳚त्स॒प्त शी॒र्षन्प्रा॒णाः ।
इन्द्रो॑ वृ॒त्रꣳ ह॒त्वा ।
असु॑रान्परा॒भाव्य॑ ।
स इ॒माँल्लो॒काना॒भ्य॑जयत् ।
तस्या॒सौ लो॒कोऽन॑भिजित आसीत् ।
तं वि॒श्वक॑र्मा भू॒त्वाऽभ्य॑जयत् ।
यद्वै᳚श्वकर्म॒णो गृ॒ह्यते᳚ ॥ ३ ॥

((sa̱pta vai śi̍rṣa̱ṇyā̎ḥ prā̱ṇāḥ ।
a̱sāvā̍di̱tyaḥ śira̍ḥ pra̱jānā̎m ।
śī̱rṣanne̱va pra̱jānā̎m prā̱ṇānda̍dhāti ।
tasmā̎tsa̱pta śī̱rṣanprā̱ṇāḥ ।
indro̍ vṛ̱tram̐ ha̱tvā ।
asu̍rānparā̱bhāvya̍ ।
sa i̱mām̐llo̱kāna̱bhya̍jayat ।
tasyā̱sau lo̱ko'na̍bhijita āsīt ।
taṃ vi̱śvaka̍rmā bhū̱tvā'bhya̍jayat ।
yadvai̎śvakarma̱ṇo gṛ̱hyate̎ ॥ 3 ॥))

**[[1-2-3-4]]**

सु॒व॒र्गस्य॑ लो॒कस्या॒भिजि॑त्यै ।
प्र वा ए॒ते᳚ऽस्माल्लो॒काच्च्य॑वन्ते ।
ये वै᳚श्वकर्म॒णं गृ॒ह्णते᳚ ।
आ॒दि॒त्यः श्वो गृ॑ह्यते ।
इ॒यं वा अदि॑तिः ।
अ॒स्यामे॒व प्रति॑तिष्ठन्ति ।
अ॒न्यो᳚न्यो गृह्येते ।
विश्वा᳚न्ये॒वान्ये॒न कर्मा॑णि कु॒र्वा॒णा य॑न्ति ।
अ॒स्याम॒न्ये॒न प्रति॑तिष्ठन्ति ।
तावाप॑रा॒र्धात्सं॑वत्स॒रस्या॒न्यो᳚न्यो गृह्येते ।
तावु॒भौ स॒ह म॑हाव्र॒ते गृ॑ह्येते ।
य॒ज्ञस्यै॒वान्तं॑ ग॒त्वा ।
उ॒भयो᳚र्लो॒कयोः॒ प्रति॑तिष्ठन्ति ।
अ॒र्क्य॑मु॒क्थं भ॑वति ।
अ॒न्नाद्य॒स्याव॑रुध्यै ॥ ४ ॥
स॒मा॒यच्छ॑त्यतिग्रा॒ह्या॑ गृह्यन्ते गृ॒ह्यते॑ संवत्स॒रस्या॒न्यो᳚न्यो
गृह्येते॒ पञ्च॑ च ॥ ३ ॥

((su̱va̱rgasya̍ lo̱kasyā̱bhiji̍tyai ।
pra vā e̱te̎'smāllo̱kāccya̍vante ।
ye vai̎śvakarma̱ṇaṃ gṛ̱hṇate̎ ।
ā̱di̱tyaḥ śvo gṛ̍hyate ।
i̱yaṃ vā adi̍tiḥ ।
a̱syāme̱va prati̍tiṣṭhanti ।
a̱nyo̎nyo gṛhyete ।
viśvā̎nye̱vānye̱na karmā̍ṇi ku̱rvā̱ṇā ya̍nti ।
a̱syāma̱nye̱na prati̍tiṣṭhanti ।
tāvāpa̍rā̱rdhātsa̍ṃvatsa̱rasyā̱nyo̎nyo gṛhyete ।
tāvu̱bhau sa̱ha ma̍hāvra̱te gṛ̍hyete ।
ya̱jñasyai̱vānta̍ṃ ga̱tvā ।
u̱bhayo̎rlo̱kayo̱ḥ prati̍tiṣṭhanti ।
a̱rkya̍mu̱ktham bha̍vati ।
a̱nnādya̱syāva̍rudhyai ॥ 4 ॥
sa̱mā̱yaccha̍tyatigrā̱hya̍ gṛhyante gṛ̱hyate̍
saṃvatsa̱rasyā̱nyo̎nyo gṛhyete̱ pañca̍ ca ॥ 3 ॥))

**[[1-2-4-1]]**

ए॒क॒वि॒ꣳ॒श ए॒ष भ॑वति ।
ए॒ते॒न वै दे॒वा ए॑कवि॒ꣳ॒शेन॑ ।
आ॒दि॒त्यमि॒त उ॑त्त॒मꣳ सु॑व॒र्गं लो॒कमारो॑हयन्न् ।
स वा ए॒ष इ॒त ए॑कवि॒ꣳ॒शः ।
तस्य॒ द॒शा॒वस्ता॒दहा॑नि ।
दश॑ प॒रस्ता᳚त् ।
स वा ए॒ष वि॒राज्यु॑भयत॒ः प्रति॑ष्ठितः ।
वि॒रा॒जि हि वा ए॒ष उ॑भयत॒ः प्रति॑ष्ठितः ।
तस्मा॑दन्त॒रेमौ लो॒कौ यन् ।
सर्वे॑षु सुव॒र्गेषु॑ लो॒केष्व॑भित॒पन्ने॑ति ॥ १ ॥

((e̱ka̱vi̱m̐śa e̱ṣa bha̍vati ।
e̱te̱na vai de̱vā e̍kavi̱m̐śena̍ ।
ā̱di̱tyami̱ta u̍tta̱mam̐ su̍va̱rgaṃ lo̱kamāro̍hayann ।
sa vā e̱ṣa i̱ta e̍kavi̱m̐śaḥ ।
tasya̱ da̱śā̱vastā̱dahā̍ni ।
daśa̍ pa̱rastā̎t ।
sa vā e̱ṣa vi̱rājyu̍bhaya̱ta̱ḥ prati̍ṣṭhitaḥ ।
vi̱rā̱ji̱ hi vā e̱ṣa u̍bha̱yata̱ḥ prati̍ṣṭhitaḥ ।
tasmā̍danta̱remau lo̱kau yan ।
sarve̍ṣu suva̱rgeṣu̍ lo̱keṣva̍bhi̱tapa̍nneti ॥ 1 ॥))

**[[1-2-4-2]]**

दे॒वा वा आ॑दि॒त्यस्य॑ सुव॒र्गस्य॑ लो॒कस्य॑ ।

परा॑चोऽतिपा॒दादा॑बिभयुः।
तं छन्दो॑भिरदृꣳह॒न्धृत्यै॑।
दे॒वा वा आ॑दि॒त्यस्य॑ सुव॒र्गस्य॑ लो॒कस्य॑।
अवा॑चोऽवपा॒दादा॑बिभयुः।
तं प॒ञ्चभी॑ र॒श्मिभि॒रुदा॑वयन्न्।
तस्मा॑ देकवि॒ꣳ॒शेऽह॒न्पञ्च॑ दिवाकी॒र्त्या॑नि क्रियन्ते।
र॒श्मयो॒ वै दि॑वाकी॒र्त्या॑नि।
ये गा॑य॒त्रे।
ते गा॑य॒त्रीषू॒त्त॑रयो॒ः पव॑मानयोः॥ २॥

((de̱vā vā ā̍di̱tyasya̍ suva̱rgasya̍ lo̱kasya̍ ।
parā̍co'tipā̱dādā̍bibhayuḥ ।
taṃ chando̍bhiradṛꣳha̱ndhṛtyai̍ ।
de̱vā vā ā̍di̱tyasya̍ suva̱rgasya̍ lo̱kasya̍ ।
avā̍co'vapā̱dādā̍bibhayuḥ ।
taṃ pa̱ñcabhī̍ ra̱śmibhi̱rudā̍vayann ।
tasmā̍ dekavi̱ꣳ̱śe'ha̱npañca̍ divākī̱rtyā̍ni kriyante ।
ra̱śmayo̱ vai di̍vākī̱rtyā̍ni ।
ye gā̍ya̱tre ।
te gā̍ya̱trīṣū̱ttā̍rayo̱ḥ pava̍mānayoḥ ॥ 2 ॥))

**[[1-2-4-3]]**

म॒हादि॑वाकी॒र्त्य॒ꣳ॒ होतुः॑ पृ॒ष्ठम्।
वि॒क॒र्णं ब्रह्म॑सा॒मम्।
भा॒सो॒ऽग्नि॒ष्टो॒मः।
अ॒थै॒ता॒नि॒ परा॑णि।
प॒रै॒र्वै दे॒वा आ॑दि॒त्यꣳ सु॑व॒र्गं लो॒कम॑पारयन्न्।
यद॑पा॑रयन्न्।
तत्परा॑णां प॒र॒त्वम्।
पा॒रय॑न्त्येन॒ं परा॑णि।
य ए॒वं वेद॑।
अ॒थै॒ता॒नि॒ स्परा॑णि।
स्प॒रै॒र्वै दे॒वा आ॑दि॒त्यꣳ सु॑व॒र्गं लो॒कम॑स्पारयन्न्।
यद॑स्पा॑रयन्न्।
तत्स्परा॑णाꣳ स्प॒र॒त्वम्।
स्पा॒रय॑न्त्येन॒ꣳ॒ स्परा॑णि।
य ए॒वं वेद॑॥ ३॥
ए॒ति॒ पव॑मानयो॒ः स्परा॑णि॒ पञ्च॑ च॥ ४॥

((ma̱hādi̍vākīrtya̱ꣳ̱ hotu̍ḥ pṛ̱ṣṭham ।
vi̱ka̱rṇaṃ brahma̍sā̱mam ।
bhā̱so̱'gni̱ṣṭo̱maḥ ।
a̱thai̱tā̱ni̱ parā̍ṇi ।
pa̱rai̱rvai de̱vā ā̍di̱tyaꣳ su̍va̱rgaṃ lo̱kamā̍pārayann ।
yada̍pā̍rayann ।
tatparā̍ṇāṃ pa̱ra̱tvam ।
pā̱raya̍ntyena̱ṃ parā̍ṇi ।
ya e̱vaṃ veda̍ ।
a̱thai̱tā̱ni̱ sparā̍ṇi ।
spa̱rai̱rvai de̱vā ā̍di̱tyaꣳ su̍va̱rgaṃ
lo̱kamā̍spārayann ।
yadaspā̍rayann ।
tatsparā̍ṇāꣳ spa̱ra̱tvam ।
spā̱raya̍ntyena̱ꣳ̱ sparā̍ṇi ।
ya e̱vaṃ veda̍ ॥ 3 ॥
e̱ti̱ pava̍mānayo̱ḥ sparā̍ṇi̱ pañca̍ ca ॥ 4 ॥))

**[[1-2-5-1]]**

अ॒प्र॑ति॒ष्ठां वा ए॒ते ग॑च्छन्ति।
येषा॒ꣳ॒ संवत्स॒रेऽना॒प्तेऽथ॑।
ए॒का॒द॒शि॒न्या॒प्य॒ते॑।
वै॒ष्ण॒वं वा॑म॒नमाल॑भन्ते।
य॒ज्ञो वै विष्णु॑ः।
य॒ज्ञमे॒वाल॑भन्त॒ प्रति॑ष्ठित्यै।
ऐ॒न्द्रा॒ग्नमाल॑भन्ते।
इ॒न्द्रा॒ग्नी वै दे॒वाना॒मया॑तयामानौ।
ये ए॒व दे॒वते॒ अया॑तयाम्नी।
ते ए॒वाल॑भन्ते॥ १॥

((aprā̍tiṣṭhā̱ṃ vā e̱te ga̍cchanti ।
yeṣā̱ꣳ̱ saṃvatsa̱re'nā̱pte'tha̍ ।
e̱kā̱da̱śinyā̱pyate̍ ।
vai̱ṣṇa̱vaṃ vā̍ma̱namālā̍bhante ।
ya̱jño vai viṣṇu̍ḥ ।
ya̱jñame̱vālā̍bhante̱ prati̍ṣṭhityai ।
ai̱ndrā̱gnamālā̍bhante ।
i̱ndrā̱gnī vai de̱vānā̱mayā̍tayāmānau ।
ye e̱va de̱vate̱ ayā̍tayāmnī ।
te e̱vālā̍bhante ॥ 1 ॥))

**[[1-2-5-2]]**

वै॒श्व॒दे॒वमाल॑भन्ते।
दे॒वता॑ ए॒वाव॑रुन्धते।
द्या॒वा॒पृ॒थि॒व्या॑ धे॒नुमाल॑भन्ते।
द्यावा॑पृथि॒व्यो॒रे॒व प्रति॑तिष्ठन्ति।
वा॒य॒व्यं॑ व॒त्समाल॑भन्ते।
वा॒यु॒रे॒वैभ्यो॑ यथाऽऽयतनाद्दे॒वता॒ अव॑रुन्धे।
आ॒दि॒त्यामवि॑ं व॒शामाल॑भन्ते।

इ॒यं वा अदि॑तिः।
अ॒स्यामे॒व प्रति॑तिष्ठन्ति।
मै॒त्रा॒व॒रु॒णीमाल॑भन्ते॥ २॥

((vai̠śva̠de̠vamālábhante ।
de̠vatā̍ e̠vāvárundhate ।
dyā̠vā̠pṛ̠thi̠vyā̍ṃ dhe̠numālábhante ।
dyāvā̍pṛthi̠vyore̠va prati̍tiṣṭhanti ।
vā̠ya̠vyaṃ̍ va̠tsamālábhante ।
vā̠yure̠vaibhyó yathā''yata̠nādde̠vatā̠ avárundhe ।
ā̠di̠tyāmavi̍ṃ va̠śāmālábhante ।
i̠yaṃ vā adi̍tiḥ ।
a̠syāme̠va prati̍tiṣṭhanti ।
mai̠trā̠va̠ru̠ṇīmālábhante ॥ 2 ॥))

**[[1-2-5-3]]**

मि॒त्रेणै॒व य॒ज्ञस्य॒ स्वि॑ष्टꣳ शमयन्ति।
वरु॑णेन॒ दुरि॑ष्टम्।
प्रा॒जा॒प॒त्यं तू॑प॒रं म॑हाव्र॒त आल॑भन्ते।
प्रा॒जा॒प॒त्यो॑ऽतिग्रा॒ह्यो॑ गृह्यते।
अह॑रे॒व रू॒पेण॒ सम॑र्धयन्ति।
अथो॒ अह्न॑ ए॒वैष ब॒लिर्ह्रि॑यते।
आ॒ग्ने॒यमाल॑भन्ते॒ प्रति॒ प्रज्ञा᳚त्यै।
अ॒ज॒पे॒त्वान् वा ए॒ते पू॒र्वैर्मा॒सैरव॑रुन्धते।
यदे॒ते ग॒व्याः प॒शव॒ आल॒भ्यन्ते᳚।
उ॒भये॑षां पशू॒नामव॑रुध्यै॥ ३॥

((mi̠tre̠ṇai̠va ya̠jñasya̠ svi̍ṣṭaꣳ̍ śamayanti ।
varú̍ṇena̠ duri̍ṣṭam ।
prā̠jā̠pa̠tyaṃ tū̍paraṃ má̍hāvra̠ta ālábhante ।
prā̠jā̠pa̠tyó'tigrā̠hyó gṛhyate ।
ahá̍re̠va rū̠pe̠ṇa̠ samárdhayanti ।
atho̠ ahná e̠vaiṣa ba̠lirhri̍yate ।
ā̠gne̠yamālábhante̠ prati̠ prajñā᳚tyai ।
a̠ja̠pe̠tvān vā e̠te pūrvai̠rmāsai̠ravárundhate ।
yade̠te ga̠vyāḥ pa̠śavá āla̠bhyantē᳚ ।
u̠bhayé̍ṣāṃ paśū̠nāmavárudhyai ॥ 3 ॥))

**[[1-2-5-4]]**

यदति॑रिक्तामेकाद॒शिनी॑मा॒लभे॑रन्।
अप्रि॑यं॒ भ्रातृ॑व्यम॒भ्यति॑रिच्येत।
यद्वौ द्वौ॑ प॒शू स॒मस्ये॑युः।
कनी॑य॒ आयुः॑ कुर्वीरन्।
यदे॒ते ब्राह्म॑णवन्तः प॒शव॒ आल॒भ्यन्ते᳚।
नाप्रि॑यं॒ भ्रातृ॑व्यम॒भ्यति॒रिच्य॑ते।
न कनी॑य॒ आयुः॑ कुर्वते॥ ४॥
ते ए॒वाल॑भन्ते मैत्रावरु॒णीमाल॑भ॒न्तेऽव॑रुध्यै स॒प्त च॑॥ ५॥

((yadati̍riktāmekāda̠śini̍mā̠labhéran ।
apri̍yaṃ̠ bhrātṛ̍vyama̠bhyati̍ricyeta ।
yaddvau dvaú pa̠śū sa̠masyé̍yuḥ ।
kani̍ya̠ āyú̍ḥ kurvīran ।
yade̠te brāhmá̍ṇavantaḥ pa̠śavá āla̠bhyantē᳚ ।
nāpri̍yaṃ̠ bhrātṛ̍vyama̠bhyáti̠ricyáte ।
na kani̍ya̠ āyú̍ḥ kurvate ॥ 4 ॥
te e̠vālábhante maitrāvaru̠ṇīmālábha̠nte'várudhyai sa̠pta cá ॥ 5 ॥))

**[[1-2-6-1]]**

प्र॒जाप॑तिः प्र॒जाः सृ॒ष्ट्वा वृ॒त्तो॑ऽशयत्।
तं दे॒वा भू॒ताना॒ꣳ॒ रसं॒ तेजः॒ संभृ॒त्य॑।
तेनै॑नमभिषज्यन्।
म॒हान॑वव॒र्ती॑ति।
तन्म॑हाव्र॒तस्य॑ महाव्रत॒त्वम्।
म॒हद्व्र॒तमिति॑।
तन्म॑हाव्र॒तस्य॑ महाव्रत॒त्वम्।
म॒ह॒तो व्र॒तमिति॑।
तन्म॑हाव्र॒तस्य॑ महाव्रत॒त्वम्।
प॒ञ्च॒वि॒ꣳ॒शः स्तोमो॑ भवति॥ १॥

((pra̠jāpá̍tiḥ pra̠jāḥ sṛ̠ṣṭvā vṛ̠ttó'śayat ।
taṃ de̠vā bhū̠tānā̠ꣳ̠ rasa̠ṃ tejá̍ḥ sa̠ṃbhṛ̠tyá ।
tenai̍namabhiṣajyan ।
ma̠hānáva̠va̠rtī̍ti ।
tanmáhāvra̠tasyá mahāvrata̠tvam ।
ma̠hadvra̠tamiti̍ ।
tanmáhāvra̠tasyá mahāvrata̠tvam ।
ma̠ha̠to vra̠tamiti̍ ।
tanmáhāvra̠tasyá mahāvrata̠tvam ।
pa̠ñca̠vi̠ꣳ̠śaḥ stomó bhavati ॥ 1 ॥))

**[[1-2-6-2]]**

चतु॒र्वि॒ꣳ॒श॒त्य॒र्ध॒मा॒सः सं॒व॒त्स॒रः।
यद्वा ए॒तस्मि॑न्त्संवत्स॒रेऽधि॒ प्राजा॑यत।
तद॒न्नं॑ पञ्चवि॒ꣳ॒शम॑भवत्।
म॒ध्य॒तः क्रि॑यते।
म॒ध्य॒तो ह्यन्न॑मशि॒तं धि॒नोति॑।
अथो॑ मध्य॒त ए॒व प्र॒जाना॑मू॒र्ग्धी॑यते।
अथ॒ यद्वा इ॒दम॑न्त॒तः क्रि॒यते᳚।
तस्मा॑दु॒दन्ते॒ प्र॒जाः सम॑धन्ते।

अ॒न्त॒तः क्रि॑यते प्र॒जन॑नायै॒व।
त्रि॒वृच्छि॒रो॑ भवति॥ २॥

((catu̍rvim̐śatyardhamāsaḥ saṃvatsa̱raḥ ।
yadvā e̱tasmi̍̐ntsaṃvatsa̱re'dhi̱ prājā̍yata ।
tadannaṃ pañcavi̱m̱̐śamā̍bhavat ।
ma̱dhya̱taḥ kri̍yate ।
ma̱dhya̱to hyannā̍maśi̱taṃ dhi̱noti̍ ।
atho̍ madhya̱ta e̱va pra̱jānā̱mūrgdhī̍yate ।
atha̱ yadvā i̱damā̍nta̱taḥ kri̱yate̎ ।
tasmā̍duda̱nte pra̱jāḥ samē̍dhante ।
a̱nta̱taḥ kri̍yate pra̱janā̍nāya̱iva ।
tri̱vṛ̱cchiro̍ bhavati ॥ 2 ॥))

**[[1-2-6-3]]**

त्रे॒धा वि॒हि॒तꣳ हि शिरः॑।
लोम॑ छ॒वीरस्थि॑।
परा॑चा स्तुवन्ति।
तस्मा॒त्तत्स॒दृगे॒व।
न मे॒द्यतो॒ऽनु॑मेद्यति।
न कृ॒श्य॒तो॒ऽनु॑ कृ॒श्यति।
प॒ञ्च॒द॒शो॑ऽन्यः प॒क्षो भ॑वति।
स॒प्त॒द॒शो॑ऽन्यः।
तस्मा॒द्वया॑ꣳस्यन्यत॒रम॒र्धम॒भि प॒र्याव॑र्तन्ते।
अ॒न्य॒त॒रतो॒ हि त॒द्गरी॑यः क्रि॒यते॑॥ ३॥

((tre̱dhā̱ vi̱hi̱tam̐ hi śira̍ḥ ।
loma̍ cha̱vīrasthi̍ ।
parā̍cā stuvanti ।
tasmā̱ttatsa̱dṛge̱va ।
na medya̱to'nu̍medyati ।
na kṛśya̱to'nu̍ kṛśyati ।
pañca̱da̱śo̎'nyaḥ pa̱kṣo bha̍vati ।
sa̱pta̱da̱śo̎'nyaḥ ।
tasmādvayā̍m̐syanyata̱rama̱rdhama̱bhi
pa̱ryāva̍rtante ।
a̱nya̱ta̱rato̱ hi tadgarī̍yaḥ kri̱yate̎ ॥ 3 ॥))

**[[1-2-6-4]]**

प॒ञ्च॒वि॒ꣳ॒श आ॒त्मा भ॑वति।
तस्मा॑न्मध्य॒तः प॒शवो॒ वरि॑ष्ठाः।
ए॒क॒वि॒ꣳ॒शं पुच्छ॑म्।
द्वि॒पदा॑सु स्तुवन्ति॒ प्रति॑ष्ठित्यै।
सर्वे॑ण स॒ह स्तु॑वन्ति।
सर्वे॑ण॒ ह्या॑त्मना॒ऽऽत्म॒न्वी।
स॒होत्पत॑न्ति।
एकै॑कामुच्छि॒ꣳ॒षन्ति।
आ॒त्मन्न् ह्यङ्गा॑नि ब॒द्धानि॑।
न वा ए॒तेन॒ सर्व॑ः पुरु॑षः॥ ४॥

((pa̱ñca̱vi̱m̱̐śa ā̱tmā bhā̍vati ।
tasmā̍̐nmadhya̱taḥ pa̱śavo̱ vari̍ṣṭhāḥ ।
e̱ka̱vi̱m̱̐śaṃ pucchā̍m ।
dvi̱padā̍su stuvanti̱ prati̍ṣṭhityai ।
sarve̍ṇa sa̱ha stu̍vanti ।
sarve̍ṇa̱ hyā̍tmanā̍''tma̱nvī ।
sa̱hotpata̍nti ।
ekai̍kāmucchim̱̐ṣanti ।
ā̱tmann hyaṅgā̍ni ba̱ddhāni̍ ।
na vā e̱tena̱ sarva̱ḥ puru̍ṣaḥ ॥ 4 ॥))

**[[1-2-6-5]]**

यदि॒त इ॑तो॒ लोमा॑नि द॒तो न॒खान्।
प॒रि॒माद॑ः क्रियन्ते।
तान्ये॒व ते॒न प्रत्यु॑प्यन्ते।
औदु॑म्बर॒स्तल्पो॑ भवति।
ऊर्ग्वा अन्न॑मुदु॒म्बर॑ः।
ऊर्ज॑ ए॒वान्नाद्य॒स्याव॑रुध्यै।
यस्य॑ तल्प॒सद्य॒मन॑भिजित॒ꣳ॒ स्यात्।
स दे॒वाना॒ꣳ॒ साम्य॑क्षे।
त॒ल्प॒सद्य॑म॒भिज॑यानीति॒ तल्प॑मा॒रुह्योद्गा॑येत्।
त॒ल्प॒सद्य॑मे॒वाभिज॑यति॥ ५॥

((yadi̱ta i̍to̱ lomā̍ni da̱to na̱khān ।
pa̱ri̱mādā̍ḥ kriyante ।
tānye̱va tena̱ pratyu̍pyante ।
audu̍mbara̱stalpo̍ bhavati ।
ūrgvā annā̍mudu̱mbarā̍ḥ ।
ūrja e̱vānnādyasyāvā̍rudhyai ।
yasya̍ talpa̱sadya̱manā̍bhijita̱m̱̐ syāt ।
sa de̱vānā̱m̱̐ sāmyā̍kṣe ।
ta̱lpa̱sadyā̍ma̱bhijā̍yānīti̱ talpā̍mā̱ruhyodgā̍yet ।
ta̱lpa̱sadyā̍me̱vābhijā̍yati ॥ 5 ॥))

**[[1-2-6-6]]**

यस्य॑ तल्प॒सद्य॑म॒भिजि॑त॒ꣳ॒ स्यात्।
स दे॒वाना॒ꣳ॒ साम्य॑क्षे।
त॒ल्प॒सद्यं॒ मा परा॑जे॒षीति॒ तल्प॑मा॒रुह्योद्गा॑येत्।
न त॑ल्प॒सद्यं॒ परा॑जयते।
प्रे॒ङ्खे श॑ꣳसति।
महो॒ वै प्रे॒ङ्खः।

मह॑स ए॒वान्नाद्य॒स्याव॑रुद्ध्यै।
दे॒वा॒सु॒राः संय॑त्ता आसन्।
त आ॑दि॒त्ये व्याय॑च्छन्त।
तं दे॒वाः सम॑जयन्॥ ६॥

((yasya̍ talpa̱sadya̍ma̱bhiji̍ta̱m̐̍ syāt ।
sa de̱vānā̱m̐̍ sāmya̍kṣe ।
ta̱lpa̱sadya̱ṃ mā para̱̍jeṣ̱īti̱ talpa̍mā̱ruhyodga̱̍yet ।
na ta̍lpa̱sadya̱ṃ para̱̍jayate ।
ple̱ṅkhe śa̍m̐sati ।
maho̱ vai ple̱ṅkhaḥ ।
maha̍sa e̱vānnādya̱syāva̍ruddhyai ।
de̱vā̱su̱rāḥ saṃya̍ttā āsan ।
ta ā̍di̱tye vyāya̍cchanta ।
taṃ de̱vāḥ sama̍jayan ॥ 6 ॥))

**[[1-2-6-7]]**

ब्रा॒ह्म॒णश्च॑ शू॒द्रश्च॑ चर्मक॒र्ते व्याय॑च्छेते।
दैव्यो॒ वै वर्णो᳚ ब्राह्म॒णः।
अ॒सु॒र्यः॑ शू॒द्रः।
इ॒मे॑ऽरात्सुरि॒मे सु॑भू॒तम॑क्र॒न्नित्य॑न्यत॒रो ब्रू॑यात्।
इ॒म उ॑द्वासीका॒रिण॑ इ॒मे दु॑र्भू॒तम॑क्र॒न्नित्य॑न्यत॒रः।
यदे॒वैषा॒ꣳ॒ सुकृ॒तं या राद्धिः॑।
तद॑न्यत॒रो॑ऽभिश्री॒णाति॑।
यदे॒वैषा᳚ं दुष्कृ॒तं याऽरा᳚द्धिः।
तद॑न्यत॒रो॑ऽप॑हन्ति।
ब्रा॒ह्म॒णः संज॑यति।
अ॒मु॒मे॒वादि॒त्यं भ्रातृ॑व्यस्य॒ सं वि॑न्दन्ते॥ ७॥
भ॒व॒ति॒ भ॒व॒ति॒ क्रि॒य॒ते॒ पुरु॑षो जयत्यजयञ्जय॒त्येकं॑ च॥ ६॥
उ॒द्धन्यमा॑नं॒ नवै॒तानि॒ सन्त॑तिरेकवि॒ꣳ॒श ए॒षोऽप्र॑तिष्ठां
प्र॒जाप॑तिर्वृ॒त्तष्ष॒ट्॥ ६॥
उ॒द्धन्यमा॑नꣳ शो॒चिष्के॒शोऽग्ने॑ स॒पत्ना॑नतिग्रा॒ह्या॑
वैश्वदे॒वमाल॑भन्ते पञ्चा॒शत्॥ ५०॥

((brā̱hma̱ṇaśca̍ śū̱draśca̍ carmaka̱rte vyāya̍cchete ।
daivyo̱ vai varṇo᳚ brāhma̱ṇaḥ ।
a̱su̱rya̍ḥ śū̱draḥ ।
i̱me̍'rātsuri̱me su̍bhū̱tama̍kra̱nnitya̍nyata̱ro brū̍yāt ।
i̱ma u̍dvāsīkā̱riṇa̍ i̱me
du̍rbhū̱tama̍kra̱nnitya̍nyata̱raḥ ।
yade̱vaiṣā̱m̐̍ sukṛ̱taṃ yā rāddhi̍ḥ ।
tada̍nyata̱ro̍'bhiśrī̱ṇāti ।
yade̱vaiṣā̱m̐ duṣkṛ̱taṃ yā'rā᳚ddhiḥ ।
tada̍nyata̱ro'pa̍hanti ।
brā̱hma̱ṇaḥ saṃja̍yati ।
a̱mu̱me̱vādi̱tyaṃ bhrātṛ̍vyasya̱ saṃ vi̍ndante ॥ 7 ॥
bha̱va̱ti̱ bha̱va̱ti̱ kri̱ya̱te̱ puru̍ṣo
jayatyajayañjaya̱tyekaṃ̍ ca ॥ 6 ॥
u̱ddha̱nyamā̍naṃ̱ nava̱itāni̱ santa̍tirekavi̱m̱̐śa
e̱ṣo'pra̍tiṣṭhāṃ pra̱jāpa̍tirvṛ̱ttaṣṣa̱ṭ ॥ 6 ॥
u̱ddha̱nyamā̍nam̐ śo̱ciṣke̱śo'gne̍ sa̱patnā̍natigrā̱hya̍
vaiśvade̱vamāla̍bhante pañcā̱śat ॥ 50 ॥))

# Taittirīya-Brāhmaṇa

# Book 1, Chapter 3

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[1-3-1-1]]**

दे॒वा॒सु॒राः संय॑त्ता आसन्।
ते दे॒वा वि॑ज॒यमु॑प॒यन्तः॑।
अ॒ग्नीषोम॑योस्तेज॒स्विनी᳚स्त॒नूः संन्य॑दधत।
इ॒दमु॑ नो भविष्यति।
यदि॑ नो जे॒ष्यन्तीति॑।
तेना॒ग्नीषोमा॒वपा᳚क्रामताम्।
ते दे॒वा वि॒जित्य॑।
अ॒ग्नीषोमा॒वन्वै᳚च्छन्।
तेऽ᳚ग्निमन्व॑विन्दन्नृ॒तुषूत्सन्न॑म्।
तस्य॒ विभ॑क्तीभिस्तेज॒स्विनी᳚स्त॒नूरवा॑रुन्धत॥ १॥

((de̱vā̱su̱rāḥ saṃya̍ttā āsan |
te de̱vā vi̍ja̱yamu̍pa̱yanta̍ḥ |
a̱gnīṣoma̍yostejasvinī̎sta̱nūḥ saṃnya̍dadhata |
i̱damu̍ no bhaviṣyati |
yadi̍ no je̱ṣyantīti̍ |
tenā̱gnīṣomā̱vapā̎krāmatām |
te de̱vā vi̱jitya̍ |
a̱gnīṣomā̱vanvai̎cchan |
te̎'gnimanva̍vindannṛ̱tuṣūtsa̍nnam |
tasya̱ vibha̍ktībhisteja̱svinī̎sta̱nūrava̍rundhata || 1 ||))

**[[1-3-1-2]]**

ते सो॒मम॒न्व॑विन्दन्।
तम॑घ्नन्।
तस्य॑ यथाऽभि॒ज्ञायं॑ त॒नूर्व्य॑गृह्णत।
ते ग्रहा॑ अभवन्।
तद्ग्रहा॑णां ग्रह॒त्वम्।
यस्यै॒वं वि॒दुषो॒ ग्रहा॑ गृह्यन्ते᳚।
तस्य॒ त्वे॑व गृ॒ही॒ताः।
नाना᳚ग्नेयं पुनरा॒धेये॑ कुर्यात्।
यदना᳚ग्नेयं पुनरा॒धेये॑ कु॒र्यात्।
व्यृ॑द्धमे॒व तत्॥ २॥

((te soma̱manva̍vindan |
tama̍ghnan |
tasya̍ yathā'bhi̱jñāya̍ṃ ta̱nūrvya̍gṛhṇata |
te graha̍ abhavan |
tadgraha̍ṇāṃ graha̱tvam |
yasyai̱vaṃ vi̱duṣo̱ graha̍ gṛhyante̎ |
tasya̱ tve̍va gṛ̍hī̱tāḥ |
nānā̎gneyaṃ punarā̱dheye̍ kuryāt |
yadanā̎gneyaṃ punarā̱dheye̍ ku̱ryāt |
vyṛ̍ddhame̱va tat || 2 ||))

**[[1-3-1-3]]**

अना᳚ग्नेयं॒ वा ए॒तत्क्रि॑यते।
यत्स॒मिध॒स्तनू॒नपा॑तमि॒डो ब॒र्हिर्य॑जति।
उ॒भावा᳚ग्ने॒यावाज्य॑भागौ स्याताम्।
अना᳚ज्यभागौ भवत॒ इत्या॑हुः।
यदु॒भावा᳚ग्ने॒याव॒न्वञ्चा॒विति॑।
अ॒ग्नये॒ पव॑माना॒योत्त॑रः स्यात्।
यत्पव॑मानाय।
तेनाज्य॑भागः।
तेन॑ सौ॒म्यः।
बुध॑न्वत्याग्ने॒यस्याज्य॑भागस्य पुरोऽनुवा॒क्या॑ भवति॥ ३॥

((anā̎gneya̱ṃ vā e̱tatkri̍yate |
yatsa̱midha̱stanū̱napā̍tami̱ḍo ba̱rhirya̍jati |
u̱bhāvā̎gne̱yāvājya̍bhāgau syātām |
anā̎jyabhāgau bhavata̱ ityā̍huḥ |
yadu̱bhāvā̎gne̱yāva̱nvañcā̱viti̍ |
a̱gnaye̱ pava̍mānā̱yotta̍raḥ syāt |
yatpava̍mānāya |
tenājya̍bhāgaḥ |
tena̍ sau̱myaḥ |
budha̍nvatyāgne̱yasyājya̍bhāgasya puro'nuvā̱kya̍ bhavati || 3 ||))

**[[1-3-1-4]]**

यथा॑ सु॒प्तं बो॒धय॑ति।
ता॒दृगे॒व तत्।
अ॒ग्निर्व्य॑क्ताः पत्नीसंया॒जाना॒मृच॑ः स्युः।
तेना᳚ग्ने॒यꣳ सर्वं॑ भवति।
ए॒कधा ते॑ज॒स्विनीं॑ दे॒वता॒मुपै॑तीत्या॑हुः।
सैन॑मीश्व॒रा प्र॒दह॒ इति॑।
नेति॑ ब्रूयात्।
प्र॒जन॑नं॒ वा अ॒ग्निः।
प्र॒जन॑नमे॒वोपै॑तीति॑।

कृतयजुः संभृतसंभार इत्याहुः ॥ ४॥

((yathā suptaṃ bodhayati ।
tādṛgeva tat ।
agninyaktāḥ patnīsaṃyājānāmṛcaḥ syuḥ ।
tenāgneyaṃ sarvaṃ bhavati ।
ekadhā tejasvinīṃ devatāmupaitītyāhuḥ ।
sainamīśvarā pradaha iti ।
neti brūyāt ।
prajananaṃ vā agniḥ ।
prajananamevopaitīti ।
kṛtayajuḥ saṃbhṛtasaṃbhāra ityāhuḥ ॥ 4 ॥))

**[[1-3-1-5]]**

न संभृत्याः संभाराः।
न यजुः कार्यमिति।
अथो खलु।
संभृत्या एव संभाराः।
कार्यं यजुः।
पुनराधेयस्य समृद्ध्यै।
तेनोपाꣳशु प्रचरति।
एष्य इव वा एषः।
यत्पुनराधेयः।
यथोपाꣳशु नष्टमिच्छति॥ ५॥

((na saṃbhṛtyāḥ saṃbhārāḥ ।
na yajuḥ kāryamiti ।
atho khalu ।
saṃbhṛtyā eva saṃbhārāḥ ।
kāryaṃ yajuḥ ।
punarādheyasya samṛddhyai ।
tenopāṃśu pracarati ।
eṣya iva vā eṣaḥ ।
yatpunarādheyaḥ ।
yathopāṃśu naṣṭamicchati ॥ 5 ॥))

**[[1-3-1-6]]**

तादृगेव तत्।
उच्चैः स्विष्टकृतमुत्सृजति।
यथा नष्टं वित्त्वा प्राहायमिति।
तादृगेव तत्।
एकधा तेजस्विनीं देवतामुपैतीत्याहुः।
सैनमीश्वरा प्रदह इति।
तत्तथा नोपैति।
प्रयाजानूयाजेष्वेव विभक्तीः कुर्यात्।
यथापूर्वमाज्यभागौ स्याताम्।
एवं पत्नीसंयाजाः॥ ६॥

((tādṛgeva tat ।
uccaiḥ sviṣṭakṛtamutsṛjati ।
yathā naṣṭaṃ vittvā prāhāyamiti ।
tādṛgeva tat ।
ekadhā tejasvinīṃ devatāmupaitītyāhuḥ ।
sainamīśvarā pradaha iti ।
tattathā nopaiti ।
prayājānūyājeṣveva vibhaktīḥ kuryāt।
yathāpūrvamājyabhāgau syātām ।
evaṃ patnīsaṃyājāḥ ॥ 6 ॥))

**[[1-3-1-7]]**

तद्वैश्वानरवत्प्रजननवत्तरमुपैतीति।
तदाहुः।
व्यृद्धं वा एतत्।
अनाग्नेयं वा एतत्क्रियत इति।
नेति ब्रूयात्।
अग्निं प्रथमं विभक्तीनां यजति।
अग्निमुत्तमं पत्नीसंयाजानाम्।
तेनाग्नेयम्।
तेन समृद्धं क्रियत इति॥ ७॥
अरुन्धतैव तद्भवति संभृतसंभार इत्याहुरिच्छति
पत्नीसंयाजा नव च॥ १॥

((tadvaiśvānaravatprajananavattaramupaitīti ।
tadāhuḥ ।
vyṛddhaṃ vā etat ।
anāgneyaṃ vā etatkriyata iti ।
neti brūyāt ।
agniṃ prathamaṃ vibhaktīnāṃ yajati ।
agnimuttamaṃ patnīsaṃyājānām ।
tenāgneyam ।
tena samṛddhaṃ kriyata iti ॥ 7 ॥
arundhataiva tadbhavati saṃbhṛtasaṃbhāra
ityāhuricchati patnīsaṃyājā nava ca ॥ 1 ॥))

**[[1-3-2-1]]**

देवा वै यथादर्शं यज्ञानाहरन्त।
योऽग्निष्टोमम्।
य उक्थ्यम्।
योऽतिरात्रम्।
ते सहैव सर्वं वाजपेयमपश्यन्।
ते।

अ॒न्योँ॑न्यस्मै॒ नाति॑ष्ठन्त।
अ॒हम॒नेन॑ यजा॒ इति॑।
तेँऽब्रुवन्।
आ॒जिम॒स्य धा॑वा॒मेति॑॥ १॥

((de̱vā vai yathā̱darśaṁ ya̱jñānāha̍ranta ।
yo̎'gniṣṭo̱mam ।
ya u̱kthyā̎m ।
yo̍'tirā̱tram ।
te sa̱haiva sarve̍ vāja̱peya̍mapaśyan ।
te ।
a̱nyo̎nyasmai̱ nāti̍ṣṭhanta ।
a̱hama̱nena̍ yajā̱ iti̍ ।
te̎'bruvan ।
ā̱jima̱sya dhā̍vā̱meti̍ ॥ 1 ॥))

**[[1-3-2-2]]**

तस्मि॑न्ना॒जिम॑धावन्।
तं बृ॒ह॒स्पति॒रुद॑जयत्।
तेना॑यजत।
स स्वारा॒ँज्यमगच्छत्।
तमिन्द्रोँऽब्रवीत्।
माम॒नेन॑ याज॒येति॑।
तेनेन्द्र॑मयाजयत्।
सोऽग्रं॑ दे॒वता॑नां॒ पर्यैँ॑त्।
अग॑च्छ॒त्स्वारा॒ँज्यम्।
अति॑ष्ठन्तास्मै॒ ज्यैष्ठ्या॑य॥ २॥

((tasmi̍nnā̱jima̍dhāvan ।
taṃ bṛ̱ha̱spati̱ruda̍jayat ।
tenā̍yajata ।
sa svārā̎jyamagacchat ।
tamindro̎'bravīt ।
māma̱nena̍ yāja̱yeti̍ ।
tenendra̍mayājayat ।
so'graṁ de̱vatā̍nāṃ̱ paryai̎t ।
aga̍ccha̱tsvārā̎jyam ।
ati̍ṣṭhantāsmai̱ jyaiṣṭhyā̍ya ॥ 2 ॥))

**[[1-3-2-3]]**

य ए॒वं वि॒द्वान् वा॑ज॒पेये॑न॒ यज॑ते।
गच्छ॑ति॒ स्वारा॒ँज्यम्।
अग्रं॑ स॒मा॒नानां॒ पर्यै॑ति।
तिष्ठ॑न्तेऽस्मै॒ ज्यैष्ठ्या॑य।
स वा ए॒ष ब्रा॒ँह्म॒णस्य॑ चै॒व रा॑ज॒न्य॑स्य च य॒ज्ञः।
तं वा ए॒तं वा॑ज॒पेय॒ इत्या॑हुः।
वा॒जाप्यो॒ वा ए॒षः।
वाज॒ँ ह्ये॑तेन॑ दे॒वा ऐप्स॑न्न्।
सोमो॒ वै वा॑ज॒पेय॑ः।
यो वै सोमं॑ वाज॒पेयं॒ वेद॑॥ ३॥

((ya e̱vaṃ vi̱dvān vā̍ja̱peye̍na̱ yaja̍te ।
gaccha̍ti̱ svārā̎jyam ।
agraṁ samā̱nānāṃ̱ parye̍ti ।
tiṣṭha̍nte'smai̱ jyaiṣṭhyā̍ya ।
sa vā e̱ṣa brā̎hma̱ṇasya̍ ca̱iva rā̍ja̱nya̍sya ca ya̱jñaḥ ।
taṃ vā e̱taṃ vā̍ja̱peya̱ ityā̍huḥ ।
vā̱jāpyo̱ vā e̱ṣaḥ ।
vāja̎ṁ hyetena̍ de̱vā aipsann̍ ।
somo̱ vai vā̍ja̱peya̍ḥ ।
yo vai somaṁ̍ vāja̱peyaṃ̱ veda̍ ॥ 3 ॥))

**[[1-3-2-4]]**

वा॒ज्ये॑वैनं॑ पी॒त्वा भ॑वति।
आऽस्य॑ वा॒जी जा॑यते।
अन्नं॒ वै वा॑ज॒पेय॑ः।
य ए॒वं वेद॑।
अत्त्यन्ना॒ँम्।
आऽस्या॒ँन्ना॒दो जा॑यते।
ब्रह्म॒ वै वा॑ज॒पेय॑ः।
य ए॒वं वेद॑।
अत्ति॒ ब्रह्म॒णाऽन्ना॒ँम्।
आऽस्य॑ ब्र॒ह्मा जा॑यते॥ ४॥

((vā̱jye̍vainaṁ pī̱tvā bha̍vati ।
ā'sya̍ vā̱jī jā̍yate ।
anna̱ṃ vai vā̍ja̱peya̍ḥ ।
ya e̱vaṃ veda̍ ।
attyannā̎m ।
ā'syā̎nnā̱do jā̍yate ।
brahma̱ vai vā̍ja̱peya̍ḥ ।
ya e̱vaṃ veda̍ ।
atti̱ brahma̱ṇā'nnā̎m ।
ā'sya̍ bra̱hmā jā̍yate ॥ 4 ॥))

**[[1-3-2-5]]**

वाग्वै वाज॑स्य प्र॒सवः।
य ए॒वं वेद॑।
क॒रोति॑ वा॒चा वी॒र्य॑म्।
ऐनं॑ वा॒चा ग॑च्छति।

अपि॑वतीं॒ वाचं॑ वदति।
प्र॒जाप॑ति॒र्दे॒वेभ्यो॑ य॒ज्ञान्व्यादि॑शत्।
स आ॒त्मन्वा॑ज॒पेय॑मधत्त।
तं दे॒वा अ॑ब्रुवन्।
ए॒ष वाव य॒ज्ञः।
यद्वा॑ज॒पेयः॑॥ ५॥

((vāgvai vājásya prasa̱vaḥ I
ya e̱vam̱ vedá I
ka̱roti̍ vā̱cā vī̱ryä̍m I
ainam̱ vā̱cā gácchati I
api̍vatīm̱ vācam̱ vadati I
pra̱jāpátirde̱vebhyó ya̱jñānvyādi̍śat I
sa ā̱tmanvā̍ja̱peyámadhatta I
tam̱ de̱vā ábruvan I
e̱ṣa vāva ya̱jñaḥ I
yadvā̍ja̱peyáḥ II 5 II))

**[[1-3-2-6]]**

अप्ये॒व नोऽत्रा॒स्त्विति॑।
तेभ्य॑ ए॒ता उज्जि॑तीः॒ प्राय॑च्छत्।
ता वा ए॒ता उज्जि॑तयो॒ व्याख्या॑यन्ते।
य॒ज्ञस्य॑ सर्व॒त्वाय॑।
दे॒वता॑ना॒मनि॑र्भागाय।
दे॒वा वै ब्रह्म॑णश्चान्न॑स्य च॒ शम॑ल॒मपा᳚घ्नन्।
यद्ब्रह्म॑णः॒ शम॑ल॒मासी᳚त्।
सा गाथा॑ नाराश॒ꣳस्य॑भवत्।
यदन्न॑स्य।
सा सुरा᳚॥ ६॥

((apye̱va no'trā̱stviti̍ I
tebhyá e̱tā ujji̍tī̱ḥ prāyácchat I
tā vā e̱tā ujji̍tayo̱ vyākhyä̍yante I
ya̱jñasyá sarva̱tvāyá I
de̱vatánā̱manirbhāgāya I
de̱vā vai brahmáṇa̱ścānnásya ca̱ śamála̱mapā̎ghnan I
yadbrahmáṇa̱ḥ śamála̱māsī̎t I
sā gāthá nārāśa̱m̐syábhavat I
yadannásya I
sā surā̎ II 6 II))

**[[1-3-2-7]]**

तस्मा॒द्गाय॑तश्च म॒त्तस्य॑ च॒ न प्रति॒गृह्या᳚म्।
यत्प्र॑तिगृ॒ह्णीयात्।
शम॑लं॒ प्रति॑गृ॒ह्णीयात्।

सर्वा॑ वा ए॒तस्य॒ वाचोऽव॑रुद्धाः।
यो वा॑जपेयया॒जी।
या पृ॑थि॒व्यां याऽग्नौ या र॑थन्त॒रे।
याऽन्तरि॑क्षे या वा॒यौ या वा॑मदे॒व्ये।
या दि॒वि याऽऽदि॒त्ये या बृ॑ह॒ति।
याऽप्सु यौष॑धीषु॒ या वन॒स्पति॑षु।
तस्मा᳚द्वाजपेयया॒ज्यार्त्वि॑जीनः।
सर्वा॑ ह्य॑स्य वाचोऽव॑रुद्धाः॥ ७॥
धा॒वा॒मेति॒ ज्यैष्ठ्या॑य॒ वेद॑ ब्र॒ह्मा जा॑यते वाज॒पेय॒ः
सुराऽऽर्त्वि॑जीन॒ एकं॑ च॥ २॥

((tasmā̱dgāyáataśca ma̱ttasyá ca̱ na práti̱gṛhyä̍m I
yatprátigṛ̱hṇīyāt I
śamála̱m̱ pratigṛ̱hṇīyāt I
sarvā̱ vā e̱tasya̱ vāco'váruddhāḥ I
yo vā̍japeyayā̱jī I
yā pṛ̍thi̱vyām̱ yā'gnau yā ráthanta̱re I
yā'ntari̍kṣe̱ yā vā̱yau yā vā̍made̱vye I
yā di̱vi yā''di̱tye yā bṛ̍ha̱ti I
yā'psu yauṣádhīṣu̱ yā vana̱spati̍ṣu I
tasmā̎dvājapeyayā̱jyārtvi̍jīnaḥ I
sarvā̱ hyásya vāco'váruddhāḥ II 7 II
dhā̱vā̱meti̱ jyaiṣṭhyä̍ya̱ vedá bra̱hmā jä̍yate
vāja̱peya̱ḥ surā''rtvi̍jīna̱ ekam̱ ca II 2 II))

**[[1-3-3-1]]**

दे॒वा वै यद॒न्यैर्ग्रहै᳚र्य॒ज्ञस्य॒ नावारु॑न्धत।
तद॑तिग्रा॒ह्यैर॑ति॒गृह्यावा॑रुन्धत।
तद॑तिग्रा॒ह्या॑णामतिग्राह्य॒त्वम्।
यद॑तिग्रा॒ह्या॑ गृ॒ह्यन्ते᳚।
यदे॒वान्यैर्ग्रहै᳚र्य॒ज्ञस्य॒ नाव॑रु॒न्धे।
तदे॒व तैर॑ति॒गृह्याव॑रुन्धे।
पञ्च॑ गृ॒ह्यन्ते।
पाङ्क्तो॑ य॒ज्ञः।
याव॑ने॒व य॒ज्ञः।
तमा॒प्त्वाऽव॑रुन्धे॥ १॥

((de̱vā vai yada̱nyairgrahai̎rya̱jñasya̱ nāvārúndhata I
tadátigrā̱hyairati̱gṛhyāvárundhata I
tadátigrā̱hyáṇāmatigrāhya̱tvam I
yadátigrā̱hyá gṛ̱hyante̎ I
yade̱vānyairgrahai̎rya̱jñasya̱ nāvárundhe I
tade̱va tairáti̱gṛhyāvárundhe I
pañcá gṛ̱hyante I
pāṅktó ya̱jñaḥ I

yāvā́ne̱va ya̱jñaḥ |
tamā̱ptvā'vā́rundhe || 1 ||))

**[[1-3-3-2]]**

सर्वे॑ ऐ॒न्द्रा भ॑वन्ति।
ए॒क॒धैव यज॑मान इ॒न्द्रि॒यं द॑धाति।
स॒प्त॒द॑श प्राजाप॒त्या ग्र॒हा॑ गृ॒ह्यन्ते।
स॒प्त॒द॒शः प्र॒जाप॑तिः।
प्र॒जाप॑ते॒राप्त्यै॑।
एक॑य॒र्चा गृ॑ह्णाति।
ए॒क॒धैव यज॑माने वी॒र्यं॑ दधाति।
सो॒म॒ग्र॒हाꣳश्च॑ सुराग्र॒हाꣳश्च॑ गृह्णाति।
ए॒तद्वै दे॒वाना॑ं प॒र॒मम॒न्न॑म्।
यत्सोम॑ः॥ २॥

((sarvá a̱indrā bhávanti |
e̱ka̱dhaiva yajámāna indri̱yaṃ dádhati |
sa̱ptadáśa prājā̱pa̱tyā grahā́ gṛ̱hyante |
sa̱pta̱da̱śaḥ pra̱jāpátiḥ |
pra̱jāpáte̱rāptyaí |
ekáya̱rcā gṛ́hṇāti |
e̱ka̱dhaiva yajámāne vī̱ryaṃ́ dadhāti |
so̱ma̱gra̱hā́m̐śca surāgra̱hā́m̐śca gṛhṇāti |
e̱tadvai de̱vānā́ṃ para̱mamannā́m|
yatsomáḥ || 2 ||))

**[[1-3-3-3]]**

ए॒तन्म॑नु॒ष्या॑णाम्।
यत्सुरा॑।
प॒र॒मेणै॒वास्मा॑ अ॒न्नाद्ये॒नाव॑रम॒न्नाद्य॒मव॑रुन्धे।
सो॒म॒ग्र॒हान्गृ॑ह्णाति।
ब्रह्म॑णो॒ वा ए॒तत्तेज॑ः।
यत्सोम॑ः।
ब्रह्म॑ण ए॒व तेज॑सा॒ तेजो॒ यज॑माने दधाति।
सु॒रा॒ग्र॒हान्गृ॑ह्णाति।
अन्न॑स्य॒ वा ए॒तच्छम॑लम्।
यत्सुरा॑॥ ३॥

((e̱tanmánu̱ṣyā́ṇām |
yatsurā́ |
pa̱rame̱ṇai̱vāsmā́
a̱nnādye̱nāvára̱ma̱nnādya̱mavárundhe |
so̱ma̱gra̱hāṅgṛ́hṇāti |
brahmáṇo̱ vā e̱tattejáḥ |
yatsomáḥ |
brahmáṇa e̱va tejásā̱ tejo̱ yajámāne dadhāti |
su̱rā̱gra̱hāṅgṛ́hṇāti |
annásya̱ vā e̱tacchamálam |
yatsurā́ || 3 ||))

**[[1-3-3-4]]**

अन्न॑स्यै॒व शम॑ले॒न शम॑लं॒ यज॑माना॒दप॑हन्ति।
सो॒म॒ग्र॒हाꣳश्च॑ सुराग्र॒हाꣳश्च॑ गृह्णाति।
पु॒मान्वै सोम॑ः।
स्त्री सुरा॑।
तन्मि॑थु॒नम्।
मि॒थु॒नमे॒वास्य॒ तद्य॒ज्ञे क॑रोति प्र॒जन॑नाय।
आ॒त्मान॑मे॒व सोम॑ग्र॒हैः स्पृ॑णोति।
जा॒याꣳ सुरा॑ग्र॒हैः।
तस्मा॑द्वाजपेययाज्य॑मु॒ष्मि॑ꣳल्लो॒के स्त्रि॒यꣳ॒ सम्भ॑वति।
वा॒ज॒पे॒या॑भिजित॒ꣳ॒ ह्य॑स्य॥ ४॥

((annásya̱iva śamále̱na śamála̱ṃ
yajámānā̱dapáhanti |
so̱ma̱gra̱hā́m̐śca surāgra̱hā́m̐śca gṛhṇāti |
pumā̱nvai somáḥ |
strī surā́ |
tanmíthu̱nam |
mi̱thu̱name̱vāsya̱ tadya̱jñe károti pra̱janánāya |
ā̱tmānáme̱va sómagra̱haiḥ spṛ́ṇoti |
jā̱yām̐́ súrāgra̱haiḥ |
tasmā́dvājapeyayā̱jyámuṣmím̐llo̱ke striya̱m̐́
sa̱mbhávati |
vā̱ja̱peyā́bhijita̱m̐́ hyásya || 4 ||))

**[[1-3-3-5]]**

पूर्वे॑ सोमग्र॒हा गृ॑ह्यन्ते।
अप॑रे सुराग्र॒हाः।
पु॒रो॒क्षꣳ सोम॑ग्र॒हान्त्सा॑दयति।
प॒श्चा॒द॒क्षꣳ सुरा॑ग्र॒हान्।
पा॒प॒व॒स्य॒स॒स्य॒ विधृ॑त्यै।
ए॒ष वै यज॑मानः।
यत्सोम॑ः।
अन्न॒ꣳ॒ सुरा॑।
सो॒म॒ग्र॒हाꣳश्च॑ सुराग्र॒हाꣳश्च॒ व्यति॑षजति।
अ॒न्नाद्ये॒नै॒वैन॒ं॒ व्यति॑षजति॥ ५॥

((pūrvé somagra̱hā gṛ́hyante |
apáre surāgra̱hāḥ |
pu̱rokṣam̐́ sómagra̱hāntsā́dayati |

paṣcādakṣam̐ surāgrahān ।
pāpavasyasasya vidhṛtyai ।
eṣa vai yajamānaḥ ।
yatsomaḥ ।
annam̐ surā ।
somagrahām̐śca surāgrahām̐śca vyatiṣajati ।
annādyenaivainam vyatiṣajati ॥ 5 ॥))

**[[1-3-3-6]]**

संपृचः स्थ सं मा भद्रेण पृङ्क्तेत्याह।
अन्नं वै भद्रम्।
अन्नाद्येनैवैनꣳ सꣳसृजति।
अन्नस्य वा एतच्छमलम्।
यत्सुरा।
पाप्मैव खलु वै शमलम्।
पाप्मना वा एनमेतच्छमलेन व्यतिषजति।
यत्सोमग्रहाꣳश्च सुराग्रहाꣳश्च व्यतिषजति।
विपृचः स्थ वि मा पाप्मना पृङ्क्तेत्याह।
पाप्मनैवैनꣳ शमलेन व्यावर्तयति॥ ६॥

((sampṛcaḥ stha sam mā bhadreṇa pṛṅktetyāha ।
annam vai bhadram ।
annādyenaivainam̐ sam̐sṛjati ।
annasya vā etacchamalam ।
yatsurā ।
pāpmaiva khalu vai śamalam ।
pāpmanā vā enametacchamalena vyatiṣajati ।
yatsomagrahām̐śca surāgrahām̐śca vyatiṣajati ।
vipṛcaḥ stha vi mā pāpmanā pṛṅktetyāha ।
pāpmanaivainam̐ śamalena vyāvartayati ॥ 6 ॥))

**[[1-3-3-7]]**

तस्माद्वाजपेययाजी पूतो मेध्यो दक्षिण्यः।
प्राङुद्रवति सोमग्रहैः।
अमुमेव तैर्लोकमभिजयति।
प्रत्यङ्ख्सुराग्रहैः।
इममेव तैर्लोकमभिजयति।
प्रतिष्ठन्ति सोमग्रहैः।
यावदेव सत्यम्।
तेन सूयते।
वाजसृद्भ्यः सुराग्रहान् हरन्ति।
अनृतेनैव विशꣳ सꣳसृजति।
हिरण्यपात्रं मधोः पूर्णं ददाति।
मधव्योऽसानीति।
एकधा ब्रह्मण उपहरति।
एकधैव यजमान आयुस्तेजो दधाति॥ ७॥
आप्त्वाऽवरुन्धे सोमः शमलं यत्सुरा ह्यस्यैनं व्यतिषजति
व्यावर्तयति सृजति चत्वारि च॥ ३॥

((tasmādvājapeyayājī pūto medhyo dakṣiṇyaḥ ।
prāṅudravati somagrahaiḥ ।
amumeva tairlokamabhijayati ।
pratyaṅkhsurāgrahaiḥ ।
imameva tairlokamabhijayati ।
pratiṣṭhanti somagrahaiḥ ।
yāvadeva satyam ।
tena sūyate ।
vājasṛdbhyaḥ surāgrahān haranti ।
anṛtenaiva viśam̐ sam̐sṛjati ।
hiraṇyapātram madhoḥ pūrṇam dadāti ।
madhavyo'sānīti ।
ekadhā brahmaṇa upaharati ।
ekadhaiva yajamāna āyustejo dadhāti ॥ 7 ॥
āptvā'varundhe somaḥ śamalam yatsurā
hyasyainam vyatiṣajati vyāvartayati sṛjati catvāri ca
॥ 3 ॥))

**[[1-3-4-1]]**

ब्रह्मवादिनो वदन्ति।
नाग्निष्टोमो नोक्थ्यः।
न षोडशी नातिरात्रः।
अथ कस्माद्वाजपेये सर्वे यज्ञक्रतवोऽवरुध्यन्त इति।
पशुभिरिति ब्रूयात्।
आग्नेयं पशुमालभते।
अग्निष्टोममेव तेनावरुन्धे।
ऐन्द्राग्नेनोक्थ्यम्।
ऐन्द्रेण षोडशिनः स्तोत्रम्।
सारस्वत्याऽतिरात्रम्॥ १॥

((brahmavādino vadanti ।
nāgniṣṭomo nokthyaḥ ।
na ṣoḍaśī nātirātraḥ ।
atha kasmādvājapeye sarve
yajñakratavo'varudhyanta iti ।
paśubhiriti brūyāt।
āgneyam paśumālabhate ।
agniṣṭomameva tenāvarundhe ।
aindrāgnenokthyam ।
aindreṇa ṣoḍaśinaḥ stotram ।
sārasvatyā'tirātram ॥ 1 ॥))

**[[1-3-4-2]]**

मारुत्या बृहतः स्तोत्रम्।

एतावन्तो वै यज्ञक्रतवः।
तान्पशुभिरेवावरुन्धे।
आत्मानमेव स्पृणोत्यग्निष्टोमेन।
प्राणापानावुक्थ्येन।
वीर्यꣳ षोडशिनः स्तोत्रेण।
वाचमतिरात्रेण।
प्रजां बृहतः स्तोत्रेण।
इममेव लोकमभि जयत्यग्निष्टोमेन।
अन्तरिक्षमुक्थ्येन॥ २॥

((mārutyā bṛhataḥ stotram ।
etāvanto vai yajñakratavaḥ ।
tānpaśubhirevāvarundhe ।
ātmānameva spṛṇotyagniṣṭomena ।
prāṇāpānāvukthyena ।
vīryaꣳ ṣoḍaśinaḥ stotreṇa ।
vācamatirātreṇa ।
prajāṃ bṛhataḥ stotreṇa ।
imameva lokamabhi jayatyagniṣṭomena ।
antarikṣamukthyena ॥ 2 ॥))

**[[1-3-4-3]]**

सुवर्गं लोकꣳ षोडशिनः स्तोत्रेण।
देवयानानेव पथ आरोहत्यतिरात्रेण।
नाकꣳ रोहति बृहतः स्तोत्रेण।
तेज एवाऽऽत्मन्धत्त आग्नेयेन पशुना।
ओजो बलमैन्द्राग्नेन।
इन्द्रियमैन्द्रेण।
वाचꣳ सारस्वत्या।
उभावेव देवलोकं च मनुष्यलोकं चाभिजयति मारुत्या वशया।
सप्तदश प्राजापत्यान्पशूनालभते।
सप्तदशः प्रजापतिः॥ ३॥

((suvargaṃ lokaꣳ ṣoḍaśinaḥ stotreṇa ।
devayānāneva patha ārohatyatirātreṇa ।
nākaꣳ rohati bṛhataḥ stotreṇa ।
teja evā''tmandhatta āgneyena paśunā ।
ojo balamaindrāgnena ।
indriyamaindreṇa ।
vācaꣳ sārasvatyā ।
ubhāveva devalokaṃ ca manuṣyalokaṃ cābhijayati mārutyā vaśayā ।
saptadaśa prājāpatyānpaśūnālabhate ।
saptadaśaḥ prajāpatiḥ ॥ 3 ॥))

**[[1-3-4-4]]**

प्रजापतेराप्त्यै।
श्यामा एकरूपा भवन्ति।
एवमिव हि प्रजापतिः समृद्ध्यै।
तान्पर्यग्निकृतानुत्सृजति।
मरुतो यज्ञमजिघाꣳसन्प्रजापतेः।
तेभ्य एतां मारुतीं वशामालभत।
तयैवैनानशमयत्।
मारुत्या प्रचर्य।
एतान्त्संज्ञपयेत्।
मरुत एव शमयित्वा॥ ४॥

((prajāpaterāptyai ।
śyāmā ekarūpā bhavanti ।
evamiva hi prajāpatiḥ samṛddhyai ।
tānparyagnikṛtānutsṛjati ।
maruto yajñamajighāꣳsanprajāpateḥ ।
tebhya etāṃ mārutīṃ vaśāmālabhata ।
tayaivainānaśamayat ।
mārutyā pracarya ।
etāntsamjñapayet ।
maruta eva śamayitvā ॥ 4 ॥))

**[[1-3-4-5]]**

एतैः प्रचरति।
यज्ञस्याघाताय।
एकधा वपा जुहोति।
एकदेवत्या हि।
एते।
अथो एकधैव यजमाने वीर्यं दधाति।
नैवारेण सप्तदशशरावेणैतर्हि प्रचरति।
एतत्पुरोडाशा ह्येते।
अथो पशूनामेव छिद्रमपिदधाति।
सारस्वत्योत्तमया प्रचरति।
वाग्वै सरस्वती।
तस्मात्प्राणानां वागुत्तमा।
अथो प्रजापतावेव यज्ञं प्रतिष्ठापयति।
प्रजापतिर्हि वाक्।
अपन्नदती भवति।

तस्मा॑न्मनु॒ष्या॑ः सर्वां॑ वाचं॑ वदन्ति ॥ ५ ॥
अ॒ति॒रा॒त्रम॒न्तरि॑क्षमु॒क्थ्ये॑न प्र॒जाप॑तिः शमयि॒त्वोत्त॒मया॒ प्रच॑रति॒ षट्च॑ ॥ ४ ॥

((e̱taiḥ praca̍rati ।
yajñasyāghā̍tāya ।
e̱kadhā va̱pā ju̍hoti ।
e̱kade̱va̱tya̍ hi ।
e̱te ।
atho̍ eka̱dhaiva yaja̍māne vīryam̱ dadhāti ।
na̱ivāre̱ṇa̍ sa̱ptada̍śaśarāve̱ṇa̱itarhi̱ praca̍rati ।
e̱tatpu̍rodāśā̱ hye̍te ।
atho̍ paśū̱nāme̱va chi̱dramapi̍dadhāti ।
sāra̱sva̱tyotta̱mayā̱ praca̍rati ।
vāgvai sara̍svatī ।
tasmā̎tprā̱ṇānām̱ vāgu̍tta̱mā ।
atho̎ pra̱jāpa̍tāve̱va ya̱jñam̱ prati̍ṣṭhāpayati ।
pra̱jāpa̍ti̱rhi vāk ।
apa̍nnadatī bhavati ।
tasmā̎nmanu̱ṣya̍ḥ sarvām̱ vāca̍m̱ vadanti ॥ 5 ॥
a̱tirā̱tramantari̍kṣamu̱kthye̍na pra̱jāpa̍tiḥ śamayi̱tvotta̱mayā̱ praca̍rati̱ ṣaṭca̍ ॥ 4 ॥))

**[[1-3-5-1]]**
सा॒वि॒त्रं जु॑हो॒ति॒ कर्म॑णःकर्मणः पु॒रस्ता॑त् ।
कस्तद्वे॑देत्या॑हुः ।
यद्वा॑ज॒पेय॑स्य॒ पूर्वं॑ यदप॑रमि॒ति॑ ।
स॒वि॒तृप्र॑सूत ए॒व य॑थापू॒र्वं कर्मा॑णि करोति ।
सव॑ने सवने जुहोति ।
आ॒क्रम॑णमे॒व तत्सेतुं॑ यज॑मानः कुरुते ।
सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै ।
वा॒चस्प॒ति॒र्वाच॑म॒द्य स्व॑दाति न॒ इत्या॑ह ।
वाग्वै दे॒वाना॑ं पु॒राऽन्न॑मासीत् ।
वाच॑मे॒वास्मा॒ अन्न॑ꣳ स्वदयति ॥ १ ॥

((sā̱vi̱tram̱ ju̍hoti̱ karma̍ṇaḥkarmaṇaḥ pu̱rastā̎t ।
kastadve̱detya̍̎huḥ ।
yadvā̍ja̱peya̍sya̱ pūrvam̱ yadapa̍ra̱miti̍ ।
sa̱vi̱tṛpra̍sūta e̱va ya̍thāpū̱rvam̱ karmā̍ṇi karoti ।
sava̍ne savane juhoti ।
ākrama̍ṇame̱va tatsetum̱ yaja̍mānaḥ kurute ।
su̱va̱rgasya̍ lo̱kasya̱ sama̍ṣṭyai ।
vā̱caspati̱rvāca̍ma̱dya sva̍dāti na̱ itya̍̎ha ।
vāgvai de̱vānā̎m̱ pu̱rā'nna̍māsīt ।
vāca̍me̱vāsmā̱ anna̎m̐ svadayati ॥ 1 ॥))

**[[1-3-5-2]]**
इन्द्र॑स्य॒ वज्रो॑ऽसि॒ वार्त्र॑घ्न इ॒ति॒ रथ॑मु॒पाव॑हरति॒ विजि॑त्यै ।
वाज॑स्य॒ नु प्र॑स॒वे मा॒तर॑ं म॒हीमित्या॑ह ।

य॒च्चै॒वेयम् ।
य॒च्चा॒स्यामधि॑ ।
त॒दे॒वाव॑रुन्धे ।
अथो॒ तस्मि॑न्ने॒वोभ॒ये॒ऽभिषि॑च्यते ।
अ॒प्स्व॑न्त॒रमृत॑म॒प्सु भे॑ष॒जमित्यश्वा॑न्पल्पूलयति ।
अ॒प्सु वा अश्व॑स्य॒ तृतीय॑ं प्र॒विष्टम् ।
तद॑नु॒वेन॒न्वव॑प्लवते ।
यद॒प्सु प॑ल्पू॒लय॑ति ॥ २ ॥

((indra̍sya̱ vajro̍'si̱ vārtra̍ghna̱ iti̱ ratha̍mu̱pāva̍harati̱ viji̍tyai ।
vāja̍sya̱ nu pra̍sa̱ve mā̱taram̱ ma̱hīmitya̍̎ha ।
yacca̱iveyam ।
yaccā̱syāmadhi̍ ।
tade̱vāva̍rundhe ।
atho̱ tasmi̍nne̱vobhaye̱'bhiṣi̍cyate ।
a̱psva̍ntara̱mṛta̍ma̱psu bhe̍ṣa̱jamityaśvā̎npalpūlayati ।
a̱psu vā aśva̍sya̱ tṛtī̍yam̱ pravi̍ṣṭam ।
tada̍nu̱vena̱nvava̍plavate ।
yada̱psu pa̍lpū̱laya̍ti ॥ 2 ॥))

**[[1-3-5-3]]**
यदे॒वास्या॒प्सु प्र॒विष्टम् ।
तदे॒वाव॑रुन्धे ।
ब॒हु वा अश्वो॑ऽमे॒ध्यमु॒प॑गच्छति ।
यद॒प्सु प॑ल्पू॒लय॑ति ।
मेध्या॑ने॒वैना॑न्करोति ।
वा॒युर्वां॑ त्वा॒ मनु॑र्वा॒ त्वेत्या॑ह ।
ए॒ता वा ए॒तं दे॒वता॒ अग्रे॒ अश्व॑मयुञ्जन् ।
ताभि॑रे॒वैना॑न्युनक्ति ।
स॒वस्योज्जि॑त्यै ।
यजु॑षा युनक्ति॒ व्यावृ॑त्त्यै ॥ ३ ॥

((yade̱vāsyā̱psu pravi̍ṣṭam ।
tade̱vāva̍rundhe ।
ba̱hu vā aśvo̍'me̱dhyamupa̍gacchati ।
yada̱psu pa̍lpū̱laya̍ti ।
medhyā̍ne̱vainā̎nkaroti ।
vā̱yurvā̎ tvā̱ manu̍rvā̱ tvetya̍ha ।
e̱tā vā e̱tam̱ de̱vatā̱ agre̱ aśva̍mayuñjan।
tābhi̍re̱vainā̍nyunakti ।
sa̱vasyojji̍tyai ।
yaju̍ṣā yunakti̱ vyāvṛ̍ttyai ॥ 3 ॥))

**[[1-3-5-4]]**

अपाँ न पादा॒शुहे॒मन्निति॒ संमा॒॑र्ष्टि।
मेध्या॑ने॒वैना॒॑न्करोति।
अथो॒ स्तौत्ये॒वैना॑ना॒जिꣳ स॑रिष्य॒तः।
वि॒ष्णु॒क्र॒मान्क्र॑मते।
विष्णु॑रे॒व भू॒त्वेमाँ॒ल्लो॒काना॒भिज॑यति।
वै॒श्व॒दे॒वो वै रथ॑ः।
अ॒ङ्कौ न्य॒ङ्कावभितो॒ रथं॒ यावित्या॑ह।
या ए॒व दे॒वता॒ रथे॒ प्रवि॑ष्टाः।
ताभ्य॑ ए॒व नम॑स्करोति।
आ॒त्मनोऽना॒॑र्त्यै।
अशा॑मरथंभावुकोऽस्य॒ रथो॑ भवति।
य ए॒वं वेद॑॥ ४॥
स्व॒द॒य॒ति॒ प॒ल्पू॒लय॑ति॒ व्या॒वृ॑त्त्या॒ अना॑र्त्यै॒ द्वे च॑॥ ५॥

((apām̐ na pādāśuhemanniti̱ sammā̍rṣṭi̱ I
medhyā̍ne̱vainā̍nkaroti I
atho̱ stautye̱vainā̍nā̱jiꣳ sa̍riṣya̱taḥ I
vi̱ṣṇu̱kra̱mānkra̍mate I
viṣṇu̍re̱va bhū̱tvemām̐llo̱kāna̱bhija̍yati I
vai̱śva̱de̱vo vai ratha̍ḥ I
a̱ṅkau nya̱ṅkāva̱bhito̱ ratha̱m yāvitya̍ha I
yā e̱va de̱vatā̱ rathe̱ pravi̍ṣṭāḥ I
tābhya̍ e̱va nama̍skaroti I
ā̱tmano'nā̍rtyai I
aśā̍marathaṃbhāvuko'sya̱ ratho̍ bhavati I
ya e̱vam veda̍ II 4 II
sva̱da̱ya̱ti̱ pa̱lpū̱laya̍ti̱ vyā̱vṛ̍ttyā̱ anā̍rtyai̱ dve ca̍ II 5 II))

**[[1-3-6-1]]**
दे॒वस्या॒हꣳ स॑वि॒तुः प्र॑स॒वे बृह॒स्पति॑ना वाज॒जिता॒ वाज॑
जेष॒मित्या॑ह।
स॒वि॒तृप्र॑सूत ए॒व ब्रह्म॑णा॒ वाज॒मुज्ज॑यति।
दे॒वस्या॒हꣳ स॑वि॒तुः प्र॑स॒वे बृह॒स्पति॑ना वाज॒जिता॒ वर्षि॑ष्ठं
नाकꣳ॑ रुहे॒यमित्या॑ह।
स॒वि॒तृप्र॑सूत ए॒व ब्रह्म॑णा॒ वर्षि॑ष्ठं नाकꣳ॑ रोहति।
चात्वा॑ले रथच॒क्रं निमि॑तꣳ रोहति।
अतो॒ वा अङ्गि॑रस उत्त॒माः सु॑व॒र्गं लो॒कमा॑यन्।
सा॒क्षादे॒व यज॑मानः सुव॒र्गं लो॒कमे॑ति।
आवे॑ष्टयति।
वज्रो॒ वै रथ॑ः।
वज्रे॑णै॒व दिशो॒ऽभि ज॑यति॥ १॥

((de̱vasyā̱haꣳ sa̍vi̱tuḥ pra̍sa̱ve bṛ̱haspati̍nā vāja̱jitā̱ vāja̍ṃ je̱ṣa̱mitya̍ha I
sa̱vi̱tṛpra̍sūta e̱va brahma̍ṇā̱ vāja̱mujja̍yati I
de̱vasyā̱haꣳ sa̍vi̱tuḥ pra̍sa̱ve bṛ̱haspati̍nā vāja̱jitā̱ varṣi̍ṣṭhaṃ nākaꣳ̍ ruhe̱yamitya̍ha I
sa̱vi̱tṛpra̍sūta e̱va brahma̍ṇā̱ varṣi̍ṣṭhaṃ nākaꣳ̍ rohati I
cātvā̍le rathaca̱kraṃ nimi̍taꣳ rohati I
ato̱ vā aṅgi̍rasa utta̱māḥ su̍va̱rgaṃ lo̱kamā̍yan I
sā̱kṣāde̱va yaja̍mānaḥ suva̱rgaṃ lo̱kame̍ti I
āve̍ṣṭayati I
vajro̱ vai ratha̍ḥ I
vajre̍ṇai̱va diśo̱'bhi ja̍yati II 1 II))

**[[1-3-6-2]]**
वा॒जिना॒ꣳ साम॑ गायते।
अन्नं॒ वै वाज॑ः।
अन्न॑मे॒वाव॑रुन्धे।
वा॒चो वर्ष्म॑ दे॒वेभ्योऽपा॒॑क्रामत्।
तद्व॒नस्पती॒न्प्रावि॑शत्।
सैषा वाग्व॒नस्पति॑षु वदति।
या दु॑न्दु॒भौ।
तस्मा॒॑द्दुन्दु॒भिः सर्वा॒ वाचोऽति॑वदति।
दु॒न्दु॒भीन्त्स॒माघ्न॑न्ति।
प॒र॒मा वा ए॒षा वाक्॥ २॥

((vā̱jinā̱ꣳ sāma̍ gāyate I
anna̱ṃ vai vāja̍ḥ I
anna̍me̱vāva̍rundhe I
vā̱co varṣma̍ de̱vebhyo'pā̍krāmat I
tadvana̱spatī̱nprāvi̍śat I
saiṣā vāgvana̱spati̍ṣu vadati I
yā du̍ndu̱bhau I
tasmā̍ddundu̱bhiḥ sarvā̱ vāco'ti̍vadati I
du̱ndu̱bhīntsa̱māghna̍nti I
pa̱ra̱mā vā e̱ṣā vāk II 2 II))

**[[1-3-6-3]]**
या दु॑न्दु॒भौ।
प॒र॒मयै॒व वा॒चाऽव॑रां॒ वा॒चमव॑रुन्धे।
अथो॒ वा॒च ए॒व वर्ष्म॒ यज॑माना॒ऽव॑रुन्धे।
इन्द्रा॒य वाच॑ं वदु॒तेन्द्रं॒ वाज॑ं जापय॒तेन्द्रो॒
वाज॑मजयि॒दित्या॑ह।
ए॒ष वा ए॒तर्हीन्द्र॑ः।
यो यज॑ते।
यज॑मान ए॒व वाज॒मुज्ज॑यति।

स॒प्तद॑श प्रव्या॒धाना॒जिं धा॑वन्ति।
स॒प्त॒द॒शꣳ स्तो॒त्रं भ॑वति।
स॒प्तद॑श सप्तदश दीयन्ते॥ ३॥

((yā du̍ndu̠bhau |
pa̠ra̠mayai̠va vā̠cā'va̍rā̠m̐ vāca̠mava̍rundhe |
atho̍ vā̠ca e̠va varṣma̠ yaja̍mā̠no'va̍rundhe |
indrā̍ya̠ vāca̍ṃ vada̠tendra̠ṃ vāja̍ṃ jāpaya̠tendro̠
vāja̍majayi̠dityā̍ha |
e̠ṣa vā e̠tarhīndra̍ḥ |
yo yaja̍te |
yaja̍māna e̠va vāja̠mujja̍yati |
sa̠ptada̍śa pravyā̠dhānā̠jiṃ dhā̍vanti |
sa̠pta̠da̠śa̠m̐ sto̠traṃ bha̍vati |
sa̠ptada̍śa saptadaśa dīyante || 3 ||))

**[[1-3-6-4]]**

स॒प्त॒द॒शः प्र॒जाप॑तिः।
प्र॒जाप॑ते॒राप्त्यै᳚।
अर्वा॑ऽसि॒ सप्ति॑रसि वा॒ज्य॑सीत्या॑ह।
अ॒ग्निर्वा अर्वा᳚।
वा॒युः सप्ति॑ः।
आ॒दि॒त्यो वा॒जी।
ए॒ताभि॑रि॒वास्मै॑ दे॒वता॑भिर्दे॒वर॒थं यु॑नक्ति।
प्र॒ष्टि॒वा॒हिनं॑ युनक्ति।
प्र॒ष्टि॒वा॒ही वै दे॑वर॒थः।
दे॒व॒र॒थमे॒वास्मै॑ युनक्ति॥ ४॥

((sa̠pta̠da̠śaḥ pra̠jāpa̍tiḥ |
pra̠jāpa̍te̠rāptyai̎ |
arvā̍'si̠ sapti̍rasi vā̠jya̍sītyā̍ha |
a̠gnirvā arvā̎ |
vā̠yuḥ sapti̍ḥ |
ā̠di̠tyo vā̠jī |
e̠tābhi̍re̠vāsmai̍ de̠vatā̍bhirdevara̠thaṃ yu̍nakti |
pra̠ṣṭi̠vā̠hina̍ṃ yunakti |
pra̠ṣṭi̠vā̠hī vai de̍vara̠thaḥ |
de̠va̠ra̠thame̠vāsmai̍ yunakti || 4 ||))

**[[1-3-6-5]]**

वा॒जि॑नो॒ वाजं॑ धावत॒ काष्ठा᳚ं गच्छतेत्या॑ह।
सु॒व॒र्गो वै लो॒कः काष्ठा᳚।
सु॒व॒र्गमे॒व लो॒कं य॑न्ति।
सु॒व॒र्गं वा ए॒ते लो॒कं य॑न्ति।
य आ॒जिं धाव॑न्ति।
प्राञ्चो॑ धावन्ति।
प्राङि॑व॒ हि सु॑व॒र्गो लो॒कः।
च॒त॒सृभि॑र॒नु॑ मन्त्रयते।
च॒त्वारि॒ छन्दा॑ꣳसि।
छन्दो॑भिरे॒वैना᳚ं सुव॒र्गं लो॒कं ग॑मयति॥ ५॥

((vāji̍no̠ vāja̍ṃ dhāvata̠ kāṣṭhā̠m̐ gaccha̠tetyā̍ha |
su̠va̠rgo vai lo̠kaḥ kāṣṭhā̎ |
su̠va̠rgame̠va lo̠kaṃ ya̍nti |
su̠va̠rgaṃ vā e̠te lo̠kaṃ ya̍nti |
ya ā̠jiṃ dhāva̍nti |
prāñco̍ dhāvanti |
prāṅi̍va̠ hi su̍va̠rgo lo̠kaḥ |
ca̠ta̠sṛbhi̠ranu̍ mantrayate |
ca̠tvāri̠ chandā̎ṃsi |
chando̍bhire̠vainā̠m̐ suva̠rgaṃ lo̠kaṃ ga̍mayati || 5 ||))

**[[1-3-6-6]]**

प्र वा ए॒ते᳚ऽस्माल्लो॒काच्च्य॑वन्ते।
य आ॒जिं धाव॑न्ति।
उद॑ञ्च॒ आव॑र्तन्ते।
अ॒स्मादे॒व तेन॑ लो॒कान्नय॑न्ति।
र॒थ॒वि॒मो॒च॒नीयं॑ जुहोति॒ प्रति॑ष्ठित्यै।
आमा॒ वाज॑स्य प्रस॒वो ज॑गम्या॒दित्या॑ह।
अन्नं॒ वै वाज॑ः।
अन्न॑मे॒वाव॑रुन्धे।
य॒था॒लो॒कं वा ए॒त उज्ज॑यन्ति।
य आ॒जिं धाव॑न्ति॥ ६॥

((pra vā e̠te̎'smāllo̠kāccya̍vante |
ya ā̠jiṃ dhāva̍nti |
uda̍ñca̠ āva̍rtante |
a̠smāde̠va tena̍ lo̠kānnaya̍nti |
ra̠tha̠vi̠mo̠canīya̍ṃ juhoti̠ prati̍ṣṭhityai |
āmā̠ vāja̍sya prasa̠vo ja̍gamyā̠dityā̍ha |
anna̠ṃ vai vāja̍ḥ |
anna̍me̠vāva̍rundhe |
ya̠thā̠lo̠kaṃ vā e̠ta ujja̍yanti |
ya ā̠jiṃ dhāva̍nti || 6 ||))

**[[1-3-6-7]]**

कृ॒ष्ण॒लं कृ॑ष्णलं वा॒ज॒सृद्भ्यः॒ प्रय॑च्छति।
य॒मे॒व ते वाजं॑ लो॒कमु॒ज्जय॑न्ति।
तं परि॒क्रीया॒व॑रुन्धे।
ए॒क॒धा ब्र॒ह्मण॒ उप॑हरति।
ए॒क॒धैव यज॑माने वी॒र्यं॑ दधाति।

दे॒वा वा ओष॑धीष्वा॒जिम॑युः।
ता बृ॒ह॒स्पति॑रु॒द॑जयत्।
स नी॒वारा॒न्निर॑वृणीत।
तन्नी॒वारा॑णां नीवार॒त्वम्।
नै॒वा॒र॒श्च॒रुर्भ॑वति॥ ७॥

((kṛṣṇalam̐ kṛṣṇalam̐ vājasṛdbhyaḥ prayácchati |
yameva te vājam̐ lokamujjayánti |
taṃ párikrīyāvárundhe |
ekadhā brahmaṇa upáharati |
ekadhaiva yajámāne vīryam̐ dadhāti |
devā vā oṣádhīṣvājimáyuḥ |
tā bṛhaspatirudájayat |
sa nīvārānniravṛṇīta |
tannīvārāṇām nīvāratvam |
naivāraścarurbhávati || 7 ||))

[[1-3-6-8]]
ए॒तद्वै दे॒वाना॑ँ पर॒मम॒न्नम्।
यन्नी॒वारा॑ः।
प॒र॒मेणै॒वास्मा॑ अ॒न्नाद्ये॒नाव॑रम॒न्नाद्य॒मव॑रुन्धे।
स॒प्तद॑शशरावो भवति।
स॒प्त॒द॒शः प्र॒जाप॑तिः।
प्र॒जाप॑ते॒राप्त्यै॑।
क्षी॒रे भ॑वति।
रुच॑मे॒वास्मि॑न्दधाति।
स॒र्पिष्वा॑न्भवति मेध्य॒त्वाय॑।
बा॒र्ह॒स्प॒त्यो वा ए॒ष दे॒वत॑या॥ ८॥

((etadvai devānām̐ paramamannám |
yannīvārā̐ḥ |
parameṇaivāsmá
annādyenāvāramannādyamavárundhe |
saptadáśaśarāvo bhavati |
saptadaśaḥ prajāpátiḥ |
prajāpáterāptyai̐ |
kṣīre bhávati |
rucámevāsmíndadhāti |
sarpiṣvā̐nbhavati medhyatvāyá |
bārhaspatyo vā eṣa devatáyā || 8 ||))

[[1-3-6-9]]
यो वा॑ज॒पेये॑न॒ यज॑ते।
बा॒र्ह॒स्प॒त्य ए॒ष च॒रुः।
अश्वा॑न्त्सरिष्य॒तः स॒स्रु॒षश्चाव॑ घ्रापयति।
यमे॒व ते वाजं॑ लो॒कमु॒ज्जय॑न्ति।
तमे॒वाव॑रुन्धे।
अजी॑जिपत वनस्पतय॒ इन्द्रं॒ वाजं॒ विमु॑च्यध्व॒मिति॑
दु॒न्दु॒भीन् विमु॑ञ्चति।
यमे॒व ते वाजं॑ लो॒कमि॑न्द्रि॒यं दु॑न्दु॒भय॑ उ॒ज्जय॑न्ति।
तमे॒वाव॑रुन्धे॥ ९॥
अ॒भिजय॑ति॒ वा ए॒षा वाग्दी॑यन्तेऽस्मै युनक्ति गमयति॒ य
आ॒जिं धाव॑न्ति भवति दे॒वत॑या॒ऽष्टौ च॑॥ ६॥

((yo vā̐japeyéna yajáte |
bārhaspatya eṣa caruḥ |
aśvā̐ntsariṣyataḥ sasruṣaścāvá ghrāpayati |
yameva te vājam̐ lokamujjayánti |
tamevāvárundhe |
ajījipata vanaspataya indraṃ vājaṃ
vimúcyadhvamiti dundubhīn vimúñcati |
yameva te vājam̐ lokamíndriyaṃ dúndubhayá
ujjayánti |
tamevāvárundhe || 9 ||
abhijáyati vā eṣā vāgdíyante'smai yunakti gamayati
ya ājiṃ dhāvánti bhavati devatáyā'ṣṭau cá || 6 ||))

[[1-3-7-1]]
ता॒र्प्य॑ं यज॑मानं॒ परि॑धापयति।
य॒ज्ञो वै ता॒र्प्यम्।
य॒ज्ञेनै॒वैन॒ꣳ॒ सम॑र्धयति।
द॒र्भ॒मयं॒ परि॑धापयति।
प॒वित्रं॒ वै द॒र्भाः।
पु॒नात्ये॒वैन॑म्।
वाजं॒ वा ए॒षोऽव॑रुरुत्सते।
यो वा॑ज॒पेये॑न॒ यज॑ते।
ओष॑धयः खलु॒ वै वाज॑ः।
यद्द॑र्भ॒मयं॑ परिधा॒पय॑ति॥ १॥

((tārpyaṃ yajámānaṃ parídhāpayati |
yajño vai tārpyam |
yajñenaivainam̐ samárdhayati |
darbhamayaṃ parídhāpayati |
pavitraṃ vai darbhāḥ |
punātyevainám |
vājaṃ vā eṣo'várurutsate |
yo vā̐japeyéna yajáte |
oṣádhayaḥ khalu vai vājáḥ |
yaddárbhamayam̐ paridhāpayáti || 1 ||))

[[1-3-7-2]]
वा॒जस्या॒व॑रुद्ध्यै।

जाय॒ एहि॒ सुवो॒ रोहा॒वेत्या॑ह।
पत्नि॑या ए॒वैष य॒ज्ञस्याँ᳚न्वार॒म्भोऽन॑वच्छित्यै।
स॒प्तद॑शारत्नि॒र्यूपो॑ भवति।
स॒प्त॒द॒शः प्र॒जाप॑तिः।
प्र॒जाप॑ते॒राप्त्यै᳚।
तू॒प॒रश्च॒तुर॑श्रिर्भवति।
गौ॒धूमं॑ च॒षालँ᳚म्।
न वा ए॒ते व्री॒हयो॒ न यवाँ᳚ः।
यद्गो॒धूमाँ᳚ः॥ २॥

((vājasyāvȧruddhyai ।
jāya̱ ehi̱ suvo̱ rohā̱vetyȧha ।
patniyā e̱vaiṣa ya̱jñasyā̐nvāra̱mbho'navacchityai ।
sa̱ptadȧśāratni̱ryūpȯ bhavati ।
sa̱pta̱da̱śaḥ pra̱jāpȧtiḥ ।
pra̱jāpȧte̱rāptyai ।
tū̱pa̱raścatȧraśrirbhavati ।
gau̱dhūmam ca̱ṣālā̐m ।
na vā e̱te vrī̱hayo̱ na yavā̐ḥ ।
yadgo̱dhūmā̐ḥ ॥ 2 ॥))

**[[1-3-7-3]]**
ए॒वमि॑व॒ हि प्र॒जाप॑तिः॒ समृ॑द्ध्यै।
अथो॑ अ॒मुमे॒वास्मै॑ लो॒कमन्न॑वन्तं करोति।
वासो॑भिर्वेष्टयति।
ए॒ष वै यज॑मानः।
यद्यूप॑ः।
स॒र्व॒दे॒व॒त्यं॑ वास॑ः।
सर्वा॑भिरे॒वैनं॑ दे॒वता॑भिः॒ सम॑र्धयति।
अथो॑ आ॒क्रम॑णमे॒व तत्सेतुं॒ यज॑मानः कुरुते।
सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै।
द्वाद॑श वाजप्रस॒वीया॑नि जुहोति॥ ३॥

((e̱vamiva̱ hi pra̱jāpȧti̱ḥ samṛddhyai ।
athȯ a̱mume̱vāsmai lo̱kamannȧvantaṃ karoti ।
vāsȯbhirveṣṭayati ।
e̱ṣa vai yajȧmānaḥ ।
yadyūpȧḥ ।
sa̱rva̱de̱va̱tyȧṃ vāsȧḥ ।
sarvȧbhire̱vainȧṃ de̱vatȧbhi̱ḥ samȧrdhayati ।
athȯ ā̱kramȧṇame̱va tatsetu̱ṃ yajȧmānaḥ kurute ।
su̱va̱rgasyȧ lo̱kasya̱ samȧṣṭyai ।
dvādȧśa vājaprasa̱vīyȧni juhoti ॥ 3 ॥))

**[[1-3-7-4]]**
द्वाद॑श॒ मासाँ᳚ः संवत्स॒रः।
सं॒व॒त्स॒रमे॒व प्री॑णाति।
अथो॑ संवत्स॒रमे॒वास्मा॒ उप॑दधाति।
सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै।
द॒शभि॑ः क॒ल्पै॑ रोहति।
नव॒ वै पुरु॑षे प्रा॒णाः।
नाभि॑र्द॒शमी।
प्रा॒णाने॒व य॑थास्था॒नं कल्पयि॒त्वा।
सु॒व॒र्गं लो॒कमे॑ति।
ए॒ताव॒द्वै पुरु॑षस्य॒ स्वम्॥ ४॥

((dvādȧśa̱ māsā̐ḥ saṃvatsa̱raḥ ।
saṃva̱tsa̱rame̱va priṇāti ।
athȯ saṃvatsa̱rame̱vāsmā̱ upȧdadhāti ।
su̱va̱rgasyȧ lo̱kasya̱ samȧṣṭyai ।
da̱śabhi̱ḥ kalpai rohati ।
nava̱ vai purȯṣe prā̱ṇāḥ ।
nābhirdaśa̱mī ।
prā̱ṇāne̱va yȧthāsthā̱naṃ kȧlpayi̱tvā ।
su̱va̱rgaṃ lo̱kamėti ।
e̱tāva̱dvai purȧṣasya̱ svam ॥ 4 ॥))

**[[1-3-7-5]]**
याव॑त्प्रा॒णाः।
याव॑दे॒वास्यास्ति॑।
तेन॑ स॒ह सु॑व॒र्गं लो॒कमे॑ति।
सुव॑र्दे॒वाँ२ अ॑ग॒न्मेत्या॑ह।
सु॒व॒र्गमे॒व लो॒कमे॑ति।
अ॒मृता॑ अभू॒मेत्या॑ह।
अ॒मृत॑मिव॒ हि सु॑व॒र्गो लो॒कः।
प्र॒जाप॑तेः प्र॒जा अ॑भू॒मेत्या॑ह।
प्रा॒जा॒प॒त्यो वा अ॒यं लो॒कः।
अ॒स्मादे॒व तेन॑ लो॒कान्नैति॑॥ ५॥

((yāvȧtprā̱ṇāḥ ।
yāvȧde̱vāsyāsti ।
tenȧ sa̱ha sȧva̱rgaṃ lo̱kamėti ।
suvȧrde̱vā̐m ȧga̱nmetyȧha ।
su̱va̱rgame̱va lo̱kamėti ।
a̱mṛtȧ abhū̱metyȧha ।
a̱mṛtȧmiva̱ hi sȧva̱rgo lo̱kaḥ ।
pra̱jāpȧteḥ pra̱jā ȧbhū̱metyȧha ।
prā̱jā̱pa̱tyo vā a̱yaṃ lo̱kaḥ ।
a̱smāde̱va tenȧ lo̱kānnaiti ॥ 5 ॥))

[[1-3-7-6]]

समहं प्रजया सं मया प्रजेत्याह।
आशिषमेवैतामाशास्ते।
आसपुटैर्घ्नन्ति।
अन्नं वा इयम्।
अन्नाद्येनैवैनꣳ समर्धयन्ति।
ऊषैर्घ्नन्ति।
एते हि साक्षादन्नम्।
यदूषाः।
साक्षादेवैनमन्नाद्येन समर्धयन्ति।
पुरस्तात्प्रत्यञ्चं घ्नन्ति॥ ६॥

((samaham prajayā sam mayā prajetyāha |
āśiṣamevaitāmāśāste |
āsapuṭairghnanti |
annam vā iyam |
annādyenaivainam samardhayanti |
ūṣairghnanti |
ete hi sākṣādannam |
yadūṣāḥ |
sākṣādevainamannādyena samardhayanti |
purastātpratyañcam ghnanti || 6 ||))

[[1-3-7-7]]

पुरस्ताद्धि प्रतीचीनमन्नमद्यते।
शीर्षतो घ्नन्ति।
शीर्षतो ह्यन्नमद्यते।
दिग्भ्यो घ्नन्ति।
दिग्भ्य एवास्मा अन्नाद्यमवरुन्धते।
ईश्वरो वा एष पराङ्प्रदघः।
यो यूपꣳ रोहति।
हिरण्यमध्यवरोहति।
अमृतं वै हिरण्यम्।
अमृतꣳ सुवर्गो लोकः।
अमृत एव सुवर्गे लोके प्रतितिष्ठति।
शतमानं भवति।
शतायुः पुरुषः शतेन्द्रियः।
आयुष्येवेन्द्रिये प्रतितिष्ठति।
पुष्ट्यै वा एतद्रूपम्।
यदजा।
त्रिः संवत्सरस्यान्यान्पशून्परि प्रजायते।
बस्ताजिनमध्यव रोहति।
पुष्ट्यामेव प्रजनने प्रतितिष्ठति॥ ७॥
परिधापयति गोधूमा जुहोति स्वं नैति प्रत्यञ्चं घ्नन्ति लोको नव च॥ ७॥

((purastāddhi pratīcīnamannamadyate |
śīrṣato ghnanti |
śīrṣato hyannamadyate |
digbhyo ghnanti |
digbhya evāsmā annādyamavarundhate |
īśvaro vā eṣa parāṅpradaghaḥ |
yo yūpam rohati |
hiraṇyamadhyavarohati |
amṛtam vai hiraṇyam |
amṛtam suvargo lokaḥ |
amṛta eva suvarge loke pratitiṣṭhati |
śatamānam bhavati |
śatāyuḥ puruṣaḥ śatendriyaḥ |
āyuṣyevendriye pratitiṣṭhati |
puṣṭyai vā etadrūpam|
yadajā |
triḥ saṃvatsarasyānyānpaśūnpari prajāyate |
bastājinamadhyavā rohati |
puṣṭyāmeva prajanane pratitiṣṭhati || 7 ||
paridhāpayati godhūmā juhoti svam naiti
pratyañcam ghnanti loko nava ca || 7 ||))

[[1-3-8-1]]

सप्तान्नहोमाञ्जुहोति।
सप्त वा अन्नानि।
यावन्त्येवान्नानि।
तान्येवावरुन्धे।
सप्त ग्राम्या ओषधयः।
सप्तारण्याः।
उभयीषामवरुद्ध्यै।
अन्नस्यान्नस्य जुहोति।
अन्नस्यान्नस्यावरुद्ध्यै।
यद्वाजपेययाज्यनवरुद्धस्याश्नीयात्॥ १॥

((saptānnahomāñjuhoti |
sapta vā annāni |
yāvantyevānnāni |
tānyevāvarundhe |
sapta grāmyā oṣadhayaḥ |
saptāraṇyāḥ |
ubhayīṣāmavaruddhyai |
annasyānnasya juhoti |
annasyānnasyāvaruddhyai |
yadvājapeyayājyanavaruddhasyāśnīyāt || 1 ||))

**[[1-3-8-2]]**

अव॑रुद्धेन॒ व्यृ॑ध्येत।
सर्व॑स्य सम॒व॒दाय॑ जुहोति।
अन॑वरुद्ध॒स्याव॑रुद्ध्यै।
औदु॑म्बरेण॒ स्रु॒वेण॑ जुहोति।
ऊर्ग्वा अन्न॑मुदु॒म्बरः॑।
ऊ॒र्ज ए॒वान्नाद्य॒स्याव॑रुद्ध्यै।
दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒व इत्या॑ह।
स॒वि॒तृ प्र॑सूत ए॒वैन॒ं ब्रह्म॑णा दे॒वता॑भिर॒भिषि॑ञ्चति।
अन्न॑स्यान्नस्या॒भिषि॑ञ्चति।
अन्न॑स्यान्न॒स्याव॑रुद्ध्यै॥ २॥

((avárudhena̱ vyṛ́ddhyeta ।
sarvásya samava̱dāyá juhoti ।
anávaruddha̱syāváruddhyai ।
audúmbareṇa̱ sru̱veṇá juhoti ।
ūrgvā annámudu̱mbaraḥ́ ।
ū̱rja e̱vānnādya̱syāváruddhyai ।
de̱vasyá tvā savi̱tuḥ prása̱va ityáha ।
sa̱vi̱tṛ prásūta e̱vaina̱m brahmáṇā
de̱vatábhira̱bhiṣíñcati ।
annásyānnasyā̱bhiṣíñcati ।
annásyānna̱syāváruddhyai ॥ 2 ॥))

**[[1-3-8-3]]**

पु॒रस्ता॑त्प्र॒त्यञ्च॑म॒भिषि॑ञ्चति।
पु॒रस्ता॒द्धि प्र॑तीची॒नमन्न॑म॒द्यते᳚।
शी॒र्ष॒तो॑ऽभिषि॑ञ्चति।
शी॒र्ष॒तो ह्यन्न॑म॒द्यते᳚।
आ मु॒खा॑द॒न्वव॑ स्रावयति।
मु॒ख॒त ए॒वास्मा॑ अ॒न्नाद्य॑ं दधाति।
अ॒ग्नेस्त्वा॒ साम्रा᳚ज्येना॒भिषि॑ञ्चा॒मीत्या॑ह।
ए॒ष वा अ॒ग्नेः स॒वः।
तेनै॒वैन॑म॒भिषि॑ञ्चति।
इन्द्र॑स्य त्वा॒ साम्रा᳚ज्येना॒भिषि॑ञ्चा॒मीत्या॑ह॥ ३॥

((pu̱rastā̎tpra̱tyañcáma̱bhiṣíñcati ।
pu̱rastā̱ddhi prátīcīna̱mannáma̱dyate̎ ।
śī̱rṣa̱tó'bhiṣíñcati ।
śī̱rṣa̱to hyannáma̱dyate̎ ।
ā mukhā́da̱nvavá srāvayati ।
mu̱kha̱ta e̱vāsmá a̱nnādyaḿ dadhāti ।
a̱gnestva̱ sāmrā̎jyenā̱bhiṣíñca̱mītyáha ।
e̱ṣa vā a̱gneḥ sa̱vaḥ ।
tenai̱vainámа̱bhiṣíñcati ।
indrásya tva̱ sāmrā̎jyenā̱bhiṣíñca̱mītyáha ॥ 3 ॥))

**[[1-3-8-4]]**

इ॒न्द्रि॒यमे॒वास्मि॑न्ने॒तेन॑ दधाति।
बृह॒स्पते᳚स्त्वा॒ साम्रा᳚ज्येना॒भिषि॑ञ्चा॒मीत्या॑ह।
ब्रह्म॒ वै दे॒वाना॑ं बृह॒स्पतिः॑।
ब्रह्म॑णै॒वैन॑म॒भिषि॑ञ्चति।
सो॒म॒ग्र॒हाꣳश्चा॑वदानी॒यानि॑ च॒र्त्विग्भ्य॒ उप॑ हरन्ति।
अ॒मुमे॒व तैर्लो॒कमन्न॑वन्तं करोति।
सु॒रा॒ग्र॒हाꣳश्चा॑नवदानी॒यानि॑ च वाज॒सृद्भ्यः॑।
इ॒ममे॒व तैर्लो॒कमन्न॑वन्तं करोति।
अथो॑ उ॒भयी᳚ष्वे॒वाभिषि॑च्यते।
वि॒मा॒थं कु॑र्वते वाज॒सृतः॑॥ ४॥

((i̱ndri̱yame̱vāsminne̱tená dadhāti ।
bṛha̱spate̎stvā̱ sāmrā̎jyenā̱bhiṣíñca̱mītyáha ।
brahma̱ vai de̱vānā́m bṛha̱spatiḥ́ ।
brahmáṇai̱vainámа̱bhiṣíñcati ।
so̱ma̱gra̱hām̐ścávadānī̱yāní ca̱rtvigbhya̱ upá haranti
।
a̱mume̱va tairlo̱kamannávantaṃ karoti ।
su̱rā̱gra̱hām̐ścánavadānī̱yāní ca vāja̱sṛdbhyaḥ́ ।
i̱mame̱va tairlo̱kamannávantaṃ karoti ।
athó u̱bhayī̎ṣve̱vābhiṣícyate ।
vi̱mā̱thaṃ kúrvate vāja̱sṛtaḥ́ ॥ 4 ॥))

**[[1-3-8-5]]**

इ॒न्द्रि॒यस्याव॑रुद्ध्यै।
अनि॑रुक्ताभिः प्रातःसव॒ने स्तु॑वते।
अनि॑रुक्तः प्र॒जाप॑तिः।
प्र॒जाप॑तेराप्त्यै᳚।
वाज॑वतीभि॒र्माध्य॑न्दिने।
अन्न॒ं वै वाजः॑।
अन्न॑मे॒वाव॑रुन्धे।
शि॒पि॒वि॒ष्टव॑तीभिस्तृतीयसव॒ने।
य॒ज्ञो वै विष्णुः॑।
प॒शवः॒ शिपिः॑।
य॒ज्ञ ए॒व प॒शुषु॒ प्रति॑तिष्ठति।
बृ॒ह॒दन्त्य॑ं भवति।
अन्त॑मे॒वैनꣳ॒ श्रि॒यै ग॑मयति॥ ५॥
अ॒श्रीया॑द॒न्नस्या॒न्नस्याव॑रुद्ध्या॒ इन्द्र॑स्य त्वा॒

साम्राँज्येनाभिषिंञ्चामीत्याह वाजसृतः शिपिस्त्रीणि च॥ ८॥

((indriyasyāvaruddhyai ।
aniruktābhiḥ prātaḥsavane stuvate ।
aniruktaḥ prajāpatiḥ ।
prajāpaterāptyai ।
vājavatībhirmādhyandine ।
annam vai vājaḥ ।
annamevāvarundhe ।
śipiviṣṭavatībhistṛtīyasavane ।
yajño vai viṣṇuḥ ।
paśavaḥ śipiḥ ।
yajña eva paśuṣu pratitiṣṭhati ।
bṛhadantyam bhavati ।
antamevainam̐ śriyai gamayati ॥ 5 ॥
aśnīyādannasyānnasyāvaruddhyā indrasya tvā sāmrājyenābhiṣiñcāmītyāha vājasṛtaḥ śipistrīṇi ca ॥ 8 ॥))

**[[1-3-9-1]]**

नृषदं त्वेत्याह।
प्रजा वै नृन्।
प्रजानामेवैतेन सूयते।
द्रुषदमित्याह।
वनसपतयो वै द्रु।
वनस्पतीनामेवैतेन सूयते।
भुवनसदमित्याह।
यदा वै वसीयान्भवति।
भुवनमगन्निति वै तमाहुः।
भुवनमेवैतेन गच्छति॥ १॥

((nṛṣadam tvetyāha ।
prajā vai nṝn।
prajānāmevaitena sūyate ।
druṣadamityāha ।
vanasapatayo vai dru ।
vanaspatīnāmevaitena sūyate ।
bhuvanasadamityāha ।
yadā vai vasīyānbhavati ।
bhuvanamagannniti vai tamāhuḥ ।
bhuvanamevaitena gacchati ॥ 1 ॥))

**[[1-3-9-2]]**

अप्सुषदं त्वा घृतसदमित्याह।
अपामेवैतेन घृतस्य सूयते।
व्योमसदमित्याह।
यदा वै वसीयान्भवति।
व्योमागन्निति वै तमाहुः।
व्योमैवैतेन गच्छति।
पृथिविषदं त्वाऽन्तरिक्षसदमित्याह।
एषामेवैतेन लोकानाꣳ सूयते।
तस्माद्वाजपेययाजी न कं चन प्रत्यवरोहति।
अपीव हि देवतानाꣳ सूयते॥ २॥

((apsuṣadam tvā ghṛtasadamityāha ।
apāmevaitena ghṛtasya sūyate ।
vyomasadamityāha ।
yadā vai vasīyānbhavati ।
vyomāgannniti vai tamāhuḥ ।
vyomaivaitena gacchati ।
pṛthiviṣadam tvā'ntarikṣasadamityāha ।
eṣāmevaitena lokānām̐ sūyate ।
tasmādvājapeyayājī na kam cana pratyavarohati ।
apiva hi devatānām̐ sūyate ॥ 2 ॥))

**[[1-3-9-3]]**

नाकसदमित्याह।
यदा वै वसीयान्भवति।
नाकमगन्निति वै तमाहुः।
नाकमेवैतेन गच्छति।
ये ग्रहाः पञ्चजनीना इत्याह।
पञ्चजनानामेवैतेन सूयते।
अपाꣳ रसमुद्वयसमित्याह।
अपामेवैतेन रसस्य सूयते।
सूर्यरश्मिꣳ समाभृतमित्याह सशुक्रत्वाय॥ ३॥
गच्छति सूयते नव च॥ ९॥

((nākasadamityāha ।
yadā vai vasīyānbhavati ।
nākamagannniti vai tamāhuḥ ।
nākamevaitena gacchati ।
ye grahāḥ pañcajanīnā ityāha ।
pañcajanānāmevaitena sūyate ।
apām̐ rasamudvayasamityāha ।
apāmevaitena rasasya sūyate ।
sūryaraśmim̐ samābhṛtamityāha saśukratvāya ॥ 3 ॥
gacchati sūyate nava ca ॥ 9 ॥))

**[[1-3-10-1]]**

इन्द्रो वृत्रꣳ हत्वा।
असुरान्पराभाव्य।
सोऽमावास्यां प्रत्यागच्छत्।

ते पि॒तरः॑ पू॒र्वेद्यु॒राग॑च्छन्।
पि॒तॄन् य॒ज्ञो॑ऽगच्छत्।
तं दे॒वाः पुन॑रयाचन्त।
तमे॓भ्यो॒ न पुन॑रददुः।
ते॓ऽब्रुव॒न्वरं॑ वृणामहै।
अथ॑ व॒ः पुन॑र्दास्यामः।
अ॒स्मभ्य॑मे॒व पू॓र्वे॒द्युः क्रि॑याता॒ इति॑॥ १॥

((indro̍ vr̥̱traṁ ha̱tvā ।
asu̍rānparā̱bhāvya̍ ।
so̍'māvā̱syā̍ṁ pratyāga̍cchat ।
te pi̱tara̍ḥ pūrve̱dyurāga̍cchan ।
pi̱tr̥̄n ya̱jño̍'gacchat ।
taṃ de̱vāḥ puna̍rayācanta ।
tame̎bhyo̱ na puna̍radaduḥ ।
te̎'bruva̱nvaraṃ̍ vr̥ṇāmahai ।
atha̍ va̱ḥ puna̍rdāsyāmaḥ ।
a̱smabhya̍me̱va pū̎rve̱dyuḥ kri̍yātā̱ iti̍ ॥ 1 ॥))

**[[1-3-10-2]]**
तमे॓भ्यः॒ पुन॑रददुः।
तस्मा॓त्पितृ॒भ्यः॑ पूर्वे॒द्युः क्रि॑यते।
यत्पि॑तृ॒भ्यः॑ पूर्वे॒द्युः क॒रोति॑।
पि॒तृभ्य॑ ए॒व तद्य॒ज्ञं नि॒ष्क्रीय॒ यज॑मानः॒ प्रत॑नुते।
सोमा॑य पि॒तृपी॑ताय स्व॒धा नम॒ इत्या॑ह।
पि॒तुरे॒वाधि॑ सोमपी॒थमव॑रुन्धे।
न हि पि॒ता प्र॒मीय॑माण॒ आहै॒ष सोम॑पी॒थ इति॑।
इ॒न्द्रि॒यं वै सोम॑पी॒थः।
इ॒न्द्रि॒यमे॒व सोम॑पी॒थमव॑रुन्धे।
तेने॓न्द्रि॒येण॑ द्वि॒तीया॓ं जा॒याम॒भ्य॑श्नुते॥ २॥

((tame̎bhya̱ḥ puna̍radaduḥ ।
tasmā̎tpi̱tr̥bhya̍ḥ pūrve̱dyuḥ kri̍yate ।
yatpi̱tr̥bhya̍ḥ pūrve̱dyuḥ ka̱roti̍ ।
pi̱tr̥bhya̍ e̱va tadya̱jñaṃ ni̱ṣkrīya̱ yaja̍mānaḥ̱ prata̍nute ।
somā̍ya pi̱tr̥pī̍tāya sva̱dhā nama̱ ityā̍ha ।
pi̱ture̱vādhi̍ somapī̱thamava̍rundhe ।
na hi pi̱tā pra̱mīya̍māṇa̱ āhai̱ṣa so̍mapī̱tha iti̍ ।
i̱ndri̱yaṃ vai so̍mapī̱thaḥ ।
i̱ndri̱yame̱va so̍mapī̱thamava̍rundhe ।
tene̎ndri̱yeṇa̍ dvi̱tīyā̍ṁ jā̱yāma̱bhya̍śnute ॥ 2 ॥))

**[[1-3-10-3]]**
ए॒तद्वै ब्राह्म॑णं पु॒रा वा॑जश्रव॒सा वि॒दाम॑क्रन्न्।
तस्मा॒त्ते द्वेद्वे॑ जा॒ये अ॒भ्या॓क्षत।
य ए॒वं वेद॑।
अ॒भि द्वि॒तीया॓ं जा॒याम॑श्नुते।
अ॒ग्नये॓ कव्य॒वाह॑नाय स्व॒धा नम॒ इत्या॑ह।
य ए॒व पि॑तृ॒णाम॒ग्निः।
तं प्री॑णाति।
ति॒स्र आहु॑तीर्जुहोति।
त्रिर्नि द॑धाति।
षट् संप॑द्यन्ते॥ ३॥

((e̱tadvai brāhma̍ṇaṃ pu̱rā vā̍jaśrava̱sā vi̱dāma̍krann ।
tasmā̱tte dvedve̍ jā̱ye a̱bhyā̎kṣata ।
ya e̱vaṃ veda̍ ।
a̱bhi dvi̱tīyā̍ṁ jā̱yāma̍śnute ।
a̱gnaye̍ kavya̱vāha̍nāya sva̱dhā nama̱ ityā̍ha ।
ya e̱va pi̱tr̥̱ṇāma̱gniḥ ।
taṃ prī̍ṇāti ।
ti̱sra āhu̍tīrjuhoti ।
trirnida̍dhāti ।
ṣaṭ saṃpa̍dyante ॥ 3 ॥))

**[[1-3-10-4]]**
षड्वा ऋ॒तवः॑।
ऋ॒तूने॒व प्री॑णाति।
तू॒ष्णीं मे॑क्ष॒ण॒माद॑धाति।
अस्ति॑ वा॒ हि ष॒ष्ठ ऋ॒तुर्न वा॓।
दे॒वान् वै पि॒तॄन्प्री॒तान्।
म॒नु॒ष्या॓ः पि॒तरो॒ऽनु॒ प्रपि॑पते।
ति॒स्र आहु॑तीर्जुहोति।
त्रिर्नि द॑धाति।
षट् संप॑द्यन्ते।
षड्वा ऋ॒तवः॑॥ ४॥

((ṣa̱ḍvā r̥̱tava̍ḥ ।
r̥̱tūne̱va prī̍ṇāti ।
tū̱ṣṇīṃ mekṣa̍ṇa̱mādā̍dhāti ।
asti̍ vā̱ hi ṣa̱ṣṭha r̥̱turna vā̎ ।
de̱vān vai pi̱tr̥̄nprī̱tān ।
ma̱nu̱ṣyā̎ḥ pi̱taro'nu̱ prapi̍pate ।
ti̱sra āhu̍tīrjuhoti ।
trirnida̍dhāti ।
ṣaṭ saṃpa̍dyante ।
ṣa̱ḍvā r̥̱tava̍ḥ ॥ 4 ॥))

**[[1-3-10-5]]**
ऋ॒तवः॒ खलु॒ वै दे॒वाः पि॒तरः॑।

ऋ॒तूने॒व दे॒वान्पि॒तॄन्प्री॑णाति।
तान्प्री॒तान्।
म॒नु॒ष्याँ॓ः पि॒तरोऽनु॒ प्रपि॑पते।
स॒कृ॒दा॒च्छि॒न्नं ब॒र्हिर्भ॑वति।
स॒कृदि॑व॒ हि पि॒तर॑ः।
त्रिर्नि द॑धाति।
तृ॒तीये॒ वा इ॒तो लो॒के पि॒तर॑ः।
ताने॒व प्री॑णाति।
परा॒ङा॒वर्त॑ते॥ ५॥

((ṛtava̱ḥ khalu̱ vai de̱vāḥ pi̱tara̍ḥ |
ṛtūne̱va de̱vānpi̱tṝnprī̍ṇāti |
tānprī̱tān |
ma̱nu̱ṣyā̐ḥ pi̱taro'nu̱ prapi̍pate |
sa̱kṛ̱dā̱cchi̱nnaṃ ba̱rhirbha̍vati |
sa̱kṛdi̍va̱ hi pi̱tara̍ḥ |
trirnida̍dhāti |
tṛ̱tīye̱ vā i̱to lo̱ke pi̱tara̍ḥ |
tāne̱va prī̍ṇāti |
parā̱ṅā̱va̍rtate || 5 ||))

[[1-3-10-6]]

ह्लीका॒ हि पि॒तर॑ः।
ओष्मणाँ॓ व्या॒वृ॒त उपा॓स्ते।
ऊ॒ष्मभा॑गा॒ हि पि॒तर॑ः।
ब्र॒ह्म॒वा॒दिनो॑ वदन्ति।
प्रा॒श्यां॒३ न प्रा॒श्या॒३मिति॑।
य॒त्प्राँ॓श्नी॒यात्।
जन्य॒मन्न॑मद्या॒त्।
प्र॒मायु॑कः स्यात्।
यन्न प्राँ॓श्नी॒यात्।
अह॑विः स्यात्॥ ६॥

((hlīkā̱ hi pi̱tara̍ḥ |
oṣmaṇō̐ vyā̱vṛta̱ upā̐ste |
ū̱ṣmabhā̍gā̱ hi pi̱tara̍ḥ |
bra̱hma̱vā̱dino̍ vadanti |
prā̱śyā̱ṃ3 na prā̱śyā̱3miti̍ |
ya̱tprā̐śnī̱yāt |
jany̱amanna̍madyāt |
pra̱māyu̍kaḥ syāt |
yanna prā̐śnī̱yāt |
aha̍viḥ syāt || 6 ||))

[[1-3-10-7]]

पि॒तृभ्य॒ आवृ॑श्च्येत।
अ॒व॒घ्रे॒य॑मे॒व।
तन्ने॒व॒ प्रा॒शि॑तं॒ नेवाप्रा॑शितम्।
वी॒रं॒ वा॒ वै पि॒तर॑ः प्र॒य॒न्तो॒ हर॑न्ति।
वी॒रं॒ वा॑ द॒दति।
द॒शां छि॑नत्ति।
हर॑णभागा॒ हि पि॒तर॑ः।
पि॒तॄने॒व नि॒रव॑दयते।
उत्त॑र॒ आयु॑षि॒ लोम॑ छिन्दीत।
पि॒तॄणा॒ꣳ ह्येत॑र्हि॒ नेदी॑यः॥ ७॥

((pi̱tṛbhya̱ āvṛ̍ścyeta |
a̱va̱ghreya̍me̱va |
tanneva̱ prāśi̍ta̱ṃ nevāprā̍śitam |
vīra̱ṃ vā̱ vai pi̱tara̍ḥ pra̱yanto̱ hara̍nti |
vīra̱ṃ vā̍ dadati |
da̱śā̱ṃ chi̍natti |
hara̍ṇabhāgā̱ hi pi̱tara̍ḥ |
pi̱tṝne̱va ni̱rava̍dayate |
utta̍ra̱ āyu̍ṣi̱ loma̍ chindīta |
pi̱tṝ̱ṇā̐ṃ hye̍tarhi̱ nedī̍yaḥ || 7 ||))

[[1-3-10-8]]

नम॑स्करोति।
न॒म॒स्का॒रो हि पि॑तॄ॒णाम्।
नमो॑ वः पितरो॒ रसा॑य।
नमो॑ वः पितर॒ः शु॒ष्मा॑य।
नमो॑ वः पितरो जी॒वाय॑।
नमो॑ वः पितरः स्व॒धायै॑।
नमो॑ वः पितरो म॒न्यवे॑।
नमो॑ वः पितरो घो॒राय॑।
पित॑रो॒ नमो॑ वः।
य ए॒तस्मिँ॓ल्लो॒के स्थ॥ ८॥

((nama̍skaroti |
na̱ma̱skā̱ro hi pi̍tṝ̱ṇām |
namo̍ vaḥ pitaro̱ rasā̍ya |
namo̍ vaḥ pitara̱ḥ śuṣmā̍ya |
namo̍ vaḥ pitaro jī̱vāyā̍ |
namo̍ vaḥ pitaraḥ sva̱dhāyai̍ |
namo̍ vaḥ pitaro ma̱nyave̍ |
namo̍ vaḥ pitaro gho̱rāyā̍ |
pita̍ro̱ namo̍ vaḥ |
ya e̱tasmi̍m̐llo̱ke stha || 8 ||))

[[1-3-10-9]]

युष्माꣳ स्तेऽनु।
येँऽस्मिँल्लोके।
मां तेऽनु।
य एतस्मिँल्लोके स्थ।
यूयं तेषां वसिष्ठा भूयास्त।
येँऽस्मिँल्लोके।
अहं तेषां वसिष्ठो भूयासमित्याह।
वसिष्ठः समानानाँ भवति।
य एवं विद्वान्पितृभ्यः करोति।
एष वै मनुष्याणां यज्ञः॥ ९॥

((yuṣmāṁ ste'nu ।
yẽ'smiṁlloke ।
māṃ te'nu ।
ya etasmiṁlloke stha ।
yūyaṃ teṣāṃ vasiṣṭhā bhūyāsta ।
yẽ'smiṁlloke ।
ahaṃ teṣāṃ vasiṣṭho bhūyāsamityāha ।
vasiṣṭhaḥ samānānāṁ bhavati ।
ya evaṃ vidvānpitṛbhyaḥ karoti ।
eṣa vai manuṣyāṇāṃ yajñaḥ ॥ 9 ॥))

[[1-3-10-10]]

देवानां वा इतरे यज्ञाः।
तेन वा एतत्पितृलोके चरति।
यत्पितृभ्यः करोति।
स ईँश्वरः प्रमेतोः।
प्राजापत्ययर्चा पुनरैति।
यज्ञो वै प्रजापतिः।
यज्ञेनैव सह पुनरैति।
न प्रमायुको भवति।
पितृलोके वा एतद्यजमानश्चरति।
यत्पितृभ्यः करोति।
स ईँश्वर आर्तिमार्तोँः।
प्रजापतिस्त्वा वैनं तत उन्नेतुमर्हतीत्याहुः।
यत्प्राजापत्ययर्चा पुनरैति।
प्रजापतिरेवैनं तत उन्नयति।
नार्तिमार्छति यजमानः॥ १०॥
इत्यश्नुते पद्यन्ते पद्यन्ते षड्वा ऋतवो वर्ततेऽहविः स्यान्नेदीयः स्थ यज्ञो यजमानश्चरति यत्पितृभ्यः करोति पञ्च च॥ १०॥
देवासुरा अग्नीषोमयोर्देवा वै यथा दर्शं देवा वै यदन्यैर्ग्रहैँर्ब्रह्मवादिनो नाग्निष्टोमो न सावित्रं देवस्याहं तार्प्यꣳ सप्तान्नहोमान्नृषदं त्वेन्द्रो वृत्रꣳ हत्वा दश॥ १०॥
देवासुरा वाज्येवैनं तस्माँद्वाजपेययाजी देवस्याहं वाजस्यावरुध्या इन्द्रियमेवास्मिन् ह्लीका हि पितरः पञ्चषष्टिः॥ ६५॥

((devānāṃ vā itare yajñāḥ ।
tena vā etatpitṛloke carati ।
yatpitṛbhyaḥ karoti ।
sa ī̃śvaraḥ prametoḥ ।
prājāpatyayarcā punaraiti ।
yajño vai prajāpatiḥ ।
yajñenaiva saha punaraiti ।
na pramāyuko bhavati ।
pitṛloke vā etadyajamānaścarati ।
yatpitṛbhyaḥ karoti ।
sa ī̃śvara ārtimārtõḥ ।
prajāpatistvā vainaṃ tata unnetumarhatītyāhuḥ ।
yatprājāpatyayarcā punaraiti ।
prajāpatirevainaṃ tata unnayati ।
nārtimārchati yajamānaḥ ॥ 10 ॥
ityaśnute padyante padyante ṣaḍvā ṛtavo vartate'haviḥ syānnedīyaḥ stha yajño yajamānaścarati yatpitṛbhyaḥ karoti pañca ca ॥ 10 ॥
devāsurā agnīṣomayordevā vai yathā darśaṃ devā vai yadanyairgrahaĩrbrahmavādino nāgniṣṭomo na sāvitraṃ devasyāhaṃ tārpyaṁ saptānnahomānnṛṣadaṃ tvendro vṛtraṁ hatvā daśa ॥ 10 ॥
devāsurā vājyevainaṃ tasmā̃dvājapeyayājī devasyāhaṃ vājasyāvaruddhyā indriyamevāsmin hlīkā hi pitaraḥ pañcaṣaṣṭiḥ ॥ 65 ॥))

# Taittirīya-Brāhmaṇa

# Book 1, Chapter 4

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[1-4-1-1]]**

उ॒भये॒ वा ए॒ते प्र॒जाप॑ते॒रध्य॑सृज्यन्त।
दे॒वाश्चासु॑राश्च।
तान्न व्य॑जानात्।
इ॒मे᳚ऽन्य इ॒मे᳚ऽन्य इति॑।
स दे॒वाना॒ꣳ॒ शून॑करोत्।
ताना॒भ्य॑षुणोत्।
तान्प॒वित्रे॑णापुनात्।
तान्प॒रस्ता᳚त्प॒वित्र॑स्य॒ व्य॑गृह्णात्।
ते ग्रहा॑ अभवन्।
तद्ग्रहा॑णां ग्रह॒त्वम्॥ १॥

((u̱bhaye̱ vā e̱te pra̱jāpa̍te̱radhya̍sṛjyanta ।
de̱vāścāsu̍rāśca ।
tānna vya̍jānāt ।
i̱me̎'nya i̱me̎'nya iti̍ ।
sa de̱vāna̱m̐ śūna̍karot ।
tāna̱bhya̍ṣuṇot ।
tānpa̱vitre̍ṇāpunāt ।
tānpa̱rastā̎tpa̱vitra̍sya̱ vya̍gṛhṇāt ।
te graha̍ abhavan ।
tadgraha̍ṇām grahạtvam ॥ 1 ॥))

**[[1-4-1-2]]**

दे॒वता॒ वा ए॒ता यज॑मानस्य गृ॒हे गृ॑ह्यन्ते।
यद्ग्रहा᳚ः।
वि॒दुरे॑नं दे॒वाः।
यस्यै॒वं वि॒दुष॑ ए॒ते ग्रहा॑ गृ॒ह्यन्ते᳚।
ए॒षा वै सोम॒स्याहु॑तिः।
यदु॑पा॒ꣳ॒शुः।
सोमे॑न दे॒वाꣳस्त॑र्पया॒णीति॒ खलु॒ वै सोमे॑न यजते।
यदु॑पा॒ꣳ॒शुं जु॒होति॑।
सोमे॑नै॒व तद्दे॒वाꣳस्त॑र्पयति।
यद्ग्रहा᳚ञ्जु॒होति॑॥ २॥

((de̱vatā̱ vā e̱tā yaja̍mānasya gṛ̱he gṛ̍hyante ।
yadgrahā̎ḥ ।
vi̱dure̍naṃ de̱vāḥ ।
yasyai̱vaṃ vi̱duṣa̍ e̱te graha̍ gṛ̱hyante̎ ।
e̱ṣā vai soma̱syāhu̍tiḥ ।
yadu̍pā̱m̐śuḥ ।
some̍na de̱vām̐sta̍rpayā̱ṇīti̱ khalu̱ vai some̍na yajate ।
yadu̍pā̱m̐śuṃ ju̱hoti̍ ।
some̍nai̱va tadde̱vām̐sta̍rpayati ।
yadgrahā̎ñju̱hoti̍ ॥ 2 ॥))

**[[1-4-1-3]]**

दे॒वा ए॒व तद्दे॒वान्ग॑च्छन्ति।
यच्च॑म॒साञ्जु॒होति॑।
तेनै॒वानु॑रूपे॒ण यज॑मानः सु॒व॒र्गं लो॒कमेति॑।
किं न्वे॑तदग्र॑ आसी॒दित्या॑हुः।
यत्पात्रा॒णीति॑।
इ॒यं वा ए॒तदग्र॑ आसीत्।
मृ॒न्मया॑नि॒ वा ए॒तान्या॑सन्।
तैर्दे॒वा न व्या॒वृत॑मगच्छन्।
त ए॒तानि॑ दारु॒मया॑णि॒ पात्रा᳚ण्यपश्यन्।
तान्य॑कुर्वत॥ ३॥

((de̱vā e̱va tadde̱vānga̍cchanti ।
yacca̍ma̱sāñju̱hoti̍ ।
tenai̱vānu̍rūpe̱ṇa yaja̍mānaḥ suva̱rgaṃ lo̱kameti̍ ।
kiṃ nve̍tadagra̍ āsī̱ditya̍huḥ ।
yatpātrā̱ṇīti̍ ।
i̱yaṃ vā e̱tadagra̍ āsīt ।
mṛ̱nmaya̍ni̱ vā e̱tānya̍san ।
tairde̱vā na vyā̱vṛta̍magacchan ।
ta e̱tāni̍ dāru̱maya̍ṇi̱ pātrā̎ṇyapaśyan ।
tānya̍kurvata ॥ 3 ॥))

**[[1-4-1-4]]**

तैर्वै ते व्या॒वृत॑मगच्छन्।
यद्दा॑रु॒मया॑णि॒ पात्रा॑णि॒ भव॑न्ति।
व्या॒वृत॑मे॒व तैर्यज॑मानो गच्छति।
यानि॑ दा॒रुमया॑णि॒ पात्रा॑णि॒ भव॑न्ति।
अ॒मुमे॒व तैर्लो॒कम॒भिज॑यति।
यानि॑ मृ॒न्मया॑नि।
इ॒ममे॒व तैर्लो॒कम॒भिज॑यति।
ब्र॒ह्म॒वा॒दिनो॑ वदन्ति।
काश्च॑तस्रः स्था॒लीर्वा॑य॒व्याः᳚ सोम॒ग्रह॑णी॒रिति॑।

देवा वै पृश्निमदुह्रन्॥ ४॥

((tairvai te vyāvṛtamagacchan ।
yaddārumayāṇi pātrāṇi bhavanti ।
vyāvṛtameva tairyajamāno gacchati ।
yāni dārumayāṇi pātrāṇi bhavanti ।
amumeva tairlokamabhijayati ।
yāni mṛnmayāni ।
imameva tairlokamabhijayati ।
brahmavādino vadanti ।
kāścatasraḥ sthālīrvāyavyāḥ somagrahaṇīriti ।
devā vai pṛśnimaduhran ॥ 4 ॥))

**[[1-4-1-5]]**

तस्या एते स्तना आसन्।
इयं वै पृश्निः।
तामादित्या आदित्यस्थाल्या चतुष्पदः पशूनदुह्रन्।
यदादित्यस्थाली भवति।
चतुष्पद एव तया पशून् यजमान इमां दुहे।
तामिन्द्र उक्थ्यस्थाल्येन्द्रियमदुहत्।
यदुक्थ्यस्थाली भवति।
इन्द्रियमेव तया यजमान इमां दुहे।
तां विश्वे देवा आग्रयणस्थाल्योर्जमदुह्रन्।
यदाग्रयणस्थाली भवति॥ ५॥

((tasyā ete stanā āsan ।
iyaṃ vai pṛśniḥ ।
tāmādityā ādityasthālyā catuṣpadaḥ paśūnaduhran ।
yadādityasthālī bhavati ।
catuṣpada eva tayā paśūn yajamāna imāṃ duhe ।
tāmindra ukthyasthālyendriyamaduhat ।
yadukthyasthālī bhavati ।
indriyameva tayā yajamāna imāṃ duhe ।
tāṃ viśve devā āgrayaṇasthālyorjamaduhran ।
yadāgrayaṇasthālī bhavati ॥ 5 ॥))

**[[1-4-1-6]]**

ऊर्जमेव तया यजमान इमां दुहे।
तां मनुष्या ध्रुवस्थाल्याऽऽयुरदुह्रन्।
यद्ध्रुवस्थाली भवति।
आयुरेव तया यजमान इमां दुहे।
स्थाल्या गृह्णाति।
वायव्येन जुहोति।
तस्मादन्येन पात्रेण पशून्दुहन्ति।
अन्येन प्रतिगृह्णन्ति।
अथो व्यावृतमेव तद्यजमानो गच्छति॥ ६॥
ग्रहत्वं ग्रहाञ्जुहोत्यकुर्वतादुह्रन्नाग्रयणस्थाली भवति नव च॥ १॥

((ūrjameva tayā yajamāna imāṃ duhe ।
tāṃ manuṣyā dhruvasthālyā''yuraduhran ।
yaddhruvasthālī bhavati ।
āyureva tayā yajamāna imāṃ duhe ।
sthālyā gṛhṇāti ।
vāyavyena juhoti ।
tasmādanyena pātreṇa paśūnduhanti ।
anyena pratigṛhṇanti ।
atho vyāvṛtameva tadyajamāno gacchati ॥ 6 ॥
grahatvaṃ
grahāñjuhotyakurvatāduhrannāgrayaṇasthālī
bhavati nava ca ॥ 1 ॥))

**[[1-4-2-1]]**

युवꣳ सुराममश्विना।
नमुचावाऽसुरे सचा।
विपिपाना शुभस्पती।
इन्द्रं कर्मस्वावतम्।
पुत्रमिव पितरावश्विनोभा।
इन्द्रावतं कर्मणा दꣳसनाभिः।
यत्सुरामं व्यपिबः शचीभिः।
सरस्वती त्वा मघवन्नभीष्णात्।
अहाव्यग्ने हविरास्ये ते।
स्रुचीव घृतं चमू इव सोमः॥ १॥

((yuvam̐ surāmamaśvinā ।
namucāvā'sure sacā ।
vipipānā śubhaspatī ।
indraṃ karmasvāvatam ।
putramiva pitarāvaśvinobhā ।
indrāvataṃ karmaṇā daṃsanābhiḥ ।
yatsurāmaṃ vyapibaḥ śacībhiḥ ।
sarasvatī tvā maghavannabhīṣṇāt।
ahāvyagne havirāsye te ।
srucīva ghṛtaṃ camū iva somaḥ ॥ 1 ॥))

**[[1-4-2-2]]**

वाजसनिꣳ रयिमस्मे सुवीरम्।
प्रशस्तं धेहि यशसं बृहन्तम्।
यस्मिन्नश्वास ऋषभास उक्षणः।
वशा मेषा अवसृष्टास आहुताः।
कीलालपे सोमपृष्ठाय वेधसे।

हृ॒दा म॒तिं ज॑नय॒ चारु॑म॒ग्नये᳚।
नाना॒ हि वां᳚ दे॒वहि॑तꣳ॒ सदो॑ मि॒तम्।
मा सꣳसृ॑क्षाथां पर॒मे व्यो॑मन्।
सुरा॒ त्वमसि॑ शु॒ष्मिणी॒ सोम॑ ए॒षः।
मा मा॑ हिꣳसीः॒ स्वां योनि॑मावि॒शन्॥ २॥

((vā̱ja̱sanim̐ ra̱yima̱sme su̱vīrā̎m |
pra̱śa̱staṃ dhe̍hi ya̱śasa̍ṃ bṛ̱hantā̎m |
yasmi̱nnaśvā̍sa ṛ̱ṣa̱bhāsa̍ u̱kṣa̱ṇa̍ḥ |
vaśā̍ me̱ṣā a̍vasṛ̱ṣṭāsa̱ āhu̍tāḥ |
kī̱lā̱la̱pe somapṛ̍ṣṭhāya ve̱dhase̎ |
hṛ̱dā ma̱tiṃ ja̍naya̱ cāru̍ma̱gnaye̎ |
nānā̱ hi vā̎ṃ de̱vahi̍ta̱m̐ sado̍ mi̱tam |
mā sam̐sṛ̍kṣāthāṃ para̱me vyo̍man |
surā̱ tvamasi̍ śu̱ṣmiṇī̱ soma̍ e̱ṣaḥ |
mā mā̍ him̐sī̱ḥ svāṃ yoni̍māvi̱śan || 2 ||))

**[[1-4-2-3]]**

यदत्र॑ शि॒ष्टꣳ र॒सिन॑ः सु॒तस्य॑।
यदिन्द्रो॒ अपि॑ब॒च्छचीभि॑ः।
अ॒हं तद॑स्य॒ मन॑सा शि॒वेन॑।
सोम॒ꣳ॒ राजा॑नमि॒ह भ॑क्षयामि।
द्वे स्रु॒ती अ॑शृणवं पि॒तृणाम्।
अ॒हं दे॒वाना॑मु॒त मर्त्या॑नाम्।
ताभ्या॑मि॒दं विश्वं॑ भुव॑न॒ꣳ॒ समे॑ति।
अ॒न्त॒रा पूर्व॑मप॑रं च के॒तुम्।
यस्ते॑ देव वरुण गाय॒त्रछ॑न्दा॒ः पाश॑ः।
तं त॑ ए॒तेनाव॑यजे॥ ३॥

((yadatra̍ śi̱ṣṭa̱m̐ ra̱sina̍ḥ su̱tasya̍ |
yadindro̱ api̍ba̱cchaci̍bhiḥ |
a̱haṃ tada̍sya̱ mana̍sā śi̱vena̍ |
soma̱m̐ rāja̍nami̱ha bha̍kṣayāmi |
dve sru̱tī a̍śṛṇavaṃ pi̱tṛ̱ṇām |
a̱haṃ de̱vānā̍mu̱ta martyā̍nām |
tābhyā̍mi̱daṃ viśva̱ṃ bhuva̍na̱m̐ same̍ti |
a̱nta̱rā pūrva̱mapa̍raṃ ca ke̱tum |
yaste̍ deva varu̱ṇa gā̱ya̱trachanda̍ā̱ḥ pāśa̍ḥ |
taṃ ta̍ e̱tenāva̍yaje || 3 ||))

**[[1-4-2-4]]**

यस्ते॑ देव वरुण त्रि॒ष्टुप्छ॑न्दा॒ः पाश॑ः।
तं त॑ ए॒तेनाव॑यजे।
यस्ते॑ देव वरु॒ण जग॑तीछन्दा॒ः पाश॑ः।
तं त॑ ए॒तेनाव॑यजे।

सोमो॒ वा ए॒तस्य॑ रा॒ज्यमाद॑त्ते।
यो राजा॒ सन्रा॒ज्यो वा॒ सोमे॑न॒ यज॑ते।
दे॒व॒सु॒वामे॒तानि॑ ह॒वीꣳषि॑ भवन्ति।
ए॒ताव॑न्तो॒ वै दे॒वानाꣳ॑ स॒वाः।
त ए॒वास्मै॑ स॒वान्प्रय॑च्छन्ति।
त एन॑ं॒ पुन॑ः सुवन्ते रा॒ज्याय॑।
दे॒व॒सू राजा॑ भवति॥ ४॥
सोम॑ आवि॒शन् य॑जे रा॒ज्यायैकं॑ च॥ २॥

((yaste̍ deva varu̱ṇa tri̱ṣṭupcha̍nda̱ḥ pāśa̍ḥ |
taṃ ta̍ e̱tenāva̍yaje |
yaste̍ deva varu̱ṇa jaga̍tīchandā̱ḥ pāśa̍ḥ |
taṃ ta̍ e̱tenāva̍yaje |
somo̱ vā e̱tasya̍ rā̱jyamāda̍tte |
yo rājā̱ sanrā̱jyo vā̱ some̍na̱ yaja̍te |
de̱va̱su̱vāme̱tāni̍ ha̱vīm̐ṣi̍ bhavanti |
e̱tāva̍nto̱ vai de̱vānā̱m̐ sa̱vāḥ |
ta e̱vāsmai̍ sa̱vānpraya̍cchanti |
ta e̍naṃ̱ puna̍ḥ suvante rā̱jyāya̍ |
de̱va̱sū rājā̍ bhavati || 4 ||
soma̍ āvi̱śan ya̍je rā̱jyāyaika̍ṃ ca || 2 ||))

**[[1-4-3-1]]**

उद॑स्थाद्दे॒व्यदि॑ति॒र्विश्व॑रू॒पी।
आयु॑र्य॒ज्ञप॑ताव॒धात्।
इन्द्रा॑य कृ॒ण्व॒ती भा॒गम्।
मि॒त्राय॒ वरु॑णाय च।
इ॒यं वा अ॑ग्नि॒हो॒त्री।
इ॒यं वा ए॒तस्य॒ नि॒षी॑दति।
यस्या᳚ग्नि॒हो॒त्री नि॒षीद॑ति।
तामु॒त्था॑पयेत्।
उद॑स्थाद्दे॒व्यदि॑ति॒रिति॑।
इ॒यं वै दे॒व्यदि॑तिः॥ १॥

((uda̍sthādde̱vyadi̍tirviśvarū̱pī |
āyu̍rya̱jñapa̍tāvadhāt |
indrā̍ya kṛ̱ṇva̱tī bhā̱gam |
mi̱trāya̱ varu̍ṇāya ca |
i̱yaṃ vā a̍gniho̱trī |
i̱yaṃ vā e̱tasya̱ ni̱ṣī̍dati |
yasyā̎gniho̱trī ni̱ṣīda̍ti |
tāmutthā̍payet |
uda̍sthādde̱vyadi̍ti̱riti̍ |
i̱yaṃ vai de̱vyadi̍tiḥ || 1 ||))

**[[1-4-3-2]]**

इ॒मामे॒वास्मा॒ उत्था॑पयति।
आयु॑र्य॒ज्ञप॑तावधा॒दित्या॑ह।
आयु॑रे॒वास्मि॑न्दधाति।
इन्द्रा॑य कृ॒ण्व॒ती भा॒गं मि॒त्राय॒ वरु॑णाय॒ चेत्या॑ह।
य॒था॒ य॒जुरे॒वैतत्।
अव॑र्तिं॒ वा ए॒षैतस्य॑ पा॒प्मानं॑ प्रति॒ख्याय॒ निषी॑दति।
यस्या᳚ग्निहो॒त्र्युप॑सृष्टा नि॒षीद॑ति।
तां दु॒ग्ध्वा ब्रा᳚ह्म॒णाय॑ द॒द्यात्।
यस्या॒न्नं नाद्यात्।
अव॑र्तिमे॒वास्मि॑न्पा॒प्मानं॒ प्रति॑मुञ्चति॥ २॥

((i̱māme̱vāsma̱ utthápayati ।
āyúryaj̱ñapátāvadhā̱dityáha ।
āyúre̱vāsmíndadhāti ।
indráya kr̥̱ṇva̱tī bhāgaṃ mi̱trāya̱ varúṇāya̱ cetyáha ।
ya̱thā̱ ya̱jure̱vaitat ।
avártiṃ̱ vā e̱ṣaitasyá pāpmānaṃ́ prati̱khyāya̱ niṣídati ।
yasyā̈gniho̱tryupásr̥ṣṭā ni̱ṣídati ।
tāṃ du̱gdhvā brā̈hma̱ṇāyá dadyāt ।
yasyānna̱ṃ nādyāt ।
avártime̱vāsmínpā̱pmānaṃ̱ pratímuñcati ॥ 2 ॥))

**[[1-4-3-3]]**

दु॒ग्ध्वा द॑दाति।
न ह्यदृ॑ष्टा॒ दक्षि॑णा दी॒यते᳚।
पृ॒थि॒वीं वा ए॒तस्य॒ पय॒ः प्रवि॑शति।
यस्या᳚ग्निहो॒त्रं दु॒ह्यमा॑न॒ग्ँ॒ स्कन्द॑ति।
यद॒द्य दु॒ग्धं पृ॑थि॒वीमस॑क्त।
यदोष॑धीर॒प्यस॑र॒द्यदाप॑ः।
पयो॑ गृ॒हेषु॒ पयो॑ अघ्नि॒यासु॑।
पयो॑ व॒त्सेषु॒ पयो॑ अस्तु॒ तन्मयीत्या॑ह।
पय॑ ए॒वात्मन्गृ॒हेषु॑ प॒शुषु॑ धत्ते।
अ॒प उप॑सृजति॥ ३॥

((du̱gdhvā dádāti ।
na hyadŕ̥ṣṭā̱ dakṣíṇā dī̱yatë ।
pr̥̱thi̱vīṃ vā e̱tasya̱ paya̱ḥ praviśati ।
yasyā̈gniho̱traṃ du̱hyamāna̱g̃ skandáti ।
yada̱dya du̱gdhaṃ pŕ̥thi̱vīmasákta ।
yadoṣádhīra̱pyasára̱dyadāpáḥ ।
payó gr̥̱heṣu̱ payó aghni̱yāsú ।
payó va̱tseṣu̱ payó astu̱ tanmayītyáha ।
payá e̱vātmangr̥̱heṣú pa̱śuṣú dhatte ।
a̱pa upásr̥jati ॥ 3 ॥))

**[[1-4-3-4]]**

अ॒द्भिरे॒वैन॑दाप्नोति।
यो वै य॒ज्ञस्या॒र्ते॒नाना᳚र्तग्ं स॒ग्ँ॒सृज॑ति।
उ॒भे वै ते त॒र्ह्यार्छ॑तः।
आर्छ॑ति॒ खलु॒ वा ए॒तद॑ग्निहो॒त्रम्।
यद्दु॒ह्यमा॑न॒ग्ँ॒ स्कन्द॑ति।
यद॑भिदु॒ह्यात्।
आर्ते॒नाना᳚र्तं य॒ज्ञस्य॒ स॒ग्ँ॒सृजे॑त्।
तदे॒व या॒दृक्की॒दृक्क॑ होत॒व्या᳚म्।
अथा॒न्यां दु॒ग्ध्वा पुन॑र्होत॒व्या᳚म्।
अना᳚र्तेनै॒वार्तं॑ य॒ज्ञस्य॒ निष्क॑रोति॥ ४॥

((a̱dbhire̱vainádāpnoti ।
yo vai ya̱jñasyārte̱nānā̈rtam̐ sam̐sr̥jatí ।
u̱bhe vai te tarhyārcháta̱ḥ ।
ārcháti̱ khalu̱ vā e̱tadágniho̱tram ।
yaddu̱hyamāna̱g̃ skandáti ।
yadábhidu̱hyāt।
ārte̱nānā̈rtaṃ ya̱jñasya̱ sam̐sr̥jet ।
tade̱va yā̱dr̥kkī̱dr̥kcá hota̱vyä̈m ।
athā̱nyāṃ du̱gdhvā punár hota̱vyä̈m ।
anā̈rtenai̱vārtaṃ́ ya̱jñasya̱ niṣkároti ॥ 4 ॥))

**[[1-4-3-5]]**

य॒द्युद्द्रु॑तस्य॒ स्कन्दे᳚त्।
यत्ततोऽहु॑त्वा॒ पुन॑रे॒यात्।
य॒ज्ञं वि॒च्छि॑न्द्यात्।
यत्र॒ स्कन्दे᳚त्।
तन्नि॒षद्य॒ पुन॑र्गृह्णीयात्।
यत्रै॒व स्कन्द॑ति।
तत॑ ए॒वैन॒त्पुन॑र्गृह्णाति।
तदे॒व या॒दृक्की॒दृक्क॑ होत॒व्या᳚म्।
अथा॒न्यां दु॒ग्ध्वा पुन॑र्होत॒व्या᳚म्।
अना᳚र्तेनै॒वार्तं॑ य॒ज्ञस्य॒ निष्क॑रोति॥ ५॥

((yadyuddrútasya̱ skandë̈t ।
yattato'hútvā̱ punáre̱yāt ।
ya̱jñaṃ vicchíndyāt ।
yatra̱ skandë̈t ।
tanni̱ṣadya̱ punárgr̥hṇīyāt ।
yatrai̱va skandáti ।
tatá e̱vaina̱tpunárgr̥hṇāti ।
tade̱va yā̱dr̥kkī̱dr̥kcá hota̱vyä̈m ।
athā̱nyāṃ du̱gdhvā punár hota̱vyä̈m ।

anā̎rtenai̱vārtaṃ ya̱jñasya̱ niṣka̍roti ‖ 5 ‖))

**[[1-4-3-6]]**

वि वा ए̱तस्य॑ य̱ज्ञश्छि॑द्यते।
यस्या᳚ग्निहो̱त्रे॑ऽधिश्रि॑ते̱ श्वाऽन्त̱रा धाव॑ति।
रु̱द्रः खलु̱ वा ए̱षः।
यद̱ग्निः।
यद्गाम॑न्वत्याव̱र्तये᳚त्।
रु̱द्राय॑ प̱शूनपि॑दध्यात्।
अ̱प̱शुर्यज॑मानः स्यात्।
यद̱पो᳚ऽन्वतिषि̱ञ्चेत्।
अ̱ना̱द्यम॒ग्नेराप॑ः।
अ̱ना̱द्यमा᳚भ्या̱मपि॑दध्यात्।
गार्ह॑पत्या̱द्भस्मा̱दाय॑।
इ̱दं विष्णु̱र्विच॑क्रम̱ इति॑
वैष्ण̱व्यर्चाऽऽह॑व̱नीया᳚द्ध्वꣳसय̱न्नुद्द्र॑वेत्।
य̱ज्ञो वै विष्णु॑ः।
य̱ज्ञेनै̱व य̱ज्ञꣳ संत॑नोति।
भस्म॑ना प̱दमपि॑ वपति̱ शान्त्यै᳚॥ ६॥
वै दे̱व्यदि॑तिर्मुञ्चति सृजति करोति करोत्याभ्या̱मपि॑
दध्या̱त्पञ्च॑ च॥ ३॥

((vi vā e̱tasya̍ ya̱jñaśchi̍dyate ।
yasyā̎gniho̱tre̍'dhiśri̍te̱ śvā'nta̱rā dhāva̍ti ।
ru̱draḥ khalu̱ vā e̱ṣaḥ ।
yada̱gniḥ ।
yadgāma̍nvatyāva̱rtaye̎t ।
ru̱drāya̍ pa̱śūnapi̍dadhyāt ।
a̱paśuryaja̍mānaḥ syāt।
yada̱po̎'nvatiṣi̱ñcet।
a̱nā̱dyama̱gnerāpa̍ḥ ।
a̱nā̱dyamā̎bhyā̱mapi̍dadhyāt ।
gārha̍patyā̱dbhasmā̱dāya̍ ।
i̱daṃ viṣṇu̱rvica̍krama̱ iti̍
vaiṣṇa̱vyarcā''ha̍va̱nīyā̎ddhva̱m̐saya̱nnuddra̍vet ।
ya̱jño vai viṣṇu̍ḥ ।
ya̱jñenai̱va ya̱jña̱m̐ saṃta̍noti ।
bhasma̍nā pa̱damapi̍ vapati̱ śāntyai̎ ‖ 6 ‖
vai de̱vyadi̍tirmuñcati sṛjati karoti karotyābhyā̱mapi̍
dadhyā̱tpañca̍ ca ‖ 3 ‖))

**[[1-4-4-1]]**

नि वा ए̱तस्या॑हव̱नीयो̱ गार्ह॑पत्यं कामयते।
नि गार्ह॑पत्य आहव̱नीय॑म्।
यस्या̱ग्निमनु॑द्धृत̱ꣳ सूर्यो̱ऽभिनि̱म्रोच॑ति।
द̱र्भेण̱ हिर॑ण्यं प्र̱बध्य॑ पु̱रस्ता̎द्धरेत्।
अथा̱ग्निम्।
अथा᳚ग्निहो̱त्रम्।
यद्धिर॑ण्यं पु̱रस्ता̱द्धर॑ति।
ज्योति̱र्वै हिर॑ण्यम्।
ज्योति॑रे̱वैनं॑ पश्य̱न्नुद्धर॑ति।
यद̱ग्निं पूर्व॒ꣳ ह̱रत्यथा᳚ग्निहो̱त्रम्॥ १॥

((ni vā e̱tasyā̍hava̱nīyo̱ gārha̍patyaṃ kāmayate ।
ni gārha̍patya āhava̱nīya̍m ।
yasyā̱gnimanu̍ddhṛta̱m̐ sūryo̱'bhini̱mroca̍ti ।
da̱rbheṇa̱ hira̍ṇyaṃ pra̱badhya̍ pu̱rastā̎ddharet ।
athā̱gnim ।
athā̎gniho̱tram ।
yaddhira̍ṇyaṃ pu̱rastā̱ddhara̍ti ।
jyoti̱rvai hira̍ṇyam ।
jyoti̍re̱vainaṃ̍ paśya̱nnuddha̍rati ।
yada̱gniṃ pūrva̱m̐ hara̱tyathā̎gniho̱tram ‖ 1 ‖))

**[[1-4-4-2]]**

भा̱ग̱धेये॑नै̱वैनं॑ प्रण॑यति।
ब्रा̱ह्म̱ण आर्षे॑य उद्ध॑रेत्।
ब्रा̱ह्म̱णो वै सर्वा॑ दे̱वता॑ः।
सर्वा॑भिरे̱वैनं॑ दे̱वता॑भि̱रुद्ध॑रति।
अ̱ग्नि̱हो̱त्रमु॑प̱साद्यात॒मि॑तोरासीत।
व्र̱तमे̱व ह̱तमनु॑ म्रियते।
अन्तं॑ वा ए̱ष आ̱त्मनो॑ गच्छति।
यस्ताम्य॑ति।
अन्त॑मे̱ष य̱ज्ञस्य॑ गच्छति।
यस्या̱ग्निमनु॑द्धृत̱ꣳ सूर्यो̱ऽभिनि̱म्रोच॑ति॥ २॥

((bhā̱ga̱dheye̍nai̱vainaṃ̱ praṇa̍yati ।
brā̱hma̱ṇa ā̍rṣeya uddha̍ret ।
brā̱hma̱ṇo vai sarvā̍ de̱vatā̎ḥ ।
sarvā̍bhire̱vainaṃ̍ de̱vatā̍bhi̱ruddha̍rati ।
a̱gni̱ho̱tramu̍pa̱sādyātami̍torāsīta ।
vra̱tame̱va ha̱tamanu̍ mriyate ।
anta̱ṃ vā e̱ṣa ā̱tmano̍ gacchati ।
yastāmya̍ti ।
anta̍me̱ṣa ya̱jñasya̍ gacchati ।
yasyā̱gnimanu̍ddhṛta̱m̐ sūryo̱'bhini̱mroca̍ti ‖ 2 ‖))

**[[1-4-4-3]]**

पुन॑ः स̱मन्य॑ जुहोति।

अन्ते॑नै॒वान्तं॑ य॒ज्ञस्य॒ निष्क॑रोति।
वरु॑णो॒ वा ए॒तस्य॑ य॒ज्ञं गृ॑ह्णाति।
यस्या॒ग्निमनु॑द्धृत॒ꣳ॒ सूर्यो॒ऽभिनि॒म्रोच॑ति।
वा॒रु॒णं च॒रुं निर्व॑पेत्।
ते॒नै॒व य॒ज्ञं निष्क्री॑णीते।
नि वा ए॒तस्या॑हव॒नीयो॒ गार्ह॑पत्यं कामयते।
नि गार्ह॑पत्य आहव॒नीय॑म्।
यस्या॒ग्निमनु॑द्धृत॒ꣳ॒ सूर्यो॒ऽभ्युदे॑ति॑।
च॒तु॒र्गृ॒ही॒तमाज्यं॑ पु॒रस्ता॒॑द्धरेत्॥ ३॥

((puna̍ḥ sa̱manya̍ juhoti ।
ante̍nai̱vāntaṁ̍ ya̱jñasya̱ niṣka̍roti ।
varu̍ṇo̱ vā e̱tasya̍ ya̱jñam gṛ̍hṇāti ।
yasyā̱gnimanu̍ddhṛta̱m̐ sūryo̱'bhini̱mroca̍ti ।
vā̱ru̱ṇam ca̱rum nirva̍pet ।
tena̱iva ya̱jñam niṣkrī̍ṇīte ।
ni vā e̱tasyā̍hava̱nīyo̱ gārha̍patyam kāmayate ।
ni gārha̍patya āhava̱nīya̍m ।
yasyā̱gnimanu̍ddhṛta̱m̐ sūryo̱'bhyu̍deti̍ ।
ca̱tu̱rgṛ̱hī̱tamājyaṁ̍ pu̱rastā̍ddharet ॥ 3 ॥))

**[[1-4-4-4]]**

अथा॒ग्निम्।
अथा॑ग्नि॒हो॒त्रम्।
यदाज्यं॑ पु॒रस्ता॒द्धर॑ति।
ए॒तद्वा अ॒ग्नेः प्रि॒यं धाम॑।
यदाज्य॑म्।
प्रि॒येणै॒वैनं॒ धाम्ना॒ सम॑र्धयति।
यद॒ग्निं पूर्व॒ꣳ॒ ह॒र॒त्यथा॑ग्नि॒हो॒त्रम्।
भा॒ग॒धेये॑नै॒वैनं॒ प्रण॑यति।
ब्रा॒ह्म॒ण आर्षे॑य उद्ध॑रेत्।
ब्रा॒ह्म॒णो वै सर्वा॑ दे॒वताः॑॥ ४॥

((athā̱gnim ।
athā̍gniho̱tram ।
yadājyaṁ pu̱rastā̱ddhara̍ti ।
e̱tadvā a̱gneḥ pri̱yam dhāma̍ ।
yadājya̍m ।
pri̱yeṇa̱ivainam̱ dhāmnā̱ sama̍rdhayati ।
yada̱gniṃ pūrva̱m̐ haratyathā̍gniho̱tram ।
bhā̱ga̱dheye̍na̱ivainam̱ praṇa̍yati ।
brā̱hma̱ṇa ā̍rṣeya uddha̍ret ।
brā̱hma̱ṇo vai sarvā̍ de̱vatā̍ḥ ॥ 4 ॥))

**[[1-4-4-5]]**

सर्वा॑भिरे॒वैनं॑ दे॒वता॑भि॒रुद्ध॑रति।
परा॑ची॒ वा ए॒तस्मै॑ व्यु॒च्छन्ती॒ व्यु॑च्छति।
यस्या॒ग्निमनु॑द्धृत॒ꣳ॒ सूर्यो॒ऽभ्यु॑देति॑।
उ॒षाः के॒तुना॑ जुषताम्।
य॒ज्ञं दे॒वेभि॑रि॒न्वि॒तम्।
दे॒वेभ्यो॒ मधु॑मत्तम॒ꣳ॒ स्वाहेति॑ प्र॒त्यङ्ङ्नि॒षद्याज्ये॑न जुहुयात्।
प्र॒ती॒ची॑मे॒वास्मै॒ विवा॑सयति।
अ॒ग्नि॒हो॒त्रमु॑प॒साद्यातमि॑तोरासीत।
व्र॒तमे॒व ह॒तमनु॑ म्रियते।
अन्तं॒ वा ए॒ष आ॒त्मनो॑ गच्छति॥ ५॥

((sarvā̍bhire̱vainaṁ̍ de̱vatā̍bhi̱ruddha̍rati ।
parā̍cī̱ vā e̱tasmai̍ vyu̱cchantī̱ vyu̍cchati ।
yasyā̱gnimanu̍ddhṛta̱m̐ sūryo̱'bhyu̍deti̍ ।
u̱ṣāḥ ke̱tunā̍ ju̱ṣatām ।
ya̱jñam de̱vebhi̍rinvi̱tam ।
de̱vebhyo̱ madhu̍mattama̱m̐ svāheti̍
pra̱tyaṅṅni̱ṣadyājye̍na juhuyāt ।
pra̱tīci̍me̱vāsma̱i vivā̍sayati ।
a̱gni̱ho̱tramu̍pa̱sādyātami̍torāsīta ।
vra̱tame̱va ha̱tamanu̍ mriyate ।
antaṃ̱ vā e̱ṣa ā̱tmano̍ gacchati ॥ 5 ॥))

**[[1-4-4-6]]**

यस्ताम्य॑ति।
अन्त॑मे॒ष य॒ज्ञस्य॑ गच्छति।
यस्या॒ग्निमनु॑द्धृत॒ꣳ॒ सूर्यो॒ऽभ्यु॑देति॑।
पुन॑ः स॒मन्य॑ जुहोति।
अन्ते॑नै॒वान्तं॑ य॒ज्ञस्य॒ निष्क॑रोति।
मि॒त्रो वा ए॒तस्य॑ य॒ज्ञं गृ॑ह्णाति।
यस्या॒ग्निमनु॑द्धृत॒ꣳ॒ सूर्यो॒ऽभ्यु॑देति॑।
मै॒त्रं च॒रुं निर्व॑पेत्।
ते॒नै॒व य॒ज्ञं निष्क्री॑णीते।
यस्या॑हव॒नीये॑ऽनु॑द्वाते॒ गार्ह॑पत्य उ॒द्वाये॑त्॥ ६॥

((yastāmya̍ti ।
anta̍me̱ṣa ya̱jñasya̍ gacchati ।
yasyā̱gnimanu̍ddhṛta̱m̐ sūryo̱'bhyu̍deti̍ ।
puna̍ḥ sa̱manya̍ juhoti ।
ante̍na̱ivāntaṁ̍ ya̱jñasya̱ niṣka̍roti ।
mi̱tro vā e̱tasya̍ ya̱jñam gṛ̍hṇāti ।
yasyā̱gnimanu̍ddhṛta̱m̐ sūryo̱'bhyu̍deti̍ ।
mai̱tram ca̱rum nirva̍pet ।
tena̱iva ya̱jñam niṣkrī̍ṇīte ।
yasyā̍hava̱nīye'nu̍dvāte̱ gārha̍patya u̱dvāye̍t ॥ 6 ॥))

**[[1-4-4-7]]**

यदा॑हव॒नीय॒मनु॑द्वाप्य॒ गार्ह॑पत्यं॒ मन्थे᳚त् ।
विच्छि॑न्द्यात् ।
भ्रातृ॒व्यमस्मै जनयेत् ।
यद्वै य॒ज्ञस्य॑ वास्त॒व्यं॑ क्रि॒यते᳚ ।
तदनु॑ रु॒द्रोऽव॑चरति ।
यत्पूर्व॑मन्वव॒स्येत् ।
वा॒स्त॒व्य॑म॒ग्निमुपा॑सीत ।
रु॒द्रो॑ऽस्य प॒शून्घातु॑कः स्यात् ।
आ॒ह॒व॒नीय॑मु॒द्वाप्य॑ ।
गार्ह॑पत्यं मन्थेत् ॥ ७ ॥

((yadā́hava̱nīya̱manúdvāpya̱ gārhápatya̱ṃ manthḗt ।
vicchíndyāt ।
bhrātṛ̱vyamasmai janayet ।
yadvai ya̱jñasyá vāsta̱vyaṃ́ kri̱yatḗ ।
tadanú ru̱dro'vácarati ।
yatpūrvámanvava̱syet ।
vāsta̱vyáma̱gnimupā́sīta ।
ru̱dró'sya pa̱śūnghātúkaḥ syāt ।
ā̱hava̱nīyámu̱dvāpyá ।
gārhápatyaṃ manthet ॥ 7 ॥))

**[[1-4-4-8]]**

इ॒तः प्र॑थ॒मं ज॑ज्ञे अ॒ग्निः ।
स्वाद्योने॒रधि॑ जा॒तवे॑दाः ।
स गा॑यत्रि॒या त्रि॒ष्टुभा॒ जग॑त्या ।
दे॒वेभ्यो॑ ह॒व्यं व॑हतु प्रजा॒नन्निति॑ ।
छन्दो॑भिरे॒वैन॒ꣳ॒ स्वाद्योने॒ः प्रज॑नयति ।
गार्ह॑पत्यं मन्थति ।
गार्ह॑पत्यं॒ वा अन्वाहि॑ताग्नेः प॒शव॒ उप॑तिष्ठन्ते ।
स यदु॒द्वाय॑ति ।
तदनु॑ प॒शवोऽप॑ क्रामन्ति ।
इ॒षे र॒य्यै र॑मस्व ॥ ८ ॥

((i̱taḥ práthamaṃ jájñe a̱gniḥ ।
svādyone̱radhí jā̱tavédāḥ ।
sa gā́yatri̱yā tri̱ṣṭubhā̱ jagátyā ।
de̱vebhyó ha̱vyaṃ váhatu prajā̱nannití ।
chandóbhire̱vaina̱ꣳ svādyone̱ḥ prajánayati ।
gārhápatyaṃ manthati ।
gārhápatya̱ṃ vā anvāhítāgneḥ pa̱śava̱ upátiṣṭhante
।
sa yadu̱dvāyáti ।
tadanú pa̱śavo'pá krāmanti ।
i̱ṣe ra̱yyai rámasva ॥ 8 ॥))

**[[1-4-4-9]]**

सह॑से द्यु॒म्नाय॑ ।
ऊर्जे॑ पत्या॒येत्या॑ह ।
प॒शवो॒ वै र॒यिः ।
प॒शूने॒वास्मै॑ रमयति ।
सा॒रस्व॒तौ त्वोत्सौ॒ समि॑न्धाता॒मित्या॑ह ।
ऋ॒क्सा॒मे वै सा॑रसव॒तावुत्सौ॑ ।
ऋ॒क्सा॒माभ्या॑मे॒वैन॒ꣳ॒ समि॑न्धे ।
स॒म्राड॑सि वि॒राड॒सीत्या॑ह ।
र॒थ॒न्त॒रं वै स॒म्राट् ।
बृ॒हद्वि॒राट् ॥ ९ ॥

((saháse dyu̱mnāyá ।
ūrje patyā̱yetyā́ha ।
pa̱śavo̱ vai ra̱yiḥ ।
pa̱śūne̱vāsmaí ramayati ।
sā̱rasva̱tau tvotsau̱ samíndhātā̱mityā́ha ।
ṛ̱ksā̱me vai sā́rasava̱tāvutsaú ।
ṛ̱ksā̱mābhyā́me̱vaina̱ꣳ samíndhe ।
sa̱mrāḍ̱ási vi̱rāḍ̱asītyā́ha ।
ra̱tha̱nta̱raṃ vai sa̱mrāṭ ।
bṛ̱hadvi̱rāṭ ॥ 9 ॥))

**[[1-4-4-10]]**

ताभ्या॑मे॒वैन॒ꣳ॒ समि॑न्धे ।
वज्रो॒ वै च॒क्रम् ।
वज्रो॒ वा ए॒तस्य॑ य॒ज्ञं विच्छि॑नत्ति ।
यस्यानो॑ वा॒ रथो॑ वाऽन्त॒राऽग्नी याति॑ ।
आ॒ह॒व॒नीय॑मु॒द्वाप्य॑ ।
गार्ह॑पत्या॒दुद्ध॑रेत् ।
यद॑ग्ने॒ पूर्वं॒ प्रभृ॑तं प॒दꣳ हि ते᳚ ।
सूर्य॑स्य र॒श्मीनन्वा॒तता॑न ।
तत्र॑ रयि॒ष्ठामनु॒ संभ॑रै॒तम् ।
सं नः॑ सृज सु॒मत्या वाज॑व॒त्येति॑ ॥ १० ॥

((tābhyā́me̱vaina̱ꣳ samíndhe ।
vajro̱ vai ca̱kram ।
vajro̱ vā e̱tasyá ya̱jñaṃ vicchínatti ।
yasyānó vā̱ rathó vā'nta̱rā'gnī yātí ।
ā̱hava̱nīyámu̱dvāpyá ।
gārhápatyā̱duddháret ।
yadágne̱ pūrva̱ṃ prabhṛ́taṃ pa̱daꣳ hi tḗ ।

sūryásya ra̱śmīnanvā́ta̱tānā́ |
tatrā́ rayi̱ṣṭhāmanu̱ sa̱mbhára̱itam |
sa̱ṃ náḥ sṛja suma̱tyā vājáva̱tyetí || 10 ||))

**[[1-4-4-11]]**

पूर्वे॑णै॒वास्य॑ य॒ज्ञेन॑ य॒ज्ञमनु॒ सं त॑नोति।
त्वम॑ग्ने स॒प्रथा॑ अ॒सीत्या॑ह।
अ॒ग्निः सर्वा॑ दे॒वताः॑।
दे॒वता॑भिरे॒व य॒ज्ञꣳ सं त॑नोति।
अ॒ग्नये॑ पथि॒कृते॑ पुरो॒डाश॑म॒ष्टाक॑पालं॒ निर्व॑पेत्।
अ॒ग्निमे॒व प॑थि॒कृत॒ꣴ॒ स्वेन॑ भाग॒धेये॒नोप॑ धावति।
स ए॒वैनं॑ य॒ज्ञियं॒ पन्था॒मपि॑ नयति।
अ॒न॒ड्वान्दक्षि॑णा।
व॒ही ह्ये॑ष समृ॑द्ध्यै॥ ११॥
ह॒रत्यथा॑ग्निहो॒त्रं नि॒म्रोच॑ति ह॒रेद्दे॒वता॑
गच्छत्यु॒द्वाये॑न्मन्थेद्रमस्व बृहद्वि॒राडिति॒ नव॑ च॥ ४॥
नि वै पूर्वं॒ त्रीणि॑ नि॒म्रोच॑ति द॒र्भेण॒ यद्धिर॑ण्यमग्निहो॒त्रं
पुन॒र्वरु॑णो वारु॒णं नि वा ए॒तस्या॒भ्युदे॑ति चतुर्गृही॒तमाज्यं॒
यदाज्यं॒ परा॑च्युषाः पुन॒र्मि॑त्रो मै॒त्रं यस्या॑ह॒वनी॑येऽनु॑द्वाते॒
गार्ह॑पत्ये॒ यद्वै मन्थे॒दुद्ध॑रेत्॥

((pūrvéṇa̱ivāsyá ya̱jñená ya̱jñamanu̱ saṃ tánoti |
tvamágne sa̱prathā́ a̱sītyā́ha |
a̱gniḥ sarvā́ de̱vatā́ḥ |
de̱vatā́bhire̱va yajñam̐ saṃ tánoti |
a̱gnayé pathi̱kṛté puro̱ḍā́śáma̱ṣṭā́kápāla̱ṃ nirvápet |
a̱gnime̱va pá̱thi̱kṛta̱m̐ svená bhāga̱dheye̱nopá dhāvati |
sa e̱vainaṃ́ ya̱jñiya̱ṃ panthā̱mapí nayati |
a̱na̱ḍvāndakṣíṇā |
va̱hī hyéṣa samṛ́ddhyai || 11 ||
hara̱tyathā́gnihotra̱ṃ ni̱mrocáti hareddevatā́
gacchatyu̱dvāyénmanthedramasva bṛhadvi̱rāḍiti̱ navá ca || 4 ||
ni vai pūrva̱ṃ trīṇí ni̱mrocáti da̱rbheṇa̱ yaddhiráṇyamagnihotra̱ṃ punarvarúṇo vāru̱ṇaṃ ni vā e̱tasyā̱bhyúdetí caturgṛhī̱tamājya̱ṃ yadājya̱ṃ parā́cyuṣāḥ punármitro ma̱itra̱ṃ yasyā́hava̱nīye'núdvāte̱ gārhápatye̱ yadvai mánthe̱duddháret ||))

**[[1-4-5-1]]**

यस्य॑ प्रातःस॒वने सोमो॑ऽति॒रिच्य॑ते।
माध्य॑न्दिनꣳ॒ सव॑नं का॒मय॑मानो॒ऽभ्यति॑रिच्यते।
गौर्धय॑ति म॒रुता॒मिति॒ धय॑द्वतीषु कुर्वन्ति।
हि॒नस्ति॒ वै स॒न्ध्यधी॑तम्।
स॒न्धीव॒ खलु॒ वा ए॒तत्।
यत्सव॑नस्याति॒रिच्य॑ते।
यद्धय॑द्वतीषु कु॒र्वन्ति॑।
स॒न्धेः शान्त्यै॑।
गा॒य॒त्रꣳ साम॑ भवति पञ्चद॒शः स्तोमः॑।
तेनै॒व प्रा॒तःस॒व॒नान्न य॑न्ति॥ १॥

((yasyá prātaḥsava̱ne somó'ti̱ricyáte |
mādhyándina̱m̐ savánaṃ
ka̱mayámāno̱'bhyatíricyate |
gaurdháyati ma̱rutā̱miti̱ dhayádvatīṣu kurvanti |
hi̱nasti̱ vai sa̱ndhyadhítam |
sa̱ndhīva̱ khalu̱ vā e̱tat |
yatsavánasyāti̱ricyáte |
yaddhayádvatīṣu ku̱rvantí |
sa̱ndheḥ śāntyaí |
gā̱ya̱tram̐ sāmá bhavati pañcada̱śaḥ stomáḥ |
tena̱iva prátaḥsava̱nānna yánti || 1 ||))

**[[1-4-5-2]]**

म॒रुत्व॑तीषु कुर्वन्ति।
तेनै॒व माध्य॑न्दिना॒त्सव॑ना॒न्न य॑न्ति।
होतु॑श्चम॒सम॒नुन्न॑यन्ते।
होताऽनु॑शꣳसति।
म॒ध्यत ए॒व य॒ज्ञꣳ स॒माद॑धाति।
यस्य॑ माध्य॑न्दिने॒ सव॑ने॒ सोमो॑ऽति॒रिच्य॑ते।
आ॒दि॒त्यं तृ॒तीयसव॒नं का॒मय॑मानो॒ऽभ्यति॑रिच्यते।
गौ॒रि॒वीतꣳ॒ साम॑ भवति।
अति॑रिक्तं॒ वै गौरि॑वी॒तम्।
अति॑रिक्तं॒ यत्सव॑नस्याति॒रिच्य॑ते॥ २॥

((ma̱rutvátīṣu kurvanti |
tena̱iva mādhyándinā̱tsavánā̱nna yánti |
hotúścama̱samanunnáyante |
hotā'núśam̐sati |
ma̱dhyata e̱va yajñam̐ sa̱mādádhāti |
yasya̱ mādhyándine̱ saváne̱ somó'ti̱ricyáte |
ā̱di̱tyaṃ tṛ̱tīyasava̱naṃ kā̱mayámāno̱'bhyatíricyate |
gau̱ri̱vītam̐ sāmá bhavati |
atíriktaṃ̱ vai gaúrivī̱tam |
atíriktaṃ̱ yatsavánasyāti̱ricyáte || 2 ||))

**[[1-4-5-3]]**

अति॑रिक्तस्य॒ शान्त्यै॑।
बण्म॒हाꣳ अ॑सि सूर्ये॒ति॑ कुर्वन्ति।
यस्यै॒वादि॒त्यस्य॒ सव॑न॒स्य कामे॑नाति॒रिच्य॑ते।

ते॒नै॒वैनं॒ कामे॑न॒ सम॑र्धयन्ति।
गौ॒रि॒वी॒तꣳ साम॑ भवति।
ते॒नै॒व माध्य॑न्दिना॒त्सव॑ना॒न्न य॑न्ति।
स॒प्त॒द॒शः स्तोम॑ः।
ते॒नै॒व तृ॑तीयसव॒नान्न य॑न्ति।
होतु॑श्चम॒समनून्न॑यन्ते।
होताऽनु॑शꣳसति॥ ३॥

((ati̍riktasya̱ śāntyai̎ |
baṇma̱hām̐ a̍si sū̱ryeti̍ kurvanti |
yasyai̱vādi̱tyasya̱ sava̍na̱sya kāme̍nāti̱ricya̍te |
tenai̱vainaṃ̱ kāme̍na̱ sama̍rdhayanti |
gau̱ri̱vī̱tam̐ sāma̍ bhavati |
tenai̱va mādhya̍ndinā̱tsava̍nā̱nna ya̍nti |
sa̱pta̱da̱śaḥ stoma̍ḥ |
tenai̱va tṛ̍tīyasava̱nānna ya̍nti |
hotu̍ścama̱samanūnna̍yante |
hotā'nu̍śam̐sati || 3 ||))

**[[1-4-5-4]]**

म॒ध्य॒त ए॒व य॒ज्ञꣳ स॒माद॑धाति।
यस्य॑ तृतीयसव॒ने सोमो॑ऽति॒रिच्ये॑त।
उ॒क्थ्यं॑ कुर्वीत।
यस्यो॒क्थ्ये॑ऽति॒रिच्ये॑त।
अ॒ति॒रा॒त्रं कु॑र्वीत।
यस्या॑तिरा॒त्रे॑ऽति॒रिच्य॑ते।
तत्त्वै दु॑ष्प्रज्ञा॒नम्।
यज॑मानं॒ वा ए॒तत्प॒शव॑ आ॒साह्य॑ यन्ति।
बृ॒हत्साम॑ भवति।
बृ॒हद्वा इ॒माँल्लो॒कान्दा॑धार।
बार्ह॑ताः प॒शव॑ः।
बृ॒ह॒तैवास्मै॑ प॒शून्दा॑धार।
शि॒पि॒वि॒ष्टव॑तीषु कुर्वन्ति।
शि॒पि॒वि॒ष्टो वै दे॒वाना॑ं पु॒ष्टम्।
पु॒ष्ट्यै॒वैन॑ꣳ सम॑र्धयन्ति।
होतु॑श्चम॒समनून्न॑यन्ते।
होताऽनु॑शꣳसति।
म॒ध्य॒त ए॒व य॒ज्ञꣳ स॒माद॑धाति॥ ४॥
य॒न्ति॒ सव॑नस्याति॒रिच्य॑ते शꣳसति दाधारा॒ष्टौ च॑॥ ५॥

((ma̱dhya̱ta e̱va ya̱jñam̐ sa̱māda̍dhāti |
yasya̍ tṛ̱tīyasava̱ne somo̍'ti̱ricye̍ta |
u̱kthya̍ṃ kurvīta |
yasyo̱kthye̍'ti̱ricye̍ta |
a̱ti̱rā̱traṃ ku̍rvīta |
yasyā̍tirā̱tre̍'ti̱ricya̍te |
tattvai du̍ṣprajñā̱nam |
yaja̍mānaṃ̱ vā e̱tatpa̱śava̍ ā̱sāhya̍ yanti |
bṛ̱hatsāma̍ bhavati |
bṛ̱hadvā i̱mām̐llo̱kānda̍dhāra |
bārha̍tāḥ pa̱śava̍ḥ |
bṛ̱ha̱taivāsmai̍ pa̱śūnda̍dhāra |
śi̱pi̱vi̱ṣṭava̍tīṣu kurvanti |
śi̱pi̱vi̱ṣṭo vai de̱vānā̍m̐ pu̱ṣṭam |
pu̱ṣṭyai̱vainam̐ sama̍rdhayanti |
hotu̍ścama̱samanūnna̍yante |
hotā'nu̍śam̐sati |
ma̱dhya̱ta e̱va ya̱jñam̐ sa̱māda̍dhāti || 4 ||
ya̱nti̱ sava̍nasyāti̱ricya̍te śam̐sati dādhārā̱ṣṭau ca̍ || 5 ||))

**[[1-4-6-1]]**

ए॒कै॑को॒ वै ज॒नता॑या॒मिन्द्र॑ः।
ए॒कं॒ वा ए॒तावि॒न्द्र॑म॒भि सꣳसु॑नुतः।
यौ द्वौ सꣳसु॒नु॒तः।
प्र॒जाप॑ति॒र्वा ए॒ष वि॒ता॑यते।
य॒द्य॒ज्ञः।
तस्य॒ ग्रावा॑णो॒ दन्ता᳚ः।
अ॒न्य॒त॒रं वा ए॒ते सꣳसु॑न्व॒तोर्नि॒र्बप्स॑ति।
पूर्वे॑णोपसृ॒त्या॑ दे॒वता॒ इत्या॑हुः।
पू॒र्वो॒प॒सृ॒तस्य॒ वै श्रेया᳚न्भवति।
एति॑व॒न्त्याज्या॑नि भवन्त्य॒भिजि॑त्यै॥ १॥

((ekai̍ko̱ vai ja̱natā̍yā̱mindra̍ḥ |
eka̱ṃ vā e̱tāvindra̍ma̱bhi sam̐su̍nutaḥ |
yau dvau sam̐sunu̱taḥ |
pra̱jāpa̍ti̱rvā e̱ṣa vitā̍yate |
yadya̱jñaḥ |
tasya̱ grāvā̍ṇo̱ dantā̎ḥ |
a̱nya̱ta̱raṃ vā e̱te sam̐sunva̱tornirba̍psati |
pūrve̍ṇopa̱sṛtyā̍ de̱vatā̱ ityā̍huḥ |
pū̱rvo̱pa̱sṛ̱tasya̱ vai śreyā̎nbhavati |
eti̍va̱ntyājyā̍ni bhavantya̱bhiji̍tyai || 1 ||))

**[[1-4-6-2]]**

म॒रुत्व॑तीः प्र॒तिप॑दः।
म॒रुतो॒ वै दे॒वाना॒मप॑राजितमा॒यत॑नम्।
दे॒वाना॑मे॒वाप॑राजित आ॒यत॑ने यतते।
उ॒भे बृ॑हद्रथन्त॒रे भ॑वतः।
इ॒यं वाव र॑थन्त॒रम्।

अ॒सौ बृ॒हत्।
आ॒भ्यामे॒वैन॑म॒न्तरे॑ति।
वा॒चश्च॒ मन॑सश्च।
प्रा॒णाच्चा॑पा॒नाच्च॑।
दि॒वश्च॑ पृथि॒व्याश्च॑॥ २॥

((ma̱rutva̍tīḥ prati̱pada̍ḥ |
ma̱ruto̱ vai de̱vānā̱mapa̍rājitamā̱yata̍nam|
de̱vānā̎me̱vāpa̍rājita ā̱yata̍ne yatate |
u̱bhe bṛ̍hadrathanta̱re bha̍vataḥ |
i̱yaṃ vāva ra̍thanta̱ram |
a̱sau bṛ̱hat |
ā̱bhyāme̱vaina̍ma̱ntare̍ti |
vā̱caśca̱ mana̍saśca |
prā̱ṇāccā̍pā̱nācca̍ |
di̱vaśca̍ pṛthi̱vyāśca̍ || 2 ||))

**[[1-4-6-3]]**

सर्व॑स्माद्वि॒त्ताद्वे॒द्या᳚त्।
अ॒भि॒व॒र्तो ब्रह्म॑सा॒मं भ॑वति।
सु॒व॒र्गस्य॑ लो॒कस्या॒भिवृ॑त्त्यै।
अ॒भि॒जिद्भ॑वति।
सु॒व॒र्गस्य॑ लो॒कस्या॒भिजि॑त्यै।
वि॒श्व॒जिद्भ॑वति।
विश्व॑स्य॒ जित्यै᳚।
यस्य॒ भूया॑ꣳसो यज्ञक्र॒तव॒ इत्या॑हुः।
स दे॒वता॑ वृङ्क्त॒ इति॑।
यद्य॑ग्निष्टो॒मः सोम॑ः प॒रस्ता॒त्स्यात्॥ ३॥

((sarva̍smādvi̱ttādvedyā̎t |
a̱bhi̱va̱rto bra̍hmasā̱mam bhava̍ti |
su̱va̱rgasya̍ lo̱kasyā̱bhivṛ̍ttyai |
a̱bhi̱jidbha̍vati |
su̱va̱rgasya̍ lo̱kasyā̱bhiji̍tyai |
vi̱śva̱jidbha̍vati |
viśva̍sya̱ jityai̎ |
yasya̱ bhūyā̎ṃso yajñakra̱tava̱ ityā̎huḥ |
sa de̱vatā̍ vṛṅkta̱ iti̍ |
yadya̍gniṣṭo̱maḥ soma̍ḥ pa̱rastā̱tsyāt || 3 ||))

**[[1-4-6-4]]**

उ॒क्थ्य॑ं कुर्वीत।
य॒द्यु॒क्थ्य॑ः स्यात्।
अ॒ति॒रा॒त्रं कु॑र्वीत।
य॒ज्ञ॒क्र॒तुभि॑रे॒वास्य॑ दे॒वता॑ वृङ्क्ते।
यो वै छन्दो॑भिरभि॒भव॑ति।
स स॑ꣳसुन्व॒तोर॒भिभ॑वति।
सं॒वे॒शाय॑ त्वोपवे॒शाय॒ त्वेत्या॑ह।
छन्दा॑ꣳसि॒ वै सं॑वे॒श उ॑पवे॒शः।
छन्दो॑भिरे॒वास्य॒ छन्दा॑ꣳस्य॒भिभ॑वति।
इ॒ष्ट॒र्गो॒ वा ऋ॒त्विजा॑मध्व॒र्युः॥ ४॥

((u̱kthyaṃ̍ kurvīta |
yadyu̱kthya̍ḥ syāt|
a̱ti̱rā̱traṃ ku̍rvīta |
ya̱jña̱kra̱tubhi̍re̱vāsya̍ de̱vatā̍ vṛṅkte |
yo vai chando̍bhirabhi̱bhava̍ti |
sa sa̍ṃsunva̱tora̱bhibha̍vati |
sa̱ṃve̱śāya̍ tvopave̱śāya̱ tvetyā̍ha |
chandā̎ṃsi̱ vai saṃ̍ve̱śa u̍pave̱śaḥ |
chando̍bhire̱vāsya̱ chandā̎ṃsya̱bhibha̍vati |
i̱ṣṭa̱rgo̱ vā ṛ̱tvijā̎madhva̱ryuḥ || 4 ||))

**[[1-4-6-5]]**

इ॒ष्ट॒र्गः खलु॒ वै पूर्वो॑ऽर्ष्टुः क्षी॑यते।
प्रा॒णा॑पानौ मृ॒त्योर्मा᳚ पा॒तमित्या॑ह।
प्रा॒णा॒पा॒नयो॑रे॒व श्र॑यते।
प्रा॒णा॑पानौ॒ मा मा॑ हासिष्ट॒मित्या॑ह।
नैनं॑ पु॒राऽऽयु॑षः प्राणापा॒नौ ज॑हितः।
आर्ति॑ वा ए॒ते नि॒यन्ति।
येषा᳚ं दीक्षि॒ताना᳚ं प्र॒मीय॑ते।
तं यद॑व॒वर्जे॑युः।
क्रू॒र॒कृता॑मिवैषां लो॒कः स्या᳚त्।
आह॑र द॒हेति॑ ब्रूयात्॥ ५॥

((i̱ṣṭa̱rgaḥ khalu̱ vai pūrvo̱'rṣṭuḥ kṣi̍yate |
prā̱ṇā̍pānau mṛ̱tyormā̍ pāta̱mityā̍ha |
prā̱ṇā̱pā̱nayo̍re̱va śra̍yate |
prā̱ṇā̍pāna̱u mā mā̍ hāsiṣṭa̱mityā̍ha |
naina̍ṃ pu̱rā''yu̍ṣaḥ prā̱ṇā̱pā̱nau ja̍hitaḥ |
ārti̱ṃ vā e̱te niya̍nti |
ye̱ṣā̎ṃ dīkṣi̱tānā̎ṃ pra̱mīya̍te |
ta̱ṃ yada̍va̱varje̍yuḥ |
krū̱ra̱kṛtā̍mivaiṣā̱m lo̱kaḥ syā̎t |
āha̍ra da̱heti̍ brūyāt || 5 ||))

**[[1-4-6-6]]**

तं द॑क्षिण॒तो वेद्यै᳚ नि॒धाय॑।
स॒र्प॒रा॒ज्ञिया॑ ऋ॒ग्भिः स्तु॑युः।
इ॒यं वै स॒र्पतो॑ रा॒ज्ञी᳚।

अ॒स्या ए॒वैन॒न्॒ परि॑ददति।
व्यृ॑द्धं तदित्या॑हुः।
यत्स्तु॒तमन॑नुशस्त॒मिति॑।
होता॑ प्र॒थ॒मः प्रा॑चीनावी॒ती मा॑र्जा॒ली॒यं॒ परी॑यात्।
या॒मीर॑नुब्रु॒वन्।
स॒र्प॒रा॒ज्ञीनाँ॑ कीर्तयेत्।
उ॒भयो॑रे॒वैनं॑ लो॒कयोः॒ परि॑ददति॥ ६॥

((taṃ dakṣiṇato vedyai nidhāya |
sarparājñiyā ṛgbhiḥ stuyuḥ |
iyaṃ vai sarpato rājñī |
asyā evainaṃ paridadati |
vyṛddhaṃ tadityāhuḥ |
yatstutamananuśastamiti |
hotā prathamaḥ prācīnāvītī mārjālīyaṃ pariyāt|
yāmīranubruvan |
sarparājñīnāṃ kīrtayet |
ubhayorevainaṃ lokayoḥ paridadati || 6 ||))

**[[1-4-6-7]]**

अथो॑ धुवन्त्ये॒वैना॑म्।
अथो॒ न्ये॑वास्मै॑ ह्नुवते।
त्रिः परि॑यन्ति।
त्रय॑ इ॒मे लो॒काः।
ए॒भ्य ए॒वैनं॑ लो॒केभ्यो॑ धुवते।
त्रिः पुन॒ः परि॑यन्ति।
षट् संप॑द्यन्ते।
षड्वा ऋ॒तव॑ः।
ऋ॒तुभि॑रे॒वैनं॑ धुवते।
अग्न॒ आयूँ॑ᳪषि पवस॒ इति॑ प्रति॒पदं॑ कुर्वीरन्।
र॒थ॒न्त॒रसा॑मैषा॒ᳪं सोम॑ः स्यात्।
आयु॑रे॒वात्मन्द॑धते।
अथो॑ पा॒प्मान॑मे॒व वि॒जह॑तो यन्ति॥ ७॥
अ॒भिजि॑त्यै पृ॒थि॒व्याश्च॒ स्याद॑ध्व॒र्युर्ब्रू॑याल्लो॒कयोः॒ परि॑ददति
कुर्वीर॒ᳪं स्त्रीणि॑ च॥ ६॥

((atho dhuvantyevaināṃ |
atho nyevāsmai hnuvate |
triḥ pariyanti |
traya ime lokāḥ |
ebhya evainaṃ lokebhyo dhuvate |
triḥ punaḥ pariyanti |
ṣaṭ saṃpadyante |
ṣaḍvā ṛtavaḥ |
ṛtubhirevainaṃ dhuvate |
agna āyūṃṣi pavasa iti pratipadaṃ kurvīran |
rathantarasāmaiṣāṃ somaḥ syāt |
āyurevātmandadhate |
atho pāpmānameva vijahato yanti || 7 ||
abhijityai pṛthivyāśca syādadhvaryurbrūyāllokayoḥ
paridadati kurvīraṃ strīṇi ca || 6 ||))

**[[1-4-7-1]]**

अ॒सु॒र्यं॑ वा ए॒तस्मा॒द्वर्णं॑ कृ॒त्वा।
प॒शवो॑ वी॒र्य॑मप॑क्रामन्ति।
यस्य॑ यूपो॑ वि॒रोह॑ति।
त्वा॒ष्ट्रं ब॑हुरू॒पमाल॑भेत।
त्वष्टा॒ वै रू॒पाणा॑मीशे।
य ए॒व रू॒पाणा॒मीशे॑।
सो॑ऽस्मिन्प॒शून् वी॒र्यं॑ यच्छति।
नास्मा॑त्प॒शवो॑ वी॒र्य॑मप॑ क्रामन्ति।
आर्ति॑ं वा ए॒ते नि॒य॑न्ति।
येषा॑ं दीक्षि॒ताना॑म॒ग्निरु॒द्वाय॑ति॥ १॥

((asuryaṃ vā etasmādvarṇaṃ kṛtvā |
paśavo vīryamapakrāmanti |
yasya yūpo virohati |
tvāṣṭraṃ bahurūpamālabheta |
tvaṣṭā vai rūpāṇāmīśe |
ya eva rūpāṇāmīśe |
so'sminpaśūn vīryaṃ yacchati |
nāsmātpaśavo vīryamapa krāmanti |
ārtiṃ vā ete niyanti |
yeṣāṃ dīkṣitānāmagnirudvāyati || 1 ||))

**[[1-4-7-2]]**

यदा॑ह॒व॒नीय॑ उ॒द्वाये॑त्।
यत्तं मन्थे॑त्।
विच्छि॑न्द्यात्।
भ्रातृ॑व्यमस्मै जनयेत्।
यदा॑ह॒वनीय॑ उ॒द्वाये॑त्।
आग्नी॑ध्रादु॒द्धरे॑त्।
यदाग्नी॑ध्र उ॒द्वाये॑त्।
गार्ह॑पत्यादु॒द्धरे॑त्।
यद्गार्ह॑पत्य उ॒द्वाये॑त्।
अत॑ ए॒व पुन॒र्मन्थे॑त्॥ २॥

((yadāhavanīya udvāyet |
yattaṃ manthet |

vicchi̍ndyāt ।
bhrātṛ̍vyamasmai janayet ।
yadā̍havanī̱ya̍ u̱dvāyē̎t ।
āgnī̎ddhrā̱duddha̍ret ।
yadāgnī̎ddhra u̱dvāyē̎t ।
gārha̍patyā̱duddha̍ret ।
yadgārha̍patya u̱dvāyē̎t ।
ata̍ e̱va puna̍rmanthet ॥ 2 ॥))

**[[1-4-7-3]]**

अत्र॒ वाव स निल॑यते।

यत्र॒ खलु॒ वै निली॑नमुत्त॒मं पश्य॑न्ति।

तदे॑नमिच्छन्ति।

यस्मा॒द्दारो॑रु॒द्वाये॑त्।

तस्या॒रणिं॑ कुर्यात्।

क्रु॒मु॒कमपि॑ कुर्यात्।

ए॒षा वा अ॒ग्नेः प्रि॒या त॒नूः।

यत्क्रु॑मु॒कः।

प्रि॒य॒यै॒वैनं॑ त॒नुवा॒ सम॑र्धयति।

गार्ह॑पत्यं मन्थति॥ ३॥

((atra̱ vāva sa nila̍yate ।
yatra̱ khalu̱ vai nilī̍namutta̱mam̐ paśya̍nti ।
tade̍namicchanti ।
yasmā̱ddāro̍ru̱dvāyē̎t ।
tasyā̱raṇi̍ṃ kuryāt ।
kru̱mu̱kamapi̍ kuryāt ।
e̱ṣā vā a̱gneḥ pri̱yā ta̱nūḥ ।
yatkru̍mu̱kaḥ ।
pri̱ya̱yai̱vainam̐ ta̱nuvā̱ sama̍rdhayati ।
gārha̍patyaṃ manthati ॥ 3 ॥))

**[[1-4-7-4]]**

गार्ह॑पत्यो॒ वा अ॒ग्नेर्योनिः॑।

स्वादे॒वैनं॒ योने॒र्जनयति।

नास्मै॒ भ्रातृ॑व्यं जनयति।

यस्य॒ सोम॑ उप॒दस्ये॑त्।

सु॒वर्ण॒ꣳ॒ हिर॑ण्यं द्वे॒धा वि॒च्छिद्य॑।

ऋ॒जी॒षे॑ऽन्यदा॑ धूनु॒यात्।

जु॒हु॒याद॒न्यत्।

सोम॑मे॒वाभिषु॒णोति॑।

सोमं॑ जुहोति।

सोम॑स्य॒ वा अ॑भिषू॒यमा॑णस्य प्रि॒या त॒नूरुद॑क्रामत्॥ ४॥

((gārha̍patyo̱ vā a̱gneryoni̍ḥ ।
svāde̱vainaṃ̱ yone̎rjanayati ।
nāsmai̱ bhrātṛ̍vyaṃ janayati ।
yasya̱ soma̍ upa̱dasyē̎t ।
su̱varṇa̱ꣳ̱ hira̍ṇyaṃ dve̱dhā vi̱cchidya̍ ।
ṛ̱jī̱ṣē̎'nyadā̍ dhūnu̱yāt ।
ju̱hu̱yāda̱nyat ।
somā̍me̱vābhi̍ṣu̱ṇoti̍ ।
soma̍ṃ juhoti ।
soma̍sya̱ vā a̍bhiṣū̱yamā̍ṇasya pri̱yā
ta̱nūruda̍krāmat ॥ 4 ॥))

**[[1-4-7-5]]**

तत्सु॒वर्ण॒ꣳ॒ हिर॑ण्यमभवत्।

यत्सु॒वर्ण॒ꣳ॒ हिर॑ण्यं कु॒र्वन्ति॑।

प्रि॒य॒यै॒वैनं॑ त॒नुवा॒ सम॑र्धयन्ति।

यस्याक्री॑त॒ꣳ॒ सोम॑मप॒हरे॑युः।

क्री॒णी॒यादे॒व।

सैव त॒तः प्राय॑श्चित्तिः।

यस्य॑ क्री॒तम॑प॒हरे॑युः।

आ॒दा॒राꣳश्च॑ फाल्गु॒नानि॑ चा॒भिषु॑णुयात्।

गा॒य॒त्री यꣳ सो॒ममाह॑रत्।

तस्य॒ योऽꣳ॑शुः प॒राऽप॑तत्॥ ५॥

((tatsu̱varṇa̱ꣳ̱ hira̍ṇyamabhavat ।
yatsu̱varṇa̱ꣳ̱ hira̍ṇyaṃ ku̱rvanti̍ ।
pri̱ya̱yai̱vainam̐ ta̱nuvā̱ sama̍rdhayanti ।
yasyākrī̍ta̱ꣳ̱ soma̍mapa̱hare̍yuḥ ।
krī̱ṇī̱yāde̱va ।
saiva ta̱taḥ prāya̍ścittiḥ ।
yasya̍ krī̱tama̍pa̱hare̍yuḥ ।
ā̱dā̱rāꣳśca̍ phālgu̱nāni̍ cā̱bhiṣu̍ṇuyāt ।
gā̱ya̱trī yaꣳ soma̱māha̍rat ।
tasya̱ yo'ꣳ̍śuḥ pa̱rā'pa̍tat ॥ 5 ॥))

**[[1-4-7-6]]**

त आ॑दा॒रा अ॑भवन्।

इन्द्रो॑ वृ॒त्रम॑हन्।

तस्य॑ व॒ल्कः परा॑ऽपतत्।

तानि॑ फाल्गु॒नान्य॑भवन्।

प॒शवो॒ वै फा॑ल्गु॒नानि॑।

प॒शवः॒ सोमो॒ राजा॑।

यदा॑दा॒राꣳश्च॑ फाल्गु॒नानि॑ चाभिषु॒णोति॑।

सोम॑मे॒व राजा॑नम॒भिषु॑णोति।

शृ॒तेन॑ प्रातःसव॒ने श्री॑णीयात्।

द॒ध्ना म॒ध्यन्दि॑ने॥ ६॥

((ta ā̍dā̱rā ā̍bhavan |
indro̍ vṛ̱tramā̍han |
tasya̍ va̱lkaḥ parā̍'patat |
tāni̍ phālgu̱nānya̍bhavan |
pa̱śavo̱ vai phā̎lgu̱nāni̍ |
pa̱śava̱ḥ somo̱ rājā̎ |
yadā̍dā̱rām̐śca̍ phālgu̱nāni̍ cābhiṣu̱ṇoti̍ |
somā̍me̱va rājā̍nama̱bhiṣu̍ṇoti |
śṛ̱tena̍ prātaḥsava̱ne śrī̍ṇīyāt |
da̱dhnā ma̱dhyandi̍ne || 6 ||))

**[[1-4-7-7]]**

नी॒त॒मि॒श्रेण॑ तृतीयसव॒ने।
अ॒ग्नि॒ष्टो॒मः सोम॑ः स्याद्रथन्त॒रसा॑मा।
य ए॒वर्त्विजो॑ वृ॒ताः स्युः।
त ए॑नं याजयेयुः।
एका॒ं गां दक्षि॒णां दद्या॒त्तेभ्य॑ ए॒व।
पुन॒ः सोम॑ं क्रीणीयात्।
य॒ज्ञेनै॒व तद्य॒ज्ञमि॑च्छति।
सैव त॒तः प्राय॑श्चित्तिः।
सर्वा᳚भ्यो॒ वा ए॒ष दे॒वता᳚भ्यः सर्वे᳚भ्यः पृ॒ष्ठेभ्य॑
आ॒त्मान॒मागु॑रते।
यः स॒त्त्राया॑गु॒रते᳚।
ए॒तावा॒न्खलु॒ वै पुरु॑षः।
याव॑दस्य वि॒त्तम्।
स॒र्व॒वे॒द॒सेन॑ यजेत।
सर्व॑पृष्ठोऽस्य॒ सोम॑ः स्यात्।
सर्वा᳚भ्य ए॒व दे॒वता᳚भ्यः सर्वे᳚भ्यः पृ॒ष्ठेभ्य॑ आ॒त्मान॒ं
निष्क्री॑णीते॥ ७॥
उ॒द्वाय॑ति मन्थेन्मन्थत्यक्रामत्प॒राऽप॑तन्म॒ध्यन्दि॑न
आगु॒रते॒ पञ्च॑ च॥ ७॥

((nī̱ta̱mi̱śreṇa̍ tṛtīyasava̱ne |
a̱gni̱ṣṭo̱maḥ soma̍ḥ syādrathanta̱rasā̍mā |
ya e̱vartvijo̍ vṛ̱tāḥ syuḥ |
ta e̍naṃ yājayeyuḥ |
ekā̱ṃ gāṃ dakṣi̱ṇāṃ dadyā̱ttebhya̍ e̱va |
puna̱ḥ soma̍ṃ krīṇīyāt |
ya̱jñenai̱va tadya̱jñami̍cchati |
saiva ta̱taḥ prāya̍ścittiḥ |
sarvā̎bhyo̱ vā e̱ṣa de̱vatā̎bhyaḥ sarve̎bhyaḥ
pṛ̱ṣṭhebhya̍ ā̱tmāna̱māgu̍rate |
yaḥ sa̱ttrāyā̍gu̱rate̎ |
e̱tāvā̱nkhalu̱ vai puru̍ṣaḥ |
yāva̍dasya vi̱ttam |
sa̱rva̱ve̱da̱sena̍ yajeta |
sarva̍pṛ̱ṣṭho'sya̱ soma̍ḥ syāt|
sarvā̎bhya e̱va de̱vatā̎bhya̱ḥ sarve̎bhyaḥ pṛ̱ṣṭhebhya̍
ā̱tmāna̱ṃ niṣkrī̍ṇīte || 7 ||
u̱dvāya̍ti
manthenmanthatyakrāmatpa̱rā'pa̍tanma̱dhyandi̍na
āgu̱rate̱ pañca̍ ca || 7 ||))

**[[1-4-8-1]]**

पव॑मान॒ः सु॒वर्ज॑न॑ः।
प॒वित्रे॑ण॒ विच॑र्षणिः।
यः पोता॒ स पु॑नातु मा।
पु॒नन्तु॑ मा देवज॒नाः।
पु॒नन्तु॒ मन॑वो धि॒या।
पु॒नन्तु॒ विश्व॑ आ॒यव॑ः।
जात॑वेदः प॒वित्र॑वत्।
प॒वित्रे॑ण पुनाहि मा।
शु॒क्रेण॑ दे॒व दीद्य॑त्।
अग्ने॒ क्रत्वा॒ क्रतू॒ꣳरनु॑॥ १॥

((pava̍māna̱ḥ su̱varjana̍ḥ |
pa̱vitre̍ṇa̱ vica̍rṣaṇiḥ |
yaḥ potā̱ sa pu̍nātu mā |
pu̱nantu̍ mā devaja̱nāḥ |
pu̱nantu̱ mana̍vo dhi̱yā |
pu̱nantu̱ viśva̍ ā̱yava̍ḥ |
jāta̍vedaḥ pa̱vitra̍vat |
pa̱vitre̍ṇa punāhi mā |
śu̱kreṇa̍ deva̱ dīdya̍t |
agne̱ kratvā̱ kratū̱m̐rana̍ || 1 ||))

**[[1-4-8-2]]**

यत्ते॑ प॒वित्र॑म॒र्चिषि॑।
अग्ने॒ वित॑तमन्त॒रा।
ब्रह्म॒ तेन॑ पुनीमहे।
उ॒भाभ्या᳚ं देव सवितः।
प॒वित्रे॑ण स॒वेन॑ च।
इ॒दं ब्रह्म॑ पुनीमहे।
वै॒श्वदे॒वी पु॑नती दे॒व्यागा᳚त्।
यस्यै᳚ ब॒ह्वीस्त॒नुवो॑ वी॒तपृ॑ष्ठाः।
तया॒ मद॑न्तः सध॒ माद्ये॑षु।
व॒यꣳ स्या॑म॒ पत॑यो र॒यी॒णाम्॥ २॥

((yatte̍ pa̱vitra̍ma̱rciṣi̍ |
agne̱ vita̍tamanta̱rā |

brahma̱ tena̍ punīmahe ।
u̱bhābhyā̎m̐ deva savitaḥ ।
pa̱vitre̍ṇa sa̱vena̍ ca ।
i̱daṃ brahma̍ punīmahe ।
vai̱śva̱de̱vī pu̍na̱tī de̱vyāgā̎t ।
yasyai̍ ba̱hvīsta̱nuvo̍ vī̱tapṛ̍ṣṭhāḥ ।
tayā̱ mada̍ntaḥ sadha̱ mādye̍ṣu ।
va̱yam̐̎ syā̍ma̱ pata̍yo rayī̱ṇām ॥ 2 ॥))

**[[1-4-8-3]]**

वै॒श्वा॒न॒रो र॒श्मिभि॒र्मा॑ पुनातु ।
वात॑ः प्रा॒णेने॑षि॒रो म॑यो॒भूः ।
द्यावा॑पृथि॒वी पय॑सा॒ पयो॑भिः ।
ऋ॒ताव॑री य॒ज्ञिये॑ मा पुनीताम् ।
बृ॒हद्भि॑ः सवित॒स्तृभि॑ः ।
वर्षि॑ष्ठैर्दे॒व मन्म॑भिः ।
अग्ने॒ दक्षै᳚ः पुनाहि मा ।
येन॑ दे॒वा अपु॑नत ।
येनापो॑ दि॒व्यं कश॑ः ।
तेन॑ दि॒व्येन॒ ब्रह्म॑णा ॥ ३ ॥

((vai̱śvā̱na̱ro ra̱śmibhi̍rmā punātu ।
vāta̍ḥ prā̱ṇene̍ṣi̱ro ma̍yo̱bhūḥ ।
dyāvā̍pṛthi̱vī paya̍sā̱ payo̍bhiḥ ।
ṛ̱tāva̍rī ya̱jñiye̍ mā punītām।
bṛ̱hadbhi̍ḥ savita̱stṛbhi̍ḥ ।
varṣi̍ṣṭhairdeva̱ manma̍bhiḥ ।
agne̱ dakṣai̎ḥ punāhi mā ।
yena̍ de̱vā apu̍nata ।
yenāpo̍ di̱vyaṃ kaśa̍ḥ ।
tena̍ di̱vyena̱ brahma̍ṇā ॥ 3 ॥))

**[[1-4-8-4]]**

इ॒दं ब्रह्म॑ पुनीमहे ।
यः पा॑वमा॒नीर॒ध्येति॑ ।
ऋषि॑भि॒ः संभृ॑त॒ꣳ रस᳚म् ।
सर्व॒ꣳ स पू॒तम॑श्नाति ।
स्व॒दि॒तं मा॑त॒रिश्व॑ना ।
पा॒व॒मा॒नीर्यो॑ अ॒ध्येति॑ ।
ऋषि॑भि॒ः संभृ॑त॒ꣳ रस᳚म् ।
तस्मै॒ सर॑स्वती दुहे ।
क्षी॒रꣳ स॒र्पिर्मधू॑द॒कम् ।
पा॒व॒मा॒नीः स्व॒स्त्यय॑नीः ॥ ४ ॥

((i̱daṃ brahma̍ punīmahe ।
yaḥ pa̍vamā̱nīra̱dhyeti̍ ।
ṛṣi̍bhi̱ḥ saṃbhṛ̍ta̱m̐ rasa̎m ।
sarva̱m̐ sa pū̱tama̍śnāti ।
sva̱di̱taṃ mā̍ta̱riśva̍nā ।
pā̱va̱mā̱nīryo a̱dhyeti̍ ।
ṛṣi̍bhi̱ḥ saṃbhṛ̍ta̱m̐ rasa̎m ।
tasmai̱ sara̍svatī duhe ।
kṣī̱ram̐ sa̱rpirmadhū̍da̱kam ।
pā̱va̱mā̱nīḥ sva̱styaya̍nīḥ ॥ 4 ॥))

**[[1-4-8-5]]**

सु॒दुघा॒ हि पय॑स्वतीः ।
ऋषि॑भि॒ः संभृ॑तो॒ रस॑ः ।
ब्रा॒ह्म॒णेष्व॒मृत॑ꣳ हि॒तम् ।
पा॒व॒मा॒नीर्दि॑शन्तु नः ।
इ॒मं लो॒कमथो॑ अ॒मुम् ।
कामा॒न्त्सम॑र्धयन्तु नः ।
दे॒वीर्दे॒वैः स॒माभृ॑ताः ।
पा॒व॒मा॒नीः स्व॒स्त्यय॑नीः ।
सु॒दुघा॒ हि घृ॑त॒श्चुत॑ः ।
ऋषि॑भि॒ः संभृ॑तो॒ रस॑ः ॥ ५ ॥

((su̱dughā̱ hi paya̍svatīḥ ।
ṛṣi̍bhi̱ḥ saṃbhṛ̍to̱ rasa̍ḥ ।
brā̱hma̱ṇeṣva̱mṛta̍m̐ hi̱tam ।
pā̱va̱mā̱nīrdi̍śantu naḥ ।
i̱maṃ lo̱kamatho̍ a̱mum ।
kāmā̱ntsama̍rdhayantu naḥ ।
de̱vīrde̱vaiḥ sa̱mābhṛ̍tāḥ ।
pā̱va̱mā̱nīḥ sva̱styaya̍nīḥ ।
su̱dughā̱ hi ghṛ̍ta̱ścuta̍ḥ ।
ṛṣi̍bhi̱ḥ saṃbhṛ̍to̱ rasa̍ḥ ॥ 5 ॥))

**[[1-4-8-6]]**

ब्रा॒ह्म॒णेष्व॒मृत॑ꣳ हि॒तम् ।
येन॑ दे॒वाः प॒वित्रे॑ण ।
आ॒त्मान॑ं पु॒नते॒ सदा᳚ ।
तेन॑ स॒हस्र॑धारेण ।
पा॒व॒मा॒न्यः॑ पुनन्तु मा ।
प्रा॒जा॒प॒त्यं प॒वित्र᳚म् ।
श॒तोद्या॑मꣳ हि॒र॒ण्मय᳚म् ।
तेन॑ ब्रह्म॒विदो॑ व॒यम् ।
पू॒तं ब्रह्म॑ पुनीमहे ।
इन्द्र॑ः सुनी॒ती स॒ह मा॑ पुनातु ।

सोम॑ः स्व॒स्त्या वरु॑णः स॒मीच्या᳚।
य॒मो राजा᳚ प्रमृ॒णाभि॑ः पुनातु मा।
जा॒तवे॑दा मो॒र्जय॑न्त्या पुनातु॥ ६॥
अनु॑ र॒यीणां ब्रह्म॑णा स्व॒स्त्यय॑नीः सु॒दुघा॒ हि घृ॒तश्चु॒त
ऋ॒षिभि॑ः संभृ॑तो॒ रस॑ः पुनातु॒ त्रीणि॑ च॥ ८॥

((brā̱hma̱ṇe̱ṣva̱mṛta̍m̐ hi̱tam |
yena̍ de̱vāḥ pa̱vitre̍ṇa |
ā̱tmāna̍m pu̱nate̱ sadā᳚ |
tena̍ sa̱hasra̍dhāre̱ṇa |
pā̱va̱mā̱nya̍ḥ pu̍nantu mā |
prā̱jā̱pa̱tya̍m pa̱vitra̎m |
śa̱todyā̍ma̍m̐ hira̱ṇmaya̎m |
tena̍ brahma̱vido̍ va̱yam |
pū̱ta̍m brahma̍ punīmahe |
indra̍ḥ sunī̱tī sa̱ha mā̍ punātu |
soma̍ḥ sva̱styā varu̍ṇaḥ sa̱mīcyā᳚ |
ya̱mo rājā᳚ pramṛ̱ṇābhi̍ḥ punātu mā |
jā̱tave̍dā mo̱rjaya̍ntyā punātu || 6 ||
anu̍ ra̱yī̱ṇāṃ brahma̍ṇā sva̱styaya̍nīḥ su̱dughā̱ hi
ghṛ̱ta̱ścu̱ta̱ ṛ̱ṣibhi̱ḥ saṃbhṛ̍to̱ rasa̍ḥ punātu̱ trīṇi̍ ca ||
8 ||))

**[[1-4-9-1]]**

प्र॒जा वै स॒त्रमा॑सत त॒पस्तप्य॑माना॒ अजु॑ह्वतीः।
दे॒वा अ॑पश्यञ्च॒मसं॑ घृ॒तस्य॑ पू॒र्णꣳ स्व॒धाम्।
तमु॒पोद॑तिष्ठ॒न्तम॑जुह्वुः।
तेना᳚र्धमा॒स ऊ॒र्जम॒वा॑रुन्धत।
तस्मा॑दर्धमा॒से दे॒वा ई॑ज्यन्ते।
पि॒तरो॑ऽपश्यञ्च॒मसं॑ घृ॒तस्य॑ पू॒र्णꣳ स्व॒धाम्।
तमु॒पोद॑तिष्ठ॒न्तम॑जुह्वुः।
तेन॑ मा॒स्यू॒र्जम॒वा॑रुन्धत।
तस्मा᳚न्मा॒सि पि॒तृभ्य॑ः क्रियते।
म॒नु॒ष्या॑ अपश्यञ्च॒मसं॑ घृ॒तस्य॑ पू॒र्णꣳ स्व॒धाम्॥ १॥

((pra̱jā vai sa̱trama̍sata̱ ta̱pastapya̍mānā̱ aju̍hvatīḥ |
de̱vā a̍paśyañcama̱saṃ ghṛ̱tasya̍ pū̱rṇa̍m̐ sva̱dhām |
tamu̱poda̍tiṣṭha̱ntama̍juhavuḥ |
tenā᳚rdhamā̱sa ūrja̱mavā̍rundhata |
tasmā̍dardhamā̱se de̱vā i̍jyante |
pi̱taro̍'paśyañcama̱saṃ ghṛ̱tasya̍ pū̱rṇa̍m̐ sva̱dhām |
tamu̱poda̍tiṣṭha̱ntama̍juhavuḥ |
tena̍ mā̱syūrja̱mavā̍rundhata |
tasmā̎nmā̱si pi̱tṛbhya̍ḥ kriyate |
ma̱nu̱ṣyā̍ apaśyañcama̱saṃ ghṛ̱tasya̍ pū̱rṇa̍m̐
sva̱dhām || 1 ||))

**[[1-4-9-2]]**

तमु॒पोद॑तिष्ठ॒न्तम॑जुह्वुः।
तेन॑ द्व॒यीमू॒र्जम॒वा॑रुन्धत।
तस्मा᳚द्द्विर॒ह्नो म॑नु॒ष्ये᳚भ्य॒ उप॑ ह्रियते।
प्रा॒तश्च॑ सा॒यं च॑।
प॒शवो॑ऽपश्यञ्च॒मसं॑ घृ॒तस्य॑ पू॒र्णꣳ स्व॒धाम्।
तमु॒पोद॑तिष्ठ॒न्तम॑जुह्वुः।
तेन॑ त्र॒यीमू॒र्जम॒वा॑रुन्धत।
तस्मा᳚त्त्रिर॒ह्नः प॒शव॒ः प्रेर॑ते।
प्रा॒तः स॑ङ्ग॒वे सा॒यम्।
असु॑रा अपश्यञ्च॒मसं॑ घृ॒तस्य॑ पू॒र्णꣳ स्व॒धाम्॥ २॥

((tamu̱poda̍tiṣṭha̱ntama̍juhavuḥ |
tena̍ dva̱yīmūrja̱mavā̍rundhata |
tasmā̱ddvirahno̍ manu̱ṣye̎bhya̱ upa̍ hriyate |
prā̱taśca̍ sā̱yaṃ ca̍ |
pa̱śavo̍'paśyañcama̱saṃ ghṛ̱tasya̍ pū̱rṇa̍m̐ sva̱dhām
|
tamu̱poda̍tiṣṭha̱ntama̍juhavuḥ |
tena̍ tra̱yīmūrja̱mavā̍rundhata |
tasmā̱ttrirahna̍ḥ pa̱śava̱ḥ prera̍te |
prā̱taḥ sa̍ṅga̱ve sā̱yam |
asu̍rā apaśyañcama̱saṃ ghṛ̱tasya̍ pū̱rṇa̍m̐ sva̱dhām
|| 2 ||))

**[[1-4-9-3]]**

तमु॒पोद॑तिष्ठ॒न्तम॑जुह्वुः।
तेन॑ संवत्स॒र ऊ॒र्जम॒वा॑रुन्धत।
ते दे॒वा अ॑मन्यन्त।
अ॒मी वा इ॒दम॑भूवन्।
यद्व॒यꣳस्म इति॑।
त ए॒तानि॑ चातुर्मा॒स्यान्य॑पश्यन्।
तानि॒ निर॑वपन्।
तैरे॒वैषां॒ तामू॒र्जा॑मवृञ्जत।
ततो॑ दे॒वा अभ॑वन्।
परा॑ऽसु॑राः॥ ३॥

((tamu̱poda̍tiṣṭha̱ntama̍juhavuḥ |
tena̍ sa̱ṃvatsa̱ra ūrja̱mavā̍rundhata |
te de̱vā a̍manyanta |
a̱mī vā i̱dama̍bhūvan |
yadva̱ya̍m̐sma iti̍ |
ta e̱tāni̍ cāturmā̱syānya̍paśyan |
tāni̱ nira̍vapan |
taire̱vaiṣā̱m tāmūrjā̍mavṛñjata |
tato̍ de̱vā abha̍van |

parā'súrāḥ || 3 ||))

**[[1-4-9-4]]**
यद्यज॑ते।
यामे॒व दे॒वा ऊर्ज॑म॒वारु॑न्धत।
तां तेनाव॑रुन्धे।
यत्पि॒तृभ्यः॑ क॒रोति॑।
यामे॒व पि॒तर॒ ऊर्ज॑म॒वारु॑न्धत।
तां तेनाव॑रुन्धे।
यदा॑वस॒थेऽन्न॒ꣳ॒ हर॑न्ति।
यामे॒व म॑नु॒ष्या॑ ऊर्ज॑म॒वारु॑न्धत।
तां तेनाव॑रुन्धे।
यद्दक्षि॑णां॒ ददा॑ति॥ ४॥

((yadyajáte |
yāme̱va de̱vā ūrjáma̱vārúndhata |
tāṃ tenāvárundhe |
yatpi̱tṛbhyáḥ ka̱rotí |
yāme̱va pi̱tara̱ ūrjáma̱vārúndhata |
tāṃ tenāvárundhe |
yadávasa̱the'nna̱m̐ haránti |
yāme̱va mánu̱ṣyá ūrjáma̱vārúndhata |
tāṃ tenāvárundhe |
yaddakṣíṇā̱ṃ dadáti || 4 ||))

**[[1-4-9-5]]**
यामे॒व प॒शव॒ ऊर्ज॑म॒वारु॑न्धत।
तां तेनाव॑रुन्धे।
यच्चा॑तुर्मा॒स्यैर्यज॑ते।
यामे॒वासु॑रा॒ ऊर्ज॑म॒वारु॑न्धत।
तां तेनाव॑रुन्धे।
भव॑त्या॒त्मना᳚।
परा᳚ऽस्य॒ भ्रातृ॑व्यो भवति।
वि॒राजो॒ वा ए॒षा विक्रा᳚न्तिः।
यच्चा॑तुर्मा॒स्यानि॑।
वै॒श्व॒दे॒वेना॒स्मिँल्लो॒के प्रत्य॑तिष्ठत्।
व॒रु॒ण॒प्र॒घा॒सैर॒न्तरि॑क्षे।
सा॒क॒मे॒धैर॒मुष्मिँ॑ल्लो॒के।
ए॒ष ह॒त्वावै तत्सर्वं॑ भवति।
य ए॒वं वि॒द्वाꣳश्चा॑तुर्मा॒स्यैर्यज॑ते॥ ५॥
म॒नु॒ष्या॑ अपश्यञ्चम॒सं घृ॒तस्य॑ पू॒र्णꣳ स्व॒धामसु॑रा
अपश्यञ्चम॒सं घृ॒तस्य॑ पू॒र्णꣳ स्व॒धामसु॑रा॒
ददा᳚त्यतिष्ठच्च॒त्वारि॑ च॥ ९॥

((yāme̱va pa̱śava̱ ūrjáma̱vārúndhata |
tāṃ tenāvárundhe |
yaccáturmā̱syairyajáte |
yāme̱vāsúrā̱ ūrjáma̱vārúndhata |
tāṃ tenāvárundhe |
bhavátyā̱tmanā̎ |
parā̎'sya̱ bhrātṛ́vyo bhavati |
vi̱rājo̱ vā e̱ṣā vikrā̎ntiḥ |
yaccáturmā̱syāní |
vai̱śva̱de̱venā̱smim̐llo̱ke pratyátiṣṭhat |
va̱ru̱ṇa̱pra̱ghā̱saiṟa̱ntarikṣe |
sā̱ka̱me̱dhaiṟa̱muṣmím̐llo̱ke |
e̱ṣa ha̱tvāvai tatsarvaṃ́ bhavati |
ya e̱vaṃ vi̱dvām̐ścáturmā̱syairyajáte || 5 ||
ma̱nu̱ṣyá apaśyañcama̱saṃ ghṛ̱tasyá pū̱rṇam̐̎
sva̱dhāmasúrā apaśyañcama̱saṃ ghṛ̱tasyá pū̱rṇam̐̎
sva̱dhāmasúrā̱ dadā̎tyatiṣṭhacca̱tvārí ca || 9 ||))

**[[1-4-10-1]]**
अ॒ग्निर्वाव सं॑वत्स॒रः।
आ॒दि॒त्यः प॑रिवत्स॒रः।
च॒न्द्रमा॑ इदावत्स॒रः।
वा॒युर॑नुवत्स॒रः।
यद्वै᳚श्वदे॒वेन॒ यज॑ते।
अ॒ग्निमे॒व तत्सं॑वत्स॒रमा᳚प्नोति।
तस्मा᳚द्वैश्वदे॒वेन॒ यज॑मानः।
सं॒व॒त्स॒रीणा॒ꣳ॒ स्व॒स्तिमाशा᳚स्त॒ इत्याशा᳚सीत।
यद्व॑रुणप्रघा॒सैर्यज॑ते।
आ॒दि॒त्यमे॒व तत्प॑रिवत्स॒रमा᳚प्नोति॥ १॥

((a̱gnirvāva saṃ́vatsa̱raḥ |
ā̱di̱tyaḥ párivatsa̱raḥ |
ca̱ndramá idāvatsa̱raḥ |
vā̱yuránuvatsa̱raḥ |
yadvai̎śvade̱vena̱ yajáte |
a̱gnime̱va tatsaṃ́vatsa̱ramā̎pnoti |
tasmā̎dvaiśvade̱vena̱ yajámānaḥ |
sa̱ṃva̱tsa̱rīṇā̱m̐ sva̱stimāśā́sta̱ ityāśā̎sīta |
yadváruṇapraghā̱sairyajáte |
ā̱di̱tyame̱va tatpárivatsa̱ramā̎pnoti || 1 ||))

**[[1-4-10-2]]**
तस्मा᳚द्वरुणप्रघा॒सैर्यज॑मानः।
प॒रि॒व॒त्स॒रीणा॒ꣳ॒ स्व॒स्तिमाशा᳚स्त॒ इत्याशा᳚सीत।
यत्सा॑कमे॒धैर्यज॑ते।

च॒न्द्रम॑समे॒व तदि॑दावत्स॒रमा᳚प्नोति।
तस्मा᳚त्साकमे॒धैर्यज॑मानः।
इ॒दा॒वत्स॒रीणा॓ᳫ् स्व॒स्तिमाशा᳚स्त॒ इत्याशा॑सीत।
यत्पि॑तृय॒ज्ञेन॒ यज॑ते।
दे॒वाने॒व तद॒न्ववस्यति।
अथ॒ वा अ॑स्य वा॒युश्चा॑नुवत्स॒रश्चाप्री॑ता॒वुच्छि॑ष्येते।
यच्छु॑नासी॒रीये॑ण॒ यज॑ते॥ २॥

((tasmā̎dvaruṇapraghā̠sairyaja̍mānaḥ ।
pari̠vatsa̠rīṇā̎ṁ sva̠stimāśā̎sta̠ ityāśa̍sīta ।
yatsa̍kame̠dhairyaja̍te ।
ca̠ndrama̍same̠va tadi̍dāvatsa̠ramā̎pnoti ।
tasmā̎tsākame̠dhairyaja̍mānaḥ ।
i̠dāva̠tsa̠rīṇā̎ṁ sva̠stimāśā̎sta̠ ityāśa̍sīta ।
yatpi̍tṛya̠jñena̠ yaja̍te ।
de̠vāne̠va tada̠nvava̍syati ।
atha̠ vā a̍sya vā̠yuśca̍nuvatsa̠raścāprī̍tā̠vucchi̍ṣyete ।
yacchu̍nāsī̠rīye̍ṇa̠ yaja̍te ॥ 2 ॥))

**[[1-4-10-3]]**

वा॒युमे॒व तद॑नुवत्स॒रमा᳚प्नोति।
तस्मा᳚च्छुनासी॒रीये॑ण॒ यज॑मानः।
अ॒नु॒वत्स॒रीणा॓ᳫ् स्व॒स्तिमाशा᳚स्त॒ इत्याशा॑सीत।
सं॒व॒त्स॒रं वा ए॒ष ई᳚प्स॒तीत्या॑हुः।
यश्चा᳚तुर्मा॒स्यैर्यज॑त॒ इति॑।
ए॒ष ह॒ त्वै सं॑वत्स॒रमा᳚प्नोति।
य ए॒वं वि॒द्वाᳫ्श्चा᳚तुर्मा॒स्यैर्यज॑ते।
विश्वे॑ दे॒वाः सम॑यजन्त।
ते᳚ऽग्निमे॒वाय॑जन्त।
त ए॒तं लो॒कम॑जयन्॥ ३॥

((vā̠yume̠va tada̍nuvatsa̠ramā̎pnoti ।
tasmā̎cchunāsī̠rīye̍ṇa̠ yaja̍mānaḥ ।
a̠nu̠va̠tsa̠rīṇā̎ṁ sva̠stimāśā̎sta̠ ityāśa̍sīta ।
sa̠ṃva̠tsa̠raṃ vā e̠ṣa ī̎psa̠tītya̍huḥ ।
yaścā̎turmā̠syairyaja̍ta̠ iti̍ ।
e̠ṣa ha̠ tvai sa̍ṃvatsa̠ramā̎pnoti ।
ya e̠vaṃ vi̠dvāṁścā̎turmā̠syairyaja̍te ।
viśve̍ de̠vāḥ sama̍yajanta ।
te̎'gnime̠vāya̍janta ।
ta e̠taṃ lo̠kama̍jayan ॥ 3 ॥))

**[[1-4-10-4]]**

यस्मि॑न्न॒ग्निः।
यद्वै᳚श्वदे॒वेन॒ यज॑ते।
ए॒तमे॒व लो॒कं ज॑यति।
यस्मि॑न्न॒ग्निः।
अ॒ग्नेरे॒व सायु॑ज्य॒मुपै॑ति।
य॒दा वै᳚श्वदे॒वेन॒ यज॑ते।
अथ॑ संवत्स॒रस्य॑ गृ॒हप॑तिमाप्नोति।
य॒दा सं॑वत्स॒रस्य॑ गृ॒हप॑तिमा॒प्नोति॑।
अथ॑ सहस्रया॒जिन॑माप्नोति।
य॒दा स॑हस्रया॒जिन॑मा॒प्नोति॑॥ ४॥

((yasmi̍nna̠gniḥ ।
yadvai̎śvade̠vena̠ yaja̍te ।
e̠tame̠va lo̠kaṃ ja̍yati ।
yasmi̍nna̠gniḥ ।
a̠gnere̠va sāyu̍jya̠mupai̍ti ।
ya̠dā vai̎śvade̠vena̠ yaja̍te ।
atha̍ saṃvatsa̠rasya̍ gṛ̠hapa̍timāpnoti ।
ya̠dā sa̍ṃvatsa̠rasya̍ gṛ̠hapa̍timā̠pnoti̍ ।
atha̍ sahasrayā̠jina̍māpnoti ।
ya̠dā sa̍hasrayā̠jina̍mā̠pnoti̍ ॥ 4 ॥))

**[[1-4-10-5]]**

अथ॑ गृहमे॒धिन॑माप्नोति।
य॒दा गृ॑हमे॒धिन॑मा॒प्नोति॑।
अथा॒ग्निर्भ॑वति।
य॒दाऽग्निर्भव॑ति।
अथ॒ गौर्भ॑वति।
ए॒षा वै वै᳚श्वदे॒वस्य॒ मात्रा᳚।
ए॒तद्वा ए॒तेषा॑मव॒मम्।
अतो॑ऽतो॒ वा उत्त॑राणि॒ श्रेया॓ᳫ्सि भवन्ति।
यद्विश्वे॑ दे॒वाः स॒मय॑जन्त।
तद्वै᳚श्वदे॒वस्य॑ वैश्वदे॒वत्वम्॥ ५॥

((atha̍ gṛ̠hame̠dhina̍māpnoti ।
ya̠dā gṛ̍hame̠dhina̍mā̠pnoti̍ ।
athā̠gnirbha̍vati ।
ya̠dā'gnirbhava̍ti ।
atha̠ gaurbha̍vati ।
e̠ṣā vai vai̎śvade̠vasya̠ mātrā̎ ।
e̠tadvā e̠teṣā̍mava̠mam ।
ato̍'to̠ vā utta̍rāṇi̠ śreyā̎ṁsi bhavanti ।
yadviśve̍ de̠vāḥ sa̠maya̍janta ।
tadvai̎śvade̠vasya̍ vaiśvade̠vatvam ॥ 5 ॥))

**[[1-4-10-6]]**

अथा॑दि॒त्यो व॑रु॒ण॒ᳫ् राजा॑नं वरुणप्रघा॒सैर॑यजत।

स ए॒तं लो॒कम॑जयत्।
यस्मि॑न्नादि॒त्यः।
यद्व॑रुणप्रघा॒सैर्य॒जते॑।
ए॒तमे॒व लो॒कं ज॑यति।
यस्मि॑न्नादि॒त्यः।
आ॒दि॒त्यस्यै॒व सायु॑ज्य॒मुपै॑ति।
यदा॑दि॒त्यो वरु॑ण॒ꣳ राजा॑नं वरुणप्रघा॒सैरय॑जत।
तद्व॑रुणप्रघा॒साना॑ꣳ वरुणप्रघास॒त्वम्।
अथ॒ सोमो॒ राजा॒ छन्दा॑ꣳसि साकमे॒धैरय॑जत॥ ६॥

((athā̍di̱tyo varu̍ṇa̱m̐ rājā̍naṃ
varuṇapraghā̱sairā̍yajata ।
sa e̱taṃ lo̱kamā̍jayat।
yasmi̍nnādi̱tyaḥ ।
yadvā̍ruṇapraghā̱sairyajā̍te ।
e̱tame̱va lo̱kaṃ jā̍yati ।
yasmi̍nnādi̱tyaḥ ।
ā̱di̱tyasyai̱va sāyu̍jya̱mupai̍ti ।
yadā̍di̱tyo varu̍ṇa̱m̐ rājā̍naṃ
varuṇapraghā̱sairayā̍jata ।
tadvā̍ruṇapraghā̱sānā̍m̐ varuṇapraghāsa̱tvam ।
atha̱ somo̱ rājā̱ chandā̍m̐si sākame̱dhairā̍yajata ॥ 6 ॥))

**[[1-4-10-7]]**

स ए॒तं लो॒कम॑जयत्।
यस्मि॒ꣳश्च॒न्द्रमा॑ वि॒भाति॑।
यत्सा॑कमे॒धैर्य॒जते॑।
ए॒तमे॒व लो॒कं ज॑यति।
यस्मि॒ꣳश्च॒न्द्रमा॑ वि॒भाति॑।
च॒न्द्रम॑स ए॒व सायु॑ज्य॒मुपै॑ति।
सोमो॒ वै च॒न्द्रमाः॑।
ए॒ष ह॒ त्वै सा॒क्षात्सोम॑ं भक्षयति।
य ए॒वं वि॒द्वान्त्सा॑कमे॒धैर्य॒जते॑।
यत्सोम॑श्च राजा॒ छन्दा॑ꣳसि च स॒मैध॑न्त॥ ७॥

((sa e̱taṃ lo̱kamā̍jayat ।
yasmi̱m̐ścā̱ndramā̍ vi̱bhāti̍ ।
yatsā̍kame̱dhairyajā̍te ।
e̱tame̱va lo̱kaṃ jā̍yati ।
yasmi̱m̐ścā̱ndramā̍ vi̱bhāti̍ ।
ca̱ndramā̍sa e̱va sāyu̍jya̱mupai̍ti ।
somo̱ vai ca̱ndramā̍ḥ ।
e̱ṣa ha̱ tvai sā̱kṣātsoma̍ṃ bhakṣayati ।
ya e̱vaṃ vi̱dvāntsā̍kame̱dhairyajā̍te ।
yatsomā̍śca̱ rājā̱ chandā̍m̐si ca sa̱maidhā̍nta ॥ 7 ॥))

**[[1-4-10-8]]**

तत्सा॑कमे॒धाना॑ꣳ साकमे॒ध॒त्वम्।
अथ॒र्तवः॑ पि॒तरः॑ प्र॒जाप॑तिं पि॒तरं॑ पितृय॒ज्ञेना॑यजन्त।
त ए॒तं लो॒कम॑जयन्।
यस्मि॑न्नृ॒तवः॑।
यत्पि॑तृय॒ज्ञेन॒ यज॑ते।
ए॒तमे॒व लो॒कं ज॑यति।
यस्मि॑न्नृ॒तवः॑।
ऋ॒तूना॒मे॒व सायु॑ज्य॒मुपै॑ति।
यदृ॒तवः॑ पि॒तरः॑ प्र॒जाप॑तिं पि॒तरं॑ पितृय॒ज्ञेनाय॑जन्त।
तत्पि॑तृय॒ज्ञस्य॑ पितृयज्ञ॒त्वम्॥ ८॥

((tatsā̍kame̱dhānā̍m̐ sākamedha̱tvam ।
atha̱rtavā̍ḥ pi̱tarā̍ḥ pra̱jāpā̍tiṃ pi̱tara̍ṃ
pitṛya̱jñenā̍yajanta ।
ta e̱taṃ lo̱kamā̍jayan ।
yasmi̍nnṛ̱tavā̍ḥ ।
yatpi̍tṛya̱jñena̱ yajā̍te ।
e̱tame̱va lo̱kaṃ jā̍yati ।
yasmi̍nnṛ̱tavā̍ḥ ।
ṛ̱tūnā̱meva sāyu̍jya̱mupai̍ti ।
yadṛ̱tavā̍ḥ pi̱tarā̍ḥ pra̱jāpā̍tiṃ pi̱tara̍ṃ
pitṛya̱jñenāyā̍janta ।
tatpi̍tṛya̱jñasyā̍ pitṛyajña̱tvam ॥ 8 ॥))

**[[1-4-10-9]]**

अथौष॑धय इ॒मं दे॒वं त्र्यम्ब॑कैरयजन्त॒ प्रथे॑म॒हीति॑।
तता॒ वै ता अप्र॑थन्त।
य ए॒वं वि॒द्वाꣳस्त्र्यम्ब॑कै॒र्य॒जते॑।
प्रथ॑ते प्र॒जया॑ प॒शुभिः॑।
अथ॑ वा॒युः पर॑मे॒ष्ठिन॑ꣳ शुनासी॒रीये॑णायजत।
स ए॒तं लो॒कम॑जयत्।
यस्मि॑न्वा॒युः।
यच्छु॑नासी॒रीये॑ण॒ यज॑ते।
ए॒तमे॒व लो॒कं ज॑यति।
यस्मि॑न्वा॒युः॥ ९॥

((athauṣā̍dhaya i̱maṃ de̱vaṃ tryā̍mbakairayajanta̱
prathe̍ma̱hīti̍ ।
tato̱ vai tā ā̍prathanta ।
ya e̱vaṃ vi̱dvām̐stryā̍mbakai̱ryajā̍te ।
prathā̍te pra̱jayā̍ pa̱śubhi̍ḥ ।
athā̍ vā̱yuḥ pā̍rame̱ṣṭhina̍m̐ śunāsī̱rīye̍ṇāyajata ।
sa e̱taṃ lo̱kamā̍jayat ।

yasminvāyuḥ ।
yacchunāsīrīyeṇa yajate ।
etameva lokaṃ jayati ।
yasminvāyuḥ ॥ 9 ॥))

**[[1-4-10-10]]**

वायोरेव सायुज्यमुपैति।
ब्रह्मवादिनो वदन्ति।
प्र चातुर्मास्ययाजी मीयता३ न प्रमीयता३ इति।
जीवन्वा एष ऋतूनप्येति।
यदि वसन्ता प्रमीयते।
वसन्तो भवति।
यदि ग्रीष्मे ग्रीष्मः।
यदि वर्षासु वर्षाः।
यदि शरदि शरत्।
यदि हेमन् हेमन्तः।
ऋतुर्भूत्वा संवत्सरमप्येति।
संवत्सरः प्रजापतिः।
प्रजापतिर्वावैषः॥ १०॥
परिवत्सरमाप्नोति शुनासीरीयेण
यजतेऽजयन्त्सहस्रयाजिनमाप्नोति वैश्वदेवत्वꣳ
साकमेधैरयजत समैधन्त पितृयज्ञत्वं जयति
यस्मिन्वायुर्हेमन्तस्त्रीणि च॥ १०॥
उभये युवꣳ सुराममुदस्थान्नि वै यस्य प्रातःसवन
एकैकोऽसुयं पवमानः प्रजा वै सत्रमासताग्निर्वाव
संवत्सरो दश॥ १०॥
उभये वा उदस्थात्सर्वाभिर्मध्यतोऽत्र वाव ब्राह्मणेष्वथ
गृहमेधिनꣳ षट्षष्टिः॥ ६६॥

((vāyoreva sāyujyamupaiti ।
brahmavādino vadanti ।
pra cāturmāsyayājī mīyatā3 na pramīyatā3 iti ।
jīvanvā eṣa ṛtūnapyeti ।
yadi vasantā pramīyate ।
vasanto bhavati ।
yadi grīṣme grīṣmaḥ ।
yadi varṣāsu varṣāḥ ।
yadi śaradi śarat ।
yadi heman hemantaḥ ।
ṛturbhūtvā saṃvatsaramapyeti ।
saṃvatsaraḥ prajāpatiḥ ।
prajāpatirvāvaiṣaḥ ॥ 10 ॥
parivatsaramāpnoti śunāsīrīyeṇa
yajate'jayantsahasrayājinamāpnoti vaiśvadevatvam̐
sākamedhairayajata samaidhanta pitṛyajñatvaṃ
jayati yasminvāyurhemantastrīṇi ca ॥ 10 ॥
ubhaye yuvam̐ surāmamudasthānni vai yasya
prātaḥsavana ekaiko'suryaṃ pavamānaḥ prajā vai
satramāsatāgnirvāva saṃvatsaro daśa ॥ 10 ॥
ubhaye vā udasthātsarvābhirmadhyato'tra vāva
brāhmaṇeṣvatha gṛhamedhinam̐ ṣaṭṣaṣṭiḥ ॥ 66 ॥))

# Taittirīya-Brāhmaṇa
# Book 1, Chapter 5

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[1-5-1-1]]**

अ॒ग्नेः कृत्ति॑काः।
शु॒क्रं प॒रस्ता॒ज्ज्योति॑र॒वस्ता᳚त्।
प्र॒जाप॑ते रोहि॒णी।
आप॑ः प॒रस्ता॒दोष॑धयो॒ऽवस्ता᳚त्।
सोम॑स्येन्व॒का वित॑तानि।
प॒रस्ता॒द्वय॑न्तो॒ऽवस्ता᳚त्।
रु॒द्रस्य॑ बा॒हू।
मृ॒ग॒यव॑ः प॒रस्ता᳚द्विक्षा॒रो॑ऽवस्ता᳚त्।
अदि॑त्यै॒ पुन॑र्वसू।
वात॑ः प॒रस्ता॑दा॒र्द्रम॒वस्ता᳚त्॥ १॥

((a̱gneḥ kṛtti̍kāḥ ।
śukraṃ pa̱rastā̱jjyoti̍ra̱vastā̎t ।
pra̱jāpa̍te rohi̱ṇī ।
āpa̍ḥ pa̱rastā̱doṣa̍dhayo̱'vastā̎t ।
soma̍syenva̱kā vita̍tāni ।
pa̱rastā̱dvaya̍nto̱'vastā̎t ।
ru̱drasya̍ bā̱hū ।
mṛ̱ga̱yava̍ḥ pa̱rastā̎dvikṣā̱ro̍'vastā̎t ।
adi̍tyai̱ puna̍rvasū ।
vāta̍ḥ pa̱rastā̍dā̱rdrama̱vastā̎t ॥ 1 ॥))

**[[1-5-1-2]]**

बृ॒ह॒स्पते᳚स्ति॒ष्य॑ः।
जुह्व॑तः प॒रस्ता॒द्यज॑माना अ॒वस्ता᳚त्।
स॒र्पाणा॑माश्रे॒षाः।
अ॒भ्या॒गच्छ॑न्तः प॒रस्ता॑दभ्या॒नृत्य॑न्तो॒ऽवस्ता᳚त्।
पि॒तृ॒णां म॒घाः।
रु॒दन्त॑ः प॒रस्ता॑दपभ्र॒ꣳशो॑ऽवस्ता᳚त्।
अ॒र्य॒म्णः पूर्वे॒ फल्गु॑नी।
जा॒या प॒रस्ता॑दृ॒ष॒भो॑ऽवस्ता᳚त्।
भग॒स्योत्त॑रे।
व॒ह॒तव॑ः प॒रस्ता॒द्वह॑माना अ॒वस्ता᳚त्॥ २॥

((bṛ̱ha̱spate̎sti̱ṣya̍ḥ ।
juhva̍taḥ pa̱rastā̱dyaja̍mānā a̱vastā̎t ।
sa̱rpāṇā̍māśre̱ṣāḥ ।
a̱bhyā̱gaccha̍ntaḥ pa̱rastā̍dabhyā̱nṛtya̍nto̱'vastā̎t ।
pi̱tṝ̱ṇāṃ ma̱ghāḥ ।
ru̱danta̍ḥ pa̱rastā̍dapabhra̱m̐śo̍'vastā̎t ।
a̱rya̱mṇaḥ pūrve̱ phalgu̍nī ।
jā̱yā pa̱rastā̍dṛ̱ṣa̱bho̍'vastā̎t ।
bhaga̱syotta̍re ।
va̱ha̱tava̍ḥ pa̱rastā̱dvaha̍mānā a̱vastā̎t ॥ 2 ॥))

**[[1-5-1-3]]**

दे॒वस्य॑ सवि॒तुर्हस्त॑ः।
प्र॒स॒वः प॒रस्ता᳚थ्स॒निर॒वस्ता᳚त्।
इन्द्र॑स्य चि॒त्रा।
ऋ॒तं प॒रस्ता᳚त्स॒त्यम॒वस्ता᳚त्।
वा॒योर्निष्ट्या᳚ व्र॒तति॑ः।
प॒रस्ता॒दसि॑द्धिर॒वस्ता᳚त्।
इ॒न्द्रा॒ग्नि॒योर्विशा॑खे।
यु॒गानि॑ प॒रस्ता᳚त्कृ॒षमा॑णा अ॒वस्ता᳚त्।
मि॒त्रस्या॑नूरा॒धाः।
अ॒भ्या॒रोह॑त्प॒रस्ता॑द॒भ्यारू॑ढम॒वस्ता᳚त्॥ ३॥

((de̱vasya̍ savi̱turhasta̍ḥ ।
pra̱sa̱vaḥ pa̱rastā̎thsa̱nira̱vastā̎t ।
indra̍sya ci̱trā ।
ṛ̱taṃ pa̱rastā̎tsa̱tyama̱vastā̎t ।
vā̱yorniṣṭyā̎ vra̱tati̍ḥ ।
pa̱rastā̱dasi̍ddhira̱vastā̎t ।
i̱ndrā̱gni̱yorviśā̍khe ।
yu̱gāni̍ pa̱rastā̎tkṛ̱ṣamā̍ṇā a̱vastā̎t ।
mi̱trasyā̍nūrā̱dhāḥ ।
a̱bhyā̱roha̍tpa̱rastā̍da̱bhyārū̍ḍhama̱vastā̎t ॥ 3 ॥))

**[[1-5-1-4]]**

इन्द्र॑स्य रोहि॒णी।
शृ॒णत्प॒रस्ता᳚त्प्रतिशृ॒णद॒वस्ता᳚त्।
निर्ऋ॑त्यै मूल॒वर्ह॑णी।
प्र॒ति॒भ॒ञ्जन्त॑ः प॒रस्ता᳚त्प्रतिशृ॒णन्तो॒ऽवस्ता᳚त्।
अ॒पां पूर्वा᳚ अषा॒ढाः।
वर्च॑ः प॒रस्ता᳚त्समि॑तिर॒वस्ता᳚त्।
विश्वे॑षां दे॒वाना॒मुत्त॑राः।
अ॒भि॒जय॑त्प॒रस्ता॑द॒भिजि॑तम॒वस्ता᳚त्।
विष्णो᳚ः श्रो॒णा पृ॒च्छमा॑नाः।
प॒रस्ता᳚त्पन्था॑ अ॒वस्ता᳚त्॥ ४॥

((indra̍sya rohi̱ṇī ।
śṛ̱ṇatpa̱rastā̎tpratiśṛ̱ṇada̱vastā̎t ।
nirṛ̍tyai mūla̱varha̍ṇī ।
pra̱ti̱bha̱ñjanta̍ḥ pa̱rastā̎tpratiśṛ̱ṇanto̱'vastā̎t ।
a̱pāṃ pūrva̍ a̱ṣā̱ḍhāḥ ।
varca̍ḥ pa̱rastā̱tsami̍tira̱vastā̎t ।
viśve̍ṣāṃ de̱vānā̱mutta̍rāḥ ।
a̱bhi̱jaya̍tpa̱rastā̍da̱bhiji̍tama̱vastā̎t ।
viṣṇo̎ḥ śro̱ṇā pṛ̱cchamā̍nāḥ ।
pa̱rastā̱tpantha̍ a̱vastā̎t ॥ 4 ॥))

**[[1-5-1-5]]**

वसूनाꣳ श्रविष्ठाः।
भूतं परस्ताद्भूतिरवस्तात्।
इन्द्रस्य शतभिषक्।
विश्वव्यचाः परस्ताद्विश्वक्षितिरवस्तात्।
अजस्यैकपदः पूर्वे प्रोष्ठपदाः।
वैश्वानरं परस्ताद्वैश्वावसवमवस्तात्।
अहेर्बुध्नियस्योत्तरे।
अभिषिञ्चन्तः परस्तादभिषुण्वन्तोऽवस्तात्।
पूष्णो रेवती।
गावः परस्ताद्वत्सा अवस्तात्।
अश्विनोरश्वयुजौ।
ग्रामः परस्तात्सेनाऽवस्तात्।
यमस्यापभरणीः।
अपकर्षन्तः परस्तादपवहन्तोऽवस्तात्।
पूर्णा पश्चाद्यत्ते देवा अदधुः॥ ५॥
आर्द्रमवस्ताद्वहमाना अवस्तादभ्यारूढमवस्तात्पन्था अवस्ताद्वत्सा अवस्तात्पञ्च च॥ १॥

((vasū̍nā̱ꣳ śravi̍ṣṭhāḥ ।
bhū̱taṃ pa̱rastā̱dbhūti̍ra̱vastā̎t ।
indra̍sya śa̱tabhi̍ṣak ।
vi̱śvavya̍cāḥ para̱stā̎dvi̱śvakṣi̍tira̱vastā̎t ।
a̱jasyaika̍pada̱ḥ pūrve̎ proṣṭhapa̱dāḥ ।
vai̱śvā̱na̱raṃ pa̱rastā̎dvaiśvāvasa̱vama̱vastā̎t ।
ahe̎rbu̱dhniya̱syottare ।
a̱bhi̱ṣi̱ñcanta̍ḥ pa̱rastā̍dabhiṣu̱ṇvanto̱'vastā̎t ।
pū̱ṣṇo re̱vatī̎ ।
gāva̍ḥ pa̱rastā̎dva̱tsā a̱vastā̎t ।
a̱śvino̍raśva̱yujau̎ ।
grāma̍ḥ pa̱rastā̱tsenā̱'vastā̎t ।
ya̱masyā̍pa̱bhara̍ṇīḥ ।
a̱pa̱karṣa̍ntaḥ pa̱rastā̍dapa̱vaha̍nto̱'vastā̎t ।
pū̱rṇā pa̱ścādyatte̍ de̱vā ada̍dhuḥ ॥ 5 ॥
ā̱rdrama̱vastā̱dvaha̍mānā
a̱vastā̍da̱bhyārū̍ḍhama̱vastā̱tpantha̍ a̱vastā̍dva̱tsā
a̱vastā̱tpañca̍ ca ॥ 1 ॥))

**[[1-5-2-1]]**

यत्पुण्यं नक्षत्रम्।
तद्बट् कुर्वीतोपव्युषम्।
यदा वै सूर्य उदेति।
अथ नक्षत्रं नैति।
यावति तत्र सूर्यो गच्छेत्।
यत्र जघन्यं पश्येत्।
तावति कुर्वीत यत्कारी स्यात्।
पुण्याह एव कुरुते।
एवꣳ ह वै यज्ञेषुं च शतद्युम्नं च मात्स्यो निरवसाययाञ्चकार॥ १॥

((yatpu̱ṇyaṃ̱ nakṣa̍ttram ।
tadbaṭ ku̍rvītopavyu̱ṣam ।
ya̱dā vai sūrya̍ u̱deti̍ ।
atha̱ nakṣa̍ttra̱ṃ naiti̍ ।
yāva̍ti̱ tatra̱ sūryo̱ gacche̎t ।
yatra̍ jagha̱nya̍ṃ paśye̎t ।
tāva̍ti kurvīta yatkā̱rī syāt ।
pu̱ṇyā̱ha e̱va ku̍rute ।
e̱vam̐ ha̱ vai ya̱jñeṣu̍ṃ ca śa̱tadyu̍mnaṃ ca mā̱tsyo
ni̍ravasāya̱yāñca̍kāra ॥ 1 ॥))

**[[1-5-2-2]]**

यो वै नक्षत्रियं प्रजापतिं वेद।
उभयोरेनं लोकयोर्विदुः।
हस्त एवास्य हस्तः।
चित्रा शिरः।
निष्ट्या हृदयम्।
ऊरू विशाखे।
प्रतिष्ठाऽनूराधाः।
एष वै नक्षत्रियः प्रजापतिः।
य एवं वेद।
उभयोरेनं लोकयोर्विदुः॥ २॥

((yo vai na̍kṣa̱ttriya̍ṃ pra̱jāpa̍ti̱ṃ veda̍ ।
u̱bhayo̍renaṃ lo̱kayo̎rviduḥ ।
hasta̍ e̱vāsya̱ hasta̍ḥ ।
ci̱trā śira̍ḥ ।
ni̱ṣṭyā̱ hṛ̱da̍yam ।
ū̱rū viśā̍khe ।
pra̱ti̱ṣṭhā'nū̍rā̱dhāḥ ।
e̱ṣa vai na̍kṣa̱ttriya̍ḥ pra̱jāpa̍tiḥ ।

ya ẹvaṃ vedá ।
ụbhayórenaṃ lọkayŏ̍rviduḥ ॥ 2 ॥))

**[[1-5-2-3]]**

अ॒स्मिꣳश्चा॒मुष्मिꣳ॑श्च।
यां का॒मये॑त दुहि॒तर॑ं प्रि॒या स्या॒दिति॑।
तां निष्ट्या॑यां दद्यात्।
प्रि॒यैव भ॑वति।
नै॒व तु पु॒नरा॒ग॑च्छति।
अ॒भि॒जिन्ना॒म नक्ष॑त्त्रम्।
उ॒परि॑ष्टादषा॒ढाना॑॑म्।
अ॒वस्ता॑॑च्छ्रो॒णायै॑॑।
दे॒वासु॒राः संय॑त्ता आसन्।
ते दे॒वास्तस्मि॒न्नक्ष॑त्त्रे॒ऽभ्य॑जयन्॥ ३॥

((ạsmiṁ̐ścạ̄muṣmiṁ̐́śca ।
yāṃ kạ̄mayéta duhịtaraṁ́ prịyā syạ̄dití ।
tāṃ niṣṭyáyāṃ dadyāt ।
prịyaiva bhávati ।
naivạ tu punạrāgácchati ।
ạbhịjinnāmạ nakṣáttram ।
ụpari̍ṣṭādaṣạ̄ḍhānā̎m ।
ạvastā̎cchrọṇāyai̎ ।
dẹvāsụrāḥ saṃyáttā āsan ।
te dẹvāstasmịnnakṣáttrẹ'bhyájayan ॥ 3 ॥))

**[[1-5-2-4]]**

यद॒भ्यज॑यन्।
तद॑भि॒जितो॑ऽभि॒जित्त्वम्।
यं का॒मये॑तानपज॒य्यं ज॑ये॒दिति॑।
त॒मे॒तस्मि॒न्नक्ष॑त्त्रे यातयेत्।
अ॒न॒प॒ज॒य्यमे॒व ज॑यति।
पा॒पप॑राजितमिव॒ तु।
प्र॒जाप॑तिः प॒शून॑सृजत।
ते नक्ष॑त्त्रं नक्षत्त्र॒मुपा॑तिष्ठन्त।
ते स॒माव॑न्त ए॒वाभ॑वन्।
ते रे॒वती॒मुपा॑तिष्ठन्त॥ ४॥

((yadạbhyajáyan ।
tadábhịjitó'bhịjịttvam ।
yaṃ kạ̄mayétānapajạyyaṃ jáyẹdití ।
tamẹtasmịnnakṣáttre yātayet ।
ạnạpạjạyyamẹva jáyati ।
pāpapárājitamivạ tu ।
prạjāpátiḥ pạśūnásṛjata ।
te nakṣáttraṃ nakṣattrạmupātiṣṭhanta ।
te sạmāvánta ẹvābhávan ।
te rẹvatị̄mupátiṣṭhanta ॥ 4 ॥))

**[[1-5-2-5]]**

ते रे॒वत्यां॒ प्राभ॑वन्।
तस्मा॑॑द्रे॒वत्या॑॑ं पश॒ूनां कु॑र्वीत।
यत्किं चा॑॑र्वा॒चीन॒ꣳ सोमा॑॑त्।
प्रैव भ॑वन्ति।
स॒लि॒लं वा इ॒दम॑न्त॒रासी॑॑त्।
यद॒त॑रन्।
तत्तार॑काणां तारक॒त्वम्।
यो वा इ॒ह यज॑ते।
अ॒मुꣳ सलो॒कं न॑क्षते।
तन्नक्ष॑त्त्राणां नक्षत्त्र॒त्वम्॥ ५॥

((te rẹvatyāṃ prābhávan ।
tasmā̎drẹvatyāṁ̎ paśụ̄nāṃ kúrvīta ।
yatkiṃ cā̎rvạ̄cīnạṁ̐ somā̎t ।
praiva bhávanti ।
salịlaṃ vā ịdamántạrāsī̎t ।
yadatáran ।
tattārákāṇāṃ tārakạtvam ।
yo vā ịha yajáte ।
ạmuṁ̐ salọkaṃ nákṣate ।
tannakṣáttrāṇāṃ nakṣattrạtvam ॥ 5 ॥))

**[[1-5-2-6]]**

दे॒वगृ॒हा वै नक्ष॑त्त्राणि।
य ए॒वं वेद॑।
गृह्ये॑व भ॑वति।
यानि॒ वा इ॒मानि॑ पृथि॒व्याश्चि॒त्राणि॑।
तानि॒ नक्ष॑त्त्राणि।
तस्मा॑दश्ली॒लना॑मꣳश्चि॒त्रे।
नाव॑स्ये॒न्न य॑जेत।
यथा॑ पापा॒हे कु॑रु॒ते।
ता॒दृगे॒व तत्।
दे॒वनक्षत्त्रा॒णि वा अ॒न्यानि॑॥ ६॥

((dẹvagṛ̣hā vai nakṣáttrāṇi ।
ya ẹvaṃ vedá ।
gṛhyéva bhávati ।
yānị vā ịmāní pṛthịvyāścịtrāṇị́ ।
tānị nakṣáttrāṇi ।
tasmádaśḹlanámamṁ̐ścịtre ।

nāva̍sye̱nna ya̍jeta ।
yatha̍ pāpā̱he ku̍ru̱te ।
tā̱dṛge̱va tat ।
de̱va̱na̱kṣa̱ttrāṇi̱ vā a̱nyāni̍ ॥ 6 ॥))

**[[1-5-2-7]]**

य॒म॒न॒क्ष॒त्त्राण्य॒न्यानि॑ ।
कृत्ति॑काः प्रथ॒मम् ।
विशा॑खे उत्त॒मम् ।
तानि॑ देवनक्ष॒त्त्राणि॑ ।
अ॒नूरा॒धाः प्र॑थ॒मम् ।
अ॒प॒भर॑णीरुत्त॒मम् ।
तानि॑ यमनक्ष॒त्त्राणि॑ ।
यानि॑ देवनक्ष॒त्त्राणि॑ ।
तानि॒ दक्षि॑णेन॒ परि॑यन्ति ।
यानि॑ यमनक्ष॒त्त्राणि॑ ॥ ७ ॥

((ya̱ma̱na̱kṣa̱ttrāṇya̱nyāni̍ ।
kṛtti̍kāḥ pratha̱mam ।
viśa̍khe utta̱mam ।
tāni̍ devanakṣa̱ttrāṇi̍ ।
a̱nūrā̱dhāḥ pra̍tha̱mam ।
a̱pa̱bhara̍ṇīrutta̱mam ।
tāni̍ yamanakṣa̱ttrāṇi̍ ।
yāni̍ devanakṣa̱ttrāṇi̍ ।
tāni̱ dakṣi̍ṇena̱ pari̍yanti ।
yāni̍ yamanakṣa̱ttrāṇi̍ ॥ 7 ॥))

**[[1-5-2-8]]**

तान्युत्त॑रेण ।
अन्वे॑षामरा॒त्स्मेति॑ ।
तद॑नूरा॒धाः ।
ज्ये॒ष्ठमे॑षामवधि॒ष्मेति॑ ।
तज्ज्ये᳚ष्ठ॒घ्नी ।
मूल॑मेषामवृक्षा॒मेति॑ ।
तन्मू॑ल॒वर्ह᳚णी ।
यन्नास॑हन्त ।
तद॑षा॒ढाः ।
यद॑श्लो᳚णत् ॥ ८ ॥

((tānyutta̍reṇa ।
anve̍ṣāmarā̱tsmeti̍ ।
tada̍nūrā̱dhāḥ ।
jye̱ṣṭhame̍ṣāmavadhi̱ṣmeti̍ ।
tajjye̎ṣṭha̱ghnī ।
mūla̍meṣāmavṛkṣā̱meti̍ ।
tanmū̍la̱varha̍ṇī ।
yannāsa̍hanta ।
tada̍ṣā̱ḍhāḥ ।
yadaślo̍ṇat ॥ 8 ॥))

**[[1-5-2-9]]**

तच्छ्रो॒णा ।
यद॑शृ॒णोत् ।
तच्छ्रवि॑ष्ठाः ।
यच्छ॒तमभि॑षज्यन् ।
तच्छ॒तभि॑षक् ।
प्रो॒ष्ठप॒देषू॒द॑यच्छन्त ।
रे॒वत्या॑मरवन्त ।
अ॒श्व॒युजौ॑रयुञ्जत ।
अ॒प॒भर॑णी॒ष्वपा॑वहन् ।
तानि॒ वा ए॒तानि॑ यमनक्ष॒त्त्राणि॑ ।
यान्ये॒व दे॑वनक्ष॒त्त्राणि॑ ।
तेषु॑ कुर्वी॑त यत्का॒री स्यात् ।
पु॒ण्या॒ह ए॒व कु॑रुते ॥ ९ ॥
च॒का॒रै॒वं वे॒दो॒भयो॑रेनं लो॒कयो᳚र्विदुरजयन्रे॒वती॒मुपा॑तिष्ठन्त नक्ष॒त्त्रत्वम॒न्यानि॒ यानि॑ यमनक्ष॒त्त्राण्यश्लो᳚णद्यमनक्ष॒त्त्राणि॒ त्रीणि॑ च ॥ २ ॥

((tacchro̱ṇā ।
yadaśṛ̍ṇot ।
tacchravi̍ṣṭhāḥ ।
yaccha̱tamabhi̍ṣajyan ।
taccha̱tabhi̍ṣak ।
pro̱ṣṭha̱pa̱deṣūda̍yacchanta ।
re̱vatya̍maravanta ।
a̱śva̱yujo̍rayuñjata ।
a̱pa̱bhara̍ṇī̱ṣvapa̍vahan ।
tāni̱ vā e̱tāni̍ yamanakṣa̱ttrāṇi̍ ।
yānye̱va de̍vanakṣa̱ttrāṇi̍ ।
teṣu̍ kurvīta yatkā̱rī syāt ।
pu̱ṇyā̱ha e̱va ku̍rute ॥ 9 ॥
ca̱kā̱ra̱ivaṃ vedo̱bhayo̍renaṃ lo̱kayo̍rvidurajayanre̱vatī̱mupa̍tiṣṭhanta nakṣattra̱tvama̱nyāni̱ yāni̍ yamanakṣa̱ttrāṇyaślo̍ṇadyamanakṣa̱ttrāṇi̱ trīṇi̍ ca ॥ 2 ॥))

**[[1-5-3-1]]**

दे॒वस्य॑ सवि॒तुः प्रा॒तः प्र॑स॒वः प्रा॒णः ।
वरु॑णस्य सा॒यमा॑स॒वो᳚ऽपा॒नः ।

यत्प्र॑ती॒चीनं॑ प्रात॒स्तना᳚त्।
प्रा॒चीन॒ꣳ॒ सं॑ग॒वात्।
ततो॑ दे॒वा अ॑ग्निष्टो॒मं निर॑मिमत।
तत्तदात्त॑वीर्यं॒ निर्मा॒र्गः।
मि॒त्रस्य॑ संग॒वः।
तत्पुण्यं॑ तेज॒स्व्यह॑ः।
तस्मा॒त्तर्हि॑ प॒शवः॑ स॒माय॑न्ति।
यत्प्र॑ती॒चीन॒ꣳ॒ संग॒वात्॥ १॥

((de̱vasyá savi̱tuḥ prāta̱ḥ prásavaḥ prā̱ṇaḥ |
varúṇasya sā̱yamásavó'pā̱naḥ |
yatprátī̱cīnaṁ prāta̱stanā̎t |
prā̱cīnam̐ saṃga̱vāt |
tató de̱vā ágniṣṭo̱mam nirámimata |
tattadāttávīryaṃ nirmā̱rgaḥ |
mi̱trasyá saṃga̱vaḥ |
tatpuṇyaṁ teja̱svyaháḥ |
tasmā̱ttarhí pa̱śaváḥ sa̱māyánti |
yatprátī̱cīnam̐ saṃga̱vāt || 1 ||))

**[[1-5-3-2]]**

प्रा॒चीनं॑ म॒ध्यन्दि॑नात्।
ततो॑ दे॒वा उ॒क्थ्यं॑ निर॑मिमत।
तत्तदात्त॑वीर्यं॒ निर्मा॒र्गः।
बृह॒स्पते॑र्म॒ध्यन्दि॑नः।
तत्पुण्यं॑ तेज॒स्व्यह॑ः।
तस्मा॒त्तर्हि॑ तेक्ष्णि॑ष्ठं तपति।
यत्प्र॑ती॒चीनं॑ म॒ध्यन्दि॑नात्।
प्रा॒चीन॑मपरा॒ह्णात्।
ततो॑ दे॒वाः षो॑ड॒शिनं॒ निर॑मिमत।
तत्तदात्त॑वीर्यं॒ निर्मा॒र्गः॥ २॥

((prā̱cīnaṁ ma̱dhyandínāt |
tató de̱vā u̱kthyaṁ nirámimata |
tattadāttávīryaṃ nirmā̱rgaḥ |
bṛha̱spatérma̱dhyandínaḥ |
tatpuṇyaṁ teja̱svyaháḥ |
tasmā̱ttarhi̱ tekṣṇíṣṭhaṃ tapati |
yatprátī̱cīnaṁ ma̱dhyandínāt |
prā̱cīnámaparā̱hṇāt |
tató de̱vāḥ ṣóḍa̱śinaṃ̱ nirámimata |
tattadāttávīryaṃ nirmā̱rgaḥ || 2 ||))

**[[1-5-3-3]]**

भग॑स्यापरा॒ह्णः।
तत्पुण्यं॑ तेज॒स्व्यह॑ः।
तस्मा॑दपरा॒ह्णे कु॑मा॒र्यो॑ भग॑मि॒च्छमा॑नाश्चरन्ति।
यत्प्र॑ती॒चीन॑मपरा॒ह्णात्।
प्रा॒चीन॒ꣳ॒ सा॒यात्।
ततो॑ दे॒वा अ॑तिरा॒त्रं निर॑मिमत।
तत्तदात्त॑वीर्यं॒ निर्मा॒र्गः।
वरु॑णस्य सा॒यम्।
तत्पुण्यं॑ तेज॒स्व्यह॑ः।
तस्मा॒त्तर्हि॒ नानृ॑तं वदेत्॥ ३॥

((bhagásyāparā̱hṇaḥ |
tatpuṇyaṁ teja̱svyaháḥ |
tasmádaparā̱hṇe kúmā̱ryó bhagámi̱cchamánāścaranti |
yatprátī̱cīnámaparā̱hṇāt |
prā̱cīnam̐ sā̱yāt |
tató de̱vā átirā̱traṃ nirámimata |
tattadāttávīryaṃ nirmā̱rgaḥ |
varúṇasya sā̱yam |
tatpuṇyaṁ teja̱svyaháḥ |
tasmā̱ttarhi̱ nānṛ́taṃ vadet || 3 ||))

**[[1-5-3-4]]**

ब्रा॒ह्मणो वा अ॑ष्टावि॒ꣳ॒शो नक्ष॑त्राणाम्।
स॒मा॒नस्याह्नः॑ पञ्च॒ पुण्या॑नि॒ नक्ष॑त्राणि।
च॒त्वार्य॑श्ली॒लानि॑।
तानि॒ नव॑।
यच्च॑ प॒रस्ता॒न्नक्ष॑त्राणां॒ यच्चा॒वस्ता॑त्।
तान्येका॑दश।
ब्रा॒ह्मणो द्वा॑द॒शः।
य ए॒वं वि॒द्वान्त्सं॑वत्स॒रं व्र॒तं चर॑ति।
सं॒व॒त्स॒रेणै॒वास्य॑ व्र॒तं गु॒प्तं भ॑वति।
स॒मा॒नस्याह्नः॑ पञ्च॒ पुण्या॑नि॒ नक्ष॑त्राणि।
च॒त्वार्य॑श्ली॒लानि॑।
तानि॒ नव॑।
आ॒ग्नेयी रात्रिः॑।
ऐ॒न्द्रमहः॑।
तान्येका॑दश।
आ॒दि॒त्यो द्वा॑द॒शः।
य ए॒वं वि॒द्वान्त्सं॑वत्स॒रं व्र॒तं चर॑ति।

सं॒व॒त्स॒रेणै॒वास्य॑ व्र॒तं गु॒प्तं भ॑वति॥ ४॥
सं॒ग॒वात्षो॑डशिनं॒ निर॑मिमत तत्तदात्त॑वीर्यं निर्मा॒र्गो
व॑देद्भवति समा॒नस्या॒ह्नः पञ्च॒ पुण्या॑नि॒ नक्ष॑त्राण्य॒ष्टौ च॑॥
३॥

((brā̱hma̱ṇo vā a̍ṣṭāvi̱m̐śo nakṣa̍trāṇā̱m ।
sa̱mā̱nasyāhna̱ḥ pañca̱ puṇyā̍ni̱ nakṣa̍trāṇi ।
ca̱tvāryaśli̱̍lā̱ni̍ ।
tāni̱ navā̍ ।
yaccā̍ pa̱rastā̱nnakṣa̍trāṇā̱m yaccā̱vastā̍t ।
tānyekā̍daśa ।
brā̱hma̱ṇo dvā̍da̱śaḥ ।
ya e̱vaṃ vi̱dvānsa̱m̐vatsa̱raṃ vra̱taṃ carā̍ti ।
sa̱m̐va̱tsa̱reṇai̱vāsya̍ vra̱taṃ gu̱ptaṃ bha̍vati ।
sa̱mā̱nasyāhna̱ḥ pañca̱ puṇyā̍ni̱ nakṣa̍trāṇi ।
ca̱tvāryaśli̱̍lā̱ni̍ ।
tāni̱ navā̍ ।
ā̱gne̱yī rātri̍ḥ ।
ai̱ndramaha̍ḥ ।
tānyekā̍daśa ।
ā̱di̱tyo dvā̍da̱śaḥ ।
ya e̱vaṃ vi̱dvānsa̱m̐vatsa̱raṃ vra̱taṃ carā̍ti ।
sa̱m̐va̱tsa̱reṇai̱vāsya̍ vra̱taṃ gu̱ptaṃ bha̍vati ॥ 4 ॥
sa̱mga̱vātṣo̍ḍa̱śina̱ṃ nirā̍mimata̱ tattadātta̍vīrya̱ṃ
nirmā̱rgo va̍dedbhavati samā̱nsyāhna̱ḥ pañca̱
puṇyā̍ni̱ nakṣa̍trāṇya̱ṣṭau ca̍ ॥ 3 ॥))

**[[1-5-4-1]]**

ब्र॒ह्म॒वा॒दिनो॑ वदन्ति।
कति॒ पात्रा॑णि य॒ज्ञं व॑ह॒न्तीति॑।
त्रयो॑द॒शेति॑ ब्रूयात्।
स यद्ब्रू॒यात्।
कस्तानि॒ निर॑मिमी॒तेति॑।
प्र॒जाप॑ति॒रिति॑ ब्रूयात्।
स यद्ब्रू॒यात्।
कु॒त॒स्तानि॒ निर॑मिमी॒तेति॑।
आ॒त्मन॒ इति॑।
प्रा॒णा॒पा॒नाभ्या॑मे॒वोपा॒ꣳ॒श्व॒न्त॒र्या॒मौ निर॑मिमीत॥ १॥

((bra̱hma̱vā̱dino̍ vadanti ।
kati̱ pātrā̍ṇi̱ ya̱jña̱ṃ va̍ha̱ntīti̍ ।
trayo̍da̱śeti̍ brūyāt ।
sa yadbrū̱yāt ।
kastāni̱ nirā̍mimī̱teti̍ ।
pra̱jāpa̍ti̱riti̍ brūyāt ।
sa yadbrū̱yāt ।
ku̱ta̱stāni̱ nirā̍mimī̱teti̍ ।
ā̱tmana̱ iti̍ ।
prā̱ṇā̱pā̱nābhyā̍me̱vopā̱m̐śvantaryā̱mau nirā̍mimīta
॥ 1 ॥))

**[[1-5-4-2]]**

व्या॒ना॒दु॑पा॒ꣳ॒शु॒सव॑नम्।
वा॒च ऐ॒न्द्र॒वा॒य॒वम्।
द॒क्ष॒क्र॒तु॒भ्याँ॑ मैत्रावरु॒णम्।
श्रोत्रा॑दाश्वि॒नम्।
चक्षु॑षः शु॒क्रा॒म॒न्थिनौ॑।
आ॒त्मन॑ आग्रय॒णम्।
अङ्गे॒भ्य उ॒क्थ्य॑म्।
आयु॑षो ध्रु॒वम्।
प्र॒ति॒ष्ठाया॑ ऋतुपा॒त्रे।
य॒ज्ञं वाव तं प्र॒जाप॑ति॒र्निर॑मिमीत।
स निर्मि॑तो॒ नाद्ध्रि॑यत॒ सम॑व्लीयत।
स ए॒तान्प्र॒जाप॑तिरपिवा॒पान॑पश्यत्।
तान्निर॑वपत्।
तैर्वै स य॒ज्ञमप्य॑वपत्।
यद॑पिवा॒पा भव॑न्ति।
य॒ज्ञस्य॒ धृत्या॒ अस॑व्लयाय॥ २॥
उ॒पा॒ꣳ॒श्व॒न्त॒र्या॒मौ निर॑मिमीतामिमीत॒ षट् च॑॥ ४॥

((vyā̱nādu̍pā̱m̐śu̱sava̍nam ।
vā̱ca ai̱ndravāya̱vam ।
da̱kṣa̱kra̱tubhyā̱m̐ maitrāvaru̱ṇam ।
śrotrā̍dāśvi̱nam ।
cakṣu̍ṣaḥ śu̱krāma̱nthinau̍ ।
ā̱tmana̍ āgraya̱ṇam ।
aṅge̱bhya u̱kthya̍m ।
āyu̍ṣo dhru̱vam ।
pra̱ti̱ṣṭhāyā̍ ṛtupā̱tre ।
ya̱jña̱ṃ vāva ta̱ṃ pra̱jāpa̍ti̱rnirā̍mimīta ।
sa nirmi̍to̱ nāddhri̍yata̱ sama̍vlīyata ।
sa e̱tānpra̱jāpa̍tirapivā̱pāna̍paśyat ।
tānnira̍vapat ।
tairvai sa ya̱jñamapya̍vapat ।
yada̍pivā̱pā bhava̍nti ।
ya̱jñasya̱ dhṛtyā̱ asa̱m̐vlayāya ॥ 2 ॥
u̱pā̱m̐śva̱nta̱ryā̱mau nirā̍mimītāmimīta̱ ṣaṭ ca̍ ॥ 4 ॥))

**[[1-5-5-1]]**

ऋ॒तमे॒व प॑रमे॒ष्ठि।
ऋ॒तं नात्ये॑ति॒ किं च॒न।
ऋ॒ते स॑मु॒द्र आहि॑तः।
ऋ॒ते भुमि॑रि॒यꣳ श्रि॒ता।
अ॒ग्निस्ति॒ग्मेन॑ शो॒चिषा॑।

तप॒ आक्रा॑न्तमु॒ष्णिहा॑।
शिर॒स्तप॒स्याहि॑तम्।
वै॒श्वा॒न॒रस्य॒ तेज॑सा।
ऋ॒तेना॑स्य॒ निव॑र्तये।
स॒त्येन॒ परि॑वर्तये॥ १॥

((ṛtameva parameṣṭhi |
ṛtaṃ nātyeti kiṃ cana |
ṛte samudra āhitaḥ |
ṛte bhumiriyaṃ śritā |
agnistigmena śocisā |
tapa ākrāntamuṣṇihā |
śirastapasyāhitam |
vaiśvānarasya tejasā |
ṛtenāsya nivartaye |
satyena parivartaye || 1 ||))

**[[1-5-5-2]]**

तप॑सा॒ऽस्यानु॑वर्तये।
शि॒वेना॒स्योप॑वर्तये।
श॒ग्मेना॑स्या॒भिव॑र्तये।
तदृ॒तं तत्स॒त्यम्।
तद्व्र॒तं तच्छ॑केयम्।
तेन॑ शकेयं॒ तेन॑ राध्यासम्।
यद्घ॒र्मः प॒र्यव॑र्तयत्।
अन्ता॑न्पृथि॒व्या दि॒वः।
अ॒ग्निरीशा॑न॒ ओज॑सा।
वरु॑णो धी॒तिभि॑ः स॒ह॥ २॥

((tapasā'syānuvartaye |
śivenāsyopavartaye |
śagmenāsyābhivartaye |
tadṛtaṃ tatsatyam |
tadvrataṃ tacchakeyam |
tena śakeyaṃ tena rādhyāsam |
yadgharmaḥ paryavartayat |
antānpṛthivyā divaḥ |
agnirīśāna ojasā |
varuṇo dhītibhiḥ saha || 2 ||))

**[[1-5-5-3]]**

इन्द्रो॑ म॒रुद्भि॑ः सखि॑भिः स॒ह।
अ॒ग्निस्ति॒ग्मेन॑ शो॒चिषा॑।
तप॒ आक्रा॑न्तमु॒ष्णिहा॑।
शिर॒स्तप॒स्याहि॑तम्।
वै॒श्वा॒न॒रस्य॒ तेज॑सा।
ऋ॒तेना॑स्य॒ निव॑र्तये।
स॒त्येन॒ परि॑वर्तये।
तप॑सा॒ऽस्यानु॑वर्तये।
शि॒वेना॒स्योप॑वर्तये।
श॒ग्मेना॑स्या॒भिव॑र्तये॥ ३॥

((indro marudbhiḥ sakhibhiḥ saha |
agnistigmena śocisā |
tapa ākrāntamuṣṇihā |
śirastapasyāhitam |
vaiśvānarasya tejasā |
ṛtenāsya nivartaye |
satyena parivartaye |
tapasā'syānuvartaye |
śivenāsyopavartaye |
śagmenāsyābhivartaye || 3 ||))

**[[1-5-5-4]]**

तदृ॒तं तत्स॒त्यम्।
तद्व्र॒तं तच्छ॑केयम्।
तेन॑ शकेयं॒ तेन॑ राध्यासम्।
यो अ॒स्याः पृ॑थि॒व्यास्त्व॒चि।
नि॒व॒र्तय॒त्योष॑धीः।
अ॒ग्निरीशा॑न॒ ओज॑सा।
वरु॑णो धी॒तिभि॑ः स॒ह।
इन्द्रो॑ म॒रुद्भि॑ः सखि॑भिः स॒ह।
अ॒ग्निस्ति॒ग्मेन॑ शो॒चिषा॑।
तप॒ आक्रा॑न्तमु॒ष्णिहा॑॥ ४॥

((tadṛtaṃ tatsatyam |
tadvrataṃ tacchakeyam |
tena śakeyaṃ tena rādhyāsam |
yo asyāḥ pṛthivyāstvaci |
nivartayatyoṣadhīḥ |
agnirīśāna ojasā |
varuṇo dhītibhiḥ saha |
indro marudbhiḥ sakhibhiḥ saha |
agnistigmena śocisā |
tapa ākrāntamuṣṇihā || 4 ||))

**[[1-5-5-5]]**

शिर॒स्तप॒स्याहि॑तम्।
वै॒श्वा॒न॒रस्य॒ तेज॑सा।
ऋ॒तेना॑स्य॒ निव॑र्तये।

स॒त्येन॒ परि॑वर्तये।
तप॑सा॒ऽस्यानु॑वर्तये।
शि॒वेना॒स्योप॑वर्तये।
श॒ग्मेना᳚स्या॒भिव॑र्तये।
तदृ॒तं तत्स॒त्यम्।
तद्व्र॒तं तच्छ॑केयम्।
तेन॑ शकेयं॒ तेन॑ राध्यासम्॥ ५॥

((śira̱stapa̱syāhi̍tam ।
vai̱śvā̱na̱rasya̱ teja̍sā ।
ṛ̱tenā̎sya̱ niva̍rtaye ।
sa̱tyena̱ pari̍vartaye ।
tapa̍sā̱'syānu̍vartaye ।
śi̱venā̱syopa̍vartaye ।
śa̱gmenā̎syā̱bhiva̍rtaye ।
tadṛ̱taṃ tatsa̱tyam ।
tadvra̱taṃ taccha̍keyam ।
tena̍ śakeyam̱ tena̍ rādhyāsam ॥ 5 ॥))

**[[1-5-5-6]]**

ए॒कं मास॒मुद॑सृजत्।
प॒र॒मे॒ष्ठी प्र॒जाभ्य॑ः।
तेना᳚भ्यो॒ मह॒ आव॑हत्।
अ॒मृतं॒ मर्त्या᳚भ्यः।
प्र॒जामनु॒ प्रजा॑यसे।
तदु॑ ते मर्त्या॒मृत᳚म्।
येन॒ मासा॑ अर्धमा॒साः।
ऋ॒तव॑ः परिव॒त्स॒राः।
येन॒ ते ते᳚ प्रजापते।
ई॒जा॒नस्य॒ न्यव॑र्तयन्॥ ६॥

((ekam̱ māsa̱muda̍sṛjat ।
pa̱ra̱me̱ṣṭhī pra̱jābhya̍ḥ ।
tenā̎bhyo̱ maha̱ āva̍hat ।
a̱mṛtam̱ martyā̎bhyaḥ ।
pra̱jāmanu̱ prajā̍yase ।
tadu̍ te martyā̱mṛta̎m ।
yena̱ māsā̍ ardhamā̱sāḥ ।
ṛ̱tava̍ḥ parivatsa̱rāḥ ।
yena̱ te te̎ prajāpate ।
ī̱jā̱nasya̱ nyava̍rtayan ॥ 6 ॥))

**[[1-5-5-7]]**

तेना॒हम॒स्य ब्रह्म॑णा।
निव॑र्तयामि जी॒वसे᳚।
अ॒ग्निस्ति॒ग्मेन॑ शो॒चिषा᳚।
तप॒ आक्रा᳚न्तमु॒ष्णिहा᳚।
शिर॒स्तप॒स्याहि॑तम्।
वै॒श्वा॒न॒रस्य॒ तेज॑सा।
ऋ॒तेना᳚स्य॒ निव॑र्तये।
स॒त्येन॒ परि॑वर्तये।
तप॑सा॒ऽस्यानु॑वर्तये।
शि॒वेना॒स्योप॑वर्तये।
श॒ग्मेना᳚स्या॒भिव॑र्तये।
तदृ॒तं तत्स॒त्यम्।
तद्व्र॒तं तच्छ॑केयम्।
तेन॑ शकेयं॒ तेन॑ राध्यासम्॥ ७॥
परि॑वर्तये स॒हाभिर्व॑र्तय उ॒ष्णिहा॑ राध्यासं॒ न्यव॑र्तयन्नुप॑वर्तये
च॒त्वारि॑ च॥ ५॥

((tenā̱hama̱sya brahma̍ṇā ।
niva̍rtayāmi jī̱vase̎ ।
a̱gnisti̱gmena̍ śo̱ciṣā̎ ।
tapa̱ ākrā̎ntamu̱ṣṇihā̎ ।
śira̱stapa̱syāhi̍tam ।
vai̱śvā̱na̱rasya̱ teja̍sā ।
ṛ̱tenā̎sya̱ niva̍rtaye ।
sa̱tyena̱ pari̍vartaye ।
tapa̍sā̱'syānu̍vartaye ।
śi̱venā̱syopa̍vartaye ।
śa̱gmenā̎syā̱bhiva̍rtaye ।
tadṛ̱taṃ tatsa̱tyam ।
tadvra̱taṃ taccha̍keyam ।
tena̍ śakeyam̱ tena̍ rādhyāsam ॥ 7 ॥
pari̍vartaye sa̱hābhirva̍rtaya u̱ṣṇihā̍ rādhyāsam̱
nyava̍rtaya̱nnupa̍vartaye ca̱tvāri̍ ca ॥ 5 ॥))

**[[1-5-6-1]]**

दे॒वा वै यद्य॒ज्ञेऽकु॑र्वत।
तदसु॑रा अकुर्वत।
तेऽसु॑रा ऊ॒र्ध्वं पृ॒ष्ठेभ्यो॒ नाप॑श्यन्।
ते केशा॒नग्रे॑ऽवपन्त।
अथ॒ श्मश्रू॑णि।
अथो॑पप॒क्षौ।
तत॒स्तेऽवा᳚ञ्च आयन्।
परा॑ऽभवन्।
यस्यै॒वं वप॑न्ति।

अवा॑ङेति॥ १॥

((de̱vā vai yadya̱jñe'ku̍rvata ।
tadasu̍rā akurvata ।
te'su̍rā ū̱rdhvaṃ pṛ̱ṣṭhebhyo̱ nāpāśyan ।
te keśā̱nagre̍'vapanta ।
atha̱ śmaśrū̍̍ṇi ।
atho̍papa̱kṣau ।
tata̱ste'vā̎ñca āyan ।
parā̎'bhavan ।
yasyai̱vaṃ vapa̍nti ।
avā̎ṅeti ॥ 1 ॥))

**[[1-5-6-2]]**

अथो॒ प॒रैव भ॑वति।

अथ॑ दे॒वा ऊ॒र्ध्वं पृ॒ष्ठेभ्यो॑ऽपश्यन्।

त उ॑पप॒क्षाव॒ग्रे॑ऽवपन्त।

अथ॒ श्मश्रू॒॑णि।

अथ॒ केशा॑न्।

तत॒स्ते॑ऽभवन्।

सु॒व॒र्गं लो॒कमा॑यन्।

यस्यै॒वं व॒पन्ति॑।

भव॑त्या॒त्मना᳚।

अथो॑ सुव॒र्गं लो॒कमे॑ति॥ २॥

((atho̱ para̱iva bha̍vati ।
atha̍ de̱vā ū̱rdhvaṃ pṛ̱ṣṭhebhyo̍'paśyan ।
ta u̍papa̱kṣāvagre̍'vapanta ।
atha̱ śmaśrū̍̍ṇi ।
atha̱ keśā̍n ।
tata̱ste̍'bhavan ।
su̱va̱rgaṃ lo̱kamā̎yan ।
yasya̱ivaṃ vapa̍nti ।
bhava̍tyā̱tmanā̎ ।
atho̍ suva̱rgaṃ lo̱kame̍ti ॥ 2 ॥))

**[[1-5-6-3]]**

अथै॒तन्मनु॑र्व॒प्त्रे मि॑थु॒नम॑पश्यत्।

स श्मश्रू॒ण्यग्रे॑ऽवपत।

अथो॑पप॒क्षौ।

अथ॒ केशा॑न्।

ततो॒ वै स प्राजा॑यत प्र॒जया॑ प॒शुभि॑ः।

यस्यै॒वं व॒पन्ति॑।

प्र प्र॒जया॑ प॒शुभि॑र्मिथु॒नैर्जा॑यते।

दे॒वा॒सु॒राः संय॑त्ता आसन्।

ते सं॑वत्स॒रे व्याय॑च्छन्त।

तान्दे॒वाश्चा॑तुर्मा॒स्यैरे॒वाभि प्रायु॑ञ्जत॥ ३॥

((atha̱itanmanu̍rva̱ptre mi̍thu̱namá̍paśyat ।
sa śmaśrū̱ṇyagre̍'vapata ।
atho̍papa̱kṣau ।
atha̱ keśā̍n ।
tato̱ vai sa prājā̎yata pra̱jayā̎ pa̱śubhi̍ḥ ।
yasya̱ivaṃ vapa̍nti ।
pra pra̱jayā̎ pa̱śubhi̍rmithu̱nairjā̎yate ।
de̱vā̱su̱rāḥ saṃya̍ttā āsan ।
te sa̍ṃvatsa̱re vyāya̍cchanta ।
tānde̱vāścā̎turmā̱syaire̱vābhi prāyu̍ñjata ॥ 3 ॥))

**[[1-5-6-4]]**

वै॒श्व॒दे॒वेन॑ च॒तुरो॑ मा॒सो॑ऽवृञ्ज॒तेन्द्र॑राजानः।

ताञ्छी॒र्षन्नि॑ चाव॑र्तयन्त॒ परि॑ च।

व॒रु॒ण॒प्र॒घा॒सैश्च॒तुरो॑ मा॒सो॑ऽवृञ्जत॒ वरु॑णराजानः।

ताञ्छी॒र्षन्नि॑ चाव॑र्तयन्त॒ परि॑ च।

सा॒क॒मे॒धैश्च॒तुरो॑ मा॒सो॑ऽवृञ्जत॒ सोम॑राजानः।

ताञ्छी॒र्षन्नि॑ चाव॑र्तयन्त॒ परि॑ च।

या सं॑वत्स॒र उ॑पजी॒वाऽऽसी᳚त्।

तामे॑षामवृञ्जत।

ततो॑ दे॒वा अभ॑वन्।

पराऽसु॑राः॥ ४॥

((vai̱śva̱de̱vena̍ ca̱turo̍ mā̱so̍'vṛñja̱tendra̍rājānaḥ ।
tāñchī̱rṣanni̍ cāva̍rtayanta̱ pari̍ ca ।
va̱ru̱ṇa̱pra̱ghā̱saiśca̱turo̍ mā̱so̍'vṛñjata̱
varu̍ṇarājānaḥ ।
tāñchī̱rṣanni̍ cāva̍rtayanta̱ pari̍ ca ।
sā̱ka̱me̱dhaiśca̱turo̍ mā̱so̍'vṛñjata̱ soma̍rājānaḥ ।
tāñchī̱rṣanni̍ cāva̍rtayanta̱ pari̍ ca ।
yā sa̍ṃvatsa̱ra u̍pajī̱vā''sī̎t ।
tāme̍ṣāmavṛñjata ।
tato̍ de̱vā abha̍van ।
parā'su̍rāḥ ॥ 4 ॥))

**[[1-5-6-5]]**

य ए॒वं वि॒द्वाꣳश्चा॑तुर्मा॒स्यैर्यज॑ते।

भ्रातृ॑व्यस्यै॒व मा॒सो वृ॒क्त्वा।

शी॒र्षन्नि॑ च॒ व॒र्तय॑ते॒ परि॑ च।

यै॒षा सं॑वत्स॒र उ॑पजी॒वा।

वृ॒ङ्क्ते तां भ्रातृ॑व्यस्य।

क्षु॒धाऽस्य॒ भ्रातृ॑व्यः परा॑भवति।

लो॒हि॒ता॒यसे॒न निव॑र्तयते।

यद्वा इमामग्निर्ऋतावागते निवर्तयति।
एतदेवैनाꣳ रूपं कृत्वा निवर्तयति।
सा ततः श्वः श्वो भूयसी भवन्त्येति॥ ५॥

((ya evaṃ vidvām̐ścāturmāsyairyajate |
bhrātṛvyasyaiva māso vṛktvā |
śīrṣanni ca vartayate pari ca |
yaiṣā saṃvatsara upajīvā |
vṛṅkte tāṃ bhrātṛvyasya |
kṣudhā'sya bhrātṛvyaḥ parābhavati |
lohitāyasena nivartayate |
yadvā imāmagnirṛtāvāgate nivartayati |
etadevainām̐ rūpaṃ kṛtvā nivartayati |
sā tataḥ śvaḥ śvo bhūyasī bhavantyeti || 5 ||))

**[[1-5-6-6]]**

प्रजायते।
य एवं विद्वाँल्लोहितायसेन निवर्तयते।
एतदेव रूपं कृत्वा निवर्तयते।
स ततः श्वः श्वो भूयान्भवन्नेति।
प्रैव जायते।
त्रेण्या शलल्या निवर्तयेत।
त्रीणित्रीणि वै देवानामृद्धानि।
त्रीणि छन्दाꣳसि।
त्रीणि सवनानि।
त्रय इमे लोकाः॥ ६॥

((prajāyate |
ya evaṃ vidvām̐llohitāyasena nivartayate |
etadeva rūpaṃ kṛtvā nivartayate |
sa tataḥ śvaḥ śvo bhūyānbhavanneti |
praiva jāyate |
treṇyā śalalyā nivartayeta |
trīṇitrīṇi vai devānāmṛddhāni |
trīṇi chandām̐si |
trīṇi savanāni |
traya ime lokāḥ || 6 ||))

**[[1-5-6-7]]**

ऋद्ध्यामेव तद्वीर्यं एषु लोकेषु प्रतितिष्ठति।
यच्चातुर्मास्ययाज्यात्मनो नावद्येत्।
देवेभ्य आवृश्च्येत।
चतृषु चतृषु मासेषु निवर्तयेत।
परोक्षमेव तद्देवेभ्य आत्मनोऽवद्यत्यनाव्रस्काय।
देवानां वा एष आनीतः।
यश्चातुर्मास्ययाजी।
य एवं विद्वान्नि च वर्तयते परि च।
देवता एवाप्येति।
नास्य रुद्रः प्रजां पशूनभि मन्यते॥ ७॥
एत्येत्ययुञ्जतासुरा एति लोका मन्यते॥ ६॥

((ṛddhyāmeva tadvīrya eṣu lokeṣu pratitiṣṭhati |
yaccāturmāsyayājyātmano nāvadyet |
devebhya āvṛścyeta |
catṛṣu catṛṣu māseṣu nivartayeta |
parokṣameva taddevebhya
ātmano'vadyatyanāvraskāya |
devānāṃ vā eṣa ānītaḥ |
yaścāturmāsyayājī |
ya evaṃ vidvānni ca vartayate pari ca |
devatā evāpyeti |
nāsya rudraḥ prajāṃ paśūnabhi manyate || 7 ||
etyetyayuñjatāsurā eti lokā manyate || 6 ||))

**[[1-5-7-1]]**

आयुषः प्राणꣳ संतनु।
प्राणादपानꣳ संतनु।
अपानाद्व्यानꣳ संतनु।
व्यानाच्चक्षुः संतनु।
चक्षुषः श्रोत्रꣳ संतनु।
श्रोत्रान्मनः संतनु।
मनसो वाचꣳ संतनु।
वाच आत्मानꣳ संतनु।
आत्मनः पृथिवीꣳ संतनु।
पृथिव्या अन्तरिक्षꣳ संतनु।
अन्तरिक्षाद्दिवꣳ संतनु।
दिवः सुवः संतनु॥ १॥
अन्तरिक्षꣳ संतनु द्वे च॥ ७॥

((āyuṣaḥ prāṇam̐ saṃtanu |
prāṇādapānam̐ saṃtanu |
apānādvyānam̐ saṃtanu |
vyānāccakṣuḥ saṃtanu |
cakṣuṣaḥ śrotram̐ saṃtanu |
śrotrānmanaḥ saṃtanu |
manaso vācam̐ saṃtanu |
vāca ātmānam̐ saṃtanu |
ātmanaḥ pṛthivīm̐ saṃtanu |
pṛthivyā antarikṣam̐ saṃtanu |
antarikṣāddivam̐ saṃtanu |
divaḥ suvaḥ saṃtanu || 1 ||
antarikṣam̐ saṃtanu dve ca || 7 ||))

**[[1-5-8-1]]**

इन्द्रो॑ दधी॒चो अ॒स्थभिः॑।
वृ॒त्राण्यप्र॑तिष्कुतः।
ज॒घान॑ न॒वतीर्न॑व।
इ॒च्छन्नश्व॑स्य॒ यच्छिर॑ः।
पर्व॑ते॒ष्वप॑श्रितम्।
तद्वि॑दच्छर्य॒णाव॑ति।
अत्राह॒ गोर॑मन्वत।
नाम॒ त्वष्टु॑रपी॒च्य᳚म्।
इ॒त्था च॒न्द्रम॑सो गृ॒हे।
इन्द्र॒मिद्गा॒थिनो॑ बृ॒हत्॥ १॥

((indrȯ dadhī̱co a̱sthabhi̍ḥ ।
vr̥̱trāṇyaprȧtiṣkutaḥ ।
ja̱ghānȧ nava̱tīrnavȧ ।
i̱cchannaśvȧsya̱ yacchirȧḥ ।
parvȧte̱ṣvapȧśritam ।
tadvi̍daccharya̱ṇāvȧti ।
atrāha̱ goramȧnvata ।
nāma̱ tvaṣṭụrapī̱cya̎m ।
i̱tthā ca̱ndramȧso gr̥̱he ।
indra̱midgā̱thinȯ br̥̱hat ॥ 1 ॥))

**[[1-5-8-2]]**

इन्द्र॒मर्केभि॑र॒र्किण॑ः।
इन्द्र॒ं वाणी॑रनूषत।
इन्द्र॒ इद्धर्यो॒ः सचा᳚।
संमि॑श्ल॒ आव॑चो॒ युजा᳚।
इन्द्रो॑ व॒ज्री हि॑र॒ण्यय॑ः।
इन्द्रो॑ दी॒र्घाय॒ चक्ष॑से।
आ सूर्यꣳ॑ रोहयद्दि॒वि।
वि गोभि॒रद्रि॑मैरयत्।
इन्द्र॒ वाजे॑षु नो अव।
स॒हस्र॑प्रधनेषु च॥ २॥

((indrȧma̱rkebhi̍ra̱rkiṇȧḥ ।
indra̱m vāṇi̍ranūṣata ।
indra̱ iddharyo̱ḥ sacā̎ ।
sam̱mi̍śla̱ āvȧco̱ yujā̎ ।
indrȯ va̱jrī hi̍ra̱ṇyayȧḥ ।
indrȯ dī̱rghāya̱ cakṣȧse ।
ā sūryam̐̍ rohayaddi̱vi ।
vi gobhi̱radri̍mairayat ।
indra̱ vājẹ̇ṣu no ava ।
sa̱hasrȧpradhaneṣu ca ॥ 2 ॥))

**[[1-5-8-3]]**

उ॒ग्र उ॒ग्राभि॑रू॒तिभि॑ः।
तमिन्द्र॑ं वाजयामसि।
म॒हे वृ॒त्राय॒ हन्त॑वे।
स वृषा॑ वृष॒भो भु॑वत्।
इन्द्र॒ः स दाम॑ने कृ॒तः।
ओजि॑ष्ठ॒ः स बले॑ हि॒तः।
द्यु॒म्नी श्लो॒की स सौ॒म्य॑ः।
गि॒रा वज्रो॒ न संभृ॑तः।
सब॑लो॒ अन॑पच्युतः।
व॒वक्षु॑रु॒ग्रो अस्तृ॑तः॥ ३॥
बृ॒हच्चास्तृ॑तः॥ ८॥

((u̱gra u̱grābhi̍rū̱tibhi̍ḥ ।
tamindraṁ̍ vājayāmasi ।
ma̱he vr̥̱trāya̱ hantȧve ।
sa vr̥ṣȧ vr̥ṣa̱bho bhụ̇vat ।
indra̱ḥ sa dāmȧne kr̥̱taḥ ।
oji̍ṣṭha̱ḥ sa balė hi̱taḥ ।
dyu̱mnī ślo̱kī sa sau̱myȧḥ ।
gi̱rā vajro̱ na sam̱bhr̥̍taḥ ।
sabȧlo̱ anȧpacyutaḥ ।
va̱vakṣu̱ru̱gro astr̥̍taḥ ॥ 3 ॥
br̥̱haccāstr̥̍taḥ ॥ 8 ॥))

**[[1-5-9-1]]**

दे॒वा॒सु॒राः संय॑त्ता आसन्।
स प्र॒जाप॑ति॒रिन्द्र॑ं ज्येष्ठं॑ पु॒त्रमप॒ न्य॑धत्त।
नेदे॑न॒मसु॑रा॒ बली॑याꣳ॑ सोऽहन॒न्निति॑।
प्र॒ह्रादो॑ ह॒ वै का॑याध॒वः।
वि॒रोच॑न॒ꣳ॒ स्वं पु॒त्रमप॒ न्य॑धत्त।
नेदे॑नं दे॒वा अ॑हन॒न्निति॑।
ते दे॒वाः प्र॒जाप॑तिमुपस॒मेत्यो॑चुः।
ना॒रा॒ज॒कस्य॑ यु॒द्धम॑स्ति।
इन्द्र॒मन्वि॑च्छा॒मेति॑।
तं य॒ज्ञक्र॑तुभि॒रन्वै᳚च्छन्॥ १॥

((de̱vā̱su̱rāḥ sam̱yȧttā āsan ।
sa pra̱jāpȧti̱rindraṁ̍ jye̱ṣṭham pu̱tramapa̱ nyȧdhatta ।
nedėna̱masụ̇rā̱ bali̍yām̐̍ so'hana̱nniti̍ ।
pra̱hrādȯ ha̱ vai kȧ̍yādha̱vaḥ ।

v̱iroca̍nam̐̍ svaṃ pu̱tramapa̱ nya̍dhatta ।
nede̍naṃ de̱vā a̍hanaṉniti̍ ।
te de̱vāḥ pra̱jāpa̍timupasa̱metyo̍cuḥ ।
nā̱rā̱jaka̍sya yu̱ddhama̍sti ।
indra̱manvi̍cchā̱meti̍ ।
taṃ ya̍jñakra̱tubhi̱ranvai̎cchan ॥ 1 ॥))

**[[1-5-9-2]]**

तं य॑ज्ञक्र॒तुभि॒र्नान्व॑विन्दन्।
तमिष्टि॑भि॒रन्वै॑च्छन्।
तमिष्टि॑भि॒रन्व॑विन्दन्।
तदि॒ष्टीना॑मिष्टि॒त्वम्।
एष्ट॑यो ह॒ वै नाम॑।
ता इ॒ष्टय॒ इत्याच॑क्षते प॒रोक्षे॑ण।
प॒रोक्ष॑प्रिया इव॒ हि दे॒वाः।
तस्मा॑ ए॒तमा॑ग्नावैष्ण॒वमेका॑दशकपालं दीक्षणीय॒ं
निर॑वपन्।
तद॑प॒द्रुत्या॑तन्वत।
तन्पत्नी॑संया॒जान्त॒ उपा॑नयन्॥ २॥

((taṃ ya̍jñakra̱tubhi̱rnānva̍vindan ।
tamiṣṭi̍bhi̱ranvai̎cchan ।
tamiṣṭi̍bhi̱ranva̍vindan ।
tadi̱ṣṭināmi̍ṣṭi̱tvam ।
eṣṭa̍yo ha̱ vai nāma̍ ।
tā i̱ṣṭaya̱ ityāca̍kṣate pa̱rokṣe̍ṇa ।
pa̱rokṣa̍priyā iva̱ hi de̱vāḥ ।
tasmā̍ e̱tamā̎gnāvaiṣṇa̱vameka̍daśakapālaṃ
dīkṣaṇīya̱ṃ nira̍vapan ।
tada̍pa̱drutyā̍tanvata ।
tanpatnī̍saṃyā̱jānta̱ upā̍nayan ॥ 2 ॥))

**[[1-5-9-3]]**

ते तद॑न्तमे॒व कृ॒त्वोद॑द्रवन्।
ते प्रा॑य॒णीय॑म॒भि स॒मारो॑हन्।
तद॑प॒द्रुत्या॑तन्वत।
ताञ्छंय्वन्त॒ उपा॑नयन्।
ते तद॑न्तमे॒व कृ॒त्वोद॑द्रवन्।
त आ॑ति॒त्थ्यम॒भि स॒मारो॑हन्।
तद॑प॒द्रुत्या॑तन्वत।
तानिडा॑न्त॒ उपा॑नयन्।
ते तद॑न्तमे॒व कृ॒त्वोद॑द्रवन्।
तस्मा॑दे॒ता ए॒तद॑न्ता॒ इ॒ष्टय॑ः संति॑ष्ठन्ते॥ ३॥

((te tada̍ntame̱va kṛ̱tvoda̍dravan ।
te prā̍ya̱ṇīya̍ma̱bhi sa̱māro̍han ।
tada̍pa̱drutyā̍tanvata ।
tāñchaṃyva̍nta̱ upā̍nayan ।
te tada̍ntame̱va kṛ̱tvoda̍dravan ।
ta ā̍ti̱tthyama̱bhi sa̱māro̍han ।
tada̍pa̱drutyā̍tanvata ।
tāniḍā̎nta̱ upā̍nayan ।
te tada̍ntame̱va kṛ̱tvoda̍dravan ।
tasmā̍de̱tā e̱tada̍ntā̱ iṣṭa̍ya̱ḥ saṃti̍ṣṭhante ॥ 3 ॥))

**[[1-5-9-4]]**

ए॒वꣳ हि दे॒वा अकु॑र्वत।
इति॑ दे॒वा अ॑कुर्वत।
इत्यु॒ वै म॑नु॒ष्या॑ः कुर्वते।
ते दे॒वा ऊ॑चुः।
यद्वा इ॒दमु॒च्चैर्य॒ज्ञेन॒ चरा॑म।
तन्नोऽसु॑राः पा॒प्माऽनु॑विन्दन्ति।
उ॒पा॒ꣳशू॒प॒सदा॑ चराम।
तथा॒ नोऽसु॑राः पा॒प्मा नानु॑वेत्स्य॒न्तीति॑।
त उ॑पा॒ꣳशू॒प॒सद॑मतन्वत।
ति॒स्र ए॒व सा॑मि॒धे॒नीर॒नूच्य॑॥ ४॥

((e̱vam̐ hi de̱vā aku̍rvata ।
iti̍ de̱vā a̍kurvata ।
ityu̱ vai ma̍nu̱ṣyā̎ḥ kurvate ।
te de̱vā ū̍cuḥ ।
yadvā i̱damu̱ccairya̱jñena̱ carā̍ma ।
tanno'su̍rāḥ pā̱pmā'nu̍vindanti ।
u̱pā̱m̐śū̍pa̱sadā̍ carāma ।
tathā̱ no'su̍rāḥ pā̱pmā nānu̍vetsya̱ntīti̍ ।
ta u̍pā̱m̐śū̍pa̱sada̍matanvata ।
ti̱sra e̱va sā̍midhe̱nīra̱nūcya̍ ॥ 4 ॥))

**[[1-5-9-5]]**

स्रु॒वेणा॑घा॒रमा॒घार्य॑।
ति॒स्रः परा॑ची॒राहु॑तीर्हु॒त्वा।
स्रु॒वेणोप॑सद॑ं जु॒हवा॑ञ्चक्रुः।
उ॒ग्रं वचो॒ अपा॑वधीं त्वे॒षं वचो॒ अपा॑वधी॒ꣳ स्वाहेति॑।
अ॒श॒नया॒पि॒पा॒से ह॒ वा उ॒ग्रं वच॑ः।
एन॑श्च वैर॑हत्यं च त्वे॒षं वच॑ः।
ए॒तꣳ ह॒ वाव तच्च॑तुर्धा विहि॒तं पा॒प्मान॑ं दे॒वा अप॑जघ्निरे।
तथो॑ ए॒वैतद्दे॑वं विद्यज॑मानः।
ति॒स्र ए॒व सा॑मि॒धे॒नीर॒नूच्य॑।
स्रु॒वेणा॑घा॒रमा॒घार्य॑॥ ५॥

((sruveṇā̍ghā̱ramā̱ghāryā̍ ।
ti̱sraḥ parā̍cī̱rāhu̍tīrhu̱tvā ।
sru̱veṇo̍pa̱sada̍ṃ juha̱vāñca̍kruḥ ।
u̱graṃ vaco̱ apā̍vadhīṃ tve̱ṣaṃ vaco̱ apā̍vadhī̱m̐ svāheti̍ ।
a̱śa̱na̱yā̱pi̱pā̱se ha̱ vā u̱graṃ vaca̍ḥ ।
ena̍śca̱ vairā̍hatyaṃ ca tve̱ṣaṃ vaca̍ḥ ।
e̱tam̐ ha̱ vāva taccā̍turdhā vihi̱taṃ pā̱pmāna̍ṃ de̱vā apā̍jaghnire ।
tatho̍ e̱vaitade̍vaṃ̱ vidyajā̍mānaḥ ।
ti̱sra e̱va sā̍midhe̱nīra̱nūcyā̍ ।
sru̱veṇā̍ghā̱ramā̱ghāryā̍ ॥ 5 ॥))

**[[1-5-9-6]]**

ति॒स्रः परा॑ची॒राहु॑ती॒र्हु॒त्वा।
स्रु॒वेणो॑प॒सद॑ं जु॒होति॑।
उ॒ग्रं वचो॒ अपा॑वधीं त्वे॒षं वचो॒ अपा॑वधी॒ꣳ स्वाहेति॑।
अ॒श॒न॒या॒पि॒पा॒से ह॒ वा उ॒ग्रं वच॑ः।
एन॑श्च॒ वैर॑हत्यं च त्वे॒षं वच॑ः।
ए॒तमे॒व तच्च॑तु॒र्धा विहि॒तं पा॒प्मान॑ं यज॑मा॒नोऽप॑हते।
तेऽभि॒नीयै॒वाह॑ः प॒शुमाऽल॑भन्त।
अह्न॑ ए॒व तद्दे॒वा अव॑र्तिं पा॒प्मान॑ं मृ॒त्युमप॑जघ्निरे।
तेना॑भि॒नीये॑व॒ रात्रे॑ः प्राच॑रन्।
रात्रि॑या ए॒व तद्दे॒वा अव॑र्तिं पा॒प्मान॑ं मृ॒त्युमप॑जघ्निरे॥ ६॥

((ti̱sraḥ parā̍cī̱rāhu̍tīrhu̱tvā ।
sru̱veṇo̍pa̱sada̍ṃ juhoti ।
u̱graṃ vaco̱ apā̍vadhīṃ tve̱ṣaṃ vaco̱ apā̍vadhī̱m̐ svāheti̍ ।
a̱śa̱na̱yā̱pi̱pā̱se ha̱ vā u̱graṃ vaca̍ḥ ।
ena̍śca̱ vairā̍hatyaṃ ca tve̱ṣaṃ vaca̍ḥ ।
e̱tame̱va taccā̍turdhā vihi̱taṃ pā̱pmāna̱ṃ yajā̍mā̱no'pa̍hate ।
te̍'bhi̱nīyai̱vāhā̍ḥ pa̱śumā'la̍bhanta ।
ahna̍ e̱va tadde̱vā avā̍rtiṃ pā̱pmāna̍ṃ mṛ̱tyumapā̍jaghnire ।
tenā̍bhi̱nīye̍va̱ rātre̱ḥ prāca̍ran ।
rātri̍yā e̱va tadde̱vā avā̍rtiṃ pā̱pmāna̍ṃ mṛ̱tyumapā̍jaghnire ॥ 6 ॥))

**[[1-5-9-7]]**

तस्मा॑दभि॒नीयै॒वाह॑ः प॒शुमाल॑भेत।
अह्न॑ ए॒व तद्यज॑मा॒नोऽव॑र्तिं पा॒प्मान॒ं भ्रातृ॑व्या॒नप॑नुदते।
तेना॑भि॒नीये॑व॒ रात्रे॑ः प्रच॑रेत्।
रात्रि॑या ए॒व तद्यज॑मा॒नोऽव॑र्तिं पा॒प्मान॒ं भ्रातृ॑व्या॒नप॑नुदते।
स ए॒ष उ॑पवस॒थीयेऽह॑न्द्विदेव॒त्य॑ः प॒शुराल॑भ्यते।
द्व॒यं वा अ॒स्मिꣳल्लो॒के यज॑मानः।
अस्थि॑ च मा॒ꣳसं च॑।
अस्थि॑ चै॒व तेन॑ मा॒ꣳसं च॒ यज॑मान॒ः स॒ꣳस्कु॑रुते।
ता वा ए॒ताः पञ्च॑ दे॒वता॑ः।
अ॒ग्नीषोमा॑व॒ग्निर्मि॒त्रावरु॑णौ॥ ७॥

((tasmā̍dabhi̱nīyai̱vāhā̍ḥ pa̱śumālā̍bheta ।
ahna̍ e̱va tadyajā̍mā̱no'vā̍rtiṃ pā̱pmāna̱ṃ bhrātṛ̍vyā̱napā̍nudate ।
tenā̍bhi̱nīye̍va̱ rātre̱ḥ pracā̍ret ।
rātri̍yā e̱va tadyajā̍mā̱no'vā̍rtiṃ pā̱pmāna̱ṃ bhrātṛ̍vyā̱napā̍nudate ।
sa e̱ṣa u̍pavasa̱thīye'hā̍ndvideva̱tyā̍ḥ pa̱śurālā̍bhyate ।
dva̱yaṃ vā a̱smim̐llo̱ke yajā̍mānaḥ ।
asthi̍ ca mā̱m̐saṃ cā̍ ।
asthi̍ ca̱iva tenā̍ mā̱m̐saṃ ca̱ yajā̍māna̱ḥ sa̱m̐skū̍rute ।
tā vā e̱tāḥ pañcā̍ de̱vatā̍ḥ ।
a̱gnīṣomā̍va̱gnirmi̱trāvarū̍ṇau ॥ 7 ॥))

**[[1-5-9-8]]**

प॒ञ्चप॑ञ्ची वै यज॑मानः।
त्वङ्मा॒ꣳ स॒ꣳ स्नावाऽस्थि॑ म॒ज्जा।
ए॒तमे॒व तत्प॑ञ्चधा विहि॒तमा॒त्मान॑ं वरुणपा॒शान्मु॑ञ्चति।
भे॒षजता॑यै निर्वरु॒णत्वाय॑।
तꣳ स॒प्तभि॒श्छन्दो॑भिः प्रा॒तर॑ह्वयन्।
तस्मा॑त्स॒प्त च॑तुरु॒त्तरा॒णि छन्दा॒ꣳसि
प्रातरनु॒वाकेऽनू॑च्यन्ते।
तमे॒तयौप॒समे॒त्योपा॑सीदन्।
उपा॑स्मै गायता नर॒ इति॑।
तस्मा॑दे॒तया॑ बहिष्पवमा॒न उ॑प॒सद्य॑ः॥ ८॥
ऐ॒च्छ॒न्न॒न॒य॒ꣳ॒स्ति॒ष्ठ॒न्ते॒ऽनूच्यानूच्य॑ स्रु॒वेणा॑घा॒रमा॒घार्य॑
रात्रि॑या ए॒व तद्दे॒वा अव॑र्तिं पा॒प्मान॑ं मृ॒त्युमप॑जघ्निरे
मि॒त्रावरु॑णौ॒ नव॑ च॥ ९॥
दे॒वा यज॑मानो दे॒वा दे॒वा यज॑मानो॒ यज॑मानोऽलभन्त॒
प्राच॑रन्लभेत॒ प्रच॑रे॒दाल॑भ॒न्ताल॑भेत मृ॒त्युमप॑जघ्निरे॒
भ्रातृ॑व्यान्॥

((pa̱ñca̱pa̱ñcī vai yajā̍mānaḥ ।
tva̍ṅmā̱m̐ sa̱m̐ snāvā'sthi̍ ma̱jjā ।
e̱tame̱va tatpā̍ñcadhā vihi̱tamā̱tmānā̍ṃ varuṇa̱pā̱śānmū̍ñcati ।
bhe̱ṣa̱jatā̍yai nirvaru̱ṇatvāyā̍ ।
tam̐ sa̱ptabhi̱ṣchando̍bhiḥ prā̱tarā̍hvayan ।
tasmā̱tsa̱pta cā̍turutta̱rā̱ṇi̱ chandā̱m̐si

prātaranuvā̱ke'nū̎cyante |
tame̱tayo̍pasa̱metyopā̍sīdan |
upā̎smai gāyatā nara̱ iti̍ |
tasmā̍de̱tayā̍ bahiṣpavamā̱na u̍pa̱sadya̍ḥ || 8 ||
ai̱cchanna̱naya̱ṁ̎stiṣṭha̱nte̱'nūcyā̱nūcya̍
sru̱ve̱ṇā̍ghā̱ramāghārya̱ rātri̍yā e̱va tadde̱vā ava̍rti̱m
pāpmāna̍ṁ mṛtyumapa̍jaghnire mi̱trāvaru̍ṇau̱ nava̍
ca || 9 ||
de̱vā yaja̍māno de̱vā de̱vā yaja̍māno̱
yaja̍māno'labhanta̱ prāca̍ranlabheta̱
praca̍re̱dāla̍bha̱ntāla̍bheta mṛ̱tyumapa̍jaghnire̱
bhrāṯṛ̍vyān ||))

**[[1-5-10-1]]**

स स॑मु॒द्र उ॑त्तर॒तः प्राज्व॑लद्भू॒म्य॒न्तेन॑।
ए॒ष वाव स स॑मु॒द्रः।
यच्चात्वा॑लः।
ए॒ष उ॑ वे॒व स भू᳚म्य॒न्तः।
यद्वे᳚द्य॒न्तः।
तदे॒तत्त्रि॑श॒लं त्रि॑पूरु॒षम्।
तस्मा॒त्तं त्रि॑वित॒स्तं खन॑न्ति।
स सु॑वर्णरज॒ताभ्या᳚ं कु॒शीभ्या॒ं परि॑गृहीत आसीत्।
तं यद॒स्या अध्य॒जन॑यन्।
तस्मा॑दादि॒त्यः॥ १॥

((sa sa̍mu̱dra u̍ttara̱taḥ prājva̍ladbhūmya̱ntena̍ |
e̱ṣa vāva sa sa̍mu̱draḥ |
yaccātvā̍laḥ |
e̱ṣa u̍ ve̱va sa bhū̎mya̱ntaḥ |
yadve̎dya̱ntaḥ |
tade̱tattri̍śa̱laṃ tri̍pūru̱ṣam |
tasmā̱ttaṃ tri̍vita̱staṃ khana̍nti |
sa su̍varṇaraja̱tābhyā̎ṃ ku̱śībhyā̱ṃ pari̍gṛhīta āsīt |
taṃ yada̱syā adhya̱jana̍yan |
tasmā̍dādi̱tyaḥ || 1 ||))

**[[1-5-10-2]]**

अथ॒ यत्सु॑वर्णरज॒ताभ्या᳚ं कु॒शीभ्या॒ं परि॑गृहीत॒ आसी॑त्।
साऽस्य॑ कौशि॒कता᳚।
तं त्रि॒वृता॒ऽभि प्रास्तु॑वत।
तं त्रि॒वृताऽऽद॑दत।
तं त्रि॒वृताऽऽह॑रन्।
याव॑ती त्रि॒वृतो॒ मात्रा᳚।
तं प॑ञ्चद॒शेना॒भि प्रास्तु॑वत।
तं प॑ञ्चद॒शेनाद॑दत।
तं प॑ञ्चद॒शेनाह॑रन्।
याव॑ती पञ्चद॒शस्य॒ मात्रा᳚॥ २॥

((atha̱ yatsu̍varṇaraja̱tābhyā̎ṃ ku̱śībhyā̱ṃ pari̍gṛhīta̱ āsī̎t |
sā'sya̍ kauśi̱katā̎ |
taṃ tri̱vṛtā̱'bhi prāstu̍vata |
taṃ tri̱vṛtā''da̍data |
taṃ tri̱vṛtā''ha̍ran |
yāva̍tī tri̱vṛto̱ mātrā̎ |
taṃ pa̍ñcada̱śenā̱bhi prāstu̍vata |
taṃ pa̍ñcada̱śenāda̍data |
taṃ pa̍ñcada̱śenāha̍ran |
yāva̍tī pañcada̱śasya̱ mātrā̎ || 2 ||))

**[[1-5-10-3]]**

तꣳ स॑प्तद॒शेना॒भि प्रास्तु॑वत।
तꣳ स॑प्तद॒शेनाद॑दत।
तꣳ स॑प्तद॒शेनाह॑रन्।
याव॑ती सप्तद॒शस्य॒ मात्रा᳚।
तस्य॑ सप्तद॒शेन॑ ह्रि॒यमा॑णस्य॒ तेजो॒ हरो॑ऽपतत्।
तमे॑कवि॒ꣳ॒शेना॒भि प्रास्तु॑वत।
तमे॑कवि॒ꣳ॒शेनाद॑दत।
तमे॑कवि॒ꣳ॒शेनाह॑रन्।
याव॑त्येकवि॒ꣳ॒शस्य॒ मात्रा᳚।
ते यत्त्रि॒वृता᳚ स्तु॒वते᳚॥ ३॥

((taṁ̎ sa̍ptada̱śenā̱bhi prāstu̍vata |
taṁ̎ sa̍ptada̱śenāda̍data |
taṁ̎ sa̍ptada̱śenāha̍ran |
yāva̍tī saptada̱śasya̱ mātrā̎ |
tasya̍ saptada̱śena̍ hri̱yamā̍ṇasya̱ tejo̱ haro̍'patat |
tame̍kavi̱ṁ̎śenā̱bhi prāstu̍vata |
tame̍kavi̱ṁ̎śenāda̍data |
tame̍kavi̱ṁ̎śenāha̍ran |
yāva̍tyekavi̱ṁ̎śasya̱ mātrā̎ |
te yattri̱vṛtā̎ stu̱vate̎ || 3 ||))

**[[1-5-10-4]]**

त्रि॒वृतै॒व तद्यज॑मान॒माद॑दते।
तं त्रि॒वृतै॒व ह॑रन्ति।
याव॑ती त्रि॒वृतो॒ मात्रा᳚।
अ॒ग्निर्वै᳚ त्रि॒वृत्।
याव॒द्वा अ॒ग्नेर्दह॑तो धू॒म उ॒देत्या॑नु॒ व्येति॑।
ताव॑ती त्रि॒वृतो॒ मात्रा᳚।
अ॒ग्नेरे॒वैन॒ं तत्।
मात्रा॒ꣳ॒ सायु॑ज्यꣳ सलो॒कता᳚ं गमयन्ति।

अथ॒ यत्प॑ञ्चद॒शेन॑ स्तु॒वते᳚।
प॒ञ्च॒द॒शेनै॒व तद्यज॑मान॒माद॑दते॥ ४॥

((tri̱vṛtai̱va tadyaja̍māna̱mādā̍date |
taṃ tri̱vṛtai̱va ha̍ranti |
yāva̍tī tri̱vṛto̱ mātrā̎ |
a̱gnirvai tri̱vṛt |
yāva̱dvā a̱gnerdaha̍to dhū̱ma u̱detyānu̱ vyeti̍ |
tāva̍tī tri̱vṛto̱ mātrā̎ |
a̱gnere̱vaina̱ṃ tat |
mātrā̱ṃ̐ sāyu̍jyaṃ̐ salo̱katā̎ṃ gamayanti |
atha̱ yatpa̍ñcada̱śena̍ stu̱vate̎ |
pa̱ñca̱da̱śenai̱va tadyaja̍māna̱mādā̍date || 4 ||))

**[[1-5-10-5]]**

तं प॑ञ्चद॒शेनै॒व ह॑रन्ति।
याव॑ती पञ्चद॒शस्य॒ मात्रा᳚।
च॒न्द्रमा॒ वै प॑ञ्चद॒शः।
ए॒ष हि प॑ञ्चद॒श्याम॑पक्षी॒यते᳚।
प॒ञ्च॒द॒श्यामा॑पू॒र्यते᳚।
च॒न्द्रम॑स ए॒वैन॒ं तत्।
मात्रा॒ꣳ सायु॑ज्यꣳ सलो॒कता᳚ं गमयन्ति।
अथ॒ यत्स॑प्तद॒शेन॑ स्तु॒वते᳚।
स॒प्त॒द॒शेनै॒व तद्यज॑मान॒माद॑दते।
तꣳ स॑प्तद॒शेनै॒व ह॑रन्ति॥ ५॥

((ta̱ṃ pa̍ñcada̱śenai̱va ha̍ranti |
yāva̍tī pañcada̱śasya̱ mātrā̎ |
ca̱ndramā̱ vai pa̍ñcada̱śaḥ |
e̱ṣa hi pa̍ñcada̱śyāma̍pakṣ̱īyate̎ |
pa̱ñca̱da̱śyāmā̍pū̱ryate̎ |
ca̱ndrama̍sa e̱vaina̱ṃ tat |
mātrā̱ṃ̐ sāyu̍jyaṃ̐ salo̱katā̎ṃ gamayanti |
atha̱ yatsa̍ptada̱śena̍ stu̱vate̎ |
sa̱pta̱da̱śenai̱va tadyaja̍māna̱mādā̍date |
taṃ̐ sa̍ptada̱śenai̱va ha̍ranti || 5 ||))

**[[1-5-10-6]]**

याव॑ती सप्तद॒शस्य॒ मात्रा᳚।
प्र॒जाप॑ति॒र्वै स॑प्तद॒शः।
प्र॒जाप॑ते॒रे॒वैन॒ं तत्।
मात्रा॒ꣳ सायु॑ज्यꣳ सलो॒कता᳚ं गमयन्ति।
अथ॒ यदे॑कवि॒ꣳ॒शेन॑ स्तु॒वते᳚।
ए॒क॒वि॒ꣳ॒शेनै॒व तद्यज॑मान॒माद॑दते।
तमे॑कवि॒ꣳ॒शेनै॒व ह॑रन्ति।

याव॑त्येकवि॒ꣳ॒शस्य॒ मात्रा᳚।
अ॒सौ वा आ॑दि॒त्य ए॑कवि॒ꣳ॒शः।
आ॒दि॒त्यस्यै॒वैन॒ं तत्॥ ६॥

((yāva̍tī saptada̱śasya̱ mātrā̎ |
pra̱jāpa̍ti̱rvai sa̍ptada̱śaḥ |
pra̱jāpa̍tere̱vaina̱ṃ tat |
mātrā̱ṃ̐ sāyu̍jyaṃ̐ salo̱katā̎ṃ gamayanti |
atha̱ yade̍kavi̱ṃ̐śena̍ stu̱vate̎ |
e̱ka̱vi̱ṃ̐śenai̱va tadyaja̍māna̱mādā̍date |
tame̍kavi̱ṃ̐śenai̱va ha̍ranti |
yāva̍tyekavi̱ṃ̐śasya̱ mātrā̎ |
a̱sau vā ā̍di̱tya e̍kavi̱ṃ̐śaḥ |
ā̱di̱tyasyai̱vaina̱ṃ tat || 6 ||))

**[[1-5-10-7]]**

मात्रा॒ꣳ सायु॑ज्यꣳ सलो॒कता᳚ं गमयन्ति।
ते कु॒श्यौ᳚।
व्य॑घ्नन्।
ते अ॑हो॒रा॒त्रे अ॑भवताम्।
अह॑रे॒व सु॒वर्णा᳚ऽभवत्।
र॒ज॒ता रात्रि॑ः।
स यदा॑दि॒त्य उ॒देति॑।
ए॒ताम॒ेव तत्सु॒वर्णा᳚ं कु॒शीमनु॒ समे॑ति।
अथ॒ यद॑स्त॒मेति॑।
ए॒ताम॒ेव तद्र॑ज॒तां कु॒शीमनु॒ संवि॑शति।
प्र॒ह्रादो॑ ह॒ वै का॑याध॒वः।
वि॒रोच॑न॒ꣳ॒ स्वं पु॒त्रमुदा॑स्यत्।
स प्र॑द॒रो॑ऽभवत्।
तस्मा᳚त्प्रद॒राद॑ुद॒कं नाचा॑मेत्॥ ७॥
आ॒दि॒त्यः प॑ञ्चद॒शस्य॒ मात्रा᳚ स्तु॒वते॑ पञ्चद॒शेनै॒व
तद्यज॑मान॒माद॑दते सप्तद॒शेनै॒व ह॑रन्त्यादि॒त्यस्यै॒वैन॒ं
तद्विꣳ॑शति च॒त्वारि॑ च॥ १०॥

((mātrā̱ṃ̐ sāyu̍jyaṃ̐ salo̱katā̎ṃ gamayanti |
te ku̱śyau̎ |
vya̍ghnan |
te a̍horā̱tre a̍bhavatām |
ahā̍re̱va su̱varṇā̍'bhavat |
ra̱ja̱tā rātri̍ḥ |
sa yadā̍di̱tya u̱deti̍ |
e̱tāme̱va tatsu̱varṇā̎ṃ ku̱śīmanu̱ same̍ti |
atha̱ yadā̍sta̱meti̍ |
e̱tāme̱va tadrā̍ja̱tāṃ ku̱śīmanu̱ saṃvi̍śati |
pra̱hrādo̍ ha̱ vai kā̍yādha̱vaḥ |

vi̱rocána̱m̐̄ svam pu̱tramudā̍syat ।
sa prá̱da̱ró'bhavat ।
tasmā̍tprada̱rādú̱da̱kam nācá̍met ॥ 7 ॥
ā̱di̱tyaḥ páñcada̱śasya̱ mātrā̍ stu̱vate̍
pañcada̱śenai̱va tadyajá̱mānamā̱dádate
saptada̱śenai̱va hárantyā̱di̱tyasyai̱vainam̱ tadví̍śati
ca̱tvāri̍ ca ॥ 10 ॥))

**[[1-5-11-1]]**

ये वै च॒त्वार॒ः स्तोमा॑ः।
कृ॒तं तत्।
अथ॒ ये पञ्च॑।
कलि॒ः सः।
तस्मा॒च्चतु॑ष्टोमः।
तच्चतु॑ष्टोमस्य चतुष्टोम॒त्वम्।
तदा॑हुः।
क॒तमा॑नि॒ तानि॒ ज्योतीꣳषि।
य ए॒तस्य॒ स्तोमा॒ इति॑।
त्रि॒वृत्प॑ञ्चद॒शः स॑प्तद॒श ए॑कवि॒ꣳ॒शः॥ १॥

((ye vai ca̱tvāra̱ḥ stomā̍ḥ ।
kṛ̱tam tat ।
atha̱ ye pañcá ।
kali̱ḥ saḥ ।
tasmā̱ccatú̱ṣṭomaḥ ।
taccatú̱ṣṭomasya catuṣṭoma̱tvam ।
tadá̍huḥ ।
ka̱ta̱māni̱ tāni̱ jyotīm̐̍ṣi ।
ya e̱tasya̱ stomā̱ iti̍ ।
tri̱vṛtpáñcada̱śaḥ sáptada̱śa ékavi̱m̐̍śaḥ ॥ 1 ॥))

**[[1-5-11-2]]**

ए॒तानि॒ वाव तानि॒ ज्योतीꣳषि।
य ए॒तस्य॒ स्तोमा॑ः।
सो॑ऽब्रवीत्।
स॒प्त॒द॒शेन॑ ह्रि॒यमा॑णो॒ व्य॑लेशिषि।
भि॒षज्य॑त॒मेति॑।
तम॒श्विनौ॑ धा॒नाभि॑रभिषज्यताम्।
पू॒षा क॑र॒म्भेण॑।
भार॑ती परि॒वा॒पेण॑।
मि॒त्रावर॑ुणौ पय॒स्य॑या।
तदा॑हुः॥ २॥

((e̱tāni̱ vāva tāni̱ jyotīm̐̍ṣi ।
ya e̱tasya̱ stomā̍ḥ ।
sö'bravīt ।
sa̱pta̱da̱śená hri̱yamā́ṇo̱ vyálesiṣi ।
bhi̱ṣajyáta̱meti̍ ।
tama̱śvinaú dhā̱nābhi̍rabhiṣajyatām ।
pū̱ṣā kára̱mbheṇá ।
bhārátī parivā̱peṇá ।
mi̱trāvarú̱ṇau paya̱syáyā ।
tadá̍huḥ ॥ 2 ॥))

**[[1-5-11-3]]**

य॒द॒श्विभ्या॑ं धा॒नाः।
पू॒ष्णः क॑र॒म्भः।
भार॑त्यै परि॒वा॒पः।
मि॒त्रावर॑ुणयोः पय॒स्याऽथ॑।
कस्मा॑दे॒तेषाꣳ ह॒विषा॒मिन्द्र॑मे॒व य॑ज॒न्तीति॑।
ए॒ता ह्ये॑नं दे॒वता॒ इति॑ ब्रूयात्।
ए॒तैर्ह॑विर्भि॑रभि॑षज्यꣳ॒स्तस्मा॒दिति॑।
तं वस॑वो॒ऽष्टाक॑पालेन प्रातःसव॒ने॑ऽभिषज्यन्।
रु॒द्रा एका॑दशकपाले॒न माध्य॑न्दि॒ने सव॑ने।
विश्वे॑ दे॒वा द्वाद॑शकपालेन तृतीयसव॒ने॥ ३॥

((ya̱daśvibhyā̍m dhā̱nāḥ ।
pū̱ṣṇaḥ kára̱mbhaḥ ।
bhārátyai parivā̱paḥ ।
mi̱trāvarú̱ṇayoḥ paya̱syā'thá ।
kasmā́de̱teṣām̐̍ ha̱viṣā̱mindráme̱va yája̱ntīti̍ ।
e̱tā hyénam de̱vatā̱ iti̍ brūyāt ।
e̱tairha̱virbhirabhí̱ṣajya̱m̐̍stasmā̱diti̍ ।
tam vasávo̱'ṣṭākápālena prātaḥsava̱né'bhiṣajyan ।
ru̱drā ekā́daśakapālena̱ mādhyándine̱ savane ।
viśvé de̱vā dvādáśakapālena tṛtīyasava̱ne ॥ 3 ॥))

**[[1-5-11-4]]**

स यद॒ष्टाक॑पालान्प्रातःसव॒ने कु॑र्यात्।
एका॑दश कपाला॒न्माध्य॑न्दि॒ने सव॑ने।
द्वाद॑शकपालाꣳस्तृतीयसव॒ने।
विलो॑म॒ तद्यज्ञस्य॑ क्रियेत।
एका॑दशकपाला॒नेव प्रा॑तःसव॒ने कु॑र्यात्।
एका॑दशकपाला॒न्माध्य॑न्दि॒ने सव॑ने।
एका॑दशकपालाꣳस्तृतीयसव॒ने।
य॒ज्ञस्य॑ सलोम॒त्वाय॑।
तदा॑हुः।
यद्वसू॑नां प्रातःसव॒नम्।
रु॒द्राणां॑ माध्य॑न्दि॒नꣳ सव॑नम्।

विश्वे॑षां दे॒वाना᳚ं तृ॒तीयसव॒नम्।
अ॒थ कस्मा॑दे॒तेषा᳚ꣳ ह॒विषा॒मिन्द्र॑मे॒व य॑ज॒न्तीति॑।
ए॒ता ह्ये॑नं दे॒वता॒ इति॑ ब्रूयात्।
ए॒तैर्ह॒विर्भि॒रभि॑षज्य॒ꣳ॒स्तस्मा॒दिति॑॥ ४॥
ए॒क॒वि॒ꣳ॒श आ॑हुस्तृतीयसव॒ने प्रा॑तः सव॒नं पञ्च॑ च॥ ११॥

((sa yada̱ṣṭākā̍pālānprātaḥsava̱ne ku̱ryāt |
ekā̍daśa kapālā̱nmādhyā̍ndine̱ savā̍ne |
dvādā̍śakapālām̐̍stṛtīyasava̱ne |
vilo̍ma̱ tadyajñasyā̍ kriyeta |
ekā̍daśakapālāne̱va prā̍taḥsava̱ne kū̍ryāt |
ekā̍daśakapālā̱nmādhyā̍ndine̱ savā̍ne |
ekā̍daśakapālām̐̍stṛtīyasava̱ne |
ya̱jñasyā̍ salomatvāyā̍ |
tadā̍huḥ |
yadvasū̍nām prātaḥsava̱nam|
ru̱drāṇā̱m mādhyā̍ndina̱m̐̍ savā̍nam |
viśve̍ṣām de̱vānā᳚m tṛtīyasava̱nam |
atha̱ kasmā̍de̱teṣām̐̍ ha̱viṣā̱mindrā̍me̱va yā̍ja̱ntīti̍ |
e̱tā hye̍nam de̱vatā̱ iti̍ brūyāt |
e̱tairha̱virbhi̱rabhi̍ṣajya̱m̐̍stasmā̱diti̍ || 4 ||
e̱ka̱vi̱m̐̍śa ā̍hustṛtīyasava̱ne prā̍taḥ sava̱nam pañcā̍ ca || 11 ||))

**[[1-5-12-1]]**

तस्या॒ वा॑चोऽवपा॒दाद॑बिभयुः।
तमे॒तेषु॑ स॒प्तसु॒ छन्दः॑स्वश्रयन्।
यद॑श्रयन्।
तच्छ्रा॑य॒न्तीय॑स्य श्रायन्तीय॒त्वम्।
यद॑वारयन्।
तद्वा॑रव॒न्तीय॑स्य वारवन्तीय॒त्वम्।
तस्या॒ वा॑च ए॒वाव॑पा॒दाद॑बिभयुः।
तस्मा॑ ए॒तानि॑ स॒प्त चतु॑रुत्त॒राणि॒ छन्दा॒ꣳ॒स्युपा॑दधुः।
तेषा॒मति॒ त्रीण्य॑रिच्यन्त।
न त्रीण्युद॑भवन्॥ १॥

((tasyā vā̍co'vapā̱dādā̍bibhayuḥ |
tame̱teṣu̍ sa̱ptasu̱ chandā̍ḥsvaśrayan |
yadaśrā̍yan |
tacchrā̍ya̱ntīyā̍sya śrāyantīya̱tvam |
yadavā̍rayan |
tadvā̍rava̱ntīyā̍sya vāravantīya̱tvam |
tasyā vā̍ca e̱vāvā̍pā̱dādā̍bibhayuḥ |
tasmā̍ e̱tāni̍ sa̱pta cā̍turutta̱rāṇi̱
chandā̱m̐̍syupā̍dadhuḥ |
teṣā̱mati̱ trīṇyā̍ricyanta |
na trīṇyudā̍bhavan || 1 ||))

**[[1-5-12-2]]**

स बृ॑ह॒तीमे॒वास्पृ॑शत्।
द्वाभ्या॑मक्ष॒रा᳚भ्याम्।
अ॒हो॒रा॒त्राभ्या॑मे॒व।
तदा॑हुः।
क॒त॒मा सा दे॒वाक्ष॑रा बृ॒ह॒ती।
यस्यां॒ तत्प्र॒त्यति॑ष्ठत्।
द्वाद॑श पौर्ण॒मा॒स्यः॑।
द्वा॒द॒शाष्ट॑काः।
द्वाद॑शामावा॒स्या᳚ः।
ए॒षा वाव सा दे॒वाक्ष॑रा बृ॒ह॒ती॥ २॥

((sa bṛ̍ha̱tīme̱vāspṛ̍śat |
dvābhyā̍ma̱kṣarā᳚bhyām |
a̱ho̱rā̱trābhyā̍me̱va |
tadā̍huḥ |
ka̱ta̱mā sā de̱vākṣā̍rā bṛha̱tī |
yasyā̱m tatpra̱tyati̍ṣṭhat |
dvādā̍śa paurṇa̱mā̱syā̍ḥ |
dvāda̱śāṣṭā̍kāḥ |
dvādā̍śāmāvā̱syā᳚ḥ |
e̱ṣā vāva sā de̱vākṣā̍rā bṛha̱tī || 2 ||))

**[[1-5-12-3]]**

यस्यां॒ तत्प्र॒त्यति॑ष्ठ॒दिति॑।
यानि॑ च॒ छन्दा॒ꣳ॒स्य॒त्यरि॑च्यन्त।
यानि॑ च॒ नोद॑भवन्।
तानि॒ निर्वी᳚र्याणि॒ ही॒नान्य॑मन्यन्त।
साऽब्र॑वीद्बृह॒ती।
मामे॒व भू॒त्वा।
मामुप॒ स॒ꣳ॒श्र॑य॒तेति॑।
च॒तुर्भि॑रक्ष॒रैर॑नुष्टुग्बृह॒तीं नोद॑भवत्।
च॒तुर्भि॑रक्ष॒रैः᳚ प॒ङ्क्तिर्बृ॒ह॒तीमत्य॑रिच्यत।
तस्या॑मे॒तानि॑ च॒त्वार्य॑क्षरा᳚ण्यप॒च्छिद्या॑दधात्॥ ३॥

((yasyā̱m tatpra̱tyati̍ṣṭha̱diti̍ |
yāni̍ ca̱ chandām̐̍sya̱tyari̍cyanta |
yāni̍ ca̱ nodabhā̍van |
tāni̱ nirvī᳚ryā̱ṇi hī̱nānyā̍manyanta |
sā'brā̍vīdbṛha̱tī |
māme̱va bhū̱tvā |
māmupa̱ sam̐̍śraya̱teti̍ |
ca̱turbhi̍ra̱kṣarai̍ranuṣṭugbṛ̍ha̱tīm nodā̍bhavat |
ca̱turbhi̍rakṣa̱rai̍ḥ pa̱ṅktirbṛ̍ha̱tīmatyā̍ricyata |
tasyā̍me̱tāni̍ ca̱tvārya̱kṣarā᳚ṇyapa̱cchidyā̍dadhāt || 3 ||))

**[[1-5-12-4]]**

ते बृ॑ह॒ती ए॒व भू॒त्वा।
बृ॒ह॒तीमुप॒ सम॑श्रयताम्।
अ॒ष्टा॒भिर॒क्षरै॑रु॒ष्णिग्बृ॑ह॒तीं नोद॑भवत्।
अ॒ष्टा॒भिर॒क्षरै᳚स्त्रि॒ष्टुग्बृ॑ह॒तीमत्य॑रिच्यत।
तस्या॑मे॒तान्य॒ष्टाव॒क्षरा᳚ण्यप॒च्छिद्या॑दधात्।
ते बृ॑ह॒ती ए॒व भू॒त्वा।
बृ॒ह॒तीमुप॒ सम॑श्रयताम्।
द्वा॒द॒श॒भि॑र॒क्षरै᳚र्गा॒य॒त्री बृ॑ह॒तीं नोद॑भवत्।
द्वा॒द॒श॒भि॑र॒क्षरै॒र्जग॑ती बृ॒ह॒तीमत्य॑रिच्यत।
तस्या॑मे॒तानि॒ द्वाद॑शा॒क्षरा᳚ण्यप॒च्छिद्या॑दधात्॥ ४॥

((te bṛ̍ha̱tī e̱va bhū̱tvā ।
bṛ̱ha̱tīmupa̱ samā̍śrayatām ।
a̱ṣṭā̱bhira̱kṣarai̍ru̱ṣṇigbṛ̍ha̱tīṃ nodá̍bhavat ।
a̱ṣṭā̱bhira̱kṣarai̎striṣṭugbṛ̍ha̱tīmatya̍ricyata ।
tasyā̍me̱tānya̱ṣṭāva̱kṣarā̎ṇyapa̱cchidyā̍dadhāt ।
te bṛ̍ha̱tī e̱va bhū̱tvā ।
bṛ̱ha̱tīmupa̱ samā̍śrayatām ।
dvā̱da̱śabhi̍ra̱kṣarai̎rgāya̱trī bṛ̍ha̱tīṃ nodá̍bhavat ।
dvā̱da̱śabhi̍ra̱kṣarai̱rjagatī bṛ̱ha̱tīmatya̍ricyata ।
tasyā̍me̱tāni̱ dvādá̍śā̱kṣarā̎ṇyapa̱cchidyā̍dadhāt ॥ 4 ॥))

**[[1-5-12-5]]**

ते बृ॑ह॒ती ए॒व भू॒त्वा।
बृ॒ह॒तीमुप॒ सम॑श्रयताम्।
सो᳚ऽब्रवीत्प्र॒जाप॑तिः।
छन्दा᳚ꣳसि॒ रथो॑ मे भवत।
यु॒ष्माभि॑र॒हमे॒तमध्वा॑न॒मनु॒ संच॑रा॒णीति॑।
तस्य॑ गाय॒त्री च॒ जग॑ती च प॒क्षाव॑भवताम्।
उ॒ष्णिक्च॑ त्रि॒ष्टुप्च॑ प्र॒ष्ट्यौ᳚।
अ॒नु॒ष्टुप्च॑ प॒ङ्क्तिश्च॑ धु॒र्यौ᳚।
बृ॒ह॒त्ये॑वोद्धि॑रभवत्।
स ए॒तं छ॑न्दो॒र॒थमा॒स्थाय॑।
ए॒तमध्वा॑न॒मनु॒ सम॑चरत्।
ए॒तꣳ ह॒ वै छ॑न्दो॒र॒थमा॒स्थाय॑।
ए॒तमध्वा॑न॒मनु॒ संच॑रति।
येनै॒ष ए॒तत्संच॑रति।
य ए॒वं वि॒द्वान्सोमे॑न॒ यज॑ते।
य उ॑ चैनमे॒वं वेद॑॥ ५॥
अ॒भ॒व॒न्वाव सा दे॒वाक्ष॑रा
बृ॒ह॒त्य॑दधा॒द्द्वाद॑शा॒क्षरा᳚ण्यप॒च्छिद्या॑दधादा॒स्थाय॒ षट्च॑॥
१२॥
अ॒ग्नेः कृत्ति॑का॒ यत्पुण्य॑ं दे॒वस्य॑ सवि॒तुर्ब्र॑ह्मवा॒दि॒नः
कत्यृ॒तमे॒व दे॒वा वा आयु॑षः प्रा॒णमिन्द्रो॑ दधी॒चो दे॑वासु॒राः
स प्र॒जाप॑ति॒ः स स॑मु॒द्रो ये वै च॒त्वार॒स्तस्या॒वा॑चो॒ द्वाद॑श॥
१२॥
अ॒ग्नेः कृत्ति॑का देवगृ॒हा ऋ॒तमे॒व वै᳚श्वदे॒वेन॒ ते तद॑न्तं॒ तं
पञ्च॑द॒शेन॒ ते बृ॑ह॒ती ए॒व द्वि॒षष्टि॑ः॥ ६२॥

((te bṛ̍ha̱tī e̱va bhū̱tvā ।
bṛ̱ha̱tīmupa̱ samā̍śrayatām ।
so̎'bravītpra̱jāpa̍tiḥ ।
chandā̎ṃsi̱ ratho̍ me bhavata ।
yu̱ṣmābhi̍ra̱hame̱tamadhvā̍na̱manu̱ saṃcá̍rā̱ṇīti̍ ।
tasya̍ gāya̱trī ca̱ jaga̍tī ca pa̱kṣāvá̍bhavatām ।
u̱ṣṇikca̍ tri̱ṣṭupca̱ pra̱ṣṭyau̎ ।
a̱nu̱ṣṭupca̍ pa̱ṅktiśca̱ dhuryau̎ ।
bṛ̱ha̱tye̍voddhirá̍bhavat ।
sa e̱taṃ chá̍ndora̱thamā̱sthāyá ।
e̱tamadhvā̍na̱manu̱ samá̍carat ।
e̱taṃ̐ ha̱ vai chá̍ndora̱thamā̱sthāyá ।
e̱tamadhvā̍na̱manu̱ saṃcá̍rati ।
yenai̱ṣa e̱tatsaṃcará̍ti ।
ya e̱vaṃ vi̱dvānsomé̍na̱ yajá̍te ।
ya ú cainame̱vaṃ vedá ॥ 5 ॥
a̱bha̱va̱nvāva sā de̱vākṣá̍rā
bṛ̱ha̱tyá̍dadhā̱ddvādá̍śā̱kṣarā̎ṇyapa̱cchidyá̍dadhādā̱sthāya̱ ṣaṭcá ॥ 12 ॥
a̱gneḥ kṛtti̍kā̱ yatpuṇya̍ṃ de̱vasyá savi̱turbrá̍hmavā̱dina̱ḥ katyṛ̱tame̱va de̱vā vā āyú̍ṣaḥ prā̱ṇamindró dadhī̱co dé̍vāsu̱rāḥ sa pra̱jāpá̍ti̱ḥ sa sá̍mu̱dro ye vai ca̱tvāra̱stasyāvá̍co̱ dvādá̍śa ॥ 12 ॥
a̱gneḥ kṛtti̍kā devagṛ̱hā ṛ̱tame̱va vai̎śvade̱vena̱ te tadá̍nta̱ṃ taṃ pá̍ñcada̱śena̱ te bṛ̍ha̱tī e̱va dvi̱ṣá̍ṣṭi̱ḥ ॥ 62 ॥))

# Taittirīya-Brāhmaṇa
# Book 1, Chapter 6

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[1-6-1-1]]**

अनु॑मत्यै पुरो॒डाश॑म॒ष्टाक॑पालं॒ निर्व॑पति।
ये प्र॒त्यञ्च॒ः शम्या॑या अव॒शीय॑न्ते।
तन्नै॑र्‍ऋ॒तमेक॑कपालम्।
इ॒यं वा अनु॑मतिः।
इ॒यं निर्‍ऋ॑तिः।
नै॒र्‍ऋ॒तेन॒ पूर्वे॑ण॒ प्रच॑रति।
पा॒प्मान॑मे॒व निर्‍ऋ॑तिं॒ पूर्वा᳚ं नि॒रव॑दयते।
एक॑कपालो भवति।
ए॒क॒धैव निर्‍ऋ॑तिं नि॒रव॑दयते।
यद॒हु॑त्वा॒ गार्ह॑पत्य ई॒युः॥ १॥

((anúmatyai puro̱ḍāśámaṣ̱ṭākápālam̱ nirvápati ।
ye pra̱tyañca̱ḥ śamyā̀yā ava̱śīyánte ।
tannairṛ̱tamekákapālam ।
i̱yaṃ vā anúmatiḥ ।
i̱yaṃ nirṛ́tiḥ ।
nai̱rṛ̱tena̱ pūrveṇa̱ pracárati ।
pā̱pmānámeva nirṛ́tim̱ pūrvā̀ṃ ni̱ravádayate ।
ekákapālo bhavati ।
e̱ka̱dhaiva nirṛ́tiṃ ni̱ravádayate ।
yadahútvā̱ gārhápatya ī̱yuḥ ॥ 1 ॥))

**[[1-6-1-2]]**

रु॒द्रो भू॒त्वाऽग्निर॑नू॒त्थाय॑।
अ॒ध्व॒र्युं च॒ यज॑मानं च हन्यात्।
वीहि॒ स्वाहाऽऽहु॑तिं जुषा॒ण इत्या॑ह।
आहु॑त्यै॒वैन॑ꣳ शमयति।
नार्ति॒मार्च्छ॑त्यध्व॒र्युर्न यज॑मानः।
ए॒को॒ल्मु॒केन॑ यन्ति।
तद्धि निर्‍ऋ॑त्यै भाग॒धेय᳚म्।
इ॒मां दिश॑ं यन्ति।
ए॒षा वै निर्‍ऋ॑त्यै॒ दिक्।
स्वाया॑मे॒व दि॒शि निर्‍ऋ॑तिं नि॒रव॑दयते॥ २॥

((ru̱dro bhū̱tvā'gnirá̱nū̱tthāyá ।
a̱dhva̱ryuṃ ca̱ yajámānaṃ ca hanyāt।
vīhi̱ svāhā''hútiṃ juṣā̱ṇa ityā́ha ।
āhútyai̱vainaḿ śamayati ।
nārti̱mārcchátyadhva̱ryurna yajámānaḥ ।
e̱ko̱lmu̱kená yanti ।
taddhi nirṛ́tyai bhāga̱dheyā̀m ।
i̱māṃ diśaḿ yanti ।
e̱ṣā vai nirṛ́tyai̱ dik ।
svāyáme̱va di̱śi nirṛ́tiṃ ni̱ravádayate ॥ 2 ॥))

**[[1-6-1-3]]**

स्वकृ॑त॒ इरि॑णे जुहोति प्र॒द॒रे वा᳚।
ए॒तद्वै निर्‍ऋ॑त्या आ॒यत॑नम्।
स्व ए॒वायत॑ने॒ निर्‍ऋ॑तिं नि॒रव॑दयते।
ए॒ष ते॑ निर्‍ऋ॑ते भा॒ग इत्या॑ह।
निर्दि॑शत्ये॒वैना᳚म्।
भूते॑ ह॒विष्म॑त्य॒सीत्या॑ह।
भूति॑मे॒वोपाव॑र्तते।
मु॒ञ्चेमम॑ꣳह॑स॒ इत्या॑ह।
अꣳह॑स ए॒वैनं॑ मुञ्चति।
अ॒ङ्गु॒ष्ठाभ्या᳚ं जुहोति॥ ३॥

((svakṛ́ta̱ iriṇe juhoti prada̱re vā̀ ।
e̱tadvai nirṛ́tyā ā̱yatánam ।
sva e̱vāyatáne̱ nirṛ́tiṃ ni̱ravádayate ।
e̱ṣa té nirṛ́te bhā̱ga ityā́ha ।
nirdíśatye̱vainā̀m ।
bhūté ha̱viṣmátya̱sītyā́ha ।
bhūtíme̱vopāvártate ।
mu̱ñcemamaḿhása̱ ityā́ha ।
aḿhása e̱vainám muñcati ।
a̱ṅgu̱ṣṭhābhyā̀ṃ juhoti ॥ 3 ॥))

**[[1-6-1-4]]**

अ॒न्तत॑ ए॒व निर्‍ऋ॑तिं नि॒रव॑दयते।
कृ॒ष्णं वास॑ः कृ॒ष्णतू॑षं॒ दक्षि॑णा।
ए॒तद्वै निर्‍ऋ॑त्यै रू॒पम्।
रू॒पेणै॒व निर्‍ऋ॑तिं नि॒रव॑दयते।
अप्र॑तीक्ष॒माय॑न्ति।
निर्‍ऋ॑त्या अ॒न्तर्हि॑त्यै।
स्वाहा॒ नमो॒ य इ॒दं च॒कारेति॒ पुन॒रेत्य॒ गार्ह॑पत्ये जुहोति।
आहु॑त्यैव न॒मस्यन्तो॒ गार्ह॑पत्यमुपाव॑र्तन्ते।
आ॒नु॒म॒तेन॒ प्रच॑रति।
इ॒यं वा अनु॑मतिः॥ ४॥

((a̱nta̱ta e̱va nir̥̍tiṃ ni̱ravádayate |
kr̥̱ṣṇaṃ vāsaḥ kr̥̱ṣṇatúṣaṃ dakṣi̍ṇā |
e̱tadvai nir̥̍tyai rūpam |
rūpe̱ṇai̱va nir̥̍tiṃ ni̱ravádayate |
aprátīkṣa̱māyánti |
nir̥̍tyā a̱ntarhi̍tyai |
svāhā̱ namo̱ ya i̱daṃ ca̱kāreti̱ puna̱retya̱ gārhápatye juhoti |
āhútyai̱va námasyanto̱ gārhápatyamu̱pāvártante |
ā̱nu̱ma̱tena̱ pracárati |
i̱yaṃ vā anúmatiḥ || 4 ||))

**[[1-6-1-5]]**

इ॒यमे॒वास्मै॑ रा॒ज्यमनु॑ मन्यते।
धे॒नुर्दक्षि॑णा।
इ॒मामे॒व धे॒नुं कु॑रुते।
आ॒दि॒त्यं च॒रुं निर्व॑पति।
उ॒भयी᳚ष्वे॒व प्र॒जास्व॒भिषि॑च्यते।
दैवी॑षु च॒ मानु॑षीषु च।
वरो॒ दक्षि॑णा।
वरो॒ हि रा॒ज्यꣳ᳚ समृ॑द्ध्यै।
आ॒ग्ना॒वै॒ष्ण॒वमेका॑दशकपालं॒ निर्व॑पति।
अ॒ग्निः सर्वा॑ दे॒वताः᳚॥ ५॥

((i̱yame̱vāsmai̍ rā̱jyamanú manyate |
dhe̱nurdakṣi̍ṇā |
i̱māme̱va dhe̱nuṃ kúrute |
ā̱di̱tyaṃ ca̱ruṃ nirvápati |
u̱bhayī̎ṣve̱va pra̱jāsva̱bhiṣi̍cyate |
daivī̍ṣu ca̱ mānúṣīṣu ca |
varo̱ dakṣi̍ṇā |
varo̱ hi rā̱jyam̐ samr̥̍ddhyai |
ā̱gnā̱vaiṣṇavamekā́daśakapāla̱ṃ nirvápati |
a̱gniḥ sarvā́ de̱vatā̎ḥ || 5 ||))

**[[1-6-1-6]]**

विष्णु॑र्य॒ज्ञः।
दे॒वता᳚श्चै॒व य॒ज्ञं चाव॑रुन्धे।
वा॒म॒नो व॒ही दक्षि॑णा।
यद्व॒ही।
तेना᳚ग्ने॒यः।
यद्वा॑म॒नः।
तेन॑ वैष्ण॒वः समृ॑द्ध्यै।
अ॒ग्नीषो॒मीय॒मेका॑दशकपालं॒ निर्व॑पति।
अ॒ग्नीषोमा᳚भ्यां॒ वा इन्द्रो॑ वृ॒त्रम॑ह॒न्निति॑।
यद॑ग्नीषो॒मीय॒मेका॑दशकपालं नि॒र्वप॑ति॥ ६॥

((viṣṇúrya̱jñaḥ |
de̱vatā̎ścai̱va ya̱jñaṃ cāvárundhe |
vā̱ma̱no va̱hī dakṣi̍ṇā |
yadva̱hī |
tenā̎gne̱yaḥ |
yadvā́ma̱naḥ |
tená vaiṣṇa̱vaḥ samr̥̍ddhyai |
a̱gnīṣo̱mīya̱mekā́daśakapāla̱ṃ nirvápati |
a̱gnīṣomā̎bhyā̱ṃ vā indró vr̥̱tramáha̱nniti̍ |
yadágnīṣo̱mīya̱mekā́daśakapālaṃ ni̱rvapáti || 6 ||))

**[[1-6-1-7]]**

वार्त्र॑घ्नमे॒व विजि॑त्यै।
हिर॑ण्यं॒ दक्षि॑णा॒ समृ॑द्ध्यै।
इन्द्रो॑ वृ॒त्रꣳ᳚ ह॒त्वा।
दे॒वता॑भिश्चेन्द्रि॒येण॑ च॒ व्या᳚र्ध्यत।
स ए॒तमै᳚न्द्रा॒ग्नमेका॑दशकपालमपश्यत्।
तन्निर॑वपत्।
तेन॒ वै स दे॒वता᳚श्चेन्द्रि॒यं चाव॑रुन्ध।
यदै᳚न्द्रा॒ग्नमेका॑दशकपालं नि॒र्वप॑ति।
दे॒वता᳚श्चैव तेनै᳚न्द्रि॒यं च॒ यज॑मा॒नोऽव॑रुन्धे।
ऋ॒ष॒भो व॒ही दक्षि॑णा॥ ७॥

((vārtrághname̱va viji̍tyai |
hiráṇya̱ṃ dakṣi̍ṇā̱ samr̥̍ddhyai |
indró vr̥̱tram̐ ha̱tvā |
de̱vatā́bhiścendri̱yeṇá ca̱ vyā̎rdhyata |
sa e̱tamai̎ndrā̱gnamekā́daśakapālamapaśyat |
tannirávapat |
tena̱ vai sa de̱vatā̎ścendri̱yaṃ cāvárundha |
yadai̎ndrā̱gnamekā́daśakapālaṃ ni̱rvapáti |
de̱vatā̎ścai̱va tene̎ndri̱yaṃ ca̱ yajámā̱no'várundhe |
r̥̱ṣa̱bho va̱hī dakṣi̍ṇā || 7 ||))

**[[1-6-1-8]]**

यद्व॒ही।
तेना᳚ग्ने॒यः।
यदृ॑ष॒भः।
तेनै॒न्द्रः समृ॑द्ध्यै।
आ॒ग्नेयम॒ष्टाक॑पालं॒ निर्व॑पति।
ऐ॒न्द्रं दधि॑।
यदा᳚ग्नेयो भव॑ति।
अ॒ग्निर्वै᳚ य॒ज्ञमु॑खम्।

य॒ज्ञ॒मु॒ख॒मे॒वर्द्धिं॑ पु॒रस्ता᳚द्धत्ते।
यदै॒न्द्रं॒ दधि॑॥ ८॥

((yadva̱hī |
tenā̎gne̱yaḥ |
yadṛ̍ṣa̱bhaḥ |
tenai̱ndraḥ samṛ̍ddhyai |
ā̱gne̱yama̱ṣṭāka̍pālaṃ̱ nirva̍pati |
ai̱ndraṃ̱ dadhi̍ |
yadā̎gne̱yo bhava̍ti |
a̱gnirvai ya̍jñamu̱kham |
ya̱jña̱mu̱khame̱varddhiṃ̍ pu̱rastā̎ddhatte |
yadai̱ndraṃ̱ dadhi̍ || 8 ||))

**[[1-6-1-9]]**
इ॒न्द्रि॒यमे॒वाव॑रुन्धे।
ऋ॒ष॒भो व॒ही दक्षि॑णा।
यद्व॒ही।
तेना᳚ग्ने॒यः।
यदृ॑ष॒भः।
तेनै॒न्द्रः समृ॑द्ध्यै।
याव॑तीर्वै प्र॒जा ओष॑धीना॒महु॑ताना॒माश्न॑न्।
ताः परा᳚ऽभवन्।
आ॒ग्र॒य॒णं भ॑वति हु॒ताद्या॑य।
यज॑मान॒स्याप॑राभावाय॥ ९॥

((i̱ndri̱yame̱vāva̍rundhe |
ṛ̱ṣa̱bho va̱hī dakṣi̍ṇā |
yadva̱hī |
tenā̎gne̱yaḥ |
yadṛ̍ṣa̱bhaḥ |
tenai̱ndraḥ samṛ̍ddhyai |
yāva̍tī̱rvai pra̱jā o̱ṣa̍dhīnā̱mahu̍tānā̱māśna̍n |
tā̱ḥ parā̎'bhavan |
ā̱gra̱ya̱ṇaṃ bha̍vati hu̱tādyā̍ya |
yaja̍māna̱syāpa̍rābhāvāya || 9 ||))

**[[1-6-1-10]]**
दे॒वा वा ओष॑धीष्वा॒जिम॑युः।
ता इन्द्रा॒ग्नी उद॑जयताम्।
ताव॒ेतमै᳚न्द्रा॒ग्नं द्वाद॑शकपा॒लं निर॑वृणाताम्।
यदै᳚न्द्रा॒ग्नो भव॒त्युज्जि॑त्यै।
द्वाद॑शकपालो भवति।
द्वाद॑श॒ मासा᳚ः संव॒त्स॒रः।
सं॒व॒त्स॒रेणै॒वास्मा॒ अन्न॒मव॑रुन्धे।
वै॒श्व॒दे॒वश्च॒रुर्भ॑वति।
वै॒श्व॒दे॒वं वा अन्ना᳚म्।
अन्न॑मे॒वास्मै᳚ स्वदयति॥ १०॥

((de̱vā vā o̱ṣa̍dhīṣvā̱jima̍yuḥ |
tā i̍ndrā̱gnī uda̍jayatām |
tāve̱tamai̎ndrā̱gnaṃ̱ dvāda̍śakapāla̱ṃ nira̍vṛ̱ṇātām |
yadai̎ndrā̱gno bhava̱tyujji̍tyai |
dvāda̍śakapālo bhavati |
dvāda̍śa̱ māsā̎ḥ saṃva̱tsa̱raḥ |
sa̱ṃva̱tsa̱reṇa̱ivāsmā̱ anna̱mava̍rundhe |
vai̱śva̱de̱vaśca̱rurbha̍vati |
vai̱śva̱de̱vaṃ vā annā̎m |
anna̍me̱vāsmai̎ svadayati || 10 ||))

**[[1-6-1-11]]**
प्र॒थ॒म॒जो व॒त्सो दक्षि॑णा॒ समृ॑द्ध्यै।
सौ॒म्यꣳ᳚ श्या॒मा॒कं च॒रुं निर्व॑पति।
सोमो॒ वा अ॑कृष्टप॒च्यस्य॒ राजा᳚।
अ॒कृ॒ष्ट॒प॒च्यमे॒वास्मै᳚ स्वदयति।
वासो॒ दक्षि॑णा।
सौ॒म्यꣳ हि दे॒वत॑या॒ वास॑ः समृ॑द्ध्यै।
सर॑स्वत्यै च॒रुं निर्व॑पति।
सर॑स्वते च॒रुम्।
मि॒थु॒नमे॒वाव॑रुन्धे।
मि॒थु॒नौ गावौ॒ दक्षि॑णा॒ समृ॑द्ध्यै।
एति॒ वा ए॒ष य॑ज्ञमु॒खादृद्ध्या᳚ः।
यो᳚ऽग्नेर्दे॒वता॑या॒ एति॑।
अ॒ष्टावे॒तानि॑ ह॒वीꣳषि॑ भवन्ति।
अ॒ष्टाक्ष॑रा गाय॒त्री।
गा॒य॒त्रो᳚ऽग्निः।
तेनै॒व य॑ज्ञमु॒खादृद्ध्या॑ अ॒ग्नेर्दे॒वता॑यै॒ नैति॑॥ ११॥
ईयु॒र्निर॑वदयतेऽङ्गुष्ठाभ्या᳚ं जुहो॒त्यनु॑मति॒र्दे॒वता॒ निर्व॑पति
व॒ही दक्षि॑णा॒ यदै॒न्द्रं॒ दध्यप॑राभावाय स्वदयति॒ गावौ॒
दक्षि॑णा॒ समृ॑द्ध्यै॒ षट्च॑॥ १॥

((pra̱tha̱ma̱jo va̱tso dakṣi̍ṇā̱ samṛ̍ddhyai |
sau̱myaꣳ̎ śya̍mā̱kaṃ ca̱ruṃ nirva̍pati |
somo̱ vā a̍kṛṣṭapa̱cyasya̱ rājā̎ |
a̱kṛ̱ṣṭa̱pa̱cyame̱vāsmai̎ svadayati |
vāso̱ dakṣi̍ṇā |
sau̱myaꣳ hi de̱vata̍yā̱ vāsa̱ḥ samṛ̍ddhyai |
sara̍svatyai ca̱ruṃ nirva̍pati |
sara̍svate ca̱rum |

mi̱thu̱name̱vāvā̍rundhe ।
mi̱thu̱nau gāva̱u̱ dakṣi̍ṇā̱ samṛ̍ddhyai ।
eti̱ vā e̱ṣa ya̍jñamu̱khādṛ̍ddhya̱̍ḥ ।
yo̱᳚'gnerde̱vata̍yā̱ eti̍ ।
a̱ṣṭāve̱tāni̍ ha̱vīm̐ṣi̍ bhavanti ।
a̱ṣṭākṣa̍rā gāya̱trī ।
gāya̱tro̱᳚'gniḥ ।
tenai̱va ya̍jñamu̱khādṛ̍ddhya̱̍ a̱gnerde̱vata̍yai̱ naiti̍ ॥ 11 ॥
īyurni̱rava̍dayate'ṅgu̱ṣṭhābhyā̍m̐
juho̱tyanu̍matirde̱vatā̍ ni̱rvapa̍ti va̱hī dakṣi̍ṇā̱
yadai̱ndram̐ dadhyapa̍rābhāvāya svadayati̱ gāvau̱
dakṣi̍ṇā̱ samṛ̍ddhyai̱ ṣaṭca̍ ॥ 1 ॥))

**[[1-6-2-1]]**

वै॒श्व॒दे॒वेन॒ वै प्र॒जाप॑तिः प्र॒जा अ॑सृजत।
ताः सृ॒ष्टा न प्राजा॑यन्त।
सो॑ऽग्निर॑कामयत।
अ॒ह॒मि॒माः प्रज॑नये॒यमिति॑।
स प्र॒जाप॑तये॒ शुच॑मदधात्।
सो॑ऽशोचत्प्र॒जामि॒च्छमा॑नः।
तस्मा॒द्यं च॑ प्र॒जा भु॒नक्ति॒ यं च॒ न।
तावु॒भौ शोच॑तः प्र॒जामि॒च्छमा॑नौ।
तास्व॒ग्निमप्य॑सृजत्।
ता अ॒ग्निरध्यै᳚त्॥ १२॥

((vai̱śva̱de̱vena̱ vai pra̱jāpa̍tiḥ pra̱jā a̍sṛjata ।
tāḥ sṛ̱ṣṭā na prāja̍yanta ।
so̱᳚'gnira̍kāmayata ।
a̱hami̱māḥ praja̍naye̱yamiti̍ ।
sa pra̱jāpa̍taye̱ śuca̍madadhāt ।
so̍'śocatpra̱jāmi̱cchamā̍naḥ ।
tasmā̱dyam̐ ca̍ pra̱jā bhu̱nakti̱ yam̐ ca̱ na ।
tāvu̱bhau śo̍cataḥ pra̱jāmi̱cchamā̍nau ।
tāsva̱gnimapya̍sṛjat।
tā a̱gniradhyai᳚t ॥ 12 ॥))

**[[1-6-2-2]]**

सोमो॒ रेतो॑ऽदधात्।
स॒वि॒ता प्राज॑नयत्।
सर॑स्वती॒ वाच॑मदधात्।
पू॒षाऽपो॑षयत्।
ते वा ए॒ते त्रिः सं॑वत्स॒रस्य॒ प्रयु॑ज्यन्ते।
ये दे॒वाः पु॒ष्टिप॑तयः।
सं॒व॒त्स॒रो वै प्र॒जाप॑तिः।
सं॒व॒त्स॒रेणै॒वास्मै᳚ प्र॒जाः प्राज॑नयत्।
ताः प्र॒जा जा॒ता म॒रुतो᳚ऽघ्नन्।
अ॒स्मान॑पि॒ न प्राय॑ु॒क्षतेति॑॥ १३॥

((somo̱ reto̍'dadhāt ।
sa̱vi̱tā prāja̍nayat ।
sara̍svatī̱ vāca̍madadhāt ।
pū̱ṣā'po̍ṣayat ।
te vā e̱te triḥ sa̍ṃvatsa̱rasya̱ prayu̍jyante ।
ye de̱vāḥ pu̱ṣṭipa̍tayaḥ ।
sa̱ṃva̱tsa̱ro vai pra̱jāpa̍tiḥ ।
sa̱ṃva̱tsa̱reṇai̱vāsmai᳚ pra̱jāḥ prāja̍nayat ।
tāḥ pra̱jā jā̱tā ma̱ruto᳚'ghnan ।
a̱smānapi̱ na prāyu̍kṣa̱teti̍ ॥ 13 ॥))

**[[1-6-2-3]]**

स ए॒तं प्र॒जाप॑तिर्मारु॒तꣳ स॒प्तक॑पालमपश्यत्।
तं निर॑वपत्।
त॒तो वै प्र॒जाभ्यो॑ऽकल्पत।
यन्मा॑रु॒तो नि॑रु॒प्यते᳚।
य॒ज्ञस्य॒ क्लृप्त्यै᳚।
प्र॒जाना॒मघा॑ताय।
स॒प्तक॑पालो भवति।
स॒प्त ग॑णा॒ वै म॒रुत॑ः।
ग॒ण॒श ए॒वास्मै॒ विशं॑ कल्पयति।
स प्र॒जाप॑तिरशोचत्॥ १४॥

((sa e̱tam̐ pra̱jāpa̍tirmāru̱tam̐ sa̱ptaka̍pālamapaśyat ।
tam̐ nira̍vapat ।
tato̱ vai pra̱jābhyo̍'kalpata ।
yanmā̍ru̱to ni̍ru̱pyate᳚ ।
ya̱jñasya̱ kḷptyai᳚ ।
pra̱jānā̱maghā̍tāya ।
sa̱ptaka̍pālo bhavati ।
sa̱pta ga̍ṇā̱ vai ma̱ruta̍ḥ ।
ga̱ṇa̱śa e̱vāsmai̱ viśa̍m̐ kalpayati ।
sa pra̱jāpa̍tiraśocat ॥ 14 ॥))

**[[1-6-2-4]]**

याः पूर्वाः᳚ प्र॒जा अ॑सृ॒क्षि।
म॒रु॒तस्ता अ॑वधिषुः।
क॒थमप॑राः सृ॒जेयेति॑।
तस्य॒ शुष्म॑ आ॒ण्डं भू॒तं निर॑वर्तत।
तद्व्युद॑हरत्।
तद॑पोषयत्।
तत्प्राजा॑यत।

आ॒ण्डस्य॒ वा ए॒तद्रू॒पम्।

यदा॒मिक्षा᳚।

यद्व्यु॒द्धर॑ति॥ १५॥

((yāḥ pūrvā̎ḥ pra̱jā asr̥̍kṣi I
ma̱ruta̱stā a̍vadhiṣuḥ I
ka̱thamapa̍rāḥ sr̥je̱yeti̍ I
tasya̱ śuṣma̍ ā̱ṇḍam bhū̱taṃ nira̍vartata I
tadvyuda̍harat I
tada̍poṣayat I
tatprājā̍yata I
ā̱ṇḍasya̱ vā e̱tadrū̱pam I
yadā̱mikṣā̎ I
yadvyu̱ddhara̍ti II 15 II))

**[[1-6-2-5]]**

प्र॒जा ए॒व तद्यज॑मानः पोषयति।

वै॒श्व॒दे॒व्या॑मिक्षा॑ भवति।

वै॒श्व॒दे॒व्यो॑ वै प्र॒जाः।

प्र॒जा ए॒वास्मै॒ प्रज॑नयति।

वाजि॑न॒मान॑यति।

प्र॒जास्वे॒व प्रजा॑तासु॒ रेतो॑ दधाति।

द्या॒वा॒पृ॒थि॒व्य॑ एक॑कपालो भवति।

प्र॒जा ए॒व प्रजा॑ता॒ द्यावा॑पृथि॒वीभ्या॑मुभ॒यतः॒ परि॑गृह्णाति।

दे॒वा॒सु॒राः संय॑त्ता आसन्।

सो᳚ऽग्निर॑ब्रवीत्॥ १६॥

((pra̱jā e̱va tadyaja̍mānaḥ poṣayati I
vai̱śva̱de̱vya̍mikṣa̍ bhavati I
vai̱śvade̱vyo̍ vai pra̱jāḥ I
pra̱jā e̱vāsma̱i prajanayati I
vāji̍na̱māna̍yati I
pra̱jāsve̱va prajā̍tāsu̱ reto̍ dadhāti I
dyā̱vāpr̥̱thi̱vya̍ eka̍kapālo bhavati I
pra̱jā e̱va prajā̍tā̱ dyāvā̍pr̥thi̱vībhya̍mubha̱yata̱ḥ pari̍gr̥hṇāti I
de̱vā̱su̱rāḥ saṃya̍ttā āsanI
so̎'gnira̍bravīt II 16 II))

**[[1-6-2-6]]**

मा॒मग्रे॑ यजत।

मया॒ मुखे॒नासु॑राञ्जेष्य॒थेति॑।

मां द्वि॒तीय॒मिति॒ सोमो᳚ऽब्रवीत्।

मया॒ राज्ञा॑ जेष्य॒थेति॑।

मां तृ॒तीय॒मिति॑ सवि॒ता।

मया॒ प्रसू॑ता जेष्य॒थेति॑।

मां च॑तु॒र्थीमिति॒ सर॑स्वती।

इ॒न्द्रि॒यं वो॒ऽहं धा᳚स्या॒मीति॑

मां प॑ञ्च॒ममिति॑ पू॒षा।

मया᳚ प्रति॒ष्ठया॑ जेष्य॒थेति॑॥ १७॥

((māmagre̍ yajata I
mayā̱ mukhe̱nāsu̍rāñje̱ṣya̱theti̍ I
māṃ dvi̱tīya̱miti̱ somo̎'bravītI
mayā̱ rājña̍ jeṣya̱theti̍ I
māṃ tr̥̱tīya̱miti̍ savi̱tā I
mayā̱ prasū̍tā jeṣya̱theti̍ I
māṃ ca̍tu̱rthīmiti̱ sara̍svatī I
i̱ndri̱yaṃ vo̱'haṃ dhā̎syā̱mīti̍
māṃ pa̍ñca̱mamiti̍ pū̱ṣā I
mayā̎ prati̱ṣṭhaya̍ jeṣya̱theti̍ II 17 II))

**[[1-6-2-7]]**

ते᳚ऽग्निना॒ मुखे॒नासु॑रानजयन्।

सोमे॑न॒ राज्ञा᳚।

स॒वि॒त्रा प्रसू॑ताः।

सर॑स्वतीन्द्रि॒यम॑दधात्।

पू॒षा प्र॑ति॒ष्ठाऽऽसी᳚त्।

त॒तो॒ वै दे॒वा व्य॑जयन्त।

यदे॒तानि॑ ह॒वीꣳषि॑ निरु॒प्यन्ते॒ विजि॑त्यै।

नोत्त॑रवे॒दिमु॒प॑वपति।

प॒शवो॒ वा उ॑त्तरवे॒दिः।

अजा॑ता इव॒ ह्ये॑तर्हि॑ प॒शव॑ः॥ १८॥

ऐ॒दि॒त्य॑शोचद्व्यु॒द्धर॑त्यब्रवीत्प्रति॒ष्ठाया॑ जेष्य॒थेत्ये॒तर्हि॑
प॒शव॑ः॥ २॥

((te̎'gninā̱ mukhe̱nāsu̍rānajayanI
some̍na̱ rājñā̎ I
sa̱vi̱trā prasū̍tāḥ I
sara̍svatīndri̱yama̍dadhāt I
pū̱ṣā pra̍ti̱ṣṭhā''sī̎t I
ta̱to vai de̱vā vya̍jayanta I
yade̱tāni̍ ha̱vīm̐ṣi̍ niru̱pyante̱ viji̍tyai I
notta̍rave̱dimu̱pa̍vapati I
pa̱śavo̱ vā u̍ttarave̱diḥ I
ajā̍tā iva̱ hye̍tarhi̍ pa̱śava̍ḥ II 18 II
a̱idi̱tya̍śocadvyu̱ddhara̍tyabravītprati̱ṣṭhāya̍ je̱ṣya̱thetye̱tarhi̍ pa̱śava̍ḥ II 2 II))

**[[1-6-3-1]]**

त्रि॒वृद्ब॒र्हिर्भ॑वति।

मा॒ता पि॒ता पु॒त्रः।

तदे॒व तन्मि॑थु॒नम्।
उल्बं॒ गर्भो॑ ज॒रायु॑।
तदे॒व तन्मि॑थु॒नम्।
त्रे॒धा ब॒र्हिः संन॑द्धं भवति।
त्रय॑ इ॒मे लो॒काः।
ए॒ष्वे॑व लो॒केषु॒ प्रति॑तिष्ठति।
ए॒क॒धा पुन॒ः संन॑द्धं भवति।
एक॑ इव॒ ह्य॑यं लो॒कः॥ १९॥

((tri̱vṛdba̱rhirbha̍vati |
mā̱tā pi̱tā pu̱traḥ |
tade̱va tanmi̍thu̱nam|
ulbaṃ̱ garbho̍ ja̱rāyu̍ |
tade̱va tanmi̍thu̱nam|
tre̱dhā ba̱rhiḥ saṃna̍ddhaṃ bhavati |
traya̍ i̱me lo̱kāḥ |
e̱ṣve̍va lo̱keṣu̱ prati̍tiṣṭhati |
e̱ka̱dhā puna̱ḥ saṃna̍ddhaṃ bhavati |
eka̍ iva̱ hya̍yaṃ lo̱kaḥ || 19 ||))

**[[1-6-3-2]]**

अ॒स्मिन्ने॒व तेन॑ लो॒के प्रति॑तिष्ठति।
प्र॒सुवो॑ भवन्ति।
प्र॒थ॒म॒जामे॒व पु॒ष्टिमव॑रुन्धे।
प्र॒थ॒म॒जो व॒त्सो दक्षि॑णा॒ समृ॑द्ध्यै।
पृ॒ष॒दा॒ज्यं गृ॑ह्णाति।
प॒शवो॒ वै पृ॑षदा॒ज्यम्।
प॒शूने॒वाव॑रुन्धे।
प॒ञ्च॒गृ॒ही॒तं भ॑वति।
पाङ्क्ता॒ हि प॒शव॑ः।
ब॒हु॒रू॒पं भ॑वति॥ २०॥

((a̱sminne̱va tena̍ lo̱ke prati̍tiṣṭhati |
pra̱suvo̍ bhavanti |
pra̱tha̱ma̱jāme̱va pu̱ṣṭi̱mava̍rundhe |
pra̱tha̱ma̱jo va̱tso dakṣi̍ṇā̱ samṛ̍ddhyai |
pṛ̱ṣa̱dā̱jyaṃ gṛ̍hṇāti |
pa̱śavo̱ vai pṛ̍ṣadā̱jyam |
pa̱śūne̱vāva̍rundhe |
pa̱ñca̱gṛ̱hī̱taṃ bha̍vati |
pā̱ṅktā̱ hi pa̱śava̍ḥ |
ba̱hu̱rū̱paṃ bha̍vati || 20 ||))

**[[1-6-3-3]]**

ब॒हु॒रू॒पा हि प॒शव॒ः समृ॑द्ध्यै।
अ॒ग्निं म॑न्थन्ति।
अ॒ग्निमु॑खा॒ वै प्र॒जाप॑तिः प्र॒जा अ॑सृजत।
यद॒ग्निं मन्थ॑न्ति।
अ॒ग्निमु॑खा ए॒व तत्प्र॒जा यज॑मानः सृजते।
नव॑ प्रया॒जा इ॑ज्यन्ते।
नवा॑नूया॒जाः।
अ॒ष्टौ ह॒वीꣳषि॑।
द्वावा॑घा॒रौ।
द्वावाज्य॑भागौ॥ २१॥

((ba̱hu̱rū̱pā hi pa̱śava̱ḥ samṛ̍ddhyai |
a̱gniṃ ma̍nthanti |
a̱gnimu̍khā̱ vai pra̱jāpa̍tiḥ pra̱jā a̍sṛjata |
yada̱gniṃ mantha̍nti |
a̱gnimu̍khā e̱va tatpra̱jā yaja̍mānaḥ sṛjate |
nava̍ prayā̱jā i̍jyante |
navā̍nūyā̱jāḥ |
a̱ṣṭau ha̱vīm̐ṣi̍ |
dvāvā̍ghā̱rau |
dvāvājya̍bhāgau || 21 ||))

**[[1-6-3-4]]**

त्रि॒ꣳ॒शत्संप॑द्यन्ते।
त्रि॒ꣳ॒शद॑क्षरा वि॒राट्।
अन्नं॑ वि॒राट्।
वि॒रा॒जै॒वान्ना॒द्यमव॑रुन्धे।
यज॑मानो॒ वा एक॑कपालः।
तेज॒ आज्य᳚म्।
यदेक॑कपाल॒ आज्य॑मा॒नय॑ति।
यज॑मानमे॒व तेज॑सा॒ सम॑र्धयति।
यज॑मानो॒ वा एक॑कपालः।
प॒शव॒ आज्य᳚म्॥ २२॥

((tri̱m̐śatsampa̍dyante |
tri̱m̐śada̍kṣarā vi̱rāṭ |
anna̍ṃ vi̱rāṭ |
vi̱rāja̱ivānnādya̱mava̍rundhe |
yaja̍māno̱ vā eka̍kapālaḥ |
teja̱ ājya̎m |
yadeka̍kapāla̱ ājya̍mā̱naya̍ti |
yaja̍māname̱va teja̍sā̱ sama̍rdhayati |
yaja̍māno̱ vā eka̍kapālaḥ |
pa̱śava̱ ājya̎m || 22 ||))

**[[1-6-3-5]]**

यदेक॑कपाल॒ आज्य॑मा॒नय॑ति।
यज॑मानमे॒व प॒शुभि॒ः सम॑र्धयति।
यदल्प॑मा॒नये॑त्।
अल्पा॑ एनं प॒शवो॑ भु॒ञ्जन्त॒ उप॑तिष्ठेरन्।
यद्ब॒ह्वा॑नये॑त्।
ब॒हव॑ एनं प॒शवोऽभु॑ञ्जन्त॒ उप॑तिष्ठेरन्।
ब॒ह्वा॑नीयावि॒ः पृ॑ष्ठं कुर्यात्।
ब॒हव॑ ए॒वैनं॑ प॒शवो॑ भु॒ञ्जन्त॒ उप॑तिष्ठन्ते।
यज॑मानो॒ वा एक॑कपालः।
यदेक॑कपालस्याव॒द्येत्॥ २३॥

((yadekákapāla̱ ājyámā̱nayáti |
yajámānamē̱va pa̱śubhi̱ḥ samárdhayati |
yadalpámā̱nayĕt |
alpā́ enaṃ pa̱śavó bhu̱ñjanta̱ upátiṣṭheran |
yadba̱hvā́nayĕt |
ba̱havá enaṃ pa̱śavo'bhú̱ñjanta̱ upátiṣṭheran |
ba̱hvā́nīyā̱viḥ pṛ́ṣṭhaṃ kuryāt |
ba̱havá e̱vainám pa̱śavó bhu̱ñjanta̱ upátiṣṭhante |
yajámāno̱ vā ekákapālaḥ |
yadekákapālasyāva̱dyet || 23 ||))

**[[1-6-3-6]]**

यज॑मान॒स्याव॑द्येत्।
उद्वा॒ माद्ये॒द्यज॑मानः।
प्र वा॑ मीयेत।
स॒कृद्दे॒व हो॑त॒व्य॑ः।
स॒कृदि॑व॒ हि सु॑व॒र्गो लो॒कः।
हु॒त्वाऽभि जु॑होति।
यज॑मानमे॒व सु॑व॒र्गं लो॒कं ग॑मयि॒त्वा।
तेज॑सा॒ सम॑र्धयति।
यज॑मानो॒ वा एक॑कपालः।
सु॒व॒र्गो लो॒क आ॑ह॒व॒नीय॑ः॥ २४॥

((yajámāna̱syāvádyet|
udvā̱ mādye̱dyajámānaḥ |
pra vá mīyeta |
sa̱kṛde̱va hóta̱vyáḥ |
sa̱kṛdiva̱ hi súva̱rgo lo̱kaḥ |
hu̱tvā'bhi júhoti |
yajámānamē̱va súva̱rgaṃ lo̱kaṃ gámayi̱tvā |
tejásā̱ samárdhayati |
yajámāno̱ vā ekákapālaḥ |
su̱va̱rgo lo̱ka ā́hava̱nīyáḥ || 24 ||))

**[[1-6-3-7]]**

यदेक॑कपालमाहव॒नीये॑ जु॒होति॑।
यज॑मानमे॒व सु॑व॒र्गं लो॒कं ग॑मयति।
यद्धस्ते॑न जु॒हु॒यात्।
सु॒व॒र्गाल्लो॒काद्यज॑माना॒मव॑विध्येत्।
स्रु॒चा जु॑होति।
सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै।
यत्प्राङ्प॒द्ये॑त।
दे॒व॒लो॒कम॒भि ज॑येत्।
यद्द॑क्षि॒णा पि॑तृलो॒कम्।
यत्प्र॒त्यक्॥ २५॥

((yadekákapālamāhava̱nīyė ju̱hoti |
yajámānamē̱va súva̱rgaṃ lo̱kaṃ gámayati |
yaddhastėna juhu̱yāt |
su̱va̱rgāllo̱kādyajámāna̱mavávidhyet |
sru̱cā júhoti |
su̱va̱rgasyá lo̱kasya̱ samáṣṭyai |
yatprāṅpadyėta |
de̱va̱lo̱kama̱bhi jáyet |
yaddákṣi̱ṇā pítṛlo̱kam |
yatpra̱tyak || 25 ||))

**[[1-6-3-8]]**

रक्षा॑ꣳसि य॒ज्ञꣳ ह॑न्युः।
यदुद॑ङ्।
म॒नु॒ष्य॒लो॒कम॒भिज॑येत्।
प्रति॑ष्ठितो होत॒व्य॑ः।
एक॑कपालं वै प्रति॑तिष्ठ॑न्तं द्यावा॑पृथि॒वी अनु॒ प्रति॑तिष्ठतः।
द्यावा॑पृथि॒वी ऋ॒तव॑ः।
ऋ॒तून्य॒ज्ञः।
य॒ज्ञं यज॑मानः।
यज॑मानं प्र॒जाः।
तस्मात्प्रति॑ष्ठितो होत॒व्य॑ः॥ २६॥

((rakṣā́ṃsi ya̱jñaṃ́ hányuḥ |
yadudaṅ́ |
ma̱nu̱ṣya̱lo̱kama̱bhijáyet |
pratíṣṭhito hota̱vyáḥ |
ekákapālaṃ vai prátiti̱ṣṭhánta̱ṃ dyāvā́pṛthi̱vī anu̱ pratíti̱ṣṭhataḥ |
dyāvā́pṛthi̱vī ṛ̱tavá̱ḥ |
ṛ̱tūnya̱jñaḥ |
ya̱jñaṃ yajámānaḥ |
yajámānaṃ pra̱jāḥ |

tasmātprati̍ṣṭhito hota̱vyaḥ || 26 ||))

**[[1-6-3-9]]**

वा॒जिनो॑ यजति।
अ॒ग्निर्वा॒युः सूर्यः॑।
ते वै वा॒जिनः॑।
ताने॒व तद्य॑जति।
अथो॒ खल्वा॑हुः।
छन्दा॒ꣳ॑सि॒ वै वा॒जिन॒ इति॑।
तान्ये॒व तद्य॑जति।
ऋ॒क्सा॒मे वा इन्द्र॑स्य॒ हरी॑ सोम॒पानौ॑।
तयोः॑ परि॒धय॑ आ॒धान॑म्।
वाजि॑नं भाग॒धेय॑म्॥ २७॥

((vā̱jino̍ yajati |
a̱gnirvā̱yuḥ sūrya̍ḥ |
te vai vā̱jina̍ḥ |
tāne̱va tadya̍jati |
atho̱ khalvā̍huḥ |
chandā̱m̐̍si̱ vai vā̱jina̱ḥ iti̍ |
tānye̱va tadya̍jati |
ṛ̱ksā̱me vā indra̍sya̱ hari̍ soma̱pānau̍ |
tayo̍ḥ pari̱dhaya̍ ā̱dhāna̍m |
vāji̍naṃ bhāga̱dheya̍m || 27 ||))

**[[1-6-3-10]]**

यदप्र॑हृत्य परि॒धीञ्जु॒हुयात्।
अ॒न्तरा॑धानाभ्यां घा॒सं प्रय॑च्छेत्।
प्र॒हृत्य॑ परि॒धीञ्जुहोति।
निरा॑धानाभ्यामे॒व घा॒सं प्रय॑च्छति।
ब॒र्हिषि॑ विषि॒ञ्चन्वाजि॑न॒मान॑यति।
प्र॒जा वै ब॒र्हिः। .h line
रेतो॒ वाजि॑नम्।
प्र॒जास्वे॒व रेतो॑ दधाति।
स॒मु॒प॒हूय॑ भक्षयन्ति।
ए॒तत्सो॑मपीथा॒ ह्ये॑ते।
अथो॑ आ॒त्मन्ने॒व रेतो॑ दधते।
यज॑मान उ॒त्त॒मो भ॑क्षयति।
प॒शवो॒ वै वाजि॑नम्।
यज॑मान ए॒व प॒शून्प्रति॑ष्ठापयन्ति॥ २८॥
लो॒को ब॑हुरू॒पं भ॑व॒त्याज्य॑भागौ प॒शव॒
आज्य॑मव॒द्येदा॑ह॒वनी॑यः प्र॒त्यक्तस्मा॒त्प्रति॑ष्ठितो होत॒व्यौ॑
भाग॒धेय॑मे॒ते च॒त्वारि॑ च॥ ३॥

((yada̍prahṛtya pari̱dhīñju̍hu̱yāt |
a̱ntarā̍dhānābhyāṃ ghā̱saṃ praya̍cchet |
pra̱hṛtya̍ pari̱dhīñju̍hoti |
nirā̍dhānābhyāme̱va ghā̱saṃ praya̍cchati |
ba̱rhiṣi̍ viṣi̱ñcanvāji̍na̱mānā̍yati |
pra̱jā vai ba̱rhiḥ | << .h line >>
reto̱ vāji̍nam |
pra̱jāsve̱va reto̍ dadhāti |
sa̱mu̱pa̱hūya̍ bhakṣayanti |
e̱tatso̍mapīthā̱ hye̍te |
atho̍ ā̱tmanne̱va reto̍ dadhate |
yaja̍māna utta̱mo bha̍kṣayati |
pa̱śavo̱ vai vāji̍nam|
yaja̍māna e̱va pa̱śūnprati̍ṣṭhāpayanti || 28 ||
lo̱ko ba̍hurū̱paṃ bha̍va̱tyājya̍bhāgau pa̱śava̱
ājya̍mava̱dyedā̍havanīya̍ḥ pra̱tyaktasmā̱tprati̍ṣṭhito
hota̱vyo̍ bhāga̱dheya̍me̱te ca̱tvari̍ ca || 3 ||))

**[[1-6-4-1]]**

प्र॒जाप॑तिः सवि॒ता भू॒त्वा प्र॒जा अ॑सृजत।
ता ए॑न॒मत्य॑मन्यन्त।
ता अ॑स्मा॒दपा॑क्रामन्।
ता वरु॑णो भू॒त्वा प्र॒जा वरु॑णेनाग्राहयत्।
ताः प्र॒जा वरु॑णगृहीताः।
प्र॒जाप॑तिं पु॒नरुपा॑धावन्ना॒थमि॒च्छमा॑नाः।
स ए॒तान्प्र॒जाप॑तिर्वरुणप्रघा॒साना॑पश्यत्।
तान्निर॑वपत्।
तैर्वै स प्र॒जा व॑रुणपा॒शाद॑मुञ्चत्।
यद्व॑रुणप्रघा॒सा नि॒रु॒प्यन्ते॑॥ २९॥

((pra̱jāpa̍tiḥ sa̱vi̱tā bhū̱tvā pra̱jā a̍sṛjata |
tā e̍na̱matya̍manyanta |
tā a̍smā̱dapā̍krāman |
tā varu̍ṇo bhū̱tvā pra̱jā varu̍ṇenāgrāhayat |
tāḥ pra̱jā varu̍ṇagṛhītāḥ |
pra̱jāpa̍tiṃ puna̱rupā̍dhāvannā̱thami̱cchamā̍nāḥ |
sa e̱tānpra̱jāpa̍tirvaruṇapraghā̱sānā̍paśyat |
tānnira̍vapat |
tairvai sa pra̱jā va̍ruṇapā̱śāda̍muñcat |
yadva̍ruṇapraghā̱sā ni̱ru̱pyante̍ || 29 ||))

**[[1-6-4-2]]**

प्र॒जाना॒मव॑रुणग्राहाय।
तासां॒ दक्षि॑णो बा॒हुन्य॑क्त आसी॑त्।
स॒व्यः प्रसृ॑तः।

स ए॒तां द्वि॒तीया᳚ं दक्षिण॒तो वेदि॒मुद॑हन्।
ततो॒ वै स प्र॒जाना॒ं दक्षि॑णं बा॒हुं प्रासा॑रयत्।
यद्द्वि॒तीया᳚ं दक्षिण॒तो वेदि॑मु॒द्धन्ति॑।
प्र॒जाना॑मे॒व तद्यज॑मानो॒ दक्षि॑णं बा॒हुं प्रसा॑रयति।
तस्मा᳚च्चातुर्मास्यया॒ज्य॑मुष्मिँ॑ल्लो॒क उ॑भ॒याबा॑हुः।
य॒ज्ञाभि॑जित॒ꣳ॒॑ ह्य॑स्य।
पृ॒थ॒मा॒त्राद्वे॒दी अस॑ंभिन्ने भवतः॥ ३०॥

((pra̱jānā̱mava̍ruṇagrāhāya |
tāsā̱ṃ dakṣi̍ṇo̱ bā̱hurnya̍kna̱ āsī̎t |
sa̱vyaḥ prasṛ̍taḥ |
sa e̱tāṃ dvi̱tīyā̎ṃ dakṣiṇa̱to vedi̱muda̍han |
tato̱ vai sa pra̱jānā̱ṃ dakṣi̍ṇaṃ bā̱huṃ prāsā̍rayat |
yaddvi̱tīyā̎ṃ dakṣiṇa̱to vedi̍mu̱ddhanti̍ |
pra̱jānā̍me̱va tadyaja̍māno̱ dakṣi̍ṇaṃ bā̱huṃ
prasā̍rayati |
tasmā̎ccāturmāsyayā̱jya̍muṣmim̐̍llo̱ka u̍bha̱yābā̍huḥ
|
ya̱jñābhi̍jita̱m̱̐̍ hya̍sya |
pṛ̱tha̱mā̱trādvedī̱ asa̍ṃbhinne bhavataḥ || 30 ||))

**[[1-6-4-3]]**
तस्मा᳚त्पृथमा॒त्रं व्यꣳ॑सौ᳚।
उत्त॑रस्या॒ं वेद्या॑मुत्तरवे॒दिमुप॑ वपति।
प॒शवो॒ वा उ॑त्तरवे॒दिः।
प॒शूने॒वाव॑रुन्धे।
अथो॑ यज्ञप॒रुषोऽन॑न्तरित्यै।
ए॒तद्ब्रा᳚ह्मणान्ये॒व पञ्च॑ ह॒वीꣳ॑षि॑।
अथै॒ष ऐ᳚न्द्रा॒ग्नो भ॑वति।
प्रा॒णा॒पा॒नौ वा ए॒तौ दे॒वाना᳚म्।
यदि॑न्द्रा॒ग्नी।
यदै᳚न्द्रा॒ग्नो भ॑वति॥ ३१॥

((tasmā̎tpṛthamā̱traṃ vyam̐̍sau̎ |
utta̍rasyā̱ṃ vedyā̍muttarave̱dimupa̍ vapati |
pa̱śavo̱ vā u̍ttarave̱diḥ |
pa̱śūne̱vāva̍rundhe |
atho̍ yajñapa̱ruṣo'na̍ntarityai |
e̱tadbrā̎hmaṇānye̱va pañca̍ ha̱vīm̐̍ṣi̍ |
athai̱ṣa ai̎ndrā̱gno bha̍vati |
prā̱ṇā̱pā̱nau vā e̱tau de̱vānā̎m |
yadi̍ndrā̱gnī |
yadai̎ndrā̱gno bha̍vati || 31 ||))

**[[1-6-4-4]]**
प्रा॒णा॒पा॒नावे॒वाव॑रुन्धे।
ओजो॒ बल॒ं वा ए॒तौ दे॒वाना᳚म्।
यदि॑न्द्रा॒ग्नी।
यदै᳚न्द्रा॒ग्नो भव॑ति।
ओजो॒ बल॑मे॒वाव॑रुन्धे।
मा॒रु॒त्या॑मिक्षा॑ भवति।
वा॒रु॒ण्या॑मिक्षा᳚।
मे॒षी च॑ मे॒षश्च॑ भवतः।
मि॒थु॒ना ए॒व प्र॒जा व॑रुणपा॒शान्मु॑ञ्चति।
लो॒म॒शौ भ॑वतो मेध्य॒त्वाय॑॥ ३२॥

((prā̱ṇā̱pā̱nāve̱vāva̍rundhe |
ojo̱ bala̱ṃ vā e̱tau de̱vānā̎m |
yadi̍ndrā̱gnī |
yadai̎ndrā̱gno bhava̍ti |
ojo̱ bala̍me̱vāva̍rundhe |
mā̱ru̱tyā̍mikṣā̍ bhavati |
vā̱ru̱ṇyā̍mikṣā̎ |
me̱ṣī ca̍ me̱ṣaśca̍ bhavataḥ |
mi̱thu̱nā e̱va pra̱jā va̍ruṇapā̱śānmu̍ñcati |
lo̱ma̱śau bha̍vato medhya̱tvāya̍ || 32 ||))

**[[1-6-4-5]]**
श॒मीप॒र्णान्युप॑ वपति।
घा॒समे॒वाभ्या॒मपि॑ यच्छति।
प्र॒जाप॑तिम॒न्नाद्यं॒ नोपा॑नमत्।
स ए॒तेन॑ श॒तेध्मे॑न ह॒विषा॒ऽन्नाद्य॒मवा॑रुन्ध।
यत्प॑रः श॒तानि॒ शमी॑प॒र्णानि॒ भव॑न्ति।
अ॒न्नाद्य॒स्याव॑रुद्ध्यै।
सौ॒म्यानि॒ वै क॒रीरा॑णि।
सौ॒म्या खलु॒ वा आहु॑ति॒र्दि॒वो वृष्टिं॒ च्यावयति।
यत्क॒रीरा॑णि भव॑न्ति।
सौ॒म्यये॒वाहु॑त्या दि॒वो वृष्टि॒मव॑रुन्धे।
काय॒ एक॑कपालो भवति।
प्र॒जाना᳚ं क॒न्त्वाय॑।
प्र॒तिपू॒रुषं॑ कर॑म्भपात्राणि॑ भवन्ति।
जा॒ता ए॒व प्र॒जा व॑रुणपा॒शान्मु॑ञ्चति।
ए॒कम॑ति॑रिक्तम्।
ज॒नि॒ष्यमा॑णा ए॒व प्र॒जा व॑रुणपा॒शान्मु॑ञ्चति॥ ३३॥
नि॒रु॒प्यन्ते॑ भवतो॒ भव॑ति मेध्य॒त्वाय॑ रुन्धे॒ षड्व॑॥ ४॥

((śa̱mīpa̱rṇānyupa̍ vapati |

ghāsamevābhyāmapi yacchati I
prajāpatimannādyaṃ noupānamat I
sa etena śatedhmena haviṣā'nnādyamavārundha I
yatparaḥ śatāni śamīparṇāni bhavanti I
annādyasyāvaruddhyai I
saumyāni vai karīrāṇi I
saumyā khalu vā āhutirdivo vṛṣṭiṃ cyāvayati I
yatkarīrāṇi bhavanti I
saumyayaivāhutyā divo vṛṣṭimavarundhe I
kāya ekakapālo bhavati I
prajānāṃ kantvāya I
pratipūruṣaṃ karambhapātrāṇi bhavanti I
jātā eva prajā varuṇapāśānmuñcati I
ekamatiriktam I
janiṣyamāṇā eva prajā varuṇapāśānmuñcati II 33 II
nirupyante bhavato bhavati medhyatvāya rundhe ṣaṭca II 4 II))

**[[1-6-5-1]]**

उत्तरस्यां वेद्यामन्यानि हवीꣳषि सादयति।
दक्षिणायां मारुतीम्।
अपधुरमेवैना युनक्ति।
अथो ओज एवासामव हरति।
तस्माद्ब्रह्मणश्च क्षत्त्राच्च विशोऽन्यतोपक्रमिणीः।
मारुत्या पूर्वया प्रचरति।
अनृतमेवाव यजते।
वारुण्योत्तरया।
अन्तत एव वरुणमव यजते।
यदेवाध्वर्युः करोति॥ ३४॥

((uttarasyāṃ vedyāmanyāni havīṃṣi sādayati I
dakṣiṇāyāṃ mārutīmI
apadhuramevainā yunakti I
atho oja evāsāmava harati I
tasmādbrahmaṇaśca kṣattrācca
viśo'nyatopakramiṇīḥ I
mārutyā pūrvayā pracarati I
anṛtamevāva yajate I
vāruṇyottarayā I
antata eva varuṇamava yajate I
yadevādhvaryuḥ karoti II 34 II))

**[[1-6-5-2]]**

तत्प्रतिप्रस्थाता करोति।
तस्माद्यच्छ्रेयान्करोति।
तत्पापीयान्करोति।
पत्नीं वाचयति।
मेध्यामेवैनां करोति।
अथो तप एवैनामुप नयति।
यज्जारꣳ सन्तं न प्रब्रूयात्।
प्रियं ज्ञातिꣳ रुन्ध्यात्।
असौ मे जार इति निर्दिशेत्।
निर्दिश्यैवैनं वरुणपाशेन ग्राहयति॥ ३५॥

((tatpratiprasthātā karoti I
tasmādyacchreyānkaroti I
tatpāpīyānkaroti I
patnīṃ vācayati I
medhyāmevaināṃ karoti I
atho tapa evaināmupa nayati I
yajjāraṃ santaṃ na prabrūyāt I
priyaṃ jñātiṃ rundhyāt I
asau me jāra iti nirdiśet I
nirdiśyaivainaṃ varuṇapāśena grāhayati II 35 II))

**[[1-6-5-3]]**

प्रघास्यान्हवामह इति पत्नीमुदानयति।
अह्वतैवैनाम्।
यत्पत्नी पुरोनुवाक्यामनु ब्रूयात्।
निर्वीर्यो यजमानः स्यात्।
यजमानोऽन्वाह।
आत्मन्नेव वीर्यं धत्ते।
उभौ याज्याꣳ सवीर्यत्वाय।
यद्ग्रामे यदरण्य इत्याह।
यथोदितमेव वरुणमव यजते।
यजमानदेवत्यो वा आहवनीयः॥ ३६॥

((praghāsyānhavāmaha iti patnīmudānayati I
ahvataivaināṃ I
yatpatnī puronuvākyāmanu brūyāt I
nirvīryo yajamānaḥ syāt I
yajamāno'nvāha I
ātmanneva vīryaṃ dhatte I
ubhau yājyāṃ savīryatvāya I
yadgrāme yadaraṇya ityāha I
yathoditameva varuṇamava yajate I
yajamānadevatyo vā āhavanīyaḥ II 36 II))

**[[1-6-5-4]]**

भ्रातृव्यदेवत्यो दक्षिणः।
यदाहवनीये जुहुयात्।
यजमानं वरुणपाशेन ग्राहयेत्।
दक्षिणेऽग्नौ जुहोति।
भ्रातृव्यमेव वरुणपाशेन ग्राहयति।

शूर्पेण जुहोति।
अन्न्यमेव वरुणमवयजते।
शीर्षन्नधि निधाय जुहोति।
शीर्षत एव वरुणमवयजते।
प्रत्यङ्क्तिष्ठञ्जुहोति॥ ३७॥

((bhrātṛvyadevatyo dakṣiṇaḥ |
yadāhavanīye juhuyāt |
yajamānaṃ varuṇapāśena grāhayet |
dakṣiṇe'gnau juhoti |
bhrātṛvyameva varuṇapāśena grāhayati |
śūrpeṇa juhoti |
annyameva varuṇamavayajate |
śīrṣannadhi nidhāya juhoti |
śīrṣata eva varuṇamavayajate |
pratyaṅktiṣṭhañjuhoti || 37 ||))

**[[1-6-5-5]]**

प्रत्यङ्ङेव वरुणपाशान्निर्मुच्यते।
अक्रन्कर्म कर्मकृत इत्याह।
देवानृणं निरवदाय।
अनृणा गृहानुपप्रेतेति वावैतदाह।
वरुणगृहीतं वा एतद्यज्ञस्य।
यद्यजुषा गृहीतस्यातिरिच्यते।
तुषाँश्च निष्कासश्च।
तुषैश्च निष्कासेन चावभृथमवैति।
वरुणगृहीतेनैव वरुणमवयजते।
अपोऽवभृथमवैति॥ ३८॥

((pratyaṅṅeva varuṇapāśānnirmucyate |
akrankarma karmakṛta ityāha |
devānṛṇaṃ niravadāya |
anṛṇā gṛhānupapreteti vāvaitadāha |
varuṇagṛhītaṃ vā etadyajñasya |
yadyajuṣā gṛhītasyātiricyate |
tuṣāṃśca niṣkāsaśca |
tuṣaiśca niṣkāsena cāvabhṛthamavaiti |
varuṇagṛhītenaiva varuṇamavayajate |
apo'vabhṛthamavaiti || 38 ||))

**[[1-6-5-6]]**

अप्सु वै वरुणः।
साक्षादेव वरुणमव यजते।
प्रतियुतो वरुणस्य पाश इत्याह।
वरुणपाशादेव निर्मुच्यते।
अप्रतीक्षमायन्ति।
वरुणस्यान्तर्हित्यै।
एधोऽस्येधिषीमहीत्याह।
समिधैवाग्निं नमस्यन्त उपायन्ति।
तेजोऽसि तेजो मयि धेहीत्याह।
तेज एवात्मन्धत्ते॥ ३९॥
करोति ग्राहयत्याहवनीयस्तिष्ठञ्जुहोत्यपोऽवभृथमवैति धत्ते॥ ५॥

((apsu vai varuṇaḥ |
sākṣādeva varuṇamava yajate |
pratiyuto varuṇasya pāśa ityāha |
varuṇapāśādeva nirmucyate |
apratīkṣamāyanti |
varuṇasyāntarhityai |
edho'syedhiṣīmahītyāha |
samidhaivāgniṃ namasyanta upāyanti |
tejosi tejo mayi dhehītyāha |
teja evāatmandhatte || 39 ||
karoti
grāhayatyāhavanīyastiṣṭhañjuhotyapo'vabhṛthamav
aiti dhatte || 5 ||))

**[[1-6-6-1]]**

देवासुराः संयत्ता आसन्।
सोऽग्निरब्रवीत्।
ममेयमनीकवती तनूः।
तां प्रीणीत।
अथासुरानभिभविष्यथेति।
ते देवा अग्नयेऽनीकवते पुरोडाशमष्टाकपालं निरवपन्।
सोऽग्निरनीकवान्त्स्वेन भागधेयेन प्रीतः।
चतुर्धाऽनीकान्यजनयत।
ततो देवा अभवन्।
पराऽसुराः॥ १॥

((devāsurāḥ saṃyattā āsan |
so'gnirabravīt |
mameyamanīkavatī tanūḥ |
tāṃ prīṇīta |
athāsurānabhibhaviṣyatheti |
te devā agnaye'nīkavate puroḍāśamaṣṭākapālaṃ
niravapan |
so'gniranīkavāntsvena bhāgadheyena prītaḥ |
caturdhā'nīkānyajanayata |
tato devā abhavan |
parā'surāḥ || 1 ||))

**[[1-6-6-2]]**

यद॒ग्नयेऽनी॑कवते पुरो॒डाश॑म॒ष्टाक॑पालं॒ नि॒र्वप॑ति।
अ॒ग्निमे॒वानी॑कवन्त॒ꣳ᳚ स्वेन॑ भाग॒धेये॑न प्रीणाति।
सो᳚ऽग्निरनी॑कवा॒न्त्स्वेन॑ भाग॒धेये॑न प्री॒तः।
च॒तु॒र्धाऽनी॑कानि जनयते।
अ॒सौ वा आ॒दि॒त्यो᳚ऽग्निरनी॑कवान्।
तस्य॑ र॒श्मयोऽनी॑कानि।
साक॑ꣳ सूर्ये॑णोद्य॒ता निर्व॑पति।
सा॒क्षादे॒वास्मा॒ अनी॑कानि जनयति।
तेऽसु॑रा॒ः परा॑जिता॒ यन्त॑ः।
द्यावा॑पृथि॒वी उपा᳚श्रयन्॥ २॥

((yada̱gnaye'nī̍kavate puro̱ḍāśa̍ma̱ṣṭāka̍pālaṃ
ni̱rvapa̍ti |
a̱gnime̱vānī̍kavanta̱m̐̎ svena̍ bhāga̱dheye̍na prīṇāti |
so̎'gniranī̍kavā̱ntsvena̍ bhāga̱dheye̍na prī̱taḥ |
ca̱tu̱rdhā'nī̍kāni janayate |
a̱sau vā ā̱di̱tyo̎'gniranī̍kavān |
tasya̍ ra̱śmayo'nī̍kāni |
sākam̐̍ sūrye̍ṇodya̱tā nirva̍pati |
sā̱kṣāde̱vāsmā̱ anī̍kāni janayati |
te'su̍rā̱ḥ parā̍jitā̱ yanta̍ḥ |
dyāvā̍pṛthi̱vī upā̎śrayan || 2 ||))

**[[1-6-6-3]]**

ते दे॒वा म॒रुद्भ्य॑ः सांतप॒नेभ्य॑श्च॒रुं निर॑वपन्।
तान्द्यावा॑पृथि॒वीभ्या॑मे॒वोभ॒यत॒ः सम॑तपन्।
यन्म॒रुद्भ्य॑ः सान्तप॒नेभ्य॑श्च॒रुं नि॒र्वप॑ति।
द्यावा॑पृथि॒वीभ्या॑मेव तदु॑भयतो॒ यज॑मानो॒
भ्रातृ॑व्या॒न्त्संत॑पति।
म॒ध्यन्दि॑ने॒ निर्व॑पति।
तर्हि॒ हि तेऽक्ष्णि॑ष्ठं॒ त॑पति।
च॒रुर्भ॑वति।
स॒र्वत॑ ए॒वैना॒न्त्संत॑पति।
ते दे॒वाः श्वो॑विज॒यिन॒ः सन्त॑ः।
सर्वा॑सां दु॒ग्धे गृ॒हमे॒धीय॑ं च॒रुं निर॑वपन्॥ ३॥

((te de̱vā ma̱rudbhya̍ḥ sāṃtapa̱nebhya̍śca̱ruṃ
nira̍vapan |
tāndyāvā̍pṛthi̱vībhyā̍me̱vobha̱yata̱ḥ sama̍tapan |
yanma̱rudbhya̍ḥ sāntapa̱nebhya̍śca̱ruṃ ni̱rvapa̍ti |
dyāvā̍pṛthi̱vībhyā̍meva tadu̍bhayato̱ yaja̍māno̱
bhrātṛ̍vyā̱ntsaṃta̍pati |
ma̱dhyandi̍ne̱ nirva̍pati |
tarhi̱ hi te'kṣṇi̍ṣṭha̱ṃ ta̍pati |
ca̱rurbha̍vati |
sa̱rvata̍ e̱vainā̱ntsaṃta̍pati |
te de̱vāḥ śvo̍vija̱yina̱ḥ santa̍ḥ |
sarvā̍sāṃ du̱gdhe gṛ̱hame̱dhīya̍ṃ ca̱ruṃ nirā̍vapan ||
3 ||))

**[[1-6-6-4]]**

आशि॑ता ए॒वाद्योप॑वसाम।
कस्य॒ वाऽहे॒दम्।
कस्य॑ वा॒ श्वो भ॑वि॒तेति॑।
स श्रृ॒तो॑ऽभवत्।
तस्याहु॑तस्य॒ नाश्नन्न्॑।
न हि दे॒वा अहु॑तस्या॒श्नन्ति॑।
ते᳚ऽब्रुवन्।
कस्मा॑ इ॒मꣳ᳚ हो᳚ष्याम॒ इति॑।
म॒रुद्भ्यो॑ गृहमे॒धिभ्य॒ इत्य॑ब्रुवन्।
तं म॒रुद्भ्यो॑ गृहमे॒धिभ्यो॑ऽजुहवुः॥ ४॥

((āśi̍tā e̱vādyopa̍vasāma |
kasya̱ vā'he̱dam |
kasya̍ vā̱ śvo bha̍vi̱teti̍ |
sa śṛ̱to̍'bhavat |
tasyāhu̍tasya̱ nāśnann̍ |
na hi de̱vā ahu̍tasyā̱śnanti̍ |
te̎'bruvan|
kasmā̍ i̱mam̐̎ ho̎ṣyāma̱ iti̍ |
ma̱rudbhyo̍ gṛhame̱dhibhya̱ itya̍bruvan |
taṃ ma̱rudbhyo̍ gṛhame̱dhibhyo̍'juhavuḥ || 4 ||))

**[[1-6-6-5]]**

ततो॑ दे॒वा अभ॑वन्।
परा॒ऽसु॑राः।
यस्यै॒वं वि॒दुषो॑ म॒रुद्भ्यो॑ गृहमे॒धिभ्यो॑ गृ॒हे जु॒हो॑ति।
भव॑त्या॒त्मना᳚।
परा᳚ऽस्य॒ भ्रातृ॑व्यो भवति।
यद्वै य॒ज्ञस्य॑ पाक॒त्रा क्रि॒यते᳚।
प॒श॒व्य॑ं तत्।
पा॒क॒त्रा वा ए॒तत्क्रि॑यते।
यन्ने॒ध्मा ब॒र्हिर्भव॑ति।
न सा॑मिधे॒नीर॒न्वाह॑॥ ५॥

((tato̍ de̱vā abha̍van |
parā'su̍rāḥ |
yasyai̱vaṃ vi̱duṣo̍ ma̱rudbhyo̍ gṛhame̱dhibhyo̍ gṛ̱he

juhva̍ti |
bhava̍tyā̱tmanā̎ |
parā̎'sya̱ bhrātṛ̍vyo bhavati |
yadvai ya̱jñasya̍ pāka̱trā kri̱yate̎ |
paśa̱vya̍ṃ tat |
pā̱ka̱trā vā e̱tatkri̍yate |
yannedhmā ba̱rhirbhava̍ti |
na sa̍midhe̱nīra̱nvāha̍ || 5 ||))

**[[1-6-6-6]]**

न प्र॑या॒जा इ॒ज्यन्ते᳚।

नानू॑या॒जाः।

य ए॒वं वेद॑।

प॒शु॒मान्भ॑वति।

आज्य॑भागौ यजति।

य॒ज्ञस्यै॒व चक्षु॑षी॒ नान्तरे॑ति।

म॒रुतो॑ गृहमे॒धिनो॑ यजति।

भा॒ग॒धेये॑नै॒वैना॒न्त्सम॑र्धयति।

अ॒ग्निꣳ स्वि॑ष्ट॒कृत॑ं यजति॒ प्रति॑ष्ठित्यै।

इडा᳚न्तो भवति।

प॒शवो॒ वा इडा᳚।

प॒शुष्वे॒वोप॑रि॒ष्टात्प्रति॑तिष्ठति॥ ६॥

अ॒सु॑रा अश्रयन्गृहमे॒धीय॑ं च॒रुं निर॑वपन्नजुहवुर॒न्वाहे॒डा᳚न्तो भवति॒ द्वे च॑॥ ६॥

((na pra̍yā̱jā i̱jyante̎ |
nānū̍yā̱jāḥ |
ya e̱vaṃ veda̍ |
pa̱śu̱mānbha̍vati |
ājya̍bhāgau yajati |
ya̱jñasyai̱va cakṣu̍ṣī̱ nāntare̍ti |
ma̱ruto̍ gṛhame̱dhino̍ yajati |
bhā̱ga̱dheye̍nai̱vainā̱ntsama̍rdhayati |
a̱gnim̐̎ svi̍ṣṭa̱kṛta̍ṃ yajati̱ prati̍ṣṭhityai |
i̱ḍā̎nto bhavati |
pa̱śavo̱ vā i̱ḍā̎ |
pa̱śuṣve̱vopa̍ri̱ṣṭātprati̍tiṣṭhati || 6 ||
asu̍rā aśrayangṛhame̱dhīya̍ṃ ca̱ruṃ nira̍vapannajuhavura̱nvāhe̱ḍā̎nto bhavati̱ dve ca̍ || 6 ||))

**[[1-6-7-1]]**

यत्पत्नी॑ गृहमे॒धीय॑स्याश्नी॒यात्।

गृ॒ह॒मे॒ध्ये॑व स्या᳚त्।

वि त्व॑स्य य॒ज्ञ ऋ॑ध्येत।

यन्नाश्नी॒यात्।

अगृ॑हमेधी स्यात्।

नास्य॑ य॒ज्ञो व्यृ॑द्ध्येत।

प्रति॑वेशं पचेयुः।

तस्या᳚श्नीयात्।

गृ॒ह॒मे॒ध्ये॑व भ॑वति।

नास्य॑ य॒ज्ञो व्यृ॑द्ध्यते॥ १॥

((yatpatnī̍ gṛhame̱dhīya̍syāśnī̱yāt |
gṛ̱ha̱me̱dhye̍va syā̎t |
vi tva̍sya ya̱jña ṛ̍dhyeta |
yannāśnī̱yāt |
agṛ̍hamedhī syāt |
nāsya̍ ya̱jño vyṛ̍ddhyeta |
prati̍veśaṃ paceyuḥ |
tasyā̎śnīyāt|
gṛ̱ha̱me̱dhye̍va bha̍vati |
nāsya̍ ya̱jño vyṛ̍ddhyate || 1 ||))

**[[1-6-7-2]]**

ते दे॒वा गृ॑हमे॒धीये॑ने॒ष्ट्वा।

आशि॑ता अभवन्।

आञ्ज॑ता॒भ्य॑ञ्जत।

अनु॑वत्सान॑वासयन्।

तेभ्यो॑ऽसु॑रा॒ः क्षुध॑ं प्राहि॑ण्वन्।

सा दे॒वेषु॑ लो॒कमवि॑त्त्वा।

असु॑रा॒न्पुन॑रगच्छत्।

गृ॒ह॒मे॒धीये॑ने॒ष्ट्वा।

आशि॑ता भवन्ति।

आञ्ज॑ते॒ऽभ्य॑ञ्जते॥ २॥

((te de̱vā gṛ̍hame̱dhīye̍ne̱ṣṭvā |
āśi̍tā abhavan |
āñja̍tā̱bhya̍ñjata |
anu̍va̱tsāna̍vāsayan |
tebhyo'su̍rā̱ḥ kṣudha̱ṃ prāhi̍ṇvan |
sā de̱veṣu̍ lo̱kamavi̍ttvā |
asu̍rā̱npuna̍ragacchat |
gṛ̱ha̱me̱dhīye̍ne̱ṣṭvā |
āśi̍tā bhavanti |
āñja̍te̱'bhya̍ñjate || 2 ||))

**[[1-6-7-3]]**

अनु॑वत्सान् वा॑सयन्ति।

भ्रातृ॑व्यायै॒व तद्यज॑मान॒ः क्षुध॑ं प्रहि॑णोति।

ते दे॒वा गृ॑हमे॒धीये॑ने॒ष्ट्वा।

इन्द्राय निष्कासं न्यदधुः।
अस्मानेव श्व इन्द्रो निहितभाग उपावर्तितेति।
तानिन्द्रो निहितभाग उपावर्तत।
गृहमेधीयेनेष्ट्वा।
इन्द्राय निष्कासं निदध्यात्।
इन्द्र एवैनं निहितभाग उपावर्तते।
गार्हपत्ये जुहोति॥ ३॥

((anuvatsān vasayanti |
bhrātṛvyāyaiva tadyajamānaḥ kṣudhaṃ prahiṇoti |
te devā gṛhamedhīyeneṣṭvā |
indrāya niṣkāsaṃ nyadadhuḥ |
asmāneva śva indro nihitabhāga upāvartiteti |
tānindro nihitabhāga upāvartata |
gṛhamedhīyeneṣṭvā |
indrāya niṣkāsaṃ nidadhyāt |
indra evainaṃ nihitabhāga upāvartate |
gārhapatye juhoti || 3 ||))

**[[1-6-7-4]]**

भागधेयेनैवैनꣳ समर्धयति।
ऋषभमाह्वयति।
वषट्कार एवास्य सः।
अथो इन्द्रियमेव तद्वीर्यं यजमानो भ्रातृव्यस्य वृङ्क्ते।
इन्द्रो वृत्रꣳ हत्वा।
परां परावतमगच्छत्।
अपाराधमिति मन्यमानः।
सोऽब्रवीत्।
क इदं वेदिष्यतीति।
तेऽब्रुवन्मरुतो वरं वृणामहै॥ ४॥

((bhāgadheyenaivainamꣳ samardhayati |
ṛṣabhamāhvayati |
vaṣaṭkāra evāsya saḥ |
atho indriyameva tadvīryaṃ yajamāno bhrātṛvyasya vṛṅkte |
indro vṛtramꣳ hatvā |
parāṃ parāvatamagacchat|
apārādhamiti manyamānaḥ |
so'bravīt |
ka idaṃ vediṣyatīti |
te'bruvanmaruto varaṃ vṛṇāmahai || 4 ||))

**[[1-6-7-5]]**

अथ वयं वेदाम।
अस्मभ्यमेव प्रथमꣳ हविर्निरुप्याता इति।
त एनमध्यक्रीडन्।
तत्क्रीडिनां क्रीडित्वम्।
यन्मरुद्भ्यः क्रीडिभ्यः प्रथमꣳ हविर्निरुप्यते विजित्यै।
साकꣳ सूर्येणोद्यता निर्वपति।
एतस्मिन्वै लोक इन्द्रो वृत्रमहन्त्समृद्ध्यै।
एतद्ब्राह्मणान्येव पञ्च हवीꣳषि।
एतद्ब्राह्मण ऐन्द्राग्नः।
अथैष ऐन्द्रश्चरुर्भवति॥
उद्धारं वा एतमिन्द्र उदहरत।
वृत्रꣳ हत्वा।
अन्यासु देवतास्वधि।
यदेष ऐन्द्रश्चरुर्भवति।
उद्धारमेव तं यजमान उद्धरते।
अन्यासु प्रजास्वधि।
वैश्वकर्मण एककपालो भवति।
विश्वान्येव तेन कर्माणि यजमानोऽवरुन्धे॥ ५॥
ऋध्यतेऽभ्यञ्जते जुहोति वृणामहै भवत्यष्टौ च॥ ७॥

((atha vayaṃ vedāma |
asmabhyameva prathamamꣳ havirnirupyātā iti |
ta enamadhyakrīdan |
tatkrīḍinām krīḍitvam |
yanmarudbhyaḥ krīḍibhyaḥ prathamamꣳ havirnirupyate vijityai |
sākamꣳ sūryeṇodyatā nirvapati |
etasminvai loka indro vṛtramahantsamṛddhyai |
etadbrāhmaṇānyeva pañca havīmꣳṣi |
etadbrāhmaṇa aindrāgnaḥ |
athaiṣa aindraścarurbhavati ||
uddhāraṃ vā etamindra udaharata |
vṛtramꣳ hatvā |
anyāsu devatāsvadhi |
yadeṣa aindraścarurbhavati |
uddhārameva taṃ yajamāna uddharate |
anyāsu prajāsvadhi |
vaiśvakarmaṇa ekakapālo bhavati |
viśvānyeva tena karmāṇi yajamāno'varundhe || 5 ||
ṛddhyate'bhyañjate juhoti vṛṇāmahai bhavatyaṣṭau ca || 7 ||))

**[[1-6-8-1]]**

वैश्वदेवेन वै प्रजापतिः प्रजा असृजत।
ता वरुणप्रघासैर्वरुणपाशादमुञ्चत्।
साकमेधैः प्रत्यस्थापयत्।
त्र्यम्बकैरुद्रं निरवादयत।

पि॒तृ॒य॒ज्ञेन॑ सुव॒र्गं ल्लो॒कम॑गमयत्।
यद्वै॑श्वदे॒वेन॒ यज॑ते।
प्र॒जा ए॒व तद्यज॑मानः सृजते।
ता व॑रुणप्रघा॒सैर्व॑रुणपा॒शान्मु॑ञ्चति।
सा॒क॒मे॒धैः प्रति॑ष्ठापयति।
त्र्य॑म्बकैरु॒द्रं नि॒रव॑दयते॥ १॥

((vai̱śva̱de̱vena̱ vai pra̱jāpa̍tiḥ pra̱jā a̍sṛjata ।
tā va̍ruṇapragha̱sairva̍ruṇapā̱śāda̍muñcat।
sā̱ka̱me̱dhaiḥ pratya̍sthāpayat।
trya̍mbakairru̱draṃ ni̱rava̍dayata ।
pi̱tṛya̱jñena̍ suva̱rgaṃ lo̱kama̍gamayat।
yadvai̍śvade̱vena̱ yaja̍te ।
pra̱jā e̱va tadyaja̍mānaḥ sṛjate ।
tā va̍ruṇapragha̱sairva̍ruṇapā̱śānmu̍ñcati ।
sā̱ka̱me̱dhaiḥ prati̍ṣṭhāpayati ।
trya̍mbakairru̱draṃ ni̱rava̍dayate ॥ 1 ॥))

**[[1-6-8-2]]**

पि॒तृ॒य॒ज्ञेन॑ सुव॒र्गं ल्लो॒कं ग॑मयति।
द॒क्षि॒ण॒तः प्रा॑चीनावी॒ती निर्व॑पति।
द॒क्षि॒णा॒वृ॒द्धि पि॑तृ॒णाम्।
अना॑दृत्य॒ तत्।
उ॒त्त॒र॒त ए॒वोप॒वीय॒ निर्व॑पेत्।
उ॒भये॒ हि दे॒वाश्च॑ पि॒तर॑श्चे॒ज्यन्ते᳚।
अथो॒ यदे॒व द॑क्षिणा॒र्धे॑ऽधि॒ श्रय॑ति।
तेन॑ दक्षि॒णावृ॑त्।
सोमा॑य पितृ॒मते॑ पुरो॒डाश॒ꣳ॒ षट्क॑पालं॒ निर्व॑पति।
सं॒व॒त्स॒रो वै सोमः॑ पितृ॒मान्॥ २॥

((pi̱tṛ̱ya̱jñena̍ suva̱rgaṃ lo̱kaṃ ga̍mayati ।
da̱kṣi̱ṇa̱taḥ prā̍cīnāvī̱tī nirva̍pati ।
da̱kṣi̱ṇā̱vṛ̱ddhi pi̍tṛ̱ṇām ।
anā̍dṛtya̱ tat ।
u̱tta̱ra̱ta e̱vopa̱vīya̱ nirva̍pet ।
u̱bhaye̱ hi de̱vāśca̍ pi̱tara̍śce̱jyante᳚ ।
atho̱ yade̱va da̍kṣiṇā̱rdhe̍'dhi̱ śraya̍ti ।
tena̍ dakṣi̱ṇāvṛ̍t ।
somā̍ya pitṛ̱mate̍ puro̱ḍāśa̱ꣳ̱ ṣaṭka̍pālaṃ̱ nirva̍pati ।
sa̱ṃva̱tsa̱ro vai soma̍ḥ pitṛ̱mān ॥ 2 ॥))

**[[1-6-8-3]]**

सं॒व॒त्स॒रमे॒व प्री॑णाति।
पि॒तृभ्यो॑ ब॒र्हि॒षद्भ्यो॑ धा॒नाः।
मासा॒ वै पि॒तरो॑ ब॒र्हि॒षदः॑।
मासा॑ने॒व प्री॑णाति।
यस्मि॒न्वा ऋ॒तौ पुरु॑षः प्र॒मीय॑ते।
सो᳚ऽस्या॒मु॒ष्मि॒ꣳ॒ल्लो॒के भ॑वति।
ब॒हु॒रू॒पा धा॒ना भ॑वन्ति।
अ॒हो॒रा॒त्रा॒णा॑म॒भिजि॑त्यै।
पि॒तृभ्यो᳚ऽग्निष्वा॒त्तेभ्यो॑ म॒न्थम्।
अ॒र्ध॒मा॒सा वै पि॒तरो᳚ऽग्निष्वा॒त्ताः॥ ३॥

((sa̱ṃva̱tsa̱rame̱va prī̍ṇāti ।
pi̱tṛbhyo̍ barhi̱ṣadbhyo̍ dhā̱nāḥ ।
māsā̱ vai pi̱taro̍ barhi̱ṣada̍ḥ ।
māsā̍ne̱va prī̍ṇāti ।
yasmi̱nvā ṛ̱tau puru̍ṣaḥ pra̱mīya̍te ।
so᳚'syā̱muṣmi̍ꣳ̱llo̱ke bha̍vati ।
ba̱hu̱rūpā dhā̱nā bha̍vanti ।
a̱ho̱rā̱trā̱ṇā̍ma̱bhiji̍tyai ।
pi̱tṛbhyo᳚'gniṣvā̱ttebhyo̍ ma̱ntham ।
a̱rdha̱mā̱sā vai pi̱taro᳚'gniṣvā̱ttāḥ ॥ 3 ॥))

**[[1-6-8-4]]**

अ॒र्ध॒मा॒सा॑ने॒व प्री॑णाति।
अ॒भि॒वा॒न्या॑यै दु॒ग्धे भ॑वति।
सा हि पि॑तृदे॒व॒त्यं॑ दु॒हे।
य॒त्पू॒र्णम्।
तन्म॑नु॒ष्या॑णाम्।
उ॒प॒र्य॒र्धो दे॒वाना᳚म्।
अ॒र्धः पि॑तृ॒णाम्।
अ॒र्ध उप॑मन्थति।
अ॒र्धो हि पि॑तृ॒णाम्।
ए॒क॒योप॑मन्थति॥ ४॥

((a̱rdha̱mā̱sā̱ne̱va prī̍ṇāti ।
a̱bhi̱vā̱nyā̍yai du̱gdhe bha̍vati ।
sā hi pi̍tṛdeva̱tya̍ṃ du̱he ।
ya̱tpū̱rṇam ।
tanma̍nu̱ṣyā̍ṇām ।
u̱pa̱rya̱rdho de̱vānā᳚m ।
a̱rdhaḥ pi̍tṛ̱ṇām ।
a̱rdha upa̍manthati ।
a̱rdho hi pi̍tṛ̱ṇām ।
eka̱yopa̍manthati ॥ 4 ॥))

**[[1-6-8-5]]**

एका॒ हि पि॑तृ॒णाम्।
द॒क्षि॒णोप॑मन्थति।

द॒क्षि॒णावृ॒द्धि पि॑तृ॒णाम्।
अना॑र॒भ्योप॑मन्थति।
तद्धि पि॒तॄन्गच्छ॑ति।
इ॒मां दि॒शं वे॒दि॒मुद्ध॑न्ति।
उ॒भये॒ हि दे॒वाश्च॑ पि॒तर॑श्चे॒ज्यन्ते᳚।
चतु॑ःस्रक्तिर्भ॑वति।
सर्वा॒ ह्यनु॒ दिश॑ः पि॒तर॑ः।
अखा॑ता भवति॥

((ekā̠ hi pi̍tr̠̥ṇām ।
da̠kṣi̠ṇopa̍manthati ।
da̠kṣi̠ṇāvr̠̥ddhi pi̍tr̠̥ṇām ।
ana̍ra̠bhyopa̍manthati ।
taddhi pi̠tr̄ṅgacchati ।
i̠māṃ diśa̠ṃ vedi̠muddha̍nti ।
u̠bhaye̠ hi de̠vāśca̍ pi̠tara̍śce̠jyante᳚ ।
catu̍ḥsraktirbhavati ।
sarvā̠ hyanu̠ diśa̍ḥ pi̠tara̍ḥ ।
akhā̍tā bhavati ॥))

**[[1-6-8-6]]**

खा॒ता हि दे॒वाना᳚म्।
म॒ध्य॒तो᳚ऽग्निराधी॑यते।
अ॒न्त॒तो हि दे॒वाना॑माधी॒यते᳚।
वर्षी᳚यानि॒ध्म इ॒ध्माद्भ॑वति॒ व्यावृ॑त्त्यै।
परि॑ श्रयति।
अ॒न्तर्हि॑तो॒ हि पि॑तृलो॒को म॑नुष्यलो॒कात्।
यत्परु॑षि दि॒नम्।
तद्दे॒वाना᳚म्।
यद॑न्त॒रा।
तन्म॑नु॒ष्या॑णाम्॥ ६॥

((khā̠tā hi de̠vānā᳚m ।
ma̠dhya̠to᳚'gnirādhī̍yate ।
a̠nta̠to hi de̠vānā̍mādhīyate᳚ ।
varṣī̍yāni̠dhma i̠dhmādbha̍vati̠ vyāvr̥̍ttyai ।
pari̍ śrayati ।
a̠ntarhi̍to̠ hi pi̍tr̥lo̠ko ma̍nuṣyalo̠kāt ।
yatparu̍ṣi di̠nam ।
tadde̠vānā᳚m ।
yada̍nta̠rā ।
tanma̍nu̠ṣyā̍ṇām ॥ 6 ॥))

**[[1-6-8-7]]**

यत्सर्मू॑लम्।
तत्पि॑तृ॒णाम्।
सर्मू॑लं ब॒र्हिर्भ॑वति॒ व्यावृ॑त्त्यै। .h line
द॒क्षि॒णा स्तृ॑णाति।
द॒क्षि॒णावृ॒द्धि पि॑तृ॒णाम्।
त्रिः पर्ये᳚ति।
तृ॒तीये॒ वा इ॒तो लो॒के पि॒तर॑ः।
ता॒नेव प्री॑णाति।
त्रिः पु॒नः पर्ये᳚ति।
षट्थ्संप॑द्यन्ते॥ ७॥

((yatsamū̍̄lam ।
tatpi̍tr̠̥ṇām ।
samū̍laṃ ba̠rhirbha̍vati̠ vyāvr̥̍ttyai । << .h line >>
da̠kṣi̠ṇā str̥̍ṇāti ।
da̠kṣi̠ṇāvr̠̥ddhi pi̍tr̠̥ṇām।
triḥ parye̍ti ।
tr̠̥tīye̠ vā i̠to lo̠ke pi̠tara̍ḥ ।
tā̠neva prī̍ṇāti ।
triḥ puna̠ḥ parye̍ti ।
ṣaṭṭhsaṃpa̍dyante ॥ 7 ॥))

**[[1-6-8-8]]**

षड्वा ऋ॒तव॑ः।
ऋ॒तू॒नेव प्री॑णाति।
यत्प्र॑स्त॒रं यजु॑षा गृह्णी॒यात्।
प्र॒मायु॑को॒ यज॑मानः स्यात्।
यन्न गृ॑ह्णी॒यात्।
अ॒ना॒य॒त॒नः स्या᳚त्।
तू॒ष्णीमे॒व न्य॑स्येत्।
न प्र॒मायु॑को॒ भ॑वति।
नाना॑यत॒नः।
यत्त्रीन्प॑रि॒धीन्प॑रिद॒ध्यात्॥ ८॥

((ṣa̠dvā r̠̥tava̍ḥ ।
r̠̥tūne̠va prī̍ṇāti ।
yatpra̍sta̠raṃ yaju̍ṣā gr̥hṇī̠yāt ।
pra̠māyu̍ko̠ yaja̍mānaḥ syāt ।
yanna gr̥̍hṇī̠yāt ।
a̠nā̠ya̠ta̠naḥ syā᳚t ।
tū̠ṣṇīme̠va nya̍syet ।
na pra̠māyu̍ko̠ bha̍vati ।
nānā̍yata̠naḥ ।
yattrīnpa̍ri̠dhīnpa̍rida̠dhyāt ॥ 8 ॥))

**[[1-6-8-9]]**

मृ॒त्युना॒ यज॑मानं॒ परि॑गृह्णीयात्।
यन्न परि॑द॒ध्यात्।
रक्षा॑ꣳसि य॒ज्ञꣳ ह॑न्युः।
द्वौ परि॑धी परि॑दधाति।
रक्ष॑सा॒मप॑हत्यै।
अथो॑ मृ॒त्योरे॒व यज॑मान॒मुत्सृ॑जति।
यत्त्रीणि॑ त्रीणि ह॒वीꣳष्यु॑दा॒हरे॑युः।
त्रय॑स्त्रय ए॒षाꣳ सा॒कं प्रमी॑येरन्।
एकै॑कमनू॒चीना᳚न्यु॒दाह॑रन्ति।
एकै॑क ए॒वैषा॑म॒न्वञ्च॒ः प्रमी॑यते।
क॒शिपु॑ कशिप॒व्या॑य।
उ॒प॒बर्ह॑णमुपबर्ह॒ण्या॑य।
आञ्ज॑नमाञ्ज॒न्या॑य।
अ॒भ्यञ्ज॑नमभ्यञ्ज॒न्या॑य।
य॒था॒भा॒गमे॒वैना᳚न्प्रीणाति॥ ९॥
नि॒रव॑दयते पितृमाना॑ग्निष्वा॒त्ता एक॒योप॑ मन्थत्यखा॑ता भवति मनु॒ष्या॑णां पद्यन्ते परि॑द॒ध्यान्मी॑यते॒ पञ्च॑ च॥ ८॥

((mṛtyunā̱ yajá̍mānaṃ̱ pari̍gṛhṇīyāt ।
yanna pá̍ridadhyāt ।
rakṣā̍m̐si ya̱jñam̐ há̍nyuḥ ।
dvau pá̍ridhī pari̍dadhāti ।
rakṣá̍sā̱mapá̍hatyai ।
athó̍ mṛtyore̱va yajá̍mānamutsṛ́̍jati ।
yattrīṇi̍ trīṇi ha̱vīm̐ṣyú̍dā̱hare̍yuḥ ।
trayá̍straya e̱ṣām̐ sā̱kaṃ prami̍yeran ।
ekai̍kamanū̱cīnā̈nyu̱dāhá̍ranti ।
ekai̍ka e̱vaiṣá̍ma̱nvañca̱ḥ prami̍yate ।
ka̱śipú̍ kaśipa̱vyā̍ya ।
u̱pa̱barhá̍ṇamupabarha̱ṇyā̍ya ।
āñjá̍namāñja̱nyā̍ya ।
a̱bhyañjá̍namabhyañja̱nyā̍ya ।
ya̱thā̱bhā̱game̱vainā̈nprīṇāti ॥ 9 ॥
ni̱ravá̍dayate pitṛmānā́gniṣvāttā eka̱yopá̍ manthatyakhā́̍tā bhavati manu̱ṣyā̍ṇāṃ padyante parida̱dhyānmi̍yate̱ pañcá̍ ca ॥ 8 ॥))

[[1-6-9-1]]

अ॒ग्नये॑ दे॒वेभ्य॑ः पि॒तृभ्य॑ः समि॒ध्यमा॑ना॒याऽनु॑ब्रू॒हीत्या॑ह।
उ॒भये॒ हि दे॒वाश्च॑ पि॒तर॑श्चे॒ज्यन्ते᳚।
एका॒मन्वा॑ह।
एका॒ हि पि॑तृ॒णाम्।
त्रिरन्वा॑ह।
त्रिर्हि दे॒वाना᳚म्।
आ॒घा॒रा॒वा॒घार॑यति।
य॒ज्ञ॒प॒रु॒षोर॑न॒न्तरि॑त्यै।
ना॒र्षे॒यं वृ॑णीते।
न होता॑रम्॥ १॥

((a̱gnaye̍ de̱vebhya̍ḥ pi̱tṛbhya̍ḥ
sami̱dhyamā̍nā̱yānu̍brū̱hītyā̍ha ।
u̱bhaye̱ hi de̱vāśca̍ pi̱tara̍śce̱jyantē̈ ।
ekā̱manvā̍ha ।
ekā̱ hi pi̍tṛ̱ṇām ।
triranvā̍ha ।
trirhi de̱vānā̈m ।
ā̱ghā̱rā̱vā̱ghā̍rayati ।
ya̱jña̱pa̱ru̱ṣo̱raná̍ntarityai ।
nā̱rṣe̱yaṃ vṛ̍ṇīte ।
na hotā̍ram ॥ 1 ॥))

[[1-6-9-2]]

य॒दा॑र्षे॒यं वृ॑णी॒त।
य॒द्धोता॑रम्।
प्र॒मायु॑को॒ यज॑मानः स्यात्।
प्र॒मायु॑को॒ होता᳚।
तस्मा॒न्न वृ॑णीते।
यज॑मानस्य॒ होतु॒र्गोपी॑थाय॑।
अप॑ ब॒र्हिष॑ः प्रया॒जान्य॑जति।
प्र॒जा वै ब॒र्हिः।
प्र॒जा ए॒व मृ॒त्योरु॒त्सृ॑जति।
आज्य॑भागौ यजति॥ २॥

((yadā̍rṣe̱yaṃ vṛ̍ṇī̱ta ।
yaddhotā̍ram ।
pra̱māyú̍ko̱ yajá̍mānaḥ syāt ।
pra̱māyú̍ko̱ hotā̈ ।
tasmā̱nna vṛ̍ṇīte ।
yajá̍mānasya̱ hotú̍rgopī̱thāyá̍ ।
apá̍ barhi̱ṣaḥ praya̱jānyá̍jati ।
pra̱jā vai ba̱rhiḥ ।
pra̱jā e̱va mṛ̱tyorutsṛ̍jati ।
ājyá̍bhāgau yajati ॥ 2 ॥))

[[1-6-9-3]]

य॒ज्ञस्यै॒व चक्षु॑षी॒ नान्तरे॑ति।
प्रा॒ची॒ना॒वी॒ती सोम॑ं यजति।
पि॒तृ॒दे॒व॒त्या॑ हि।
ए॒षाऽऽहु॑तीः।

पञ्चकृत्वोऽव॑द्यति।
पञ्च॒ ह्ये॑ता दे॒वताः᳚।
द्वे पु॑रोऽनुवा॒क्ये᳚।
या॒ज्या॑ दे॒वता॑ वषट्का॒रः।
ता ए॒व प्री॑णाति।
सन्त॑त॒मव॑द्यति॥ ३॥

((ya̱jñasyai̱va cakṣu̍ṣī̱ nāntare̍ti |
prā̱cī̱nā̱vī̱tī somam̍ yajati |
pi̱tṛ̱de̱va̱tya̍ hi |
e̱ṣā''hu̍tīḥ |
pañca̱kṛtvo'va̍dyati |
pañca̱ hye̍tā de̱vatā̎ḥ |
dve pu̍ro'nuvā̱kye̎ |
yā̱jya̍ de̱vata̍ vaṣaṭkā̱raḥ |
tā e̱va prī̍ṇāti |
santa̍ta̱mava̍dyati || 3 ||))

**[[1-6-9-4]]**
ऋ॒तू॒नाꣳ संत॑त्यै।
प्रैवैभ्यः॒ पूर्व॑या पुरोऽनुवा॒क्य॑याऽऽह।
प्रण॑यति द्वि॒तीय॑या।
ग॒मय॑ति या॒ज्य॑या।
तृ॒तीये॒ वा इ॒तो लो॒के पि॒तर॑ः।
अह्न॑ ए॒वैना॒न् पूर्व॑या पुरोऽनुवा॒क्य॑या॒ऽत्यान॑यति।
रात्रि॑यै द्वि॒तीय॑या।
ऐवैना॑न्या॒ज्य॑या गमयति।
द॒क्षि॒ण॒तो॑ऽव॒दाय॑।
उद॒ङ्ङति॑क्रामति॒ व्यावृ॑त्त्यै॥ ४॥

((ṛ̱tū̱nām̐ sam̱ta̍tyai |
praivaibhya̱ḥ pūrva̍yā puro'nuvā̱kya̍yā''ha |
praṇa̍yati dvi̱tīya̍yā |
ga̱maya̍ti yā̱jya̍yā |
tṛ̱tīye̱ vā i̱to lo̱ke pi̱tara̍ḥ |
ahna̍ e̱vainā̱m pūrva̍yā puro'nuvā̱kya̍yā̱'tyāna̍yati |
rātri̍yai dvi̱tīya̍yā |
aivainā̍nyā̱jya̍yā gamayati |
da̱kṣi̱ṇa̱to̍'va̱dāya̍ |
uda̱ṅṅati̍krāmati̱ vyāvṛ̍ttyai || 4 ||))

**[[1-6-9-5]]**
आस्व॒धेत्याश्रा॑वयति।
अस्तु॒ स्व॒धेति॑ प्र॒त्याश्रा॑वयति।
स्व॒धा नम॒ इति॒ वष॑ट्करोति।
स्व॒धा॒का॒रो हि पि॑तृ॒णाम्।
सोम॒मग्रे॑ यजति।
सोम॑प्रयाजा॒ हि पि॒तर॑ः।
सोम॑ं पितृ॒मन्त॑ं यजति।
सं॒व॒त्स॒रो वै सोम॑ः पितृ॒मान्।
सं॒व॒त्स॒रमे॒व तद्य॑जति।
पि॒तॄन्ब॑र्हि॒षदो॑ यजति॥ ५॥

((āsva̱dhetyāśrā̍vayati |
astu̍ sva̱dheti̍ pra̱tyāśrā̍vayati |
sva̱dhā nama̱ iti̱ vaṣa̍ṭkaroti |
sva̱dhā̱kā̱ro hi pi̍tṛ̱ṇām |
soma̱magre̍ yajati |
soma̍prayājā̱ hi pi̱tara̍ḥ |
soma̍m pitṛ̱manta̍m yajati |
sa̱ṃva̱tsa̱ro vai soma̍ḥ pitṛ̱mān |
sa̱ṃva̱tsa̱rame̱va tadya̍jati |
pi̱tṝnba̍rhi̱ṣado̍ yajati || 5 ||))

**[[1-6-9-6]]**
ये वै यज्वा॑नः।
ते पि॒तरो॑ ब॒र्हि॒षद॑ः।
ता॒ने॒व तद्य॑जति।
पि॒तॄन॑ग्नि॒ष्वा॒त्तान्य॑जति।
ये वा अय॑ज्वानो गृह॒मे॒धिन॑ः।
ते पि॒तरो᳚ऽग्नि॒ष्वा॒त्ताः।
ता॒ने॒व तद्य॑जति।
अ॒ग्निं क॑व्य॒वाह॑नं यजति।
य ए॒व पि॑तृ॒णाम॒ग्निः।
तमे॒व तद्य॑जति॥ ६॥

((ye vai yajvā̍naḥ |
te pi̱taro̍ barhi̱ṣada̍ḥ |
tāne̱va tadya̍jati |
pi̱tṝna̍gni̱ṣvā̱ttānya̍jati |
ye vā aya̍jvāno gṛ̱hame̱dhina̍ḥ |
te pi̱taro̎'gni̱ṣvā̱ttāḥ |
tāne̱va tadya̍jati |
a̱gnim ka̍vya̱vāha̍nam yajati |
ya e̱va pi̍tṛ̱ṇāma̱gniḥ |
tame̱va tadya̍jati || 6 ||))

**[[1-6-9-7]]**
अथो॒ यथा॒ऽग्निꣳ स्वि॑ष्टकृ॒तं यज॑ति।
ता॒दृगे॒व तत्।

ए॒तत्ते॑ तत॒ ये च॒ त्वामन्विति॑ ति॒सृषु॑ स्र॒क्तीषु॒ नि॑द॑धाति।
तस्मा॒दा तृ॒तीया॑त्पुरु॑षान्ना॒म न गृ॒ह्णन्ति।
ए॒ताव॑न्तो॒ हीज्यन्ते॑।
अत्र॑ पितरो यथाभा॒गं म॑न्दध्व॒मित्या॑ह।
ह्लीका॒ हि पि॒तर॑ः।
उद॑ञ्चो॒ निष्क्रा॑मन्ति।
ए॒षा वै म॑नु॒ष्या॑णा॒ं दिक्।
स्वाम॒ेव तद्दि॒शमनु॒ निष्क्रा॑मन्ति॥ ७॥

((atho̱ yathā̱'gnim̐ sviṣṭakṛta̱ṃ yajáti I
tā̱dṛge̱va tat I
e̱tatte tata̱ ye ca̱ tvāmanviti ti̱sṛṣu sra̱ktīṣu̱
nidádhāti I
tasmā̱dā tṛ̱tīyātpuruṣānnāma̱ na gṛhṇanti I
e̱tāvánto̱ hījyantē I
atrá pitaro yathābhā̱gaṃ mandadhva̱mityāha I
hlīkā̱ hi pi̱tarah I
udáñco̱ niṣkrámanti I
e̱ṣā vai mánu̱ṣyāṇā̱ṃ dik I
svāme̱va taddiśa̱manu̱ niṣkrámanti II 7 II))

**[[1-6-9-8]]**
आ॒ह॒वनी॑य॒मुप॑तिष्ठन्ते।
न्ये॑वास्मै॒ तद्ध्नु॑वते।
यत्स॒त्या॑ह॒वनी॑ये॑।
अथा॒न्यत्र॒ चर॑न्ति।
आतमि॑तो॒रुप॑तिष्ठन्ते।
अ॒ग्निमे॒वोप॑द्र॒ष्टार॑ं कृ॒त्वा।
पि॒तॄन्नि॒रव॑दयन्ते।
अन्त॒ं वा ए॒ते प्रा॒णाना॑ं गच्छन्ति।
य आतमि॑तोरु॒पति॒ष्ठ॑न्ते।
सु॒सं॒दृश॑ं त्वा व॒यमित्या॑ह॥ ८॥

((ā̱ha̱va̱nīya̱mupátiṣṭhante I
nyévāsmai̱ taddhnúvate I
yatsa̱tyāhava̱nīyē I
athā̱nyatra̱ caránti I
ātamito̱rupátiṣṭhante I
a̱gnime̱vopádra̱ṣṭāráṃ kṛ̱tvā I
pi̱tṝnni̱ravádayante I
anta̱ṃ vā e̱te prā̱ṇānā̱ṃ gacchanti I
ya ātamitorupa̱tiṣṭhánte I
su̱sa̱ṃdṛśáṃ tvā va̱yamityāha II 8 II))

**[[1-6-9-9]]**
प्रा॒णो वै सु॒सं॒दृक्।
प्रा॒णमे॒वात्मन्द॑धते।
योजा॒न्वि॑न्द्र ते॒ हरी॒ इत्या॑ह।
प्रा॒णमे॒व पुन॑रयुङ्क्त।
अक्ष॒न्नमी॑मदन्त॒ हीति॒ गार्ह॑पत्य॒मुप॑तिष्ठन्ते।
अक्ष॒न्नमी॑मद॒न्ताथ॒ त्वोप॑तिष्ठामह॒ इति॒ वावैतदा॑ह।
अमी॑मदन्त पि॒तर॑ः सो॒म्या इत्य॒भि प्रप॑द्यन्ते।
अमी॑मदन्त पि॒तरोऽथ॑ त्वा॒ऽभि प्रप॑द्यामह॒ इति॒
वावैतदा॑ह।
अ॒पः परि॑षिञ्चति।
मा॒र्जय॑त्ये॒वैना॑न्॥ ९॥

((prā̱ṇo vai súsa̱ṃdṛk I
prā̱ṇame̱vātmandádhate I
yojā̱nvíndra te̱ harī̱ ityāha I
prā̱ṇame̱va punárayuṅkta I
akṣa̱nnamīmadanta̱ hīti̱ gārhápatya̱mupátiṣṭhante I
akṣa̱nnamīmada̱ntātha̱ tvopátiṣṭhāmaha̱ iti̱
vāvaitadāha I
amīmadanta pi̱tarah so̱myā itya̱bhi prapádyante I
amīmadanta pi̱taro'thá tvā̱'bhi prapádyāmaha̱ iti̱
vāvaitadāha I
a̱pah pariṣiñcati I
mā̱rjayátye̱vainān II 9 II))

**[[1-6-9-10]]**
अथो॑ त॒र्पय॑त्ये॒व।
तृप्य॑ति प्र॒जया॑ प॒शुभि॑ः।
य ए॒वं वेद॑।
अप॑ ब॒र्हिषा॑वनूया॒जौ य॑जति।
प्र॒जा वै ब॒र्हिः।
प्र॒जा ए॒व मृ॒त्योरुत्सृ॑जति।
च॒तुर॑ः प्रया॒जान्य॑जति।
द्वाव॑नूया॒जौ।
षट्थ्सं॒प॑द्यन्ते।
षड्वा ऋ॒तव॑ः॥ १०॥

((athó ta̱rpayátye̱va I
tṛpyáti pra̱jayá pa̱śubhiḥ I
ya e̱vaṃ vedá I
apá barhiṣāvanūyā̱jau yájati I
pra̱jā vai ba̱rhiḥ I
pra̱jā e̱va mṛ̱tyorutsṛjati I
ca̱turáḥ prayā̱jānyájati I
dvāvánūyā̱jau I
ṣa̱ṭthsaṃpádyante I

ṣa̱ḍvā ṛ̱tava̍ḥ ॥ 10 ॥))

**[[1-6-9-11]]**

ऋ॒तूने॒व प्री॑णाति।

न पत्न्यन्वा᳚स्ते।

न सं॑याजयन्ति।

यत्पत्न्य॒न्वासी॑त।

यत्सं॑या॒जये॑युः।

प्र॒मायु॑का स्यात्।

तस्मा॒न्नान्वा᳚स्ते।

न सं॑याजयन्ति।

पत्नि॑यै गोपी॒थाय॑॥ ११॥

होता॑र॒माज्य॑भागौ यजति॒ संत॑त॒मव॑ द्यति॒ व्यावृ॑त्त्यै बर्हि॒षदो॑ यजति॒ तमे॒व तद्य॑ज॒त्यनु॒ निष्क्रा॑मन्त्याहैनानृ॒तवो॒ नव॑ च॥ ९॥

((ṛ̱tūne̱va prī̍ṇāti ।
na patnyanvā̎ste ।
na sa̍ṃyājayanti ।
yatpatnya̱nvāsī̍ta ।
yatsa̍ṃyā̱jaye̍yuḥ ।
pra̱māyu̍kā syāt ।
tasmā̱nnānvā̎ste ।
na sa̍ṃyājayanti ।
patni̍yai gopī̱thāya̍ ॥ 11 ॥
hotā̍ra̱mājya̍bhāgau yajati̱ saṃta̍ta̱mava̍ dyati̱
vyāvṛ̍ttyai barhi̱ṣado̍ yajati̱ tame̱va tadya̍ja̱tyanu̱
niṣkrā̍mantyāhainānṛ̱tavo̱ nava̍ ca ॥ 9 ॥))

**[[1-6-10-1]]**

प्र॒तिपू॒रु॒षमेक॑कपाला॒न्निर्व॑पति।

जा॒ता ए॒व प्र॒जा रु॒द्रान्नि॒रव॑दयते।

एक॒मति॑रिक्तम्।

ज॒नि॒ष्यमा॑णा ए॒व प्र॒जा रु॒द्रान्नि॒रव॑दयते।

एक॑कपाला भवन्ति।

ए॒क॒धैव रु॒द्रं नि॒रव॑दयते।

नाभिघा॑रयति।

यद॑भिघा॒रये᳚त्।

अ॒न्त॒र॒व॒चा॒रिण॑ꣳ रु॒द्रं कु॑र्यात्।

ए॒को॒ल्मु॒केन॑ यन्ति॥ १॥

((pra̱tipū̱ru̱ṣameka̍kapālā̱nnirva̍pati ।
jā̱tā e̱va pra̱jā ru̱drānni̱rava̍dayate ।
eka̱mati̍riktam ।
ja̱ni̱ṣyamā̍ṇā e̱va pra̱jā ru̱drānni̱rava̍dayate ।
eka̍kapālā bhavanti ।
e̱ka̱dhaiva ru̱draṃ ni̱rava̍dayate ।
nābhighā̍rayati ।
yada̍bhighā̱raye̎t ।
a̱nta̱ra̱va̱cā̱riṇa̍ṃ ru̱draṃ ku̍ryāt ।
e̱ko̱lmu̱kena̍ yanti ॥ 1 ॥))

**[[1-6-10-2]]**

तद्धि रु॒द्रस्य॑ भाग॒धेय᳚म्।

इ॒मां दिश॑ं यन्ति।

ए॒षा वै रु॒द्रस्य॒ दिक्।

स्वाया॑मे॒व दि॒शि रु॒द्रं नि॒रव॑दयते।

रु॒द्रो वा अ॑प॒शुका॑या॒ आहु॑त्यै॒ नाति॑ष्ठत।

अ॒सौ ते॑ प॒शुरि॑ति॒ निर्दि॑शे॒द्यं द्वि॒ष्यात्।

यमे॒व द्वेष्टि॑।

तम॑स्मै प॒शुं निर्दि॑शति।

यदि॒ न द्वि॒ष्यात्।

आ॒खुस्ते॑ प॒शुरिति॑ ब्रूयात्॥ २॥

((taddhi ru̱drasya̍ bhāga̱dheya̎m ।
i̱māṃ diśa̍ṃ yanti ।
e̱ṣā vai ru̱drasya̱ dik ।
svāyā̍me̱va di̱śi ru̱draṃ ni̱rava̍dayate ।
ru̱dro vā a̍pa̱śukā̍yā̱ āhu̍tyai̱ nāti̍ṣṭhata ।
a̱sau te̍ pa̱śuriti̱ nirdi̍śe̱dyaṃ dvi̱ṣyāt ।
yame̱va dveṣṭi̍ ।
tama̍smai pa̱śuṃ nirdi̍śati ।
yadi̱ na dvi̱ṣyāt ।
ā̱khuste̍ pa̱śuriti̍ brūyāt ॥ 2 ॥))

**[[1-6-10-3]]**

न ग्रा॒म्यान्प॒शून् हि॒नस्ति॑।

नार॒ण्यान्।

च॒तु॒ष्प॒थे जु॑होति।

ए॒ष वा अ॑ग्नीनां पड्बी॑शो॒ नाम॑।

अ॒ग्नि॒वत्ये॒व जु॑होति।

म॒ध्य॒मेन॑ प॒र्णेन॑ जुहोति।

स्रु॒ग्ध्ये॑षा।

अथो॒ खलु॑।

अ॒न्त॒मेनै॒व हो॑त॒व्य᳚म्।

अ॒न्त॒त ए॒व रु॒द्रं नि॒रव॑दयते॥ ३॥

((na grā̱myānpa̱śūn hi̱nasti̍ ।

nāraṇyān ।
catuṣpathe juhoti ।
eṣa vā agnīnām padbiśo nāma ।
agnivatyeva juhoti ।
madhyamena parṇena juhoti ।
srugghyeṣā ।
atho khalu ।
antamenaiva hotavyām ।
antata eva rudram niravadayate ॥ 3 ॥))

**[[1-6-10-4]]**

एष ते रुद्र भागः सह स्वस्राऽम्बिकयेत्याह।
शरद्वा अस्याम्बिका स्वसा।
तया वा एष हिनस्ति।
यꣳ हिनस्ति।
तयैवैनꣳ सह शमयति।
भेषजं गव इत्याह।
यावन्त एव ग्राम्याः पशवः।
तेभ्यो भेषजं करोति।
अवाम्ब रुद्रमदिमहीत्याह।
आशिषमेवैतामाशास्ते॥ ४॥

((eṣa te rudra bhāgaḥ saha svasrā'mbikayetyāha ।
śaradvā asyāmbikā svasā ।
tayā vā eṣa hinasti ।
yam̐ hinasti ।
tayaivainam̐ saha śamayati ।
bheṣajam gava ityāha ।
yāvanta eva grāmyāḥ paśavaḥ ।
tebhyo bheṣajam karoti ।
avāmba rudramadimahītyāha ।
āśiṣamevaitāmāśāste ॥ 4 ॥))

**[[1-6-10-5]]**

त्र्यम्बकं यजामह इत्याह।
मृत्योर्मुक्षीय माऽमृतादिति वावैतदाह।
उत्किरन्ति।
भगस्य लीप्सन्ते।
मूते कृत्वाऽऽसजन्ति।
यथा जनं यतेऽवसं करोति।
तादृगेव तत्।
एष ते रुद्र भाग इत्याह निरवत्त्यै।
अप्रतीक्षमायन्ति।
अपः परिषिञ्चति।
रुद्रस्यान्तर्हित्यै।
प्र वा एतेऽस्माल्लोकाच्च्यवन्ते।
ये त्र्यम्बकैश्चरन्ति।
आदित्यं चरुं पुनरेत्य निर्वपति।
इयं वा अदितिः।
अस्यामेव प्रतितिष्ठन्ति॥ ५॥
यन्ति ब्रूयान्निरवदयते शास्ते सिञ्चति षट्च॥ १०॥
अनुमत्यै वैश्वदेवेन ताः सृष्टास्त्रिवृत्प्रजापतिः
सवितोत्तरस्यां देवासुराः सोऽग्निर्यत्पत्नी वैश्वदेवेन ता
वरुणप्रघासैरग्नये देवेभ्यः प्रतिपूरुषं दश॥ १०॥
अनुमत्यै प्रथमजो वत्सो बहुरूपा हि पशवः
तस्मात्पृथमात्रं यदग्नयेऽनीकवत उद्धारं वा अग्नये देवेभ्य
ऋतूनेव षट्थ्सप्ततिः॥ ७६॥

((tryambakam yajāmaha ityāha ।
mṛtyormukṣīya mā'mṛtāditi vāvaitadāha ।
utkiranti ।
bhagasya līpsante ।
mūte kṛtvā''sajanti ।
yathā janam yate'vasam karoti ।
tādṛgeva tat ।
eṣa te rudra bhāga ityāha niravattyai ।
apratīkṣamāyanti ।
apaḥ pariṣiñcati ।
rudrasyāntarhityai ।
pra vā ete'smāllokāccyavante ।
ye tryambakaiścaranti ।
ādityam carum punaretya nirvapati ।
iyam vā aditiḥ ।
asyāmeva pratitiṣṭhanti ॥ 5 ॥
yanti brūyānniravadayate śāste siñcati ṣaṭca ॥ 10 ॥
anumatyai vaiśvadevena tāḥ sṛṣṭāstrivṛtprajāpatiḥ
savitottarasyām devāsurāḥ so'gniryatpatnī
vaiśvadevena tā varuṇapraghāsairagnaye
devebhyaḥ pratipūruṣam daśa ॥ 10 ॥
anumatyai prathamajo vatso bahurūpā hi paśavaḥ
tasmātpṛthamātram yadagnaye'nīkavata uddhāram
vā agnaye devebhya ṛtūneva ṣaṭthsaptatiḥ ॥ 76 ॥))

# Taittirīya-Brāhmaṇa
# Book 1, Chapter 7

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[1-7-1-1]]**

ए॒तद्ब्रा॑ह्म॒णान्ये॒व पञ्च॑ ह॒वीꣳषि॑।
अथेन्द्रा॑य॒ शुना॒सीरा॑य पुरो॒डाश॑ं द्वाद॑शकपाल॒ं निर्व॑पति।
सं॒व॒त्स॒रो वा इन्द्र॒ शुना॒सीरः॑।
सं॒व॒त्स॒रेणै॒वास्मा॒ अन्न॒मव॑रुन्धे।
वा॒य॒वय॑ं पयो॑ भवति।
वा॒युर्वै वृ॒ष्ट्यै॑ प्रदाप॒यि॒ता।
स ए॒वास्मै॒ वृ॒ष्टिं॒ प्रदा॑पयति।
सौ॒र्य॑ एक॑कपालो भवति।
सूर्ये॑ण॒ वा अ॒मुष्मि॑ꣳल्लो॒के वृ॒ष्टि॑र्धृ॒ता।
स ए॒वास्मै॒ वृ॒ष्टिं॒ निय॑च्छति॥ १॥

((e̱tadbrā̍hmaṇānye̱va pañca̍ ha̱vīm̐ṣi̍ |
athendrā̍ya̱ śunā̱sīrā̍ya puro̱ḍāśa̱ṃ dvāda̍śkapāla̱ṃ nirva̍pati |
sa̱ṃva̱tsa̱ro vā indra̱ śunā̱sīra̍ḥ |
sa̱ṃva̱tsa̱reṇai̱vāsmā̱ anna̱mava̍rundhe |
vā̱ya̱vaya̍ṃ payo̍ bhavati |
vā̱yurvai vṛ̱ṣṭyai̍ pradāpa̱yi̱tā |
sa e̱vāsmai̱ vṛ̱ṣṭi̱ṃ pradā̍payati |
sau̱rya̍ ekaka̍pālo bhavati |
sūrye̍ṇa̱ vā a̱muṣmi̍m̐llo̱ke vṛ̱ṣṭi̍rdhṛ̱tā |
sa e̱vāsmai̱ vṛ̱ṣṭi̱ṃ niya̍cchati || 1 ||))

**[[1-7-1-2]]**

द्वा॒द॒श॒ग॒वꣳ सीर॒ं दक्षि॑णा॒ समृ॑द्ध्यै।
दे॒वा॒सु॒राः संय॑त्ता आसन्।
ते दे॒वा अ॒ग्निम॑ब्रुवन्।
त्वया॑ वी॒रेणासु॑रा॒नभिभ॑वा॒मेति॑।
सो॑ऽब्रवीत्।
त्रे॒धाऽहमा॒त्मान॒ं विक॑रिष्य॒ इति॑।
स त्रे॒धाऽऽत्मान॒ं व्य॑कुरुत।
अ॒ग्निं तृ॒ती॑यम्।
रु॒द्रं तृ॒ती॑यम्।
वरु॑ण॒ं तृ॒ती॑यम्॥ २॥

((dvā̱da̱śa̱ga̱vam̐ sīra̱ṃ dakṣi̍ṇā̱ samṛ̍ddhyai |
de̱vā̱su̱rāḥ saṃya̍ttā āsan |
te de̱vā a̱gnima̍bruvan |
tvaya̍ vī̱reṇāsu̍rā̱nabhibha̍vā̱meti̍ |
so̍'bravīt |
tre̱dhā'hamā̱tmāna̱ṃ vika̍riṣya̱ iti̍ |
sa tre̱dhā''tmāna̱ṃ vya̍kuruta |
a̱gniṃ tṛ̱tī̍yam |
ru̱draṃ tṛ̱tī̍yam |
varu̍ṇa̱ṃ tṛ̱tī̍yam || 2 ||))

**[[1-7-1-3]]**

सो॑ऽब्रवीत्।
क इ॒दं तु॒रीय॒मिति॑।
अ॒हमितीन्द्रो॑ऽब्रवीत्।
सं तु सृ॑जावह॒ इति॑।
तौ सम॑सृजेताम्।
स इन्द्र॑स्तु॒रीय॑मभवत्।
यदिन्द्र॑स्तु॒रीय॒मभ॑वत्।
तदि॑न्द्रतु॒रीय॒स्ये॑न्द्रतुरीय॒त्वम्।
तत॒ो वै दे॒वा व्य॑जयन्त।
यदि॑न्द्रतु॒रीय॒ं नि॑रु॒प्यते॑ विजि॑त्यै॥ ३॥

((so̍'bravīt |
ka i̱daṃ tu̱rīya̱miti̍ |
a̱hamitīndro̍'bravīt |
saṃ tu sṛ̍jāvahā̱ iti̍ |
tau sama̍sṛjetām |
sa indra̍stu̱rīya̍mabhavat |
yadindra̍stu̱rīya̱mabha̍vat |
tadi̍ndraturī̱yasye̍ndraturī̱yatvam |
tato̱ vai de̱vā vya̍jayanta |
yadi̍ndraturī̱yaṃ ni̍ru̱pyate̱ viji̍tyai || 3 ||))

**[[1-7-1-4]]**

व॒हिनी॑ धे॒नुर्द॑क्षि॑णा।
यद्व॒हिनी॑।
तेना॑ऽऽग्ने॒यी।
यद्द्यौः।
तेन॑ रौ॒द्री।
यद्धे॒नुः।
तेनै॒न्द्री।
यत्स्त्री स॒ती दा॒न्ता।
तेन॑ वा॒रुणी समृ॑द्ध्यै।

प्र॒जाप॑तिर्य॒ज्ञम॑सृजत ॥ ४ ॥

((va̱hinī̍ dhe̱nurdakṣi̍ṇā ।
yadva̱hinī̎ ।
tenā̎''gne̱yī ।
yadgauḥ ।
tena̍ rau̱drī ।
yaddhe̱nuḥ ।
tenai̱ndrī ।
yatstrī sa̱tī dā̱ntā ।
tena̍ vāru̱ṇī sam̍ṛddhyai ।
pra̱jāpa̍tirya̱jñama̍sṛjata ॥ 4 ॥))

**[[1-7-1-5]]**

तꣳ सृ॒ष्टꣳ रक्षाꣳ॑स्यजिघाꣳसन्।

स ए॒ताः प्र॒जाप॑तिरा॒त्मनो॑ दे॒वता॒ निर॑मिमीत।

ताभि॒र्वै स दि॒ग्भ्यो रक्षाꣳ॑सि॒ प्राणु॑दत।

यत्प॑ञ्चाव॒त्तीयं॑ जु॒होति॑।

दि॒ग्भ्य ए॒व तद्यज॑मानो॒ रक्षाꣳ॑सि॒ प्रणु॑दते।

समू॑ढꣳ॒ रक्षः॒ संद॑ग्धꣳ॒ रक्ष॒ इत्या॑ह।

रक्षाꣳ॑स्ये॒व संद॑हति।

अ॒ग्नये॑ रक्षो॒घ्ने स्वाहेत्या॑ह।

दे॒वता᳚भ्य ए॒व वि॑जिग्या॒नाभ्यो॑ भाग॒धेयं॑ करोति।

प्र॒ष्टि॒वा॒ही रथो॒ दक्षि॑णा॒ समृ॑द्ध्यै ॥ ५ ॥

((tam̐ sṛ̱ṣṭam̐ rakṣām̐̍syajighām̐san ।
sa e̱tāḥ pra̱jāpa̍tirā̱tmano̍ de̱vatā̱ nira̍mimīta ।
tābhi̱rvai sa di̱gbhyo rakṣām̐̍si̱ prāṇu̍data ।
yatpa̍ñcāva̱ttīya̍ṃ ju̱hoti̍ ।
di̱gbhya e̱va tadyaja̍māno̱ rakṣām̐̍si̱ praṇu̍date ।
samū̍ḍha̱m̐ rakṣa̱ḥ saṃda̍gdha̱m̐ rakṣa̱ ityā̍ha ।
rakṣām̐̍sye̱va saṃda̍hati ।
a̱gnaye̍ rakṣo̱ghne svāhetyā̍ha ।
de̱vatā̎bhya e̱va vi̍jigyā̱nābhyo̍ bhāga̱dheya̍ṃ karoti
।
pra̱ṣṭi̱vā̱hī ratho̱ dakṣi̍ṇā̱ sam̍ṛddhyai ॥ 5 ॥))

**[[1-7-1-6]]**

इन्द्रो॑ वृ॒त्रꣳ ह॒त्वा।

असु॑रान्परा॒भाव्य॑।

नमु॑चिमासु॒रं नाल॑भत।

तꣳ श॒च्या᳚ऽगृह्णात्।

तौ सम॑लभेताम्।

सो᳚ऽस्माद॒भिशु॑नतरोऽभवत्।

सो᳚ऽब्रवीत्।

सं॒धाꣳ संद॑धावहै।

अथ॒ त्वाऽव॑ स्रक्ष्यामि।

न मा॒ शुष्के॑ण॒ नार्द्रेण॑ हनः ॥ ६ ॥

((indro̍ vṛ̱tram̐ ha̱tvā ।
asu̍rānparā̱bhāvya̍ ।
namu̍cimāsu̱raṃ nāla̍bhata ।
tam̐ śa̱cyā̎'gṛhṇāt ।
tau sama̍labhetām ।
so̎'smāda̱bhiśu̍nataro'bhavat ।
so̎'bravīt।
sa̱ṃdhām̐ saṃda̍dhāvahai ।
atha̱ tvā'va̍ srakṣyāmi ।
na mā̱ śuṣke̍ṇa̱ nārdreṇa̍ hanaḥ ॥ 6 ॥))

**[[1-7-1-7]]**

न दि॒वा न नक्त॒मिति॑।

स ए॒तम॒पां फेन॑मसिञ्चत्।

न वा ए॒ष शुष्को॒ नार्द्रो व्यु॑ष्टाऽऽसीत्।

अनु॑दितः॒ सूर्यः॑।

न वा ए॒तद्दि॒वा न नक्त᳚म्।

तस्यै॒तस्मिꣳ॑ल्लो॒के।

अ॒पां फेने॑न॒ शिर॒ उद॑वर्तयत्।

तदे॑नम॒न्वव॑र्तत।

मि॒त्र॒द्रु॒गिति॑ ॥ ७ ॥

((na divā̱ na nakta̱miti̍ ।
sa e̱tama̱pāṃ phena̍masiñcat ।
na vā e̱ṣa śuṣko̱ nārdro vyu̍ṣṭā''sīt ।
anu̍ditaḥ̱ sūrya̍ḥ ।
na vā e̱taddivā̱ na naktā̎m ।
tasyai̱tasmim̐̍llo̱ke ।
a̱pāṃ phene̍na̱ śira̱ udā̍vartayat ।
tade̍na̱manva̍vartata ।
mitra̍dru̱giti̍ ॥ 7 ॥))

**[[1-7-1-8]]**

स ए॒तान॑पामा॒र्गान॑जनयत्।

तान॑जुहोत्।

तैर्वै स रक्षा॒ꣳ॒स्यपा॑हत।

यद॑पामार्ग॒हो॒मो भव॑ति।

रक्ष॑सा॒मप॑हत्यै।

ए॒को॒ल्मु॒केन॑ यन्ति।

तद्धि रक्ष॑सां भाग॒धेय᳚म्।

इ॒मां दिशं॑ यन्ति।

ए॒षा वै रक्ष॑सां॒ दिक्।

स्वाया॑मे॒व दि॒शि रक्षा॒ꣳ॑सि हन्ति॥ ८॥

((sa e̱tāna̍pāmā̱rgāna̍janayat |
tāna̍juhot |
tairvai sa rakṣā̱m̐syapa̍hata |
yada̍pāmārgaho̱mo bhava̍ti |
rakṣa̍sā̱mapa̍hatyai |
e̱ko̱lmu̱kena̍ yanti |
taddhi rakṣa̍sā̱ṃ bhāga̱dheya̎m |
i̱māṃ diśa̍ṃ yanti |
e̱ṣā vai rakṣa̍sā̱ṃ dik |
svāya̍me̱va di̱śi rakṣā̍m̐si hanti || 8 ||))

**[[1-7-1-9]]**

स्वकृ॑त॒ इरि॑णे जुहोति प्रद॒रे वा᳚।
ए॒तद्वै रक्ष॑सामा॒यत॑नम्।
स्व ए॒वायत॑ने॒ रक्षा॒ꣳ॑सि हन्ति।
प॒र्ण॒मये॑न स्रु॒वेण॑ जुहोति।
ब्रह्म॒ वै प॒र्णः।
ब्रह्म॑णै॒व रक्षा॒ꣳ॑सि हन्ति।
दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒व इत्या॑ह।
स॒वि॒तृप्र॑सूत ए॒व रक्षा॒ꣳ॑सि हन्ति।
ह॒तꣳ रक्षोऽव॑धिष्म॒ रक्ष॒ इत्या॑ह।
रक्ष॑सा॒ꣳ॒ स्तृत्यै᳚।
यद्वस्ते॒ तद्दक्षि॑णा नि॒रव॑त्त्यै।
अप्र॑तीक्ष॒माय॑न्ति।
रक्ष॑साम॒न्तर्हि॑त्यै॥ ९॥
य॒च्छ॒ति॒ वरु॑णं॒ तृती॑यं॒ विजि॑त्या असृजत॒ समृ॑द्ध्यै हनो॒
मित्र॑द्रु॒गिति॒ हन्ति॒ स्तृत्यै॒ त्रीणि॑ च॥ १॥

((svakṛ̍ta̱ iri̍ṇe juhoti prada̱re vā̎ |
e̱tadvai rakṣa̍sāmā̱yata̍nam|
sva e̱vāyata̍ne̱ rakṣā̱m̐si hanti |
pa̱rṇa̱maye̍na sru̱veṇa̍ juhoti |
brahma̱ vai pa̱rṇaḥ |
brahma̍ṇa̱iva rakṣā̱m̐si hanti |
de̱vasya̍ tvā savi̱tuḥ pra̍sa̱va ityā̍ha |
sa̱vi̱tṛpra̍sūta e̱va rakṣā̱m̐si hanti |
ha̱tam̐ rakṣo'va̍dhiṣma̱ rakṣa̱ ityā̍ha |
rakṣa̍sā̱m̐ stṛtyai̎ |
yadvaste̱ taddakṣi̍ṇā ni̱rava̍ttyai |
apra̍tīkṣa̱māya̍nti |
rakṣa̍sāma̱ntarhi̍tyai || 9 ||
ya̱cchati̱ varu̍ṇaṃ̱ tṛtī̍yaṃ̱ viji̍tyā asṛjata̱ samṛ̍ddhyai
hano̱ mitra̍dru̱giti̱ hanti̱ stṛtyai̱ trīṇi̍ ca || 1 ||))

**[[1-7-2-1]]**

धा॒त्रे पु॑रो॒डाशं॒ द्वाद॑शकपालं॒ निर्व॑पति।
सं॒व॒त्स॒रो वै धा॒ता।
सं॒व॒त्स॒रेणै॒वास्मै᳚ प्र॒जाः प्रज॑नयति।
अन्वे॒वास्मा॒ अनु॑मतिर्मन्यते।
रा॒ते रा॒का।
प्र सि॑नीवा॒ली ज॑नयति।
प्र॒जास्वे॒व प्रजा॑तासु कु॒ह्वा॑ वाच॑ं दधाति।
मि॒थु॒नौ गावौ॒ दक्षि॑णा॒ समृ॑द्ध्यै।
आ॒ग्ना॒वै॒ष्ण॒वमेका॑दशकपालं॒ निर्व॑पति।
ऐ॒न्द्रा॒वै॒ष्ण॒वमेका॑दशकपालम्॥ १॥

((dhā̱tre pu̍ro̱ḍāśa̱ṃ dvāda̍śakapāla̱ṃ nirva̍pati |
sa̱ṃva̱tsa̱ro vai dhā̱tā |
sa̱ṃva̱tsa̱reṇa̱ivāsmai̎ pra̱jāḥ praja̍nayati |
anve̱vāsmā̱ anu̍matirmanyate |
rā̱te rā̱kā |
pra si̍nīvā̱lī ja̍nayati |
pra̱jāsve̱va prajā̍tāsu ku̱hva̍ vāca̍ṃ dadhāti |
mi̱thu̱nau gāva̱u dakṣi̍ṇā̱ samṛ̍ddhyai |
ā̱gnā̱vai̱ṣṇa̱vameka̍daśakapāla̱ṃ nirva̍pati |
ai̱ndrā̱vai̱ṣṇa̱vameka̍daśakapālam || 1 ||))

**[[1-7-2-2]]**

वै॒ष्ण॒वं त्रि॑कपा॒लम्।
वी॒र्य॑ं वा अ॒ग्निः।
वी॒र्य॑मिन्द्रः।
वी॒र्य॑ं विष्णुः।
प्र॒जा ए॒व प्रजा॑ता वी॒र्ये᳚ प्रति॑ष्ठापयति।
तस्मा᳚त्प्र॒जा वी॒र्या॑वतीः।
वा॒म॒न ऋ॑ष॒भो व॒ही दक्षि॑णा।
यद्व॒ही।
तेना᳚ग्ने॒यः।
यदृ॑ष॒भः॥ २॥

((vai̱ṣṇa̱vaṃ tri̍kapā̱lam |
vī̱rya̍ṃ vā a̱gniḥ |
vī̱rya̍mindra̍ḥ |
vī̱rya̍ṃ viṣṇu̍ḥ |
pra̱jā e̱va prajā̍tā vī̱rye̎ prati̍ṣṭhāpayati |
tasmā̎tpra̱jā vī̱ryā̍vatīḥ |
vā̱ma̱na ṛ̍ṣa̱bho va̱hī dakṣi̍ṇā |
yadva̱hī |
tenā̎gne̱yaḥ |
yadṛ̍ṣa̱bhaḥ || 2 ||))

**[[1-7-2-3]]**

तेनैन्द्रः।
यद्वामनः।
तेन वैष्णवः समृद्ध्यै।
अग्नीषोमीयमेकादशकपालं निर्वपति।
इन्द्रासोमीयमेकादशकपालम्।
सौम्यं चरुम्।
सोमो वै रेतोधाः।
अग्निः प्रजानाँ प्रजनयिता।
वृद्धानामिन्द्रः प्रदापयिता।
सोम एवास्मै रेतो दधाति॥ ३॥

((tenaindraḥ |
yadvāmanaḥ |
tena vaiṣṇavaḥ samṛddhyai |
agnīṣomīyamekādaśakapālam nirvapati |
indrāsomīyamekādaśakapālam |
saumyam carum |
somo vai retodhāḥ |
agniḥ prajānām̐ prajanayitā |
vṛddhānāmindraḥ pradāpayitā |
soma evāsmai reto dadhāti || 3 ||))

**[[1-7-2-4]]**

अग्निः प्रजां प्रजनयति।
वृद्धामिन्द्रः प्रयच्छति।
बभ्रुर्दक्षिणा समृद्ध्यै।
सोमापौष्णं चरुं निर्वपति।
ऐन्द्रापौष्णं चरुम्।
सोमो वै रेतोधाः।
पूषा पशूनां प्रजनयिता।
वृद्धानामिन्द्रः प्रदापयिता।
सोम एवास्मै रेतो दधाति।
पूषा पशून्प्रजनयति॥

((agniḥ prajām prajanayati |
vṛddhāmindraḥ prayacchati |
babhrurdakṣiṇā samṛddhyai |
somāpauṣṇam carum nirvapati |
aindrāpauṣṇam carum |
somo vai retodhāḥ |
pūṣā paśūnām prajanayitā |
vṛddhānāmindraḥ pradāpayitā |
soma evāsmai reto dadhāti |
pūṣā paśūnprajanayati ||))

**[[1-7-2-5]]**

वृद्धानिन्द्रः प्रयच्छति।
पौष्णश्चरुर्भवति।
इयं वै पूषा।
अस्यामेव प्रतितिष्ठति।
श्यामो दक्षिणा समृद्ध्यै।
बहु वै पुरुषो मेध्यमुपगच्छति।
वैश्वानरं द्वादशकपालं निर्वपति।
संवत्सरो वा अग्निर्वैश्वानरः।
संवत्सरेणैवैनँ स्वदयति।
हिरण्यं दक्षिणा॥ ५॥

((vṛddhānindraḥ prayacchati |
pauṣṇaścarurbhavati |
iyam vai pūṣā |
asyāmeva pratitiṣṭhati |
śyāmo dakṣiṇā samṛddhyai |
bahu vai puruṣo medhyamupagacchati |
vaiśvānaram dvādaśakapālam nirvapati |
samvatsaro vā agnirvaiśvānaraḥ |
samvatsareṇaivainam̐ svadayati |
hiraṇyam dakṣiṇā || 5 ||))

**[[1-7-2-6]]**

पवित्रं वै हिरण्यम्।
पुनात्येवैनँम्।
बहु वै राजन्योऽनृतं करोति।
उपजाम्यै हरते।
जिनाति ब्राह्मणम्।
वदत्यनृतम्।
अनृते खलु वै क्रियमाणे वरुणो गृह्णाति।
वारुणं यवमयं चरुं निर्वपति।
वरुणपाशादेवैनं मुञ्चति।
अश्वो दक्षिणा।
वारुणो हि देवतयाऽश्वः समृद्ध्यै॥ ६॥
ऐन्द्रावैष्णवमेकादशकपालं यदृषभो दधाति पूषा पशून्प्रजनयति हिरण्यं दक्षिणा दक्षिणैकं च॥ २॥

((pavitram vai hiraṇyam |
punātyevainām |
bahu vai rājanyo'nṛtam karoti |
upajāmyai harate |
jināti brāhmaṇam |

vada̱tyanṛ̍tam ।
anṛ̍te̱ khalu̱ vai kri̱yamā̍ṇe̱ varu̍ṇo gṛhṇāti ।
vā̱ru̱ṇam ya̍va̱mayam̍ ca̱rum nirva̍pati ।
va̱ru̱ṇa̱pā̱śāde̱vaina̍ muñcati ।
aśvo̱ dakṣi̍ṇā ।
vā̱ru̱ṇo hi de̱vata̱yā'śva̱ḥ samṛ̍ddhyai ॥ 6 ॥
ai̱ndrā̱vai̱ṣṇa̱vamekā̍daśakapālam̱ yadṛ̍ṣa̱bho
dadhā̍ti pū̱ṣā pa̱śūnpraja̍nayati̱ hira̍ṇyam̱ dakṣi̍ṇā̱
dakṣi̍ṇaikam̍ ca ॥ 2 ॥))

**[[1-7-3-1]]**

र॒त्निना॑मे॒तानि॑ ह॒वीꣳषि॑ भवन्ति।
ए॒ते वै रा॒ष्ट्रस्य॑ प्रदा॒तार॑ः।
ए॒ते॑ऽपादा॒तार॑ः।
य ए॒व रा॒ष्ट्रस्य॑ प्रदा॒तार॑ः।
ये॑ऽपादा॒तार॑ः।
त ए॒वास्मै॑ रा॒ष्ट्रं प्रय॑च्छन्ति।
रा॒ष्ट्रमे॒व भ॑वति।
यत्स॑मा॒हृत्य॑ नि॒र्वपे॓त्।
अर॑त्निनः स्युः।
य॒था॒य॒थं निर्व॑पति रत्नि॒त्वाय॑॥ १॥

((ra̱tninā̍me̱tāni̍ ha̱vīm̐ṣi̍ bhavanti ।
e̱te vai rā̱ṣṭrasya̍ prada̱tāra̍ḥ ।
e̱te̍'pāda̱tāra̍ḥ ।
ya e̱va rā̱ṣṭrasya̍ prada̱tāra̍ḥ ।
ye̍'pāda̱tāra̍ḥ ।
ta e̱vāsmai̍ rā̱ṣṭram praya̍cchanti ।
rā̱ṣṭrame̱va bha̍vati ।
yatsa̍mā̱hṛtya̍ ni̱rvape̎t ।
ara̍tninaḥ syuḥ ।
ya̱thā̱ya̱tham nirva̍pati ratni̱tvāya̍ ॥ 1 ॥))

**[[1-7-3-2]]**

यत्स॒द्यो नि॒र्वपे॓त्।
याव॑तीमेके॑न ह॒विषा॒ऽऽशिष॑मवरु॒न्धे।
ताव॑तीमव॑रुन्धीत।
अ॒न्व॒हं निर्व॑पति।
भु॒य॑सीमे॒वाशिष॒मव॑रुन्धे।
भूय॑सो यज्ञक्र॒तूनुपै॑ति।
बा॒र्ह॒स्प॒त्यं च॒रुं निर्व॑पति ब्र॒ह्मणो॑ गृ॒हे।
मु॒ख॒त ए॒वास्मै॒ ब्रह्म॒ सꣳश्य॑ति।
अथो॒ ब्रह्म॑न्ने॒व क्ष॒त्त्रम॒न्वार॑म्भयति।
शि॒ति॒पृ॒ष्ठो दक्षि॑णा॒ समृ॑द्ध्यै॥ २॥

((yatsa̱dyo ni̱rvape̎t ।
yāva̍tīmeke̍na ha̱viṣā̱''śiṣa̍mavaru̱ndhe ।
tāva̍tīmava̍rundhīta ।
a̱nva̱ham nirva̍pati ।
bhuya̍sīme̱vāśiṣa̱mava̍rundhe ।
bhūya̍so yajñakra̱tūnupai̍ti ।
bā̱rha̱spa̱tyam ca̱rum nirva̍pati bra̱hmaṇo̍ gṛ̱he ।
mu̱kha̱ta e̱vāsmai̱ brahma̱ sam̐śya̍ti ।
atho̱ brahma̍nne̱va kṣa̱ttrama̱nvāra̍mbhayati ।
śi̱ti̱pṛ̱ṣṭho dakṣi̍ṇā̱ samṛ̍ddhyai ॥ 2 ॥))

**[[1-7-3-3]]**

ऐ॒न्द्रमेका॑दशकपालꣳ राज॒न्य॑स्य गृ॒हे।
इ॒न्द्रि॒यमे॒वाव॑रुन्धे।
ऋ॒ष॒भो दक्षि॑णा॒ समृ॑द्ध्यै।
आ॒दि॒त्यं च॒रुं महि॑ष्यै गृ॒हे।
इ॒यं वा अदि॑तिः।
अ॒स्यामे॒व प्रति॑तिष्ठति।
धे॒नुर्दक्षि॑णा॒ समृ॑द्ध्यै।
भगा॑य च॒रुं वा॒वाता॑यै गृ॒हे।
भग॑मे॒वास्मि॑न्दधाति।
विचि॑त्तगर्भा पष्ठौ॒ही दक्षि॑णा॒ समृ॑द्ध्यै॥ ३॥

((ai̱ndramekā̍daśakapālam̐ rāja̱nya̍sya gṛ̱he ।
i̱ndri̱yame̱vāva̍rundhe ।
ṛ̱ṣa̱bho dakṣi̍ṇā̱ samṛ̍ddhyai ।
ā̱di̱tyam ca̱rum mahi̍ṣyai gṛ̱he ।
i̱yam vā adi̍tiḥ ।
a̱syāme̱va prati̍tiṣṭhati ।
dhe̱nurdakṣi̍ṇā̱ samṛ̍ddhyai ।
bhagā̍ya ca̱rum vā̱vātā̍yai gṛ̱he ।
bhaga̍me̱vāsmi̍ndadhāti ।
vici̍ttagarbhā paṣṭhau̱hī dakṣi̍ṇā̱ samṛ̍ddhyai ॥ 3 ॥))

**[[1-7-3-4]]**

नै॒र्ऋ॒तं च॒रुं प॑रिवृ॒क्त्यै॑ गृ॒हे कृ॒ष्णाना॑ं व्रीही॒णां
न॒खनि॑र्भिन्नम्।
पा॒प्मान॑मे॒व निर्ऋ॑तिं नि॒रव॑दयते।
कृ॒ष्णा कू॒टा दक्षि॑णा॒ समृ॑द्ध्यै।
आ॒ग्ने॒यम॒ष्टाक॑पालꣳ सेना॒न्यो॑ गृ॒हे।
सेना॑मे॒वास्य॒ सꣳश्य॑ति।
हि॒र॒ण्यं॒ दक्षि॑णा॒ समृ॑द्ध्यै।
वा॒रु॒णं दश॑कपालꣳ सू॒तस्य॑ गृ॒हे।
व॒रु॒ण॒स॒वमे॒वाव॑रुन्धे।
म॒हा॒नि॑रष्टो॒ दक्षि॑णा॒ समृ॑द्ध्यै।

मा॒रु॒तꣳ स॒प्तक॑पालं ग्राम॒ण्यो॑ गृ॒हे॥ ४॥

((nai̱rṛ̱taṃ ca̱ruṃ pa̍rivṛktyai̍ gṛ̱he kṛ̱ṣṇānā̎m̐
vrīhi̱ṇā̱m̐ na̱khani̍rbhinnam |
pā̱pmānā̍me̱va nir̍ṛtiṃ ni̱rava̍dayate |
kṛ̱ṣṇā kū̱ṭā dakṣi̍ṇā̱ samṛ̍ddhyai |
ā̱gne̱yama̱ṣṭākā̍pālam̐ senā̱nyo̍ gṛ̱he |
senā̍me̱vāsya̱ sam̐śyā̍ti |
hira̍ṇya̱ṃ dakṣi̍ṇā̱ samṛ̍ddhyai |
vā̱ru̱ṇaṃ daśa̍kapālam̐ sū̱tasya̍ gṛ̱he |
va̱ru̱ṇa̱sa̱vame̱vāva̍rundhe |
ma̱hāni̍ra̱ṣṭo̱ dakṣi̍ṇā̱ samṛ̍ddhyai |
mā̱ru̱tam̐ sa̱ptakā̍pālaṃ grāma̱ṇyo̍ gṛ̱he || 4 ||))

**[[1-7-3-5]]**

अन्नं॒ वै म॒रुतः॑।
अन्न॑मे॒वाव॑रुन्धे।
पृश्नि॒र्दक्षि॑णा॒ समृ॑द्ध्यै।
सा॒वि॒त्रं द्वाद॑शकपालं क्ष॒त्तुर्गृ॒हे प्रसू᳚त्यै।
उ॒प॒ध्व॒स्तो द॒क्षि॑णा॒ स॒मृ॑द्ध्यै।
आ॒श्वि॒नं द्वि॑कपा॒लꣳ सं॑ग्रही॒तुर्गृ॒हे।
अ॒श्विनौ॒ वै दे॒वानां᳚ भि॒षजौ᳚।
ताभ्या॑मे॒वास्मै᳚ भेष॒जं क॑रोति।
स॒वात्यौ॑ दक्षि॑णा॒ समृ॑द्ध्यै।
पौ॒ष्णं च॒रुं भा॑गदु॒घस्य॑ गृ॒हे॥ ५॥

((anna̱ṃ vai ma̱ruta̍ḥ |
anna̍me̱vāva̍rundhe |
pṛśni̱rdakṣi̍ṇā̱ samṛ̍ddhyai |
sā̱vi̱traṃ dvāda̍śakapālaṃ kṣa̱tturgṛ̱he prasū̎tyai |
u̱pa̱dhva̱sto dakṣi̍ṇā̱ samṛ̍ddhyai |
ā̱śvi̱naṃ dvi̍kapā̱lam̐ sa̍ṃgrahī̱turgṛ̱he |
a̱śvinau̱ vai de̱vānā̎m̐ bhi̱ṣajau̎ |
tābhyā̍me̱vāsmai̍ bheṣa̱jaṃ ka̍roti |
sa̱vātyau̍ dakṣi̍ṇā̱ samṛ̍ddhyai |
pau̱ṣṇaṃ ca̱ruṃ bhā̎gadu̱ghasya̍ gṛ̱he || 5 ||))

**[[1-7-3-6]]**

अन्नं॒ वै पू॒षा।
अन्न॑मे॒वाव॑रुन्धे।
श्या॒मो दक्षि॑णा॒ समृ॑द्ध्यै।
रौ॒द्रं गा॑वीधु॒कं च॒रुम॑क्षावा॒पस्य॑ गृ॒हे।
अ॒न्त॒त ए॒व रु॒द्रं नि॒रव॑दयते।
श॒ब॒ल उ॒द्वा॑रो॒ दक्षि॑णा॒ समृ॑द्ध्यै।
द्वाद॑शै॒तानि॑ ह॒वीꣳषि॑ भवन्ति।
द्वाद॑श॒ मासाः᳚ संवत्स॒रः।
सं॒व॒त्स॒रेणै॒वास्मै॑ रा॒ष्ट्रमव॑रुन्धे।
रा॒ष्ट्रमे॒व भ॑वति॥ ६॥

((anna̱ṃ vai pū̱ṣā |
anna̍me̱vāva̍rundhe |
śyā̱mo dakṣi̍ṇā̱ samṛ̍ddhyai |
rau̱draṃ gā̍vīdhu̱kaṃ ca̱ruma̍kṣāvā̱pasya̍ gṛ̱he |
a̱nta̱ta e̱va ru̱draṃ ni̱rava̍dayate |
śa̱bala̱ udvā̍ro̱ dakṣi̍ṇā̱ samṛ̍ddhyai |
dvāda̍śai̱tāni̍ ha̱vīm̐ṣi̍ bhavanti |
dvāda̍śa̱ māsā̎ḥ saṃvatsa̱raḥ |
saṃ̱va̱tsa̱reṇa̱ivāsmai̍ rā̱ṣṭramava̍rundhe |
rā̱ṣṭrame̱va bha̍vati || 6 ||))

**[[1-7-3-7]]**

यन्न प्र॑तिनि॒र्वपे᳚त्।
र॒त्निन॑ आ॒शिषो॒ऽव॑रुन्धीरन्न्।
प्र॒ति॒नि॒र्व॑पति।
इन्द्रा॑य सु॒त्राम्णे॑ पु॒रो॒डाश॒मेका॑दशकपालम्।
इन्द्रा॑याꣳहो॒मुचे᳚।
आ॒शिष॑ ए॒वाव॑रुन्धे।
अ॒यन्नो॒ राजा॑ वृत्र॒हा राजा॑ भू॒त्वा वृ॒त्रं व॑ध्या॒दित्या॑ह।
आ॒शिष॑मे॒वैतामाशा᳚स्ते।
मै॒त्रा॒बा॒र्ह॒स्प॒त्यं भ॑वति।
श्वे॒तायै᳚ श्वे॒तव॑त्सायै दु॒ग्धे॥ ७॥

((yanna pra̍tini̱rvape̎t |
ra̱tnina̍ ā̱śiṣo̱'va̍rundhīrann |
prati̱nirva̍pati |
indrā̍ya su̱trāmṇe̍ puro̱ḍāśa̱mekā̍daśakapālam |
indrā̍yām̐ho̱muce̎ |
ā̱śiṣa̍ e̱vāva̍rundhe |
a̱yanno̱ rājā̍ vṛtra̱hā rājā̍ bhū̱tvā vṛ̱traṃ
va̍dhyā̱dityā̍ha |
ā̱śiṣa̍me̱vaitāmāśā̎ste |
mai̱trā̱bā̱rha̱spa̱tyaṃ bha̍vati |
śve̱tāyai̎ śve̱tava̍tsāyai du̱gdhe || 7 ||))

**[[1-7-3-8]]**

बा॒र्ह॒स्प॒त्ये मै॒त्रमपि॑ दधाति।
ब्रह्म॑ चै॒वास्मै᳚ क्ष॒त्त्रं च॑ स॒मीची॑ दधाति।
अथो॒ ब्रह्म॑न्ने॒व क्ष॒त्त्रं प्रति॑ष्ठापयति।
बा॒र्ह॒स्प॒त्येन॑ पू॒र्वेण॒ प्रच॑रति।
मु॒ख॒त ए॒वास्मै॒ ब्रह्म॒ सङ्श्य॑ति।
अथो॒ ब्रह्म॑न्ने॒व क्ष॒त्त्रमन्वा॒रम्भ॑यति।
स्व॒यं॒कृ॒ता वे॒दिर्भ॑वति।

स्व॒यं॒दि॒नं ब॒र्हिः।
स्व॒यं॒कृ॒त इ॒ध्मः।
अन॑भिजितस्या॒भिजि॑त्यै।
तस्मा॑द्राज्ञा॒मर॑ण्यम॒भिजि॑तम्।
सैव श्वे॒ता श्वे॒तव॑त्सा॒ दक्षि॑णा॒ समृ॑द्ध्यै॥ ८॥
र॒त्नि॒त्वाय॒ समृ॑द्ध्यै पष्ठौ॒ही दक्षि॑णा॒ समृ॑द्ध्यै ग्राम॒ण्यो॑ गृ॒हे
भा॑गदु॒घस्य॑ गृ॒हे भ॑वति दु॒ग्धेऽभिजि॑त्यै॒ द्वे च॑॥ ३॥

((bā̱rha̱spa̱tye ma̱itramapi̍ dadhāti |
brahma̍ ca̱ivāsmai̍ kṣa̱ttram̐ ca̍ sa̱mīci̍ dadhāti |
atho̱ brahma̍nne̱va kṣa̱ttram̐ prati̱ṣṭhāpayati |
bā̱rha̱spa̱tyena̱ pūrve̍ṇa̱ praca̍rati |
mu̱kha̱ta e̱vāsmai̱ brahma̱ sam̐̍śyati |
atho̱ brahma̍nne̱va kṣa̱ttrama̱nvāra̍mbhayati |
sva̱yam̐kṛ̱tā vedi̍rbhavati |
sva̱yam̐di̱nam̐ ba̱rhiḥ |
sva̱yam̐kṛ̱ta i̱dhmaḥ |
ana̍bhijitasyā̱bhiji̍tyai |
tasmā̱drājñā̱mara̍ṇyama̱bhiji̍tam |
saiva śve̱tā śve̱tava̍tsā̱ dakṣi̍ṇā̱ samṛ̍ddhyai || 8 ||
ra̱tni̱tvāya̱ samṛ̍ddhyai paṣṭhau̱hī dakṣi̍ṇā̱
samṛ̍ddhyai grāma̱ṇyo̍ gṛ̱he bhā̍gadu̱ghasya̍ gṛ̱he
bha̍vati du̱gdhe'bhiji̍tyai̱ dve ca̍ || 3 ||))

**[[1-7-4-1]]**

दे॒व॒सु॒वामे॒तानि॑ ह॒वीꣳषि॑ भवन्ति।
ए॒ताव॑न्तो॒ वै दे॒वानाꣳ॑ स॒वाः।
त ए॒वास्मै॑ स॒वान्प्रय॑च्छन्ति।
त ए॑नꣳ सुवन्ते।
अ॒ग्निरे॒वैनं॑ गृ॒हप॑तीनाꣳ सुवते।
सोमो॒ वन॒स्पती॑नाम्।
रु॒द्रः प॑शू॒नाम्।
बृ॒हस्पति॒र्वा॒चाम्।
इन्द्रो᳚ ज्ये॒ष्ठानां᳚म्।
मि॒त्रः स॒त्यानां᳚म्॥ १॥

((de̱va̱su̱vāme̱tāni̍ ha̱vīm̐̍ṣi̍ bhavanti |
e̱tāva̍nto̱ vai de̱vānām̐̍ sa̱vāḥ |
ta e̱vāsmai̍ sa̱vānpraya̍cchanti |
ta e̍nam̐ suvante |
a̱gnire̱vainam̐̍ gṛ̱hapa̍tīnām̐ suvate |
somo̱ vana̱spatī̍nām |
ru̱draḥ pa̍śū̱nām |
bṛ̱ha̱spati̱rvā̱cām |
indrö jye̱ṣṭhānā̎m |
mi̱traḥ sa̱tyānā̎m || 1 ||))

**[[1-7-4-2]]**

वरु॑णो॒ धर्म॑पतीनाम्।
ए॒तदे॒व सर्वं᳚ भवति।
स॒वि॒ता त्वा᳚ प्रस॒वानाꣳ᳚ सुव॒तामि॒ति॒ हस्तं॑ गृह्णा॒ति॒ प्रसू᳚त्यै।
ये दे॑वा दे॒वसु॒वः स्थेत्या॑ह।
य॒था॒ य॒जु॒रे॒वैतत्।
म॒ह॒ते क्ष॒त्त्राय॑ म॒ह॒त आधि॑पत्याय म॒ह॒ते
जान॑राज्या॒येत्या॑ह।
आ॒शिषं॑मे॒वैतामाशा᳚स्ते।
ए॒ष वो॑ भरता॒ राजा॒ सोमो॒ऽस्माकं॑ ब्राह्म॒णाना॒ꣳ॒
राजेत्या॑ह।
तस्मा॒त्सोम॑राजानो ब्राह्म॒णाः।
प्रति॒त्यन्नाम॑ रा॒ज्यम॑धा॒यीत्या॑ह॥ २॥

((varu̍ṇo̱ dharma̍patīnām |
e̱tade̱va sarvam̐̍ bhavati |
sa̱vi̱tā tvā̎ prasa̱vānām̐̎ suvatā̱miti̱ hastam̐̍ gṛhṇāti̱
prasū̎tyai |
ye de̍vā deva̱suva̱ḥ sthetyā̍ha |
ya̱thā̱ ya̱jure̱vaitat |
ma̱ha̱te kṣa̱ttrāya̍ maha̱ta ādhi̍patyāya maha̱te
jāna̍rājyā̱yetyā̍ha |
ā̱śiṣa̍me̱vaitāmāśā̎ste |
e̱ṣa vo̍ bharatā̱ rājā̱ somo̱'smākam̐̍ brāhma̱ṇānā̱m̐
rājetyā̍ha |
tasmā̱tsoma̍rājāno brāhma̱ṇāḥ |
prati̱tyannāma̍ rā̱jyama̍dhā̱yītyā̍ha || 2 ||))

**[[1-7-4-3]]**

रा॒ज्यमे॒वास्मि॒न्प्रति॑दधाति।
स्वां त॒नुवं॑ वरु॑णो अशिश्रे॒दित्या॑ह।
व॒रु॒ण॒स॒वमे॒वाव॑रुन्धे।
शुचे᳚र्मि॒त्रस्य॒ व्रत्या॑ अभू॒मेत्या॑ह।
शुचि॑मे॒वैनं॒ व्रत्यं॑ करोति।
अम॑न्महि म॒ह॒त ऋ॒तस्य॒ नामेत्या॑ह।
म॒नु॒त ए॒वैन॑म्।
सर्वे᳚ व्राता॒ वरु॑णस्याभूव॒न्नित्या॑ह।
सर्व॑व्रातमे॒वैनं॑ करोति।
वि मि॒त्र ए॒वैरर॑ातिमता॒रीदित्या॑ह॥ ३॥

((rā̱jyame̱vāsminprati̍dadhāti |
svām̐ ta̱nuvam̐ varu̍ṇo aśiśre̱dityā̍ha |
varu̱ṇa̱sa̱vame̱vāva̍rundhe |
śuce̎rmi̱trasya̱ vratyā̍ abhū̱metyā̍ha |
śuci̍me̱vainam̐ vratyam̐ karoti |

amánmahi mahạta ṛtasya nāmetyắha ।
mạnuta ẹvainắm ।
sarvẹ vrātạ̄ varúṇasyābhūvạnnityắha ।
sarvávrātamẹvainaṃ karoti ।
vi mịtra evaịrarắtimatārị̄dityắha ॥ 3 ॥))

**[[1-7-4-4]]**

अरा॑तिमे॒वैनं॑ तारयति।
अस॑ूषुदन्त य॒ज्ञिया॑ ऋ॒तेनेत्या॑ह।
स्व॒दय॑त्ये॒वैनँ॑म्।
व्यु॑त्त्रितो ज॑रि॒माणं॑ न आन॒डित्या॑ह।
आयु॑रे॒वास्मि॑न्दधाति।
द्वाभ्यां॒ विमृ॑ष्टे।
द्वि॒पाद्यज॑माना॒ः प्रति॑ष्ठित्यै।
अ॒ग्नी॒षो॒मीय॑स्य॒ चैका॑दशकपालस्य देवसु॒वां च॑
ह॒विषा॑म॒ग्नये॑ स्विष्टकृ॒ते॑ स॒मव॑द्यति।
दे॒वता॑भिरे॒वैन॑मुभ॒यत॒ः परि॑गृह्णाति।
वि॒ष्णु॒क्र॒मान्क्र॑मते।
विष्णु॑रे॒व भू॒त्वेमाँ॑ल्लो॒काना॒भिज॑यति॥ ४॥
स॒त्याना॑मध॒यीत्या॑हातारी॒दित्या॑ह क्रमत॒ एकं॑ च॥ ४॥

((arắtimẹvainaṃ tārayati ।
asúṣudanta yạjñiyắ ṛ̣tenetyắha ।
svạdayátyẹvainắm।
vyútrịto járịmāṇaṃ na ānạdityắha ।
āyúrẹvāsmịndadhāti ।
dvābhyāṃ̣ vimṛ́ṣṭẹ ।
dvịpādyajámānạḥ pratịṣṭhityai ।
ạgnīṣọmīyásyạ caikádaśakapālasya devasụvāṃ cá
hạviṣắmạgnayẽ sviṣṭạkṛtẹ́ sạmavádyati ।
dẹvatábhirẹvainámubhạyatạḥ parígṛhṇāti ।
viṣṇụkrạmānkrámate ।
viṣṇúrẹva bhūtvemām̐llọkānạbhijáyati ॥ 4 ॥
sạtyānámadhạ̄yītyáhātārị̄dityáha kramatạ ekaṃ ca ॥ 4 ॥))

**[[1-7-5-1]]**

अ॒र्थेत॒ः स्थेति॑ जुहोति।
आहु॑त्यै॒वैना॑ नि॒ष्क्रीय॑ गृह्णाति।
अथो॑ ह॒विष्कृ॑ताना॒मे॒वाभिघृ॑तानां गृह्णाति।
वह॑न्तीनां गृह्णाति।
ए॒ता वा अ॒पाꣳ रा॒ष्ट्रम्।
रा॒ष्ट्रमे॒वास्मै॑ गृह्णाति।
अथो॒ श्रिय॑मे॒वैन॑म॒भिव॑हन्ति।
अ॒पां पति॑र॒सीत्या॑ह।
मि॒थुन॑मे॒वाकः॑।
वृषाँ॑ऽस्यू॒र्मिरित्या॑ह॥ १॥

((ạrthetạḥ stheti juhoti ।
āhútyaịvainá nịṣkrīyá gṛhṇāti ।
athó hạviṣkṛ́tānāmẹvābhighṛ́tānāṃ gṛhṇāti ।
vahántīnāṃ gṛhṇāti ।
ẹtā vā ạpām̐ rāṣṭram ।
rāṣṭramẹvāsmaí gṛhṇāti ।
athọ śriyámẹvainámạbhiváhanti ।
ạpāṃ patirạsītyắha ।
mịthụnamẹvākáḥ ।
vṛṣā̃'syūrmirityắha ॥ 1 ॥))

**[[1-7-5-2]]**

ऊ॒र्मिम॑न्त॒मे॒वैनं॑ करोति।
वृ॒ष॒से॒नो॑ऽसीत्या॑ह।
सेना॑मे॒वास्य॒ सꣳश्य॑ति।
व्र॒ज॒क्षि॒त॒ः स्थेत्या॑ह।
ए॒ता वा अ॒पां विशः॑।
विश॑मे॒वास्मै॒ पर्यू॑हति।
म॒रु॒तामोज॒ः स्थेत्या॑ह।
अन्नं॒ वै म॒रुतः॑।
अन्न॑मे॒वाव॑रुन्धे।
सूर्य॑वर्चस॒ः स्थेत्या॑ह॥ २॥

((ūrmịmantámẹvainaṃ karoti ।
vṛṣạsenó'sītyắha ।
senắmẹvāsyạ sam̐śyáti ।
vrạjạkṣitạḥ sthetyắha ।
ẹtā vā ạpāṃ viśáḥ ।
viśámẹvāsmaị paryúhati ।
mạrutạ̄mojạḥ sthetyắha ।
annạṃ vai mạrutáḥ ।
annámẹvāvárundhe ।
sūryávarcasạḥ sthetyắha ॥ 2 ॥))

**[[1-7-5-3]]**

रा॒ष्ट्रमे॒व व॑र्च॒स्व्य॑कः।
सूर्य॑त्वचस॒ः स्थेत्या॑ह।
स॒त्यं वा ए॒तत्।
यद्वर्ष॑ति।
अनृ॑तं॒ यदा॒ तप॑ति व॒र्ष॑ति।
स॒त्या॒नृ॒ते ए॒वाव॑रुन्धे।

नैनꣳ॑ सत्यानृ॒ते उदि॑ते हिꣳ॑स्तः।
य ए॒वं वेद॑।
मान्दा॒ः स्थेत्या॑ह।
रा॒ष्ट्रमे॒व ब्र॑ह्मवर्च॒स्य॑कः॥ ३॥

((rā̱ṣṭrame̱va va̍rca̱svya̍kaḥ |
sūrya̍tvacasa̱ḥ sthetya̍ha |
sa̱tyaṃ vā e̱tat |
yadvarṣa̍ti |
anṛ̍taṃ̱ yadā̱ tapa̍ti̱ varṣa̍ti |
sa̱tyā̱nṛ̱te e̱vāva̍rundhe |
naina̍m̐ satyānṛ̱te u̍di̱te hi̍m̐stha̱ḥ |
ya e̱vaṃ veda̍ |
māndā̱ḥ sthetya̍ha |
rā̱ṣṭrame̱va bra̍hmavarca̱sya̍kaḥ || 3 ||))

**[[1-7-5-4]]**

वाशा॒ः स्थेत्या॑ह।
रा॒ष्ट्रमे॒व व॒श्य॑कः।
शक्व॑रीः स्थेत्या॑ह।
प॒शवो॑ वै शक्व॑रीः।
प॒शूने॒वाव॑रुन्धे।
वि॒श्वभृ॑तः स्थेत्या॑ह।
रा॒ष्ट्रमे॒व प॑य॒स्व्य॑कः।
ज॒नभृ॑तः स्थेत्या॑ह।
रा॒ष्ट्रमे॒वेन्द्रि॑या॒व्य॑कः।
अ॒ग्नेस्ते॑ज॒स्या॑ः स्थेत्या॑ह॥ ४॥

((vāśā̱ḥ sthetya̍ha |
rā̱ṣṭrame̱va va̱śya̍kaḥ |
śakva̍rīḥ sthetya̍ha |
pa̱śavo̱ vai śakva̍rīḥ |
pa̱śūne̱vāva̍rundhe |
vi̱śva̱bhṛ̍ta̱ḥ sthetya̍ha |
rā̱ṣṭrame̱va pa̍ya̱svya̍kaḥ |
ja̱na̱bhṛ̍ta̱ḥ sthetya̍ha |
rā̱ṣṭrame̱vendri̍yā̱vya̍kaḥ |
a̱gneste̍ja̱syā̍ḥ sthetya̍ha || 4 ||))

**[[1-7-5-5]]**

रा॒ष्ट्रमे॒व ते॑ज॒स्व्य॑कः।
अ॒पामोष॑धीना॒ꣳ॒ रस॒ः स्थेत्या॑ह।
रा॒ष्ट्रमे॒व म॑ध॒व्य॑मकः।
सा॒र॒स्व॒तं ग्रह॑ं गृह्णाति।
ए॒षा वा अ॒पां पृ॒ष्ठम्।
यत्सर॑स्वती।
पृ॒ष्ठमे॒वैनꣳ॑ समा॒नानां॑ करोति।
षो॒ड॒शभि॑र्गृह्णाति।
षोड॑शकलो॒ वै पुरु॑षः।
याव॑ाने॒व पुरु॑षः।
तस्मि॑न्वी॒र्य॑ं दधाति।
षो॒ड॒शभि॑र्जु॒होति॑ षो॒ड॒शभि॑र्गृह्णाति।
द्वात्रिꣳ॑श॒त्संप॑द्यन्ते।
द्वात्रिꣳ॑शदक्षराऽनु॒ष्टुक्।
वाग॑नु॒ष्टुप् सर्वा॑णि॒ च्छन्दा॑ꣳसि।
वा॒चैवैन॒ꣳ॒ सर्वे॑भिश्छन्दो॑भिर॒भिषि॑ञ्चति॥ ५॥
ऊ॒र्मिरित्या॑ह॒ सूर्य॑वर्चस॒ः स्थेत्या॑ह ब्रह्मवर्च॒स्य॑कस्तेज॒स्या॑ः स्थेत्या॑है॒व पुरु॑ष॒ः षट्च॑॥ ५॥

((rā̱ṣṭrame̱va te̍ja̱svya̍kaḥ |
a̱pāmoṣa̍dhīnā̱m̐ rasa̱ḥ sthetya̍ha |
rā̱ṣṭrame̱va ma̍dha̱vya̍makaḥ |
sā̱ra̱sva̱taṃ graha̍ṃ gṛhṇāti |
e̱ṣā vā a̱pāṃ pṛ̱ṣṭham |
yatsara̍svatī |
pṛ̱ṣṭhame̱vainam̐ samā̱nānā̍ṃ karoti |
ṣo̱ḍa̱śabhi̍rgṛhṇāti |
ṣo̱ḍa̍śakalo̱ vai puru̍ṣaḥ |
yāva̍ne̱va puru̍ṣaḥ |
tasmi̍nvī̱rya̍ṃ dadhāti |
ṣo̱ḍa̱śabhi̍rju̱hoti̍ ṣo̱ḍa̱śabhi̍rgṛhṇāti |
dvātri̍m̐śa̱tsaṃpa̍dyante |
dvātri̍m̐śadakṣarā'nu̱ṣṭuk |
vāga̍nu̱ṣṭup sarvā̍ṇi̱ cchandā̍m̐si |
vā̱caivaina̱m̐ sarve̍bhi̱śchando̍bhira̱bhiṣi̍ñcati || 5 ||
ū̱rmiritya̍ha̱ sūrya̍varcasa̱ḥ sthetya̍ha
brahmavarca̱sya̍kasteja̱syā̍ḥ sthetya̍hai̱va puru̍ṣa̱ḥ
ṣa̱ṭca̍ || 5 ||))

**[[1-7-6-1]]**

दे॒वीरा॑पः सं मधु॑मती॒र्मधु॑मतीभिः सृज्य॒ध्वमित्या॑ह।
ब्रह्म॑णै॒वैना॒ः सꣳसृ॑जति।
अना॑धृष्टाः सीद॒तेत्या॑ह।
ब्रह्म॑णै॒वैना॑ः सादयति।
अ॒न्तरा होतु॑श्च धिष्णि॑यं ब्राह्मणाच्छꣳ॒सिन॑श्च सादयति।
आ॒ग्नेयो॑ वै होता॑।
ऐ॒न्द्रो ब्रा॑ह्मणाच्छꣳ॒सी।
तेज॑सा चै॒वेन्द्रि॒येण॑ चो॒भय॑तो रा॒ष्ट्रं परि॑गृह्णाति।
हि॒र॑ण्ये॒नोत्पु॑नाति।

आहु॑त्यै॒ हि प॒वित्रा᳚भ्यामुत्पु॒नन्ति॒ व्यावृ॑त्त्यै ॥ १॥

((devi̍rāpa̱ḥ sam madhu̍matī̱rmadhu̍matībhiḥ sṛjyadhva̱mitya̍ha |
brahma̍ṇai̱vainā̱ḥ saṃ̎sṛjati |
anā̍dhṛṣṭā̱ḥ sīda̱tetya̍ha |
brahma̍ṇai̱vainā̎ḥ sādayati |
a̱nta̱rā hotu̍śca̱ dhiṣṇi̍yaṃ brāhmaṇācchaṃ̱̎sina̍śca sādayati |
ā̱gne̱yo vai hotā̎ |
ai̱ndro brā̎hmaṇācchaṃ̱̎sī |
teja̍sā ca̱ivendri̱yeṇa̍ cobha̱yato̍ rā̱ṣṭraṃ pari̍gṛhṇāti |
hira̍ṇye̱notpu̍nāti |
āhu̍tyai̱ hi pa̱vitrā̎bhyāmutpu̱nanti̱ vyāvṛ̍ttyai || 1 ||))

**[[1-7-6-2]]**

श॒तमा॑नं भवति ।
श॒तायु॒ः पुरु॑षः श॒तेन्द्रि॑यः ।
आयु॑ष्ये॒वेन्द्रि॒ये प्रति॑तिष्ठति ।
अनि॑भृष्टम॒सीत्या॑ह ।
अनि॑भृष्ट॒ꣳ᳚ ह्ये॑तत् ।
वा॒चो बन्धु॒रित्या॑ह ।
वा॒चो ह्ये॑ष बन्धु॑ः ।
त॒पो॒जा इत्या॑ह ।
त॒पो॒जा ह्ये॑तत् ।
सोम॑स्य दा॒त्रम॒सीत्या॑ह ॥ २॥

((śa̱tamā̍naṃ bhavati |
śa̱tāyu̱ḥ puru̍ṣaḥ śa̱tendri̍yaḥ |
āyu̍ṣye̱vendri̱ye prati̍tiṣṭhati |
ani̍bhṛṣṭama̱sītya̍ha |
ani̍bhṛṣṭa̱m̐̎ hye̍tat |
vā̱co bandhu̱ritya̍ha |
vā̱co hye̍ṣa bandhu̍ḥ |
ta̱po̱jā itya̍ha |
ta̱po̱jā hye̍tat |
soma̍sya dā̱trama̱sītya̍ha || 2 ||))

**[[1-7-6-3]]**

सोम॑स्य॒ ह्ये॑तद्दा॒त्रम् ।
शु॒क्रा व॑ः शु॒क्रेणोत्पु॑ना॒मीत्या॑ह ।
शु॒क्रा ह्याप॑ः ।
शु॒क्रꣳ हिर॑ण्यम् ।
च॒न्द्राश्च॒न्द्रेणेत्या॑ह ।
च॒न्द्रा ह्याप॑ः ।
च॒न्द्रꣳ हिर॑ण्यम् ।
अ॒मृता॑ अ॒मृते॒नेत्या॑ह ।
अ॒मृता॒ ह्याप॑ः ।
अ॒मृत॒ꣳ हिर॑ण्यम् ॥ ३॥

((soma̍sya̱ hye̍taddā̱tram |
śu̱krā va̍ḥ śu̱kreṇotpu̍nā̱mītya̍ha |
śu̱krā hyāpa̍ḥ |
śu̱kram̐ hira̍ṇyam |
ca̱ndrāśca̱ndreṇetya̍ha |
ca̱ndrā hyāpa̍ḥ |
ca̱ndram̐ hira̍ṇyam |
a̱mṛtā̍ a̱mṛte̱netya̍ha |
a̱mṛtā̱ hyāpa̍ḥ |
a̱mṛta̱m̐ hira̍ṇyam || 3 ||))

**[[1-7-6-4]]**

स्वाहा॑ रा॒ज॒सू॒या॒येत्या॑ह ।
रा॒ज॒सूया॑य॒ ह्ये॑ना उत्पु॒नाति॑ ।
स॒ध॒मादो᳚ द्यु॒म्नि नी॒रूर्ज॑ ए॒ता इति॑ वारु॒ण्यर्चा॑ गृह्णाति ।
व॒रु॒ण॒स॒वमे॒वाव॑रुन्धे ।
एक॑या गृह्णाति ।
ए॒क॒धैव यज॑माने वी॒र्यं॑ दधाति ।
क्ष॒त्त्रस्योल्ब॑मसि क्ष॒त्त्रस्य॒ योनि॑र॒सीति॑ ता॒र्प्यं॑ चो॒ष्णीषं॑ च॒ प्रय॑च्छति सयोनि॒त्वाय॑ ।
एक॑शतेन द॒र्भपु॒ञ्जी॒लैः पव॑यति ।
श॒तायु॒र्वै पुरु॑षः श॒तवी᳚र्यः ।
आ॒त्मैक॑श॒तः ॥ ४॥

((svāhā̍ rā̱ja̱sū̱yā̱yetya̍ha |
rā̱ja̱sūyā̍ya̱ hye̍nā utpu̱nāti̍ |
sa̱dha̱mādo̎ dyu̱mni nī̱rūrja̍ e̱tā iti̍ vāru̱ṇyarcā gṛhṇāti |
va̱ru̱ṇa̱sa̱vame̱vāva̍rundhe |
eka̍yā gṛhṇāti |
e̱ka̱dhaiva yaja̍māne vī̱ryaṃ̍ dadhāti |
kṣa̱ttrasyolba̍masi kṣa̱ttrasya̱ yoni̍ra̱sīti̍ tā̱rpyaṃ co̱ṣṇīṣaṃ̍ ca̱ praya̍cchati sayoni̱tvāya̍ |
eka̍śatena darbhapuñjī̱laiḥ pava̍yati |
śa̱tāyu̱rvai puru̍ṣaḥ śa̱tavī̎ryaḥ |
ā̱tmaika̍śa̱taḥ || 4 ||))

**[[1-7-6-5]]**

यावा॑ने॒व पुरु॑षः ।
तस्मि॑न्वी॒र्यं॑ दधाति ।
दध्या॑शयति ।
इ॒न्द्रि॒यमे॒वाव॑रुन्धे ।

उ॒दु॒म्बर॑माशयति।
अ॒न्नाद्य॒स्याव॑रुद्ध्यै।
शष्पा᳚ण्याशयति।
सुरा॑बलिमे॒वैनं॑ करोति।
आ॒विद॑ ए॒ता भ॑वन्ति।
आ॒विद॑मे॒वैनं॑ गमयन्ति॥ ५॥

((yāva̍ne̱va puru̍ṣaḥ |
tasmi̍nvī̱rya̍ṃ dadhāti |
dadhya̍śayati |
i̱ndri̱yame̱vāva̍rundhe |
u̱du̱mbara̍māśayati |
a̱nnādya̱syāva̍ruddhyai |
śaṣpā̎ṇyāśayati |
surā̍balime̱vainaṃ̍ karoti |
ā̱vida̍ e̱tā bha̍vanti |
ā̱vida̍me̱vainaṃ̍ gamayanti || 5 ||))

**[[1-7-6-6]]**
अ॒ग्निरे॒वैनं॒ गार्ह॑पत्येनावति।
इन्द्र॑ इन्द्रि॒येण॑।
पू॒षा प॒शुभिः॑।
मि॒त्रावरु॑णौ प्राणापा॒नाभ्या᳚म्।
इन्द्रो॑ वृ॒त्राय॒ वज्र॒मुद॑यच्छत्।
स दिव॑समलिखत्।
सो᳚ऽर्य॒म्णः पन्था॑ अभवत्।
स आवि॑न्ने॒ द्यावा॑पृथि॒वी धृ॒तव्र॑ते॒ इति॒ द्यावा॑पृथि॒वी
उपा॑धावत्।
स आ॒भ्यामे॒व प्रसू॑त॒ इन्द्रो॑ वृ॒त्राय॒ वज्रं॒ प्राह॑रत्।
आवि॑न्ने॒ द्यावा॑पृथि॒वी धृ॒तव्र॑ते॒ इति॒ यदाह॑॥ ६॥

((a̱gnire̱vainaṃ̱ gārha̍patyenāvati |
indra̍ indri̱yeṇa̍ |
pū̱ṣā pa̱śubhi̍ḥ |
mi̱trāvaru̍ṇau prāṇāpa̱nābhyā̎m |
indro̍ vṛ̱trāya̱ vajra̱muda̍yacchat|
sa diva̍samalikhat |
so̎'rya̱mṇaḥ panthā̍ abhavat|
sa āvi̍nne̱ dyāvā̍pṛthi̱vī dhṛ̱tavra̍te̱ iti̱ dyāvā̍pṛthi̱vī
upā̍dhāvat |
sa ā̱bhyāme̱va prasū̍ta̱ indro̍ vṛ̱trāya̱ vajraṃ̱
prāha̍rat |
āvi̍nne̱ dyāvā̍pṛthi̱vī dhṛ̱tavra̍te̱ iti̱ yadāha̍ || 6 ||))

**[[1-7-6-7]]**
आ॒भ्यामे॒व प्र॒सू॑तो॒ यज॑मानो॒ वज्रं॒ भ्रातृ॑व्याय॒ प्रह॑रति।
आवि॑न्ना दे॒व्यदि॑तिर्विश्वरू॒पीत्या॑ह।
इ॒यं वै दे॒व्यदि॑तिर्विश्वरू॒पी।
अ॒स्यामे॒व प्रति॑तिष्ठति।
आवि॑न्नो॒ऽयम॒सावा॑मुष्याय॒णो᳚ऽस्यां वि॒श्य॑स्मिन्रा॒ष्ट्र
इत्या॑ह।
वि॒शैवैनꣳ॑ रा॒ष्ट्रेण॒ सम॑र्धयति।
म॒ह॒ते क्ष॒त्त्राय॑ म॒ह॒त आधि॑पत्याय म॒ह॒ते
जान॑राज्या॒येत्या॑ह।
आ॒शिष॑मे॒वैतामाशा᳚स्ते।
ए॒ष वो॑ भरता॒ राजा॒ सोमो॒ऽस्माकं॑ ब्राह्म॒णाना॒ꣳ॒
राजेत्या॑ह।
तस्मा॒त्सोम॑राजानो ब्राह्म॒णाः॥ ७॥

((ā̱bhyāme̱va prasū̍to̱ yaja̍māno̱ vajraṃ̱ bhrātṛ̍vyāya̱
praha̍rati |
āvi̍nnā de̱vyadi̍tirviśvarū̱pītyā̍ha |
i̱yaṃ vai de̱vyadi̍tirviśvarū̱pī |
a̱syāme̱va prati̍tiṣṭhati |
āvi̍nno̱'yama̱sāvā̍muṣyāya̱ṇo̎'syāṃ vi̱śya̍sminrā̱ṣṭra
ityā̍ha |
vi̱śaivainam̐̍ rā̱ṣṭreṇa̱ sama̍rdhayati |
ma̱ha̱te kṣa̱ttrāya̍ maha̱ta ādhi̍patyāya maha̱te
jāna̍rājyā̱yetyā̍ha |
ā̱śiṣa̍me̱vaitāmāśā̎ste |
e̱ṣa vo̍ bharatā̱ rājā̱ somo̱'smākaṃ̍ brāhma̱ṇānā̱m̐
rājetyā̍ha |
tasmā̱tsoma̍rājāno brāhma̱ṇāḥ || 7 ||))

**[[1-7-6-8]]**
इन्द्र॑स्य॒ वज्रो॑ऽसि॒ वार्त्र॑घ्न॒ इति॒ धनुः॒ प्रय॑च्छति॒ विजि॑त्यै।
श॒त्रु॒बाध॑नाः स्थेतीषू॑न्।
श॒त्रू॑ने॒वास्य॑ बाधन्ते।
पा॒त मा᳚ प्र॒त्यञ्चं॑ पा॒त मा॑ ति॒र्यञ्च॑म॒न्वञ्चं॑ मा पा॒तेत्या॑ह।
ति॒स्रो वै श॑र॒व्या᳚ः।
प्र॒तीची॑ ति॒रश्च्य॒नूची᳚।
ताभ्य॑ ए॒वैनं॑ पान्ति।
दि॒ग्भ्यो मा॑ पा॒तेत्या॑ह।
दि॒ग्भ्य ए॒वैनं॑ पान्ति।
विश्वा᳚भ्यो मा ना॒ष्ट्राभ्यः॑ पा॒तेत्या॑ह।
अप॑रिमितादे॒वैनं॑ पान्ति।
हिर॑ण्यवर्णावु॒षसा᳚ं वि॒रो॒क इति॒ त्रि॒ष्टुभा॑ बा॒हू उद्गृ॑ह्णाति।
इ॒न्द्रि॒यं वै वी॒र्यं᳚ त्रि॒ष्टुक्।

इ॒न्द्रि॒यमे॒व वी॒र्य॑मु॒परि॑ष्टादा॒त्मन्ध॑त्ते॥ ८॥
व्यावृ॑त्त्यै दा॒त्रम॑सी॒त्या॑हा॒मृत॒ꣳ॒ हिर॑ण्यमेकश॒तो
ग॑मय॒न्त्याह॑ ब्राह्म॒णा ना॒ष्ट्राभ्य॑ः पा॒तेत्या॑ह च॒त्वारि॑ च॥
६॥

((indra̍sya̱ vajro̍'si̱ vārtra̍ghna̱ iti̱ dhanu̱ḥ praya̍cchati̱ viji̍tyai ।
śa̱tru̱bādha̍nā̱ḥ sthetīṣū̍n ।
śatrū̍ne̱vāsya̍ bādhante ।
pāta mā̎ pra̱tyañcam̍ pā̱ta mā̍ ti̱ryañca̍ma̱nvañcam̍ mā pā̱tetyā̍ha ।
ti̱sro vai śa̍ra̱vyā̎ḥ ।
pra̱tīci̍ ti̱raścya̱nūci̎ ।
tābhya̍ e̱vainam̍ pānti ।
di̱gbhyo mā̍ pā̱tetyā̍ha ।
di̱gbhya e̱vainam̍ pānti ।
viśvā̎bhyo mā nā̱ṣṭrābhyā̍ḥ pā̱tetyā̍ha ।
apa̍rimitāde̱vainam̍ pānti ।
hira̍ṇyavarṇāvu̱ṣasā̎m̐ viro̱ka iti̍ tri̱ṣṭubhā̍ bā̱hū udgṛ̍hṇāti ।
i̱ndri̱yam̱ vai vī̱ryam̍ tri̱ṣṭuk।
i̱ndri̱yame̱va vī̱rya̍mu̱pari̍ṣṭādā̱tmandha̍tte ॥ 8 ॥
vyāvṛ̍ttyai dā̱trama̍sī̱tyā̍hā̱mṛta̱m̐ hira̍ṇyamekaśa̱to ga̍maya̱ntyāha̍ brāhma̱ṇā nā̱ṣṭrābhya̍ḥ pā̱tetyā̍ha ca̱tvāri̍ ca ॥ 6 ॥))

**[[1-7-7-1]]**

दि॒शो॒ व्यास्था॑पयति।
दि॒शाम॒भिजि॑त्यै।
यद॑नुप्र॒क्राम॑ेत्।
अ॒भि दि॒शो॑ जयेत्।
उत्तु मा॑द्येत्।
मन॒साऽनुप्र॒क्राम॑ति।
अ॒भि दि॒शो॑ जयति।
नोन्मा॑द्यति।
स॒मिध॒मातिष्ठे॒त्या॑ह।
तेज॑ ए॒वाव॑रुन्धे॥ १॥

((diśo̱ vyāstha̍payati ।
di̱śāma̱bhiji̍tyai ।
yada̍nupra̱krāmē̎t ।
a̱bhi diśo̍ jayet ।
uttu mā̎dyet ।
mana̱sā'nu̱prakrā̍mati ।
a̱bhi diśo̍ jayati ।
nonmā̎dyati ।
sa̱midha̱mātiṣṭhe̱tyā̍ha ।
teja̍ e̱vāva̍rundhe ॥ 1 ॥))

**[[1-7-7-2]]**

उ॒ग्रा मा ति॒ष्ठेत्या॑ह।
इ॒न्द्रि॒यमे॒वाव॑रुन्धे।
वि॒राज॒ मा ति॒ष्ठेत्या॑ह।
अ॒न्नाद्य॑मे॒वाव॑रुन्धे।
उदी॑ची मा ति॒ष्ठेत्या॑ह।
प॒शूने॒वाव॑रुन्धे।
ऊ॒र्ध्वा मा ति॒ष्ठेत्या॑ह।
सु॒व॒र्गमे॒व लो॒कम॒भिज॑यति।
अनू॒ज्जि॑हीते।
सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै॥ २॥

((u̱grā mā ti̱ṣṭhetyā̍ha ।
i̱ndri̱yame̱vāva̍rundhe ।
vi̱rāja̱ mā ti̱ṣṭhetyā̍ha ।
a̱nnādya̍me̱vāva̍rundhe ।
udī̍cī mā ti̱sṭhetyā̍ha ।
pa̱śūne̱vāva̍rundhe ।
ū̱rdhvā mā ti̱ṣṭhetyā̍ha ।
su̱va̱rgame̱va lo̱kama̱bhija̍yati ।
anū̱jji̍hīte ।
su̱va̱rgasya̍ lo̱kasya̱ sama̍ṣṭyai ॥ 2 ॥))

**[[1-7-7-3]]**

मा॒रु॒त ए॒ष भ॑वति।
अन्नं॑ वै म॒रुत॑ः।
अन्न॑मे॒वाव॑रुन्धे।
एक॑विꣳशतिकपालो भवति॒ प्रति॑ष्ठित्यै।
यो॑ऽरण्येऽनुवा॒क्यो॑ ग॒णः।
तं मध्य॑त उप॑दधाति।
ग्रा॒म्यैरे॒व प॒शुभि॑रार॒ण्यान्प॒शून्परि॑गृह्णाति।
तस्मा॑द्ग्रा॒म्यैः प॒शुभि॑रार॒ण्याः प॒शव॒ः परि॑गृहीताः।
पृ॒थि॒र्वै॒न्यः।
अ॒भ्य॑षिच्यत॥ ३॥

((mā̱ru̱ta e̱ṣa bha̍vati ।
anna̱m vai ma̱ruta̍ḥ ।
anna̍me̱vāva̍rundhe ।
eka̍vim̐śatikapālo bhavati̱ prati̍ṣṭhityai ।
yo̍'ra̱ṇye'nuvā̱kyo̍ ga̱ṇaḥ ।
tam̱ ma̍dhya̱ta upa̍dadhāti ।
grā̱myaire̱va pa̱śubhi̍rāra̱ṇyānpa̱śūnpari̍gṛhṇāti ।
tasmā̎dgrā̱myaiḥ pa̱śubhi̍rāra̱ṇyāḥ pa̱śava̱ḥ pari̍gṛhītāḥ ।
pṛ̱thi̍rvai̱nya̱ḥ ।
a̱bhya̍ṣicyata ॥ 3 ॥))

[[1-7-7-4]]

स रा॒ष्ट्रं नाभ॑वत्।

स ए॒तानि॑ पा॒र्थान्य॑पश्यत्।

तान्य॑जुहोत्।

तैर्वै स रा॒ष्ट्रम॑भवत्।

यत्पा॒र्थानि॑ जु॒होति॑।

रा॒ष्ट्रमे॒व भ॑वति।

बा॒र्ह॒स्प॒त्यं पूर्वे॑षामुत्त॒मं भ॑वति।

ऐ॒न्द्रमुत्त॑रेषा॒म् प्रथ॒मम्।

ब्रह्म॑ चै॒वास्मै᳚ क्ष॒त्त्रं च॑ स॒मीची॑ दधाति।

अथो॒ ब्रह्म॑न्ने॒व क्ष॒त्त्रं प्रति॑ष्ठापयति॥ ४॥

((sa rā̱ṣṭraṃ nābha̍vat ।
sa e̱tāni̍ pā̱rthānya̍paśyat ।
tānya̍juhot ।
tairvai sa rā̱ṣṭrama̍bhavat ।
yatpā̱rthāni̍ ju̱hoti̍ ।
rā̱ṣṭrame̱va bha̍vati ।
bā̱rha̱spa̱tyaṃ pūrve̍ṣāmutta̱maṃ bha̍vati ।
ai̱ndramutta̍reṣā̱m pratha̱mam ।
brahma̍ cai̱vāsmai̎ kṣa̱ttraṃ ca̍ sa̱mīci̍ dadhāti ।
atho̱ brahma̍nne̱va kṣa̱ttraṃ prati̍ṣṭhāpayati ॥ 4 ॥))

[[1-7-7-5]]

ष॒ट्पु॒रस्ता॑दभि॒षे॒कस्य॑ जुहोति।

ष॒डु॒परि॑ष्टात्।

द्वाद॑श॒ संप॑द्यन्ते।

द्वाद॑श॒ मासाः᳚ संव॒त्स॒रः।

सं॒व॒त्स॒रः खलु॒ वै दे॒वानां॒ पूः।

दे॒वाना॑मे॒व पुरं॑ मध्यतो व्यव॑सर्पति।

तस्य॒ न कुत॑श्च॒नोपा᳚व्या॒धो भ॑वति।

भू॒ता॒ना॒मवे᳚ष्टी॒र्जुहोति।

अत्रा᳚त्र॒ वै मृ॒त्युर्जा॑यते।

यत्र॑ यत्रै॒व मृ॒त्युर्जा॑यते।

तत॑ ए॒वैन॒मव॑यजते।

तस्मा᳚द्राज॒सूये॑नेजा॒नः सर्व॒मायु॑रेति।

सर्वे॒ ह्य॑स्य मृ॒त्यवोऽवे᳚ष्टाः।

तस्मा᳚द्राज॒सूये॑नेजा॒नो नाभिच॑रित॒वै।

प्र॒त्यगे॑नमभिचा॒रः स्तृ॑णुते॥ ५॥

रु॒न्धे॒ सम॑ष्ट्या असिच्यत स्थापयति॒ जाय॑ते॒ पञ्च॑ च॥ ७॥

((ṣa̱ṭpu̱rastā̍dabhi̱ṣe̱kasya̍ juhoti ।
ṣa̱ḍu̱pari̍ṣṭāt ।
dvāda̍śa̱ saṃpa̍dyante ।
dvāda̍śa̱ māsā̎ḥ saṃvatsa̱raḥ ।
sa̱ṃva̱tsa̱raḥ khalu̱ vai de̱vānā̱ṃ pūḥ ।
de̱vānā̍me̱va pura̍ṃ madhyato vyava̍sarpati ।
tasya̱ na kutaś̍ca̱nopā̎vyā̱dho bha̍vati ।
bhū̱tānā̱mave̎ṣṭī̱rjuhoti ।
atrā̎tra̱ vai mṛ̱tyurjā̍yate ।
yatra̍ yatrai̱va mṛ̱tyurjāya̍te ।
tata̍ e̱vaina̱mava̍yajate ।
tasmā̎drāja̱sūye̍neja̱naḥ sarva̱māyu̍reti ।
sarve̱ hya̍sya mṛ̱tyavo've̎ṣṭāḥ ।
tasmā̎drāja̱sūye̍neja̱no nābhica̍rita̱vai ।
pra̱tyage̍namabhicā̱raḥ stṛ̍ṇute ॥ 5 ॥
ru̱ndhe̱ samā̍ṣṭyā asicyata sthāpayati̱ jāya̍te̱ pañca̍ ca ॥ 7 ॥))

[[1-7-8-1]]

सोम॑स्य॒ त्विषि॑रसि॒ तवे॑व मे॒ त्विषि॑र्भूया॒दिति॑

शार्दू॒लच॒र्मोप॑स्तृणाति।

यैव सोमे॒ त्विषि॑ः।

या शा᳚र्दू॒ले।

ताम॒ेवाव॑रुन्धे।

मृ॒त्योर्वा ए॒ष वर्ण॑ः।

यच्छा᳚र्दू॒लः।

अ॒मृत॒ꣳ हिर॑ण्यम्।

अ॒मृत॑मसि मृ॒त्योर्मा॑ पा॒हीति॒ हिर॑ण्य॒मुपा᳚स्यति।

अ॒मृत॑मे॒व मृ॒त्योर॒न्तर्ध॑त्ते।

श॒तमा॑नं भवति॥ १॥

((soma̍sya̱ tviṣi̍rasi̱ tave̍va me̱ tviṣi̍rbhūyā̱diti̍
śārdūlaca̱rmopa̍stṛ̱ṇāti ।
yaiva some̱ tviṣi̍ḥ ।
yā śā̎rdū̱le ।
tāme̱vāva̍rundhe ।
mṛ̱tyorvā e̱ṣa varṇa̍ḥ ।
yacchā̎rdū̱laḥ ।
a̱mṛta̱m̐ hira̍ṇyam ।
a̱mṛta̍masi mṛ̱tyorma̍ pā̱hīti̱ hira̍ṇya̱mupā̎syati ।
a̱mṛta̍me̱va mṛ̱tyora̱ntardha̍tte ।
śa̱tamā̍naṃ bhavati ॥ 1 ॥))

[[1-7-8-2]]

श॒तायु॑ः पुरु॑षः श॒तेन्द्रि॑यः।

आयु॑ष्येवेन्द्रि॒ये प्रति॑तिष्ठति।

दि॒द्योन्मा॑ पा॒हीत्यु॒परि॑ष्टाद॒धि॒ निर्द॑धाति।

उ॒भ॒य॒त॑ ए॒वास्मै॑ शर्म॑ दधाति।
अवे॑ष्टा दन्द॒शूका॒ इति॑ क्लीबꣳ सीसे॑न विध्यति।
द॒न्द॒शूका॑ने॒वाव॑यजते।
तस्मा॑त्क्ली॒बं द॑न्द॒शूका॒ दꣳ शुका॑ः।
निर॑स्तं॒ नमु॑चे॒ः शिर॒ इति॑ लोहिताय॒सं निर॑स्यति।
पा॒प्मान॑मे॒व नमु॑चिं नि॒रव॑दयते।
प्रा॒णा आ॒त्मन॒ः पूर्वे॑ऽभि॒षिच्या॒ इत्या॑हुः॥ २॥

((śa̱tāyu̱ḥ puru̍ṣaḥ śa̱tendri̍yaḥ ।
āyu̍ṣye̱veindri̱ye prati̍tiṣṭhati ।
di̱dyonma̍ pā̱hītyu̱pari̍ṣṭā̱dadhi̱ nida̍dhāti ।
u̱bha̱yata̍ e̱vāsmai̱ śarma̍ dadhāti ।
ave̍ṣṭā danda̱śūkā̱ iti̍ klībam̐ sīse̍na vidhyati ।
da̱nda̱śūka̍ne̱vāva̍yajate ।
tasmā̍tklī̱baṃ da̍nda̱śūkā̱ dam̐ śu̍kāḥ ।
nira̍sta̱ṃ namu̍ce̱ḥ śira̱ iti̍ lohitāya̱saṃ nira̍syati ।
pā̱pmāna̍me̱va namu̍ci̱ṃ ni̱rava̍dayate ।
prā̱ṇā ā̱tmana̱ḥ pūrve̍'bhi̱ṣicyā̱ ityā̍huḥ ॥ 2 ॥))

**[[1-7-8-3]]**
सोमो॒ राजा॒ वरु॑णः।
दे॒वा धर्म॒सुव॑श्च॒ ये।
ते ते॒ वाच॑ꣳ सुवन्तां॒ ते ते॑ प्रा॒णꣳ सु॑वन्ता॒मित्या॑ह।
प्रा॒णाने॒वात्मन॒ः पूर्वा॑न॒भिषि॑ञ्चति।
यद्ब्रू॒यात्।
अ॒ग्नेस्त्वा॒ तेज॑सा॒ऽभिषि॑ञ्चा॒मीति॑।
ते॒ज॒स्व्ये॑व स्या॑त्।
दु॒श्चर्मा॒ तु भ॑वेत्।
सोम॑स्य त्वा द्यु॒म्नेना॒भिषि॑ञ्चा॒मीत्या॑ह।
सौ॒म्यो वै दे॒वत॑या॒ पुरु॑षः॥ ३॥

((somo̱ rājā̱ varu̍ṇaḥ ।
de̱vā dharma̱suva̍śca̱ ye ।
te te̱ vācam̐ suvantā̱ṃ te te̍ prā̱ṇam̐ su̍vantā̱mityā̍ha ।
prā̱ṇāne̱vātmana̱ḥ pūrvā̍na̱bhiṣi̍ñcati ।
yadbrū̱yāt ।
a̱gnestvā̱ teja̍sā̱'bhiṣi̍ñcā̱mīti̍ ।
te̱ja̱svyeva̍ syā̍t ।
du̱ścarmā̱ tu bha̍vet ।
soma̍sya tvā dyu̱mnenā̱bhiṣi̍ñcā̱mītyā̍ha ।
sau̱myo vai de̱vata̍yā̱ puru̍ṣaḥ ॥ 3 ॥))

**[[1-7-8-4]]**
स्वयै॒वैनं॑ दे॒वत॑या॒ऽभिषि॑ञ्चति।
अ॒ग्नेस्तेज॒सेत्या॑ह।
तेज॑ ए॒वास्मि॑न्दधाति।
सूर्य॑स्य॒ वर्च॒सेत्या॑ह।
वर्च॑ ए॒वास्मि॑न्दधाति।
इन्द्र॑स्येन्द्रि॒येणेत्या॑ह।
इ॒न्द्रि॒यमे॒वास्मि॑न्दधाति।
मि॒त्रावरु॑णयोर्वी॒र्ये॑णेत्या॑ह।
वी॒र्य॑मे॒वास्मि॑न्दधाति।
म॒रुता॒मोज॒सेत्या॑ह॥ ४॥

((svayai̱vainam̐ de̱vata̍yā̱'bhiṣi̍ñcati ।
a̱gnesteja̱setyā̍ha ।
teja̍ e̱vāsmi̍ndadhāti ।
sūrya̍sya̱ varca̱setyā̍ha ।
varca̍ e̱vāsmi̍ndadhāti ।
indra̍syendri̱yeṇetyā̍ha ।
i̱ndri̱yame̱vāsmi̍ndadhāti ।
mi̱trāvaru̍ṇayorvī̱rye̍ṇetyā̍ha ।
vī̱rya̍me̱vāsmi̍ndadhāti ।
ma̱rutā̱moja̱setyā̍ha ॥ 4 ॥))

**[[1-7-8-5]]**
ओज॑ ए॒वास्मि॑न्दधाति।
क्ष॒त्त्राणा॑ꣳ क्ष॒त्त्रप॑तिर॒सीत्या॑ह।
क्ष॒त्त्राणा॑मे॒वैनं॑ क्ष॒त्त्रप॑तिं करोति।
अति॑दि॒वस्पा॒हीत्या॑ह।
अत्य॒न्यान्पा॒हीति॒ वावैतदा॑ह।
स॒मावव॑वृत्रन्नध॒रागुदी॑ची॒रित्या॑ह।
रा॒ष्ट्रमे॒वास्मि॑न्ध्रु॒वम॑कः।
उ॒च्छेष॑णेन जुहोति।
उ॒च्छेष॑णभागो॒ वै रु॒द्रः।
भा॒ग॒धेये॑नै॒व रु॒द्रं नि॒रव॑दयते॥ ५॥

((oja̍ e̱vāsmi̍ndadhāti ।
kṣa̱ttrāṇā̍m̐ kṣa̱ttrapa̍tira̱sītyā̍ha ।
kṣa̱ttrāṇā̍me̱vainam̐ kṣa̱ttrapa̍tiṃ karoti ।
ati̍di̱vaspā̱hītyā̍ha ।
atya̱nyānpā̱hīti̱ vāvaitadā̍ha ।
sa̱māva̍vṛtrannadha̱rāgudī̍cī̱rityā̍ha ।
rā̱ṣṭrame̱vāsmi̍ndhru̱vama̍kaḥ ।
u̱ccheṣa̍ṇena juhoti ।
u̱ccheṣa̍ṇabhāgo̱ vai ru̱draḥ ।
bhā̱ga̱dheye̍nai̱va ru̱draṃ ni̱rava̍dayate ॥ 5 ॥))

**[[1-7-8-6]]**
उद॒ङ्घ॒रेत्याग्नी॑ध्रे जुहोति।

एषा वै रु॒द्रस्य॒ दिक्।
स्वाया॑मे॒व दि॒शि रु॒द्रं नि॒रव॑दयते।
रुद्र॒ यत्ते॒ क्रयी॒परं॒ नामेत्या॑ह।
यद्वा अ॑स्य॒ क्रयी॒परं॒ नाम॑।
तेन॒ वा ए॒ष हि॑नस्ति।
यꣳ हि॒नस्ति॑।
तेनै॒वैनꣳ॑ स॒ह श॑मयति।
तस्मै॑ हु॒तम॑सि य॒मेष्ट॒म॑सीत्या॑ह।
य॒मादे॒वास्य॑ मृ॒त्युमव॑यजते॥ ६॥

((udaṅpaṟetyāgnīddhre juhoti |
e̱ṣā vai ru̱drasya̱ dik |
svāyāme̱va di̱śi ru̱draṃ ni̱ravadayate |
rudra̱ yatte̱ krayī̱paraṃ̱ nāmetyāha |
yadvā asya̱ krayī̱paraṃ̱ nāma |
tena̱ vā e̱ṣa hinasti |
yaṃ hi̱nasti |
tenai̱vainaṃ sa̱ha śamayati |
tasmai hu̱tamasi ya̱meṣṭa̱masītyāha |
ya̱māde̱vāsya mṛ̱tyumavayajate || 6 ||))

**[[1-7-8-7]]**

प्रजा॑पते॒ न त्वदे॒तान्य॒न्य इति॒ तस्यै॑ गृ॒हे जु॑हुयात्।
यां का॒मये॑त रा॒ष्ट्रम॑स्यै प्र॒जा स्या॒दिति॑।
रा॒ष्ट्रमे॒वास्यै॑ प्र॒जा भ॑वति।
प॒र्ण॒मये॑नाध्व॒र्युर॒भिषि॑ञ्चति।
ब्र॒ह्म॒व॒र्च॒सम॒वास्मि॒न्त्विषिं॑ दधाति।
औदु॑म्बरेण राज॒न्य॑ः।
ऊर्ज॑मे॒वास्मि॑न्न॒न्नाद्यं॑ दधाति।
आश्व॑त्थेन॒ वैश्य॑ः।
विश॑मे॒वास्मि॒न्पुष्टिं॑ दधाति।
नैय॑ग्रोधेन॒ जन्य॑ः।
मि॒त्राण्ये॒वास्मै॑ कल्पयति।
अथो॒ प्रति॑ष्ठित्यै॥ ७॥
भ॒व॒त्या॒हुः पुरु॑ष॒ ओज॒सेत्या॑ह नि॒रव॑दयते यजते॒ जन्यो॒ द्वे च॑॥ ८॥

((prajāpate̱ na tvade̱tānya̱nya iti̱ tasyai gṛ̱he juhuyāt|
yāṃ kā̱mayeta rā̱ṣṭramasyai pra̱jā syā̱diti |
rā̱ṣṭrame̱vāsyai pra̱jā bhavati |
pa̱rṇa̱mayenādhva̱ryura̱bhiṣiñcati |
bra̱hma̱va̱rca̱same̱vāsmi̱ntviṣiṃ dadhāti |
audumbareṇa rāja̱nyaḥ |
ūrjame̱vāsminna̱nnādyaṃ dadhāti |
āśvatthena̱ vaiśyaḥ |
viśame̱vāsmi̱npuṣṭiṃ dadhāti |
naiyagrodhena̱ janyaḥ |
mi̱trāṇye̱vāsmai kalpayati |
atho̱ prati̱ṣṭhityai || 7 ||
bha̱va̱tyā̱huḥ puru̱ṣa̱ oja̱setyāha ni̱ravadayate yajate̱ janyo̱ dve ca || 8 ||))

**[[1-7-9-1]]**

इन्द्र॑स्य॒ वज्रो॑ऽसि॒ वार्त्र॑घ्न॒ इति॒ रथ॑मु॒पाव॑हरति॒ विजि॑त्यै।
मि॒त्रावरु॑णयोस्त्वा प्रशा॒स्त्रोः प्र॒शिषा॑ युन॒ज्मीत्या॑ह।
ब्रह्म॑णै॒वैनं॑ दे॒वता॑भ्यां युनक्ति।
प्र॒ष्टि॒वा॒हिनं॑ युनक्ति।
प्र॒ष्टि॒वा॒ही वै दे॑वर॒थः।
दे॒व॒र॒थमे॒वास्मै॑ युनक्ति।
त्रयो॑ऽश्वा॑ भवन्ति।
रथ॑श्चतु॒र्थः।
द्वौ स॑व्येष्ठसार॒थी।
ष॒ट्त्सम्प॑द्यन्ते॥ १॥

((indrasya̱ vajrosi̱ vārtraghna̱ iti̱ rathamu̱pāvaharati̱ vijityai |
mi̱trāvaruṇayostvā praśā̱stroḥ pra̱śiṣā yuna̱jmītyāha |
brahmaṇai̱vainaṃ de̱vatābhyāṃ yunakti |
pra̱ṣṭi̱vā̱hinaṃ yunakti |
pra̱ṣṭi̱vā̱hī vai devara̱thaḥ |
de̱va̱ra̱thame̱vāsmai yunakti |
trayo'śvā bhavanti |
rathaścatu̱rthaḥ |
dvau savyeṣṭhasāra̱thī |
ṣa̱ṭtsaṃpadyante || 1 ||))

**[[1-7-9-2]]**

षड्वा ऋ॒तव॑ः।
ऋ॒तुभि॑रे॒वैनं॑ युनक्ति।
वि॒ष्णु॒क्र॒मान्क्र॑मते।
विष्णु॑रि॒व भू॒त्वेमाँल्लो॒काना॒भिज॑यति।
यः क्ष॒त्रियः॒ प्रति॑हितः।
सो॑ऽन्वा॒र॑भते।
रा॒ष्ट्रमे॒व भ॑वति।
त्रि॒ष्टु॒भाऽन्वा॒र॑भते।
इ॒न्द्रि॒यं वै त्रि॒ष्टुक्।

इ॒न्द्रि॒यमे॒व यज॑माने दधाति॥ २॥

((ṣa̱dvā ṛ̱tava̍ḥ ।
ṛ̱tubhi̍re̱vainam̐ yunakti ।
vi̱ṣṇu̱kra̱mānkra̍mate ।
viṣṇu̍re̱va bhū̱tvemām̐llo̱kāna̱bhija̍yati ।
yaḥ kṣa̱ttriya̱ḥ prati̍hitaḥ ।
so̎'nvāra̍bhate ।
rā̱ṣṭrame̱va bha̍vati ।
tri̱ṣṭubhā̱'nvāra̍bhate ।
i̱ndri̱yaṃ vai tri̱ṣṭuk ।
i̱ndri̱yame̱va yaja̍māne dadhāti ॥ 2 ॥))

**[[1-7-9-3]]**

म॒रुतां॓ प्रस॒वे जे॑ष॒मित्या॑ह।
म॒रुद्भि॑रे॒व प्रसू॑त॒ उज्ज॑यति।
आ॒प्तं मन॒ इत्या॑ह।
यदे॒व मन॒सैप्सी॓त्।
तदा॑पत्।
रा॒ज॒न्यं॑ जिनाति।
अना॓क्रान्त ए॒वाक्र॑मते।
वि वा ए॒ष इ॑न्द्रि॒येण॑ वी॒र्ये॑णर्ध्यते।
यो रा॑ज॒न्यं॑ जि॒नाति॑।
सम॒हमि॑न्द्रि॒येण॑ वी॒र्ये॑णेत्या॑ह॥ ३॥

((ma̱rutām̐ prasa̱ve je̍ṣa̱mitya̍ha ।
ma̱rudbhi̍re̱va prasū̍ta̱ ujja̍yati ।
ā̱ptaṃ mana̱ itya̍ha ।
yade̱va mana̱saipsī̎t ।
tadā̍pat ।
rā̱ja̱nyaṃ̍ jināti ।
anā̎krānta e̱vākra̍mate ।
vi vā e̱ṣa i̍ndri̱yeṇa̍ vī̱rye̍ṇarddhyate ।
yo rā̍ja̱nyaṃ̍ ji̱nāti̍ ।
sama̱hami̍ndri̱yeṇa̍ vī̱rye̍ṇetya̍ha ॥ 3 ॥))

**[[1-7-9-4]]**

इ॒न्द्रि॒यमे॒व वी॒र्य॑मा॒त्मन्ध॑त्ते।
प॒शू॒नां म॒न्युर॑सि॒ तवे॑व मे म॒न्युर्भू॑या॒दिति॒ वारा॑ही
उपा॒नहा॒वुप॑मुञ्चते।
प॒शू॒नां वा ए॒ष म॒न्युः।
यद्व॑रा॒हः।
तेनै॒व प॑शू॒नां म॒न्युमा॒त्मन्ध॑त्ते।
अ॒भि वा इ॒यꣳ सु॑षुवा॒णं का॑मयते।
तस्यै॑श्व॒रेन्द्रि॒यं वी॒र्य॑मादा॑तोः।
वारा॑ही उपा॒नहा॒वुप॑मुञ्चते।
अ॒स्या ए॒वान्तर्ध॑त्ते।
इ॒न्द्रि॒यस्य॑ वी॒र्य॑स्याना॓त्यै॥ ४॥

((i̱ndri̱yame̱va vī̱rya̍mā̱tmandha̍tte ।
pa̱śū̱nāṃ ma̱nyura̍si̱ tave̍va me ma̱nyurbhū̍yā̱diti̱ vārā̍hī upā̱nahā̱vupa̍muñcate ।
pa̱śū̱nāṃ vā e̱ṣa ma̱nyuḥ ।
yadva̍rā̱haḥ ।
tenai̱va pa̍śū̱nāṃ ma̱nyumā̱tmandha̍tte ।
a̱bhi vā i̱yam̐ su̍ṣuvā̱ṇaṃ kā̍mayate ।
tasye̍śva̱rendri̱yaṃ vī̱rya̍mādā̍toḥ ।
vārā̍hī upā̱nahā̱vupa̍muñcate ।
a̱syā e̱vāntardha̍tte ।
i̱ndri̱yasya̍ vī̱rya̍syānā̎tyai ॥ 4 ॥))

**[[1-7-9-5]]**

नमो॑ मा॒त्रे पृ॑थि॒व्या इत्या॒हहि॑ꣳसायै।
इ॒यद॒स्यायु॒रस्यायु॑र्मे धे॒हीत्या॑ह।
आयु॑रे॒वात्मन्ध॑त्ते।
ऊर्ग॒स्यूर्जं॓ मे धे॒हीत्या॑ह।
ऊर्ज॑मे॒वात्मन्ध॑त्ते।
युङ्ङ॑सि॒ वर्चो॑ऽसि॒ वर्चो॒ मयि॑ धे॒हीत्या॑ह।
वर्च॑ ए॒वात्मन्ध॑त्ते।
ए॒क॒धा ब्र॒ह्मण॒ उप॑हरति।
ए॒क॒धैव यज॑मान॒ आयु॒रूर्जं॒ वर्चो॑ दधाति।
र॒थ॒वि॒मो॒च॒नीया॑ जुहो॒ति प्रति॑ष्ठित्यै॥ ५॥

((namo̍ mā̱tre pṛ̍thi̱vyā ityā̱hahim̐sāyai ।
iya̍da̱syāyu̍ra̱syāyu̍rme dhe̱hītya̍ha ।
āyu̍re̱vātmandha̍tte ।
ūrga̱syūrja̱ṃ me dhe̱hītya̍ha ।
ūrja̍me̱vātmandha̍tte ।
yuṅṅa̍si̱ varco̍'si̱ varco̱ mayi̍ dhe̱hītya̍ha ।
varca̍ e̱vātmandha̍tte ।
e̱ka̱dhā bra̱hmaṇa̱ upa̍harati ।
e̱ka̱dhaiva yaja̍māna̱ āyu̱rūrja̱ṃ varco̍ dadhāti ।
ra̱tha̱vi̱mo̱ca̱nīya̍ juhoti̱ prati̍ṣṭhityai ॥ 5 ॥))

**[[1-7-9-6]]**

त्रयो॑ऽश्वा॑ भवन्ति।
रथ॑श्चतु॒र्थः।
तस्मा॓च्चतु॒र्जु॑होति।
यदु॒भौ स॒हाव॒तिष्ठे॑ताम्।
स॒मा॒नं लो॒कमि॑याताम्।
स॒ह सं॑ग्रही॒त्रा र॑थवाह॒ने र॒थमाद॑धाति।

सु॒व॒र्गादे॒वैनं॑ लो॒काद॒न्तर्द॑धाति।
ह॒ꣳसः शु॑चि॒षदित्याद॑धाति।
ब्रह्म॑णै॒वैन॑मुपाव॒हर॑ति।
ब्रह्म॒णाऽऽद॑धाति।
अति॑च्छन्द॒साऽऽद॑धाति।
अति॑च्छन्दा॒ वै सर्वा॑णि॒ छन्दाꣳ॑सि।
सर्वे॑भिरे॒वैनं॑ छन्दो॑भि॒राद॑धाति।
वर्ष्म॒ वा ए॒षा छन्द॑साम्।
यदति॑च्छन्दाः।
यदति॑च्छन्दसा॒ दधा॑ति।
वर्ष्मै॒वैनꣳ॑ समा॒नानाꣳ॑ करोति॥ ६॥
प॒द्य॒न्ते॒ द॒धा॒ति॒ वी॒र्ये॑णेत्या॒हाना॑त्यै॒ प्रति॑ष्ठित्यै॒
ब्रह्म॒णाऽऽद॑धाति स॒प्त च॑॥ ९॥

((trayo'śvā̍ bhavanti |
rathā̍ścatu̱rthaḥ |
tasmā̎ccatu̱rjū̍hoti |
yadu̱bhau sa̱hāva̱tiṣṭhe̍tām|
sa̱mā̱naṃ lo̱kamī̍yātām |
sa̱ha sa̍ṁgrahī̱trā ra̍tha̱vāhā̍ne̱ ratha̱mādā̍dhāti |
su̱va̱rgāde̱vainaṃ lo̱kāda̱ntardā̍dhāti |
ha̱ṁ̎saḥ śū̍ci̱ṣadityādā̍dhāti |
brahmā̍ṇai̱vainā̍mupāva̱harā̍ti |
brahma̱ṇā''dā̍dhāti |
atī̍cchanda̱sā''dā̍dhāti |
atī̍cchandā̱ vai sarvā̍ṇi̱ chandā̎ṁsi |
sarve̍bhire̱vainaṃ chando̍bhi̱rādā̍dhāti |
varṣma̱ vā e̱ṣā chandā̍sām |
yadatī̍cchandā̱ḥ |
yadatī̍cchandasā̱ dadhā̍ti |
varṣmai̱vainaṁ̎ samā̱nānā̎ṁ karoti || 6 ||
pa̱dya̱nte̱ da̱dhā̱ti̱ vī̱rye̍ṇetyā̱hānā̎tyai̱ pratī̍ṣṭhityai̱
brahma̱ṇā''dā̍dhāti sa̱pta cā̍ || 9 ||))

[[1-7-10-1]]
मि॒त्रो॑ऽसि॒ वरु॑णो॒ऽसीत्या॑ह।
मै॒त्रं वा अहः॑।
वा॒रु॒णी रात्रिः॑।
अ॒हो॒रा॒त्राभ्या॑मे॒वैन॑मु॒पाव॑हरति।
मि॒त्रो॑ऽसि॒ वरु॑णो॒ऽसीत्या॑ह।
मै॒त्रो वै दक्षि॑णः।
वा॒रु॒णः स॒व्यः।
वै॒श्व॒दे॒व्या॑मि॒क्षा॑।
स्वमे॒वैनौ॑ भाग॒धेय॑मु॒पाव॑हरति।
स॒म॒हं विश्वै॑र्दे॒वैरित्या॑ह॥ १॥

((mi̱tro̍'si̱ varu̍ṇo̱'sītyā̍ha |
mai̱traṃ vā ahā̍ḥ |
vā̱ru̱ṇī rātrī̍ḥ |
a̱ho̱rā̱trābhyā̍me̱vainā̍mu̱pāvā̍harati |
mi̱tro̍'si̱ varu̍ṇo̱'sītyā̍ha |
mai̱tro vai dakṣi̍ṇaḥ |
vā̱ru̱ṇaḥ sa̱vyaḥ |
vai̱śva̱de̱vyā̍mikṣā̎ |
svame̱vainau̍ bhāga̱dheyā̍mu̱pāvā̍harati |
sama̱haṃ viśvai̍rde̱vairityā̍ha || 1 ||))

[[1-7-10-2]]
वै॒श्व॒दे॒व्यो॑ वै प्र॒जाः।
ता ए॒वाद्याः॑ कुरुते।
क्ष॒त्त्रस्य॒ नाभि॑रसि क्ष॒त्त्रस्य॒ योनि॑र॒सीत्य॑धीवा॒समास्तृ॑णाति
सयोनि॒त्वाय॑।
स्यो॒ना मासी॑द सु॒षदा॒ मासी॒देत्या॑ह।
य॒था य॒जु॒रे॒वैतत्।
मा त्वा॑ हिꣳसी॒न्मा मा॑ हिꣳसी॒दित्या॒हाहिꣳ॑सायै।
निष॑साद धृ॒तव्र॑तो॒ वरु॑णः प॒स्त्या॑ स्वासाम्रा॑ज्याय
सु॒क्रतु॒रित्या॑ह।
साम्रा॑ज्यमे॒वैनꣳ॑ सु॒क्रतुं॑ करोति।
ब्रह्मा३न्त्वꣳ रा॑जन्ब्र॒ह्माऽसि॑ सवि॒ताऽसि॑ स॒त्यस॑व॒
इत्या॑ह।
स॒वि॒तार॑मे॒वैनꣳ॑ स॒त्यस॑वं करोति॥ २॥

((vai̱śva̱de̱vyo̍ vai pra̱jāḥ |
tā e̱vādyā̎ḥ kurute |
kṣa̱ttrasya̱ nābhī̍rasi kṣa̱ttrasya̱
yonī̍ra̱sītyā̍dhīvā̱samāstṛ̍ṇāti sayoni̱tvāyā̍ |
syo̱nā māsī̍da su̱ṣadā̱ māsī̱detyā̍ha |
ya̱thā̱ ya̱jure̱vaitat |
mā tvā̍ hiṁ̎sī̱nmā mā̍ hiṁ̎sī̱dityā̱hāhiṁ̎sāyai |
niṣā̍sāda dhṛ̱tavra̍to̱ varu̍ṇaḥ pa̱styā̍ svāsāmrā̍jyāya
su̱kratu̱rityā̍ha |
sāmrā̍jyame̱vainaṁ̎ su̱kratu̍ṃ karoti |
brahmā3ntvaṁ̎ rā̍janbra̱hmā'sī̱ savi̱tā'sī̱ sa̱tyasā̍va̱
ityā̍ha |
sa̱vi̱tārā̍me̱vainaṁ̎ sa̱tyasā̍vaṃ karoti || 2 ||))

[[1-7-10-3]]
ब्रह्मा३न्त्वꣳ रा॑जन्ब्र॒ह्माऽसीन्द्रो॑ऽसि स॒त्यौजा॒ इत्या॑ह।
इन्द्र॑मे॒वैनꣳ॑ स॒त्यौज॑सं करोति।
ब्रह्मा३न्त्वꣳ रा॑जन्ब्र॒ह्माऽसि॑ मि॒त्रो॑ऽसि सु॒शेव॒ इत्या॑ह।
मि॒त्रमे॒वैनꣳ॑ सु॒शेवं॑ करोति।

ब्रह्मा३न्त्वꣳ रा॑जन्ब्र॒ह्माऽसि॒ वरु॑णोऽसि स॒त्यध॑र्मेत्या॑ह।
वरु॑णमे॒वैनꣳ॑ स॒त्यध॑र्माणं करोति।
स॒वि॒ताऽसि॑ स॒त्यस॑व॒ इत्या॑ह।
गा॒य॒त्रीमे॒वैतेना॒भि॒व्याह॑रति।
इन्द्रो॑ऽसि स॒त्यौजा॒ इत्या॑ह।
त्रि॒ष्टुभ॑मे॒वैतेना॒भि॒व्याह॑रति॥ ३॥

((brahmā3ntvam̐ rā̍janbra̠hmā'sīndro̍'si sa̠tyaujā̠ ityā̍ha I
indrā̍me̠vainam̐ sa̠tyaujā̍sam̐ karoti I
brahmā3ntvam̐ rā̍janbra̠hmā'si̍ mi̠tro̍'si su̠śeva̠ ityā̍ha I
mi̠trame̠vainam̐ su̠śevam̐ karoti I
brahmā3ntvam̐ rā̍janbra̠hmā'si̠ varu̍ṇo'si sa̠tyadha̠rmetyā̍ha I
varu̍ṇame̠vainam̐ sa̠tyadhā̍rmāṇam̐ karoti I
sa̠vi̠tā'si̍ sa̠tyasa̍va̠ ityā̍ha I
gā̠ya̠trīme̠vaitenā̍bhi̠vyāhā̍rati I
indro̍'si sa̠tyaujā̠ ityā̍ha I
tri̠ṣṭubhā̍me̠vaitenā̍bhi̠vyāhā̍rati II 3 II))

**[[1-7-10-4]]**

मि॒त्रो॑ऽसि सु॒शेव॒ इत्या॑ह।
जग॑तीमे॒वैतेना॒भि॒व्याह॑रति।
स॒त्यमे॒ता दे॒वताः॑।
स॒त्यमे॒तानि॒ छन्दाꣳ॑सि।
स॒त्यमे॒वाव॑रुन्धे।
वरु॑णोऽसि स॒त्यध॑र्मेत्या॑ह।
अ॒नु॒ष्टुभ॑मे॒वैतेना॒भि॒व्याह॑रति।
स॒त्या॒नृ॒ते वा अ॑नु॒ष्टुप्।
स॒त्या॒नृ॒ते वरु॑णः।
स॒त्या॒नृ॒ते ए॒वाव॑रुन्धे॥ ४॥

((mi̠tro̍'si su̠śeva̠ ityā̍ha I
jagā̍tīme̠vaitenā̍bhi̠vyāhā̍rati I
sa̠tyame̠tā de̠vatā̍ḥ I
sa̠tyame̠tāni̠ chandā̍m̐si I
sa̠tyame̠vāvā̍rundhe I
varu̍ṇo'si sa̠tyadha̠rmetyā̍ha I
a̠nu̠ṣṭubhā̍me̠vaitenā̍bhi̠vyāhā̍rati I
sa̠tyā̠nṛ̠te vā a̍nu̠ṣṭup I
sa̠tyā̠nṛ̠te varu̍ṇaḥ I
sa̠tyā̠nṛ̠te e̠vāvā̍rundhe II 4 II))

**[[1-7-10-5]]**

नैनꣳ॑ सत्यानृ॒ते उ॑दि॒ते हि॒ꣳ॒स्तः।
य ए॒वं वेद॑।
इन्द्र॑स्य॒ वज्रो॑ऽसि॒ वार्त्र॑घ्न॒ इति॒ स्फ्यं प्रय॑च्छति।
वज्रो॒ वै स्फ्यः।
वज्रे॑णै॒वास्मा॑ अवरप॒रꣳ॑ रन्धयति।
ए॒वꣳ॑ हि तच्छ्रेयः॑।
यद॑स्मा ए॒ते र॒ध्येयुः॑।
दि॒शो॒ऽभ्यय॑ꣳ राजा॑ऽभू॒दिति॒ पञ्चा॒क्षान्प्रय॑च्छति।
ए॒ते वै सर्वे॑ऽयाः॑।
अप॑राजायिनमे॒वैनं॑ करोति॥ ५॥

((nainam̐ satyānṛ̠te u̍di̠te hi̍m̐stah I
ya e̠vam̐ vedā̍ I
indrā̍sya̠ vajro̍'si̠ vārtrā̍ghna̠ iti̠ sphyam̐ prayā̍cchati I
vajro̠ vai sphyaḥ I
vajre̍ṇai̠vāsmā̍ avarapa̠ram̐ rā̍ndhayati I
e̠vam̐ hi tacchreyā̍ḥ I
yadā̍smā e̠te radhye̍yuḥ I
diśo̠'bhyā̍yam̐ rājā̍'bhū̠diti̠ pañcā̠kṣānprayā̍cchati I
e̠te vai sarve'yā̍ḥ I
apā̍rājāyinameva̠inam̐ karoti II 5 II))

**[[1-7-10-6]]**

ओद॒नमु॒द्ध्रुवते।
प॒र॒मे॒ष्ठी वा ए॒षः।
यदो॑द॒नः।
प॒र॒मामे॒वैन॒ꣳ श्रियं॑ गमयति।
सुश्लोका॒ꣳ सुमङ्गला॒ꣳ सत्य॑रा॒जा३नित्या॑ह।
आ॒शिष॑मे॒वैतामाशा॑स्ते।
शौनः॒शेपमाख्या॑पयते।
व॒रु॒ण॒पा॒शादे॒वैनं॑ मुञ्चति।
प॒रः॒श॒तं भ॑वति।
श॒तायुः॒ पुरु॑षः श॒तेन्द्रि॑यः।
आयु॑ष्ये॒वेन्द्रि॒ये प्रति॑तिष्ठति।
मा॒रु॒तस्य॒ चैक॑विꣳशतिकपालस्य वैश्वदे॒व्यै चा॒मिक्षा॑या
अ॒ग्नये॑ स्विष्ट॒कृते॑ स॒मव॑द्यति।
दे॒वता॑भिरे॒वैन॑मुभ॒यतः॒ परि॑गृह्णाति।
अ॒पां॑नप्त्रे स्वाहो॒र्जोन॑प्त्रे स्वाहा॒ऽग्नये॑ गृ॒हप॑तये॒ स्वाहेति॑
ति॒स्र आहु॑तीर्जुहोति।
त्रय॑ इ॒मे लो॒काः।
ए॒ष्वे॑व लो॒केषु॒ प्रति॑तिष्ठति॥ ६॥
दे॒वैरित्या॑ह स॒त्यस॑वं करोति त्रि॒ष्टुभ॑मे॒वैतेना॑भि॒ व्याह॑रति

स॒त्या॒नृ॒ते ए॒वाव॑रुन्धे करोति श॒तेन्द्रि॑यः ष॒ड्॥ १०॥
ए॒तद्ब्रा॒ह्म॒णानि धा॒त्रे र॒त्निना॑ं दे॒वसु॒वाम॒र्थेऽतो॒ दे॒वीर्दि॑शः
सो॒म॒स्येन्द्र॑स्य मि॒त्रो द॒श॑॥ १०॥
ए॒तद्ब्रा॒ह्म॒णानि वै॒ष्ण॒वं त्रि॒कपा॒लम॒न्नं वै पू॒षा वा॒शाः
स्थेत्या॑ह॒ दि॒शो॒ व्या॒स्था॑पय॒त्यु॒द॒ङ्परेत्य॒ ब्रह्मा३न्त्वं॒
रा॒ज॒ञ्चतुः॑ षष्टिः॥ ६४॥

((o̱ḏanamudbrúvate ।
pa̱ra̱me̱ṣṭhī vā e̱ṣaḥ ।
yadóda̱naḥ ।
pa̱ramāme̱vaina̱m̐ śriyam̐ gamayati ।
suśḻokām̐4 sumáṅga̱lām̐4 satyára̱jā3nityáha ।
ā̱śiṣáme̱vaitāmāśáste ।
śau̱na̱ḥśe̱pamākhyápayate ।
va̱ru̱ṇa̱pā̱śāde̱vainam̐ muñcati ।
pa̱ra̱ḥśa̱taṃ bhávati ।
śa̱tāyu̱ḥ purúṣaḥ śa̱tendriyaḥ ।
āyúṣye̱vendri̱ye pratitiṣṭhati ।
māru̱tasya̱ caikáviṁ̐śatikapālasya vaiśvade̱vyai
cā̱mikṣáyā a̱gnayé sviṣṭa̱kṛté sa̱mavádyati ।
de̱vatábhire̱vainámubha̱yata̱ḥ parigṛhṇāti ।
a̱pāṃnaptre̱ svāho̱rjonaptre̱ svāhā̱'gnayé
gṛ̱hapátaye̱ svāheti ti̱sra āhútīrjuhoti ।
trayá i̱me lo̱kāḥ ।
e̱ṣvéva lo̱keṣu̱ pratitiṣṭhati ॥ 6 ॥
de̱vairityáha sa̱tyasávaṃ karoti
tri̱ṣṭubháme̱vaitenábhi̱ vyāhárati satyānṛ̱te
e̱vāvárundhe karoti śa̱tendriya̱ḥ ṣaṭcá ॥ 10 ॥
e̱tadbráhmaṇāni dhā̱tre ra̱tninām̐
devasu̱vāma̱rthe'to̱ devī̱rdiśa̱ḥ soma̱syendrásya
mi̱tro daśá ॥ 10 ॥
e̱tadbráhmaṇāni vaiṣṇa̱vaṃ trikapā̱lamanna̱ṃ vai
pū̱ṣā vāśā̱ḥ sthetyáha̱ diśo̱
vyāsthápaya̱tyudáṅpa̱retya̱ brahmā3ntvam̐
rája̱ñcatúḥ ṣaṣṭiḥ ॥ 64 ॥))

# Taittirīya-Brāhmaṇa
# Book 1, Chapter 8

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[1-8-1-1]]**

व॒रु॑णस्य सुषुवा॒णस्य॑ द॒श॒धेन्द्रि॒यं वी॒र्यं॑ परा॑ऽपतत्।
तत्स॒ꣳ॒सृद्भि॑रनु॒सम॑सर्पत्।
तत्स॒ꣳ॒सृपा॒ꣳ॒ स॑ꣳसृत्त्वम्।
अ॒ग्निना॑ दे॒वेन॑ प्रथ॒मेऽह॒न्नन॒ प्रायु॑ङ्क्त।
सर॑स्वत्या वा॒चा द्वि॒तीये᳚।
स॒वि॒त्रा प्र॑स॒वेन॑ तृ॒तीये᳚।
पु॒ष्णा प॒शुभि॑श्चतु॒र्थे।
बृ॒ह॒स्पति॑ना ब्र॒ह्मणा पञ्च॒मे।
इन्द्रे॑ण दे॒वेन॑ ष॒ष्ठे।
व॒रु॑णेन॒ स्वया॑ दे॒वत॑या सप्त॒मे॥ १॥

((varu̍ṇasya suṣuvā̱ṇasya̍ daśa̱dhendri̱yaṃ vī̱rya̍ṃ parā̍'patat |
tatsa̱ṃ̍sṛdbhi̱ranu̱sama̍sarpat |
tatsa̱ṃ̍sṛpā̍ṃ sa̍ṃsṛttvam |
a̱gninā̍ de̱vena̍ pratha̱me'ha̱ṃ nanu̱ prāyu̍ṅkta |
sara̍svatyā vā̱cā dvi̱tīye̎ |
sa̱vi̱trā pra̍sa̱vena̍ tṛ̱tīye̎ |
pu̱ṣṇā pa̱śubhi̍ścatu̱rthe |
bṛ̱ha̱spati̍nā̱ brahma̍ṇā pañca̱me |
indre̍ṇa de̱vena̍ ṣa̱ṣṭhe |
varu̍ṇena̱ svayā̍ de̱vata̍yā sapta̱me || 1 ||))

**[[1-8-1-2]]**

सोमे॑न॒ राज्ञा॒ऽष्टमे।
त्वष्ट्रा॑ रू॒पेण॑ न॒वमे।
विष्णु॑ना य॒ज्ञेना᳚प्नोत्।
यत्स॒ꣳ॒सृपो॑ भव॑न्ति।
इ॒न्द्रि॒यमे॒व त॒द्वी॒र्यं॑ यज॑मान आप्नोति।
पूर्वा᳚ पूर्वा॒ वेदि॑र्भवति।
इ॒न्द्रि॒यस्य॑ वी॒र्य॑स्यावरु॑द्ध्यै।
पु॒रस्ता॑दुप॒सदा॒ꣳ॒ सौ॒म्येन॒ प्रच॑रति।
सोमो॒ वै रेतो॒धाः।
रेत॑ ए॒व तद्द॑धाति।
अ॒न्त॒रा त्वा॒ष्ट्रेण॑।
रेत॑ ए॒व हि॒तं त्वष्टा॑ रू॒पाणि॒ विक॑रोति।
उ॒परि॑ष्टाद्वैष्ण॒वेन॑।
य॒ज्ञो वै विष्णु॑ः।
य॒ज्ञ ए॒वान्त॒तः प्रति॑तिष्ठति॥ २॥
स॒प्त॒मे द॑धाति॒ पञ्च॑ च॥ १॥

((some̍na̱ rājñā̎'ṣṭa̱me |
tvaṣṭrā̍ rūpe̍ṇa̍ nava̱me |
viṣṇu̍nā ya̱jñenā̎pnot|
yatsa̱ṃ̎sṛpo̱ bhava̍nti |
i̱ndri̱yame̱va tadvī̱rya̍ṃ yaja̍māna āpnoti |
pūrvā̍ pūrvā̱ vedi̍rbhavati |
i̱ndri̱yasya̍ vī̱rya̍syāva̍ruddhyai |
pu̱rastā̍dupa̱sadā̎ṃ sau̱myena̱ praca̍rati |
somo̱ vai re̍to̱dhāḥ |
retа̍ e̱va tadda̍dhāti |
a̱nta̱rā tvā̱ṣṭreṇa̍ |
reta̍ e̱va hi̱taṃ tvaṣṭā̍ rūpā̱ṇi̱ vika̍roti |
u̱pari̍ṣṭādvaiṣṇa̱vena̍ |
ya̱jño vai viṣṇu̍ḥ |
ya̱jña e̱vānta̱taḥ prati̍tiṣṭhati || 2 ||
sa̱pta̱me da̍dhāti̱ pañca̍ ca || 1 ||))

**[[1-8-2-1]]**

जा॒मि वा ए॒तत्कु॑र्वन्ति।
यत्स॒द्यो दी॒क्षय॑न्ति स॒द्यः सोम॑ं क्री॒णन्ति॑।
पु॒ण्ड॒रि॒स्र॒जां प्रय॑च्छत्यजा॒मित्वाय।
अङ्गि॑रसः सुव॒र्गं लो॒कं यन्त॑ः।
अ॒प्सु दी᳚क्षात॒पसी॒ प्रावे॑शयन्।
तत्पु॒ण्डरी॑कमभवत्।
यत्पु॑ण्डरिस्र॒जां प्र॒यच्छ॑ति।
सा॒क्षादे॒व दी᳚क्षात॒पसी॒ अव॑रुन्धे।
द॒शभि॑र्वत्सत॒रैः सोम॑ं क्रीणाति।
द॒शा᳚क्षरा वि॒राट्॥ १॥

((jā̱mi vā e̱tatku̍rvanti |
yatsa̱dyo dī̱kṣaya̍nti sa̱dyaḥ soma̍ṃ krī̱ṇanti̍ |
pu̱ṇḍa̱ri̱sra̱jāṃ praya̍ccha̱tyajā̍mitvāya |
aṅgi̱rasaḥ suva̱rgaṃ lo̱kaṃ yanta̍ḥ |
a̱psu dī̎kṣāta̱pasī̱ prāve̍śayan |
tatpu̱ṇḍarī̍kamabhavat |
yatpu̍ṇḍarisra̱jāṃ pra̱yaccha̍ti |
sā̱kṣāde̱va dī̎kṣāta̱pasī̱ ava̍rundhe |
da̱śabhi̍rvatsata̱raiḥ soma̍ṃ krīṇāti |
da̱śā̎kṣarā vi̱rāṭ || 1 ||))

**[[1-8-2-2]]**

अन्नं विराट्।
विराजैवान्नाद्यमवरुन्धे।
मुष्करा भवन्ति सेन्द्रत्वाय।
दशपेयो भवति।
अन्नाद्यस्यावरुद्ध्यै।
शतं ब्राह्मणाः पिबन्ति।
शतायुः पुरुषः शतेन्द्रियः।
आयुष्येवेन्द्रिये प्रतितिष्ठति।
सप्तदशꣳ स्तोत्रं भवति।
सप्तदशः प्रजापतिः॥ २॥

((annaṃ virāṭ ।
virājaivānnādyamavarundhe ।
muṣkarā bhavanti sendratvāya ।
daśapeyo bhavati ।
annādyasyāvaruddhyai ।
śataṃ brāhmaṇāḥ pibanti ।
śatāyuḥ puruṣaḥ śatendriyaḥ ।
āyuṣyevendriye pratitiṣṭhati ।
saptadaśam̐ stotraṃ bhavati ।
saptadaśaḥ prajāpatiḥ ॥ 2 ॥))

**[[1-8-2-3]]**
प्रजापतेराप्त्यै।
प्राकाशावध्वर्यवे ददाति।
प्रकाशमेवैनं गमयति।
स्रजमुद्गात्रे।
व्येवास्मै वासयति।
रुक्मꣳ होत्रे।
आदित्यमेवास्मा उन्नयति।
अश्वं प्रस्तोतृप्रतिहर्तृभ्याम्।
प्राजापत्यो वा अश्वः।
प्रजापतेराप्त्यै॥ ३॥

((prajāpaterāptyai ।
prākāśāvadhvaryave dadāti ।
prakāśamevainaṃ gamayati ।
srajamudgātre ।
vyevāsmai vāsayati ।
rukmam̐ hotre ।
ādityamevāsmā unnayati ।
aśvaṃ prastotṛpratihartṛbhyām ।
prājāpatyo vā aśvaḥ ।
prajāpaterāptyai ॥ 3 ॥))

**[[1-8-2-4]]**
द्वादश पष्ठौहीर्ब्रह्मणे।
आयुरेवावरुन्धे।
वशां मैत्रावरुणाय।
राष्ट्रमेव वश्यकः।
ऋषभं ब्राह्मणाच्छꣳसिने।
राष्ट्रमेवेन्द्रियाव्यकः।
वाससी नेष्टापोतृभ्याम्।
पवित्रे एवास्यैते।
स्थूरि यवाचितमच्छावाकाय।
अन्तत एव वरुणमवयजते॥ ४॥

((dvādaśa paṣṭhauhīrbrahmaṇe ।
āyurevāvarundhe ।
vaśāṃ maitrāvaruṇāya ।
rāṣṭrameva vaśyakaḥ ।
ṛṣabhaṃ brāhmaṇācchaṃsine ।
rāṣṭramevendriyāvyakaḥ ।
vāsasī neṣṭāpotṛbhyām ।
pavitre evāsyaite ।
sthūri yavācitamacchāvākāya ।
antata eva varuṇamavayajate ॥ 4 ॥))

**[[1-8-2-5]]**
अनड्वाहमग्नीधे।
वह्निर्वा अनड्वान्।
वह्निरग्नीत्।
वह्निनैव वह्नि यज्ञस्यावरुन्धे।
इन्द्रस्य सुषुवाणस्य त्रेधेन्द्रियं वीर्यं पराऽपतत्।
भृगुस्तृतीयमभवत्।
श्रायन्तीयं तृतीयम्।
सरस्वती तृतीयम्।
भार्गवो होता भवति।
श्रायन्तीयं ब्रह्मसामं भवति।
वारवन्तीयमग्निष्टोमसामम्।
सारस्वतीरपो गृह्णाति।
इन्द्रियस्य वीर्यस्यावरुद्ध्यै।
श्रायन्तीयं ब्रह्मसामं भवति।
इन्द्रियमेवास्मिन्वीर्यꣳ श्रयति।
वारवन्तीयमग्निष्टोमसामम्।

इ॒न्द्रि॒यमे॒वास्मि॑न्वी॒र्य॑ँ वारयति॥ ५॥
वि॒राट्प्र॒जाप॑ति॒रश्वः॑ प्र॒जाप॑ते॒राप्त्यै॑ यजते ब्रह्मसा॒मं भ॑वति स॒प्त च॑॥ २॥

((a̱na̱ḍvāhám̱agnīdhe᳚ ।
vahni̱rvā áṉaḍvān ।
vahniṟagnīt ।
vahnina̱iva vahni̍ ya̱jñasyāvárundhe ।
indrásya su̱ṣu̱vāṉasyá tre̱dhendri̱yaṃ vīryam̍
parā̍'patat।
bhṛgu̱stṛtī̍yamabhavat ।
śrāya̱ntīya̱m tṛtī̍yam ।
sarásvatī̱ tṛtī̍yam ।
bhārga̱vo hotā̍ bhavati ।
śrāya̱ntīyam̍ brahmasā̱mam̱ bhávati ।
vāra̱va̱ntīyámagniṣṭomasā̱mam ।
sāra̱svatī̱rapo gṛ̍hṇāti ।
i̱ndriyasyá vīryásyāvá̍ruddhyai ।
śrāya̱ntīyam̍ brahmasā̱mam̱ bhávati ।
i̱ndri̱yame̱vāsmi̍nvīryam̐̍ śrayati ।
vāra̱va̱ntīyámagniṣṭomasā̱mam ।
i̱ndri̱yame̱vāsmi̍nvī̱ryam̍ vārayati ॥ 5 ॥
vi̱rāṭpra̱jāpáti̱raśvaḥ̍ pra̱jāpáte̱rāptya̍i yajate
brahmasā̱mam̱ bhávati sa̱pta cá ॥ 2 ॥))

**[[1-8-3-1]]**

ईश्व॒रो वा ए॒ष दिशो॒ऽनून्मा॑दि॒तोः।
यं दिशो॒ऽनु॑ व्यास्था॒पय॑न्ति।
दि॒शाम॒वे॒ष्टयो॑ भवन्ति।
दि॒क्ष्वे॑व प्रति॑ तिष्ठ॒त्यनु॑न्मादाय।
पञ्च॑ दे॒वता॑ यजति।
पञ्च॒ दिशः॑।
दि॒क्ष्वे॑व प्रति॑तिष्ठति।
ह॒वि॒षो॑ हविष इ॒ष्ट्वा बा॑र्हस्प॒त्यम॒भिघा॑रयति।
य॒ज॒मा॒न॒दे॒व॒त्यो॑ वै बृ॒ह॒स्पति॑ः।
यज॑मानमे॒व तेज॑सा॒ सम॑र्धयति॥ १॥

((ī̱śva̱ro vā e̱ṣa diśo'nūnmáditoḥ ।
yaṃ̱ diśo'nú vyāsthā̱payánti ।
di̱śāmave᳚ṣṭayo bhavanti ।
di̱kṣvéva prati̍ tiṣṭha̱tyanúnmādāya ।
pañcá de̱vatā̍ yajati ।
pañca̱ diśáḥ ।
di̱kṣvéva prati̍tiṣṭhati ।
ha̱viṣó haviṣa i̱ṣṭvā bā̍rhaspa̱tyama̱bhighā̍rayati ।
ya̱ja̱māna̱de̱va̱tyó vai bṛ̱ha̱spatiḥ̍ ।
yajá̍mānamev̱a tejásā̱ samárdhayati ॥ 1 ॥))

**[[1-8-3-2]]**

आ॒दि॒त्यां म॒ल्हां ग॒र्भिणी॒माल॑भते।
मा॒रु॒तीं पृश्नि॑ं पष्ठौ॒हीम्।
वि॒शं॑ चै॒वास्मै॑ रा॒ष्ट्रं च॑ स॒मीची॑ दधाति।
आ॒दि॒त्यया॒ पूर्व॑या॒ प्र॒च॑रति।
मा॒रु॒त्योत्त॑रया।
रा॒ष्ट्र ए॒व वि॒शमनु॑बध्नाति।
उ॒च्चैरा॑दि॒त्याया॒ आश्रा॑वयति।
उ॒पा॒ꣳशु मा॑रु॒त्यै।
तस्मा॑द्रा॒ष्ट्रं वि॒शमति॑वदति।
ग॒र्भि॒ण्या॑दि॒त्या भ॑वति॥ २॥

((ā̱di̱tyāṃ ma̱lhāṃ ga̱rbhiṇī̱mālábhate ।
mā̱ru̱tīṃ pṛśnim̍ paṣṭhau̱hīm ।
viśam̍ ca̱ivāsma̍i rā̱ṣṭraṃ cá sa̱mīcī̍ dadhāti ।
ā̱di̱tyayā̱ pūrváyā̱ pracárati ।
mā̱ru̱tyottárayā ।
rā̱ṣṭra e̱va viśa̱manúbadhnāti ।
u̱ccairā̍dityāyā̱ āśrávayati ।
u̱pā̱m̐śu márutyai ।
tasmā᳚drā̱ṣṭraṃ viśa̱mati̍vadati ।
ga̱rbhi̱ṇyā̍di̱tyā bhávati ॥ 2 ॥))

**[[1-8-3-3]]**

इ॒न्द्रि॒यं वै गर्भ॑ः।
रा॒ष्ट्रमे॒वेन्द्रि॒या॒व्य॑कः।
अ॒ग॒र्भा मा॑रु॒ती।
वि॒ड्वै म॒रुत॑ः।
वि॒श॑मे॒व निरि॑न्द्रियामकः।
दे॒वा॒सु॒राः संय॑त्ता आसन्।
ते दे॒वा अ॒श्विनो॑ः पू॒षन्वा॒चः स॒त्यꣳ सं॑नि॒धाय॑।
अनृ॑ते॒नासु॑रा॒नभ्य॑भवन्।
तेऽश्विभ्या॑ं पू॒ष्णे पु॑रो॒डाशं॑ द्वाद॑शकपा॒लं निर॑वपन्न्।
त॒तो वै ते वा॒चः स॒त्यमवा॑रुन्धत॥ ३॥

((i̱ndri̱yaṃ vai garbháḥ ।
rā̱ṣṭrame̱vendri̍yā̱vyákaḥ ।
a̱ga̱rbhā márutī ।
vi̱ḍvai ma̱rutáḥ ।
viśáme̱va niri̍ndriyāmakaḥ ।
de̱vā̱su̱rāḥ saṃyattā āsan।
te de̱vā a̱śvino᳚ḥ pū̱ṣanvā̱caḥ sa̱tyam̐ saṃ̍ni̱dhāyá ।
anṛ̍te̱nāsúrāna̱bhyábhavan ।
te᳚'śvibhyā᳚ṃ pū̱ṣṇe púro̱ḍāśa̱ṃ dvādáśakapāla̱ṃ
nirávapann।
tato̱ vai te vā̱caḥ sa̱tyamavā̍rundhata ॥ 3 ॥))

**[[1-8-3-4]]**

यद॒श्विभ्यां᳚ पू॒ष्णे पु॑रो॒डाश॒ं द्वाद॑शकपाल॒ं नि॒र्वप॑ति।
अनृ॑तेनै॒व भ्रातृ॑व्यानभि॒भूय॑।
वा॒चः स॒त्यमव॑रुन्धे।
सर॑स्वते सत्य॒वाचे॑ च॒रुम्।
पूर्व॑मे॒वोदि॒तम्।
उ॒त्तरे॑णा॒भि गृ॑णाति।
स॒वि॒त्रे स॒त्यप्र॑सवाय पुरो॒डाश॒ं द्वाद॑शकपाल॒ं प्रसू᳚त्यै।
दू॒तान्प्रहि॑णोति।
आ॒वि॑द॒ ए॒ता भ॑वन्ति।
आ॒विद॑मे॒वैनं॑ गमयन्ति।
अथो॑ दू॒तेभ्य॑ ए॒व न छि॑द्यते।
ति॒सृ॒ध॒न्वꣳ॑ शु॑ष्कदृ॒तिर्दक्षि॑णा॒ समृ॑द्ध्यै॥ ४॥
अ॒र्ध॒य॒ति॒ भ॒व॒त्य॒रु॒न्ध॒त॒ ग॒म॒य॒न्ति॒ द्वे च॑॥ ३॥

((yada̱śvibhyām̐ pūṣṇe pu̍ro̱ḍāśa̱ṃ dvāda̍śakapāla̱ṃ ni̱rvapa̍ti ।
anṛ̍tenai̱va bhrātṛ̍vyānabhi̱bhūya̍ ।
vā̱caḥ sa̱tyamava̍rundhe ।
sara̍svate satya̱vāce̍ ca̱rum ।
pūrva̍me̱vodi̱tam ।
uttare̍ṇā̱bhi gṛ̍ṇāti ।
sa̱vi̱tre sa̱tyapra̍savāya puro̱ḍāśa̱ṃ dvāda̍śakapāla̱ṃ prasū̎tyai ।
dū̱tānprahi̍ṇoti ।
ā̱vida̍ e̱tā bha̍vanti ।
ā̱vida̍me̱vaina̍ṃ gamayanti ।
atho̍ dū̱tebhya̍ e̱va na chi̍dyate ।
ti̱sṛ̱dha̱nvam̐̍ śu̍ṣkadṛ̱tirdakṣi̍ṇā̱ samṛ̍ddhyai ॥ 4 ॥
a̱rdha̱ya̱ti̱ bha̱va̱tya̱ru̱ndha̱ta̱ ga̱ma̱ya̱nti̱ dve ca̍ ॥ 3 ॥))

[[1-8-4-1]]
आ॒ग्नेय॑म॒ष्टाक॑पाल॒ं निर्व॑पति।
तस्मा॑च्छिशि॑रे कुरुपञ्चा॒लाः प्राञ्चो॑ यान्ति।
सौ॒म्यं च॒रुम्।
तस्मा᳚द्वस॒न्तं व्य॑व॒साया॑दयन्ति।
सा॒वि॒त्रं द्वाद॑शकपालम्।
तस्मा᳚त्पु॒रस्ता॒द्यवा॑नाꣳ॑ सवि॒त्रा विरु॑न्धते।
बा॒र्ह॒स्प॒त्यं च॒रुम्।
स॒वि॒त्रैव वि॒रुध्य॑।
ब्रह्म॑णा॒ यवा॒नाद॑धते।
त्वा॒ष्ट्रम॒ष्टाक॑पालम्॥ १॥

((ā̱gne̱yama̱ṣṭāka̍pāla̱ṃ nirva̍pati ।
tasmā̱cchiśi̍re kurupañcā̱lāḥ prāñco̍ yānti ।
sau̱myaṃ ca̱rum ।
tasmā̎dvasa̱ntaṃ vya̍va̱sāyā̍dayanti ।
sā̱vi̱traṃ dvāda̍śakapālam ।
tasmā̎tpu̱rastā̱dyavā̍nām̐̍ savi̱trā viru̍ndhate ।
bā̱rha̱spa̱tyaṃ ca̱rum ।
sa̱vi̱traiva vi̱rudhya̍ ।
brahma̍ṇā̱ yavā̱nāda̍dhate ।
tvā̱ṣṭrama̱ṣṭāka̍pālam ॥ 1 ॥))

[[1-8-4-2]]
रू॒पाण्ये॒व तेन॑ कुर्वते।
वै॒श्वा॒न॒रं द्वाद॑शकपालम्।
तस्मा᳚ज्जघ॒न्ये॑ नैदा॑घे प्र॒त्यञ्च॑ः कुरुपञ्चा॒ला यान्ति।
सा॒र॒स्व॒तं च॒रुं निर्व॑पति।
तस्मा᳚त्प्रा॒वृषि॒ सर्वा॒ वाचो॑ वदन्ति।
पौ॒ष्णेन॒ व्यव॑स्यन्ति।
मै॒त्रेण॑ कृषन्ते।
वा॒रु॒णेन॒ विधृ॑ता आसते।
क्षै॒त्र॒प॒त्येन॑ पाचयन्ते।
आ॒दि॒त्येनाद॑धते॥ २॥

((rū̱pāṇye̱va tena̍ kurvate ।
vai̱śvā̱na̱raṃ dvāda̍śakapālam ।
tasmā̎jjagha̱nye̍ naidā̍ghe pra̱tyañca̍ḥ kurupañcā̱lā yā̎nti ।
sā̱ra̱sva̱taṃ ca̱ruṃ nirva̍pati ।
tasmā̎tprā̱vṛṣi̱ sarvā̱ vāco̍ vadanti ।
pau̱ṣṇena̱ vyava̍syanti ।
mai̱treṇa̍ kṛṣante ।
vā̱ru̱ṇena̱ vidhṛ̍tā āsate ।
kṣai̱tra̱pa̱tyena̍ pācayante ।
ā̱di̱tyenāda̍dhate ॥ 2 ॥))

[[1-8-4-3]]
मा॒सि मा᳚स्येतानि॑ ह॒वीꣳषि॑ नि॒रुप्या॒णीत्या॑हुः।
तेनै॒वर्तून्प्रयु॒ङ्क्त इति॑।
अथो॒ खल्वा॑हुः।
कः सं॑वत्स॒रं जी॑विष्यतीति॑।
षडे॒व पूर्वे᳚द्युर्नि॒रुप्या॑णि।
षडु॒त्तरे॑द्युः।
तेनै॒वर्तून्प्रयु॑ङ्क्ते।
दक्षि॑णो रथवाहनवा॒हः पूर्वे॑षां॒ दक्षि॑णा।
उत्त॑र॒ उत्त॑रेषाम्।

सं॒व॒त्स॒रस्यै॒वान्तौ॑ युनक्ति।
सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै॥ ३॥
त्वा॒ष्ट्रम॒ष्टाक॑पालं दधते यु॒न॒क्त्येकं॑ च॥ ४॥

((mā̱si mā̎syeta̱tāni̍ ha̱vīm̐ṣi̍ ni̱rupyā̱ṇītyā̍huḥ ।
tena̱ivartūnprayu̍ṅkta̱ iti̍ ।
atho̱ khalvā̍huḥ ।
kaḥ sa̍ṃvatsa̱raṃ ji̍viṣya̱tīti̍ ।
ṣa̱ḍe̱va pū̎rve̱dyurni̱rupyā̍ṇi ।
ṣa̱ḍu̍ttare̱dyuḥ ।
tena̱ivartūnprayu̍ṅkte ।
dakṣi̱ṇo rathavāhanavā̱haḥ pūrve̍ṣā̱m dakṣi̍ṇā ।
uttā̍ra̱ uttā̍reṣām ।
sa̱ṃva̱tsa̱rasya̱ivāntau̍ yunakti ।
su̱va̱rgasya̍ lo̱kasya̱ samā̍ṣṭyai ॥ 3 ॥
tvā̱ṣṭra̱ma̱ṣṭāka̍pālaṃ dadhate yuna̱ktyeka̍ṃ ca ॥ 4 ॥))

**[[1-8-5-1]]**

इन्द्र॑स्य सुषुवा॒णस्य॑ द॒श॒धेन्द्रि॒यं वी॒र्यं᳚ परा॑ऽपतत्।
स यत्प्र॑थ॒मं नि॒रष्ठी॑वत्।
तत्क्व॑लमभवत्।
यद्द्वि॒तीयं᳚म्।
तद्ब॒द॑रम्।
यत्तृ॒तीयं᳚म्।
तत्क॒र्कन्धु॑।
यन्न॒स्तः।
स सि॒ꣳहः।
यद॒क्ष्योः᳚॥ १॥

((indra̍sya suṣuvā̱ṇasya̍ daśa̱dhendri̱yaṃ vī̱ryaṃ̍ parā̍'patat ।
sa yatpra̍tha̱mamaṃ ni̱raṣṭhi̍vat ।
tatkva̍lamabhavat ।
yaddvi̱tīyā̎m ।
tadbada̍ram ।
yattṛ̱tīyā̎m ।
tatka̱rkandhu̍ ।
yanna̱staḥ ।
sa si̱m̐haḥ ।
yadakṣyo̎ḥ ॥ 1 ॥))

**[[1-8-5-2]]**

स शा᳚र्दू॒लः।
यत्कर्ण॑योः।
स वृक॑ः।
य ऊ॒र्ध्वः।
स सोम॑ः।
याऽवा॑ची।
सा सुरा᳚।
त्र॒याः सक्त॑वो भवन्ति।
इ॒न्द्रि॒यस्यावरु॑द्ध्यै त्र॒याणि॒ लोमा॑नि॥ २॥

((sa śā̎rdū̱laḥ ।
yatkarṇa̍yoḥ ।
sa vṛka̍ḥ ।
ya ū̱rdhvaḥ ।
sa soma̍ḥ ।
yā'vā̍cī ।
sā surā̎ ।
tra̱yāḥ sakta̍vo bhavanti ।
i̱ndri̱yasyāva̍ruddhyai tra̱yāṇi̱ lomā̍ni ॥ 2 ॥))

**[[1-8-5-3]]**

त्विषि॑मे॒वाव॑रुन्धे।
त्रयो॒ ग्रहा᳚ः।
वी॒र्य᳚मे॒वाव॑रुन्धे।
नाम्ना॑ द॒शमी।
नव॒ वै पुरु॑षे प्रा॒णाः।
नाभि॑र्द॒शमी।
प्रा॒णा इ॑न्द्रि॒यं वी॒र्यं᳚म्।
प्रा॒णाने॒वेन्द्रि॒यं वी॒र्यं᳚ यज॑मान आ॒त्मन्ध॑त्ते।
सीसे॑न क्लीबाच्छष्पा॑णि क्रीणाति।
न वा ए॒तदयो॒ न हिर॑ण्यम्॥ ३॥

((tviṣi̍me̱vāva̍rundhe ।
trayo̱ grahā̎ḥ ।
vī̱rya̍me̱vāva̍rundhe ।
nāmnā̍ daśa̱mī ।
nava̱ vai puru̍ṣe prā̱ṇāḥ ।
nābhi̍rdaśa̱mī ।
prā̱ṇā i̍ndri̱yaṃ vī̱ryā̎m ।
prā̱ṇāne̱vendri̱yaṃ vī̱ryaṃ̍ yaja̍māna ā̱tmandha̍tte ।
sīse̍na klī̱bācchaṣpā̍ṇi krīṇāti ।
na vā e̱tadayo̱ na hira̍ṇyam ॥ 3 ॥))

**[[1-8-5-4]]**

यत्सीसं᳚म्।
न स्त्री न पुमान्।
यत्क्लीबः।
न सोमो॒ न सुरा᳚।
यत्सौत्रा॒मणी सम॑ृद्ध्यै।

स्वा॒द्वीं त्वा॒ स्वा॒दुनेत्या॑ह।

सोम॑मे॒वैना॒ँ करोति।

सोमोॅऽस्य॒श्विभ्या॒ँ पच्यस्व॒ सर॑स्वत्यै पच्य॒स्वेन्द्रा॑य

सु॒त्राम्णे॑ पच्य॒स्वेत्या॑ह।

ए॒ताभ्यो॒ ह्ये॑षा दे॒वता॒भ्यः पच्य॑ते।

ति॒स्रः सꣳसृ॑ष्टा वसति॥ ४॥

((yatsīsā̊m |
na strī na pumā̊n |
yatklībaḥ |
na somọ na surā̊ |
yatsaǘtrāmạṇī samṛ́ddhyai |
svādvīṃ tvā̊ svādunetyáha |
somámẹvaināṃ̊ karoti |
somö'syạśvibhyāṃ̊ pacyasvạ sarásvatyai
pacyạsvendráya sụtrāmṇé pacyạsvetyáha |
ẹtābhyọ hyéṣā dẹvatā̊bhyạḥ pacyáte |
tịsraḥ saṃ̊sṛ́ṣṭā vasati || 4 ||))

**[[1-8-5-5]]**

ति॒स्रो हि रात्री॒ः क्री॒तः सोमो॒ वस॑ति।

पु॒नातु॑ ते परि॒स्रुत॒मिति॒ यजु॑षा पुनाति॒ व्यावृ॑त्त्यै।

प॒वित्रे॑ण पुनाति।

प॒वित्रे॑ण॒ हि सोम॑ं पु॒नन्ति॑।

वारे॑ण॒ शश्व॑ता॒ तनेत्या॑ह।

वारे॑ण॒ हि सोम॑ं पु॒नन्ति॑।

वा॒युः पू॒तः प॒वित्रे॑णेति॒ नैतया॑ पुनीयात्।

व्यृ॑द्धा॒ ह्ये॑षा।

अ॒तिप॒वि॒तस्यै॒तया॑ पुनीयात्।

कु॒विद॒ङ्गेत्यनि॑रुक्तया प्राजाप॒त्यया॑ गृह्णाति॥ ५॥

((tịsro hi rātrī̊ḥ krītaḥ somọ vasáti |
pụnātú te parịsrutạmitị yajúṣā punātị vyāvṛ́ttyai |
pạvitréṇa punāti |
pạvitréṇạ hi somaṃ́ pụnantí |
vāréṇạ śaśvátā tanetyáha |
vāréṇạ hi somaṃ́ pụnantí |
vāyuḥ pūtaḥ pạvitreṇetị naitayā́ punīyāt |
vyṛ́ddhā hyéṣā |
ạtipạvitasyaịtayā́ punīyāt |
kụvidạṅgetyaníruktayā prājāpạtyayā́ gṛhṇāti || 5 ||))

**[[1-8-5-6]]**

अनि॑रुक्तः प्र॒जाप॑तिः।

प्र॒जाप॑ते॒राप्त्यै॑।

एक॑य॒र्चा गृ॑ह्णाति।

ए॒क॒धैव यज॑माने वी॒र्य॑ं दधाति।

आ॒श्वि॒नं धू॒म्रमाल॑भते।

अ॒श्विनौ॒ वै दे॒वाना॒ं भि॒षजौ॒।

ताभ्या॑मे॒वास्मै॑ भेष॒जं क॑रोति।

सा॒र॒स्व॒तं मे॒षम्।

वाग्वै सर॑स्वती।

वा॒चैवैन॑ं भिषज्यति।

ऐ॒न्द्रमृ॑षभꣳ सें॒न्द्र॒त्वाय॑॥ ६॥

अ॒क्ष्यो॒र्लोमा॑नि॒ हिर॑ण्यं वसति गृह्णाति भिषज्य॒त्येक॑ं च॥ ५॥

((aníruktaḥ prạjāpatíḥ |
prạjāpátẹrāptyaí |
ekáyạrcā gṛ́hṇāti |
ẹkạdhaiva yajámāne vīryaṃ́ dadhāti |
ạ́śvịnaṃ dhūmramālábhate |
ạśvinaụ vai dẹvānāṃ̊ bhiṣajaü |
tābhyámẹvāsmaí bheṣạjaṃ károti |
sārạsvạtaṃ mẹṣam |
vāgvai sarásvatī |
vācaivainaṃ́ bhiṣajyati |
aịndramṛ́ṣabhaṃ̊ sëndrạtvāyá || 6 ||
akṣyọrlomā̊nị hiráṇyaṃ vasati gṛhṇāti
bhiṣajyạtyekaṃ́ ca || 5 ||))

**[[1-8-6-1]]**

य॒त्त्रि॒षु यू॒पे॒ष्वा॒लभे॑त।

ब॒हि॒र्धाऽस्मा॑दिन्द्रि॒यं वी॒र्य॑ं दध्यात्।

भ्रातृ॑व्यमस्मै जनयेत्।

ए॒क॒यू॒प आल॑भते।

ए॒क॒धैवास्मि॑न्निन्द्रि॒यं वी॒र्य॑ं दधाति।

नास्मै॒ भ्रातृ॑व्यं जनयति।

नैतेषा॒ं पशू॒नां पु॑रो॒डाशा॑ भवन्ति।

ग्रह॑पुरोडाशा॒ ह्ये॑ते।

यु॒वꣳ सु॒राम॑मश्विनेति॒ सर्व॑दे॒वत्ये॑ याज्यानुवा॒क्ये॑ भवतः।

सर्वा॑ ए॒व दे॒वताः॑ प्रीणाति॥ १॥

((yattrịṣu yūpë̄ṣvālabhéta |
bạhịrdhā'smā̊dindrịyaṃ vīryaṃ́ dadhyāt |
bhrātṛ́vyamasmai janayet |
ẹkạyūpa ālábhate |
ẹkạdhaivāsmínnindrịyaṃ vīryaṃ́ dadhāti |
nāsmaị bhrātṛ́vyaṃ janayati |
naiteṣāṃ̊ paśūnāṃ púrọḍāśā́ bhavanti |
grahápurọḍāśā hyéte |

yu̱vam̐ su̱rāmȧmaśvi̱neti̱ sarvade̱vatye̱
yājyānuvā̱kye̱ bhavataḥ ।
sarvȧ e̱va de̱vatā̱̈ḥ prīṇāti ॥ 1 ॥))

**[[1-8-6-2]]**

ब्रा॒ह्मणं परि॑क्रीणीयादु॒च्छेष॑णस्य पा॒तार॑म्।
ब्रा॒ह्मणो ह्याहु॑त्या उ॒च्छेष॑णस्य पा॒ता।
यदि॑ ब्राह्म॒णं न वि॒न्देत्।
व॒ल्मी॒क॒व॒पाया॒मव॑नयेत्।
सैव त॒तः प्राय॑श्चित्तिः।
यद्वै सौ॑त्रामण्यै व्यृ॑द्धम्।
तद॑स्यै॒ सम॑ृद्धम्।
ना॒ना॒दे॒व॒त्या॑ः प॒शव॑श्च पुरो॒डाशा॑श्च भवन्ति॒ सम॑ृद्ध्यै।
ऐ॒न्द्रः प॑शू॒नामु॑त्त॒मो भ॑वति।
ऐ॒न्द्रः पु॑रो॒डाशा॑नां प्रथ॒मः॥ २॥

((brā̱hma̱ṇaṃ pari̍krīṇīyādu̱cche̱ṣȧṇasya pā̱tārȧm ।
brā̱hma̱ṇo hyāhu̍tyā u̱cche̱ṣȧṇasya pā̱tā ।
yadi̍ brāhma̱ṇaṃ na vi̱ndet ।
va̱lmīka̱va̱pāyā̱mavȧnayet ।
saiva ta̱taḥ prāyȧścittiḥ ।
yadvai sau̍trāma̱ṇyai vyṛ̍ddham ।
tadȧsyai̱ samṛ̍ddham ।
nā̱nā̱de̱va̱tyā̱̈ḥ pa̱śavȧśca puro̱ḍāśā̱̈śca bhavanti̱
samṛ̍ddhyai ।
ai̱ndraḥ pȧśūnāmu̍tta̱mo bhȧvati ।
ai̱ndraḥ pu̍ro̱ḍāśȧnāṃ pratha̱maḥ ॥ 2 ॥))

**[[1-8-6-3]]**

इ॒न्द्रि॒ये ए॒वास्मै॑ स॒मीची॑ दधाति।
पु॒रस्ता॑दनू॒या॒जाना॑ं पुरो॒डाशै॑ः प्रच॑रति।
प॒शवो॑ वै पु॑रो॒डाशा॑ः।
प॒शूने॒वाव॑रुन्धे।
ऐ॒न्द्रमेका॑दशकपाल॒ं निर्व॑पति।
इ॒न्द्रि॒यमे॒वाव॑रुन्धे।
सा॒वि॒त्रं द्वाद॑शकपाल॒ं प्रसू॑त्यै।
वा॒रु॒णं दश॑कपालम्।
अ॒न्त॒त ए॒व वरु॑णमव॑यजते।
वड॑बा॒ दक्षि॑णा॥ ३॥

((i̱ndri̱ye e̱vāsmai̍ sa̱mīcī̍ dadhāti ।
pu̱rastȧdanūyā̱jānā̱̈m puro̱ḍāśai̱ḥ pracȧrati ।
pa̱śavo̱ vai pu̍ro̱ḍāśā̱̈ḥ ।
pa̱śūne̱vāvȧrundhe ।
ai̱ndramekȧdaśakapāla̱m nirvȧpati ।
i̱ndri̱yame̱vāvȧrundhe ।
sā̱vi̱traṃ dvādȧśakapāla̱m prasṻ̱tyai ।
vā̱ru̱ṇaṃ daśȧkapālam।
a̱nta̱ta e̱va varu̍ṇamavȧyajate ।
vaḍȧbā̱ dakṣi̍ṇā ॥ 3 ॥))

**[[1-8-6-4]]**

उ॒त वा ए॒षाऽश्व॑ं सू॒ते।
उ॒ताश्व॑त॒रम्।
उ॒त सोम॑ उ॒त सुरा॑।
यत्सौ॑त्राम॒णी सम॑ृद्ध्यै।
बा॒र्ह॒स्प॒त्यं प॒शुं च॑तु॒र्थम॑तिपवि॒तस्याल॑भते।
ब्रह्म॒ वै दे॒वानां॑ बृ॒ह॒स्पति॑ः।
ब्रह्म॑णै॒व य॒ज्ञस्य॒ व्यृद्ध॒मपि॑वपति।
पु॒रो॒डाश॑वाने॒ष प॒शुर्भ॑वति।
न ह्ये॑तस्य॒ ग्रह॑ं गृ॒ह्णन्ति॑।
सोम॑प्रतीकाः पितरस्तृ॒ष्णु॒तेति॑ शतातृ॒ण्णाया॑ं
स॒मव॑नयति॥ ४॥

((u̱ta vā e̱ṣā'śvam̐ sū̱te ।
u̱tāśvȧta̱ram ।
u̱ta somȧ u̱ta surā̱̈ ।
yatsau̍trāma̱ṇī samṛ̍ddhyai ।
bā̱rha̱spa̱tyaṃ pa̱śuṃ cȧtu̱rthamȧtipavi̱tasyālȧbhate
।
brahma̱ vai de̱vānā̱m bṛ̱ha̱spati̍ḥ ।
brahmȧṇai̱va ya̱jñasya̱ vyṛ̍ddha̱mapi̍vapati ।
pu̱ro̱ḍāśȧvāne̱ṣa pa̱śurbhȧvati ।
na hye̍tasya̱ graha̱ṃ gṛ̱hṇanti̍ ।
somȧpratīkāḥ pitarastṛ̱ṣṇu̱teti̍ śatātṛ̱ṇṇāyām̐
sa̱mavȧnayati ॥ 4 ॥))

**[[1-8-6-5]]**

श॒तायु॑ः पुरु॑षः श॒तेन्द्रि॑यः।
आयु॑ष्ये॒वेन्द्रि॒ये प्रति॑तिष्ठति।
दक्षि॑णे॒ऽग्नौ जु॑होति।
पा॒प॒व॒स्य॒सस्य॒ व्यावृ॑त्त्यै।
हिर॑ण्यमन्त॒रा धा॑रयति।
पू॒ताम॒वैना॑ं जुहोति।
श॒तमा॑नं भवति।
श॒तायु॑ः पुरु॑षः श॒तेन्द्रि॑यः।
आयु॑ष्ये॒वेन्द्रि॒ये प्रति॑तिष्ठति।
यत्रै॒व श॑ताता॒ृण्णां धा॒रय॑ति॥ ५॥

((śa̱tāyu̱ḥ puru̍ṣa̱ḥ śa̱tendri̍yaḥ ।
āyu̍ṣye̱vendri̱ye prati̍tiṣṭhati ।
dakṣi̍ṇe̱'gnau ju̍hoti ।
pā̱pa̱va̱sya̱sasya̱ vyāvṛ̍ttyai ।
hira̍ṇyamanta̱rā dhā̍rayati ।
pū̱tāme̱vainā̎ṃ juhoti ।
śa̱tamā̍naṃ bhavati ।
śa̱tāyu̱ḥ puru̍ṣa̱ḥ śa̱tendri̍yaḥ ।
āyu̍ṣye̱vendri̱ye prati̍tiṣṭhati ।
yatrai̱va śa̍tātṛ̱ṇṇāṃ dhā̱raya̍ti ॥ 5 ॥))

**[[1-8-6-6]]**

तन्नि॒द॑धाति॒ प्रति॑ष्ठित्यै।
पि॒तॄन् वा ए॒तस्यै᳚न्द्रि॒यं वी॒र्यं॑ गच्छति।
यꣳ सोमो॑ऽति॒पव॑ते।
पि॒तॄणां या᳚ज्यानुवा॒क्या॑भि॒रुप॑तिष्ठते।
यदे॒वास्य॑ पि॒तॄनि॑न्द्रि॒यं वी॒र्यं॑ गच्छ॑ति।
तदे॒वाव॑रुन्धे।
ति॒सृभि॒रुप॑तिष्ठते।
तृ॒तीये॒ वा इ॒तो लो॒के पि॒तर॑ः।
ता॒नेव प्री॑णाति।
अथो॒ त्रीणि॒ वै य॒ज्ञस्यै᳚न्द्रि॒याणि॑।
अ॒ध्व॒र्युर्होता᳚ ब्र॒ह्मा।
त उप॑तिष्ठन्ते।
यान्ये॒व य॒ज्ञस्यै᳚न्द्रि॒याणि॑।
तैरे॒वास्मै॑ भेष॒जं क॑रोति॥ ६॥
प्री॒णा॒ति॒ प्र॒थ॒मो द॒क्षि॒णा स॒मव॑नयति धा॒रय॑तीन्द्रि॒याणि॑ च॒त्वारि॑ च॥ ६॥

((tannida̍dhāti̱ prati̍ṣṭhityai ।
pi̱tṝn vā e̱tasyai̎ndri̱yaṃ vī̱ryaṃ̍ gacchati ।
yaꣳ somo̍'ti̱pava̍te ।
pi̱tṝ̱ṇāṃ yā̎jyānuvā̱kyā̍bhi̱rupa̍tiṣṭhate ।
yade̱vāsya̍ pi̱tṝni̍ndri̱yaṃ vī̱ryaṃ̍ gacchā̍ti ।
tade̱vāva̍rundhe ।
ti̱sṛbhi̱rupa̍tiṣṭhate ।
tṛ̱tīye̱ vā i̱to lo̱ke pi̱tara̍ḥ ।
tāne̱va prī̍ṇāti ।
atho̱ trīṇi̱ vai ya̱jñasyai̎ndri̱yāṇi̍ ।
a̱dhva̱ryurhotā̎ bra̱hmā ।
ta upa̍tiṣṭhante ।
yānye̱va ya̱jñasyai̎ndri̱yāṇi̍ ।
taire̱vāsmai̍ bheṣa̱jaṃ ka̍roti ॥ 6 ॥
prī̱ṇā̱ti̱ pra̱tha̱mo dakṣi̱ṇā sa̱mava̍nayati dhā̱raya̍tīndri̱yāṇi̍ ca̱tvāri̍ ca ॥ 6 ॥))

**[[1-8-7-1]]**

अ॒ग्नि॒ष्टो॒मम॑ग्र॒ आह॑रति।
य॒ज्ञ॒मु॒खं वा अ॑ग्नि॒ष्टो॒मः।
य॒ज्ञ॒मु॒खमे॒वार॒भ्य॑ स॒वमाक्र॑मते।
अथै॒षो॑ऽभिषे॒च॒नीय॑श्चतु॒स्त्रि॒ꣳ॒शः पव॑मानो भवति।
त्रय॑स्त्रिꣳश॒द्वै दे॒वता᳚ः।
ता ए॒वाप्नो॑ति।
प्र॒जाप॑तिश्चतु॒स्त्रि॒ꣳ॒शः।
तमे॒वाप्नो॑ति।
स॒ꣳ॒श॒र ए॒ष स्तोमा॑ना॒मय॑थापू॒र्वम्।
यद्वि॒ष॑मा॒ः स्तोमा᳚ः॥ १॥

((a̱gni̱ṣṭo̱mama̱gra̱ āha̍rati ।
ya̱jña̱mu̱khaṃ vā a̍gniṣṭo̱maḥ ।
ya̱jña̱mu̱khame̱vārabhya̍ sa̱vamākra̍mate ।
athai̱ṣo̍'bhiṣeca̱nīya̍ścatustri̱ꣳ̱śaḥ pa̍vamāno bhavati ।
traya̍striꣳśa̱dvai de̱vatā̎ḥ ।
tā e̱vāpno̍ti ।
pra̱jāpa̍tiścatustri̱ꣳ̱śaḥ ।
tame̱vāpno̍ti ।
sa̱ꣳ̱śa̱ra e̱ṣa stomā̍nā̱maya̍thāpū̱rvam ।
yadviṣa̍mā̱ḥ stomā̎ḥ ॥ 1 ॥))

**[[1-8-7-2]]**

ए॒ता॒वान्वै य॒ज्ञः।
या॒वा॒न्पव॑मानाः।
अ॒न्तः॒श्ले॒ष॒णं त्वा अ॒न्यत्।
यत्स॒माः पव॑मानाः।
तेनास॒ꣳ॒श॒रः।
तेन॑ यथापू॒र्वम्।
आ॒त्मनै॒वाग्नि॒ष्टो॒मेन॒र्ध्नोति॑।
आ॒त्मना॒ पु॒ण्यो॑ भवति।
प्र॒जा वा उ॒क्थानि॑।
प॒शव॑ उ॒क्थानि॑।
यदु॒क्थ्यो॑ भ॒व॒त्यनु॒ संत॑त्यै॥ २॥
स्तोमा᳚ः प॒शव॑ उ॒क्थान्येक॑ं च॥ ७॥

((e̱tāvā̱nvai ya̱jñaḥ ।
yāvā̱npava̍mānāḥ ।
a̱nta̱ḥśle̱ṣa̍ṇa̱ṃ tvā a̱nyat ।
yatsa̱māḥ pava̍mānāḥ ।
tenāsa̱ꣳ̱śaraḥ ।
tena̍ yathāpū̱rvam ।
ā̱tmanai̱vāgni̍ṣṭo̱mena̱rdhnoti̍ ।
ā̱tmanā̱ puṇyo̍ bhavati ।
pra̱jā vā u̱kthāni̍ ।

pa̱śava̍ u̱kthāni̍ |
yadu̱kthyo̍ bhava̱tyanu̱ saṃta̍tyai || 2 ||
stomā̍ḥ pa̱śava̍ u̱kthānyekaṃ ca || 7 ||))

**[[1-8-8-1]]**

उप॑ त्वा जा॒मयो॒ गिर॒ इति॑ प्रति॒पद्भ॑वति।
वाग्वै वा॒युः।
वा॒च ए॒वैषो॑ऽभिषे॒कः।
सर्वा॑सामे॒व प्र॒जाना॑ꣳ सूयते।
सर्वा॑ एनं प्र॒जा राजेति॑ वदन्ति।
ए॒तमु॒त्यं द॒शक्षिप॒ इत्या॑ह।
आ॒दि॒त्या वै प्र॒जाः।
प्र॒जाना॑मे॒वैतेन॑ सूयते।
यन्ति॒ वा॒ ए॒ते य॑ज्ञमु॒खात्।
ये स॑म्भा॒र्या॑ अक्र॑न्॥ १॥

((upa̍ tvā jā̱mayo̱ gira̱ iti̍ prati̱padbha̍vati |
vāgvai vā̱yuḥ |
vā̱ca e̱vaiṣo̍'bhiṣe̱kaḥ |
sarva̍sāme̱va pra̱jānā̍m̐ sūyate |
sarva̍ enaṃ pra̱jā rājeti̍ vadanti |
e̱tamu̱tyaṃ daśa̱kṣipa̱ ityā̍ha |
ā̱dityā vai pra̱jāḥ |
pra̱jānā̍me̱vaitena̍ sūyate |
yanti̱ vā̱ e̱te ya̍jñamu̱khāt |
ye sa̍mbhā̱ryā̍ akra̍n || 1 ||))

**[[1-8-8-2]]**

यदा॑ह॒ पव॑स्व वा॒चो अ॑ग्रिय॒ इति॑।
तेनै॒व य॑ज्ञमु॒खान्नय॑न्ति।
अ॒नु॒ष्टुक्प्र॑थ॒मा भ॑वति।
अ॒नु॒ष्टुगु॑त्त॒मा।
वाग्वा अ॑नु॒ष्टुक्।
वा॒चैव प्र॒यन्ति॑।
वा॒चोद्य॑न्ति।
उद्व॑तीर्भ॑वन्ति।
उ॒द्व॒द्वा अ॑नु॒ष्टुभो॑ रू॒पम्।
आनु॑ष्टुभो राज॒न्यः॑॥ २॥

((yadāha̱ pava̍sva vā̱co a̍griya̱ iti̍ |
tenai̱va ya̍jñamu̱khānnaya̍nti |
a̱nu̱ṣṭukpra̍tha̱mā bha̍vati |
a̱nu̱ṣṭugu̍tta̱mā |
vāgvā a̍nu̱ṣṭuk |
vā̱caiva pra̱yanti̍ |
vā̱codya̍nti |
udva̍tīrbhavanti |
udva̱dvā a̍nu̱ṣṭubho̍ rū̱pam |
ānu̍ṣṭubho rāja̱nya̍ḥ || 2 ||))

**[[1-8-8-3]]**

तस्मा॒दुद्व॑तीर्भ॑वन्ति।
सौ॒र्य॑नु॒ष्टुगु॑त्त॒मा भ॑वति।
सु॒व॒र्गस्य॑ लो॒कस्य॒ संत॑त्यै।
यो वै स॒वादेति॑।
नैन॑ꣳ स॒व उप॑नमति।
यः सा॒म॑भ्य॒ एति॑।
पापी॑यान्सुषु॒वा॒णो भ॑वति।
ए॒तानि॒ खलु॒ वै सामा॑नि।
यत्पृ॒ष्ठानि॑।
यत्पृ॒ष्ठानि॒ भव॑न्ति॥ ३॥

((tasmā̱dudva̍tīrbhavanti |
sau̱rya̍nu̱ṣṭu̱gu̍tta̱mā bha̍vati |
su̱va̱rgasya̍ lo̱kasya̱ saṃta̍tyai |
yo vai sa̱vādeti̍ |
naina̍m̐ sa̱va upa̍namati |
yaḥ sāma̍bhya̱ eti̍ |
pāpi̍yānsuṣu̱vā̱ṇo bha̍vati |
e̱tāni̱ khalu̱ vai sāmā̍ni |
yatpṛ̱ṣṭhāni̍ |
yatpṛ̱ṣṭhāni̱ bhava̍nti || 3 ||))

**[[1-8-8-4]]**

तैरे॒व स॒वान्नैति॑।
यानि॑ देवरा॒जाना॒ꣳ॒ सामा॑नि।
तैर॒मुष्मि॑ꣳल्लो॒क ऋ॑ध्नोति।
यानि॑ मनुष्यरा॒जाना॒ꣳ॒ सामा॑नि।
तैर॒स्मि॑ꣳल्लो॒क ऋ॑ध्नोति।
उ॒भयो॑रे॒व लो॒कयो॑र्ऋध्नोति।
दे॒वलो॒के च॑ मनुष्यलो॒के च॑।
ए॒क॒वि॒ꣳ॒शो॑ऽभिषे॒चनीय॒स्योत्त॒मो भ॑वति।
ए॒क॒वि॒ꣳ॒शः के॑शवप॒नीय॑स्य प्रथ॒मः।
स॒प्त॒द॒शो द॑शपेयः॑॥ ४॥

((taire̱va sa̱vānnaiti̍ |
yāni̍ devarā̱jānā̱m̐ sāmā̍ni |
taira̱muṣmi̍m̐llo̱ka ṛ̍dhnoti |
yāni̍ manuṣyarā̱jānā̱m̐ sāmā̍ni |
taira̱smi̍m̐llo̱ka ṛ̍dhnoti |

u̱bhayó̱re̱va lo̱kayó̱rr̥dhnoti |
de̱va̱lo̱ke cá manu̱ṣya̱lo̱ke cá |
e̱ka̱vi̱m̐śó'bhiṣeca̱nīyásyotta̱mo bhávati |
e̱ka̱vi̱m̐śaḥ kéśavapa̱nīyásya pratha̱maḥ |
sa̱pta̱da̱śo dáśa̱peyáḥ || 4 ||))

**[[1-8-8-5]]**

विद्वा॒ एक॑वि॒ꣳशः।
रा॒ष्ट्रꣳ स॑प्तद॒शः।
विश॑ ए॒वैतन्म॑ध्य॒तो॑ऽभिषि॑च्यते।
तस्मा॒द्वा ए॒ष वि॒शां प्रि॒यः।
वि॒शो हि म॑ध्य॒तो॑ऽभिषि॒च्यते᳚।
यद्वा ए॑नम॒दो दि॒शोऽनु॑ व्यास्था॒पय॑न्ति।
तत्सु॑व॒र्गं लो॒कम॒भ्यारो॑हति।
यदि॒मं लो॒कं न प्र॑त्यव॒रोहे᳚त्।
अ॒ति॒ज॒नं वे॒यात्।
उद्वा॑ माद्येत्।
यदे॒ष प्र॑ती॒चीन॑ः स्तोमो॒ भव॑ति।
इ॒ममे॒व तेन॑ लो॒कं प्र॒त्यव॑रोहति।
अथो॑ अ॒स्मिन्ने॒व लो॒के प्रति॑तिष्ठ॒त्यनु॑न्मादाय॥ ५॥
अक्र॑न्राज॒न्यो॑ भव॑न्ति द॒शपेयो॑ माद्ये॒त्त्रीणि॑ च॥ ८॥

((vi̱dvā ékavi̱m̐śaḥ |
rā̱ṣṭram̐ sáptada̱śaḥ |
viśá e̱vaitanmádhya̱tó'bhiṣícyate |
tasmā̱dvā e̱ṣa vi̱śām pri̱yaḥ |
vi̱śo hi mádhya̱tó'bhiṣi̱cyate̋ |
yadvā énama̱do diśo'nú vyāsthā̱payánti |
tatsúva̱rgaṃ lo̱kama̱bhyāróhati |
yadi̱maṃ lo̱kaṃ na prátyava̱rohe̋t |
a̱tija̱naṃ ve̱yāt |
udvá mādyet |
yade̱ṣa prátī̱cīnáḥ stomo̱ bhaváti |
i̱mame̱va tená lo̱kaṃ pra̱tyavárohati |
athó a̱sminne̱va lo̱ke pratítiṣṭha̱tyanúnmādāya || 5 ||
akránrāja̱nyó bhavánti daśa̱peyó mādye̱ttrīṇí ca || 8 ||))

**[[1-8-9-1]]**

इ॒यं वै र॑ज॒ता।
अ॒सौ हरि॑णी।
यद्रु॒क्मौ भव॑तः।
आ॒भ्यामे॒वैन॑मुभय॒तः परि॑गृह्णाति।
वरु॑णस्य॒ वा अ॑भिषि॒च्यमा॑न॒स्यापः॑।
इ॒न्द्रि॒यं वी॒र्यं॑ निर॑घ्नन्।
तत्सु॑व॒र्णꣳ हिर॑ण्यमभवत्।
यद्रु॒क्मम॑न्त॒र्दधा॑ति।
इ॒न्द्रि॒यस्य॑ वी॒र्य॑स्यानि॑र्घाताय।
श॒तमा॑नो भवति श॒तक्ष॑रः।
श॒तायु॑ः पुरु॑षः श॒तेन्द्रि॑यः।
आयु॑ष्ये॒वेन्द्रि॒ये प्रति॑तिष्ठति।
आयु॑र्वै हिर॑ण्यम्।
आ॒यु॒ष्या॑ ए॒वैन॑म॒भ्यति॑ क्षरन्ति।
तेजो॒ वै हिर॑ण्यम्।
ते॒ज॒स्या॑ ए॒वैन॑म॒भ्यति॑ क्षरन्ति।
वर्चो॒ वै हिर॑ण्यम्।
व॒र्च॒स्या॑ ए॒वैन॑म॒भ्यति॑ क्षरन्ति॥ १॥
श॒तक्ष॑रो॒ऽष्टौ च॑॥ ९॥

((i̱yaṃ vai rája̱tā |
a̱sau haríṇī |
yadru̱kmau bhavátaḥ |
ā̱bhyāme̱vainámubhaya̱taḥ parígr̥hṇāti |
varúṇasya̱ vā ábhiṣi̱cyamána̱syāpáḥ |
i̱ndri̱yaṃ vī̱ryáṃ nirághnan |
tatsu̱varṇa̱m̐ hiráṇyamabhavat |
yadru̱kmamánta̱rdadháti |
i̱ndri̱yasyá vī̱ryásyānírghātāya |
śa̱tamáno bhavati śa̱takṣáraḥ |
śa̱tāyu̱ḥ purúṣaḥ śa̱tendríyaḥ |
āyúṣye̱vendri̱ye pratítiṣṭhati |
āyu̱rvai hiráṇyam |
ā̱yu̱ṣyá e̱vainámabhyatí kṣaranti |
tejo̱ vai hiráṇyam |
te̱ja̱syá e̱vainámabhyatí kṣaranti |
varco̱ vai hiráṇyam |
va̱rca̱syá e̱vainámabhyatí kṣaranti || 1 ||
śa̱takṣáro̱'ṣṭau cá || 9 ||))

**[[1-8-10-1]]**

अप्र॑तिष्ठितो॒ वा ए॒ष इत्या॑हुः।
यो रा॑ज॒सूये॑न॒ यज॑त॒ इति॑।
य॒दा वा ए॒ष ए॒तेन॑ द्विरा॒त्रेण॒ यज॑ते।
अथ॑ प्रति॒ष्ठा।
अथ॑ संवत्स॒रमा᳚प्नोति।
याव॑न्ति संवत्स॒रस्या॑होरा॒त्राणि॑।
ताव॑तीरे॒तस्य॑ स्तो॒त्रीया᳚ः।
अ॒हो॒रा॒त्रेष्वे॒व प्रति॑तिष्ठति।
अ॒ग्नि॒ष्टो॒मः पूर्व॒मह॑र्भवति।

अतिरात्र उत्तरम्॥ १॥

((apratiṣṭhito vā eṣa ityāhuḥ |
yo rājasuyena yajata iti |
yadā vā eṣa etena dvirātreṇa yajate |
atha pratiṣṭhā |
atha saṃvatsaramāpnoti |
yāvanti saṃvatsarasyāhorātrāṇi |
tāvatīretasya stotrīyāḥ |
ahorātreṣveva pratitiṣṭhati |
agniṣṭomaḥ pūrvamaharbhavati |
atirātra uttaram || 1 ||))

**[[1-8-10-2]]**

नानैवाहोरात्रयोः प्रतितिष्ठति।
पौर्णमास्यां पूर्वमहर्भवति।
व्यष्टकायामुत्तरम्।
नानैवार्धमासयोः प्रतितिष्ठति।
अमावास्यायां पूर्वमहर्भवति।
उद्दृष्ट उत्तरम्।
नानैव मासयोः प्रतितिष्ठति।
अथो खलु।
ये एव समानपक्षे पुण्याहे स्याताम्।
तयोः कार्यं प्रतिष्ठित्यै॥ २॥

((nānaivāhorātrayoḥ pratitiṣṭhati |
paurṇamāsyāṃ pūrvamaharbhavati |
vyaṣṭakāyāmuttaram |
nānaivārdhamāsayoḥ pratitiṣṭhati |
amāvāsyāyāṃ pūrvamaharbhavati |
uddṛṣṭa uttaram |
nānaiva māsayoḥ pratitiṣṭhati |
atho khalu |
ye eva samānapakṣe puṇyāhe syātām |
tayoḥ kāryaṃ pratiṣṭhityai || 2 ||))

**[[1-8-10-3]]**

अपशव्यो द्विरात्र इत्याहुः।
द्वे ह्येते छन्दसी।
गायत्रं च त्रैष्टुभं च।
जगतीमन्तर्यन्ति।
न तेन जगती कृतेत्याहुः।
यदेनां तृतीयसवने कुर्वन्तीति।
यदा वा एषाऽहीनस्याहर्भजते।
साह्नस्य वा सवनम्।
अथैव जगती कृता।
अथ पशव्यः।
व्युष्टिर्वा एष द्विरात्रः।
य एवं विद्वान्द्विरात्रेण यजते।
व्येवास्मा उच्छति।
अथो तम एवापहते।
अग्निष्टोममन्तत आहरति।
अग्निः सर्वा देवताः।
देवतास्वेव प्रतितिष्ठति॥ ३॥
उत्तरं प्रतिष्ठित्यै पशव्यः सप्त च॥ १०॥
वरुणस्य जामीश्वर आग्नेयमिन्द्रस्य यत्त्रिष्वग्निष्टोममुप त्वेयं वै रजताऽप्रतिष्ठितो दश॥ १०॥
वरुणस्य पदश्विभ्यां यत्त्रिषु तस्मादुद्वतीः सप्तत्रिंशत्॥ ३७॥

((apaśavyo dvirātra ityāhuḥ |
dve hyete chandasī |
gāyatraṃ ca traiṣṭubhaṃ ca |
jagatīmantaryanti |
na tena jagatī kṛtetyāhuḥ |
yadenāṃ tṛtīyasavane kurvantīti |
yadā vā eṣā'hīnasyāharbhajate |
sāhnasya vā savanam |
athaiva jagatī kṛtā |
atha paśavyaḥ |
vyuṣṭirvā eṣa dvirātraḥ |
ya evaṃ vidvāndvirātreṇa yajate |
vyevāsmā ucchati |
atho tama evāpahate |
agniṣṭomamantata āharati |
agniḥ sarvā devatāḥ |
devatāsveva pratitiṣṭhati || 3 ||
uttaraṃ pratiṣṭhityai paśavyaḥ sapta ca || 10 ||
varuṇasya jāmīśvara āgneyamindrasya yattriṣvagniṣṭomamupa tveyaṃ vai rajatā'pratiṣṭhito daśa || 10 ||
varuṇasya padaśvibhyāṃ yattriṣu tasmādudvatīḥ saptatriṃśat || 37 ||))

# Taittirīya-Brāhmaṇa

# Book 2, Chapter 1

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[2-1-1-1]]**

अङ्गि॑रसो॒ वै स॒त्रमा॑सत।

तेषा॒ं पृश्नि॑र्घर्म॒धुगा॑सीत्।

सर्जी॒षेणा॑जीवत्।

ते᳚ऽब्रुवन्।

कस्मै॒ नु स॒त्रमा᳚स्महे।

ये᳚ऽस्या ओष॑धीर्न ज॒नया॑म॒ इति॑।

ते दि॒वोवृष्टि॑मसृजन्त।

याव॑न्तः स्तो॒का अ॒वाप॑द्यन्त।

ताव॑तीरो॒ष॑धयोऽजायन्त।

ता जा॒ताः पि॒तरो॑ वि॒षेणा॑लिम्पन्॥ १॥

((aṅgi̍raso̱ vai sa̱tramā̍sata ।
teṣā̱ṃ pṛśni̍rgharma̱dhugā̍sīt ।
sarjī̱ṣeṇā̍jīvat ।
tē̎'bruvan ।
kasmai̱ nu sa̱tramā̎smahe ।
yē̎'syā oṣa̍dhīrna ja̱nayā̍ma̱ iti̍ ।
te di̱vovṛṣṭi̍masṛjanta ।
yāva̍ntaḥ sto̱kā a̱vāpa̍dyanta ।
tāva̍tīro̱ṣa̍dhayo'jāyanta ।
tā jā̱tāḥ pi̱taro̍ vi̱ṣeṇā̍limpan ॥ 1 ॥))

**[[2-1-1-2]]**

तासा᳚ं ज॒ग्ध्वा रुप्य॒न्त्यैत्।

ते᳚ऽब्रुवन्।

क इ॒दमि॒त्थम॑क॒रिति॑।

व॒यं भा॑ग॒धेय॑मि॒च्छमा॑ना॒ इति॑ पि॒तरो᳚ऽब्रुवन्।

कि॒ं वो॑ भाग॒धेय॒मिति॑।

अ॒ग्नि॒हो॒त्र ए॒व नोऽप्य॒स्त्वित्य॑ब्रुवन्।

तेभ्य॑ ए॒तद्भा᳚ग॒धेय॒ं प्राय॑च्छन्।

यद्धु॒त्वा नि॒मार्ष्टि॑।

ततो॒ वै त ओष॑धीरस्वदयन्।

य ए॒वं वेद॑॥ २॥

((tāsā̎ṃ ja̱gdhvā rupya̱ntyait ।
tē̎'bruvan ।
ka i̱dami̱tthama̍ka̱riti̍ ।
va̱yaṃ bhā̍ga̱dheya̍mi̱cchamā̍nā̱ iti̍ pi̱tarō̎'bruvan ।
kiṃ̱ vo̍ bhāga̱dheya̱miti̍ ।
a̱gni̱ho̱tra e̱va no'pya̱stvitya̍bruvan ।
tebhya̍ e̱tadbhā̎ga̱dheya̱ṃ prāya̍cchan ।
yaddhu̱tvā ni̱mārṣṭi̍ ।
tato̱ vai ta oṣa̍dhīrasvadayan ।
ya e̱vaṃ veda̍ ॥ 2 ॥))

**[[2-1-1-3]]**

स्वद॑न्तेऽस्मा॒ ओष॑धयः।

ते व॒त्समु॒पावा॑सृजन्।

इ॒दं नो॑ ह॒व्यं प्रदा॑प॒येति॑।

सो᳚ऽब्रवी॒द्वरं॑ वृणै।

दश॑ मा॒ रात्री᳚र्जा॒तं न दो॑हन्।

आ॒स॒ङ्ग॒वं मा॒त्रा स॒ह च॑रा॒णीति॑।

तस्मा᳚द्व॒त्सं जा॒तं दश॒ रात्री॒र्न दु॑हन्ति।

आ॒स॒ङ्ग॒वं मा॒त्रा स॒ह च॑रति।

वारे॑ वृ॒तꣳ᳚ ह्य॑स्य।

तस्मा᳚द्व॒त्सꣳ᳚ सꣳ᳚सृष्टध॒यꣳ᳚ रु॒द्रो घातु॑कः।

अति॒ हि स॒न्धां धय॑ति॥ ३॥

अ॒लि॒म्प॒न्वेद॒ घातु॑क॒ एकं॑ च॥ १॥

((svada̍nte'smā̱ oṣa̍dhayaḥ ।
te va̱tsamu̱pāvā̍sṛjan ।
i̱daṃ no̍ ha̱vyaṃ pradā̍pa̱yeti̍ ।
sō̎'bravī̱dvara̍ṃ vṛṇai ।
daśa̍ mā̱ rātrī̎rjā̱taṃ na do̍han ।
ā̱sa̱ṅga̱vaṃ mā̱trā sa̱ha ca̍rā̱ṇīti̍ ।
tasmā̎dva̱tsaṃ jā̱taṃ daśa̱ rātrī̱rna du̍hanti ।
ā̱sa̱ṅga̱vaṃ mā̱trā sa̱ha ca̍rati ।
vāre̍ vṛ̱taꣳ̎ hya̍sya ।
tasmā̎dva̱tsaꣳ̎ saꣳ̎sṛṣṭadha̱yaꣳ̎ ru̱dro ghātu̍kaḥ ।
ati̱ hi sa̱ndhāṃ dhaya̍ti ॥ 3 ॥
a̱li̱mpa̱nveda̱ ghātu̍ka̱ ekaṃ̍ ca ॥ 1 ॥))

**[[2-1-2-1]]**

प्र॒जाप॑तिर॒ग्निम॑सृजत।

तं प्र॒जा अन्व॑सृज्यन्त।

तम॑भा॒ग उपा᳚स्त।

सो᳚ऽस्य प्र॒जाभि॒रपा᳚क्रामत्।

तम॑वरु॒रुत्समा॒नोऽन्वै᳚त्।

तम॑वरु॒धन्नाश॑क्नोत्।

स तपो᳚ऽतप्यत।

सो᳚ऽग्निरुपा॑रम॒ता॒ता॑पि॒ वै स्य प्र॒जाप॑ति॒रिति॑।
स र॒रा॒टा॒दुद॑मृष्ट॥ १॥

((pra̠jāpáti̠ra̠gnimásṛjata ।
taṃ pra̠jā anvásṛjyanta ।
tamábhā̠ga upā̎sta ।
sö'sya pra̠jābhi̠rapā̎krāmat ।
tamáva̠rurú̠tsamā̠no'nvai̠̎t ।
tamáva̠rudha̠nnāśáknot ।
sa tapó'tapyata ।
sö'gnirupáramatātā́pi̠ vai sya pra̠jāpáti̠riti̍ ।
sa ra̠rā̠ṭā̠dudámṛṣṭa ॥ 1 ॥))

**[[2-1-2-2]]**

तद्घृ॒तम॑भवत्।
तस्मा॒द्यस्य॑ द॒क्षि॒ण॒तः के॒शा॒ उन्मृ॑ष्टाः।
तां ज्ये᳚ष्ठल॒क्ष्मी प्रा॑जाप॒त्येत्या॑हुः।
यद्र॒रा॒टा॑दु॒दमृ॑ष्ट।
तस्मा᳚द्र॒रा॒टे॒ के॒शा॒ न स॑न्ति।
तद॒ग्नौ प्राग्गृ॑ह्णात्।
तद्व्य॑चिकित्सत्।
जु॒ह॒वा॒नी३मा हौ॒षा३मिति॑।
तद्वि॑चिकि॒त्सायै॒ जन्म॑।
य ए॒वं वि॒द्वान्वि॑चि॒कित्स॑ति॥ २॥

((tadghṛ̠tamábhavat।
tasmā̠dyasyá dakṣi̠ṇa̠taḥ keśā̠ unmṛ́ṣṭāḥ ।
tāṃ jyē̎ṣṭhala̠kṣmī prā́jāpa̠tyetyā́huḥ ।
yadra̠rā̠ṭā́du̠damṛ́ṣṭa ।
tasmā̎dra̠rā̠ṭe̠ keśā̠ na sánti ।
tada̠gnau prāgṛ́hṇāt ।
tadvyácikitsat ।
ju̠ha̠vā̠nī3mā hau̠ṣā3miti̍ ।
tadvi̍ciki̠tsāyai̠ janmá ।
ya e̠vaṃ vi̠dvānvi̍ci̠kitsáti ॥ 2 ॥))

**[[2-1-2-3]]**

वसी॑य ए॒व चे॑तयते॥
तं वा॒ग॒भ्य॑वदज्जु॒हुधीति॑।
सो᳚ऽब्रवीत्।
कस्त्वम॒सीति॑।
स्वैव ते॒ वागित्य॑ब्रवीत्।
सो᳚ऽजुहो॒त्स्वाहेति॑।
तत्स्वा॑हाका॒रस्य॒ जन्म॑।
य ए॒वꣳ स्वा॑हाका॒रस्य॒ जन्म॒ वेद॑।
क॒रोति॑ स्वाहाका॒रेण॑ वी॒र्य᳚म्।
यस्यै॒वं वि॒दुषः॑ स्वाहाका॒रेण॒ जुह्व॑ति॥ ३॥

((vasīya e̠va cétayate ॥
taṃ vāga̠bhyávadajju̠hudhīti̍ ।
sö'bravīt ।
kastvama̠sīti̍ ।
svaiva te̠ vāgityábravīt ।
só'juho̠tsvāheti̍ ।
tatsvā́hākā̠rasya̠ janmá ।
ya e̠vam̐̎ svā́hākā̠rasya̠ janma̠ vedá ।
ka̠roti̍ svāhākā̠reṇá vīryā̎m ।
yasyai̠vaṃ vi̠duṣáḥ svāhākā̠reṇa̠ juhváti ॥ 3 ॥))

**[[2-1-2-4]]**

भोगा॑यै॒वास्य॑ हु॒तं भ॑वति।
तस्या॒ आहु॑त्यै॒ पुरु॑षमसृजत।
द्वि॒तीय॑मजुहोत्।
सोऽश्व॑मसृजत।
तृ॒तीय॑मजुहोत्।
स गाम॑सृजत।
च॒तु॒र्थम॑जुहोत्।
सोऽवि॑मसृजत।
प॒ञ्च॒मम॑जुहोत्।
सो᳚ऽजाम॑सृजत॥ ४॥

((bhogā́yai̠vāsyá hu̠taṃ bhávati ।
tasyā̠ āhútyai̠ purúṣamasṛjata ।
dvi̠tīyámajuhot ।
so'śvámasṛjata ।
tṛ̠tīyámajuhot ।
sa gāmásṛjata ।
ca̠tu̠rthamájuhot ।
so'vímasṛjata ।
pañca̠mamájuhot ।
só'jāmásṛjata ॥ 4 ॥))

**[[2-1-2-5]]**

सो᳚ऽग्निर॑बिभेत्।
आहु॑तीभि॒र्वै मा᳚ऽऽप्नो॒तीति॑।
स प्र॒जाप॑तिं॒ पुनः॒ प्रावि॑शत्।
तं प्र॒जाप॑तिरब्रवीत्।
जाय॒स्वेति॑।
सो᳚ऽब्रवीत्।
किं भा॑ग॒धेय॑म॒भिज॑निष्य॒ इति॑।

तुभ्य॑मे॒वेद॑ꣳ हू॒याता॒ इत्य॑ब्रवीत्।
स ए॒तद्भा॑ग॒धेय॑म॒भ्य॑जायत।
यद॑ग्निहो॒त्रम्॥ ५॥

((sŏ'gnirábibhet ।
āhútībhirvai mā̆''pnotīti ।
sa prajāpátim punaḥ prāviśat ।
taṃ prajāpátirabravīt ।
jāyasveti ।
sŏ'bravīt ।
kiṃ bhāgadheyámabhijániṣya iti ।
tubhyámevedaṁ hūyātā ityábravīt ।
sa etadbhāgadheyámabhyájāyata ।
yadágnihotram ॥ 5 ॥))

**[[2-1-2-6]]**

तस्मा॑दग्निहो॒त्रमु॑च्यते।
तद्धू॒यमा॑नमादि॒त्यो॑ऽब्रवीत्।
मा हौ॑षीः।
उ॒भयो॒र्वै ना॑वे॒तदिति॑।
सो॑ऽग्निर॑ब्रवीत्।
क॒थं नौ॑ होष्य॒न्तीति॑।
साय॒मे॒व तुभ्यं॑ जु॒हव॑न्।
प्रा॒तर्म॑ह्य॒मित्य॑ब्रवीत्।
तस्मा॑द॒ग्नये॑ सा॒य॑ꣳ हूयते।
सूर्या॑य प्रा॒तः॥ ६॥

((tasmádagnihotramúcyate ।
taddhūyamánamādityŏ'bravīt ।
mā haúṣīḥ ।
ubhayorvai návetaditi ।
sŏ'gnirábravīt ।
kathaṃ naú hoṣyantīti ।
sāyameva tubhyaṃ juhavaṅ ।
prātarmahyamityábravīt ।
tasmádagnayé sāyaṁ hūyate ।
sūryáya prātaḥ ॥ 6 ॥))

**[[2-1-2-7]]**

आ॒ग्ने॒यी वै रात्रि॑ः।
ऐ॒न्द्रमह॑ः।
यदनु॑दिते॒ सूर्ये॑ प्रा॒तर्जु॑हु॒यात्।
उ॒भय॑मे॒वाग्ने॒यꣳ॒ स्या॑त्।
उदि॑ते॒ सूर्ये॑ प्रा॒तर्जु॑होति।
तथा॒ऽग्नये॑ सा॒य॑ꣳ हूयते।
सूर्या॑य प्रा॒तः।
रात्रिं॑ वा अनु॒ प्र॒जाः प्र॒जा॑यन्ते।
अह्ना॒ प्रति॑तिष्ठन्ति।
यत्सा॒यं जु॒होति॑॥

((āgneyī vai rātriḥ ।
aindramaháḥ ।
yadanúdite sūryĕ prātarjúhuyāt ।
ubhayámevāgneyaṁ syāt ।
udite sūryĕ prātarjúhoti ।
tathā'gnayé sāyaṁ hūyate ।
sūryáya prātaḥ ।
rātriṃ vā anú prajāḥ prajáyante ।
ahnā pratitiṣṭhanti ।
yatsāyaṃ juhoti ॥))

**[[2-1-2-8]]**

प्रैव तेन॑ जायते।
उदि॑ते॒ सूर्ये॑ प्रा॒तर्जु॑होति।
प्रत्ये॒व तेन॑ तिष्ठति।
प्र॒जाप॑तिरकामयत॒ प्रजा॑ये॒येति॑।
स ए॒तद॑ग्निहो॒त्रं मि॑थु॒नम॑पश्यत्।
तदुदि॑ते॒ सूर्ये॑ऽजुहोत्।
यजु॑षा॒ऽन्यत्।
तू॒ष्णीम॒न्यत्।
ततो॒ वै स प्राजा॑यत।
यस्यै॒वंवि॒दुष॒ उदि॑ते॒ सूर्ये॑ऽग्निहो॒त्रं जुह्व॑ति॥ ८॥

((praiva tená jāyate ।
udite sūryĕ prātarjúhoti ।
pratyeva tená tiṣṭhati ।
prajāpátirakāmayata prajáyeyeti ।
sa etadágnihotraṃ mithunamápaśyat ।
tadudite sūryé'juhot ।
yajúṣā'nyat ।
tūṣṇīmanyat ।
tato vai sa prājáyata ।
yasyaivaṃviduṣa udite sūryĕ'gnihotraṃ juhváti ॥ 8 ॥))

**[[2-1-2-9]]**

प्रैव जा॑यते।
अथो॒ यथा॒ दिवा॑ प्रजा॒नन्नेति॑।
ता॒दृगे॒व तत्।
अथो॒ खल्वा॑हुः।
यस्य॒ वै द्वौ पुण्यौ॑ गृ॒हे वस॑तः।

यस्तयो॑र॒न्यꣳ रा॒धय॑त्य॒न्यं न।
उ॒भौ वाव स ता॑वृ॒च्छ॒तीति॑।
अ॒ग्निं वावादि॒त्यः सा॒यं प्रवि॑शति।
तस्मा॑द॒ग्निर्दू॒रान्नक्तं॑ ददृशे।
उ॒भे हि तेज॑सी सं॒पद्ये॑ते॥ ९॥

((praiva jā̍yate |
atho̱ yathā̱ divā̎ prajā̱nanneti̍ |
tā̱dṛge̱va tat |
atho̱ khalvā̍huḥ |
yasya̱ vai dvau puṇyau̍ gṛ̱he vasa̍taḥ |
yastayo̍ra̱nyam̐ rā̱dhaya̍tya̱nyaṃ na |
u̱bhau vāva sa tā̍vṛ̱ccha̱tīti̍ |
a̱gniṃ vāvādi̱tyaḥ sā̱yaṃ pravi̍śati |
tasmā̍da̱gnirdū̱rānnaktaṃ̍ dadṛśe |
u̱bhe hi teja̍sī sa̱ṃpadye̍te || 9 ||))

**[[2-1-2-10]]**

उ॒द्यन्तं॒ वावादि॒त्यम॒ग्निर॑नु॒समारो॑हति।
तस्मा॑द्धू॒म ए॒वाग्नेर्दिवा॑ ददृशे।
यद॒ग्नये॑ सा॒यं जु॑हु॒यात्।
आ सूर्या॑य वृश्च्येत।
यत्सूर्या॑य प्रा॒तर्जु॑हु॒यात्।
आऽग्नये॑ वृश्च्येत।
दे॒वता॑भ्यः स॒मदं॑ दध्यात्।
अ॒ग्निर्ज्योति॒र्ज्योति॒ः सूर्य॒ः स्वाहेत्ये॒व साय॑ꣳ होत॒व्य॑म्।
सूर्यो॒ ज्योति॒र्ज्योति॑र॒ग्निः स्वाहेति॑ प्रा॒तः।
तथो॒भाभ्या॑ꣳ साय॑ꣳ हूयते॥ १०॥

((u̱dyanta̱ṃ vāvādi̱tyama̱gniranu̍sa̱māro̍hati |
tasmā̎ddhū̱ma e̱vāgnerdivā̍ dadṛśe |
yada̱gnaye̍ sā̱yaṃ ju̍hu̱yāt |
ā sūryā̍ya vṛścyeta |
yatsūryā̍ya prā̱tarju̍hu̱yāt |
ā'gnaye̍ vṛścyeta |
de̱vatā̎bhyaḥ sa̱madaṃ̍ dadhyāt |
a̱gnirjyoti̱rjyoti̱ḥ sūrya̱ḥ svāhetye̱va sā̱yam̐
ho̍ta̱vyā̎m |
sūryo̱ jyoti̱rjyoti̍ra̱gniḥ svāheti̍ prā̱taḥ |
tatho̱bhābhyām̐̎ sā̱yam̐ hū̍yate || 10 ||))

**[[2-1-2-11]]**

उ॒भाभ्यां॑ प्रा॒तः।
न दे॒वता॑भ्यः स॒मदं॑ दधाति।
अ॒ग्निर्ज्योति॑रि॒त्या॑ह।
अ॒ग्निर्वै रेतो॒धाः।
प्र॒जा ज्योति॑रि॒त्या॑ह।
प्र॒जा ए॒वास्मै॑ प्र॒जन॑यति।
सूर्यो॒ ज्योति॑रि॒त्या॑ह।
प्र॒जास्वे॒व प्र॒जाता॑सु॒ रेतो॑ दधाति।
ज्योति॑र॒ग्निः स्वाहेत्या॑ह।
प्र॒जा ए॒व प्र॒जाता॑ अ॒स्यां प्रति॑ष्ठापयति॥ ११॥

((u̱bhābhyām̐̎ prā̱taḥ |
na de̱vatā̎bhyaḥ sa̱madaṃ̍ dadhāti |
a̱gnirjyoti̱rityā̍ha |
a̱gnirvai re̍to̱dhāḥ |
pra̱jā jyoti̱rityā̍ha |
pra̱jā e̱vāsmai̱ prajā̍nayati |
sūryo̱ jyoti̱rityā̍ha |
pra̱jāsve̱va prajā̍tāsu̱ reto̍ dadhāti |
jyotira̱gniḥ svāhetyā̍ha |
pra̱jā e̱va prajā̍tā a̱syāṃ prati̍ṣṭhāpayati || 11 ||))

**[[2-1-2-12]]**

तू॒ष्णीमु॒त्तरा॒माहु॑तिं जुहोति।
मि॒थु॒न॒त्वाय॒ प्र॒जात्यै॑।
यदुदि॑ते॒ सूर्ये॑ प्रा॒तर्जु॑हु॒यात्।
यथाऽति॑थये॒ प्रद्रु॑ताय शू॒न्यायाव॑स॒थाया॑हा॒र्य॑ꣳ हर॑न्ति।
ता॒दृगे॒व तत्।
क्वाह॒ तत॒स्तद्भ॒वतीत्या॑हुः।
यत्स न वेद॑।
यस्मै॒ तद्धर॒न्तीति॑।
तस्मा॒द्यदौ॑ष॒सं जु॒होति॑।
तदे॒व सं॑प्रति।
अथो॒ यथा॒ प्रार्थ॑मौ॒षसं॒ परि॑वेवे॑ष्टि।
ता॒दृगे॒व तत्॥ १२॥
अ॒मृष्ट॒ वि॒चि॒कित्स॑ति जु॒ह्व॑त्य॒जाम॑सृजताग्निहो॒त्रꣳ सूर्या॑य प्र॒तर्जु॒होति॒ जुह्व॑ति सं॒पद्ये॑ते हूयते स्थापयति सं॒प्रति॒ द्वे च॑॥ २॥

((tū̱ṣṇīmutta̍rā̱māhu̍tiṃ juhoti |
mi̱thu̱na̱tvāya̱ prajā̎tyai |
yadudi̍te̱ sūrye̎ prā̱tarju̍hu̱yāt |
yathā'ti̍thaye̱ pradru̍tāya śū̱nyāyā̍vasa̱thāyā̍hā̱ryam̐̎
hara̍nti |
tā̱dṛge̱va tat |
kvāha̱ tata̱stadbhava̱tītyā̍huḥ |
yatsa na veda̍ |
yasmai̱ taddhara̱ntīti̍ |
tasmā̱dyadau̍ṣa̱saṃ ju̱hoti̍ |

tade̱va sa̱mpra̱ti ।
atho̱ yathā̱ prārtha̍mauṣa̱sam pa̍ri̱veve̎ṣṭi̱ ।
tā̱dṛge̱va tat ॥ 12 ॥
a̱mṛṣṭa̱ vi̱ci̱kitsa̍ti̱ juhva̍tya̱jāma̍sṛjatā̱gniho̱tram̐
sūrya̍ya pra̱tarju̱hoti̱ juhva̍ti sa̱mpadye̍te hūyate
sthāpayati sa̱mpra̱ti dve ca̍ ॥ 2 ॥))

**[[2-1-3-1]]**

रु॒द्रो वा ए॒षः।
यद॒ग्निः।
पत्नी᳚ स्था॒ली।
यन्मध्ये॒ऽग्नेर॑धि॒श्रये᳚त्।
रु॒द्राय॒ पत्नी॒मपि॑ दध्यात्।
प्र॒मायु॑का स्यात्।
उदी॒चोऽङ्गा॑रान्नि॒रूह्याधि॑श्रयति।
पत्नि॑यै गोपी॒थाय॑।
व्य॑न्तान्करोति।
तथा॒ पत्न्यप्र॑मायुका भवति॥ १॥

((ru̱dro vā e̱ṣaḥ ।
yada̱gniḥ ।
patnī̎ sthā̱lī ।
yanmadhye̱'gnera̍dhi̱śraye̎t ।
ru̱drāya̱ patnī̱mapi̍ dadhyāt ।
pra̱māyu̍kā syāt ।
udī̱co'ṅgā̍rānni̱rūhyādhi̍śrayati ।
patni̍yai gopī̱thāya̍ ।
vya̍ntānkaroti ।
tathā̱ patnyapra̍māyukā bhavati ॥ 1 ॥))

**[[2-1-3-2]]**

घ॒र्मो वा ए॒षोऽशा᳚न्तः।
अह॑रहः॒ प्रवृ॑ज्यते।
यद॑ग्निहो॒त्रम्।
प्रति॑षिञ्चेत्प॒शुका॑मस्य।
शा॒न्तमि॑व॒ हि प॑श॒व्य᳚म्।
न प्रति॑षिञ्चेद्ब्रह्मवर्च॒सका॑मस्य।
समि॑द्धमिव॒ हि ब्र॑ह्मवर्च॒सम्।
अथो॒ खलु॑।
प्र॒ति॒षिच्य॑मे॒व।
यत्प्रा॑तिषि॒ञ्चति॑॥ २॥

((gha̱rmo vā e̱ṣo'śā̎ntaḥ ।
aha̍raha̱ḥ prava̍ṛjyate ।
yada̍gniho̱tram ।
prati̍ṣiñcetpa̱śukā̍masya ।
śā̱ntami̍va̱ hi pa̍śa̱vyā̎m ।
na prati̍ṣiñcedbrahmavarca̱sakā̍masya ।
sami̍ddhamiva̱ hi bra̍hmavarca̱sam ।
atho̱ khalu̍ ।
pra̱ti̱ṣicya̍me̱va ।
yatprā̍tiṣi̱ñcati̍ ॥ 2 ॥))

**[[2-1-3-3]]**

तत्प॑श॒व्य᳚म्।
यज्जु॒होति॑।
तद्ब्र॑ह्मवर्च॒सि।
उ॒भय॑मे॒वाक॑ः।
प्रच्यु॑तं॒ वा ए॒तद॒स्माल्लो॒कात्।
अग॑तं दे॒वलो॒कम्।
यच्छ्रृ॒तꣳ ह॒विरन॑भिघारितम्।
अ॒भिद्यो॑तयति।
अ॒भ्ये॑वैन॑द्धारयति।
अथो॑ दे॒वत्रै॒वैन॑द्गमयति॥ ३॥

((tatpa̍śa̱vyā̎m ।
yajju̱hoti̍ ।
tadbra̍hmavarca̱si ।
u̱bhaya̍me̱vāka̍ḥ ।
pracyu̍ta̱m vā e̱tada̱smāllo̱kāt।
aga̍ta̱m devalo̱kam ।
yacchṛ̱tam̐ ha̱virana̍bhighāritam ।
a̱bhidyo̍tayati ।
a̱bhye̍vaina̍dghārayati ।
atho̍ deva̱traivaina̍dgamayati ॥ 3 ॥))

**[[2-1-3-4]]**

पर्य॑ग्नि करोति।
रक्ष॑सा॒मप॑हत्यै।
त्रिः पर्य॑ग्नि करोति।
त्र्या॑वृद्धि य॒ज्ञः।
अथो॑ मेध्य॒त्वाय॑।
यत्प्रा॒चीन॑मुद्वा॒सये᳚त्।
यज॑मानꣳ शु॒चाऽर्प॑येत्।
यद्द॑क्षिणा।
पि॒तृ॒दे॒वत्यꣳ॑ स्यात्।
यत्प्र॒त्यक्॥ ४॥

((parya̍gni karoti ।
rakṣa̍sā̱mapa̍hatyai ।

triḥ paryágni karoti ।
tryávṛddhi yajñaḥ ।
athó medhyatvāyá ।
yatprācīnámudvāsayét ।
yajámānam̐ śucā'rpáyet ।
yaddákṣiṇā ।
pitṛdevatyam̐ syāt ।
yatpratyak ॥ 4 ॥))

**[[2-1-3-5]]**

पत्नीꣳ शुचाऽर्पयेत्।
उदीचीनमुद्वासयति।
एषा वै देवमनुष्याणाꣳ शान्ता दिक्।
तामेवैनदनूद्वासयति शान्त्यै।
वर्त्म करोति।
यज्ञस्य संतत्यै।
निष्टपति।
उपैव तत्स्तृणाति।
चतुरुन्नयति।
चतुष्पादः पशवः॥ ५॥

((patnīm̐ śucā'rpáyet ।
udīcīnamudvásayati ।
eṣā vai dévamanuṣyāṇām̐ śāntā dik ।
tāmevainadanūdvásayati śāntyaí ।
vartmá karoti ।
yajñasya saṃtátyai ।
niṣṭápati ।
upaiva tatstṛṇāti ।
caturunnáyati ।
catúṣpādaḥ paśaváḥ ॥ 5 ॥))

**[[2-1-3-6]]**

पशूनेवावरुन्धे।
सर्वान्पूर्णानुन्नयति।
सर्वे हि पुण्या राद्धाः।
अनूच उन्नयति।
प्रजाया अनूचीनत्वाय।
अनूच्येवास्य प्रजाऽर्धुका भवति॥
संमृशति व्यावृत्त्यै।
नाहोष्यन्नुपसादयेत्।
यदहोष्यन्नुपसादयेत्।
यथाऽन्यस्मा उपनिधाय॥ ६॥

((paśūnevāvárundhe ।
sarvānpūrṇānunnáyati ।
sarve hi puṇyá rāddhāḥ ।
anūca unnáyati ।
prajāyá anūcīnatvāyá ।
anūcyevāsyá prajā'rdhúkā bhavati ॥
saṃmṛśati vyāvṛttyai ।
nāhoṣyannupásādayet ।
yadahoṣyannupasādayét ।
yathā'nyasmá upanidhāyá ॥ 6 ॥))

**[[2-1-3-7]]**

अन्यस्मै प्रयच्छति।
तादृगेव तत्।
आऽस्मै वृश्च्येत।
यदेव गार्हपत्येऽधिश्रयति।
तेन गार्हपत्यं प्रीणाति।
अग्निरबिभेत्।
आहुतयो माऽत्येष्यन्तीति।
स एताꣳ समिधमपश्यत्।
तामाऽधत्त।
ततो वा अग्नावाहुतयोऽध्रियन्त॥ ७॥

((anyasmai prayacchati ।
tādṛgeva tat ।
ā'smai vṛścyeta ।
yadeva gārhápatye'dhiśrayáti ।
tena gārhápatyaṃ prīṇāti ।
agnirábibhet ।
āhútayo mā'tyeṣyantīti ।
sa etām̐ samidhámapaśyat ।
tāmā'dhátta ।
tato vā agnāvāhútayo'dhriyanta ॥ 7 ॥))

**[[2-1-3-8]]**

यदेनꣳ समयच्छत्।
तत्समिधः समित्त्वम्।
समिधमादधाति।
समेवैनं यच्छति।
आहुतीनां धृत्यै।
अथो अग्निहोत्रमेवेध्मवत्करोति।
आहुतीनां प्रतिष्ठित्यै।
ब्रह्मवादिनो वदन्ति।
यदेकाꣳ समिधमाधाय द्वे आहुती जुहोति।
अथ कस्याꣳ समिधि द्वितीयामाहुतिं जुहोतीति॥ ८॥

((yade̍naṁ sa̱maya̍cchat |
tatsa̱midha̍ḥ sami̱ttvam |
sa̱midha̱mādā̍dhāti |
same̱vainaṁ yacchati |
āhu̍tīnā̱ṁ dhṛtyai̍ |
atho̍ agniho̱trame̱vedhmava̍tkaroti |
āhu̍tīnā̱ṁ prati̍ṣṭhityai |
bra̱hma̱vā̱dino̍ vadanti |
yadekā̍ꣳ sa̱midha̍mā̱dhāya̱ dve āhu̍tī ju̱hoti̍ |
atha̱ kasyā̍ꣳ sa̱midhi̍ dvi̱tīyā̱māhu̍tiṁ juho̱tīti̍ || 8 ||))

**[[2-1-3-9]]**

यद्द्वे स॒मिधा॑वाद॒ध्यात्।
भ्रातृ॑व्यमस्मै जनयेत्।
एका॑ꣳ स॒मिध॑मा॒धाय॑।
यजु॑षा॒ऽन्यामाहु॑तिं जुहोति।
उ॒भे ए॒व स॒मिद्व॑ती॒ आहु॑ती जुहोति।
नास्मै॒ भ्रातृ॑व्यं जनयति।
आदी॑॑प्तायां जुहोति।
समि॑द्धमिव॒ हि ब्रह्म॑वर्च॒सम्।
अथो॒ यथाऽति॑थिं॒ ज्योति॑ष्कृ॒त्वा परि॑वे॒वेष्टि॑।
ता॒दृगे॒व तत्।
च॒तुरुन्न॑यति।
द्विर्जु॑होति।
तस्मा॑द्द्वि॒पाच्चतु॑ष्पादमत्ति।
अथो॑ द्वि॒पद्ये॒व चतु॑ष्पदः॒ प्रति॑ष्ठापयति॥ ९॥
भ॒व॒ति॒ प्र॒ति॒षि॒ञ्चति॑ गमयति प्र॒त्यक्प॒शव॑
उप॒नि॒धाया॑ध्रिय॒न्तेति॒ तच्च॒त्वारि॑ च॥ ३॥

((yaddve sa̱midhā̍vāda̱dhyāt |
bhrātṛ̍vyamasmai janayet |
ekā̍ꣳ sa̱midha̍mā̱dhāya̍ |
yaju̍ṣā̱'nyāmāhu̍tiṁ juhoti |
u̱bhe e̱va sa̱midva̍tī̱ āhu̍tī juhoti |
nāsmai̱ bhrātṛ̍vyaṁ janayati |
ādī̍̍ptāyāṁ juhoti |
sami̍ddhamiva̱ hi bra̍hmavarca̱sam |
atho̱ yathā'ti̍thiṁ̱ jyoti̍ṣkṛ̱tvā pa̍ri̱vevë̍ṣṭi̱ |
tā̱dṛge̱va tat |
ca̱turunna̍yati |
dvirju̍hoti |
tasmā̍ddvi̱pāccatu̍ṣpādamatti |
atho̍ dvi̱padye̱va catu̍ṣpadaḥ̱ prati̍ṣṭhāpayati || 9 ||
bha̱va̱ti̱ pra̱ti̱ṣi̱ñcati̍ gamayati pra̱tyakpa̱śava̍
upa̱ni̱dhāyā̍dhriya̱nteti̱ tacca̱tvāri̍ ca || 3 ||))

**[[2-1-4-1]]**

उ॒त्त॒राव॑तीं॒ वै दे॒वा आहु॑तिमजु॑हवुः।
अवा॑ची॒मसु॑राः।
ततो॑ दे॒वा अभ॑वन्।
पराऽसु॑राः।
यं का॒मये॑त॒ वसी॑यान्स्या॒दिति॑।
कनी॑य॒स्तस्य॒ पूर्व॑ꣳ हु॒त्वा।
उत्त॑रं॒ भूयो॑ जुहुयात्।
ए॒षा वा उत्त॒राव॒त्याहु॑तिः।
तां दे॒वा अ॑जुहवुः।
तत॒स्ते॑ऽभवन्॥ १॥

((u̱tta̱rāva̍tī̱ṁ vai de̱vā āhu̍ti̱maju̍havuḥ |
avā̍cī̱masu̍rāḥ |
tato̍ de̱vā abha̍van|
parā'su̍rāḥ |
yaṁ kā̱maye̍ta̱ vasī̍yānsyā̱diti̍ |
kanī̍ya̱stasya̱ pūrva̍ꣳ hu̱tvā |
utta̍ra̱ṁ bhūyo̍ juhuyāt |
e̱ṣā vā utta̱rāva̱tyāhu̍tiḥ |
tāṁ de̱vā a̍juhavuḥ |
tata̱ste̍'bhavan || 1 ||))

**[[2-1-4-2]]**

यस्यै॒वं जुह्व॑ति।
भव॑त्ये॒व।
यं का॒मये॑त॒ पापी॑यान्त्स्या॒दिति॑।
भूय॒स्तस्य॒ पूर्व॑ꣳ हु॒त्वा।
उत्त॑रं॒ कनी॑यो जुहुयात्।
ए॒षा वा अवा॒च्याहु॑तिः।
तामसु॑रा अजुहवुः।
तत॒स्ते परा॑ऽभवन्।
यस्यै॒वं जुह्व॑ति।
परै॒व भ॑वति॥ २॥

((yasyai̱vaṁ juhva̍ti |
bhava̍tye̱va |
yaṁ kā̱maye̍ta̱ pāpī̍yāntsyā̱diti̍ |
bhūya̱stasya̱ pūrva̍ꣳ hu̱tvā |
utta̍ra̱ṁ kanī̍yo juhuyāt |
e̱ṣā vā avā̱cyāhu̍tiḥ |
tāmasu̍rā ajuhavuḥ |
tata̱ste parā̍'bhavan |
yasyai̱vaṁ juhva̍ti |
parai̱va bha̍vati || 2 ||))

**[[2-1-4-3]]**

हु॒त्वोप॑सादय॒त्यजा॑मित्वाय।
अथो॒ व्यावृ॑त्त्यै।
गार्ह॑पत्यं॒ प्रती᳚क्षते।
अन॑नुध्यायिनमे॒वैनं॑ करोति।
अ॒ग्नि॒हो॒त्रस्य॒ वै स्था॒णुर॑स्ति।
तं य ऋ॒च्छेत्।
य॒ज्ञ॒स्था॒णुमृ॑च्छेत्।
ए॒ष वा अ॑ग्निहो॒त्रस्य॑ स्था॒णुः।
यत्पूर्वा॒ऽऽहु॑तिः।
तां यदुत्त॑रया॒ऽभिजु॑हु॒यात्॥ ३॥

((hu̱tvopa̍sādaya̱tyajā̍mitvāya ।
atho̱ vyāvṛ̍ttyai ।
gārha̍patya̱m pratī̎kṣate ।
ana̍nudhyāyiname̱vainaṃ̍ karoti ।
a̱gni̱ho̱trasya̱ vai sthā̱ṇura̍sti ।
taṃ ya ṛ̱cchet ।
ya̱jña̱sthā̱ṇumṛ̍cchet ।
e̱ṣa vā a̍gniho̱trasya̍ sthā̱ṇuḥ ।
yatpūrvā̱''hu̍tiḥ ।
tāṃ yadutta̍rayā̱'bhiju̍hu̱yāt ॥ 3 ॥))

**[[2-1-4-4]]**

य॒ज्ञ॒स्था॒णुमृ॑च्छेत्।
अ॒ति॒हाय॒ पूर्वा॒माहु॑तिं जुहोति।
य॒ज्ञ॒स्था॒णुमे॒व परि॑वृणक्ति।
अथो॒ भ्रातृ॑व्यमे॒वाप्त्वाऽति॑क्रामति।
अ॒वा॒चीनꣳ॑ सा॒यमुप॑मार्ष्टि।
रेत॑ ए॒व तद्द॑धाति।
ऊ॒र्ध्वं प्रा॒तः।
प्रज॑नयत्ये॒व तत्।
ब्र॒ह्म॒वा॒दिनो॑ वदन्ति।
च॒तुरुन्न॑यति॥ ४॥

((ya̱jña̱sthā̱ṇumṛ̍cchet ।
a̱ti̱hāya̱ pūrvā̱māhu̍tiṃ juhoti ।
ya̱jña̱sthā̱ṇume̱va pari̍vṛṇakti ।
atho̱ bhrātṛ̍vyame̱vāptvā'ti̍krāmati ।
a̱vā̱cīnaꣳ̍ sā̱yamupa̍mārṣṭi ।
reta̍ e̱va tadda̍dhāti ।
ū̱rdhvaṃ prā̱taḥ ।
praja̍nayatye̱va tat ।
bra̱hma̱vā̱dino̍ vadanti ।
ca̱turunna̍yati ॥ 4 ॥))

**[[2-1-4-5]]**

द्विर्जु॑होति।
अथ॒ क्व॑ द्वे आहु॑ती भवत॒ इति॑।
अ॒ग्नौ वै᳚श्वान॒र इति॑ ब्रूयात्।
ए॒ष वा अ॒ग्निर्वै᳚श्वान॒रः।
यद्ब्रा॑ह्म॒णः।
हु॒त्वा द्विः प्रा॒श्ना॑ति।
अ॒ग्नावे॒व वै᳚श्वान॒रे द्वे आहु॑ती जुहोति।
द्विर्जु॒होति॑।
द्विर्नि॒मा᳚र्ष्टि।
द्विः प्रा॒श्ना॑ति॥ ५॥

((dvirju̍hoti ।
atha̱ kva̍ dve āhu̍tī bhavata̱ iti̍ ।
a̱gnau vai̎śvāna̱ra iti̍ brūyāt।
e̱ṣa vā a̱gnirvai̎śvāna̱raḥ ।
yadbrā̍hma̱ṇaḥ ।
hu̱tvā dviḥ prā̱śnā̍ti ।
a̱gnāve̱va vai̎śvāna̱re dve āhu̍tī juhoti ।
dvirju̱hoti̍ ।
dvirni̱mā̎rṣṭi ।
dviḥ prā̱śnā̍ti ॥ 5 ॥))

**[[2-1-4-6]]**

षट्सं॒प॑द्यन्ते।
षड्वा ऋ॒तव॑ः।
ऋ॒तूने॒व प्री॑णाति॥
ब्र॒ह्म॒वा॒दिनो॑ वदन्ति।
किं॒दे॒व॒त्य॑मग्निहो॒त्रमिति॑।
वै॒श्व॒दे॒वमिति॑ ब्रूयात्।
यद्यजु॑षा जु॒होति॑।
तदै॑न्द्रा॒ग्नम्।
यत्तू॒ष्णीम्।
तत्प्रा॑जाप॒त्यम्॥ ६॥

((ṣa̱ṭsa̱mpa̍dyante ।
ṣa̱ḍvā ṛ̱tava̍ḥ ।
ṛ̱tūne̱va prī̍ṇāti ॥
bra̱hma̱vā̱dino̍ vadanti ।
ki̱ṃde̱va̱tya̍magniho̱tramiti̍ ।
vai̱śva̱de̱vamiti̍ brūyāt ।
yadyaju̍ṣā ju̱hoti̍ ।
tadai̍ndrā̱gnam ।
yattū̱ṣṇīm ।
tatprā̍jāpa̱tyam ॥ 6 ॥))

[[2-1-4-7]]

यन्नि॒मार्ष्टि॑।
तदोष॑धीनाम्।
यद्द्वि॒तीय᳚म्।
तत्पि॑तॄ॒णाम्।
यत्प्राश्ना॑ति।
तद्गर्भा॑णाम्।
तस्मा॒द्गर्भा॒ अन॑श्नन्तो वर्ध॑न्ते।
यदा॒चाम॑ति।
तन्म॑नु॒ष्या॑णाम्।
उद॑ङ्पर्या॒वृत्याचा॑मति॥ ७॥

((yanni̱mārṣṭi̍ |
tadoṣa̍dhīnām |
yaddvi̱tīya̎m |
tatpi̍tṝ̱ṇām |
yatprāśnā̍ti |
tadgarbhā̍ṇām |
tasmā̱dgarbhā̱ ana̍śnanto vardhante |
yadā̱cāma̍ti |
tanma̍nu̱ṣyā̍ṇām |
uda̍ṅparyā̱vṛtyācā̍mati || 7 ||))

[[2-1-4-8]]

आ॒त्मनो॑ गोपी॒थाय॑।
निर्णे॑नेक्ति॒ शुद्ध्यै᳚।
निष्ट॑पति स्व॒गाकृ॑त्यै।
उद्दि॑शति।
स॒प्त॒र्षीने॒व प्री॑णाति।
द॒क्षि॒णा प॒र्याव॑र्तते।
स्वमे॒व वी॒र्य॑मनु॑प॒र्याव॑र्तते।
तस्मा॒द्दक्षि॒णोऽर्ध॑ आ॒त्मनो॑ वी॒र्या॑वत्तरः।
अथो॑ आदि॒त्यस्यै॒वावृ॒तमनु॑प॒र्याव॑र्तते।
हु॒त्वोप॒समि॑न्धे॥ ८॥

((ā̱tmano̍ gopī̱thāya̍ |
nirṇe̍nekti̱ śuddhya̎i |
niṣṭa̍pati sva̱gākṛ̍tyai |
uddi̍śati |
sa̱pta̱rṣīne̱va prī̍ṇāti |
da̱kṣi̱ṇā pa̱ryāva̍rtate |
svame̱va vī̱rya̍manu̍pa̱ryāva̍rtate |
tasmā̱ddakṣi̱ṇo'rdha̍ ā̱tmano̍ vī̱ryā̍vattaraḥ |
atho̍ ādi̱tyasyai̱vāvṛ̱tamanu̍pa̱ryāva̍rtate |
hu̱tvopa̱sami̍ndhe || 8 ||))

[[2-1-4-9]]

ब्र॒ह्म॒व॒र्च॒स॒स्य॒ समि॑द्ध्यै।
न ब॒र्हिर॑नु॒प्रह॑रेत्।
अस॑ᳪँस्थितो॒ वा ए॒ष य॒ज्ञः।
यद॑ग्निहो॒त्रम्।
यद॑नुप्र॒हरे᳚त्।
य॒ज्ञं वि॒च्छि॑न्द्यात्।
तस्मा॒न्नाना॑नु॒प्रहृत्य᳚म्।
य॒ज्ञस्य॒ संत॑त्यै।
अ॒पो निन॑यति।
अ॒व॒भृ॒थस्यै॒व रू॒पम॑कः॥ ९॥
अ॒भ॒व॒न्भ॒व॒ति॒ जु॒हु॒यान्न॑यति मार्ष्टि॒ द्विः प्राश्ना॑ति
प्राजाप॒त्यमाचा॑मतीन्धेऽकः॥ ४॥

((bra̱hma̱va̱rca̱sasya̱ sami̍ddhyai |
na ba̱rhirana̱upraha̍ret |
asa̍ᳪँsthito̱ vā e̱ṣa ya̱jñaḥ |
yada̍gniho̱tram |
yada̍nupra̱hare̎t |
ya̱jñaṃ vicchi̍ndyāt |
tasmā̱nnānā̍nu̱pra̱hṛtya̎m |
ya̱jñasya̱ saṃta̍tyai |
a̱po nina̍yati |
a̱va̱bhṛ̱thasyai̱va rū̱pama̍kaḥ || 9 ||
a̱bha̱va̱nbha̱va̱ti̱ ju̱hu̱yānna̍yati mārṣṭi̱ dviḥ prāśnā̍ti
prājāpa̱tyamācā̍matīndhe'kaḥ || 4 ||))

[[2-1-5-1]]

ब्र॒ह्म॒वा॒दिनो॑ वदन्ति।
अ॒ग्नि॒हो॒त्रप्रा॑य॒णा य॒ज्ञाः।
किं प्राय॑णमग्निहो॒त्रमिति॑।
व॒त्सो वा अ॑ग्निहो॒त्रस्य॒ प्राय॑णम्।
अ॒ग्नि॒हो॒त्रं य॒ज्ञाना᳚म्।
तस्य॑ पृथि॒वी सद॑ः।
अ॒न्तरि॑क्षमाग्नी॑ध्रम्।
द्यौर्ह॑वि॒र्धान᳚म्।
दि॒व्या आप॑ः प्रोक्ष॑णयः।
ओष॑धयो ब॒र्हिः॥ १॥

((bra̱hma̱vā̱dino̍ vadanti |
a̱gni̱ho̱traprā̍ya̱ṇā ya̱jñāḥ |

kiṃ prȧyaṇamagnihọtramitȋ ।
vạtso vā ȧgnihọtrasyạ prāyȧṇam ।
ạgnịhọtraṃ yạjñānȁm ।
tasyȧ pṛthịvī sadȧḥ ।
ạntarikṣạmāgnȉddhram ।
dyaurhȧvịrdhānȁm ।
dịvyā āpạḥ prokṣȧṇayaḥ ।
oṣȧdhayo bạrhiḥ ॥ 1 ॥))

**[[2-1-5-2]]**

वन॒स्पत॑य इ॒ध्मः।

दिशः॑ परि॒धयः॑।

आ॒दि॒त्यो यूपः॑।

यज॑मानः प॒शुः।

स॒मु॒द्रो॑ऽवभृ॒थः।

सं॒व॒त्स॒रः स्व॑गाका॒रः।

तस्मा॒दाहि॑ताग्नेः सर्व॑मे॒व बर्हि॒ष्यं॑ द॒त्तं भ॑वति।

यत्सा॒यं जु॒होति॑।

रात्रि॑मे॒व तेन॑ दक्षि॒ण्याँ॑ कुरुते।

यत्प्रा॒तः॥ २॥

((vanạspatȧya ịdhmaḥ ।
diśȧḥ parịdhayȧḥ ।
ādịtyo yūpȧḥ ।
yajȧmānaḥ pạśuḥ ।
sạmụdrȯ'vabhṛthaḥ ।
sạṃvạtsạraḥ svȧgākạ̄raḥ ।
tasmạ̄dāhȋtāgnẹḥ sarvȧmẹva bȧrhịṣyaṃ̇ dạttaṃ bhȧvati ।
yatsạ̄yaṃ jụhotȋ ।
rātrȋmẹva tenȧ dakṣịṇyāṃ̇ kurute ।
yatprạ̄taḥ ॥ 2 ॥))

**[[2-1-5-3]]**

अह॑रे॒व तेन॑ दक्षि॒ण्यं॑ कुरुते।

यत्त॒तो द॒दाति॑।

सा दक्षि॑णा।

याव॑न्तो॒ वै दे॒वा अहु॑त॒माद॑न्।

ते परा॑ऽभवन्।

त ए॒तद॑ग्निहो॒त्रꣳ सर्व॑स्यै॒व स॑मव॒दाया॑जुहवुः।

तस्मा॑दाहुः।

अ॒ग्नि॒हो॒त्रं वै दे॒वा गृ॒हाणां॒ निष्कृ॑तिमपश्य॒न्निति॑।

यत्सा॒यं जु॒होति॑।

रात्रि॑या ए॒व तद्धु॒ताद्या॑य॥ ३॥

((ahȧrẹva tenȧ dakṣịṇyaṃ̇ kurute ।
yattatọ dadȧti ।
sā dakṣȋṇā ।
yāvȧntọ vai dẹvā ahụ́tạmādaṅ ।
te parȧ'bhavan ।
ta ẹtadȧgnihọtraṃ̇ sarvȧsyaịva sȧmavạdāyǡjuhavuḥ ।
tasmȧdāhuḥ ।
ạgnịhọtraṃ vai dẹvā gṛhāṇāṃ̣ niṣkṛ̇timapaśyạnnitȋ ।
yatsạ̄yaṃ jụhotȋ ।
rātrȋyā ẹva taddhụtādyǡya ॥ 3 ॥))

**[[2-1-5-4]]**

यज॑मान॒स्याप॑राभावाय।

यत्प्रा॒तः।

अह्न॑ ए॒व तद्धु॒ताद्या॑य।

यज॑मान॒स्याप॑राभावाय।

यत्त॒तोऽश्नाति॑।

हु॒तमे॒व तत्।

द्वयो॒ः पय॑सा जुहुयात्प॒शुका॑मस्य।

ए॒तद्वा अ॑ग्निहो॒त्रं मि॑थु॒नम्।

य ए॒वं वेद॑।

प्र प्र॒जया॑ प॒शुभि॑र्मिथु॒नैर्जा॑यते॥ ४॥

((yajȧmānạsyāpȧrābhāvāya ।
yatprạ̄taḥ ।
ahnȧ ẹva taddhụtādyǡya ।
yajȧmānạsyāpȧrābhāvāya ।
yattatọ'śnātȋ ।
hụtamẹva tat ।
dvayọḥ payȧsā juhuyātpạśukǡmasya ।
ẹtadvā ȧgnihọtraṃ mȋthụnam ।
ya ẹvaṃ vedȧ ।
pra prạjayǡ pạśubhȋrmithụnairjǡyate ॥ 4 ॥))

**[[2-1-5-5]]**

इ॒मामे॒व पूर्व॑या दु॒हे।

अ॒मूमुत्त॑रया।

अ॒धि॒श्रित्योत्त॑र॒मान॑यति।

योना॑वे॒व तद्रेतः॑ सिञ्चति प्र॒जन॑ने।

आज्ये॑न जुहुया॒त्तेज॑स्कामस्य।

तेजो॒ वा आज्य॑म्।

ते॒ज॒स्व्ये॑व भ॑वति।

पय॑सा प॒शुका॑मस्य।

ए॒तद्वै प॑शू॒नाꣳ रू॒पम्।

रू॒पेनै॒वास्मै॑ प॒शूनव॑रुन्धे॥ ५॥

((i̱māme̱va pūrva̍yā du̱he |
a̱mūmutta̍rayā |
a̱dhi̱śrityotta̍ra̱māna̍yati |
yona̍ve̱va tadreta̍ḥ siñcati pra̱jana̍ne |
ājye̍na juhuyā̱tteja̍skāmasya |
tejo̱ vā ājya̎m |
te̱ja̱svye̍va bha̍vati |
paya̍sā pa̱śukā̍masya |
e̱tadvai pa̍śū̱nām̐ rū̱pam |
rū̱penai̱vāsmai̍ pa̱śūnava̍rundhe || 5 ||))

**[[2-1-5-6]]**

प॒शु॒माने॒व भ॑वति।
द॒ध्नेन्द्रि॒यका॑मस्य।
इ॒न्द्रि॒यं वै दधि॑।
इ॒न्द्रि॒या॒व्ये॑व भ॑वति।
य॒वा॒ग्वा᳚ ग्राम॑कामस्यौष॒धा वै म॑नु॒ष्या᳚ः।
भा॒ग॒धेये॑नै॒वास्मै॑ सजा॒तानव॑रुन्धे।
ग्रा॒म्ये॑व भ॑वति।
अय॑ज्ञो॒ वा ए॒षः।
यो॑ऽसा॒मा॥ ६॥

((pa̱śu̱māne̱va bha̍vati |
da̱dhnendri̱yakā̍masya |
i̱ndri̱yaṃ vai dadhi̍ |
i̱ndri̱yā̱vye̍va bha̍vati |
ya̱vā̱gvā̎ grāma̍kāmasyauṣa̱dhā vai ma̍nu̱ṣyā̎ḥ |
bhā̱ga̱dheye̍nai̱vāsmai̍ sajā̱tānava̍rundhe |
grā̱mye̍va bha̍vati |
aya̍jño̱ vā e̱ṣaḥ |
yo̍'sā̱mā || 6 ||))

**[[2-1-5-7]]**

च॒तुरुन्न॑यति।
चतु॑रक्षरꣳ रथन्त॒रम्।
र॒थ॒न्त॒रस्यै॒ष वर्णः॑।
उ॒परी॑व हरति।
अ॒न्तरि॑क्षं वामदे॒व्यम्।
वा॒म॒दे॒व्यस्यै॒ष वर्णः॑।
द्विर्जु॑होति।
द्व्य॑क्षरं बृ॒हत्।
बृ॒ह॒त ए॒ष वर्णः॑।
अ॒ग्नि॒हो॒त्रमे॒व तत्साम॑न्वत्करोति॥ ७॥

((ca̱turunna̍yati |
catu̍rakṣaram̐ rathanta̱ram |
ra̱tha̱nta̱rasyai̱ṣa varṇa̍ḥ |
u̱parī̍va harati |
a̱ntari̍kṣaṃ vāmade̱vyam|
vā̱ma̱de̱vyasyai̱ṣa varṇa̍ḥ |
dvirju̍hoti |
dvaya̍kṣaraṃ bṛ̱hat |
bṛ̱ha̱ta e̱ṣa varṇa̍ḥ |
a̱gni̱ho̱trame̱va tatsāma̍nvatkaroti || 7 ||))

**[[2-1-5-8]]**

यो वा अ॑ग्निहो॒त्रस्यौ॑प॒सदो॒ वेद॑।
उपै॑नमुप॒सदो॑ नमन्ति।
वि॒न्दत॑ उपस॒त्तार॑म्।
उ॒न्नीयोप॑सादयति।
पृ॒थि॒वीमे॒व प्री॑णाति।
हो॒ष्यन्नुप॑सादयति।
अ॒न्तरि॑क्षमे॒व प्री॑णाति।
हु॒त्वोप॑सादयति।
दिव॑मे॒व प्री॑णाति।
ए॒ता वा अ॑ग्निहो॒त्रस्यौ॑प॒सदः॑॥ ८॥

((yo vā a̍gniho̱trasyo̍pa̱sado̱ veda̍ |
upai̍namupa̱sado̍ namanti |
vi̱ndata̍ upasa̱ttāra̍m |
u̱nnīyopa̍sādayati |
pṛ̱thi̱vīme̱va prī̍ṇāti |
ho̱ṣyannupa̍sādayati |
a̱ntari̍kṣame̱va prī̍ṇāti |
hu̱tvopa̍sādayati |
diva̍me̱va prī̍ṇāti |
e̱tā vā a̍gniho̱trasyo̍pa̱sada̍ḥ || 8 ||))

**[[2-1-5-9]]**

य ए॒वं वेद॑।
उपै॑नमुप॒सदो॑ नमन्ति।
वि॒न्दत॑ उपस॒त्तार᳚म्।
यो वा अ॑ग्निहो॒त्रस्याश्रा॑वितं प्र॒त्याश्रा॑वित॒ꣳ होता॑रं ब्र॒ह्माण॑ं
वषट्का॒रं वेद॑।
तस्य॒ त्वेव हु॒तम्।
प्रा॒णो वा अ॑ग्निहो॒त्रस्याश्रा॑वितम्।
अ॒पानः प्र॒त्याश्रा॑वितम्।
मनो॒ होता᳚।

चक्षुर्ब्रह्मा।
निमेषो वषट्कारः॥ ९॥

((ya evaṃ vedá I
upáinamupasadó namanti I
vindatá upasattārä̆m I
yo vā ágnihotrasyāśrávitaṃ pratyāśrávitam̐ hotáraṃ
brahmāṇaṃ vaṣaṭkāraṃ vedá I
tasya tvéva hutam I
prāṇo vā ágnihotrasyāśrávitam I
apānaḥ pratyāśrávitam I
mano hotä̆ I
cakṣúrbrahmā I
nimeṣo váṣaṭkāraḥ II 9 II))

**[[2-1-5-10]]**

य एवं वेद।
तस्य त्वैव हुतम्।
सायंयावानश्च वै देवाः प्रातर्यावाणश्चाग्निहोत्रिणो
गृहमागच्छन्ति।
तान्यन्न तर्पयेत्।
प्रजयाऽस्य पशुभिर्वितिष्ठेरन्।
यत्तर्पयेत्।
तृप्ता एनं प्रजया पशुभिस्तर्पयेयुः।
सजूर्देवैः सायंयावभिरिति सायꣳ संमृशति।
सजूर्देवैः प्रातर्यावभिरिति प्रातः।
ये चैव देवाः सायंयावानो ये च प्रातर्या वाणः॥ १०॥

((ya evaṃ vedá I
tasya tvéva hutam I
sāyaṃyāvánaśca vai devāḥ
prátaryāváṇaścāgnihotriṇó gṛhamāgácchanti I
tānyanna tarpayĕt I
prajayä̆'sya paśubhirvitiṣṭheran I
yattarpayĕt I
tṛptā énaṃ prajayá paśubhístarpayeyuḥ I
sajūrdevaiḥ sāyaṃyāvábhirití sāyam̐ saṃmṛśati I
sajūrdevaiḥ prātaryāvábhirití prātaḥ I
ye caiva devāḥ sáyaṃyāváno ye cá prātaryā váṇaḥ II
10 II))

**[[2-1-5-11]]**

तानेवोभयाꣳस्तर्पयति।
त एनं तृप्ताः प्रजया पशुभिस्तर्पयन्ति।
अरुणो ह स्माहौपवेशिः।
अग्निहोत्र एवाहꣳ सायं प्रातर्वज्रं भ्रातृव्येभ्यः प्रहरामि।
तस्मान्मत्पापीयाꣳसो भ्रातृव्या इति।
चतुरुन्नयति।
द्विर्जुहोति।
समित्सप्तमी।
सप्तपदा शक्वरी।
शाक्वरो वज्रः।
अग्निहोत्र एव तत्सायं प्रातर्वज्रं यजमानो भ्रातृव्याय
प्रहरति।
भवत्यात्मना।
पराऽस्य भ्रातृव्यो भवति॥ ११॥
बर्हिः प्रातर्हुताद्याय जायते रुन्धेऽसामा करोत्येता वा
अग्निहोत्रस्योपसदो वषट्कारश्च प्रातर्यावाणो वज्रस्त्रीणि
च॥ ५॥

((tānevobhayām̐starpayati I
ta énaṃ tṛptāḥ prajayá paśubhístarpayanti I
aruṇo há smāhaupáveśiḥ I
agnihotra evāham̐ sāyaṃ prátarvajraṃ
bhrātṛvyebhyaḥ prahárāmi I
tasmānmatpāpíyām̐so bhrātṛvyā ití I
caturunnáyati I
dvirjúhoti I
samitsáptamī I
saptapádā śakvárī I
śákvaro vajráḥ I
agnihotra eva tatsāyaṃ prátarvajraṃ yajámāno
bhrātṛvyāya prahárati I
bhavátyātmanä̆ I
parä̆'sya bhrātṛvyo bhavati II 11 II
barhiḥ prātarhutādyáya jāyate rundhe'sāmā
károtyetā vā ágnihotrasyópasadó vaṣaṭkāraścá
prātaryāváṇo vajrastrīṇí ca II 5 II))

**[[2-1-6-1]]**

प्रजापतिरकामयतात्मन्वन्मे जायेतेति।
सोऽजुहोत्।
तस्यात्मन्वदजायत।
अग्निर्वायुरादित्यः।
तेऽब्रुवन्।
प्रजापतिरहौषीदात्मन्वन्मे जायेतेति।
तस्य वयमजनिष्महि।
जायतां न आत्मन्वदिति तेऽजुहवुः।
प्राणानामग्निः।
तनुवै वायुः॥ १॥

((pra̱jāpa̍tirakāmayatātma̱nvanme̍ jāye̱teti̍ |
so̍'juhot|
tasyā̎tma̱nvada̍jāyata |
a̱gnirvā̱yurā̍di̱tyaḥ |
te̎'bruvan|
pra̱jāpa̍tirahauṣīdātma̱nvanme̍ jāye̱teti̍ |
tasya̍ va̱yama̍janiṣmahi |
jāya̍tām na ātma̱nvaditi̱ te̍'juhavuḥ |
prā̱ṇānā̍ma̱gniḥ |
ta̱nuvai̍ vā̱yuḥ || 1 ||))

**[[2-1-6-2]]**

चक्षु॑ष आदि॒त्यः ।
तेषाꣳ॑ हु॒ताद॑जायत॒ गौरे॒व ।
तस्यै॒ पय॑सि॒ व्याय॑च्छन्त ।
मम॑ हु॒ताद॑जनि॒ ममेति॑ ।
ते प्र॒जाप॑तिं प्र॒श्नमा॑यन् ।
स आ॑दि॒त्यो᳚ऽग्निम॑ब्रवीत् ।
य॒त॒रो नौ॒ जया᳚त् ।
तन्नौ॑ स॒हास॒दिति॑ ।
कस्यैकोऽहौ॑षी॒दिति॑ प्र॒जाप॑तिरब्रवी॒त्कस्यै क॒ इति॑ ।
प्रा॒णाना॑म॒हमित्य॒ग्निः ॥ २ ॥

((cakṣu̍ṣa ādi̱tyaḥ |
teṣā̍m̐ hu̱tāda̍jāyata̱ gaure̱va |
tasyai̱ paya̍si̱ vyāya̍cchanta |
mama̍ hu̱tāda̍jani̱ mameti̍ |
te pra̱jāpa̍tiṃ pra̱śnama̍yan |
sa ā̍di̱tyo̎'gnima̍bravīt |
ya̱ta̱ro nau̱ jayā̎t |
tannau̍ sa̱hāsa̱diti̍ |
kasyaiko'hau̍ṣī̱diti̍ pra̱jāpa̍tirabravī̱tkasyai ka̱ iti̍ |
prā̱ṇānā̍ma̱hamitya̱gniḥ || 2 ||))

**[[2-1-6-3]]**

त॒नुवा॑ अ॒हमिति॑ वा॒युः ।
चक्षु॑षो॒ऽहमित्या॑दि॒त्यः ।
य ए॒व प्रा॒णाना॒महौ॑षीत् ।
तस्य॑ हु॒ताद॑ज॒नीति॑ ।
अ॒ग्नेर्हु॒ताद॑ज॒नीति॑ ।
तद॑ग्निहो॒त्रस्या᳚ग्निहोत्र॒त्वम् ।
गौर्वा आ॑ग्निहो॒त्रम् ।
य ए॒वं वेद॒ गौर॑ग्निहो॒त्रमिति॑ ।
प्रा॒णा॒पा॒नाभ्या॑मे॒वाग्निꣳ॑ सम॑र्धयति ।
अव्य॑र्धुकः प्राणापा॒नाभ्या᳚ं भवति ॥ ३ ॥

((ta̱nuvā̍ a̱hamiti̍ vā̱yuḥ |
cakṣu̍ṣo̱'hamityā̍di̱tyaḥ |
ya e̱va prā̱ṇānā̱mahau̍ṣīt |
tasya̍ hu̱tāda̍ja̱nīti̍ |
a̱gnerhu̱tāda̍ja̱nīti̍ |
tada̍gniho̱trasyā̎gnihotra̱tvam |
gaurvā ā̍gniho̱tram |
ya e̱vaṃ veda̱ gaura̍gniho̱tramiti̍ |
prā̱ṇā̱pā̱nābhyā̍me̱vāgnim̐̍ sama̍rdhayati |
avya̍rdhukaḥ prāṇāpā̱nābhyā̎ṃ bhavati || 3 ||))

**[[2-1-6-4]]**

य ए॒वं वेद॑ ।
तौ वा॒युर॑ब्रवीत् ।
अ॒नु मा भ॑जत॒मिति॑ ।
यदे॒व गार्ह॑पत्येऽधि॒श्रित्या॑ह॒वनीय॑म॒भ्यु॑द्द्रवा॒न् ।
तेन॒ त्वां प्रीणा॒नित्य॑ब्रूताम् ।
तस्मा॒द्यद्गार्ह॑पत्येऽधि॒श्रित्या॑ह॒वनीय॑म॒भ्यु॑द्द्रव॑ति ।
वा॒युमे॒व तेन॑ प्रीणाति ।
प्र॒जाप॑तिर्दे॒वताः᳚ सृ॒जमा॑नः ।
अ॒ग्निमे॒व दे॒वता॑नां प्रथ॒मम॑सृजत ।
सो᳚ऽन्यदा॑ल॒म्भ्य॑मवि॑त्त्वा ॥ ४ ॥

((ya e̱vaṃ veda̍ |
tau vā̱yura̍bravīt |
anu̱ mā bha̍jata̱miti̍ |
yade̱va
gārha̍patye'dhi̱śrityā̍hava̱nīya̍ma̱bhyu̍ddravā̍n |
tena̱ tvāṃ prī̍ṇā̱nitya̍brūtām |
tasmā̱dyadgārha̍patye'dhi̱śrityā̍hava̱nīya̍ma̱bhyu̍ddr
ava̍ti |
vāyume̱va tena̍ prīṇāti |
pra̱jāpa̍tirde̱vatā̎ḥ sṛ̱jamā̍naḥ |
a̱gnime̱va de̱vatā̍nāṃ pratha̱mama̍sṛjata |
so̎'nyadā̍la̱mbhya̍mavi̍ttvā || 4 ||))

**[[2-1-6-5]]**

प्र॒जाप॑तिम॒भिप॒र्याव॑र्तत ।
स मृ॒त्योर॑बिभेत् ।
सो॑ऽमुमा॑दि॒त्यमा॒त्मनो॒ निर॑मिमीत ।
तꣳ हु॒त्वा परा॒ङ् प॒र्याव॑र्तत ।
तत॒ो वै स मृ॒त्युमपा॑जयत् ।
अप॑मृ॒त्युं ज॑यति ।
य ए॒वं वेद॑ ।
तस्मा॒द्यस्यै॒वं वि॒दुषः॑ ।

उ॒तैका॑हमु॒त द्व्य॒हं न जु॑ह्वति।

हु॒तमे॒वास्य॑ भवति।

अ॒सौ ह्या॑दि॒त्यो॑ऽग्निहो॒त्रम्॥ ५॥

त॒नुवै॑ वा॒युर॒ग्निर्भ॑व॒त्यवि॑त्त्वा भव॒त्येकं॑ च॥ ६॥

((pra̱jāpa̍tima̱bhipa̱ryāva̍rtata ।
sa mṛ̱tyora̍bibhet ।
so̍'mumā̍di̱tyamā̱tmano̱ nira̍mimīta ।
tam̐ hu̱tvā parā̎ṅ pa̱ryāva̍rtata ।
tato̱ vai sa mṛ̱tyumapā̍jayat ।
apa̍mṛ̱tyuṃ ja̍yati ।
ya e̱vaṃ veda̍ ।
tasmā̱dyasyai̱vaṃ vi̱duṣa̍ḥ ।
u̱taikā̱hamu̱ta dvaya̱haṃ na juhva̍ti ।
hu̱tame̱vāsya̍ bhavati ।
a̱sau hyā̍di̱tyo̎'gniho̱tram ॥ 5 ॥
ta̱nuvai̍ vā̱yura̱gnirbha̍va̱tyavi̍ttvā bhava̱tyekaṃ̍ ca ॥ 6 ॥))

**[[2-1-7-1]]**

रौ॒द्रं गवि॑।

वा॒य॒व्य॑मु॒प॑सृष्टम्।

आ॒श्विनं॑ दु॒ह्यमा॑नम्।

सौ॒म्यं दु॒ग्धम्।

वा॒रु॒णमधि॑श्रितम्।

वै॒श्व॒दे॒वा भि॒न्द॒वः॑।

पौ॒ष्णमु॒द॑न्तम्।

सा॒र॒स्व॒तं वि॒ष्यन्द॑मानम्।

मै॒त्रꣳ शरः॑।

धा॒तुरुद्वा॑सितम्।

बृ॒ह॒स्पते॒रुन्नी॑तम्।

स॒वि॒तुः प्रक्रा॑न्तम्।

द्या॒वा॒पृ॒थि॒व्यꣳ॑ ह्रि॒यमा॑णम्।

ऐ॒न्द्रा॒ग्नमु॒प॑सन्नम्।

अ॒ग्नेः पूर्वा॒ऽऽहु॑तिः।

प्र॒जाप॑ते॒रुत्त॑रा।

ऐ॒न्द्रꣳ हु॒तम्॥ १॥

उद्वा॑सितꣳ स॒प्त च॑॥ ७॥

((rau̱draṃ gavi̍ ।
vā̱ya̱vya̍mupa̍sṛ̱ṣṭam ।
ā̱śvi̱naṃ du̱hyamā̍nam ।
sau̱myaṃ du̱gdham ।
vā̱ru̱ṇamadhi̍śritam ।
vai̱śva̱de̱vā bhi̱ndava̍ḥ ।
pau̱ṣṇamu̱da̍ntam ।
sā̱ra̱sva̱taṃ vi̱ṣyanda̍mānam ।
mai̱tram̐ śara̍ḥ ।
dhā̱turudvā̍sitam ।
bṛ̱ha̱spate̱runnī̍tam ।
sa̱vi̱tuḥ prakrā̎ntam ।
dyā̱vā̱pṛ̱thi̱vyam̐̍ hri̱yamā̍ṇam ।
ai̱ndrā̱gnamupa̍sannam ।
a̱gneḥ pūrvā''hu̍tiḥ ।
pra̱jāpa̍te̱rutta̍rā ।
ai̱ndram̐ hu̱tam ॥ 1 ॥
udvā̍sitam̐ sa̱pta ca̍ ॥ 7 ॥))

**[[2-1-8-1]]**

द॒क्षि॒ण॒त उ॒प॑सृजति।

पि॒तृ॒लो॒कमे॒व तेन॑ जयति।

प्रा॒ची॒माव॑र्तयति।

दे॒व॒लो॒कमे॒व तेन॑ जयति।

उदी॑चीमा॒वृत्य॑ दोग्धि।

म॒नु॒ष्य॒लो॒कमे॒व तेन॑ जयति॥

पूर्वौ॑ दुह्याज्ज्ये॒ष्ठस्य॑ ज्यैष्ठि॒ने॒यस्य॑।

यो वा॑ ग॒तश्री॒ः स्यात्।

अप॑रौ दुह्यात्कनि॒ष्ठस्य॑ कानिष्ठि॒ने॒यस्य॑।

यो वा॒ बुभू॑षेत्॥ १॥

((da̱kṣi̱ṇa̱ta upa̍sṛjati ।
pi̱tṛ̱lo̱kame̱va tena̍ jayati ।
prā̱cī̱māva̍rtayati ।
de̱va̱lo̱kame̱va tena̍ jayati ।
udi̍cīmā̱vṛtya̍ dogdhi ।
ma̱nu̱ṣya̱lo̱kame̱va tena̍ jayati ॥
pūrvau̍ duhyājjye̱ṣṭhasya̍ jyaiṣṭhine̱yasya̍ ।
yo vā̍ ga̱taśrī̱ḥ syāt ।
apa̍rau duhyātkani̱ṣṭhasya̍ kāniṣṭhine̱yasya̍ ।
yo vā̱ bubhū̍ṣet ॥ 1 ॥))

**[[2-1-8-2]]**

न संमृ॑शति।

पा॒प॒व॒स्य॒स॒स्य॒ व्यावृ॑त्त्यै।

वा॒य॒व्यं॑ वा ए॒तदु॒प॑सृष्टम्।

आ॒श्विनं॑ दु॒ह्यमा॑नम्।

मै॒त्रं दु॒ग्धम्।

अ॒र्य॒म्ण उ॑द्वा॒स्यमा॑नम्।

त्वा॒ष्ट्रमु॑न्नी॒यमा॑नम्।

बृ॒ह॒स्पते॒रुन्नी॑तम्।

स॒वि॒तुः प्रक्रा॑न्तम्।
द्या॒वा॒पृ॒थि॒व्यꣳ॑ ह्रि॒यमा॑णम्॥ २॥

((na saṃmṛ̱śati ।
pā̱pa̱va̱sya̱sasya̱ vyāvṛ̍ttyai ।
vā̱ya̱vyaṃ̍ vā e̱tadupa̍sṛ̱ṣṭam ।
ā̱śvi̱naṃ du̱hyamā̍nam ।
mai̱traṃ du̱gdham ।
a̱rya̱mṇa u̍dvā̱syamā̍nam ।
tvā̱ṣṭramu̍nnī̱yamā̍nam ।
bṛ̱ha̱spate̱runnī̍tam ।
sa̱vi̱tuḥ prakrā̎ntam ।
dyā̱vā̱pṛ̱thi̱vyam̐̎ hri̱yamā̍ṇam ॥ 2 ॥))

**[[2-1-8-3]]**

ऐ॒न्द्रा॒ग्नमु॒प॑सादितम्।
सर्वा॑भ्यो॒ वा ए॒ष दे॒वता॑भ्यो जुहोति।
यो॑ऽग्निहो॒त्रं जु॒होति॑।
यथा॒ खलु॒ वै धे॒नुं ती॒र्थे त॒र्पय॑ति।
ए॒वम॑ग्निहो॒त्री यज॑मानं तर्पयति।
तृप्य॑ति प्र॒जया॑ प॒शुभि॑ः।
प्र सु॑व॒र्गं लो॒कं जा॑नाति।
पश्य॑ति पु॒त्रम्।
पश्य॑ति॒ पौत्र॑म्।
प्र प्र॒जया॑ प॒शुभि॑र्मिथु॒नैर्जा॑यते।
यस्यै॒वंवि॒दुषो॑ऽग्निहो॒त्रं जुह्व॑ति।
य उ॑ चैनदे॒वं वेद॑॥ ३॥
बु॒भू॒र्द्ध्रि॒यमा॑णं जायते॒ द्वे च॑॥ ८॥

((ai̱ndrā̱gnamu̱pa̍sāditam ।
sarvā̎bhyo̱ vā e̱ṣa de̱vatā̎bhyo juhoti ।
yo̎'gniho̱traṃ ju̱hoti̍ ।
yathā̱ khalu̱ vai dhe̱nuṃ tī̱rthe ta̱rpaya̍ti ।
e̱vama̍gniho̱trī yaja̍mānaṃ tarpayati ।
tṛ̱pya̍ti pra̱jayā̍ pa̱śubhi̍ḥ ।
pra su̍va̱rgaṃ lo̱kaṃ jā̍nāti ।
paśya̍ti pu̱tram ।
paśya̍ti̱ pautrā̎m ।
pra pra̱jayā̍ pa̱śubhi̍rmithu̱nairjā̍yate ।
yasyai̱vaṃvi̱duṣo̎'gniho̱traṃ juhva̍ti ।
ya u̍ cainade̱vaṃ veda̍ ॥ 3 ॥
bubhū̎ddhri̱yamā̎ṇaṃ jāyate̱ dve ca̍ ॥ 8 ॥))

**[[2-1-9-1]]**

त्रयो॒ वै प्रैय॑मे॒धा आ॑सन्।
तेषां॒ त्रिरेको॑ऽग्निहो॒त्रम॑जुहोत्।
द्विरेक॑ः।
स॒कृदेक॑ः।
तेषां॒ यस्त्रिर॑जुहोत्।
स ऋ॒चाऽजु॑होत्।
यो द्विः।
स यजु॑षा।
यः स॒कृत्।
स तू॒ष्णीम्॥ १॥

((trayo̱ vai prai̍yame̱dhā ā̍san ।
teṣā̱ṃ trireko̎'gniho̱trama̍juhot ।
dvireka̍ḥ ।
sa̱kṛdeka̍ḥ ।
teṣā̱ṃ yastriraju̍hot ।
sa ṛ̱cā'ju̍hot ।
yo dviḥ ।
sa yaju̍ṣā ।
yaḥ sa̱kṛt ।
sa tū̱ṣṇīm ॥ 1 ॥))

**[[2-1-9-2]]**

यश्च॒ यजु॒षाऽजु॑हो॒द्यश्च॑ तू॒ष्णीम्।
तावु॒भावा॑र्ध्नुताम्।
तस्मा॒द्यजु॒षाऽऽहु॑ति॒ः पूर्वा॑ होत॒व्या॑।
तू॒ष्णीमुत्त॑रा।
उ॒भे ए॒वर्द्धी अव॑रुन्धे।
अ॒ग्निर्ज्योति॒र्ज्योति॑र॒ग्निः स्वाहेति॑ सा॒यं जु॑होति।
रेत॑ ए॒व तद्द॑धाति।
सूर्यो॒ ज्योति॒र्ज्योति॑ः सू॒र्य॑ः स्वाहेति॑ प्रा॒तः।
रेत॑ ए॒व हि॒तं प्रज॑नयति।
रेतो॒ वा ए॒तस्य॑ हि॒तं न प्रजा॑यते॥ २॥

((yaśca̱ yaju̱ṣā'ju̍ho̱dyaśca̍ tū̱ṣṇīm ।
tāvu̱bhāvā̎rdhnutām ।
tasmā̱dyaju̱ṣā''hu̍ti̱ḥ pūrvā̍ hota̱vyā̎ ।
tū̱ṣṇīmutta̍rā ।
u̱bhe e̱varddhī ava̍rundhe ।
a̱gnirjyoti̱rjyoti̍ra̱gniḥ svāheti̍ sā̱yaṃ ju̍hoti ।
reta̍ e̱va tadda̍dhāti ।
sūryo̱ jyoti̱rjyoti̱ḥ sūrya̱ḥ svāheti̍ prā̱taḥ ।
reta̍ e̱va hi̱taṃ praja̍nayati ।
reto̱ vā e̱tasya̍ hi̱taṃ na prajā̍yate ॥ 2 ॥))

**[[2-1-9-3]]**

यस्या॑ग्निहो॒त्रमहु॑त॒ꣳ॒ सूर्यो॑ऽभ्यु॒देति॑।
यद्य॒न्ते स्या॒त्।

उ॒न्नीय॒ प्राङु॒दाद्र॑वेत्।
स उ॑प॒साद्यातमि॑तोरासीत।
स य॒दा ताम्ये᳚त्।
अथ॒ भूः स्वाहेति॑ जुहुयात्।
प्र॒जाप॑ति॒र्वै भू॒तः।
तमे॒वोपा॑सरत्।
स ए॒वैनं॑ तत॒ उन्न॑यति।
नार्ति॒माच्छ॑ति॒ यज॑मानः॥ ३॥
तू॒ष्णीं जा॑यते॒ यज॑मानः॥ ९॥

((yasyā̎gnihọtramahu̍tạm̐ sūryọ'bhyu̍deti̍ |
yadyantẹ syāt |
ụnnīyạ prāṅụdādra̍vet |
sa u̍pạsādyātami̍torāsīta |
sa yạdā tāmye̎t |
athạ bhūḥ svāheti̍ juhuyāt |
prạjāpa̍tịrvai bhụ̄taḥ |
tamẹvopa̍sarat |
sa ẹvainaṃ̍ tatạ unna̍yati |
nārtịmārccha̍tị yaja̍mānaḥ || 3 ||
tụ̄ṣṇīṃ ja̍yatẹ yaja̍mānaḥ || 9 ||))

**[[2-1-9-1]]**

त्र॒यो॒ वै प्रै॑यमे॒धा आ॑सन्।
तेषां॒ त्रिरेकों᳚ऽग्निहो॒त्रम॑जुहोत्।
द्विरेकः॑।
स॒कृदेकः॑।
तेषां॒ यस्त्रिर॑जुहोत्।
स ऋ॒चाऽजु॑होत्।
यो द्विः।
स यजु॑षा।
यः स॒कृत्।
स तू॒ष्णीम्॥ १॥

((trayọ vai prai̍yamẹdhā a̍san |
teṣāṃ̱ trirekö'gnihọtrama̍juhot |
dvireka̍ḥ |
sạkṛdeka̍ḥ |
teṣāṃ̱ yastriraju̍hot |
sa ṛ̱cā'ju̍hot |
yo dviḥ |
sa yaju̍ṣā |
yaḥ sạkṛt |
sa tụ̄ṣṇīm || 1 ||))

**[[2-1-9-2]]**

यश्च॒ यजु॒षाऽजु॑हो॒द्यश्च॑ तू॒ष्णीम्।
ताव॒भावा᳚र्ध्नुताम्।
तस्मा॑द्यजु॒षाऽऽहु॑ति॒ः पूर्वा॑ हो॒तव्या᳚।
तू॒ष्णीमुत्त॑रा।
उ॒भे ए॒वर्द्धी अव॑रुन्धे।
अ॒ग्निर्ज्योति॒र्ज्योति॑र॒ग्निः स्वाहेति॑ सा॒यं जु॑होति।
रेत॑ ए॒व तद्द॑धाति।
सूर्यो॒ ज्योति॒र्ज्योति॑ः सूर्य॒ः स्वाहेति॑ प्रा॒तः।
रेत॑ ए॒व हि॒तं प्रज॑नयति।
रेतो॒ वा ए॒तस्य॑ हि॒तं न प्रजा॑यते॥ २॥

((yaśca̱ yaju̱ṣā'ju̍ho̱dyaśca̍ tū̱ṣṇīm |
tāvụbhāva̎rdhnutām |
tasmā̱dyaju̱ṣā''hu̍ti̱ḥ pūrva̍ hota̱vya̎ |
tū̱ṣṇ̱īmuttara̍ |
ụbhe ẹvarddhī ava̍rundhe |
ạgnirjyotịrjyoti̍rạgniḥ svāheti̍ sạ̄yaṃ ju̍hoti |
reta̍ ẹva tadda̍dhāti |
sūryọ jyotịrjyotịḥ sūryạḥ svāheti̍ prạ̄taḥ |
reta̍ ẹva hịtaṃ praja̍nayati |
retọ vā ẹtasya̍ hịtaṃ na praja̍yate || 2 ||))

**[[2-1-9-3]]**

यस्या᳚ग्निहो॒त्रमहु॑त॒ꣳ सूर्यो॒ऽभ्यु॑देति॑।
यद्यन्ते॒ स्यात्।
उ॒न्नीय॒ प्राङु॒दाद्र॑वेत्।
स उ॑प॒साद्यातमि॑तोरासीत।
स य॒दा ताम्ये᳚त्।
अथ॒ भूः स्वाहेति॑ जुहुयात्।
प्र॒जाप॑ति॒र्वै भू॒तः।
तमे॒वोपा॑सरत्।
स ए॒वैनं॑ तत॒ उन्न॑यति।
नार्ति॒माच्छ॑ति॒ यज॑मानः॥ ३॥
तू॒ष्णीं जा॑यते॒ यज॑मानः॥ ९॥

((yasyā̎gnihọtramahu̍tạm̐ sūryọ'bhyu̍deti̍ |
yadyantẹ syāt |
ụnnīyạ prāṅụdādra̍vet |
sa u̍pạsādyātami̍torāsīta |
sa yạdā tāmye̎t |
athạ bhūḥ svāheti̍ juhuyāt |
prạjāpa̍tịrvai bhụ̄taḥ |
tamẹvopa̍sarat |
sa ẹvainaṃ̍ tatạ unna̍yati |
nārtịmārccha̍tị yaja̍mānaḥ || 3 ||

tū̱ṣṇīm jā̍yate̱ yaja̍mānaḥ ॥ 9 ॥))

**[[2-1-10-1]]**

य॒द॒ग्निमु॒द्धर॑ति।
वस॑व॒स्तर्ह्य॒ग्निः।
तस्मि॒न्यस्य॒ तथा॑विधे॒ जुह्व॑ति।
वसु॑ष्वे॒वास्या॒ग्निहो॒त्रꣳ हु॒तं भ॑वति।
निहि॑तो धूपा॒यञ्छे॑ते।
रु॒द्रास्तर्ह्य॒ग्निः।
तस्मि॒न्यस्य॒ तथा॑विधे॒ जुह्व॑ति।
रु॒द्रेष्वे॒वास्या॒ग्निहो॒त्रꣳ हु॒तं भ॑वति।
प्र॒थ॒मामि॒ध्मम॒र्चिराल॑भते।
आ॒दि॒त्यास्तर्ह्य॒ग्निः॥ १॥

((yada̱gnimu̱ddhara̍ti ।
vasa̍va̱starhya̱gniḥ ।
tasmi̱nyasya̱ tathā̍vidhe̱ juhva̍ti ।
vasu̍ṣve̱vāsyā̱gniho̱traṁ hu̱taṃ bha̍vati ।
nihi̍to dhūpā̱yañche̍te ।
ru̱drāstarhya̱gniḥ ।
tasmi̱nyasya̱ tathā̍vidhe̱ juhva̍ti ।
ru̱dreṣve̱vāsyā̱gniho̱traṁ hu̱taṃ bha̍vati ।
pra̱tha̱mami̱dhmama̱rcirāla̍bhate ।
ā̱di̱tyāstarhya̱gniḥ ॥ 1 ॥))

**[[2-1-10-2]]**

तस्मि॒न्यस्य॒ तथा॑विधे॒ जुह्व॑ति।
आ॒दि॒त्येष्वे॒वास्या॒ग्निहो॒त्रꣳ हु॒तं भ॑वति।
सर्वं॑ ए॒व सर्व॑श इ॒ध्म आदी॑प्तो भवति।
विश्वे॑ दे॒वास्तर्ह्य॒ग्निः।
तस्मि॒न्यस्य॒ तथा॑विधे॒ जुह्व॑ति।
विश्वे॑ष्वे॒वास्य॑ दे॒वेष्व॒ग्निहो॒त्रꣳ हु॒तं भ॑वति।
नि॒तरा॑म॒र्चिरु॒पावै॑ति लोहि॒नीके॑व भवति।
इन्द्र॒स्तर्ह्य॒ग्निः।
तस्मि॒न्यस्य॒ तथा॑विधे॒ जुह्व॑ति।
इन्द्र॑ ए॒वास्या॒ग्निहो॒त्रꣳ हु॒तं भ॑वति॥ २॥

((tasmi̱nyasya̱ tathā̍vidhe̱ juhva̍ti ।
ā̱di̱tyeṣve̱vāsyā̱gniho̱traṁ hu̱taṃ bha̍vati ।
sarva̍ e̱va sarva̍śa i̱dhma ādī̍pto bhavati ।
viśve̍ de̱vāstarhya̱gniḥ ।
tasmi̱nyasya̱ tathā̍vidhe̱ juhva̍ti ।
viśve̍ṣve̱vāsya̍ de̱veṣva̱gniho̱traṁ hu̱taṃ bha̍vati ।
ni̱tarā̍ma̱rciru̱pāvai̍ti lohi̱nīke̍va bhavati ।
indra̱starhya̱gniḥ ।
tasmi̱nyasya̱ tathā̍vidhe̱ juhva̍ti ।
indra̍ e̱vāsyā̱gniho̱traṁ hu̱taṃ bha̍vati ॥ 2 ॥))

**[[2-1-10-3]]**

अङ्गा॑रा भवन्ति।
तेभ्यो॒ऽङ्गा॑रेभ्यो॒ऽर्चिरु॒दे॑ति।
प्र॒जाप॑ति॒स्तर्ह्य॒ग्निः।
तस्मि॒न्यस्य॒ तथा॑विधे॒ जुह्व॑ति।
प्र॒जाप॑तावे॒वास्या॒ग्निहो॒त्रꣳ हु॒तं भ॑वति॥
शरो॒ऽङ्गा॑रा॒ अध्यू॑हन्ते।
ब्रह्म॒ तर्ह्य॒ग्निः।
तस्मि॒न्यस्य॒ तथा॑विधे॒ जुह्व॑ति।
ब्रह्म॑न्ने॒वास्या॒ग्निहो॒त्रꣳ हु॒तं भ॑वति।
वसु॑षु रु॒द्रेष्वा॑दि॒त्येषु॒ विश्वे॑षु दे॒वेषु॑।
इन्द्रे॑ प्र॒जाप॑तौ॒ ब्रह्म॑न्।
अप॑रिवर्गमे॒वास्यै॒तासु॑ दे॒वता॑सु हु॒तं भ॑वति।
यस्यै॒वं वि॒दुषो॒ऽग्निहो॒त्रं जुह्व॑ति।
य उ॑ चैनदे॒वं वेद॑॥ ३॥
आ॒दि॒त्यास्तर्ह्य॒ग्निरिन्द्र॑ ए॒वास्या॒ग्निहो॒त्रꣳ हु॒तं भ॑वति दे॒वेषु॑ च॒त्वारि॑ च॥ १०॥

((aṅgā̍rā bhavanti ।
tebhyo'ṅgā̍rebhyo̱'rcirude̍ti ।
pra̱jāpa̍ti̱starhya̱gniḥ ।
tasmi̱nyasya̱ tathā̍vidhe̱ juhva̍ti ।
pra̱jāpa̍tāve̱vāsyā̱gniho̱traṁ hu̱taṃ bha̍vati ॥
śaro'ṅgā̍rā̱ adhyū̍hante ।
brahma̱ tarhya̱gniḥ ।
tasmi̱nyasya̱ tathā̍vidhe̱ juhva̍ti ।
brahma̍nne̱vāsyā̱gniho̱traṁ hu̱taṃ bha̍vati ।
vasu̍ṣu ru̱dreṣvā̍di̱tyeṣu̱ viśve̍ṣu de̱veṣu̍ ।
indre̍ pra̱jāpa̍tau̱ brahma̍n ।
apa̍rivargame̱vāsyai̱tāsu̍ de̱vatā̍su hu̱taṃ bha̍vati ।
yasyai̱vaṃ vi̱duṣo̍'gniho̱traṃ juhva̍ti ।
ya u̍ cainade̱vaṃ veda̍ ॥ 3 ॥
ā̱di̱tyāstarhya̱gnirindra̍ e̱vāsyā̱gniho̱traṁ hu̱taṃ bha̍vati de̱veṣu̍ ca̱tvāri̍ ca ॥ 10 ॥))

**[[2-1-11-1]]**

ऋ॒तं त्वा॑ स॒त्येन॒ परि॑षिञ्चामीति॒ सा॒यं परि॑षिञ्चति।
स॒त्यं त्व॒र्तेन॒ परि॑षिञ्चामीति॒ प्रा॒तः।
अ॒ग्निर्वा॑ ऋ॒तम्।
अ॒सावा॑दि॒त्यः स॒त्यम्।
अ॒ग्निमे॒व तदा॑दि॒त्येन॑ सा॒यं परि॑षिञ्चति।

अ॒ग्निना॑ऽऽदि॒त्यं प्रा॒तः सः।
याव॑दहोरा॒त्रे भव॑तः।
ताव॑दस्य लो॒कस्य॑।
नार्ति॒र्न रिष्टि॑ः।
नान्तो॒ न प॑र्य॒न्तो᳚ऽस्ति।
यस्यै॒वंवि॒दुषो᳚ऽग्निहो॒त्रं जुह्व॑ति।
य उ॑ चैनदे॒वं वेद॑॥ १॥
अ॒स्ति॒ द्वे च॑॥ ११॥
अङ्गि॑रसः प्र॒जाप॑तिर॒ग्निꣳ रु॒द्र उ॑त्त॒राव॑तीं
ब्रह्मवा॒दिनो᳚ऽग्निहो॒त्रप्रा॑यणा य॒ज्ञाः
प्र॒जाप॑तिरकामय॑तात्म॒न्वद्रौ॒द्रं गवि॑ दक्षि॒णतस्त्रयो॒ वै
यद॒ग्निमृ॒तं त्वा स॒त्येनैका॑दश॥ ११॥
अङ्गि॑रस॒ः प्रैव तेन॑ प॒शूने॒व यन्नि॒मार्ष्टि॒ यो वा
अ॑ग्निहो॒त्रस्यो॑प॒सदो॑ दक्षि॒णतष्षा॑ष्टिः॥ ६०॥

((r̥̱taṃ tvȧ̍ sa̱tyena̱ pari̍ṣiñcā̱mīti̍ sā̱yaṃ pari̍ṣiñcati ।
sa̱tyaṃ tva̱rtena̱ pari̍ṣiñcā̱mīti̍ prā̱taḥ ।
a̱gnirvā r̥̱tam ।
a̱sāvȧ̍di̱tyaḥ sa̱tyam ।
a̱gnime̱va tadȧ̍di̱tyenȧ sāyaṃ pari̍ṣiñcati ।
a̱gninȧ̍''di̱tyaṃ prā̱taḥ saḥ ।
yāvȧdahorā̱tre bhavȧtaḥ ।
tāvȧdasya lo̱kasyȧ ।
nārti̱rna riṣṭi̍ḥ ।
nānto̱ na pȧrya̱ntȍ'sti ।
yasyai̱vaṃvi̱duṣȍ'gniho̱traṃ juhvȧti ।
ya u̇ cainade̱vaṃ vedȧ ॥ 1 ॥
a̱sti̱ dve cȧ ॥ 11 ॥
aṅgi̍rasaḥ pra̱jāpȧtira̱gnim̐ ru̱dra u̇tta̱rāvȧtīm
brahmavā̱dinȍ'gniho̱traprǡyaṇā ya̱jñāḥ
pra̱jāpȧtirakāmayȧtātma̱nvadrau̱draṃ gavi̍
dakṣiṇ̱atastrayo̱ vai yada̱gnimr̥̱taṃ tvā
sa̱tyenaikǡdaśa ॥ 11 ॥
aṅgi̍rasa̱ḥ praiva tenȧ pa̱śūne̱va yanni̱mārṣṭi̱ yo vā
ȧgniho̱trasyȯpa̱sadȯ dakṣiṇ̱ataṣṣȧṣṭiḥ ॥ 60 ॥))

# Taittirīya-Brāhmaṇa

# Book 2, Chapter 2

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[2-2-1-1]]**

प्र॒जाप॑तिरकामयत प्र॒जाः सृ॒जे॒येति॑ ।
स ए॒तं दश॑होतारमपश्यत् ।
तं मन॑सा॒ऽनु॒द्रुत्य॑ द॒र्भस्त॒म्बे॑ऽजुहोत् ।
ततो॒ वै स प्र॒जा अ॑सृजत ।
ता अ॑स्मात्सृ॒ष्टा अपा᳚क्रामन् ।
ता ग्रहे॑णागृह्णात् ।
तद्ग्रह॑स्य ग्रह॒त्वम् ।
यः का॒मये॑त प्रजा॑ये॒येति॑ ।
स दश॑होतारं॒ मन॑सा॒ऽनु॒द्रुत्य॑ द॒र्भस्त॒म्बे जु॑हुयात् ।
प्र॒जाप॑ति॒र्वै दश॑होता ॥ १ ॥

((pra̱jāpa̍tirakāmayata pra̱jāḥ sṛ̱je̱yeti̍ |
sa e̱taṃ daśa̍hotāramapaśyat |
taṃ mana̍sā'nu̱drutya̍ darbhasta̱mbe̍'juhot |
tato̱ vai sa pra̱jā a̍sṛjata |
tā a̍smātsṛ̱ṣṭā apa̎krāman |
tā grahe̍ṇāgṛhṇāt |
tadgraha̍sya graha̱tvam |
yaḥ kā̱maye̍ta prajā̍ye̱yeti̍ |
sa daśa̍hotāra̱ṃ mana̍sā'nu̱drutya̍ darbhasta̱mbe ju̍huyāt |
pra̱jāpa̍ti̱rvai daśa̍hotā || 1 ||))

**[[2-2-1-2]]**

प्र॒जाप॑तिरे॒व भू॒त्वा प्रजा॑यते ।
मन॑सा जुहोति ।
मन॑ इ॒व हि प्र॒जाप॑तिः ।
प्र॒जाप॑ते॒राप्त्यै᳚ ।
पू॒र्णया॑ जुहोति ।
पू॒र्ण इ॑व हि प्र॒जाप॑तिः ।
प्र॒जाप॑ते॒राप्त्यै᳚ ।
न्यू॑नया जुहोति ।
न्यू॑ना॒द्धि प्र॒जाप॑तिः प्र॒जा अस॑सृजत ।
प्र॒जाना᳚ꣳ सृष्ट्यै᳚ ॥ २ ॥

((pra̱jāpa̍tire̱va bhū̱tvā prajā̍yate |
mana̍sā juhoti |
mana̍ i̱va hi pra̱jāpa̍tiḥ |
pra̱jāpa̍te̱rāptyai̎ |
pū̱rṇayā̍ juhoti |
pū̱rṇa i̍va hi pra̱jāpa̍tiḥ |
pra̱jāpa̍te̱rāptyai̎ |
nyū̍nayā juhoti |
nyū̍nā̱ddhi pra̱jāpa̍tiḥ pra̱jā asṛ̍jata |
pra̱jānā̱gm̐ sṛṣṭyai̎ || 2 ||))

**[[2-2-1-3]]**

द॒र्भस्त॒म्बे जु॑होति ।
ए॒तस्मा॒द्वै योने᳚ः प्र॒जाप॑तिः प्र॒जा अ॑सृजत ।
यस्मा॑दे॒व योने᳚ः प्र॒जाप॑तिः प्र॒जा अ॑सृजत ।
तस्मा॑दे॒व योने॒ः प्रजा॑यते ।
ब्रा॒ह्म॒णो द॑क्षिण॒त उपा᳚स्ते ।
ब्रा॒ह्म॒णो वै प्र॒जाना॑मुपद्र॒ष्टा ।
उ॒प॒द्र॒ष्टु॒मत्ये॒व प्रजा॑यते ।
ग्रहो॑ भवति ।
प्र॒जाना᳚ꣳ सृ॒ष्टाना॑ं धृत्यै᳚ ।
यं ब्रा᳚ह्म॒णं वि॒द्यां वि॒द्वाꣳस॒ं यशो॒ नर्च्छे᳚त् ॥ ३ ॥

((da̱rbha̱sta̱mbe ju̍hoti |
e̱tasmā̱dvai yone̎ḥ pra̱jāpa̍tiḥ pra̱jā a̍sṛjata |
yasmā̍de̱va yone̎ḥ pra̱jāpa̍tiḥ pra̱jā a̍sṛjata |
tasmā̍de̱va yone̱ḥ prajā̍yate |
brā̱hma̱ṇo da̍kṣiṇa̱ta upā̎ste |
brā̱hma̱ṇo vai pra̱jānā̍mupadra̱ṣṭā |
u̱pa̱dra̱ṣṭu̱matye̱va prajā̍yate |
graho̍ bhavati |
pra̱jānā̱gm̐ sṛ̱ṣṭānā̱ṃ dhṛtyai̎ |
yaṃ brā̎hma̱ṇaṃ vi̱dyāṃ vi̱dvāgm̐sa̱ṃ yaśo̱ narcchet || 3 ||))

**[[2-2-1-4]]**

सो॑ऽर॒ण्यं प॒रेत्य॑ ।
द॒र्भस्त॒म्बमु॒द्ग्रथ्य॑ ।
ब्रा॒ह्म॒णं द॑क्षिण॒तो नि॒षद्य॑ ।
च॒तु॒र्हो॑तॄन्व्याच॑क्षीत ।
ए॒तद्वै दे॒वाना᳚ं प॒र॒मं गुह्यं॒ ब्रह्म॑ ।
यच्च॒तु॒र्हो॑तारः ।
तदे॒व प्र॑का॒शं ग॑मयति ।
तदे॑नं॒ प्रका॒शं ग॒तम् ।
प्र॒का॒शं प्र॒जाना᳚ं गमयति ।

दर्भस्तम्बमुद्ग्रथ्य व्याचष्टे॥ ४॥

((so'raṇyaṃ paretya |
darbhastambamudgrathya |
brāhmaṇaṃ dakṣiṇato niṣadya |
caturhotṝnvyācakṣīta |
etadvai devānāṃ paramaṃ guhyaṃ brahma |
yaccaturhotāraḥ |
tadeva prakāśaṃ gamayati |
tadenaṃ prakāśaṃ gatam |
prakāśaṃ prajānāṃ gamayati |
darbhastambamudgrathya vyācaṣṭe || 4 ||))

**[[2-2-1-5]]**

अग्निवान्वै दर्भस्तम्बः।
अग्निवत्येव व्याचष्टे।
ब्राह्मणो दक्षिणत उपास्ते।
ब्राह्मणो वै प्रजानामुपद्रष्टा।
उपद्रष्टुमत्येवैनं यश ऋच्छति।
ईश्वरं तं यशोऽर्तोरित्याहुः।
यस्यान्ते व्याचष्ट इति।
वरस्तस्मै देयः।
यदेवैनं तत्रोपनमति।
तदेवावरुन्धे॥ ५॥

((agnivānvai darbhastambaḥ |
agnivatyeva vyācaṣṭe |
brāhmaṇo dakṣiṇata upāste |
brāhmaṇo vai prajānāmupadraṣṭā |
upadraṣṭumatyevainaṃ yaśa ṛcchati |
īśvaraṃ taṃ yaśo'rtorityāhuḥ |
yasyānte vyācaṣṭa iti |
varastasmai deyaḥ |
yadevainaṃ tatropanamati |
tadevāvarundhe || 5 ||))

**[[2-2-1-6]]**

अग्निमादधानो दशहोत्राऽरणिमवदध्यात्।
प्रजातमेवैनमाधत्ते।
तेनैवोद्धृत्याग्निहोत्रं जुहुयात्।
प्रजातमेवैनज्जुहोति।
हविर्निर्वप्स्यन्दशहोतारं व्याचक्षीत।
प्रजातमेवैनं निर्वपति।
सामिधेनीरनुवक्ष्यन्दशहोतारं व्याचक्षीत।
सामिधेनीरेव सृष्ट्वाऽऽरभ्य प्रतनुते।
अथो यज्ञो वै दशहोता।
यज्ञमेव तनुते॥ ६॥

((agnimādadhāno daśahotrā'raṇimavadadhyāt |
prajātamevainamādhatte |
tenaivoddhṛtyāgnihotraṃ juhuyāt |
prajātamevainajjuhoti |
havirnirvapsyandaśahotāraṃ vyācakṣīta |
prajātamevainaṃ nirvapati |
sāmidhenīranuvakṣyandaśahotāraṃ vyācakṣīta |
sāmidhenīreva sṛṣṭvā''rabhya pratanute |
atho yajño vai daśahotā |
yajñameva tanute || 6 ||))

**[[2-2-1-7]]**

अभिचरन्दशहोतारं जुहुयात्।
नव वै पुरुषे प्राणाः।
नाभिर्दशमी।
सप्राणमेवैनमभिचरति।
एतावद्वै पुरुषस्य स्वम्।
यावत्प्राणाः।
यावदेवास्यास्ति।
तदभिचरति।
स्वकृत इरिणे जुहोति प्रदरे वा।
एतद्वा अस्यै निर्ऋतिगृहीतम्।
निर्ऋतिगृहीत एवैनं निर्ऋत्या ग्राहयति।
यद्वाचः क्रूरम्।
तेन वषट्करोति।
वाच एवैनं क्रूरेण प्रवृश्चति।
ता जगार्तिमार्च्छति॥ ७॥
दशहोता सृष्ट्या ऋच्छेद्व्याचष्टे रुन्ध एव तनुते
निर्ऋतिगृहीतं पञ्च च॥ १॥

((abhicarandaśahotāraṃ juhuyāt|
nava vai puruṣe prāṇāḥ |
nābhirdaśamī |
saprāṇamevainamabhicarati |
etāvadvai puruṣasya svam |
yāvatprāṇāḥ |
yāvadevāsyāsti |
tadabhicarati |
svakṛta iriṇe juhoti pradare vā |
etadvā asyai nirṛtigṛhītam |
nirṛtigṛhīta evainaṃ nirṛtyā grāhayati |
yadvācaḥ krūram |
tena vaṣaṭkaroti |

vāca ̱evainaṁ krū̱reṇa̱ pravṛ̍ścati ।
tā jagārti̱mārcchati ॥ 7 ॥
daśa̍hotā̱ sṛṣṭya̍ ṛ̱cchedvyācaṣṭe rundha ̱eva tanute̱
nirṛ̍tigṛhītam̱ pañca ca ॥ 1 ॥))

**[[2-2-2-1]]**

प्र̱जाप॑तिरकामयत दर्शपूर्णमा̱सौ सृ̍जे̱येति॑।
स ए̱तं चतु॑र्होतारमपश्यत्।
तं मन॑साऽनु̱द्रुत्या॑ह̱वनीये॑ऽजुहोत्।
ततो̱ वै स द॑र्शपूर्णमा̱साव॑सृजत।
ताव॑स्मात्सृष्टावपाँक्रामताम्।
तौ ग्रहे॑णागृह्णात्।
तद्ग्रह॑स्य ग्रह̱त्वम्।
द̱र्श̱पू̱र्ण̱मा̱सावा̱लभ॑मानः।
चतु॑र्होतार̱ं मन॑साऽनु̱द्रुत्या॑ह̱वनीये॑ जुहुयात्।
द̱र्श̱पू̱र्ण̱मा̱सावे̱व सृ̱ष्ट्वाऽऽरभ्य̱ प्रत॑नुते॥ १॥

((pra̱jāpa̍tirakāmayata darśapūrṇamā̱sau sṛ̍je̱yeti̍ ।
sa e̱taṁ catu̍rhotāramapaśyat ।
taṁ mana̍sā'nu̱drutya̍hava̱nīye̍'juhot ।
tato̱ vai sa da̍rśapūrṇamā̱sāva̍sṛjata ।
tāva̍smātsṛ̱ṣṭāvapā̍krāmatām ।
tau grahe̍ṇāgṛhṇāt ।
tadgraha̍sya graha̱tvam ।
da̱rśa̱pū̱rṇa̱mā̱sāvā̱labha̍mānaḥ ।
catu̍rhotāra̱ṁ mana̍sā'nu̱drutya̍hava̱nīye̍ juhuyāt।
da̱rśa̱pū̱rṇa̱mā̱sāve̱va sṛ̱ṣṭvā''rabhya̱ prata̍nute ॥ 1 ॥))

**[[2-2-2-2]]**

ग्रहो॑ भवति।
द̱र्श̱पू̱र्ण̱मा̱सयोः॑ सृ̱ष्ट्योर्धृत्यै॑।
सो॑ऽकामयत चातु̱र्मा̱स्यानि॑ सृजे̱येति॑।
स ए̱तं पञ्च॑होतारमपश्यत्।
तं मन॑साऽनु̱द्रुत्या॑ह̱वनीये॑ऽजुहोत्।
ततो̱ वै स चा॑तु̱र्मा̱स्यान्य॑सृजत।
तान्य॑स्मात्सृष्टान्यपाँक्रामन्।
तानि̱ ग्रहे॑णागृह्णात्।
तद्ग्रह॑स्य ग्रह̱त्वम्।
चा̱तु̱र्मा̱स्यान्या̱लभ॑मानः॥ २॥

((graho̍ bhavati ।
da̱rśa̱pū̱rṇa̱mā̱sayo̍ḥ sṛ̱ṣṭayo̱rdhṛtyai̍ ।
so̍'kāmayata cāturmā̱syāni̍ sṛje̱yeti̍ ।
sa e̱taṁ pañca̍hotāramapaśyat ।
taṁ mana̍sā'nu̱drutya̍hava̱nīye̍'juhot ।
tato̱ vai sa ca̍turmā̱syānya̍sṛjata ।
tānya̍smātsṛ̱ṣṭānyapā̍krāman ।
tāni̱ grahe̍ṇāgṛhṇāt ।
tadgraha̍sya graha̱tvam ।
cā̱tu̱rmā̱syānyā̱labha̍mānaḥ ॥ 2 ॥))

**[[2-2-2-3]]**

पञ्च॑होतार̱ं मन॑साऽनु̱द्रुत्या॑ह̱वनीये॑ जुहुयात्।
चा̱तु̱र्मा̱स्यान्ये̱व सृ̱ष्ट्वाऽऽरभ्य̱ प्रत॑नुते।
ग्रहो॑ भवति।
चा̱तु̱र्मा̱स्याना॑ꣳ सृ̱ष्टाना॑ं धृत्यै॑।
सो॑ऽकामयत पशु̱बन्ध॑ꣳ सृजे̱येति॑।
स ए̱तꣳ षड्ढो॑तारमपश्यत्।
तं मन॑साऽनु̱द्रुत्या॑ह̱वनीये॑ऽजुहोत्।
ततो̱ वै स प॑शु̱बन्धम॑सृजत।
सो॑ऽस्मात्सृ̱ष्टोऽपाँक्रामत्।
तं ग्रहे॑णागृह्णात्॥ ३॥

((pañca̍hotāra̱ṁ mana̍sā'nu̱drutyāhava̱nīye̍ juhuyāt ।
cā̱tu̱rmā̱syānye̱va sṛ̱ṣṭvā''rabhya̱ prata̍nute ।
graho̍ bhavati ।
cā̱tu̱rmā̱syānā̍m̐ sṛ̱ṣṭānā̱ṁ dhṛtyai̍ ।
so̍'kāmayata paśu̱bandham̐̍ sṛje̱yeti̍ ।
sa e̱tam̐ ṣaḍḍho̍tāramapaśyat ।
taṁ mana̍sā'nu̱drutya̍hava̱nīye̍'juhot ।
tato̱ vai sa pa̍śu̱bandhama̍sṛjata ।
so̍'smātsṛ̱ṣṭo'pā̍krāmat ।
taṁ grahe̍ṇāgṛhṇāt ॥ 3 ॥))

**[[2-2-2-4]]**

तद्ग्रह॑स्य ग्रह̱त्वम्।
प̱शु̱बन्धेन॑ य̱क्ष्यमा॑णः।
षड्ढो॑तार̱ं मन॑साऽनु̱द्रुत्या॑ह̱वनीये॑ जुहुयात्।
प̱शु̱बन्धमे॑व सृ̱ष्ट्वाऽऽरभ्य̱ प्रत॑नुते।
ग्रहो॑ भवति।
प̱शु̱बन्धस्य॑ सृ̱ष्टस्य̱ धृत्यै॑।
सो॑ऽकामयत सौ̱म्यम॑ध्व̱रꣳ सृजे̱येति॑।
स ए̱तꣳ स̱प्तहो॑तारमपश्यत्।
तं मन॑साऽनु̱द्रुत्या॑ह̱वनीये॑ऽजुहोत्।
ततो̱ वै स सौ̱म्यम॑ध्व̱रम॑सृजत॥ ४॥

((tadgraha̍sya graha̱tvam ।
pa̱śu̱bandhena̍ ya̱kṣyamā̍ṇaḥ ।
ṣaḍḍho̍tāra̱ṁ mana̍sā'nu̱drutya̍hava̱nīye̍ juhuyāt ।

paṣụbạndhamẹva sṛ̣ṣṭ̣vā''rabhyạ pratánute I
grahȯ bhavati I
paṣụbạndhasyȧ sṛ̣ṣṭasyạ dhṛtyaï I
sȯ'kāmayata saụmyamȧdhvạraṁ sṛ̣jẹyetị̇ I
sa ẹtaṁ sạptahȯtāramapaśyatI
taṃ manȧsā.ānụdrutyȧhavạnīyė'juhotI
tatọ vai sa saụmyamȧdhvạramȧsṛjata II 4 II))

**[[2-2-2-5]]**

सो᳚ऽस्मात्सृ॒ष्टोऽपा᳚क्रामत् ।
तं ग्रहे॑णागृह्णात् ।
तद्ग्रह॑स्य ग्रह॒त्वम् ।
दी॒क्षि॒ष्यमा॑णः ।
स॒प्तहो॑तारं॒ मन॑साऽनु॒द्रुत्या॑हव॒नीये॑ जुहुयात् ।
सौ॒म्यमे॒वाध्व॒रꣳ सृ॒ष्ट्वाऽऽरभ्य॒ प्रत॑नुते ।
ग्रहो॑ भवति ।
सौ॒म्यस्या᳚ध्व॒रस्य॑ सृ॒ष्टस्य॒ धृत्यै᳚ ।
दे॒वेभ्यो॒ वै य॒ज्ञो न प्राभ॑वत् ।
तमे॑ताव॒च्छः सम॑भरन् ॥ ५ ॥

((sö'smātsṛ̣ṣṭọ'pä̈krāmat I
taṃ grahėṇāgṛhṇāt I
tadgrahȧsya grahạtvam I
dīkṣịṣyamȧṇaḥ I
sạptahȯtāraṃ manȧsā'nụdrutyȧhavạnīyė juhuyāt I
saụmyamẹvādhvạraṁ sṛ̣ṣṭ̣vā''rabhyạ pratȧnute I
grahȯ bhavati I
saụmyasyä̈dhvạrasyȧ sṛ̣ṣṭasyạ dhṛtyaï I
dẹvebhyọ vai yạjño na prābhȧvat I
tamėtāvạcchaḥ samȧbharan II 5 II))

**[[2-2-2-6]]**

यत्सं॑भा॒राः ।
ततो॒ वै तेभ्यो॑ य॒ज्ञः प्राभ॑वत् ।
यत्सं॑भा॒रा भव॑न्ति ।
य॒ज्ञस्य॒ प्रभू᳚त्यै ।
आ॒ति॒थ्यमा॒साद्य॒ व्याच॑ष्टे ।
य॒ज्ञ॒मु॒खं वा आ॑ति॒थ्यम् ।
मु॒ख॒त ए॒व य॒ज्ञꣳ सं॒भृत्य॒ प्रत॑नुते ।
अय॑ज्ञो॒ वा ए॒षः ।
यो॑ऽप॒त्नीकः॑ ।
न प्र॒जाः प्रजा॑येरन् ।
पत्नी॒र्व्याच॑ष्टे ।
य॒ज्ञमे॒वाकः॑ ।
प्र॒जाना᳚ं प्र॒जन॑नाय ।
उ॒प॒सत्सु॒ व्याच॑ष्टे ।
ए॒तद्वै पत्नी॑नामा॒यत॑नम् ।
स्व ए॒वैना॑ आ॒यत॒नेऽव॑कल्पयति ॥ ६ ॥
त॒नु॒त आ॒लभ॑मानोऽगृह्णादसृजताभरञ्जायेर॒न्षट्च॑ ॥ २ ॥

((yatsaṁ̇bhạ̄rāḥ I
tatọ vai tebhyȯ yạjñaḥ prābhȧvat I
yatsaṁ̇bhạ̄rā bhavȧnti I
yạjñasyạ prabhṻtyai I
ạ̄tịthyamạ̄sādyạ vyācȧṣṭe I
yạjñạmụkhaṃ vā ȧtịthyam I
mụkhạta ẹva yạjñaṁ sạṃbhṛtyạ pratȧnute I
ayȧjñọ vā ẹṣaḥ I
yȯ'pạtnīkȧḥ I
na prạjāḥ prajȧyeran I
patnīṛvyācȧṣṭe I
yạjñamẹvākȧḥ I
prạjānām̈ prạjanȧnāya I
ụpạsatsụ vyācȧṣṭe I
ẹtadvai patnȧnāmạ̄yatȧnam I
sva ẹvainȧ ạ̄yatạne'vȧkalpayati II 6 II
tạnụtạ
ạ̄labhȧmāno'gṛhṇādasṛjatābharañjāyerạnṣạṭcȧ II 2 II))

**[[2-2-3-1]]**

प्र॒जाप॑तिरकामयत प्र॒जाये॒येति॑ ।
स तपो॑ऽतप्यत ।
स त्रि॒वृत॒ꣳ स्तोम॑मसृजत ।
तं प॑ञ्चद॒शस्तोमो॑ मध्य॒त उद॑तृणत् ।
तौ पू᳚र्वप॒क्षश्चा॑परप॒क्षश्चा॑भवताम् ।
पू॒र्वप॒क्षं दे॒वा अन्वसृ॑ज्यन्त ।
अ॒प॒र॒प॒क्षमन्वसु॑राः ।
ततो॑ दे॒वा अभ॑वन् ।
परा॒ऽसु॑राः ।
यं का॒मये॑त वसी॑यान्त्स्या॒दिति॑ ॥ १ ॥

((prạjāpȧtirakāmayatạ prajȧyẹyetị̇ I
sa tapȯ'tapyata I
sa trịvṛtạm̈ stomȧmasṛjata I
taṃ pȧñcadạśastomȯ madhyạta udȧtṛṇat I
tau pṻrvapạkṣaścȧparapạkṣaścȧbhavatām I
pūrvạpạkṣaṃ dẹvā anvasṛ̇jyanta I
ạparạpạkṣamanvasụ̇rāḥ I
tatȯ dẹvā abhȧvan I
parā'sụ̇rāḥ I
yaṃ kạ̄mayėtạ vasị̇yāntsyạ̄ditị̇ II 1 II))

**[[2-2-3-2]]**

तं पू᳚र्वप॒क्षे या॑जयेत्।
वसी॑याने॒व भ॑वति।
यं का॒मये॑त॒ पापी॑यान्त्स्या॒दिति॑।
तम॑परप॒क्षे या॑जयेत्।
पापी॑याने॒व भ॑वति।
तस्मा᳚त्पूर्वप॒क्षो॑ऽपरप॒क्षात्क॑रु॒ण्य॑तरः।
प्र॒जाप॑ति॒र्वै दश॑होता।
चतु॑र्होता॒ पञ्च॑होता।
षड्ढो॑ता स॒प्तहो॑ता।
ऋ॒तव॑ः संवत्स॒रः॥ २॥

((taṃ pū̎rvapa̱kṣe yā̍jayet ।
vasī̍yāne̱va bha̍vati ।
yaṃ kā̱maye̍ta̱ pāpī̍yāntsyā̱diti̍ ।
tama̍parapa̱kṣe yā̍jayet ।
pāpī̍yāne̱va bha̍vati ।
tasmā̎tpūrvapa̱kṣo̍'parapa̱kṣātka̍ru̱ṇya̍taraḥ ।
pra̱jāpa̍ti̱rvai daśa̍hotā ।
catu̍rhotā̱ pañca̍hotā ।
ṣaḍḍho̍tā sa̱ptaho̍tā ।
ṛ̱tava̍ḥ saṃvatsa̱raḥ ॥ 2 ॥))

**[[2-2-3-3]]**

प्र॒जाः प॒शव॑ इ॒मे लो॒काः।
य ए॒वं प्र॒जाप॑तिं ब॒होर्भूया꣡ꣳसं॒ वेद॑।
ब॒होरे॒व भूया᳚न्भवति॥
प्र॒जाप॑ति॒र्देवासु॒राना॑सृजत।
स इन्द्र॒मपि॒ नासृ॑जत।
तं दे॒वा अ॑ब्रुवन्।
इन्द्रं॑ नो जन॒येति॑।
सो᳚ऽब्रवीत्।
यथा॒ऽहं यु॒ष्माꣳस्तप॒साऽसृ॑क्षि।
ए॒वमिन्द्रं॑ जनयध्व॒मिति॑॥ ३॥

((pra̱jāḥ pa̱śava̍ i̱me lo̱kāḥ ।
ya e̱vaṃ pra̱jāpa̍tiṃ ba̱horbhūyā̍m̐sa̱ṃ veda̍ ।
ba̱hore̱va bhūyā̎nbhavati ॥
pra̱jāpa̍tirdevāsu̱rāna̍sṛjata ।
sa indra̱mapi̱ nāsṛ̍jata ।
taṃ de̱vā a̍bruvan ।
indraṃ̍ no jana̱yeti̍ ।
so̎'bravīt ।
yathā̱'haṃ yu̱ṣmām̐stapa̱sā'sṛ̍kṣi ।
e̱vamindraṃ̍ janayadhva̱miti̍ ॥ 3 ॥))

**[[2-2-3-4]]**

ते तपो॑ऽतप्यन्त।
त आ॒त्मन्निन्द्र॑मपश्यन्।
तम॑ब्रुवन्।
जाय॒स्वेति॑।
सो᳚ऽब्रवीत्।
किं भा॑ग॒धेय॑म॒भिज॑निष्य॒ इति॑।
ऋ॒तूꣳन्त्सं॑वत्स॒रम्।
प्र॒जाः प॒शून्।
इ॒माꣳल्लो॒कानित्य॑ब्रुवन्।
तं वै माऽऽहु॑त्या॒ प्रज॑नय॒तेत्य॑ब्रवीत्॥ ४॥

((te tapo̍'tapyanta ।
ta ā̱tmannindra̍mapaśyan।
tama̍bruvan।
jāya̱sveti̍ ।
so̎'bravīt ।
kiṃ bhā̍ga̱dheya̍ma̱bhija̍niṣya̱ iti̍ ।
ṛ̱tūntsa̍ṃvatsa̱ram ।
pra̱jāḥ pa̱śūn ।
i̱mām̐llo̱kānitya̍bruvan ।
taṃ vai mā''hu̍tyā̱ praja̍naya̱tetya̍bravīt ॥ 4 ॥))

**[[2-2-3-5]]**

तं चतु॑र्होत्रा॒ प्राज॑नयन्।
यः का॒मये॑त वी॒रो म॒ आजा॑ये॒तेति॑।
स चतु॑र्होतारं जुहुयात्।
प्र॒जाप॑ति॒र्वै चतु॑र्होता।
प्र॒जाप॑तिरे॒व भू॒त्वा प्रजा॑यते।
ज॒जन॒दिन्द्र॑मिन्द्रि॒याय॒ स्वाहे॑ति॒ ग्रहे॑ण जुहोति।
आऽस्य॑ वी॒रो जा॑यते।
वी॒रꣳ हि दे॒वा ए॒तयाऽऽहु॑त्या॒ प्राज॑नयन्।
आ॒दि॒त्याश्चाङ्गि॑रसश्च सुव॒र्गे लो॒के᳚ऽस्पर्धन्त।
व॒यं पूर्वे॑ सुव॒र्गं लो॒कमि॑याम व॒यं पूर्वे॒ इति॑॥ ५॥

((taṃ catu̍rhotrā̱ prāja̍nayan ।
yaḥ kā̱maye̍ta vī̱ro ma̱ ājā̍ye̱teti̍ ।
sa catu̍rhotāraṃ juhuyāt ।
pra̱jāpa̍ti̱rvai catu̍rhotā ।
pra̱jāpa̍tire̱va bhū̱tvā prajā̍yate ।
ja̱jana̱dindra̍mindri̱yāya̱ svāhe̍ti̱ grahe̍ṇa juhoti ।
ā'sya̍ vī̱ro jā̍yate ।
vī̱ram̐ hi de̱vā e̱tayā''hu̍tyā̱ prāja̍nayan ।
ā̱di̱tyāścāṅgi̍rasaśca suva̱rge lo̱ke̎'spardhanta ।

va̱yaṃ pūrve̍ suva̱rgaṃ lo̱kamī̍yāma va̱yaṃ pūrva̱ iti̍ ॥ 5 ॥))

**[[2-2-3-6]]**

त आ॑दि॒त्या ए॒तं पञ्च॑होतारमपश्यन्।

तं पु॒रा प्रा॑तरनुवा॒कादाग्नी᳚ध्रेऽजुहवुः।

त॒तो वै ते पूर्वे॑ सुव॒र्गं लो॒कमा॑यन्।

यः सु॑व॒र्गका॑मः॒ स्यात्।

स पञ्च॑होतारं पु॒रा प्रा॑तरनुवा॒कादाग्नी᳚ध्रे जुहुयात्।

सं॒व॒त्स॒रो वै पञ्च॑होता।

सं॒व॒त्स॒रः सु॑व॒र्गो लो॒कः।

सं॒व॒त्स॒र ए॒वर्तुषु॑ प्रति॒ष्ठाय॑।

सु॒व॒र्गं लो॒कमे॑ति।

ते᳚ऽब्रुव॒न्नङ्गि॑रस आदि॒त्यान्॥ ६॥

((ta ā̍di̱tyā e̱taṃ pañca̍hotāramapaśyan ।
taṃ pu̱rā prā̍taranuvā̱kādāgnī̎dhre'juhavuḥ ।
tato̱ vai te pūrve̍ suva̱rgaṃ lo̱kamā̍yan ।
yaḥ su̍va̱rgakā̍ma̱ḥ syāt ।
sa pañca̍hotāraṃ pu̱rā prā̍taranuvā̱kādāgnī̎dhre juhuyāt ।
sa̱ṃva̱tsa̱ro vai pañca̍hotā ।
sa̱ṃva̱tsa̱raḥ su̍va̱rgo lo̱kaḥ ।
sa̱ṃva̱tsa̱ra e̱vartuṣu̍ prati̱ṣṭhāya̍ ।
su̱va̱rgaṃ lo̱kame̍ti ।
te̎'bruva̱nnaṅgi̍rasa ādi̱tyān ॥ 6 ॥))

**[[2-2-3-7]]**

क्व॑ स्थ।

क्व॑ वः स॒द्भ्यो ह॒व्यं व॑क्ष्याम॒ इति॑।

छन्द॒ःस्वित्य॑ब्रुवन्।

गा॒य॒त्रि॒यां त्रि॒ष्टुभि॒ जग॑त्या॒मिति॑।

तस्मा॒च्छन्द॑ःसु स॒द्भ्य आ॑दि॒त्येभ्य॑ः।

आ॒ङ्गी॒र॒सीः प्र॒जा ह॒व्यं व॑हन्ति।

वह॑न्त्यस्मै प्र॒जा ब॒लिम्।

ऐ॒नम॒प्रति॑ख्यातं गच्छति।

य ए॒वं वेद॑।

द्वाद॑श॒ मासा॒ः पञ्च॒र्तव॑ः।

त्रय॑ इ॒मे लो॒काः।

अ॒सावा॑दि॒त्य एक॑वि॒ꣳ॒शः।

ए॒तस्मि॒न्वा ए॒ष श्रि॒तः।

ए॒तस्मि॒न्प्रति॑ष्ठितः।

य ए॒वमे॒तꣳ᳚ श्रि॒तं प्रति॑ष्ठि॒तं वेद॑।

प्रत्ये॒व ति॑ष्ठति॥ ७॥

स्या॒दिति॑ संवत्स॒रो ज॑नयध्व॒मितीत्य॑ब्रवी॒त्पूर्व॒

इत्या॑दि॒त्यानृ॒तव॒ष्षट्च॑॥ ३॥

((kva̍ stha ।
kva̍ vaḥ sa̱dbhyo ha̱vyaṃ va̍kṣyāma̱ iti̍ ।
chanda̱ḥsvitya̍bruvan ।
gā̱ya̱tri̱yāṃ tri̱ṣṭubhi̱ jaga̍tyā̱miti̍ ।
tasmā̱cchanda̍ḥsu sa̱dbhya ā̍di̱tyebhya̍ḥ ।
ā̱ṅgī̱ra̱sīḥ pra̱jā ha̱vyaṃ va̍hanti ।
vaha̍ntyasmai pra̱jā ba̱lim ।
ai̱namaprati̍khyātaṃ gacchati ।
ya e̱vaṃ veda̍ ।
dvāda̍śa̱ māsā̱ḥ pañca̱rtava̍ḥ ।
traya̍ i̱me lo̱kāḥ ।
a̱sāvā̍di̱tya eka̍vi̱ṃ̱śaḥ ।
e̱tasmi̱nvā e̱ṣa śri̱taḥ ।
e̱tasmi̱nprati̍ṣṭhitaḥ ।
ya e̱vame̱taṃ̎ śri̱taṃ prati̍ṣṭhitaṃ veda̍ ।
pratye̱va ti̍ṣṭhati ॥ 7 ॥
syā̱diti̍ saṃvatsa̱ro ja̍nayadhva̱mitītya̍bravī̱tpūrva̱
ityā̍di̱tyānṛ̱tava̱ṣṣaṭca̍ ॥ 3 ॥))

**[[2-2-4-1]]**

प्र॒जाप॑तिरकामयत॒ प्रजा॑ये॒येति॑।

स ए॒तं दश॑होतारमपश्यत्।

तेन॑ दश॒धाऽऽत्मानं॑ वि॒धाय॑।

दश॑होत्राऽतप्यत।

तस्य॒ चित्ति॑ः स्रुगासी᳚त्।

चि॒त्तमाज्य᳚म्।

तस्यै॒ताव॑त्ये॒व वागासी᳚त्।

ए॒तावा॑न्यज्ञक्र॒तुः।

स च॒तुर्हो॑तारमसृजत।

सो॑ऽनन्दत्॥ १॥

((pra̱jāpa̍tirakāmayata̱ prajā̍ye̱yeti̍ ।
sa e̱taṃ daśa̍hotāramapaśyat ।
tena̍ daśa̱dhā''tmāna̍ṃ vi̱dhāya̍ ।
daśa̍hotrā'tapyata ।
tasya̱ citti̱ḥ srugāsī̎t ।
ci̱ttamājya̎m ।
tasyai̱tāva̍tye̱va vāgāsī̎t ।
e̱tāvā̍nyajñakra̱tuḥ ।
sa catu̍rhotāramasṛjata ।
so̍'nandat ॥ 1 ॥))

**[[2-2-4-2]]**

असृ॑क्षि॒ वा इ॒ममिति॑।

तस्य॒ सोमो॑ ह॒विरासी᳚त्।
स चतु॑र्होत्राऽतप्यत।
सो॑ऽताम्यत्।
स भूरिति॒ व्याह॑रत्।
स भूमि॑मसृजत।
अ॒ग्नि॒हो॒त्रं द॑र्शापूर्णमा॒सौ यजू॑ꣳषि।
स द्वि॒तीय॑मतप्यत।
सो॑ऽताम्यत्।
स भुव॒ इति॒ व्याह॑रत्॥ २॥

((asṛ̍kṣị vā ịmamiti̍ I
tasyạ somo̍ hạvirāsī̎t I
sa catu̍rhotrā'tapyata I
so̍'tāmyat I
sa bhūritị vyāha̍rat I
sa bhūmi̍masṛjata I
ạgnịhọtraṃ da̍rśāpūrṇamạsau yajū̍ṃṣi I
sa dvịtīya̍matapyata I
so̍'tāmyat I
sa bhuvạ itị vyāha̍rat II 2 II))

**[[2-2-4-3]]**

सो᳚ऽन्तरि॑क्षमसृजत।
चा॒तु॒र्मा॒स्यानि॒ सामा॑नि।
स तृ॒तीय॑मतप्यत।
सो॑ऽताम्यत्।
स सुव॒रिति॒ व्याह॑रत्।
स दि॒व॑मसृजत।
अ॒ग्नि॒ष्टो॒ममु॒क्थ्य॑मतिरा॒त्रमृच॑ः।
ए॒ता वै व्याहृ॑तय इ॒मे लो॒काः।
इ॒मान्खलु॒ वै लो॒काननु॑ प्र॒जाः प॒शव॒श्छन्दा॑ꣳसि
प्राजा॑यन्त।
य ए॒वमे॒ताः प्र॒जाप॑तेः प्रथ॒मा व्याहृ॑ती॒ः प्र॒जाता॒ वेद॑॥ ३॥

((so̎'ntari̍kṣamasṛjata I
cāṭuṛmāsyānị sāma̍ni I
sa tṛ̣tīya̍matapyata I
so̍'tāmyat I
sa suvạritị vyāha̍rat I
sa diva̍masṛjata I
ạgnịṣṭọmamụkthya̍matirātramṛca̍ḥ I
ẹtā vai vyāhṛ̍taya ịme lọkāḥ I
ịmānkhalụ vai lọkānanu̍ prạjāḥ pạśavạśchandā̍ṃsị
prājā̍yanta I
ya ẹvamẹtāḥ prạjāpa̍teḥ prathạmā vyāhṛ̍tīḥ prạjā̍tā
vedá II 3 II))

**[[2-2-4-4]]**

प्र प्र॒जया॑ प॒शुभि॑र्मिथु॒नैर्जा॑यते।
स पञ्च॑होतारमसृजत।
स ह॒विर्नावि॑न्दत।
तस्मै॒ सोम॑स्त॒नुवं॒ प्राय॑च्छत्।
ए॒तत्ते॑ ह॒विरिति॑।
स पञ्च॑होत्राऽतप्यत।
सो॑ऽताम्यत्।
स प्र॒त्यङ्ङ॑बाधत।
सोऽसु॑रानसृजत।
तद॒स्याप्रि॑यमासीत्॥ ४॥

((pra prạjaya̍ pạśubhi̍rmithụnairjā̍yate I
sa pañca̍hotāramasṛjata I
sa hạvirnāvi̍ndata I
tasmaị somá̍stạnuvaṃ prāya̍cchat I
ẹtatte̍ hạviriti̍ I
sa pañca̍hotrā'tapyata I
so̍'tāmyat I
sa prạtyaṅṅa̍bādhata I
so'su̍rānasṛjata I
tadạsyāpri̍yamāsīt II 4 II))

**[[2-2-4-5]]**

तद्दु॒र्व॒र्ण॒ꣳ हिर॑ण्यमभवत्।
तद्दु॒र्व॒र्ण॑स्य॒ हिर॑ण्यस्य॒ जन्म॑।
स द्वि॒तीय॑मतप्यत।
सो॑ऽताम्यत्।
स प्राङ॑बाधत।
स दे॒वान॑सृजत।
तद॑स्य प्रि॒यमा॑सीत्।
तत्सु॒व॒र्ण॒ꣳ हिर॑ण्यमभवत्।
तत्सु॒वर्ण॑स्य॒ हिर॑ण्यस्य॒ जन्म॑।
य ए॒वꣳ सु॒वर्ण॑स्य॒ हिर॑ण्यस्य॒ जन्म॒ वेद॑॥ ५॥

((taddụrvarṇạm̐ hira̍ṇyamabhavat I
taddụrvarṇa̍syạ hira̍ṇyasyạ janma̍ I
sa dvịtīya̍matapyata I
so̍'tāmyat I
sa prāṅa̍bādhata I
sa dẹvāna̍sṛjata I
tada̍sya prịyamā̍sīt I
tatsụvarṇạm̐ hira̍ṇyamabhavat I

tatsu̱varṇa̍sya̱ hira̍ṇyasya̱ janma̍ ।
ya e̱vaṁ su̱varṇa̍sya̱ hira̍ṇyasya̱ janma̱ veda̍ ॥ 5 ॥))

**[[2-2-4-6]]**

सु॒वर्ण॑ आ॒त्मना॑ भवति।
दु॒र्व॒र्णो᳚ऽस्य॒ भ्रातृ॑व्यः।
तस्मा᳚त्सु॒वर्ण॒ꣳ॒ हिर॑ण्यं भा॒र्य᳚म्।
सु॒वर्ण॑ ए॒व भ॑वति।
ऐनं॑ प्रि॒यं गच्छ॑ति॒ नाप्रि॑यम्।
स स॒प्तहो॑तारमसृजत।
स स॒प्तहो᳚त्रैव सु॑व॒र्गं लो॒कमै᳚त्।
त्रि॒ण॒वे॒न स्तोमे॑नै॒भ्यो लो॒केभ्योऽसु॑रा॒न्प्राणु॑दत।
त्र॒य॒स्त्रि॒ꣳ॒शेन॒ प्रत्य॑तिष्ठत्।
ए॒क॒वि॒ꣳ॒शेन॒ रु॒च॑मधत्त॥ ६॥

((su̱varṇa̍ ā̱tmanā̍ bhavati ।
du̱rvarṇo̎'sya̱ bhrātṛ̍vyaḥ ।
tasmā̎tsu̱varṇa̱ṁ̱ hira̍ṇyaṃ bhā̱ryā̎m।
su̱varṇa̍ e̱va bha̍vati ।
aina̍ṃ pri̱yaṃ ga̍cchati̱ nāpri̍yam ।
sa sa̱ptaho̍tāramasṛjata ।
sa sa̱ptaho̎traiva su̍va̱rgaṃ lo̱kamai̎t ।
tri̱ṇa̱vena̱ stome̍nai̱bhyo lo̱kebhyo'su̍rā̱nprāṇu̍data ।
tra̱ya̱stri̱ṁ̱śena̱ pratya̍tiṣṭhat।
e̱ka̱vi̱ṁ̱śena̱ ruca̍madhatta ॥ 6 ॥))

**[[2-2-4-7]]**

स॒प्त॒द॒शेन॒ प्राजा॑यत।
य ए॒वं वि॒द्वान्त्सोमे॑न॒ यज॑ते।
स॒प्तहो᳚त्रैव सु॑व॒र्गं लो॒कमे॑ति।
त्रि॒ण॒वे॒न स्तोमे॑नै॒भ्यो लो॒केभ्यो॒ भ्रातृ॑व्या॒न्प्रणु॑दते।
त्र॒य॒स्त्रि॒ꣳ॒शेन॒ प्रति॑तिष्ठति।
ए॒क॒वि॒ꣳ॒शेन॒ रुचं॑ धत्ते।
स॒प्त॒द॒शेन॒ प्रजा॑यते।
तस्मा᳚त्सप्तद॒शः स्तोमो॒ न नि॒र्हृत्यः॑।
प्र॒जाप॑ति॒र्वै स॑प्तद॒शः।
प्र॒जाप॑तिमे॒व म॑ध्य॒तो ध॑त्ते प्र॒जा᳚त्यै॥ ७॥
अ॒न॒न्द॒द्भु॒व इ॒ति व्याह॑र॒द्वेदा॑सी॒द्वेदा॑धत्त॒ प्रजा᳚त्यै॥ ४॥

((sa̱pta̱da̱śena̱ prājā̍yata ।
ya e̱vaṃ vi̱dvāntsome̍na̱ yaja̍te ।
sa̱ptaho̎trai̱va su̍va̱rgaṃ lo̱kame̍ti ।
tri̱ṇa̱vena̱ stome̍nai̱bhyo lo̱kebhyo̱
bhrātṛ̍vyā̱npraṇu̍date ।
tra̱ya̱stri̱ṁ̱śena̱ prati̍tiṣṭhati ।
e̱ka̱vi̱ṁ̱śena̱ ruca̍ṃ dhatte ।
sa̱pta̱da̱śena̱ prajā̍yate ।
tasmā̎tsaptada̱śaḥ stomo̱ na ni̱rhṛtya̍ḥ ।
pra̱jāpa̍ti̱rvai sa̍ptada̱śaḥ ।
pra̱jāpa̍time̱va ma̍dhya̱to dha̍tte̱ prajā̎tyai ॥ 7 ॥
a̱na̱nda̱dbhuva̱ iti̱ vyāha̍ra̱dveda̍sī̱dveda̍dhatta̱
prajā̎tyai ॥ 4 ॥))

**[[2-2-5-1]]**

दे॒वा वै वरु॑णमयाजयन्।
स यस्यै॑ यस्यै दे॒वता॑यै॒ दक्षि॑णा॒मन॑यत्।
ताम॑व्लीनात्।
ते᳚ऽब्रुवन्।
व्या॒वृत्य॒ प्रति॑गृह्णाम।
तथा॑ नो॒ दक्षि॑णा॒ न व्ले᳚ष्यतीति॑।
ते व्या॒वृत्य॒ प्रत्य॑गृह्णन्।
तत॒ो वै तान्दक्षि॑णां॒ नाव्ली॑नात्।
य ए॒वं वि॒द्वान्व्या॒वृत्य॒ दक्षि॑णां प्रतिगृ॒ह्णाति॑।
नैनं॒ दक्षि॑णा व्लीनाति॥ १॥

((de̱vā vai varu̍ṇamayājayan ।
sa yasyai̍ yasyai de̱vatā̍yai̱ dakṣi̍ṇā̱mana̍yat ।
tāma̍vlīnāt ।
te̎'bruvan ।
vyā̱vṛtya̱ prati̍gṛhṇāma ।
tathā̍ no̱ dakṣi̍ṇā̱ na vle̎ṣya̱tīti̍ ।
te vyā̱vṛtya̱ pratya̍gṛhṇan ।
tato̱ vai tāndakṣi̍ṇā̱ṃ nāvlī̍nāt ।
ya e̱vaṃ vi̱dvānvyā̱vṛtya̱ dakṣi̍ṇā̱ṃ pratigṛ̱hṇāti̍ ।
naina̱ṃ dakṣi̍ṇā vlīnāti ॥ 1 ॥))

**[[2-2-5-2]]**

राजा᳚ त्वा॒ वरु॑णो नयतु देवि दक्षिणेऽग्नये॒ हिर॑ण्य॒मित्या॑ह।
आ॒ग्ने॒यं वै हिर॑ण्यम्।
स्वयै॒वैनद्दे॒वत॑या॒ प्रतिगृ॒ह्णाति।
सोमा॑य॒ वास॒ इत्या॑ह।
सौम्यं वै वास॑ः।
स्वयै॒वैनद्दे॒वत॑या॒ प्रतिगृ॒ह्णाति।
रु॒द्राय॒ गामित्या॑ह।
रौ॒द्री वै गौः।
स्वयै॒वैना᳚ दे॒वत॑या॒ प्रतिगृ॒ह्णाति।
वरु॑णा॒याश्व॒मित्या॑ह॥ २॥

((rājā̎ tvā̱ varu̍ṇo nayatu devi dakṣiṇe'gnaye̱

hira̍ṇya̱mitya̍ha |
ā̱gne̱yaṃ vai hira̍ṇyam |
sva̱yai̱vaina̍dde̱vata̍yā̱ prati̍gṛhṇāti |
somā̍ya̱ vāsa̱ ityā̍ha |
sa̱umyaṃ vai vāsa̍ḥ |
sva̱yai̱vaina̍dde̱vata̍yā̱ prati̍gṛhṇāti |
ru̱drāya̱ gāmityā̍ha |
ra̱udrī vai gauḥ |
sva̱yai̱vainā̍m̐ de̱vata̍yā̱ prati̍gṛhṇāti |
varu̍ṇā̱yāśva̱mityā̍ha || 2 ||))

**[[2-2-5-3]]**

वा॒रु॒णो वा अश्वः॑।
स्व॒यै॒वैनं॑ दे॒वत॑या॒ प्रति॑गृह्णाति।
प्रा॒जाप॑तये॒ पुरु॑ष॒मित्या॑ह।
प्रा॒जा॒प॒त्यो वै पुरु॑षः।
स्व॒यै॒वैनं॑ दे॒वत॑या॒ प्रति॑गृह्णाति।
मन॑वे॒ तल्प॒मित्या॑ह।
मा॒न॒वो वै तल्पः॑।
स्व॒यै॒वैनं॑ दे॒वत॑या॒ प्रति॑गृह्णाति।
उ॒त्ता॒ना॒या᳚ङ्गीर॒सा॒या॒न॒ इत्या॑ह।
इ॒यं वा उ॑त्ता॒न आ᳚ङ्गीर॒सः॥ ३॥

((vā̱ru̱ṇo vā aśva̍ḥ |
sva̱yai̱vaina̍ṃ de̱vata̍yā̱ prati̍gṛhṇāti |
prā̱jāpa̍taye̱ puru̍ṣa̱mityā̍ha |
prā̱jā̱pa̱tyo vai puru̍ṣaḥ |
sva̱yai̱vaina̍ṃ de̱vata̍yā̱ prati̍gṛhṇāti |
mana̍ve̱ talpa̱mityā̍ha |
mā̱na̱vo vai talpa̍ḥ |
sva̱yai̱vaina̍ṃ de̱vata̍yā̱ prati̍gṛhṇāti |
u̱ttā̱nā̱yā̎ṅgīra̱sā̱yā̱na̱ ityā̍ha |
i̱yaṃ vā u̍ttā̱na ā̎ṅgīra̱saḥ || 3 ||))

**[[2-2-5-4]]**

अ॒न॒यै॒वै॒न॒त्प्रति॑गृह्णाति।
वै॒श्वा॒न॒र्य॑र्चा र॒थं प्रति॑गृह्णाति।
वै॒श्वा॒न॒रो वै दे॒वत॑या॒ र॒थः॑।
स्व॒यै॒वैनं॑ दे॒वत॑या॒ प्रति॑गृह्णाति।
तेना॑मृत॒त्वम॑श्या॒मित्या॑ह।
अ॒मृत॑मे॒वाऽऽत्मन्ध॑त्ते।
वयो॑ दा॒त्र इत्या॑ह।
वय॑ ए॒वैनं॑ कृ॒त्वा।
सु॒व॒र्गं लो॒कं ग॑मयति।
मयो॒ मह्य॑मस्तु प्रतिग्रही॒त्र इत्या॑ह॥ ४॥

((a̱na̱yai̱vai̱na̱tprati̍gṛhṇāti |
vai̱śvā̱na̱rya̍rcā ra̱thaṃ prati̍gṛhṇāti |
vai̱śvā̱na̱ro vai de̱vata̍yā̱ ra̱tha̍ḥ |
sva̱yai̱vaina̍ṃ de̱vata̍yā̱ prati̍gṛhṇāti |
tenā̍mṛta̱tvama̍śyā̱mityā̍ha |
a̱mṛta̍me̱vā''tmandha̍tte |
vayo̍ dā̱tra ityā̍ha |
vaya̍ e̱vaina̍ṃ kṛ̱tvā |
su̱va̱rgaṃ lo̱kaṃ ga̍mayati |
mayo̱ mahya̍mastu pratigrahī̱tra ityā̍ha || 4 ||))

**[[2-2-5-5]]**

यद्वै शि॒वम्।
तन्म॑यः।
आ॒त्मन॑ ए॒वैषा परी᳚त्तिः।
क इ॒दं कस्मा॑ अदा॒दित्या॑ह।
प्र॒जाप॑ति॒र्वै कः।
स प्र॒जाप॑तये ददा॒ति।
काम॒ः का॒मा॒येत्या॑ह।
कामे॑न॒ हि ददा॑ति।
कामे॑न प्रतिगृह्णाति॑।
कामो॑ दा॒ता काम॑ः प्रतिग्रही॒तेत्या॑ह॥ ५॥

((yadvai śi̱vam |
tanmaya̍ḥ |
ā̱tmana̍ e̱vaiṣā parī̎ttiḥ |
ka i̱daṃ kasmā̍ adā̱dityā̍ha |
pra̱jāpa̍ti̱rvai kaḥ |
sa pra̱jāpa̍taye dadāti |
kāma̱ḥ kāmā̱yetyā̍ha |
kāme̍na̱ hi dadā̍ti |
kāme̍na pratigṛhṇāti̍ |
kāmo̍ dā̱tā kāma̍ḥ pratigrahī̱tetyā̍ha || 5 ||))

**[[2-2-5-6]]**

कामो॒ हि दा॒ता।
काम॑ः प्रतिग्रही॒ता।
काम॑ꣳ समु॒द्रमा॒वि॒शेत्या॑ह।
स॒मु॒द्र इ॒व हि काम॑ः।
नेव॒ हि काम॒स्यान्तोऽस्ति॑।
न स॑मु॒द्रस्य॑।
कामे॑न त्वा॒ प्रति॑गृह्णा॒मीत्या॑ह।
येन॒ कामे॑न प्रतिगृह्णाति॑।
स ए॒वैन॑म॒मुष्मि॑ँल्लो॒के काम॒ आग॑च्छति।

कामै॒तत्त॑ ए॒षा ते॑ काम॒ दक्षि॒णेत्या॑ह।
काम॑ ए॒व तद्यज॑मानो॒ऽमुष्मि॒ꣳल्लो॒के दक्षि॑णामिच्छति।
न प्र॑तिग्रही॒तरि॑।
य ए॒वं वि॒द्वान्दक्षि॑णां प्रतिगृ॒ह्णाति॑।
अ॒नृ॒णामे॒वैनां॑ प्रति॑गृह्णाति॥ ६॥
व्ली॒ना॒त्यश्व॒मित्या॑हाङ्गी॒र॒सः प्र॑तिग्रही॒त्र इत्या॑ह
प्रतिग्रही॒तेत्या॑ह॒ दक्षि॒णेत्या॑ह च॒त्वारि॑ च॥ ५॥

((kāmo̱ hi da̱tā ।
kāma̍ḥ pratigrahī̱tā ।
kāma̍m̐ samu̱dramāvi̱śetya̍ha ।
sa̱mudra i̍va̱ hi kāma̍ḥ ।
neva̱ hi kāma̱syānto'sti̍ ।
na sa̍mu̱drasya̍ ।
kāme̍na tva̱ prati̍gṛhṇā̱mītya̍ha ।
yena̱ kāme̍na pratigṛhṇāti̍ ।
sa e̱vaina̍ma̱muṣmim̐llo̱ke kāma̱ āga̍cchati ।
kāmai̱tatta̍ e̱ṣā te̍ kāma̱ dakṣi̱ṇetya̍ha ।
kāma̍ e̱va tadyaja̍māno̱'muṣmim̐llo̱ke
dakṣi̍ṇāmicchati ।
na pra̍tigrahī̱tari̍ ।
ya e̱vaṃ vi̱dvāndakṣi̍ṇāṃ pratigṛ̱hṇāti̍ ।
a̱nṛ̱ṇāme̱vaināṃ̍ prati̍gṛhṇāti ॥ 6 ॥
vlī̱nā̱tyaśva̱mitya̍hāṅgī̱ra̱saḥ pra̍tigrahī̱tra itya̍ha
pratigrahī̱tetya̍ha̱ dakṣi̱ṇetya̍ha ca̱tvāri̍ ca ॥ 5 ॥))

**[[2-2-6-1]]**

अन्तो॒ वा ए॒ष य॒ज्ञस्य॑।
यद्द॑श॒मम॑हः।
द॒श॒मेऽह॒न्त्सर्प॑रा॒ज्ञिया॑ ऋ॒ग्भिः स्तु॑वन्ति।
य॒ज्ञस्यै॒वान्तं॑ ग॒त्वा।
अ॒न्नाद्य॒मव॑रुन्धते।
ति॒सृभिः॑ स्तुवन्ति।
त्रय॑ इ॒मे लो॒काः।
ए॒भ्य ए॒व लो॒केभ्यो॒ऽन्नाद्य॒मव॑रुन्धते।
पृश्नि॑वतीर्भवन्ति।
अन्नं॒ वै पृश्नि॑॥ १॥

((anto̱ vā e̱ṣa ya̱jñasya̍ ।
yadda̍śa̱mama̍ha̍ḥ ।
da̱śa̱me'ha̱ntsarpa̍ra̱jñiya̍ ṛ̱gbhiḥ stu̍vanti ।
ya̱jñasyai̱vāntaṃ̍ ga̱tvā ।
a̱nnādya̱mava̍rundhate ।
ti̱sṛbhi̍ḥ stuvanti ।
traya̍ i̱me lo̱kāḥ ।
e̱bhya e̱va lo̱kebhyo̱'nnādya̱mava̍rundhate ।
pṛśni̍vatīrbhavanti ।
anna̱ṃ vai pṛśni̍ ॥ 1 ॥))

**[[2-2-6-2]]**

अन्न॑मे॒वाव॑रुन्धते।
मन॑सा॒ प्रस्तौ॑ति।
मन॒सोद्गा॑यति।
मन॑सा॒ प्रति॑हरति।
मन॑ इ॒व हि प्र॒जाप॑तिः।
प्र॒जाप॑ते॒राप्त्यै॑।
दे॒वा वै स॒र्पाः।
तेषा॑मि॒यꣳ राज्ञी॑।
यत्स॑र्पर॒ाज्ञिया॑ ऋ॒ग्भिः स्तु॒वन्ति॑।
अ॒स्यामे॒व प्रति॑तिष्ठन्ति॥ २॥

((anna̍me̱vāva̍rundhate ।
mana̍sā̱ prastau̍ti ।
mana̱sodgā̍yati ।
mana̍sā̱ prati̍harati ।
mana̍ iva̱ hi pra̱jāpa̍tiḥ ।
pra̱jāpa̍te̱rāptyai̎ ।
de̱vā vai sa̱rpāḥ ।
teṣā̍mi̱yam̐ rājñī̎ ।
yatsa̍rpara̱jñiya̍ ṛ̱gbhiḥ stu̱vanti̍ ।
a̱syāme̱va prati̍tiṣṭhanti ॥ 2 ॥))

**[[2-2-6-3]]**

च॒तु॑र्होतॄ॒न्होता॒ व्याच॑ष्टे।
स्तु॒तमनु॑शꣳसति॒ शान्त्यै॑।
अन्तो॒ वा ए॒ष य॒ज्ञस्य॑।
यद्द॑श॒मम॑हः।
ए॒तत्खलु॒ वै दे॒वानाꣳ॑ पर॒मं गुह्यं॒ ब्रह्म॑।
यच्च॒तु॑र्होतारः।
द॒श॒मेऽह॒ꣳश्चतु॑र्होतॄ॒न्व्याच॑ष्टे।
य॒ज्ञस्यै॒वान्तं॑ ग॒त्वा।
प॒र॒मं दे॒वानां॒ गुह्यं॒ ब्रह्मा॒व॑रुन्धे।
तदे॒व प्र॑का॒शं ग॑मयति॥ ३॥

((catu̍rhotṝ̱nhotā̱ vyāca̍ṣṭe ।
stu̱tamanu̍śam̐sati̱ śāntyai̎ ।
anto̱ vā e̱ṣa ya̱jñasya̍ ।
yadda̍śa̱mama̍ha̍ḥ ।
e̱tatkhalu̱ vai de̱vānā̎m̐ para̱maṃ guhya̱ṃ brahma̍ ।
yaccatu̍rhotāraḥ ।
da̱śa̱me'ha̱m̐ścatu̍rhotṝ̱nvyāca̍ṣṭe ।
ya̱jñasyai̱vāntaṃ̍ ga̱tvā ।
pa̱ra̱maṃ de̱vānā̱ṃ guhya̱ṃ brahmāva̍rundhe ।

tade̱va pra̍kā̱śaṃ ga̍mayati ॥ 3 ॥))

**[[2-2-6-4]]**

त॒दे॑नं प्रका॒शं ग॒तम्।
प्र॒का॒शं प्र॒जानाँ॑ गमयति॥
वाचं॑ यच्छति।
य॒ज्ञस्य॒ धृत्यै॑।
य॒ज॒मा॒नदे॒व॒त्यं॑ वा अहः॑।
भ्रा॒तृ॒व्य॒दे॒व॒त्या॑ रात्रिः॑।
अह्ना॒ रात्रिं॑ ध्यायेत्।
भ्रातृ॑व्यस्यै॒व तल्लो॒कं वृ॑ङ्क्ते।
यद्दिवा॒ वाचं॑ विसृ॒जेत्।
अह॒र्भ्रातृ॑व्या॒योच्छिꣳ॑षेत्।
यन्नक्तं॑ विसृ॒जेत्।
रात्रिं॒ भ्रातृ॑व्या॒योच्छिꣳ॑षेत्।
अ॒धि॒वृ॒क्ष॒सू॒र्ये वाच॒ं विसृ॑जति।
ए॒ताव॑न्तमे॒वास्मै॑ लो॒कमुच्छिꣳ॑षति।
याव॑दादि॒त्यो॑ऽस्त॒मेति॑॥ ४॥
पृश्नि॑ तिष्ठन्ति गमयति शिꣳ॑षे॒त्पञ्च॑ च॥ ६॥

((tade̍naṃ prakā̱śaṃ ga̱tam ।
pra̱kā̱śaṃ pra̱jānā̃̍ gamayati ॥
vāca̍ṃ yacchati ।
ya̱jñasya̱ dhṛtyai̍ ।
ya̱ja̱mā̱na̱de̱va̱tya̍ṃ vā aha̍ḥ ।
bhrā̱tṛ̱vya̱de̱va̱tyā̍ rātri̍ḥ ।
ahnā̱ rātri̍ṃ dhyāyet।
bhrātṛ̍vyasyai̱va tallo̱kaṃ vṛ̍ṅkte ।
yaddivā̱ vāca̍ṃ visṛ̱jet ।
aha̱rbhrātṛ̍vyā̱yocchim̐̍ṣet ।
yannakta̍ṃ visṛ̱jet ।
rātri̱ṃ bhrātṛ̍vyā̱yocchim̐̍ṣet ।
a̱dhi̱vṛ̱kṣa̱sū̱rye vāca̱ṃ visṛ̍jati ।
e̱tāva̍ntame̱vāsmai̍ lo̱kamucchim̐̍ṣati ।
yāva̍dādi̱tyo̍'sta̱meti̍ ॥ 4 ॥
pṛśni̍ tiṣṭhanti gamayati śim̐̍ṣe̱tpañca̍ ca ॥ 6 ॥))

**[[2-2-7-1]]**

प्र॒जाप॑तिः प्र॒जा अ॑सृजत।
ताः सृ॒ष्टाः सम॑श्लिष्यन्।
ता रू॒पेणानु॒प्रावि॑शत्।
तस्मा॑दाहुः।
रू॒पं वै प्र॒जाप॑तिरिति॑।
ता नाम्नाऽनु॒प्रावि॑शत्।
तस्मा॑दाहुः।
नाम॒ वै प्र॒जाप॑तिरिति॑।
तस्मा॒दप्या॑ऽमि॒त्रौ स॒ङ्गत्य॑।
नाम्ना॒ चेद्ध्वये॑ते॥ १॥

((pra̱jāpa̍tiḥ pra̱jā a̍sṛjata ।
tāḥ sṛ̱ṣṭāḥ sama̍śliṣyan ।
tā rū̱peṇānu̱prāvi̍śat ।
tasmā̍dāhuḥ ।
rū̱paṃ vai pra̱jāpa̍ti̱riti̍ ।
tā nāmnā'nu̱prāvi̍śat ।
tasmā̍dāhuḥ ।
nāma̱ vai pra̱jāpa̍ti̱riti̍ ।
tasmā̱dapyā̍'mi̱trau sa̱ṃgatya̍ ।
nāmnā̱ ceddhvaye̍te ॥ 1 ॥))

**[[2-2-7-2]]**

मि॒त्रमे॒व भ॑वतः।
प्र॒जाप॑तिर्दे॒वासु॒रान॑सृजत।
स इन्द्र॒मपि॒ नास॑सृजत।
तं दे॒वा अ॑ब्रुवन्।
इन्द्रं॑ नो जन॒येति॑।
स आ॒त्मन्निन्द्र॒मप॑श्यत्।
तम॑सृजत।
तं त्रि॒ष्टुग्वी॒र्यं॑ भू॒त्वाऽनु॒प्रावि॑शत्।
तस्य॒ वज्रः॑ पञ्चद॒शो हस्त॒ आप॑द्यत।
तेनो॒दय्यासु॑रान॒भ्य॑भवत्॥ २॥

((mi̱trame̱va bha̍vataḥ ।
pra̱jāpa̍tirdevāsu̱rāna̍sṛjata ।
sa indra̱mapi̱ nāsa̍sṛjata ।
taṃ de̱vā a̍bruvan ।
indra̍ṃ no jana̱yeti̍ ।
sa ā̱tmannindra̍mapaśyat ।
tama̍sṛjata ।
taṃ tri̱ṣṭugvīrya̍ṃ bhū̱tvā'nu̱prāvi̍śat ।
tasya̱ vajra̍ḥ pañcada̱śo hasta̱ āpa̍dyata ।
teno̱dayyāsu̍rāna̱bhya̍bhavat ॥ 2 ॥))

**[[2-2-7-3]]**

य ए॒वं वेद॑।
अ॒भि भ्रातृ॑व्यान्भवति।
ते दे॒वा असु॑रैर्वि॒जित्य॑।
सु॒व॒र्गं लो॒कमा॑यन्।
तेऽमुष्मि॑ँल्लो॒के व्य॑क्षुध्यन्।

ते᳚ऽब्रुवन्।
अ॒मुतः॑ प्रदान॒ं वा उप॑जिजीवि॒मेति॑।
ते स॒प्तहो॑तारं य॒ज्ञं वि॒धाया॒यास्य᳚म्।
आ॒ङ्गी॒रसं प्राहि॑ण्वन्।
ए॒तेना॒मुत्र॑ कल्प॒येति॑॥ ३॥

((ya e̱vaṃ vedá |
a̱bhi bhrātṛ́vyānbhavati |
te de̱vā asúrairvi̱jityá |
su̱va̱rgaṃ lo̱kamáyan|
té'muṣmim̐̈llo̱ke vyákṣudhyan|
tē̈'bruvan |
a̱mutáḥ pradāna̱ṃ vā upájijīvi̱metí |
te sa̱ptahótāraṃ ya̱jñaṃ vi̱dhāyā̱yāsyām̈ |
ā̱ṅgī̱ra̱saṃ prāhíṇvan |
e̱tenā̱mutrá kalpa̱yetí || 3 ||))

**[[2-2-7-4]]**
तस्य॒ वा इ॒यं क्लृप्तिः॑।
यदि॒दं किंच॑।
य ए॒वं वेद॑।
कल्प॑तेऽस्मै।
स वा अ॒यं म॑नु॒ष्ये॑षु य॒ज्ञः स॒प्तहो॑ता।
अ॒मुत्र॑ स॒द्भ्यो दे॒वेभ्यो॑ ह॒व्यं व॑हति।
य ए॒वं वेद॑।
उपै॑नं य॒ज्ञो न॑मति।
सो॑ऽमन्यत।
अ॒भि वा इ॒मे᳚ऽस्माँ᳚ल्लो॒काद॒मुं लो॒कं क॑मिष्यन्त॒ इति॑।
स वाच॑स्पते॒ हृदिति॒ व्याह॑रत्।
तस्मा᳚त्पु॒त्रो हृद॑यम्।
तस्मा॑द॒स्माल्लो॒काद॒मुं लो॒कं नाभिका॑मयन्ते।
पु॒त्रो हि हृद॑यम्॥ ४॥
ह्वये॑ते अभवत्कल्प॒येतीति॑ च॒त्वारि॑ च॥ ७॥

((tasya̱ vā i̱yaṃ kḷptiḥ́ |
yadi̱daṃ kiṃcá |
ya e̱vaṃ vedá |
kalpáte'smai |
sa vā a̱yaṃ mánu̱ṣyéṣu ya̱jñaḥ sa̱ptahótā |
a̱mutrá sa̱dbhyo de̱vebhyó ha̱vyaṃ váhati |
ya e̱vaṃ vedá |
upáinaṃ ya̱jño námati |
só'manyata |
a̱bhi vā i̱mē̈'smām̐̈llo̱kāda̱muṃ lo̱kaṃ kámiṣyanta̱ ití |
sa vācáspate̱ hṛditi̱ vyāhárat |
tasmā̈tpu̱tro hṛdáyam |
tasmáda̱smāllo̱kāda̱muṃ lo̱kaṃ nābhikámayante |
pu̱tro hi hṛdáyam || 4 ||
hvayéte abhavatkalpa̱yetīti̱ ca̱tvāri̱ ca || 7 ||))

**[[2-2-8-1]]**
दे॒वा वै च॒तुर्हो॑तृभिर्य॒ज्ञम॑तन्वत।
ते वि पा॒प्मना॒ भ्रातृ॑व्ये॒णाज॑यन्त।
अ॒भि सु॑व॒र्गं लो॒कम॑जयन्।
य ए॒वं वि॒द्वाꣳश्च॒तुर्हो॑तृभिर्य॒ज्ञं त॑नु॒ते।
वि पा॒प्मना॒ भ्रातृ॑व्येण जयते।
अ॒भि सु॑व॒र्गं लो॒कं ज॑यति।
ष॒ड्ढो॒त्रा प्राय॒णीय॒मासा॑दयति।
अ॒मुष्मै॒ वै लो॒काय॒ ष॒ड्ढो॑ता।
घ्नन्ति॒ खलु॒ वा ए॒तत्सोम᳚म्।
यद॑भिषु॒ण्वन्ति॑॥ १॥

((de̱vā vai catúrhotṛbhirya̱jñamátanvata |
te vi pāpmanā̱ bhrātṛ́vye̱ṇājáyanta |
a̱bhi súva̱rgaṃ lo̱kamájayan |
ya e̱vaṃ vi̱dvām̐ścatúrhotṛbhirya̱jñaṃ tánu̱te |
vi pāpmanā̱ bhrātṛ́vye̱ṇa jayate |
a̱bhi súva̱rgaṃ lo̱kaṃ jáyati |
ṣa̱ḍḍhō̱trā prāya̱ṇīya̱māsádayati |
a̱muṣmai̱ vai lo̱kāya̱ ṣa̱ḍḍhótā |
ghnanti̱ khalu̱ vā e̱tatsomām̈ |
yadábhiṣu̱ṇvantí || 1 ||))

**[[2-2-8-2]]**
ऋ॒जु॒धैवैन॑म॒मुं लो॒कं ग॑मयति।
च॒तुर्हो॑त्राऽऽति॒थ्यम्।
य॒शो॒ वै च॒तुर्हो॑ता।
यश॑ ए॒वात्मन्ध॑त्ते।
प॒ञ्चहो॑त्रा प॒शुमुप॑सादयति।
सु॒व॒र्ग्यो᳚ वै प॒ञ्चहो॑ता।
यज॑मानः प॒शुः।
यज॑मानमे॒व सु॑व॒र्गं लो॒कं ग॑मयति।
ग्रहा᳚न्गृही॒त्वा स॒प्तहो॑तारं जुहोति।
इ॒न्द्रि॒यं वै स॒प्तहो॑ता॥ २॥

((ṛ̱ju̱dhaivainámama̱muṃ lo̱kaṃ gámayati |
catúrhotrā''ti̱thyam |
yaśo̱ vai catúrhotā |
yaśá e̱vātmandhátte |

pañca̍hotrā pa̱śumupa̍sādayati ।
su̱va̱rgyo̍ vai pañca̍hotā ।
yaja̍mānaḥ pa̱śuḥ ।
yaja̍mānameva su̍va̱rgaṃ lo̱kaṃ ga̍mayati ।
gra̱hā᳚ngṛhī̱tvā sa̱ptaho̍tāraṃ juhoti ।
i̱ndri̱yaṃ vai sa̱ptaho̍tā ॥ 2 ॥))

**[[2-2-8-3]]**

इ̱न्द्रि̱यमे̱वात्मन्ध॑त्ते।
यो वै च॒तुर्हो॑तॄननुसव॒नं त॒र्पय॑ति।
तृप्य॑ति प्र॒जया॑ प॒शुभिः॑।
उपै॑नꣳ सोमपी॒थो न॑मति।
ब॒हि॒ष्प॒व॒मा॒ने दश॑होतार॒ं व्याच॑क्षीत।
माध्य॑न्दि॒ने पव॑मा॒ने च॒तुर्हो॑तारम्।
आर्भ॑वे॒ पव॑मा॒ने पञ्च॑होतारम्।
पि॒तृ॒य॒ज्ञे षड्ढो॑तारम्।
य॒ज्ञा॒य॒ज्ञि॒य॑स्य स्तो॒त्रे स॒प्तहो॑तारम्।
अ॒नु॒स॒व॒नमे॒वैना॒ꣳस्तर्पयति॥ ३॥

((i̱ndri̱yame̱vātmandha̍tte ।
yo vai catu̍rhotṝnanusava̱naṃ ta̱rpaya̍ti ।
tṛpya̍ti pra̱jaya̍ pa̱śubhi̍ḥ ।
upa̍inam̐ somapī̱tho na̍mati ।
ba̱hi̱ṣpa̱va̱mā̱ne daśa̍hotāra̱ṃ vyāca̍kṣīta ।
mādhya̍ṃdine̱ pava̍māne̱ catu̍rhotāram ।
ārbha̍ve̱ pava̍māne̱ pañca̍hotāram ।
pi̱tṛ̱yajñe ṣa̱ḍḍho̍tāram ।
ya̱jñā̱ya̱jñi̱ya̍sya sto̱tre sa̱ptaho̍tāram ।
a̱nu̱sa̱va̱name̱vainā̱m̐starpayati ॥ 3 ॥))

**[[2-2-8-4]]**

तृप्य॑ति प्र॒जया॑ प॒शुभिः॑।
उपै॑नꣳ सोमपी॒थो न॑मति।
दे॒वा वै च॒तुर्हो॑तृभिः स॒त्रमा॑सत।
ऋद्धि॑परिमित॒ं यश॑स्कामाः।
ते᳚ऽब्रुवन्।
यन्नः॑ प्रथ॒मं यश॑ ऋच्छात्।
सर्वे॑षां न॒स्तत्स॒हास॒दिति॑।
सोम॒श्चतु॑र्होत्रा।
अ॒ग्निः पञ्च॑होत्रा।
धा॒ता षड्ढो᳚त्रा॥ ४॥

((tṛpya̍ti pra̱jaya̍ pa̱śubhi̍ḥ ।
upa̍inam̐ somapī̱tho na̍mati ।
de̱vā vai catu̍rhotṛbhiḥ sa̱trama̍sata ।
ṛddhi̍parimita̱ṃ yaśa̍skāmāḥ ।
te᳚'bruvan ।
yanna̍ḥ pratha̱maṃ yaśa̍ ṛcchāt ।
sarve̍ṣāṃ na̱statsa̱hāsa̱diti̍ ।
soma̱ścatu̍rhotrā ।
a̱gniḥ pañca̍hotrā ।
dhā̱tā ṣa̱ḍḍho᳚trā ॥ 4 ॥))

**[[2-2-8-5]]**

इन्द्रः॑ स॒प्तहो᳚त्रा।
प्र॒जाप॑ति॒र्दश॑होत्रा।
तेषा॒ꣳ सोम॒ꣳ राजा॑न॒ं यश॑ आर्च्छत्।
तन्न्य॑कामयत।
तेनाप᳚क्रामत्।
तेन॑ प्र॒लाय॑मचरत्।
तं दे॒वाः प्रै॒षैः प्रै॒षम॑ैच्छन्।
तत्प्रै॒षाणा᳚ं प्रै॒षत्वम्।
नि॒वि॒द्भिर्न्य॑वेदयन्।
तन्नि॒विदा᳚ं नि॒वि॒त्त्वम्॥ ५॥

((indra̍ḥ sa̱ptaho᳚trā ।
pra̱jāpa̍ti̱rdaśa̍hotrā ।
te̱ṣā̱m̐ soma̱m̐ rāja̍nam̱ yaśa̍ ārcchat ।
tannya̍kāmayata ।
tenāpa᳚krāmat ।
tena̍ pra̱lāya̍macarat ।
taṃ de̱vāḥ prai̱ṣaiḥ prai̱ṣa̍maicchan।
tatprai̱ṣāṇā᳚ṃ prai̱ṣatvam ।
ni̱vidbhi̱rnya̍vedayan।
tanni̱vidā᳚ṃ nivi̱ttvam ॥ 5 ॥))

**[[2-2-8-6]]**

आ॒प्रीभि॑राप्नुवन्।
तदा॒प्रीणा॑माप्रि॒त्वम्।
तम॑घ्नन्।
तस्य॒ यशो॒ व्य॑गृह्णत।
ते ग्रहा॑ अभवन्।
तद्ग्रहा॑णां ग्रह॒त्वम्।
यस्यैवं वि॒दुषो॒ ग्रहा॑ गृ॒ह्यन्ते᳚।
तस्य॒ त्वेव॑ गृही॒ताः।
ते᳚ऽब्रुवन्।
यो वै न॒ः श्रेष्ठो॑ऽभू᳚त्॥ ६॥

((ā̱prībhi̍rāpnuvan ।
tadā̱prīṇā̍māpri̱tvam ।

tamághnan ।
tasya̱ yaśo̱ vyágr̥hṇata ।
te grahā́ abhavan ।
tadgrahā́ṇāṃ graha̱tvam ।
yasyai̱vaṃ vi̱duṣo̱ grahā́ gr̥hyantē̎ ।
tasya̱ tvéva gŕ̥hī̱tāḥ ।
tē̎'bruvan ।
yo vai na̱ḥ śreṣṭho'bhū̎t ॥ 6 ॥))

**[[2-2-8-7]]**

तम॑वधिष्म।
पुन॑रि॒मꣳ सु॑वामहा॒ इति॑।
तं छन्दो॑भिरसुवन्त।
तच्छन्द॑सां छन्द॒स्त्वम्।
साम्ना॒ समान॑यन्।
तत्साम्न॑ः साम॒त्वम्।
उ॒क्थैरुद॑स्थापयन्।
तदु॒क्थाना॑मुक्थ॒त्वम्।
य ए॒वं वेद॑।
प्रत्ये॒व ति॑ष्ठति॥ ७॥

((tamávadhiṣma ।
punári̱maꣳ súvāmahā̱ ití ।
taṃ chandóbhirasuvanta ।
tacchandásāṃ chanda̱stvam ।
sāmnā̱ samānáyan ।
tatsāmnáḥ sāma̱tvam ।
u̱kthairudásthāpayan ।
tadu̱kthānā́mukthā̱tvam ।
ya e̱vaṃ vedá ।
pratye̱va tíṣṭhati ॥ 7 ॥))

**[[2-2-8-8]]**

सर्व॒मायु॑रिति।
सोमो॒ वै यश॑ः।
य ए॒वं वि॒द्वान्त्सोम॑मा॒गच्छ॑ति।
यश॑ ए॒वैन॑मृच्छति।
तस्मा॑दाहुः।
यश्चै॒वं वेद॒ यश्च॒ न।
ताव॒ुभौ सोम॒माग॑च्छतः।
सोमो॒ हि यश॑ः।
तं त्वा व यश॑ ऋच्छ॒तीत्या॑हुः।
यः सोमे॒ सोमं॒ प्राहेति॑।
तस्मा॒त्सोमे॒ सोम॒ः प्रोच्य॑ः।
यश॑ ए॒वैन॑मृच्छति॥ ८॥
अ॒भि॒षु॒ण्वन्ति॑ स॒प्तहो॑ता तर्पयति॒ षड्ढो॑त्रा
निवि॒त्त्वमभू॑त्तिष्ठति॒ प्राहेति॒ द्वे च॑॥ ८॥

((sarva̱māyúreti ।
somo̱ vai yaśáḥ ।
ya e̱vaṃ vi̱dvāntsomámā̱gacchati ।
yaśá e̱vainámr̥cchati ।
tasmā́dāhuḥ ।
yaścai̱vaṃ veda̱ yaśca̱ na ।
tāvu̱bhau soma̱māgácchataḥ ।
somo̱ hi yaśáḥ ।
taṃ tvā va yaśá r̥ccha̱tītyā́huḥ ।
yaḥ some̱ soma̱ṃ prāhetí ।
tasmā̱tsome̱ soma̱ḥ procyáḥ ।
yaśá e̱vainámr̥cchati ॥ 8 ॥
a̱bhi̱ṣu̱ṇvantí sa̱ptahótā tarpayati̱ ṣaḍḍhō̎trā
nivi̱ttvamabhū̎ttiṣṭhati̱ prāheti̱ dve cá ॥ 8 ॥))

**[[2-2-9-1]]**

इ॒दं वा अग्रे॒ नैव किंच॒नासी॑त्।
न द्यौरा॑सीत्।
न पृ॑थि॒वी।
नान्तरि॑क्षम्।
तदस॑दे॒व सन्मनो॑ऽकुरुत॒ स्यामिति॑।
तद॑तप्यत।
तस्मा॑त्तेपा॒नाद्धू॒मो॑ऽजायत।
तद्भूयो॑ऽतप्यत।
तस्मा॑त्तेपा॒नाद॒ग्निर॑जायत।
तद्भूयो॑ऽतप्यत॥ १॥

((i̱daṃ vā agre̱ naiva kiṃca̱nāsī̎t ।
na dyaurā́sīt ।
na pŕ̥thi̱vī ।
nāntarikṣam।
tadasáde̱va sanmanó'kuruta̱ syāmití ।
tadátapyata ।
tasmā̎ttepā̱nāddhū̱mó'jāyata ।
tadbhūyó'tapyata ।
tasmā̎ttepā̱nāda̱gnirájāyata ।
tadbhūyó'tapyata ॥ 1 ॥))

**[[2-2-9-2]]**

तस्मा॑त्तेपा॒नाज्ज्योति॑रजायत।
तद्भूयो॑ऽतप्यत।
तस्मा॑त्तेपा॒नाद॒र्चिर॑जायत।
तद्भूयो॑ऽतप्यत।

तस्मा᳚त्तेपा॒नान्मरी॑चयोऽजायन्त।
तद्भूयो॑ऽतप्यत।
तस्मा᳚त्तेपा॒नादु॑दा॒रा अ॑जायन्त।
तद्भूयो॑ऽतप्यत।
तद॒भ्रमि॑व॒ सम॑हन्यत॥
तद्व॒स्तिम॑भिनत्॥ २॥

((tasmā̎ttepā̱nājjyoti̍rajāyata |
tadbhūyo̍'tapyata |
tasmā̎ttepā̱nāda̱rcira̍jāyata |
tadbhūyo̍'tapyata |
tasmā̎ttepā̱nānmari̍cayo'jāyanta |
tadbhūyo̍'tapyata |
tasmā̎ttepā̱nādu̍dā̱rā a̍jāyanta |
tadbhūyo̍'tapyata |
tada̱bhrami̍va̱ sama̍hanyata ||
tadva̱stima̍bhinat || 2 ||))

**[[2-2-9-3]]**
स स॑मु॒द्रो॑ऽभवत्।
तस्मा᳚त्समु॒द्रस्य॒ न पि॑बन्ति।
प्र॒जन॑नमिव॒ हि मन्य॑न्ते।
तस्मा᳚त्प॒शोर्जाय॑माना॒दाप॑ः पु॒रस्ता᳚द्यन्ति।
तद्दश॑हो॒ताऽन्व॑सृज्यत।
प्र॒जाप॑ति॒र्वै दश॑होता।
य ए॒वं तप॑सो वी॒र्यँ॑ वि॒द्वाꣳस्तप्य॑ते।
भव॑त्येव।
तद्वा इ॒दमाप॑ः सलि॒लमा॑सीत्।
सो॑ऽरोदीत्प्र॒जाप॑तिः॥ ३॥

((sa sa̍mu̱dro̍'bhavat |
tasmā̎tsamu̱drasya̱ na pi̍banti |
pra̱jana̍namiva̱ hi manya̍nte |
tasmā̎tpa̱śorjāya̍mānā̱dāpa̍ḥ pu̱rastā̎dyanti |
taddaśa̍ho̱tā'nva̍sṛjyata |
pra̱jāpa̍ti̱rvai daśa̍hotā |
ya e̱vaṃ tapa̍so vīrya̍ṃ vi̱dvām̐stapya̍te |
bhava̍tye̱va |
tadvā i̱damāpa̍ḥ sali̱lamā̍sīt |
so̍'rodītpra̱jāpa̍tiḥ || 3 ||))

**[[2-2-9-4]]**
स कस्मा॑ अज्ञि।
यद्य॒स्या अप्र॑तिष्ठाया॒ इति॑।
यद॒प्स्व॑वाप॑द्यत।
सा पृ॑थि॒व्य॑भवत्।
यद्व्यमृ॑ष्ट।
तद॒न्तरि॑क्षमभवत्।
यदू॒र्ध्वमु॒दमृ॑ष्ट।
सा द्यौर॑भवत्।
यदरो॑दीत्।
तद॒नयो॑ रोद॒स्त्वम्॥ ४॥

((sa kasmā̎ ajñi |
yadya̱syā apra̍tiṣṭhāyā̱ iti̍ |
yada̱psva̍vāpa̍dyata |
sā pṛ̍thi̱vya̍bhavat|
yadvyamṛ̍ṣṭa |
tada̱ntari̍kṣamabhavat |
yadū̱rdhvamu̱damṛ̍ṣṭa |
sā dyaura̍bhavat |
yadaro̍dīt |
tada̱nayo̍ roda̱stvam || 4 ||))

**[[2-2-9-5]]**
य ए॒वं वेद॑।
नास्य॑ गृ॒हे रु॑दन्ति।
ए॒तद्वा ए॒षां लो॒कानां॒ जन्म॑।
य ए॒वमे॒षां लो॒कानां॒ जन्म॒ वेद॑।
नैषु लो॒केष्वार्ति॒मार्च्छ॑ति।
स इ॒मां प्र॑ति॒ष्ठाम॑विन्दत।
स इ॒मां प्र॑ति॒ष्ठां वि॒त्त्वाऽका॑मयत प्र॒जाये॒येति॑।
स तपो॑ऽतप्यत।
सो᳚ऽन्तर्वा॑नभवत्।
स ज॒घना॒दसु॑रानसृजत॥ ५॥

((ya e̱vaṃ veda̍ |
nāsya̍ gṛ̱he ru̍danti |
e̱tadvā e̱ṣāṃ lo̱kānā̱ṃ janma̍ |
ya e̱vame̱ṣāṃ lo̱kānā̱ṃ janma̱ veda̍ |
naiṣu lo̱keṣvārti̱mārccha̍ti |
sa i̱māṃ pra̍ti̱ṣṭhāma̍vindata |
sa i̱māṃ pra̍ti̱ṣṭhāṃ vi̱ttvā'kā̍mayata̱ prajā̍ye̱yeti̍ |
sa tapo̍'tapyata |
so̎'ntarvā̍nabhavat|
sa ja̱ghanā̱dasu̍rānasṛjata || 5 ||))

**[[2-2-9-6]]**
तेभ्यो॑ मृ॒न्मये॒ पात्रेऽन्न॑मदुहत्।
याऽस्य॒ सा त॒नूरासी॑त्।

ताम॑पाहत।
सा त॒मि॑स्राऽभवत्।
सो॑ऽकामयत॒ प्रजा॑ये॒येति॑।
स तपो॑ऽतप्यत।
सो᳚ऽन्तर्वा॑नभवत्।
स प्र॒जन॑नादे॒व प्र॒जा अ॑सृजत।
तस्मा॑दि॒मा भूयि॑ष्ठाः।
प्र॒जन॑ना॒द्ध्ये॑ना॒ अ॑सृजत॥ ६॥

((tebhyo̍ mṛnmaye̱ pātre'nna̍maduhat ।
yā'sya̱ sā ta̱nūrāsī᳚t ।
tāmapa̍̍hata ।
sā tami̍srā'bhavat ।
so̍'kāmayata̱ prajā̍̍ye̱yeti̍ ।
sa tapo̍'tapyata ।
so᳚'ntarva̍̍nabhavat ।
sa pra̱jana̍nāde̱va pra̱jā a̍sṛjata ।
tasma̍̍di̱mā bhūyi̍ṣṭhāḥ ।
pra̱jana̍nā̱ddhye̍nā̱ a̍sṛjata ॥ 6 ॥))

**[[2-2-9-7]]**
ताभ्यो॑ दारु॒मये॒ पात्रे॒ पयो॑ऽदुहत।
याऽस्य॒ सा त॒नूरासी᳚त्।
ताम॑पाहत।
सा ज्योत्स्ना॑ऽभवत्।
सो॑ऽकामयत॒ प्रजा॑ये॒येति॑।
स तपो॑ऽतप्यत।
सो᳚ऽन्तर्वा॑नभवत्।
स उ॑पप॒क्षाभ्या॑मे॒वर्तून॑सृजत।
तेभ्यो॑ रज॒ते पात्रे॑ घृ॒तम॑दुहत्।
याऽस्य॒ सा त॒नूरासी᳚त्।

((tābhyo̍ dāru̱maye̱ pātre̱ payo̍'duhata ।
yā'sya̱ sā ta̱nūrāsī᳚t ।
tāmapa̍̍hata ।
sā jyotsna̍̍'bhavat ।
so̍'kāmayata̱ prajā̍̍ye̱yeti̍ ।
sa tapo̍'tapyata ।
so᳚'ntarva̍̍nabhavat ।
sa u̍papa̱kṣābhya̍̍me̱vartūna̍sṛjata ।
tebhyo̍ raja̱te pātre̍ ghṛ̱tama̍duhat ।
yā'sya̱ sā ta̱nūrāsī᳚t ।))

**[[2-2-9-8]]**
तम॑पाहत।
सो॑ऽहोरा॒त्रयो᳚ः स॒न्धिर॑भवत्।
सो॑ऽकामयत॒ प्रजा॑ये॒येति॑।
स तपो॑ऽतप्यत।
सो᳚ऽनतर्वा॑नभवत्।
स मुखा᳚द्दे॒वान॑सृजत।
तेभ्यो॒ हरि॑ते॒ पात्रे॒ सोम॑मदुहत।
याऽस्य॒ सा तनूरासी᳚त्।
ताम॑पाहत।
तदह॑रभवत्॥ ८॥

((tamapa̍̍hata ।
so̍'horā̱trayo᳚ḥ sa̱ndhira̍bhavat ।
so̍'kāmayata̱ prajā̍̍ye̱yeti̍ ।
sa tapo̍'tapyata ।
so᳚'natarva̍̍nabhavat ।
sa mukhā᳚dde̱vāna̍sṛjata ।
tebhyo̱ hari̍te̱ pātre̱ soma̍maduhata ।
yā'sya̱ sā tanūrāsī᳚t ।
tāmapa̍̍hata ।
tadaha̍rabhavat ॥ 8 ॥))

**[[2-2-9-9]]**
ए॒ते वै प्र॒जाप॑ते॒र्दोहा᳚ः।
य ए॒वं वेद॑।
दु॒ह ए॒व प्र॒जाः।
दि॒वा॒ वै नो॑ऽभू॒दिति॑।
त॒द्दे॒वाना᳚ं दे॒व॒त्वम्।
य ए॒वं दे॒वाना᳚ं दे॒व॒त्वं वेद॑।
दे॒व॒वा॑ने॒व भ॑वति।
ए॒तद्वा अ॑होरा॒त्राणा᳚ं जन्म॑।
य ए॒वम॑होरा॒त्राणा᳚ं जन्म॒ वेद॑।
नाहो॑रा॒त्रेष्वार्ति॒मार्च्छ॑ति॥ ९॥

((e̱te vai pra̱jāpa̍te̱rdohā᳚ḥ ।
ya e̱vaṃ veda̍ ।
du̱ha e̱va pra̱jāḥ ।
divā̱ vai no̍'bhū̱diti̍ ।
tadde̱vānā᳚ṃ deva̱tvam ।
ya e̱vaṃ de̱vānā᳚ṃ deva̱tvaṃ veda̍ ।
de̱vava̍̍ne̱va bha̍vati ।
e̱tadvā a̍horā̱trāṇā᳚ṃ janma̍ ।
ya e̱vama̍horā̱trāṇā᳚ṃ janma̱ veda̍ ।
nāho̍rā̱treṣvārti̱mārccha̍ti ॥ 9 ॥))

**[[2-2-9-10]]**

अ॒स॒तोऽधि॒ मनो॑ऽसृज्यत।
मनः॑ प्र॒जाप॑तिमसृजत।
प्र॒जाप॑तिः प्र॒जा अ॑सृजत।
तद्वा इ॒दं मन॑स्ये॒व प॑र॒मं प्रति॑ष्ठितम्।
यदि॒दं किंच॑।
तदे॒तच्छ्वो॑वस्य॒सं नाम॒ ब्रह्म॑।
व्यु॒च्छन्ती᳚ व्युच्छन्त्यस्मै॒ वस्य॑सी वस्यसी॒ व्यु॑च्छति।
प्रजा॑यते प्र॒जया॑ प॒शुभिः॑।
प्र प॑रमे॒ष्ठिनो॒ मात्रा॑माप्नोति।
य ए॒वं वेद॑॥ १०॥
अ॒ग्निर॑जायत॒ तद्भूयो॑ऽतप्यताभिनदरोदीत्प्र॒जाप॑ती
रोद॒स्त्वम॑सृ॒ज॒तासृ॑जत घृतम॑दुह॒द्याऽस्य॒ सा
त॒नूरासी॒दह॑रभवद्दृच्छति॒ वेद॑॥ ९॥
इ॒दं धू॒मो॑ऽग्निर्ज्योति॑रर्चिर्मरी॑चय उ॒दा॒रास्तद॒भ्रꣳ स
ज॒घना॒त्सा तमि॑स्रा॒ सप्रजन॑ना॒त्सा जोत्स्ना॒ स
उ॑पप॒क्षाभ्या॒ꣳ सो॑ऽहोरा॒त्रयोः॑ स॒न्धिः स
मुखा॒त्तदह॑र्दे॒ववा॑न्मृन्मये॑ दारु॒मये॑ रज॒ते हरि॑ते
तेभ्य॒स्ताभ्यो॒ द्वे तेऽन्नं॒ पयो॑ घृ॒तꣳ सोम॑म्॥

((asa̱to'dhi̱ mano̍'sṛjyata |
mana̍ḥ pra̱jāpa̍timasṛjata |
pra̱jāpa̍tiḥ pra̱jā a̍sṛjata |
tadvā i̱daṃ mana̍sye̱va pa̍ra̱maṃ prati̍ṣṭhitam |
yadi̱daṃ kiṃca̍ |
tade̱tacchvo̍vasya̱saṃ nāma̱ brahma̍ |
vyu̱cchantī̎ vyucchantyasmai̱ vasya̍sī vasyasī̱ vyu̍cchati |
prajā̍yate pra̱jayā̍ pa̱śubhi̍ḥ |
pra pa̍rame̱ṣṭhino̱ mātrā̍māpnoti |
ya e̱vaṃ veda̍ || 10 ||
a̱gnira̍jāyata̱ tadbhūyo̍'tapyatābhinadarodītpra̱jāpa̍tī rodastvama̍sṛ̱ja̱tāsṛ̍jata ghṛtama̍duha̱dyā'sya̱ sā ta̱nūrāsī̱daha̍rabhavaddṛcchati̱ veda̍ || 9 ||
i̱daṃ dhū̱mo̍'gnirjyoti̍rarcirmarī̍caya u̱dā̱rāstada̱bhraꣳ sa ja̱ghanā̱tsā tami̍srā̱ saprajana̍nā̱tsā jotsnā̱ sa u̍papa̱kṣābhyā̱ꣳ so̍'horā̱trayo̍ḥ sa̱ndhiḥ sa mukhā̱ttadaha̍rde̱vavā̎nmṛnmaye̍ dāru̱maye̍ raja̱te hari̍te̱ tebhya̱stābhyo̱ dve te'nnaṃ̱ payo̍ ghṛ̱taꣳ somā̎m ||))

**[[2-2-10-1]]**

प्र॒जाप॑ति॒रिन्द्र॑मसृजताऽऽनुजाव॒रं दे॒वाना᳚म्।
तं प्राहि॑णोत्।
परे॑हि।
ए॒तेषा᳚ं दे॒वाना॒मधि॑पतिरे॒धीति॑।
तं दे॒वा अ॑ब्रुवन्।
कस्त्वमसि॑।
व॒यं वै त्वच्छ्रेया॑ꣳसः स्म॒ इति॑।
सो᳚ऽब्रवीत्।
कस्त्वमसि॑ व॒यं वै त्वच्छ्रेया॑ꣳसः स्म॒ इति॑ मा दे॒वा अ॑वोच॒न्निति॑।
अथ॒ वा इ॒दं तर्हि॑ प्र॒जाप॑तौ॒ हर॑ आसीत्॥ १॥

((pra̱jāpa̍ti̱rindra̍masṛjatā''nujāva̱raṃ de̱vānā̎m |
taṃ prāhi̍ṇot |
pare̍hi |
e̱teṣā̎ṃ de̱vānā̱madhi̍patire̱dhīti̍ |
taṃ de̱vā a̍bruvan |
kastvamasi̍ |
va̱yaṃ vai tvacchreyā̍ꣳsaḥ sma̱ iti̍ |
so̎'bravīt |
kastvamasi̍ va̱yaṃ vai tvacchreyā̍ꣳsaḥ sma̱ iti̍ mā de̱vā a̍vocanniti̍ |
atha̱ vā i̱daṃ tarhi̍ pra̱jāpa̍tau̱ hara̍ āsīt || 1 ||))

**[[2-2-10-2]]**

यद॒स्मिन्ना॑दि॒त्ये।
तदे॑नमब्रवीत्।
ए॒तन्मे॒ प्रय॑च्छ।
अथा॒हमे॒तेषा᳚ं दे॒वाना॒मधि॑पतिर्भ॑विष्या॒मीति॑।
को॑ऽहꣳ स्या॒मित्य॑ब्रवीत्।
ए॒तत्प्र॒दायेति॑।
ए॒तत्स्या॒ इत्य॑ब्रवीत्।
यदे॒तद्ब्रवी॒षीति॑।
को ह॒ वै नाम॑ प्र॒जाप॑तिः।
य ए॒वं वेद॑॥ २॥

((yada̱sminnā̍di̱tye |
tade̍namabravīt |
e̱tanme̱ praya̍ccha |
athā̱hame̱teṣā̎ṃ de̱vānā̱madhi̍patirbhaviṣyā̱mīti̍ |
ko̍'haꣳ syā̱mitya̍bravīt |
e̱tatpra̱dāyeti̍ |
e̱tatsyā̱ itya̍bravīt |
yade̱tadbravī̱ṣīti̍ |
ko ha̱ vai nāma̍ pra̱jāpa̍tiḥ |
ya e̱vaṃ veda̍ || 2 ||))

**[[2-2-10-3]]**

वि॒दु॒रेनं॒ नाम्ना॑।
तद॑स्मै रु॒क्मं कृ॒त्वा प्रत्य॑मुञ्चत्।
तत॒ो वा इन्द्रो॑ दे॒वाना॒मधि॑पतिरभवत्।
य ए॒वं वेद॑।
अधि॑पतिरे॒व स॑मा॒नानां॑ भवति।
सो॑ऽमन्यत।
किं कि॒ं वा अ॑कर॒मिति॑।
स च॒न्द्रं म॒ आह॒रेति॒ प्राल॑पत्।
तच्च॒न्द्रम॑सश्चन्द्र॒मस्त्वम्।
य ए॒वं वेद॑॥ ३॥

((vi̱durénaṃ nāmnā̎ ।
tadásmai ru̱kmaṃ kṛ̱tvā pratyámuñcat ।
tato̱ vā indró de̱vānā̱madhi̍patirabhavat ।
ya e̱vaṃ vedá ।
adhi̍patire̱va sámā̱nānā̎m bhavati ।
só'manyata ।
kiṃ ki̱ṃ vā ákara̱miti̍ ।
sa ca̱ndraṃ ma̱ āha̱reti̱ prāl̍apat ।
taccandramásaścandra̱mastvam ।
ya e̱vaṃ vedá ॥ 3 ॥))

**[[2-2-10-4]]**

च॒न्द्रवा॑ने॒व भ॑वति॥
तं दे॒वा अ॑ब्रुवन्।
सु॒वीर्यो॑ मर्या॒ यथा॑ गोपा॒यत॒ इति॑।
तत्सूर्य॑स्य सू॒र्य॒त्वम्।
य ए॒वं वेद॑।
नैनं॑ दभ्नोति॥
कश्च॒नास्मि॒न्वा इ॒दमि॑न्द्रि॒यं प्रत्य॑स्था॒दिति॑।
तदिन्द्र॑स्येन्द्र॒त्वम्।
य ए॒वं वेद॑।
इ॒न्द्रि॒या॒व्य॑ेव भ॑वति॥ ४॥

((ca̱ndravā́ne̱va bhávati ॥
taṃ de̱vā ábruvan।
su̱vīryó maryā̱ yathā́ gopā̱yata̱ iti̍ ।
tatsūryásya sūrya̱tvam ।
ya e̱vaṃ vedá ।
naina̍ṃ dabhnoti ॥
kaśca̱nāsmi̱nvā i̱dami̍ndri̱yaṃ pratyásthā̱diti̍ ।
tadindrásyendra̱tvam ।
ya e̱vaṃ vedá ।
i̱ndri̱yā̱vyéva bhávati ॥ 4 ॥))

**[[2-2-10-5]]**

अ॒यं वा इ॒दं प॑र॒मो॑ऽभू॒दिति॑।
तत्प॑रमे॒ष्ठिनः॑ परमेष्ठि॒त्वम्।
य ए॒वं वेद॑।
प॒र॒मामे॒व काष्ठां॑ गच्छति।
तं दे॒वाः स॑म॒न्तं पर्य॑विशन्।
वस॑वः पु॒रस्ता॑त्।
रु॒द्रा द॑क्षि॒णतः।
आ॒दि॒त्याः प॒श्चात्।
विश्वे॑ दे॒वा उ॑त्तर॒तः।
अङ्गि॑रसः प्र॒त्यञ्चं॑म्॥ ५॥

((a̱yaṃ vā i̱daṃ pára̱mó'bhū̱diti̍ ।
tatpárame̱ṣṭhinaḥ parameṣṭhi̱tvam ।
ya e̱vaṃ vedá ।
pa̱ra̱māme̱va kāṣṭhā̎ṃ gacchati ।
taṃ de̱vāḥ sáma̱ntaṃ paryáviśan।
vasávaḥ pu̱rastā̎t ।
ru̱drā dákṣi̱ṇataḥ ।
ā̱di̱tyāḥ pa̱ścāt ।
viśvé de̱vā úttara̱taḥ ।
aṅgi̍rasaḥ pra̱tyañcā̎m ॥ 5 ॥))

**[[2-2-10-6]]**

सा॒ध्याः परा॑ञ्चम्।
य ए॒वं वेद॑।
उपै॑नꣳ समा॒नाः सं॑विशन्ति।
स प्र॒जाप॑तिरे॒व भू॒त्वा प्र॒जा आव॑यत्।
ता अ॑स्मै॒ नाति॑ष्ठन्ता॒न्नाद्या॑य।
ता मुखं॑ पु॒रस्ता॒त्पश्य॑न्तीः।
द॒क्षि॒णतः पर्या॑यन्।
स द॑क्षि॒णतः पर्य॑वर्तयत।
ता मुखं॑ पु॒रस्ता॒त्पश्य॑न्तीः।
मुखं॑ दक्षि॒णतः॥ ६॥

((sā̱dhyāḥ parā̎ñcam ।
ya e̱vaṃ vedá ।
upainam̐ samā̱nāḥ saṃvi̍śanti ।
sa pra̱jāpátire̱va bhū̱tvā pra̱jā āváyat ।
tā ásmai̱ nātiṣṭhantā̱nnādyā́ya ।
tā mukhaṃ́ pu̱rastā̱tpaśyántīḥ ।
da̱kṣi̱ṇa̱taḥ paryā́yan ।
sa dákṣi̱ṇa̱taḥ paryávartayata ।
tā mukhaṃ́ pu̱rastā̱tpaśyántīḥ ।
mukhaṃ́ dakṣi̱ṇa̱taḥ ॥ 6 ॥))

**[[2-2-10-7]]**

प॒श्चात्पर्या॑यन्।
स प॒श्चात्पर्य॑वर्तयत।
ता मुखं॑ पु॒रस्ता॒त्पश्य॑न्तीः।
मुखं॑ दक्षि॒ण॒तः।
मुखं॑ प॒श्चात्।
उ॒त्त॒र॒तः पर्या॑यन्।
सा उ॑त्तर॒तः पर्य॑वर्तयत।
ता मुखं॑ पु॒रस्ता॒त्पश्य॑न्तीः।
मुखं॑ दक्षि॒ण॒तः।
मुखं॑ प॒श्चात्।
मुख॑मुत्तर॒तः।
ऊर्ध्वा उदा॑यन्।
स उ॒परि॑ष्टा॒न्न्य॑वर्तयत।
ताः स॒र्वतो॑मुखो भू॒त्वाऽऽव॑यत्।
ततो॒ वै तस्मै॑ प्र॒जा अति॑ष्ठन्ता॒न्नाद्या॑य।
य ए॒वं वि॒द्वान्परि॑ च व॒र्तय॑ते॒ नि च॑।
प्र॒जाप॑तिरे॒व भू॒त्वा प्र॒जा अ॑त्ति।
तिष्ठ॑न्तेऽस्मै प्र॒जा अ॒न्नाद्या॑य।
अ॒न्ना॒द ए॒व भ॑वति॥ ७॥
आ॒सी॒द्वेद॑ चन्द्रम॒स्त्वं य ए॒वं वेदे॑न्द्रिया॒व्येव भ॑वति प्र॒त्यञ्चं॒ मुखं॑ दक्षि॒ण॒तो मुखं॑ प॒श्चान्नव॑ च॥ १०॥

((pa̱ścātparyā̍yan ।
sa pa̱ścātparya̍vartayata ।
tā mukhaṃ̍ pu̱rastā̱tpaśya̍ntīḥ ।
mukhaṃ̍ dakṣi̱ṇa̱taḥ ।
mukhaṃ̍ pa̱ścāt ।
u̱tta̱ra̱taḥ paryā̍yan ।
sā u̍ttara̱taḥ parya̍vartayata ।
tā mukhaṃ̍ pu̱rastā̱tpaśya̍ntīḥ ।
mukhaṃ̍ dakṣi̱ṇa̱taḥ ।
mukhaṃ̍ pa̱ścāt ।
mukha̍muttara̱taḥ ।
ūrdhvā udā̍yan ।
sa u̱pari̍ṣṭā̱nnya̍vartayata ।
tāḥ sa̱rvato̍mukho bhū̱tvā''va̍yat ।
tato̱ vai tasmai̍ pra̱jā ati̍ṣṭhantā̱nnādyā̍ya ।
ya e̱vaṃ vi̱dvānpari̍ ca va̱rtaya̍te̱ ni ca̍ ।
pra̱jāpa̍tire̱va bhū̱tvā pra̱jā a̍tti ।
tiṣṭha̍nte'smai pra̱jā a̱nnādyā̍ya ।
a̱nnā̱da e̱va bha̍vati ॥ 7 ॥
ā̱sī̱dveda̍ candrama̱stvaṃ ya e̱vaṃ vede̍ndriyā̱vye̍va bha̍vati pra̱tyañca̱ṃ mukhaṃ̍ dakṣi̱ṇa̱to mukhaṃ̍ pa̱ścānnava̍ ca ॥ 10 ॥))

**[[2-2-11-1]]**

प्र॒जाप॑तिरकामयत ब॒होर्भूया᳚न्त्स्या॒मिति॑।
स ए॒तं दश॑होतारमपश्यत्।
तं प्रायु॑ङ्क्त।
तस्य॒ प्रयु॑क्ति ब॒होर्भूया᳚नभवत्।
यः का॒मये॑त ब॒होर्भूया᳚न्त्स्या॒मिति॑।
स दश॑होतारं॒ प्रयु॑ञ्जीत।
ब॒होरे॒व भूया᳚न्भवति।
सो॑ऽकामयत वी॒रो म॒ आजा॑ये॒तेति॑।
स दश॑होतु॒श्चतु॑र्होतारं॒ निर॑मिमीत।
तं प्रायु॑ङ्क्त॥

((pra̱jāpa̍tirakāmayata ba̱horbhūyā̎ntsyā̱miti̍ ।
sa e̱taṃ daśa̍hotāramapaśyat।
taṃ prāyu̍ṅkta ।
tasya̱ prayu̍kti ba̱horbhūyā̎nabhavat ।
yaḥ kā̱maye̍ta ba̱horbhūyā̎ntsyā̱miti̍ ।
sa daśa̍hotāra̱ṃ prayu̍ñjīta ।
ba̱hore̱va bhūyā̎nbhavati ।
so̍'kāmayata vī̱ro ma̱ ājā̍ye̱teti̍ ।
sa daśa̍hotu̱ścatu̍rhotāra̱ṃ nira̍mimīta ।
taṃ prāyu̍ṅkta ॥))

**[[2-2-11-2]]**

तस्य॒ प्रयु॒क्तीन्द्रो॑ऽजायत।
यः का॒मये॑त वी॒रो म॒ आजा॑ये॒तेति॑।
स चतु॑र्होतारं॒ प्रयु॑ञ्जीत।
आऽस्य॑ वी॒रो जा॑यते।
सो॑ऽकामयत पशु॒मान्त्स्या॒मिति॑।
स चतु॑र्होतुः॒ पञ्च॑होतारं॒ निर॑मिमीत।
तं प्रायु॑ङ्क्त।
तस्य॒ प्रयु॑क्ति पशु॒मान॑भवत्।
यः का॒मये॑त पशु॒मान्त्स्या॒मिति॑।
स पञ्च॑होतारं॒ प्रयु॑ञ्जीत॥ २॥

((tasya̱ prayu̱ktīndro̍'jāyata ।
yaḥ kā̱maye̍ta vī̱ro ma̱ ājā̍ye̱teti̍ ।
sa catu̍rhotāra̱ṃ prayu̍ñjīta ।
ā'sya̍ vī̱ro jā̍yate ।
so̍'kāmayata paśu̱māntsyā̱miti̍ ।
sa catu̍rhotu̱ḥ pañca̍hotāra̱ṃ nira̍mimīta ।
taṃ prāyu̍ṅkta ।
tasya̱ prayu̍kti paśu̱māna̍bhavat ।

yaḥ kā̱mayé̍ta paśu̱māntsyā̱miti̍ ।
sa pañcá̍hotāra̱ṃ prayú̍ñjīta ॥ 2 ॥))

**[[2-2-11-3]]**

प॒शु॒मा॒ने॒व भ॑वति।
सो॑ऽकामयत॒र्तवो॑ मे कल्पे॒रन्निति॑।
स पञ्च॑होतु॒ः षड्ढो॑तार॒ं निर॑मिमीत।
तं प्रायु॑ङ्क्त।
तस्य॒ प्रयु॑क्त्यृ॒तवो᳚ऽस्मा अकल्पन्त।
यः का॒मये॑त॒र्तवो॑ मे कल्पे॒रन्निति॑।
स षड्ढो॑तार॒ं प्रयु॑ञ्जीत।
कल्प॑न्तेऽस्मा ऋ॒तव॑ः।
सो॑ऽकामयत सोम॒पः सो॑मया॒जी स्या᳚म्।
आ मे॑ सोम॒पः सो॑मया॒जी जा॑ये॒तेति॑॥ ३॥

((pa̱śu̱māne̱va bhá̍vati ।
só̍'kāmayata̱rtavó̍ me kalpera̱nniti̍ ।
sa pañcá̍hotu̱ḥ ṣaḍḍhó̍tāra̱ṃ nirá̍mimīta ।
taṃ prāyú̍ṅkta ।
tasya̱ prayú̍ktyṛ̱tavó̎'smā akalpanta ।
yaḥ kā̱mayé̍ta̱rtavó̍ me kalpera̱nniti̍ ।
sa ṣaḍḍhó̍tāra̱ṃ prayú̍ñjīta ।
kalpá̍nte'smā ṛ̱tavá̍ḥ ।
só̍'kāmayata soma̱paḥ só̍mayā̱jī syā̎m ।
ā mé̍ soma̱paḥ só̍mayā̱jī jā́̍ye̱teti̍ ॥ 3 ॥))

**[[2-2-11-4]]**

स षड्ढो॑तु॒ः स॒प्तहो॑तार॒ं निर॑मिमीत।
तं प्रायु॑ङ्क्त।
तस्य॒ प्रयु॑क्ति सोम॒पः सो॑मया॒ज्य॑भवत्।
आऽस्य॑ सोम॒पः सो॑मया॒ज्य॑जायत।
यः का॒मये॑त सोम॒पः सो॑मया॒जी स्या᳚म्।
आ मे॑ सोम॒पः सो॑मया॒जी जा॑ये॒तेति॑।
स स॒प्तहो॑तार॒ं प्रयु॑ञ्जीत।
सो॒म॒प ए॒व सो॑मया॒जी भ॑वति।
आऽस्य॑ सोम॒पः सो॑मया॒जी जा॑यते।
स वा ए॒ष प॒शुः प॑ञ्च॒धा प्रति॑तिष्ठति॥ ४॥

((sa ṣaḍḍhó̍tuḥ sa̱ptahó̍tāra̱ṃ nirá̍mimīta ।
taṃ prāyú̍ṅkta ।
tasya̱ prayú̍kti soma̱paḥ só̍mayā̱jyá̍bhavat ।
ā'syá̍ soma̱paḥ só̍mayā̱jyá̍jāyata ।
yaḥ kā̱mayetá̍ soma̱paḥ só̍mayā̱jī syā̎m ।
ā mé̍ soma̱paḥ só̍mayā̱jī jā́̍ye̱teti̍ ।
sa sa̱ptahó̍tāra̱ṃ prayú̍ñjīta ।
so̱ma̱pa e̱va só̍mayā̱jī bhá̍vati ।
ā'syá̍ soma̱paḥ só̍mayā̱jī jā́̍yate ।
sa vā e̱ṣa pa̱śuḥ pá̍ñca̱dhā prati̍tiṣṭhati ॥ 4 ॥))

**[[2-2-11-5]]**

प॒द्भिर्मु॑खे॑न।
ते दे॒वाः प॒शून्वि॒त्त्वा।
सु॒वर्गं लो॒कमा॑यन्।
ते॑ऽमुष्मिँ॑ल्लो॒के व्य॑क्षुध्यन्।
ते᳚ऽब्रुवन्।
अ॒मुत॑ः प्रदा॒नं वा उप॑जिजीवि॒मेति॑।
ते स॒प्तहो॑तारं य॒ज्ञं वि॒धाया॒यास्य᳚म्।
आ॒ङ्गी॒र॒सं प्राहि॑ण्वन्।
ए॒तेना॒मुत्र॑ कल्प॒येति॑।
तस्य॒ वा इ॒यं क्लृप्ति॑ः॥ ५॥

((pa̱dbhirmukhé̍na ।
te de̱vāḥ pa̱śūnvi̱ttvā ।
su̱varga̱ṃ lo̱kamā́̍yan ।
té̍'muṣmim̐̍llo̱ke vyá̍kṣudhyan ।
tē̎'bruvan ।
a̱mutá̍ḥ pradāna̱ṃ vā upá̍jijīvi̱meti̍ ।
te sa̱ptahó̍tāraṃ ya̱jñaṃ vi̱dhāyā̱yāsyā̎m ।
ā̱ṅgī̱ra̱saṃ prāhi̍ṇvan ।
e̱tenā̱mutrá̍ kalpa̱yeti̍ ।
tasya̱ vā i̱yaṃ kḷpti̍ḥ ॥ 5 ॥))

**[[2-2-11-6]]**

यदि॒दं किंच॑।
य ए॒वं वेद॑।
कल्प॑तेऽस्मै।
स वा अ॒यं म॑नु॒ष्ये॑षु य॒ज्ञः स॒प्तहो॑ता।
अ॒मुत्र॑ स॒द्भ्यो दे॒वेभ्यो॑ ह॒व्यं व॑हति।
य ए॒वं वेद॑।
उपै॑नं य॒ज्ञो न॑मति।
यो वै चतु॑र्होतॄणां नि॒दा॒नं वेद॑।
नि॒दान॑वान्भवति।
अ॒ग्नि॒हो॒त्रं वै दश॑होतु॒र्निदान᳚म्।
द॒र्श॒पू॒र्ण॒मा॒सौ चतु॑र्होतुः।
चा॒तु॒र्मा॒स्या॒नि पञ्च॑होतुः।
प॒शु॒बन्धः षड्ढो॑तुः।
सौ॒म्यो᳚ऽध्व॒रः स॒प्तहो॑तुः।

ए॒तद्वै च॒तुर्हो॑तॄणां नि॒दान᳚म्।
य ए॒वं वेद॑।
नि॒दान॑वान्भवति॥ ६॥
अ॒मि॒मी॒त॒ तं प्रा॒युं॑क्त॒ पञ्च॑होतारं॒ प्र॒युं॑ञ्जीत जाये॒तेति॑ तिष्ठति॒
क्लृ॒प्ति॒र्दश॑होतुर्नि॒दानꣳ॑ स॒प्त च॑॥ ११॥
प्र॒जाप॑तिरकामयत प्र॒जाः सृ॒जे॒येति॑ प्र॒जाप॑तिरकामयत
द॒र्श॒पू॒र्ण॒मा॒सौ सृ॒जे॒येति॑ प्र॒जाप॑तिरकामयत॒ प्र॒जा॑ये॒येति॒ स
त॒पः स त्रि॒वृतं॑ प्र॒जाप॑तिरकामयत॒ दश॑होतारं॒ तेन॑
द॒श॒धाऽऽत्मानं॑ दे॒वा वै व॒रु॑ण॒मन्तो॒ वै प्र॒जाप॑ति॒स्ताः
सृ॒ष्टाः सम॑श्लिष्यन्दे॒वा वै च॒तुर्हो॑तृभिरि॒दं वा अ॒ग्ने॑
प्र॒जाप॑ति॒रिन्द्रं॑ प्र॒जाप॑तिरकामयत ब॒होर्भू॒या॒नेका॑दश॥
११॥
प्र॒जाप॑ति॒स्तद्ग्र॒ह॑स्य ग्र॒ह॒त्वं प्र॒जा॑पतिरकामयता॒नयै॒वैन॒त्तस्य॒
वा इ॒यं क्लृ॒प्ति॒स्तस्मा॑त्तेपा॒नाज्ज्योति॒र्यद॒स्मिन्ना॑दि॒त्ये स
षड्ढो॑तुः स॒प्तहो॑तारं॒ त्रिस॑प्ततिः॥ ७३॥

((yadi̱daṃ kiṃcá |
ya e̱vaṃ vedá |
kalpáte'smai |
sa vā a̱yaṃ mánu̱ṣyé̱ṣu ya̱jñaḥ sa̱ptahóta |
a̱mutrá sa̱dbhyo de̱vebhyó ha̱vyaṃ váhati |
ya e̱vaṃ vedá |
upáinaṃ ya̱jño námati |
yo vai catúrhotṝṇāṃ ni̱dānaṃ̱ vedá |
ni̱dānávānbhavati |
a̱gni̱ho̱traṃ vai daśáhoturni̱dānám̐ |
da̱rśa̱pū̱rṇa̱māsau catúrhotuḥ |
cā̱tu̱rmā̱syāni̱ pañcáhotuḥ |
pa̱śu̱ba̱ndhaḥ ṣa̱ḍḍhótuḥ |
sa̱umyó̱'dhva̱raḥ sa̱ptahótuḥ |
e̱tadvai catúrhotṝṇāṃ ni̱dānám̐ |
ya e̱vaṃ vedá |
ni̱dānávānbhavati || 6 ||
a̱mi̱mī̱ta̱ taṃ prāyúṅkta̱ pañcáhotāraṃ̱ prayúñjīta
jāye̱tetí tiṣṭhati̱ klṛpti̱rdaśáhoturni̱dānam̐ sa̱pta cá ||
11 ||
pra̱jāpátirakāmayata pra̱jāḥ sṛ̱je̱yetí
pra̱jāpátirakāmayata darśa̱pūrṇamā̱sau sṛ̱je̱yetí
pra̱jāpátirakāmayata̱ prajáye̱yeti̱ sa tapa̱ḥ sa
tri̱vṛtam̐ pra̱jāpátirakāmayata̱ daśáhotāraṃ̱ tená
daśa̱dhā''tmānaṃ de̱vā vai varúṇa̱manto̱ vai
pra̱jāpáti̱stāḥ sṛ̱ṣṭāḥ sámaśli̱ṣyande̱vā vai
catúrhotṛbhiri̱daṃ vā agné pra̱jāpáti̱rindraṃ
pra̱jāpátirakāmayata ba̱horbhūyā̱nekádaśa || 11 ||
pra̱jāpáti̱stadgrahásya graha̱tvaṃ
pra̱jápatirakāmayatā̱naya̱ivaina̱ttasya̱ vā i̱yaṃ
klṛpti̱stasmáttepā̱nājjyoti̱ryada̱sminnádi̱tye sa
ṣa̱ḍḍhótuḥ sa̱ptahótāraṃ̱ trisáptatiḥ || 73 ||))

# Taittirīya-Brāhmaṇa

# Book 2, Chapter 3

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[2-3-1-1]]**

ब्र॒ह्म॒वा॒दिनो॑ वदन्ति।
किं चतु॑र्होतॄणां चतुर्होतृ॒त्वमिति॑।
यदे॒वैषु॒ च॑तु॒र्धा होता॑रः।
ते॒न चतु॑र्होतारः।
तस्मा॒च्चतु॑र्होतार उच्यन्ते।
तच्चतु॑र्होतॄणां चतुर्हो॒तृत्वम्।
सोमो॒ वै चतु॑र्होता।
अ॒ग्निः पञ्च॑होता।
धाता षड्ढो॑ता।
इन्द्र॑ः स॒प्तहो॑ता॥ १॥

((bra̱hma̱vā̱dino̍ vadanti ।
ki̱ṃ catu̍rhotṝ̱ṇā̱ṃ caturhotṛ̱tvamiti̍ ।
yade̱vaiṣu̱ ca̍tu̱rdhā hotā̍raḥ ।
te̱na catu̍rhotāraḥ ।
tasmā̱ccatu̍rhotāra ucyante ।
taccatu̍rhotṝ̱ṇā̱ṃ caturhotṛ̱tvam ।
somo̱ vai catu̍rhotā ।
a̱gniḥ pañca̍hotā ।
dhātā ṣa̱ḍḍho̍tā ।
indra̍ḥ sa̱ptaho̍tā ॥ 1 ॥))

**[[2-3-1-2]]**

प्र॒जाप॑ति॒र्दश॑होता।
य ए॒वं चतु॑र्होतॄणामृ॒द्धिं वेद॑।
ऋ॒ध्नोत्ये॒व।
य ए॑षामे॒वं ब॒न्धुतां॒ वेद॑।
बन्धु॑मान्भवति।
य ए॑षामे॒वं क्लृ॒प्तिं वेद॑।
कल्प॑तेऽस्मै।
य ए॑षामे॒वमा॒यत॑नं॒ वेद॑।
आ॒यत॑नवान्भवति।
य ए॑षामे॒वं प्र॑ति॒ष्ठां वेद॑॥ २॥

((pra̱jāpa̍ti̱rdaśa̍hotā ।
ya e̱vaṃ catu̍rhotṝ̱ṇāmṛ̱ddhiṃ veda̍ ।
ṛ̱dhnotye̱va ।
ya e̍ṣāme̱vaṃ ba̱ndhutā̱ṃ veda̍ ।
bandhu̍mānbhavati ।
ya e̍ṣāme̱vaṃ klṛ̱ptiṃ veda̍ ।
kalpa̍te'smai ।
ya e̍ṣāme̱vamā̱yata̍na̱ṃ veda̍ ।
ā̱yata̍navānbhavati ।
ya e̍ṣāme̱vaṃ pra̍ti̱ṣṭhāṃ veda̍ ॥ 2 ॥))

**[[2-3-1-3]]**

प्रत्ये॒व ति॑ष्ठति।
ब्र॒ह्म॒वा॒दिनो॑ वदन्ति।
दश॑होता॒ चतु॑र्होता।
पञ्च॑होता॒ षड्ढो॑ता स॒प्तहो॑ता।
अथ॒ कस्मा॒च्चतु॑र्होतार उच्यन्त॒ इति॑।
इन्द्रो॒ वै चतु॑र्होता।
इन्द्र॒ः खलु॒ वै श्रेष्ठो॑ दे॒वता॑नामुप॒देश॑नात्।
य ए॒वमिन्द्र॒ꣳ॒ श्रेष्ठं॑ दे॒वता॑नामुप॒देश॑ना॒द्वेद॑।
वसि॑ष्ठः समा॒नानां᳚ भवति।
तस्मा॒च्छ्रेष्ठ॑मा॒यन्तं᳚ प्रथ॒मेनै॒वानु॑बुध्यन्ते।
अ॒यमाग॑न्।
अ॒यमवा॑सा॒दिति॑।
कीर्तिर॑स्य॒ पूर्वाऽऽग॑च्छति ज॒नता॑माय॒तः।
अथो॑ एनं प्रथ॒मेनै॒वानु॑बुध्यन्ते।
अ॒यमाग॑न्।
अ॒यमवा॑सा॒दिति॑॥ ३॥
स॒प्तहो॑ता प्रति॒ष्ठां वेद॑ बुध्यन्ते॒ षड्॥ १॥

((pratye̱va ti̍ṣṭhati ।
bra̱hma̱vā̱dino̍ vadanti ।
daśa̍hotā̱ catu̍rhotā ।
pañca̍hotā̱ ṣa̱ḍḍho̍tā sa̱ptaho̍tā ।
atha̱ kasmā̱ccatu̍rhotāra ucyanta̱ iti̍ ।
indro̱ vai catu̍rhotā ।
indra̱ḥ khalu̱ vai śreṣṭho̍ de̱vata̍nāmupa̱deśa̍nāt।
ya e̱vamindra̱m̱̐ śreṣṭha̍ṃ
de̱vata̍nāmupa̱deśa̍nā̱dveda̍ ।
vasi̍ṣṭhaḥ samā̱nānā̱m̐ bhavati ।
tasmā̱cchreṣṭha̍mā̱yanta̍ṃ
prathame̱nai̱vānu̍budhyante ।
a̱yamāga̍n ।
a̱yamavā̍sā̱diti̍ ।
kī̱rtira̍sya̱ pūrvā''ga̍cchati ja̱natā̍māya̱taḥ ।
atho̍ enaṃ pratha̱menai̱vānu̍budhyante ।
a̱yamāga̍n ।
a̱yamavā̍sā̱diti̍ ॥ 3 ॥

sa̱ptaho̍tā prati̱ṣṭhām̐ vedá budhyante̱ ṣaṭca̍ ॥ 1 ॥))

**[[2-3-2-1]]**

द॒क्षि॒णां प्र॑तिग्रही॒ष्यन्त्स॒प्तद॑श॒कृत्वोऽपा᳚न्यात्।
आ॒त्मान॑मे॒व समि॑न्धे।
तेज॑से वी॒र्या॑य।
अथो᳚ प्र॒जाप॑तिरे॒वैना᳚ं भू॒त्वा प्रति॑गृह्णाति।
आ॒त्मनोऽना᳚र्त्यै।
यद्ये॑न॒मार्त्वि॑ज्याद्वृ॒तꣳ सन्तं॑ नि॒र्हरे॑रन्।
आग्नी᳚ध्रे जुहुया॒द्दश॑होतारम्।
च॒तु॒र्गृ॒ही॒तेनाज्ये॑न।
पु॒रस्ता᳚त्प्र॒त्यङ्ति॒ष्ठन्॑।
प्र॒ति॒लो॒मं वि॒ग्राह᳚म्॥ १॥

((dakṣi̱ṇām̐ pratigrahī̱ṣyantsa̱ptada̍śa̱kṛtvo'pā᳚nyāt ।
ā̱tmāna̍me̱va sami̍ndhe ।
teja̍se vī̱rya̍ya ।
atho᳚ pra̱jāpa̍tire̱vainām̐᳚ bhū̱tvā prati̍gṛhṇāti ।
ā̱tmano'nā᳚rtyai ।
yadye̍na̱mārtvi̍jyādvṛ̱tam̐ santam̐ ni̱rhare̍ran ।
āgnī᳚dhre juhuyā̱ddaśa̍hotāram ।
ca̱tu̱rgṛ̱hī̱tenājye̍na ।
pu̱rastā᳚tpra̱tyaṅti̱ṣṭhan̍ ।
pra̱ti̱lo̱mam̐ vi̱grāha᳚m ॥ 1 ॥))

**[[2-3-2-2]]**

प्रा॒णाने॒वास्योप॑दासयति।
यद्ये॑नं॒ पुन॑रुप॒शिक्षे॑युः।
आग्नी᳚ध्र ए॒व जु॑हुया॒द्दश॑होतारम्।
च॒तु॒र्गृ॒ही॒तेनाज्ये॑न।
प॒श्चात्प्राङा॒सीनः॑।
अ॒नु॒लो॒मम॑वि॒ग्राहम्।
प्रा॒णाने॒वास्मै॑ कल्पयति।
प्राय॑श्चित्ती॒ वाग्घोतेत्यृ॑तुमु॒ख ऋ॒तुमुखे जुहोति।
ऋ॒तूने॒वास्मै॑ कल्पयति।
कल्प॑न्तेऽस्मा ऋ॒तव॑ः॥ २॥

((prā̱ṇāne̱vāsyopa̍dāsayati ।
yadye̍nam̱ puna̍rupa̱śikṣe̍yuḥ ।
āgnī᳚dhra e̱va ju̍huyā̱ddaśa̍hotāram ।
ca̱tu̱rgṛ̱hī̱tenājye̍na ।
pa̱ścātprāṅā̱sīna̍ḥ ।
a̱nu̱lo̱mama̍vi̱grāham ।
prā̱ṇāne̱vāsmai̍ kalpayati ।
prāya̍ścittī̱ vāgghotetyṛ̍tumu̱kha ṛ̱tumukhe juhoti ।
ṛ̱tūne̱vāsmai̍ kalpayati ।
kalpa̍nte'smā ṛ̱tava̍ḥ ॥ 2 ॥))

**[[2-3-2-3]]**

क्लृ॒प्ता अ॑स्मा ऋ॒तव॒ आय॑न्ति।
षड्ढो॑ता॒ वै भू॒त्वा प्र॒जाप॑तिरि॒दꣳ सर्व॑मसृजत।
स मनो॑ऽसृजत।
मन॒सोऽधि॒ गाय॒त्रीम॑सृजत।
तद्गा॑य॒त्रीं यश॑ आर्च्छत्।
तामाऽल॑भत।
गा॒य॒त्रि॒या अधि॒ छन्दा॒ꣳस्यसृजत।
छन्दो॒भ्योऽधि॒ साम॑।
तत्साम॒ यश॑ आर्च्छत्।
तदाऽल॑भत॥ ३॥

((kḷ̱ptā a̍smā ṛ̱tava̱ āya̍nti ।
ṣaḍḍho̍tā̱ vai bhū̱tvā pra̱jāpa̍tiri̱dam̐ sarva̍masṛjata ।
sa mano̍'sṛjata ।
mana̱so'dhi̱ gāya̱trīma̍sṛjata ।
tadgā̍ya̱trīm̐ yaśa̍ ārcchat ।
tāmā'la̍bhata ।
gā̱ya̱tri̱yā adhi̱ chandā̍m̐syasṛjata ।
chando̱bhyo'dhi̱ sāma̍ ।
tatsāma̱ yaśa̍ ārcchat ।
tadā'la̍bhata ॥ 3 ॥))

**[[2-3-2-4]]**

साम्नोऽधि॒ यजू॒ꣳष्यसृजत।
य॒जुर्भ्यो॒ऽधि॒ विष्णु᳚म्।
तद्वि॒ष्णुं॒ यश॑ आर्च्छत्।
तमाऽल॑भत।
विष्णो॒रध्योष॑धीरसृजत।
ओष॑धीभ्योऽधि॒ सोम᳚म्।
तत्सोमं॒ यश॑ आर्च्छत्।
तमाऽल॑भत।
सोमा॒दधि॑ प॒शून॑सृजत।
प॒शुभ्योऽधीन्द्र᳚म्॥ ४॥

((sāmno'dhi̱ yajū̍m̐ṣyasṛjata ।
ya̱jurbhyo'dhi̱ viṣṇu᳚m ।
tadvi̱ṣṇum̱ yaśa̍ ārcchat ।
tamā'la̍bhata ।
viṣṇo̱radhyoṣa̍dhīrasṛjata ।
oṣa̍dhī̱bhyo'dhi̱ soma᳚m ।
tatsomam̱ yaśa̍ ārcchat ।

tamā'lábhata |
somā̱dadhi̍ pa̱śūnásṛjata |
pa̱śubhyo'dhīndrā̎m || 4 ||))

**[[2-3-2-5]]**

तदि॒न्द्रं॒ यश॑ आर्च्छत्।
तदे॑नं॒ नाति॒प्राच्य॑वत।
इन्द्र॑ इव यश॒स्वी भ॑वति।
य ए॒वं वेद॑
नैन॒ं यशो॑ऽति॒प्रच्य॑वते।
यद्वा इ॒दं किंच॑।
तत्सर्व॑मुत्ता॒न ए॒वाङ्गी॑र॒सः प्रत्य॑गृह्णात्।
तदे॑नं॒ प्रति॑गृहीत॒ं नाहि॑नत्।
यत्किंच॑ प्रतिगृह्णी॒यात्।
तत्सर्व॑मुत्ता॒नस्त्वाॎऽऽङ्गी॒र॒सः प्रति॑गृह्णा॒त्वित्ये॒व
प्रति॑गृह्णी॒यात्।
इ॒यं वा उ॑त्ता॒न आॎङ्गी॒र॒सः।
अ॒नयै॒वैन॒त्प्रति॑गृह्णाति।
नैन॑ꣳ हिनस्ति।
ब॒र्हिषा॒ प्रती॑या॒द्गां वाऽश्वं॑ वा।
ए॒तद्वै प॑शू॒नां प्रि॒यं धाम॑।
प्रि॒येणै॒वैन॒ं धाम्ना॒ प्रत्यै॑ति॥ ५॥
वि॒ग्राह॑मृतव॒स्तदाऽल॑भ॒तेन्द्रं॑ गृह्णी॒यात्षट्च॑॥ २॥

((tadindra̱m yaśá ārcchat |
tadénam̱ nāti̱prācyávata |
indrá iva yaśa̱svī bhávati |
ya e̱vam veda̍
nainam̱ yaśo'ti̱pracyávate |
yadvā i̱dam kiṃcá |
tatsarvámuttā̱na e̱vāṅgi̍ra̱saḥ pratyágṛhṇāt |
tadénam̱ prati̍gṛhītam̱ nāhi̍nat |
yatkiṃcá pratigṛhṇī̱yāt |
tatsarvámuttā̱nastvā̎''ṅgīra̱saḥ prati̍gṛhṇā̱tvitye̱va
prati̍gṛhṇī̱yāt |
i̱yam vā úttā̱na_ ā̎ṅgīra̱saḥ |
a̱naya̱i̱vaina̱tprati̍gṛhṇāti |
nainam̎ hinasti |
ba̱rhiṣā̱ prati̍yā̱dgām̱ vā'śvam̍ vā |
e̱tadvai páśū̱nām̱ pri̱yam dhāmá |
pri̱yeṇa̱i̱vainam̱ dhāmnā̱ pratyéti || 5 ||
vi̱grāhámṛ̱tava̱stadā'lábha̱tendram̍ gṛhṇīyā̱tṣaṭcá || 2 ||))

**[[2-3-3-1]]**

यो वा अवि॑द्वान्निव॒र्तय॑ते।
विशी॑र्षा॒ स पाॎप्मा॒ऽमुष्मिॎँल्लो॒के भ॑वति।
अथ॒ यो वि॒द्वान्नि॑व॒र्तय॑ते।
सशी॑र्षा॒ विपाॎप्मा॒ऽमुष्मिॎँल्लो॒के भ॑वति।
दे॒वता॒ वै स॒प्त पु॒ष्टिकामा॒ न्य॑वर्तयन्त।
अ॒ग्निश्च॑ पृ॒थि॒वी च॑।
वा॒युश्चा॒न्तरि॑क्षं च।
आ॒दि॒त्यश्च॒ द्यौश्च॑ च॒न्द्रमाॎः।
अ॒ग्निर्न्य॑वर्तयत।
स साॎह॒स्रम॑पुष्यत्॥ १॥

((yo vā avi̍dvānniva̱rtayáte |
viśi̍rṣā̱ sa pā̎pmā̱'muṣmi̍m̎llo̱ke bhávati |
atha̱ yo vi̱dvānni̍va̱rtayáte |
saśi̍rṣā̱ vipā̎pmā̱'muṣmi̍m̎llo̱ke bhávati |
de̱vatā̱ vai sa̱pta puṣṭi̍kāmā̱ nyávartayanta |
a̱gniśca pṛthi̱vī cá |
vā̱yuścā̱ntari̍kṣam ca |
ā̱di̱tyaśca̱ dyauścá ca̱ndramā̎ḥ |
a̱gnirnyávartayata |
sa sā̎ha̱sramápuṣyat || 1 ||))

**[[2-3-3-2]]**

पृ॒थि॒वी न्य॑वर्तयत।
सौष॑धीभि॒र्वन॒स्पति॑भिरपुष्यत्।
वा॒युर्न्य॑वर्तयत।
स मरी॑चीभिरपुष्यत्।
अ॒न्तरि॑क्षं॒ न्य॑वरतयत।
तद्वयो॑भिरपुष्यत्।
आ॒दि॒त्यो न्य॑वर्तयत।
स र॒श्मिभि॑रपुष्यत्।
द्यौर्न्य॑वर्तयत।
सा नक्ष॑त्रैरपुष्यत्।
च॒न्द्रमा॒ न्य॑वर्तयत।
सो॑ऽहोरा॒त्रैर॑र्धमा॒सैर्मासै॑र्ऋ॒तुभि॑ः संवत्स॒रेणा॑पुष्यत्।
तान्पोषाॎन्पुष्यति।
याꣳस्ते॑ऽपुष्यन्।
य ए॒वं वि॒द्वान्नि च॑ व॒र्तय॑ते॒ परि॑ च॥ २॥
अ॒पु॒ष्य॒न्नक्ष॑त्रैरपु॒ष्य॒त्पञ्च॑ च॥ ३॥

((pṛthi̱vī nyávartayata |
sauṣádhībhi̱rvana̱spati̍bhirapuṣyat |

vā̱yurnyá̍vartayata |
sa marī̍cībhirapuṣyat |
a̱ntari̍kṣa̱ṃ nyá̍varatayata |
tadvayó̍bhirapuṣyat |
ā̱di̱tyo nyá̍vartayata |
sa ra̱śmibhi̍rapuṣyat |
dyaurnyá̍vartayata |
sā nakṣá̍trairapuṣyat |
ca̱ndramā̱ nyá̍vartayata |
só̍'horā̱trairá̍rdhamā̱sairmāsai̍rṛ̱tubhi̍ḥ |
saṃvatsa̱reṇā̍̍puṣyat |
tānpoṣā̍̍npuṣyati |
yāmste'pú̍ṣyan |
ya e̱vaṃ vi̱dvānni cá̍ va̱rtayá̍te̱ pari̍ ca || 2 ||
a̱puṣya̱nnakṣá̍trairapuṣya̱tpañcá̍ ca || 3 ||))

**[[2-3-4-1]]**

तस्य॒ वा अ॒ग्नेर्हिर॑ण्यं प्रतिजग्र॒हुषः॑।
अ॒र्धमि॑न्द्रि॒यस्यापा᳚क्रामत्।
तदे॒तेनै॒व प्रत्य॑गृह्णात्।
तेन॒ वै सो᳚ऽर्धमि॑न्द्रि॒यस्या॒त्मन्नु॒पाध॑त्त।
अ॒र्धमि॑न्द्रि॒यस्या॒त्मन्नु॒पाध॑त्ते।
य ए॒वं वि॒द्वान्हिर॑ण्यं प्रतिगृ॒ह्णाति॑।
अथ॒ योऽवि॑द्वान्प्रतिगृ॒ह्णाति॑।
अ॒र्धम॑स्येन्द्रि॒यस्याप॑क्रामति।
तस्य॒ वै सोम॑स्य॒ वास॑ः प्रतिजग्र॒हुष॑ः।
तृ॒तीय॑मिन्द्रि॒यस्यापा᳚क्रामत्॥ १॥

((tasya̱ vā a̱gnerhirá̍ṇyaṃ pratijagra̱huṣá̍ḥ |
a̱rdhami̍ndri̱yasyāpā̍̍krāmat|
tade̱tenai̱va pratyá̍gṛhṇāt|
tena̱ vai sö'rdhami̍ndri̱yasyā̱tmannu̱pādhá̍tta |
a̱rdhami̍ndri̱yasyā̱tmannu̱pādhá̍tte |
ya e̱vaṃ vi̱dvānhirá̍ṇyaṃ pratigṛ̱hṇāti̍ |
atha̱ yo'vi̍dvānpratigṛ̱hṇāti̍ |
a̱rdhamá̍syendri̱yasyāpá̍krāmati |
tasya̱ vai somá̍sya̱ vāsá̍ḥ pratijagra̱huṣá̍ḥ |
tṛ̱tī̍yamindri̱yasyāpā̍̍krāmat || 1 ||))

**[[2-3-4-2]]**

तदे॒तेनै॒व प्रत्य॑गृह्णात्।
तेन॒ वै स तृ॒तीय॑मिन्द्रि॒यस्या॒त्मन्नु॒पाध॑त्त।
तृ॒तीय॑मिन्द्रि॒यस्या॒त्मन्नु॒पाध॑त्ते।
य ए॒वं वि॒द्वान्वास॑ः प्रतिगृ॒ह्णाति॑।
अथ॒ योऽवि॑द्वान्प्रतिगृ॒ह्णाति॑।
तृ॒तीय॑मस्येन्द्रि॒यस्याप॑क्रामति।
तस्य॒ वै रु॒द्रस्य॒ गां प्र॑तिजग्र॒हुष॑ः।
च॒तु॒र्थमि॑न्द्रि॒यस्यापा᳚क्रामत्।
तामे॒तेनै॒व प्रत्य॑गृह्णात्।
तेन॒ वै स च॑तु॒र्थमि॑न्द्रि॒यस्या॒त्मन्नु॒पाध॑त्त॥ २॥

((tade̱tenai̱va pratyá̍gṛhṇāt|
tena̱ vai sa tṛ̱tī̍yamindri̱yasyā̱tmannu̱pādhá̍tta |
tṛ̱tī̍yamindri̱yasyā̱tmannu̱pādhá̍tte |
ya e̱vaṃ vi̱dvānvāsá̍ḥ pratigṛ̱hṇāti̍ |
atha̱ yo'vi̍dvānpratigṛ̱hṇāti̍ |
tṛ̱tī̍yamasyendri̱yasyāpá̍krāmati |
tasya̱ vai ru̱drasya̱ gāṃ prá̍tijagra̱huṣá̍ḥ |
ca̱tu̱rthami̍ndri̱yasyāpā̍̍krāmat |
tāme̱tenai̱va pratyá̍gṛhṇāt |
tena̱ vai sa cá̍tu̱rthami̍ndri̱yasyā̱tmannu̱pādhá̍tta || 2 ||))

**[[2-3-4-3]]**

च॒तु॒र्थमि॑न्द्रि॒यस्या॒त्मन्नु॒पाध॑त्ते।
य ए॒वं वि॒द्वान्गां प्र॑तिगृ॒ह्णाति॑।
अथ॒ योऽवि॑द्वान्प्रतिगृ॒ह्णाति॑।
च॒तु॒र्थम॑स्येन्द्रि॒यस्याप॑क्रामति।
तस्य॒ वै वरु॑णस्याश्वं॑ प्रतिजग्र॒हुष॑ः।
प॒ञ्च॒ममि॑न्द्रि॒यस्यापा᳚क्रामत्।
तमे॒तेनै॒व प्रत्य॑गृह्णात्।
तेन॒ वै स प॑ञ्च॒ममि॑न्द्रि॒यस्या॒त्मन्नु॒पाध॑त्त।
प॒ञ्च॒ममि॑न्द्रि॒यस्या॒त्मन्नु॒पाध॑त्ते।
य ए॒वं वि॒द्वानश्वं॑ प्रतिगृ॒ह्णाति॑॥ ३॥

((ca̱tu̱rthami̍ndri̱yasyā̱tmannu̱pādhá̍tte |
ya e̱vaṃ vi̱dvāngāṃ prá̍tigṛ̱hṇāti̍ |
atha̱ yo'vi̍dvānpratigṛ̱hṇāti̍ |
ca̱tu̱rthamá̍syendri̱yasyāpá̍krāmati |
tasya̱ vai varú̍ṇasyāśvaṃ̍ pratijagra̱huṣá̍ḥ |
pa̱ñca̱mami̍ndri̱yasyāpā̍̍krāmat |
tame̱tenai̱va pratyá̍gṛhṇāt |
tena̱ vai sa pá̍ñca̱mami̍ndri̱yasyā̱tmannu̱pādhá̍tta |
pa̱ñca̱mami̍ndri̱yasyā̱tmannu̱pādhá̍tte |
ya e̱vaṃ vi̱dvānaśvaṃ̍ pratigṛ̱hṇāti̍ || 3 ||))

**[[2-3-4-4]]**

अथ॒ योऽवि॑द्वान्प्रतिगृ॒ह्णाति॑।
प॒ञ्च॒मम॑स्येन्द्रि॒यस्याप॑क्रामति।
तस्य॒ वै प्र॒जाप॑तेः पुरु॑षं प्रतिजग्र॒हुष॑ः।
ष॒ष्ठमि॑न्द्रि॒यस्यापा᳚क्रामत्।
तमे॒तेनै॒व प्रत्य॑गृह्णात्।
तेन॒ वै स ष॒ष्ठमि॑न्द्रि॒यस्या॒त्मन्नु॒पाध॑त्त।

ष॒ष्ठमि॑न्द्रि॒यस्या॒त्मन्नु॒पाध॑त्ते।
य ए॒वं वि॒द्वान्पुरु॑षं प्रतिगृ॒ह्णाति॑।
अथ॒ यो॑ऽविद्वान्प्रतिगृ॒ह्णाति॑।
ष॒ष्ठम॑स्येन्द्रि॒यस्याप॑क्रामति॥ ४॥

((atha̱ yo'vi̍dvānpratigṛ̱hṇāti̍ I
pañca̱mamá̍syendri̱yasyāpá̍krāmati I
tasya̱ vai pra̱jāpá̍te̱ḥ purú̍ṣaṃ pratijagra̱huṣá̍ḥ I
ṣa̱ṣṭhami̍ndri̱yasyāpā̎krāmat I
tame̱tenai̱va pratyá̍gṛhṇāt I
tena̱ vai sa ṣa̱ṣṭhami̍ndri̱yasyā̱tmannu̱pādhá̍tta I
ṣa̱ṣṭhami̍ndri̱yasyā̱tmannu̱pādhá̍tte I
ya e̱vaṃ vi̱dvānpurú̍ṣaṃ pratigṛ̱hṇāti̍ I
atha̱ yo'vi̍dvānpratigṛ̱hṇāti̍ I
ṣa̱ṣṭhamá̍syendri̱yasyāpá̍krāmati II 4 II))

**[[2-3-4-5]]**
तस्य॒ वै मनो॒स्तल्पं॑ प्रतिज॒ग्र॒हुषः॑।
स॒प्त॒ममि॑न्द्रि॒यस्यापा॑क्रामत्।
तमे॒तेनै॒व प्रत्य॑गृह्णात्।
तेन॒ वै स स॑प्त॒ममि॑न्द्रि॒यस्या॒त्मन्नु॒पाध॑त्त।
स॒प्त॒ममि॑न्द्रि॒यस्या॒त्मन्नु॒पाध॑त्ते।
य ए॒वं वि॒द्वाꣳस्तल्पं॑ प्रतिगृ॒ह्णाति॑।
अथ॒ यो॑ऽविद्वान्प्रतिगृ॒ह्णाति॑।
स॒प्त॒मम॑स्येन्द्रि॒यस्याप॑क्रामति।
तस्य॒ वा उ॑त्तानस्या॑ङ्गीर॒सस्याप्रा॑णत्प्रतिज॒ग्र॒हुषः॑।
अ॒ष्ट॒ममि॑न्द्रि॒यस्यापा॑क्रामत्॥ ५॥

((tasya̱ vai mano̱stalpaṃ́ pratijagra̱huṣá̍ḥ I
sa̱pta̱mami̍ndri̱yasyāpā̎krāmat I
tame̱tenai̱va pratyá̍gṛhṇāt I
tena̱ vai sa sá̍pta̱mami̍ndri̱yasyā̱tmannu̱pādhá̍tta I
sa̱pta̱mami̍ndri̱yasyā̱tmannu̱pādhá̍tte I
ya e̱vaṃ vi̱dvām̐stalpaṃ́ pratigṛ̱hṇāti̍ I
atha̱ yo'vi̍dvānpratigṛ̱hṇāti̍ I
sa̱pta̱mamá̍syendri̱yasyāpá̍krāmati I
tasya̱ vā ú̍ttā̱nasyā̎ṅgīra̱sasyāprā̍ṇatpratijagra̱huṣá̍ḥ
I
a̱ṣṭa̱mami̍ndri̱yasyāpā̎krāmat II 5 II))

**[[2-3-4-6]]**
तदे॒तेनै॒व प्रत्य॑गृह्णात्।
तेन॒ वै सो॑ऽष्ट॒ममि॑न्द्रि॒यस्या॒त्मन्नु॒पाध॑त्त।
अ॒ष्ट॒ममि॑न्द्रि॒यस्या॒त्मन्नु॒पाध॑त्ते।
य ए॒वं वि॒द्वानप्रा॑णत्प्रतिगृ॒ह्णाति॑।
अथ॒ यो॑ऽविद्वान्प्रतिगृ॒ह्णाति॑।
अ॒ष्ट॒मम॑स्येन्द्रि॒यस्याप॑क्रामति॥
यद्वा इ॒दं किंच॑।
तत्सर्व॑मुत्ता॒न ए॒वाङ्गी॑र॒सः प्रत्य॑गृह्णात्।
तदे॑नं प्रति॑गृहीत॒ं नाहि॑नत्।
यत्किंच॑ प्रतिगृ॒ह्णीयात्।
तत्सर्व॑मुत्ता॒नस्त्वा॑ऽऽङ्गीर॒सः प्रति॑गृ॒ह्णात्वित्ये॒व
प्रति॑गृ॒ह्णीयात्।
इ॒यं वा उ॑त्ता॒न आ॑ङ्गीर॒सः।
अ॒नयै॒वैन॒त्प्रति॑गृह्णाति।
नैनꣳ॑ हिनस्ति॥ ६॥
तृ॒तीय॑मिन्द्रि॒यस्यापा॑क्रामच्चतु॒र्थमि॑न्द्रि॒यस्या॒त्मन्नु॒पाध॒त्ताश्वं॑
प्रतिगृ॒ह्णाति॑
ष॒ष्ठम॑स्येन्द्रि॒यस्याप॑क्रामत्यष्ट॒ममि॑न्द्रि॒यस्यापा॑क्रामत्प्रतिगृ
ह्णीयाच्च॒त्वारि॑ च॥ ४॥
तस्य॒ वा अ॒ग्नेरहि॑रण्यꣳ॒ सोम॑स्य॒ वास॒स्तदे॒तेन॒ रु॒द्रस्य॒ गां
तामे॒तेन॒ वरु॑णस्याश्वं॑ प्र॒जाप॑तेः पुरु॑षं मनो॒स्तल्पं॑
तमे॒तेनौ॑त्तानस्य॒ तदे॒तेनाप्रा॑ण॒द्यद्वै।
अ॒र्धं तृ॒तीय॑मष्ट॒मं तच्च॑तु॒र्थं तां प॑ञ्च॒मꣳ ष॒ष्ठꣳ स॑प्त॒मं तम्।
तदे॒तेन॒ द्वे तामे॒तेनै॒कं तमे॒तेन॒ त्रीणि॒ तदे॒तेनैक॑म्॥

((tade̱tenai̱va pratyá̍gṛhṇātI
tena̱ vai sö'ṣṭa̱mami̍ndri̱yasyā̱tmannu̱pādhá̍tta I
a̱ṣṭa̱mami̍ndri̱yasyā̱tmannu̱pādhá̍tte I
ya e̱vaṃ vi̱dvānaprā̍ṇatpratigṛ̱hṇāti̍ I
atha̱ yo'vi̍dvānpratigṛ̱hṇāti̍ I
a̱ṣṭa̱mamá̍syendri̱yasyāpá̍krāmati II
yadvā i̱daṃ kiṃcá̍ I
tatsarvá̍muttā̱na e̱vāṅgi̍ra̱saḥ pratyá̍gṛhṇātI
tadé̍naṃ prati̍gṛhītaṃ̱ nāhi̍nat I
yatkiṃcá̍ pratigṛ̱hṇī̱yāt I
tatsarvá̍muttā̱nastvā̎''ṅgīra̱saḥ prati̍gṛ̱hṇā̱tvitye̱va
prati̍gṛ̱hṇīyāt I
i̱yaṃ vā ú̍ttā̱na ā̎ṅgīra̱saḥ I
a̱naya̱ivaina̱tprati̍gṛhṇāti I
nainam̐ hinasti II 6 II
tṛ̱tī̍yamindri̱yasyāpá̍krāmaccatu̱rthami̍ndri̱yasyā̱tma
nnu̱pādha̱ttāśvaṃ́ pratigṛ̱hṇāti̍
ṣa̱ṣṭhamá̍syendri̱yasyāpā̎krāmatyaṣṭa̱mami̍ndri̱yasy
āpā̎krāmatpratigṛ̱hṇī̱yāccatvāri̍ ca II 4 II
tasya̱ vā a̱gnerahiráṇya̱m̐ somá̍sya̱ vāsa̱stade̱tena̱
ru̱drasya̱ gāṃ tāme̱tena̱ varú̍ṇa̱syāśvaṃ́ pra̱jāpá̍te̱ḥ
purú̍ṣaṃ̱ mano̱stalpaṃ̱ tame̱tenöttā̱nasya̱
tade̱tenāprā̍ṇa̱dyadvai I
a̱rdhaṃ̱ tṛtī̍yamaṣṭa̱maṃ taccá̍turthaṃ tāṃ
pá̍ñcamam̐ ṣa̱ṣṭham̐ sá̍pta̱maṃ tam I
tade̱tena̱ dve tāme̱tenaikaṃ̱ tame̱tena̱ trī̱ṇi̱
tade̱tenaikā̎m II))

**[[2-3-5-1]]**

ब्र॒ह्म॒वा॒दिनो॑ वदन्ति।
यद्दश॑होतारः स॒त्रमास॑त।
केन॒ ते गृ॒हप॑तिनाऽऽर्ध्नुवन्।
केन॑ प्र॒जा अ॑सृज॒न्तेति॑।
प्र॒जाप॑तिना॒ वै ते गृ॒हप॑तिनाऽऽर्ध्नुवन्।
तेन॑ प्र॒जा अ॑सृजन्त।
यच्च॒तुर्हो॑तारः स॒त्रमास॑त।
केन॒ ते गृ॒हप॑तिनाऽऽर्ध्नुवन्।
केनौष॑धीरसृज॒न्तेति॑।
सोमे॑न॒ वै ते गृ॒हप॑तिनाऽऽर्ध्नुवन्॥ १॥

((bra̱hma̱vā̱dino̍ vadanti |
yaddaśa̍hotāraḥ sa̱tramāsa̍ta |
kena̱ te gṛ̱hapa̍tinā''rdhnuvan |
kena̍ pra̱jā a̍sṛja̱nteti̍ |
pra̱jāpa̍tinā̱ vai te gṛ̱hapa̍tinā''rdhnuvan |
tena̍ pra̱jā a̍sṛjanta |
yaccatu̍rhotāraḥ sa̱tramāsa̍ta |
kena̱ te gṛ̱hapa̍tinā''rdhnuvan |
kenauṣa̍dhīrasṛja̱nteti̍ |
some̍na̱ vai te gṛ̱hapa̍tinā''rdhnuvan || 1 ||))

**[[2-3-5-2]]**

तेनौष॑धीरसृजन्त।
यत्पञ्च॑होतारः स॒त्रमास॑त।
केन॒ ते गृ॒हप॑तिनाऽऽर्ध्नुवन्।
केनै॒भ्यो लो॒केभ्योऽसु॑रा॒न्प्राणु॑दन्त।
केनै॒षां प॒शून॑वृञ्ज॒तेति॑।
अ॒ग्निना॒ वै ते गृ॒हप॑तिनाऽऽर्ध्नुवन्।
तेनै॒भ्यो लो॒केभ्योऽसु॑रा॒न्प्राणु॑दन्त।
तेनै॒षां प॒शून॑वृञ्जत।
यत्षड्ढो॑तारः स॒त्रमास॑त।
केन॒ ते गृ॒हप॑तिनाऽऽर्ध्नुवन्॥ २॥

((tenauṣa̍dhīrasṛjanta |
yatpañca̍hotāraḥ sa̱tramāsa̍ta |
kena̱ te gṛ̱hapa̍tinā''rdhnuvan |
kenai̱bhyo lo̱kebhyo'su̍rā̱nprāṇu̍danta |
kenai̱ṣāṃ pa̱śūna̍vṛñja̱teti̍ |
a̱gninā̱ vai te gṛ̱hapa̍tinā''rdhnuvan |
tenai̱bhyo lo̱kebhyo'su̍rā̱nprāṇu̍danta |
tenai̱ṣāṃ pa̱śūna̍vṛñjata |
yatṣaḍḍho̍tāraḥ sa̱tramāsa̍ta |
kena̱ te gṛ̱hapa̍tinā''rdhnuvan || 2 ||))

**[[2-3-5-3]]**

केन॒र्तून॑कल्पय॒न्तेति॑।
धा॒त्रा वै ते गृ॒हप॑तिनाऽऽर्ध्नुवन्।
तेन॒र्तून॑कल्पयन्त।
यत्स॒प्तहो॑तारः स॒त्रमास॑त।
केन॒ ते गृ॒हप॑तिनाऽऽर्ध्नुवन्।
केन॒ सुव॑रायन्।
केने॒माँल्लो॒कान्त्सम॑तन्व॒न्निति॑।
अ॒र्य॒म्णा वै ते गृ॒हप॑तिनाऽऽर्ध्नुवन्।
तेन॒ सुव॑रायन्।
तेने॒माँल्लो॒कान्त्सम॑तन्व॒न्निति॑॥ ३॥

((kena̱rtūna̍kalpaya̱nteti̍ |
dhā̱trā vai te gṛ̱hapa̍tinā''rdhnuvan|
tena̱rtūna̍kalpayanta |
yatsa̱ptaho̍tāraḥ sa̱tramāsa̍ta |
kena̱ te gṛ̱hapa̍tinā''rdhnuvan |
kena̱ suva̍rāyan |
kene̱māṃ̐llo̱kāntsama̍tanva̱nniti̍ |
a̱rya̱mṇā vai te gṛ̱hapa̍tinā''rdhnuvan |
tena̱ suva̍rāyan |
tene̱māṃ̐llokā̱ntsama̍tanva̱nniti̍ || 3 ||))

**[[2-3-5-4]]**

ए॒ते वै दे॒वा गृ॒हप॑तयः।
तान्य ए॒वं वि॒द्वान्।
अप्य॒न्यस्य॑ गार्हप॒ते दीक्ष॑ते।
अ॒वा॒न्तर॒मे॒व स॒त्त्रिणा॑मृध्नोति॥
यो वा अ॑र्य॒मणं॒ वेद॑।
दान॑कामा अस्मै प्र॒जा भ॑वन्ति।
य॒ज्ञो वा अ॑र्य॒मा।
आर्या॑ वस॒तिरि॒ति वै तमा॑हु॒र्यं प्र॒शꣳस॑न्ति।
आर्या॑वस॒तिर्भ॑वति।
य ए॒वं वेद॑॥

((e̱te vai de̱vā gṛ̱hapa̍tayaḥ |
tānya e̱vaṃ vi̱dvān |
apya̱nyasya̍ gārhapa̱te dīkṣa̍te |
a̱vā̱nta̱rame̱va sa̱ttriṇā̍mṛdhnoti ||
yo vā a̍rya̱maṇa̱ṃ veda̍ |
dāna̍kāmā asmai pra̱jā bha̍vanti |
ya̱jño vā a̍rya̱mā |
āryā̍ vasa̱tiriti̱ vai tamā̍hu̱ryaṃ pra̱śaṃ̐sa̍nti |

ārya̍vasa̱tirbha̍vati |
ya e̱vaṃ veda̍ ||))

**[[2-3-5-5]]**

यद्वा इ॒दं किंच॑।
तत्सर्वं॑ चतु॑र्हो॑तारः।
चतु॑र्होतृ॒भ्योऽधि॑ य॒ज्ञो निर्मि॑तः।
स य ए॒वं वि॒द्वान्वि॒वदे॑त।
अ॒हमे॒व भूयो॑ वेद।
यश्चतु॑र्हो॑तॄ॒न्वेदेति॑।
स ह्ये॑व भू॒यो॒ वेद॑।
यश्चतु॑र्हो॑तॄ॒न्वेद॑।
यो वै चतु॑र्हो॑तृणा॒ꣳ॒ होतॄ॒न्वेद॑।
सर्वा॑सु प्र॒जास्वन्न॑मत्ति॥ ५॥

((yadvā i̱daṃ kiṃca̍ |
tatsarvaṃ catu̍rhotāraḥ |
catu̍rhotṛ̱bhyo'dhi̍ ya̱jño nirmi̍taḥ |
sa ya e̱vaṃ vi̱dvānvi̱vade̍ta |
a̱hame̱va bhūyo̍ veda |
yaścatu̍rhotṝ̱nvedeti̍ |
sa hye̍va bhūyo̱ veda̍ |
yaścatu̍rhotṝ̱nveda̍ |
yo vai catu̍rhotṛṇā̱m̐ hotṝ̱nveda̍ |
sarvā̍su pra̱jāsvanna̍matti || 5 ||))

**[[2-3-5-6]]**

सर्वा॒ दिशो॒ऽभिज॑यति।
प्र॒जाप॑ति॒र्वै दश॑होतृणा॒ꣳ॒ होता᳚।
सोम॒श्चतु॑र्हो॑तृणा॒ꣳ॒ होता᳚।
अ॒ग्निः पञ्च॑होतृणा॒ꣳ॒ होता᳚।
धा॒ता षड्ढो॑तृणा॒ꣳ॒ होता᳚।
अ॒र्य॒मा स॒प्तहो॑तृणा॒ꣳ॒ होता᳚।
ए॒ते वै चतु॑र्हो॑तृणा॒ꣳ॒ होता॑रः।
तान्य ए॒वं वेद॑।
सर्वा॑सु प्र॒जास्वन्न॑मत्ति।
सर्वा॒ दिशो॒ऽभिज॑यति॥ ६॥
आ॒र्ध्नु॒वन्ना॒र्ध्नु॒वन्नित्ये॒वं वेदा᳚त्ति॒ सर्वा॒ दिशो॒भि ज॑यति॥ ५॥
वै तेन॑ स॒त्रं केन॑॥

((sarvā̱ diśo̱'bhija̍yati |
pra̱jāpa̍ti̱rvai daśa̍hotṛṇā̱m̐ hotā̎ |
soma̱ścatu̍rhotṛṇā̱m̐ hotā̎ |
a̱gniḥ pañca̍hotṛṇā̱m̐ hotā̎ |
dhā̱tā ṣa̱ḍḍho̍tṛṇā̱m̐ hotā̎ |
a̱rya̱mā sa̱ptaho̍tṛṇā̱m̐ hotā̎ |
e̱te vai catu̍rhotṛṇā̱m̐ hotā̍raḥ |
tānya e̱vaṃ veda̍ |
sarvā̍su pra̱jāsvanna̍matti |
sarvā̱ diśo̱'bhija̍yati || 6 ||
ā̱rdhnu̱vannā̱rdhnu̱vannitye̱vaṃ vedā̎tti̱ sarvā̱
diśo̱bhi ja̍yati || 5 ||
vai tena̍ sa̱traṃ kena̍ ||))

**[[2-3-6-1]]**

प्र॒जाप॑तिः प्र॒जाः सृ॒ष्ट्वा व्य॑स्रꣳतत।
स हृ॑दयं भू॒तो॑ऽशयत्।
आ॒त्म॒न्हा३ इत्य॑ह्वयत्।
आप॒ः प्रत्य॑शृण्वन्।
ता अ॑ग्निहो॒त्रेणै॒व य॑ज्ञक्र॒तुनोप॑प॒र्याव॑र्तन्त।
ताः कु॒सि॑न्ध॒मुपौ॑हन्।
तस्मा॑दग्निहो॒त्रस्य॑ यज्ञक्र॒तोः।
एक॑ ऋ॒त्विक्।
च॒तु॒ष्कृत्वोऽह्व॑यत्।
अ॒ग्निर्वा॒युरा॑दि॒त्यश्च॒न्द्रमाः᳚॥ १॥

((pra̱jāpa̍tiḥ pra̱jāḥ sṛ̱ṣṭvā vya̍sram̐tata |
sa hṛ̍dayaṃ bhū̱to̍'śayat|
ātma̱nhā3 ityahva̍yat |
āpa̱ḥ pratya̍śṛṇvan |
tā a̍gniho̱treṇa̱iva ya̍jñakra̱tunopa̍pa̱ryāva̍rtanta |
tāḥ kusi̍ndha̱mupau̍han |
tasmā̍dagniho̱trasya̍ yajñakra̱toḥ |
eka̍ ṛ̱tvik |
ca̱tu̱ṣkṛtvo'hva̍yat |
a̱gnirvā̱yurā̍di̱tyaśca̱ndramā̎ḥ || 1 ||))

**[[2-3-6-2]]**

ते प्रत्य॑शृण्वन्।
ते द॑र्शपूर्ण॒मा॒साभ्या॑मे॒व य॑ज्ञक्र॒तुनोप॑प॒र्याव॑र्तन्त।
त उपौ॑हꣳश्च॒त्वार्य॑ङ्गानि।
तस्मा᳚द्दर्शपू॒र्ण॒मा॒सयो᳚र्यज्ञक्र॒तोः।
च॒त्वार॑ ऋ॒त्विजः।
प॒ञ्चकृ॒त्वोऽह्व॑यत्।
प॒शवः॒ प्रत्य॑शृण्वन्।
ते चा॑तुर्मा॒स्यैरे॒व य॑ज्ञक्र॒तुनोप॑प॒र्याव॑र्तन्त।
त उपौ॑हँ॒ल्लोम॑ छ॒वीं मा॒ꣳ॒सम॑स्थि॑ म॒ज्जान॑म्।
तस्मा᳚च्चातुर्मा॒स्याना᳚ं यज्ञक्र॒तोः॥ २॥

((te pratya̍śr̥̱ṇvan ।
te da̍rśapūṟṇamā̱sābhya̍me̱va
ya̍jñakra̱tunopa̍pa̱ryāva̍rtanta ।
ta upa̍uha̎m̐ścatvāryaṅga̍ni ।
tasmā̎ddarśapūṟṇamā̱sayo̎ryajñakra̱toḥ ।
ca̱tvāra̍ r̥̱tvija̍ḥ ।
pañca̱kr̥tvo'hva̍yat ।
pa̱śava̱ḥ pratya̍śr̥ṇvan ।
te ca̍turmā̱syaire̱va ya̍jñakra̱tunopa̍pa̱ryāva̍rtanta ।
ta upa̍uham̎llomaa̍ cha̱vīṃ mā̎m̐samasthi̍ ma̱jjānā̎m ।
tasmā̎ccāturmā̱syānā̎m̐ yajñakra̱toḥ ॥ 2 ॥))

**[[2-3-6-3]]**

पञ्च॒र्त्विज॑ः।

ष॒ट्कृत्वोऽह्व॑यत्।

ऋ॒तव॑ः प्रत्य॑शृण्वन्।

ते प॑शुब॒न्धेनै॒व य॑ज्ञक्र॒तुनोप॑प॒र्याव॑र्तन्त।

त उपौ॑हं॒स्तना॑वा॒ण्डौ शि॒श्नमवा॒ञ्चं प्रा॒णम्।

तस्मा॑त्पशुब॒न्धस्य॑ यज्ञक्र॒तोः।

षड्॒त्विज॑ः।

स॒प्तकृत्वोऽह्व॑यत्।

होत्रा॒ः प्रत्य॑शृण्वन्।

ताः सौ॒म्येनै॒वाध्व॒रेण॑ यज्ञक्र॒तुनोप॑प॒र्याव॑र्तन्त॥ ३॥

((pañca̱rtvija̍ḥ ।
ṣa̱ṭkr̥tvo'hva̍yat ।
r̥̱tava̱ḥ pratya̍śr̥̱ṇvan ।
te pa̍śuba̱ndhenai̱va ya̍jñakra̱tunopa̍pa̱ryāva̍rtanta ।
ta upa̍uha̱ṃstanā̍vā̱ṇḍau śi̱śnamavā̎ñcaṃ prā̱ṇam ।
tasmā̎tpaśuba̱ndhasya̍ yajñakra̱toḥ ।
ṣa̱dr̥̱tvija̍ḥ ।
sa̱ptakr̥tvo'hva̍yat ।
hotrā̱ḥ pratya̍śr̥̱ṇvan ।
tāḥ sa̱umyenai̱vādhva̱reṇa̍
yajñakra̱tunopa̍pa̱ryāva̍rtanta ॥ 3 ॥))

**[[2-3-6-4]]**

ता उपौ॑हन्त्स॒प्तशी॒र्ष॒ण्या॑न्प्रा॒णान्।

तस्मा॑त्सौ॒म्यस्या॑ध्व॒रस्य॑ यज्ञक्र॒तोः।

स॒प्त होत्रा॒ः प्राची॒र्व॑षट्कु॒र्वन्ति।

द॒श॒कृत्वोऽह्व॑यत्।

तप॑ः प्रत्य॑शृणोत्।

तत्कर्म॑णै॒व सं॑वत्स॒रेण॒ सर्वै॑र्यज्ञक्र॒तुभि॒रुप॑प॒र्याव॑र्तत।

तत्सर्व॑मा॒त्मान॒मप॑रिव॒र्ग॒मुपौ॑हत्।

तस्मा॑त्संवत्स॒रे सर्वे॑ यज्ञक्र॒तवोऽव॑रुध्यन्ते।

तस्मा॒द्दश॑होता॒ चतु॑र्होता।

पञ्च॑होता॒ षड्ढो॑ता स॒प्तहो॑ता।

एक॑होत्रे ब॒लिं॑ ह॑रन्ति।

हर॑न्त्यस्मै प्र॒जा ब॒लिम्।

ऐ॒नमप्र॑तिख्यातं गच्छति।

य ए॒वं वेद॑॥ ४॥

च॒न्द्रमा॑श्चातुर्मा॒स्याना॑ यज्ञक्र॒तोर॑ध्व॒रेण॑ यज्ञक्र॒तुनोप॑

प॒र्याव॑र्तन्त स॒प्तहो॑ता च॒त्वारि॑ च॥ ६॥

((tā upa̍uhantsa̱ptaśī̍rṣa̱ṇyā̎npra̱ṇān ।
tasmā̎tsa̱umyasyā̍dhva̱rasya̍ yajñakra̱toḥ ।
sa̱pta hotrā̱ḥ prācī̱rvaṣa̍ṭkurvanti ।
da̱śakr̥tvo'hva̍yat ।
tapa̱ḥ pratya̍śr̥̱ṇot ।
tatkarma̍ṇa̱iva sa̍ṃvatsa̱reṇa̱
sarvai̍ryajñakra̱tubhi̱rupa̍pa̱ryāva̍rtata ।
tatsarva̍mā̱tmāna̱mapa̍rivarga̱mupa̍uhat ।
tasmā̎tsaṃvatsa̱re sarve̍ yajñakra̱tavo'va̍rudhyante ।
tasmā̱ddaśa̍hotā̱ catu̍rhotā ।
pañca̍hotā̱ ṣa̱ḍḍho̍tā sa̱ptaho̍tā ।
eka̍hotre ba̱li̍m ha̍ranti ।
hara̍ntyasmai pra̱jā ba̱lim ।
ai̱namapra̍tikhyātaṃ gacchati ।
ya e̱vaṃ veda̍ ॥ 4 ॥
ca̱ndramā̎ścāturmā̱syānā̎m̐ yajñakra̱torā̍dhva̱reṇa̍
yajñakra̱tunopa̍ pa̱ryāva̍rtanta sa̱ptaho̍tā ca̱tvāri̍ ca
॥ 6 ॥))

**[[2-3-7-1]]**

प्र॒जाप॑तिः पुरु॑षमसृजत।

सो॑ऽग्निर॑ब्रवीत्।

म॒मा॒यमन्न॑म॒स्त्विति॑।

सो॑ऽबिभेत्।

सर्व॑ वै मा॒ऽयं प्रध॑क्ष्य॒तीति॑।

स ए॒ताꣳश्च॒तु॑र्होतॄनात्म॒स्पर॑णानपश्यत्।

ता॑नजुहोत्।

तैर्वै स आ॒त्मान॑मस्पृणोत्।

यद॑ग्निहो॒त्रं जु॒होति॑।

एक॑होतारमे॒व तद्य॑ज्ञक्र॒तुमा॑प्नोत्यग्निहो॒त्रम्॥ १॥

((pra̱jāpa̍ti̱ḥ puru̍ṣamasr̥jata ।
so̎'gnira̍bravīt ।
mamā̱yamanna̍ma̱stviti̍ ।
so̍'bibhet ।
sarva̱ṃ vai mā̱'ya̱ṃ pradha̍kṣya̱tīti̍ ।
sa e̱tā̎m̐ścatu̍rhotr̥̱̄nātma̱spara̍ṇānapaśyat ।
tāna̍juhot ।

tairvai sa ātmāna̍maspṛṇot ।
yada̍gniho̱traṃ ju̱hoti̍ ।
eka̍hotārame̱va tadya̍jñakra̱tumā̎pnotyagniho̱tram ॥ 1 ॥))

**[[2-3-7-2]]**

कुसि॑न्धं चा॒ऽऽत्मन॑ः स्पृ॒णोति॑।
आ॒दि॒त्यस्य॑ च॒ सायु॑ज्यं गच्छति।
च॒तुरुन्न॑यति।
चतु॑र्होतारमे॒व तद्य॑ज्ञक्र॒तुमा᳚प्नोति दर्शपूर्णमा॒सौ।
च॒त्वारि॑ चा॒त्मनोऽङ्गा॑नि स्पृ॒णोति॑।
आ॒दि॒त्यस्य॑ च॒ सायु॑ज्यं गच्छति॥
च॒तुरुन्न॑यति।
स॒मित्प॑ञ्च॒मी।
पञ्च॑होतारमे॒व तद्य॑ज्ञक्र॒तुमा᳚प्नोति चातुर्मा॒स्यानि॑।
लोम॑ छ॒वीं मा॒ꣳ᳚समस्थि॑ म॒ज्जाना᳚म्॥ २॥

((kusi̍ndhaṃ cā̱''tmana̍ḥ spṛ̱ṇoti̍ ।
ādi̱tyasya̍ ca̱ sāyu̍jyaṃ gacchati ।
ca̱turunna̍yati ।
catu̍rhotārame̱va tadya̍jñakra̱tumā̎pnoti darśapūrṇamā̱sau ।
ca̱tvāri̍ cā̱tmano'ṅga̍ni spṛ̱ṇoti̍ ।
ādi̱tyasya̍ ca̱ sāyu̍jyaṃ gacchati ॥
ca̱turunna̍yati ।
sa̱mitpa̍ñca̱mī ।
pañca̍hotārame̱va tadya̍jñakra̱tumā̎pnoti cāturmā̱syāni̍ ।
loma̍ cha̱vīṃ mā̱m̐̎samasthi̍ ma̱jjānā̎m ॥ 2 ॥))

**[[2-3-7-3]]**

तानि॑ चा॒त्मन॑ः स्पृ॒णोति॑।
आ॒दि॒त्यस्य॑ च॒ सायु॑ज्यं गच्छति।
च॒तुरुन्न॑यति।
द्विर्जु॑होति।
षड्ढो॑तारमे॒व तद्य॑ज्ञक्र॒तुमा᳚प्नोति पशुब॒न्धम्।
स्तना॑वा॒ण्डौ शि॒श्नमवा᳚ञ्चं प्रा॒णम्।
तानि॑ चा॒त्मन॑ः स्पृ॒णोति॑।
आ॒दि॒त्यस्य॑ च॒ सायु॑ज्यं गच्छति।
च॒तुरुन्न॑यति।
द्विर्जु॑होति॥ ३॥

((tāni̍ cā̱tmana̍ḥ spṛ̱ṇoti̍ ।
ādi̱tyasya̍ ca̱ sāyu̍jyaṃ gacchati ।
ca̱turunna̍yati ।
dvirju̍hoti ।
ṣaḍḍho̍tārame̱va tadya̍jñakra̱tumā̎pnoti paśuba̱ndham ।
stana̍vā̱ṇḍau śi̱śnamavā̎ñcaṃ prā̱ṇam ।
tāni̍ cā̱tmana̍ḥ spṛ̱ṇoti̍ ।
ādi̱tyasya̍ ca̱ sāyu̍jyaṃ gacchati ।
ca̱turunna̍yati ।
dvirju̍hoti ॥ 3 ॥))

**[[2-3-7-4]]**

स॒मित्स॑प्त॒मी।
स॒प्तहो॑तारमे॒व तद्य॑ज्ञक्र॒तुमा᳚प्नोति सौ॒म्यम॑ध्व॒रम्।
स॒प्त चा॒त्मन॑ः शीर्ष॒ण्या᳚न्प्रा॒णान्स्पृ॒णोति॑।
आ॒दि॒त्यस्य॑ च॒ सायु॑ज्यं गच्छति।
च॒तुरुन्न॑यति।
द्विर्जु॒होति॑।
द्विर्नि॒मा᳚र्ष्टि।
द्विः प्रा॒श्ना॑ति।
दश॑होतारमे॒व तद्य॑ज्ञक्र॒तुमा᳚प्नोति संव॒त्स॒रम्।
सर्वं॑ चा॒त्मान॒मप॑रिवर्ग॒ꣳ᳚ स्पृ॒णोति॑।
आ॒दि॒त्यस्य॑ च॒ सायु॑ज्यं गच्छति॥ ४॥
अ॒ग्नि॒हो॒त्रं म॒ज्जानं॒ द्विर्जु॑हो॒त्यप॑रिवर्ग॒ꣳ᳚ स्पृ॒णोत्येकं॑ च॥ ७॥

((sa̱mitsa̍pta̱mī ।
sa̱ptaho̍tārame̱va tadya̍jñakra̱tumā̎pnoti sau̱myama̍dhva̱ram ।
sa̱pta cā̱tmana̍ḥ śīrṣa̱ṇyā̎nprā̱ṇānspṛ̱ṇoti̍ ।
ādi̱tyasya̍ ca̱ sāyu̍jyaṃ gacchati ।
ca̱turunna̍yati ।
dvirju̱hoti̍ ।
dvirni̱mā̎rṣṭi ।
dviḥ prā̱śna̍ti ।
daśa̍hotārame̱va tadya̍jñakra̱tumā̎pnoti saṃvatsa̱ram ।
sarva̍ṃ cā̱tmāna̱mapa̍rivargam̐̎ spṛ̱ṇoti̍ ।
ādi̱tyasya̍ ca̱ sāyu̍jyaṃ gacchati ॥ 4 ॥
a̱gni̱ho̱traṃ ma̱jjāna̱ṃ dvirju̍ho̱tyapa̍rivargam̐̎ spṛ̱ṇotyeka̍ṃ ca ॥ 7 ॥))

**[[2-3-8-1]]**

प्र॒जाप॑तिरकामयत प्र॒जाये॒येति॑।
स तपो॑ऽतप्यत।
सो᳚ऽन्तर्वा॑नभवत्।
स हरि॑तः श्या॒वो॑ऽभवत्।
तस्मा॒त्स्त्र्य॑न्तर्व॑त्नी।

हरि॑णी स॒ती श्या॒वा भ॑वति।
स वि॒जाय॑मानो॒ गर्भे᳚णाताम्यत्।
स ता॒न्तः कृ॒ष्णः श्या॒वो॑ऽभवत्।
तस्मा᳚त्ता॒न्तः कृ॒ष्णः श्या॒वो भ॑वति।
तस्यासु॒रे॑वाजी॑वत्॥ १॥

((pra̱jāpa̍tirakāmayata̱ prajā̍ye̱yeti̍ |
sa tapo̍'tapyata |
so̎'ntarva̍nabhavat |
sa hari̍taḥ śyā̱vo̍'bhavat |
tasmā̱tstrya̍ntarva̍tnī |
hari̍ṇī sa̱tī śyā̱vā bha̍vati |
sa vi̱jāya̍māno̱ garbhe̍ṇātāmyat |
sa tā̱ntaḥ kṛ̱ṣṇaḥ śyā̱vo̍'bhavat |
tasmā̎ttā̱ntaḥ kṛ̱ṣṇaḥ śyā̱vo bha̍vati |
tasyāsu̍re̱vājī̍vat || 1 ||))

**[[2-3-8-2]]**

तेनासु॒नाऽसु॑रानसृजत।
तदसु॑राणामसुर॒त्वम्।
य ए॒वमसु॑राणामसुर॒त्वं वेद॑।
असु॑माने॒व भ॑वति।
नैन॒मसु॑र्जहाति।
सोऽसु॑रान्सृ॒ष्ट्वा पि॒तेवा॑मन्यत।
तद॑नु पि॒तॄन॑सृजत।
तत्पि॑तृ॒णां पि॑तृ॒त्वम्।
य ए॒वं पि॑तृ॒णां पि॑तृ॒त्वं वेद॑।
पि॒तेवै॒व स्वाना᳚ं भवति॥ २॥

((tenāsu̱nā'su̍rānasṛjata |
tadasu̍rāṇāmasura̱tvam |
ya e̱vamasu̍rāṇāmasura̱tvaṃ veda̍ |
asu̍māne̱va bha̍vati |
naina̱masu̍rjahāti |
so'su̍rānsṛ̱ṣṭvā pi̱tevā̍manyata |
tadanu̍ pi̱tṝna̍sṛjata |
tatpi̍tṛ̱ṇāṃ pi̍tṛ̱tvam|
ya e̱vaṃ pi̍tṛ̱ṇāṃ pi̍tṛ̱tvaṃ veda̍ |
pi̱tevai̱va svānā̎ṃ bhavati || 2 ||))

**[[2-3-8-3]]**

यन्त्य॑स्य पि॒तरो॒ हवा᳚म्।
स पि॒तॄन्त्सृ॒ष्ट्वाऽम॑नस्यत्।
तद॑नु मनु॒ष्या॑नसृजत।
तन्म॑नु॒ष्या॑णां मनुष्य॒त्वम्।
य ए॒वं म॑नु॒ष्या॑णां मनुष्य॒त्वं वेद॑।
म॒न॒स्व्ये॑व भ॑वति।
नैन॒ं मनु॑र्जहाति।
तस्मै॑ मनु॒ष्या᳚न्त्ससृ॒जा॒नाय॑।
दिवा॑ दे॒वत्राऽभ॑वत्।
तद॑नु दे॒वान॑सृजत।
तद्दे॒वाना᳚ं दे॒वत्वम्।
य ए॒वं दे॒वाना᳚ं दे॒वत्वं वेद॑।
दिवा॑ है॒वास्य॑ दे॒वत्रा भ॑वति।
तानि॒ वा ए॒तानि॑ च॒त्वार्यम्भा॑ꣳसि।
दे॒वा म॑नु॒ष्या᳚ः पि॒तरोऽसु॑राः।
तेषु॒ सर्वे॒ष्वम्भो॒ नभ॑ इव भवति।
य ए॒वं वेद॑॥ ३॥
अ॒जी॒वत्स्वाना᳚ं भवति दे॒वान॑सृजत स॒प्त च॑॥ ८॥

((yantya̍sya pi̱taro̱ havā̎m |
sa pi̱tṝ̱ntsṛ̱ṣṭvā'ma̍nasyat |
tadanu̍ manu̱ṣyā̍nasṛjata |
tanma̍nu̱ṣyā̍ṇāṃ manuṣya̱tvam |
ya e̱vaṃ ma̍nu̱ṣyā̍ṇāṃ manuṣya̱tvaṃ veda̍ |
ma̱na̱svye̍va bha̍vati |
naina̱ṃ manu̍rjahāti |
tasmai̍ manu̱ṣyā̎ntsasṛ̱jā̱nāya̍ |
divā̍ deva̱trā'bha̍vat |
tadanu̍ de̱vāna̍sṛjata |
badde̱vānā̎ṃ deva̱tvam |
ya e̱vaṃ de̱vānā̎ṃ deva̱tvaṃ veda̍ |
divā̍ ha̱ivāsya̍ deva̱trā bha̍vati |
tāni̱ vā e̱tāni̍ ca̱tvāryambhā̎ṃsi |
de̱vā ma̍nu̱ṣyā̎ḥ pi̱taro'su̍rāḥ |
teṣu̱ sarve̱ṣvambho̱ nabha̍ iva bhavati |
ya e̱vaṃ veda̍ || 3 ||
a̱jī̱vatsvānā̎ṃ bhavati de̱vāna̍sṛjata sa̱pta ca̍ || 8 ||))

**[[2-3-9-1]]**

ब्र॒ह्म॒वा॒दिनो॑ वदन्ति।
यो वा इ॒मं वि॒द्यात्।
यतो॒ऽयं पव॑ते।
यद॑भि॒पव॑ते।
यद॑भि॒संपव॑ते।
सर्व॒मायु॑रियात्।
न पु॒राऽऽयु॑षः॒ प्रमी॑येत।
प॒शु॒मान्त्स्या᳚त्।

वि॒न्देत॑ प्र॒जाम्।
यो वा इ॒मं वेद॑॥ १॥

((bra̱hma̱vā̱dino̍ vadanti ।
yo vā i̱maṃ vi̱dyāt ।
yato̱'yaṃ pava̍te ।
yada̍bhi̱pava̍te ।
yada̍bhisa̱ṃpava̍te ।
sarva̱māyu̍riyāt ।
na pu̱rā''yu̍ṣa̱ḥ pramī̍yeta ।
pa̱śu̱māntsyā̎t ।
vi̱ndeta̍ pra̱jām ।
yo vā i̱maṃ veda̍ ॥ 1 ॥))

**[[2-3-9-2]]**
यतो॒ऽयं पव॑ते।
यद॑भि॒पव॑ते।
यद॑भिस॒ंपव॑ते।
सर्व॒मायु॑रेति।
न पु॒राऽऽयु॑षः प्रमी॑यते।
प॒शु॒मान्भ॑वति।
वि॒न्दते॑ प्र॒जाम्।
अ॒द्भ्यः पव॑ते।
अ॒पो॑ऽभिपव॑ते।
अ॒पो॑ऽभिसंपव॑ते॥ २॥

((yato̱'yaṃ pava̍te ।
yada̍bhi̱pava̍te ।
yada̍bhisa̱ṃpava̍te ।
sarva̱māyu̍reti ।
na pu̱rā''yu̍ṣa̱ḥ pramī̍yate ।
pa̱śu̱mānbha̍vati ।
vi̱ndate̎ pra̱jām ।
a̱dbhyaḥ pava̍te ।
a̱po̍'bhipa̍vate ।
a̱po̍'bhisa̱ṃpa̍vate ॥ 2 ॥))

**[[2-3-9-3]]**
अ॒स्याः पव॑ते।
इ॒मामभि॒पव॑ते।
इ॒मामभिस॒ंपव॑ते।
अ॒ग्नेः पव॑ते।
अ॒ग्निमभि॒पव॑ते।
अ॒ग्निमभिस॒ंपव॑ते।
अ॒न्तरि॑क्षात्पवते।
अ॒न्तरि॑क्षमभि॒पव॑ते।
अ॒न्तरि॑क्षमभिस॒ंपव॑ते।
आ॒दि॒त्यात्पव॑ते॥ ३॥

((a̱syāḥ pa̍vate ।
i̱māma̱bhipa̍vate ।
i̱māma̱bhisa̱ṃpa̍vate ।
a̱gneḥ pa̍vate ।
a̱gnima̱bhipa̍vate ।
a̱gnima̱bhisa̱ṃpa̍vate ।
a̱nta̍rikṣātpavate ।
a̱nta̍rikṣama̱bhipa̍vate ।
a̱nta̍rikṣama̱bhisa̱ṃpa̍vate ।
ā̱di̱tyātpa̍vate ॥ 3 ॥))

**[[2-3-9-4]]**
आ॒दि॒त्यम॒भिप॑वते।
आ॒दि॒त्यम॒भिसंप॑वते।
द्योः प॑वते।
दि॒व॑म॒भिप॑वते।
दि॒व॑म॒भिसंप॑वते।
दि॒ग्भ्यः प॑वते।
दि॒शो॒ऽभिप॑वते।
दि॒शो॒ऽभिसंप॑वते।
स यत्पु॒रस्ता॒द्वाति॑।
प्रा॒ण ए॒व भू॒त्वा पु॒रस्ता॒द्वाति॥ ४॥

((ā̱di̱tyama̱bhipa̍vate ।
ā̱di̱tyama̱bhisa̱ṃpa̍vate ।
dyoḥ pa̍vate ।
diva̍ma̱bhipa̍vate ।
diva̍ma̱bhisa̱ṃpa̍vate ।
di̱gbhyaḥ pa̍vate ।
diśo̱'bhipa̍vate ।
diśo̱'bhisa̱ṃpa̍vate ।
sa yatpu̱rastā̱dvātī̍ ।
prā̱ṇa e̱va bhū̱tvā pu̱rastā̎dvāti ॥ 4 ॥))

**[[2-3-9-5]]**
तस्मा॒त्पु॒रस्ता॒द्वान्त॒म्।
सर्वाः॑ प्र॒जाः प्रति॑नन्दन्ति।
प्रा॒णो हि प्रि॒यः प्र॒जाना॒म्।
प्रा॒ण इ॒व प्रि॒यः प्र॒जानां॑ भवति।
य ए॒वं वेद॑।
स वा ए॒ष प्रा॒ण ए॒व।

अथ यद्दक्षिणतो वाति।
मातरिश्वैव भूत्वा दक्षिणतो वाति।
तस्माँद्दक्षिणतो वान्तं विद्यात्।
सर्वा दिश आवाति॥ ५॥

((tasmā̐tpurastādvāntām ।
sarvā̐ḥ prajāḥ pratinandanti ।
prāṇo hi priyaḥ prajānā̐m ।
prāṇa iva priyaḥ prajānā̐ṃ bhavati ।
ya evaṃ veda ।
sa vā eṣa prāṇa eva ।
atha yaddakṣiṇato vāti ।
mātariśvaiva bhūtvā dakṣiṇato vāti ।
tasmā̐ddakṣiṇato vāntaṃ vidyāt ।
sarvā diśa āvāti ॥ 5 ॥))

**[[2-3-9-6]]**

सर्वा दिशोऽनुविवाति।
सर्वा दिशोऽनुसंवातीति।
स वा एष मातरिश्वैव।
अथ यत्पश्चाद्वाति।
पवमान एव भूत्वा पश्चाद्वाति।
पूतमस्मा आहरन्ति।
पूतमुपहरन्ति।
पूतमश्नाति।
य एवं वेद।
स वा एष पवमान एव॥ ६॥

((sarvā diśo'nuvivāti ।
sarvā diśo'nusaṃvātīti ।
sa vā eṣa mātariśvaiva ।
atha yatpaścādvāti ।
pavamāna eva bhūtvā paścādvāti ।
pūtamasmā āharanti ।
pūtamupaharanti ।
pūtamaśnāti ।
ya evaṃ veda ।
sa vā eṣa pavamāna eva ॥ 6 ॥))

**[[2-3-9-7]]**

अथ यदुत्तरतो वाति।
सवितैव भूत्वोत्तरतो वाति।
सवितेव स्वानाँ भवति।
य एवं वेद।
स वा एष सवितैव।
ते य एनं पुरस्तादायन्तमुपवदन्ति।
य एवास्य पुरस्ताँत्पाप्मानः।
ताꣳस्तेऽपघ्नन्ति।
पुरस्तादितरान्पाप्मनः सचन्ते।
अथ य एनं दक्षिणत आयन्तमुपवदन्ति॥ ७॥

((atha yaduttarato vāti ।
savitaiva bhūtvottarato vāti ।
saviteva svānā̐ṃ bhavati ।
ya evaṃ veda ।
sa vā eṣa savitaiva ।
te ya enaṃ purastādāyantamupavadanti ।
ya evāsya purastā̐tpāpmānaḥ ।
tā̐ste'paghnanti ।
purastāditarānpāpmanaḥ sacante ।
atha ya enaṃ dakṣiṇata āyantamupavadanti ॥ 7 ॥))

**[[2-3-9-8]]**

य एवास्य दक्षिणतः पाप्मानः।
ताꣳस्तेऽपघ्नन्ति।
दक्षिणत इतरान्पाप्मनः सचन्ते।
अथ य एनं पश्चादायन्तमुपवदन्ति।
य एवास्य पश्चात्पाप्मानः।
ताꣳस्तेऽपघ्नन्ति।
पश्चादितरान्पाप्मनः सचन्ते।
अथ य एनमुत्तरत आयन्तमुपवदन्ति।
य एवास्यौँत्तरतः पाप्मानः।
ताꣳस्तेऽपघ्नन्ति॥ ८॥

((ya evāsya dakṣiṇataḥ pāpmānaḥ ।
tā̐ste'paghnanti ।
dakṣiṇata itarānpāpmanaḥ sacante ।
atha ya enaṃ paścādāyantamupavadanti ।
ya evāsya paścātpāpmānaḥ ।
tā̐ste'paghnanti ।
paścāditarānpāpmanaḥ sacante ।
atha ya enamuttarata āyantamupavadanti ।
ya evāsyŏttarataḥ pāpmānaḥ ।
tā̐ste'paghnanti ॥ 8 ॥))

**[[2-3-9-9]]**

उत्तरत इतरान्पाप्मनः सचन्ते।
तस्मादेवं विद्वान्।
वीव नृत्येत्।
प्रेव चलेत्।

व्यस्ये॑वा॒क्ष्यौ भा॑षेत।
म॒ण्टये॑दिव।
क्रा॒थये॑दिव।
शृ॒ङ्गा॒येते॑व।
उ॒त मोप॑वदेयुः।
उ॒त मे॑ पा॒प्मान॒मप॑हन्यु॒रिति॑।
स यां दिश॒ꣳ॑ स॒निमे॒ष्यन्त्स्यात्।
य॒दा तां दि॒शं वातो॑ वा॒यात्।
अथ॒ प्रवे॒यात्।
प्र वा॑ धावयेत्।
सा॒तमे॒व र॑दि॒तं व्यू॑ढं ग॒न्धम॒भि प्रच्य॑वते।
आऽस्य॒ तं ज॑नप॒दं पू॒र्वा॑ की॒र्तिर्ग॑च्छति।
दान॑कामा अस्मै प्र॒जा भ॑वन्ति।
य ए॒वं वेद॑॥ ९॥
वेद॒ संप॑वत आदि॒त्यात्प॑वते वा॒त्या वा॒॑त्येष॒ पव॑मान ए॒व
द॑क्षिण॒त आ॒यन्त॑मुप॒ वद॑न्त्युत्तर॒तः
पा॒प्मान॒स्ताꣳ॑स्तेऽप॑घ्न॒न्तीत्य॒ष्टौ च॑॥ ९॥

((u̱tta̱ra̱ta itárānpā̱pmanáḥ sacante ।
tasmā́de̱vaṃ vi̱dvān ।
vīvá nṛtyet ।
prevá calet ।
vyasyévā̱kṣyau bhā́ṣeta ।
ma̱ṇṭayédiva ।
krā̱thayédiva ।
śṛ̱ṅgā̱yetéva ।
u̱ta mopávadeyuḥ ।
u̱ta mé pā̱pmāna̱mapáhanyu̱rití ।
sa yāṃ diśam̐ sa̱nime̱ṣyantsyāt ।
ya̱dā tāṃ diśa̱ṃ vātó vā̱yāt ।
atha̱ prave̱yāt ।
pra vā́ dhāvayet ।
sā̱tame̱va ráḍi̱taṃ vyū́ḍhaṃ ga̱ndhama̱bhi
pracyávate ।
ā'sya̱ taṃ ja̱napa̱daṃ pūrvā́ kī̱rtirgácchati ।
dānákāmā asmai pra̱jā bhávanti ।
ya e̱vaṃ vedá ॥ 9 ॥
veda̱ saṃpávata ādi̱tyātpávate vā̱tyā vā̱̀tye̱ṣa
pavámāna e̱va dákṣi̱ṇa̱ta ā̱yantámupa̱
vadántyuttara̱taḥ
pā̱pmāna̱stām̐ste'pághna̱ntītya̱ṣṭau cá ॥ 9 ॥))

**[[2-3-10-1]]**

प्र॒जाप॑ति॒ः सोम॒ꣳ॒ राजा॑नमसृजत।
तं त्रयो॒ वेदा॒ अन्व॑सृज्यन्त।
तान्हस्ते॑ऽकुरुत।
अथ॒ ह सीता॑ सावि॒त्री।
सोम॒ꣳ॒ राजा॑नं चकमे।
श्र॒द्धामु॒ स च॑कमे।
सा ह॑ पि॒तर॑ꣳ प्र॒जाप॑ति॒मुप॑ससार।
तꣳ हो॑वाच।
नम॑स्ते अस्तु भगवः।
उप॑ त्वाऽयानि॥ १॥

((pra̱jāpáti̱ḥ soma̱m̐ rājā́namasṛjata ।
taṃ trayo̱ vedā̱ anvásṛjyanta ।
tānhasté'kuruta ।
atha̱ ha sītā́ sāvi̱trī ।
soma̱m̐ rājā́naṃ cakame ।
śra̱ddhāmu̱ sa cákame ।
sā há pi̱taraṃ́ pra̱jāpáti̱mupásasāra ।
tam̐ hóvāca ।
namáste astu bhagavaḥ ।
upá tvā'yāni ॥ 1 ॥))

**[[2-3-10-2]]**

प्र त्वा॑ पद्ये।
सोमं॒ वै राजा॑नं कामये।
श्र॒द्धामु॒ स का॑मयत॒ इति॑।
तस्या॑ उ॒ ह स्था॑ग॒रम॑लङ्का॒रं क॑ल्पयि॒त्वा।
दश॑होतारं पु॒रस्ता॒॑द्व्या॒ख्याय॑।
चतु॑र्होतारं दक्षिण॒तः।
पञ्च॑होतारं प॒श्चात्।
षड्ढो॑तारमुत्तर॒तः।
स॒प्तहो॑तारमुपरि॑ष्टात्।
सं॒भा॒रैश्च॒ पत्नि॑भिश्च॒ मुखे॑ऽलं॒कृत्य॑॥ २॥

((pra tvā́ padye ।
soma̱ṃ vai rājā́naṃ kāmaye ।
śra̱ddhāmu̱ sa kā́mayata̱ ití ।
tasyā́ u̱ ha sthā́ga̱ramálaṅkā̱raṃ kálpayi̱tvā ।
daśáhotāraṃ pu̱rastā̱́dvyā̱khyāyá ।
catúrhotāraṃ dakṣi̱ṇa̱taḥ ।
pañcáhotāraṃ pa̱ścāt ।
ṣaḍḍhótāramuttara̱taḥ ।
sa̱ptahótāramu̱paríṣṭāt ।
sa̱ṃbhā̱raiśca̱ patníbhiśca̱ mukhé'la̱ṃkṛtyá ॥ 2 ॥))

**[[2-3-10-3]]**

आऽस्या॒र्धं व॑व्राज।
ताꣳ हो॒दीक्ष्यो॑वाच।

उप॒ मा॒ऽऽव॑र्त॒स्वेति॑।
त॒ꣳ हो॑वाच।
भो॒गं तु म॒ आच॑क्ष्व।
ए॒तन्म॒ आच॑क्ष्व।
यत्ते॑ पा॒णावि॒ति॑।
तस्या॑ उ॒ ह त्रीन्वेदा॒न्प्रद॑दौ।
तस्मा॒दु ह॒ स्त्रियो॒ भोग॒मैव हा॑रयन्ते।
स यः का॒मये॑त प्रि॒यः स्या॒मिति॑॥ ३॥

((ā'syārdhaṃ vávrāja |
tām̐ ho̱dīkṣyóvāca |
upa̱ mā''vártasvetí |
tam̐ hóvāca |
bhoga̱ṃ tu ma̱ ācákṣva |
e̱tanma̱ ācákṣva |
yatté pā̱ṇāvití |
tasyá u̱ ha trīnvedā̱npradádau |
tasmā̱du ha̱ striyo̱ bhoga̱maiva hárayante |
sa yaḥ kā̱mayéta pri̱yaḥ syā̱mití || 3 ||))

**[[2-3-10-4]]**

यं वा॑ का॒मये॑त प्रि॒यः स्या॒दिति॑।
तस्मा॑ ए॒तꣳ॒ स्था॑ग॒रम॑लंकारं॒ कल्प॑यि॒त्वा।
दश॑होतारं पु॒रस्ता॒॑द्व्या॒ख्याय॑।
चतु॑र्होतारं दक्षि॒ण॒तः।
पञ्च॑होतारं प॒श्चात्।
षड्ढो॑तारमुत्त॒र॒तः।
स॒प्तहो॑तारमु॒परि॑ष्टात्।
सं॒भा॒रैश्च॒ पत्नि॑भिश्च॒ मुखे॑ऽल॒ंकृत्य॑।
आऽस्यार्धं॑ व्र॑जेत्।
प्रियो॑ है॒व भ॑वति॥ ४॥
अ॒या॒न्य॒ल॒ंकृत्य॑ स्या॒मिति॑ भवति॥ १०॥

((yaṃ vá kā̱mayéta pri̱yaḥ syā̱dití |
tasmá e̱tam̱̐ sthága̱ramálaṃkāraṃ kálpayi̱tvā |
daśáhotāraṃ pu̱rastā̱̐dvyā̱khyāyá |
catúrhotāraṃ dakṣi̱ṇa̱taḥ |
pañcáhotāraṃ pa̱ścāt |
ṣaḍḍhótāramuttara̱taḥ |
sa̱ptahótāramu̱pari̱ṣṭāt |
sa̱mbhā̱raiśca patníbhiśca̱ mukhé'la̱ṃkṛtyá |
ā'syārdhaṃ vrájet |
pri̱yo ha̱iva bhávati || 4 ||
a̱yā̱nya̱la̱ṃkṛtyá syā̱mití bhavati || 10 ||))

**[[2-3-11-1]]**

ब्रह्मा॒॑त्म॒न्वद॑सृजत।
तद॑कामयत।
स॒मा॒त्मना॑ प॒द्ये॒येति॑।
आत्म॒न्नात्म॒न्नित्याम॑न्त्रयत।
तस्मै॑ द॒श॒मꣳ हू॒तः प्रत्य॑शृणोत्।
स दश॑हूतोऽभवत्।
दश॑हूतो ह॒ वै नाम॒ैषः।
तं वा ए॒तं दश॑हूत॒ꣳ सन्तँ॑म्।
दश॑हो॒तेत्याच॑क्षते प॒रोक्षे॑ण।
प॒रोक्ष॑प्रिया इ॒व हि दे॒वाः॥ १॥

((brahmā̐tma̱nvadásṛjata |
tadákāmayata |
samā̱tmaná padye̱yetí |
ātma̱nnātma̱nnityāmántrayata |
tasmaí daśa̱mam̐ hū̱taḥ pratyáśṛṇot |
sa daśáhūto'bhavat |
daśáhūto ha̱ vai nāmai̱ṣaḥ |
taṃ vā e̱taṃ daśáhūta̱m̐ santā̐m |
daśáho̱tetyācákṣate pa̱rokṣéṇa |
pa̱rokṣápriyā iva̱ hi de̱vāḥ || 1 ||))

**[[2-3-11-2]]**

आत्म॒न्नात्म॒न्नित्याम॑न्त्रयत।
तस्मै॑ स॒प्त॒मꣳ हू॒तः प्रत्य॑शृणोत्।
स स॒प्तहू॑तोऽभवत्।
स॒प्तहू॑तो ह॒ वै नाम॒ैषः।
तं वा ए॒तꣳ स॒प्तहू॑त॒ꣳ सन्तँ॑म्।
स॒प्तहो॒तेत्याच॑क्षते प॒रोक्षे॑ण।
प॒रोक्ष॑प्रिया इ॒व हि दे॒वाः।
आत्म॒न्नात्म॒न्नित्याम॑न्त्रयत।
तस्मै॑ ष॒ष्ठꣳ हू॒तः प्रत्य॑शृणोत्।
स षड्ढू॑तोऽभवत्।

((ātma̱nnātma̱nnityāmántrayata |
tasmaí sapta̱mam̐ hū̱taḥ pratyáśṛṇot |
sa sa̱ptahū́to'bhavat |
sa̱ptahū́to ha̱ vai nāmai̱ṣaḥ |
taṃ vā e̱tam̐ sa̱ptahū́ta̱m̐ santā̐m |
sa̱ptaho̱tetyācákṣate pa̱rokṣéṇa |
pa̱rokṣápriyā iva̱ hi de̱vāḥ |
ātma̱nnātma̱nnityāmántrayata |
tasmaí ṣa̱ṣṭham̐ hū̱taḥ pratyáśṛṇot|
sa ṣa̱ḍḍhū́to'bhavat |))

**[[2-3-11-3]]**

षड्ढू॑तो ह॒ वै नामै॒षः।
तं वा ए॒तꣳ षड्ढू॑त॒ꣳ॒ सन्त᳚म्।
षड्ढो॒तेत्याच॑क्षते प॒रोक्षे॑ण।
प॒रोक्ष॑प्रिया इ॒व हि दे॒वाः।
आ॒त्म॒न्नात्म॒न्नित्याम॑न्त्रयत।
तस्मै॑ पञ्च॒मꣳ हू॒तः प्रत्य॑शृणोत्।
स पञ्च॑हूतोऽभवत्।
पञ्च॑हूतो ह॒ वै नामै॒षः।
तं वा ए॒तं पञ्च॑हूत॒ꣳ॒ सन्त᳚म्।
पञ्च॑हो॒तेत्याच॑क्षते प॒रोक्षे॑ण॥ ३॥

((ṣa̱ḍḍhū́to ha̱ vai nāmai̱ṣaḥ |
taṃ vā e̱taṁ ṣa̱ḍḍhū́ta̱ṁ santā̎m |
ṣa̱ḍḍho̱tetyācáksate pa̱rokṣéṇa |
pa̱rokṣápriyā iva̱ hi de̱vāḥ |
ātma̱nnātma̱nnityāmántrayata |
tasmaí pañca̱maṁ hū̱taḥ pratyáśṛṇot |
sa pañcáhūto'bhavat |
pañcáhūto ha̱ vai nāmai̱ṣaḥ |
taṃ vā e̱taṃ pañcáhūta̱ṁ santā̎m |
pañcáho̱tetyācákṣate pa̱rokṣéṇa || 3 ||))

**[[2-3-11-4]]**

प॒रोक्ष॑प्रिया इ॒व हि दे॒वाः।
आ॒त्म॒न्नात्म॒न्नित्याम॑न्त्रयत।
तस्मै॑ चतु॒र्थꣳ हू॒तः प्रत्य॑शृणोत्।
स च॒तु॑र्हूतोऽभवत्।
च॒तु॑र्हूतो ह॒ वै नामै॒षः।
तं वा ए॒तं च॒तु॑र्हूत॒ꣳ॒ सन्त᳚म्।
च॒तु॑र्हो॒तेत्याच॑क्षते प॒रोक्षे॑ण।
प॒रोक्ष॑प्रिया इ॒व हि दे॒वाः।
तम॑ब्रवीत्।
त्वं वै मे॒ नेदि॑ष्ठꣳ हू॒तः प्रत्य॑श्रौषीः।
त्वयै॑नानाख्या॒तार॒ इति॑।
तस्मा॒न्नु है॑ना॒ꣳ॒श्च॒तु॑र्होतार॒ इत्याच॑क्षते।
तस्मा᳚च्छुश्रू॒षुः पु॒त्राणा॒ꣳ॒ हृद्य॑तमः।
नेदि॑ष्ठो॒ हृद्य॑तमः।
नेदि॑ष्ठो॒ ब्रह्म॑णो भवति।
य ए॒वं वेद॑॥ ४॥

दे॒वाः षड्ढू॑तोऽभव॒त्पञ्च॑हो॒तेत्याच॑क्षते प॒रोक्षे॑णाश्रौषी॒ः षट्च॑॥ ११॥

ब्र॒ह्म॒वा॒दि॒नः किं द॒क्षि॑णा॒ं यो वा अवि॑द्वा॒न्तस्य॒ वै ब्रह्म॑वा॒दिनो॒ यद्दश॑होतारः प्र॒जाप॑ति॒र्व्य॑स्रं प्र॒जाप॑ति॒ः पुरु॑षं प्र॒जाप॑तिरकामयत॒ स तप॒ः सो᳚ऽन्तर्वा᳚न्ब्रह्मवा॒दिनो॒ यो वा इ॒मं वि॒द्यात्प्र॒जाप॑ति॒ः सोम॒ꣳ॒ राजा॑नं॒ ब्रह्मा᳚त्म॒न्वदेका॑दश॥ ११॥

ब्र॒ह्म॒वा॒दि॒नस्तस्य॒ वा अ॒ग्नेर्यद्वा इ॒दं किंच॑ प्र॒जाप॑तिरकामयत॒ सो᳚ऽन्तर्वा॒न्य ए॒वास्य॑ दक्षिण॒तः पञ्चा॒शत्॥ ५०॥

((pa̱rokṣápriyā iva̱ hi de̱vāḥ |
ātma̱nnātma̱nnityāmántrayata |
tasmaí catu̱rthaṁ hū̱taḥ pratyáśṛṇot |
sa catúrhūto'bhavat |
catúrhūto ha̱ vai nāmai̱ṣaḥ |
taṃ vā e̱taṃ catúrhūta̱ṁ santā̎m |
catúrho̱tetyācákṣate pa̱rokṣéṇa |
pa̱rokṣápriyā iva̱ hi de̱vāḥ |
tamábravīt |
tvaṃ vai me̱ nedíṣṭhaṁ hū̱taḥ pratyáśrauṣīḥ |
tvayaínānākhyā̱tāra̱ iti |
tasmā̱nnu haínā̱ṁścatúrhotāra̱ ityācákṣate |
tasmā̎cchuśrū̱ṣuḥ pu̱trāṇā̱ṁ hṛdyátamaḥ |
nedíṣṭho̱ hṛdyátamaḥ |
nedíṣṭho̱ brahmáṇo bhavati |
ya e̱vaṃ vedá || 4 ||
de̱vāḥ ṣa̱ḍḍhū́to'bhava̱tpañcáho̱tetyācákṣate pa̱rokṣéṇāśrauṣī̱ḥ ṣaṭcá || 11 ||
bra̱hma̱vā̱dina̱ḥ kiṃ dakṣíṇā̱ṃ yo vā avídvā̱ntasya̱ vai bráhmavā̱dino̱ yaddaśáhotāraḥ pra̱jāpáti̱rvyásraṃ pra̱jāpáti̱ḥ purúṣaṃ pra̱jāpátirakāmayata̱ sa tapa̱ḥ sō̎'ntarvā̎nbrahmavā̱dino̱ yo vā i̱maṃ vi̱dyātpra̱jāpáti̱ḥ soma̱ṁ rājána̱ṃ brahmā̎tma̱nvadekádaśa || 11 ||
bra̱hma̱vā̱dina̱stasya̱ vā a̱gneryadvā i̱daṃ kiṃcá pra̱jāpátirakāmayata̱ sō̎'ntarvā̱nya e̱vāsyá dakṣiṇa̱taḥ páñcā̱śat || 50 ||))

# Taittirīya-Brāhmaṇa Book 2, Chapter 4

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[2-4-1-1]]**

जुष्टो॒ दमू॑ना॒ अति॑थिर्दुरो॒णे।
इ॒मं नो॑ य॒ज्ञमुप॑याहि वि॒द्वान्।
विश्वा॑ अग्नेऽभि॒युजो॑ वि॒हत्य॑।
श॒त्रूयतामाभ॑रा॒ भोज॑नानि।
अग्ने॒ शर्ध॑ मह॒ते सौभ॑गाय।
तव॑ द्यु॒म्नान्यु॑त्त॒मानि॑ सन्तु।
सं जा॑स्पत्यꣳ सु॒यम॒माकृ॑णुष्व।
श॒त्रूयताम॒भिति॑ष्ठा॒ महा॑ꣳसि।
अग्ने॒ यो नो॒ऽभितो॒ जनः॑।
वृको॒ वारो॒ जिघा॑ꣳसति॥ १॥

((juṣṭo̱ damū̍nā̱ ati̍thirduro̱ṇe |
i̱mam no̍ ya̱jñamupa̍yāhi vi̱dvān |
viśvā̍ agne'bhi̱yujo̍ vi̱hatya̍ |
śa̱trūya̱tāmābha̍rā̱ bhoja̍nāni |
agne̱ śardha̍ maha̱te saubha̍gāya |
tava̍ dyu̱mnānyu̍tta̱māni̍ santu |
saṃ jā̍spatyam̐ su̱yama̱mākṛ̍ṇuṣva |
śa̱trūya̱tāma̱bhiti̍ṣṭhā̱ mahām̐̍si |
agne̱ yo no̱'bhito̱ jana̍ḥ |
vṛko̱ vāro̱ jighām̐̍sati || 1 ||))

**[[2-4-1-2]]**

ताꣳस्त्वं वृ॑त्रहञ्जहि।
वस्व॒स्मभ्य॒माभ॑र।
अग्ने॒ यो नो॑ऽभि॒दास॑ति।
स॒मा॒नो यश्च॒ निष्ट्यः॑।
इ॒ध्मस्ये॑व प्र॒क्षाय॑तः।
मा तस्योच्छे॑षि॒ किञ्च॒न।
त्वमि॑न्द्राभि॒भूर॑सि।
दे॒वो वि॒ज्ञात॑वीर्यः।
वृ॒त्र॒हा पु॑रु॒चेत॑नः।
अप॒ प्राच॑ इन्द्र॒ विश्वा॑ꣳ अ॒मित्रा॑न्॥ २॥

((tām̐stvaṃ vṛ̍trahañjahi |
vasva̱smabhya̱mābha̍ra |
agne̱ yo no̍'bhi̱dāsa̍ti |
sa̱mā̱no yaśca̱ niṣṭya̍ḥ |
i̱dhmasye̍va pra̱kṣāya̍taḥ |
mā tasyocche̍ṣi̱ kiñca̱na |
tvami̍ndrābhi̱bhūra̍si |
de̱vo vi̱jñā̍tavīryaḥ |
vṛ̱tra̱hā pu̍ru̱ceta̍naḥ |
apa̱ prāca̍ indra̱ viśvām̐̍ a̱mitrā̍n || 2 ||))

**[[2-4-1-3]]**

अपापा॑चो अभिभूते नुदस्व।
अपोदी॑चो॒ अप॑शूराध॒राच॑ ऊ॒रौ।
यथा॒ तव॒ शर्म॒न्मदे॑म।
तमिन्द्रं॑ वाजयामसि।
म॒हे वृ॒त्राय॒ हन्त॑वे।
स वृषा॑ वृष॒भो भु॑वत्।
यु॒जे रथं॑ ग॒वेष॑णꣳ॒ हरि॑भ्याम्।
उप॒ ब्रह्मा॑णि जुजुषा॒णमस्थुः।
विबा॑धिष्टा॒स्य रोद॑सी महि॒त्वा।
इन्द्रो॑ वृ॒त्राण्य॑प्रती॒जघ॒न्वान्॥ ३॥

((apāpā̍co abhibhūte nudasva |
apodī̍co̱ apa̍śūrādha̱rāca̍ ū̱rau |
yathā̱ tava̱ śarma̱nmade̍ma |
tamindraṃ̍ vājayāmasi |
ma̱he vṛ̱trāya̱ hanta̍ve |
sa vṛṣā̍ vṛṣa̱bho bhu̍vat |
yu̱je rathaṃ̍ ga̱veṣa̍ṇam̱̐ hari̍bhyām |
upa̱ brahmā̍ṇi jujuṣā̱ṇamasthuḥ |
vibā̍dhiṣṭā̱sya roda̍sī mahi̱tvā |
indro̍ vṛ̱trāṇya̍pratī̱jagha̱nvān || 3 ||))

**[[2-4-1-4]]**

ह॒व्य॒वाह॑मभिमाति॒षाह॑म्।
र॒क्षो॒हणं॒ पृत॑नासु जि॒ष्णुम्।
ज्योति॑ष्मन्तं॒ दीद्य॑तं॒ पुर॑न्धिम्।
अ॒ग्निꣳ स्वि॑ष्ट॒कृत॒माहु॑वेम।
स्वि॑ष्टमग्ने अ॒भि तत्पृ॑णाहि।
विश्वा॑ दे॒व पृत॑ना अ॒भिष्य।
उ॒रुं नः॒ पन्थां॑ प्रदि॒शन्विभा॑हि।
ज्योति॑ष्मद्धेह्य॒जरं॑ न॒ आयुः॑।
त्वाम॑ग्ने ह॒विष्म॑न्तः।
दे॒वं मर्ता॑स ईडते॥ ४॥

((ha̱vya̱vāha̍mabhimāti̱ṣāha̍̎m ।
ra̱kṣo̱haṇa̱m pṛta̍nāsu ji̱ṣṇum ।
jyoti̍ṣmanta̱m dīdya̍ta̱m pura̍ndhim ।
a̱gni̍̐ sviṣṭa̱kṛta̱māhu̍vema ।
svi̍ṣṭamagne a̱bhi tatpṛ̍ṇāhi ।
viśvā̍ deva̱ pṛta̍nā a̱bhiṣya ।
u̱ruṃ na̱ḥ panthā̍̎m pradi̱śanvibhā̍hi ।
jyoti̍ṣmaddhehyaja̱raṃ na̱ āyu̍ḥ ।
tvāma̍gne ha̱viṣma̍ntaḥ ।
de̱vam marta̍sa i̱ḍate ॥ 4 ॥))

**[[2-4-1-5]]**

मन्ये̎ त्वा जा॒तवे॑दसम्।
स ह॒व्या व॑क्ष्यानु॒षक्।
विश्वा॑नि नो दु॒र्गहा॑ जातवेदः।
सिन्धु॒ं न ना॒वा दु॑रि॒ताऽति॑पर्षि।
अग्ने॑ अत्रि॒वन्मन॑सा गृणा॒नः।
अ॒स्माकं॑ बोध्यवि॒ता त॒नूना̎म्।
पू॒षा गा अन्वे॑तु नः।
पू॒षा र॑क्षत्वर्व॑तः।
पू॒षा वाज॑ꣳ सनोतु नः॥
पू॒षेमा आशा॒ अनु॑वेद॒ सर्वाः̎॥ ५॥

((manye̎ tvā jā̱tave̍dasam ।
sa ha̱vyā va̍kṣyānu̱ṣak ।
viśvā̍ni no du̱rgahā̍ jātavedaḥ ।
sindhu̱ṃ na nā̱vā du̍ritā̱'ti̍parṣi ।
agne̍ atri̱vanmana̍sā gṛṇā̱naḥ ।
a̱smākaṃ̍ bodhyavi̱tā ta̱nūnā̎m ।
pū̱ṣā gā anve̍tu naḥ ।
pū̱ṣā ra̍kṣa̱tvarva̍taḥ ।
pū̱ṣā vāja̍ṃ sanotu naḥ ॥
pū̱ṣemā āśā̱ anu̍veda̱ sarvā̎ḥ ॥ 5 ॥))

**[[2-4-1-6]]**

सो अ॒स्माꣳ अभ॑यतमेन नेषत्।
स्व॒स्ति॒दा अघृ॑णिः सर्व॑वीरः।
अप्र॑युच्छन्पु॒र ए॑तु प्रजा॒नन्।
त्वम॑ग्ने स॒प्रथा॑ असि।
जुष्टो॑ होता॒ वरे̎ण्यः।
त्वया॑ य॒ज्ञं वित॑न्वते।
अ॒ग्नी रक्षाꣳ॑सि सेधति।
शु॒क्रशो॑चि॒रम॑र्त्यः।
शुचिः॑ पाव॒क ईड्यः॑।
अग्ने॑ रक्षा॑ णो॒ अꣳह॑सः॥ ६॥

((so a̱smāṃ̐ abha̍yatamena neṣat ।
sva̱sti̱dā aghṛ̍ṇiḥ sarva̍vīraḥ ।
apra̍yucchanpu̱ra e̍tu̱ prajā̱nan ।
tvama̍gne sa̱prathā̍ asi ।
juṣṭo̍ hotā̱ vare̎ṇyaḥ ।
tvayā̍ ya̱jñaṃ vita̍nvate ।
a̱gnī rakṣā̍ṃsi sedhati ।
śu̱kraśo̍ci̱rama̍rtyaḥ ।
śuci̍ḥ pāva̱ka ī̱ḍya̍ḥ ।
agne̱ rakṣā̍ ṇo̱ aṃha̍saḥ ॥ 6 ॥))

**[[2-4-1-7]]**

प्रति॑ष्म दे॒व रीष॑तः।
तपि॑ष्ठैर॒जरो॑ दह।
अग्ने॑ हꣳसि॒न्यत्रि॑णा̎म्।
दीद्य॒न्मर्त्ये॑ष्वा।
स्वे क्षये॑ शुचिव्रत।
आ वा॑त वाहि भे॒षजम्।
वि वा॑त वाहि॒ यद्रपः॑।
त्वꣳ हि वि॒श्वभे॑षजः।
दे॒वाना̎ं दू॒त ईय॑से।
द्वावि॒मौ वातौ̎ वातः॥ ७॥

((prati̍ṣma deva̱ rīṣa̍taḥ ।
tapi̍ṣṭhaira̱jaro̍ daha ।
agne̱ haṃsi̱nyatri̍ṇā̎m ।
dīdya̱nmartye̍ṣvā ।
sve kṣaye̍ śucivrata ।
ā vā̍ta vāhi bheṣa̱jam ।
vi vā̍ta vāhi̱ yadrapa̍ḥ ।
tvaṃ hi vi̱śvabhe̍ṣajaḥ ।
de̱vānā̎ṃ dū̱ta īya̍se ।
dvāvi̱mau vātau̎ vātaḥ ॥ 7 ॥))

**[[2-4-1-8]]**

आ सिन्धो॒रा प॑रा॒वतः॑।
दक्षं॑ मे अ॒न्य आ॒वातु॑।
परा॒ऽन्यो वा॑तु॒ यद्रपः॑।
यद॒दो वा॑त ते गृ॒हे।
अ॒मृत॑स्य नि॒धिर्हि॒तः।
ततो॑ नो देहि॒ जीव॑से।
ततो॑ नो धेहि भे॒षजम्।
ततो॑ नो॒ मह॒ आव॑ह।

वात॒ आवा॑तु भेष॒जम्।

श॒म्भूर्म॑यो॒भूर्नो॑ हृ॒दे॥ ८॥

((ā sindhor̠ā pár̠āvatáḥ |
dakṣaṃ me a̠nya ā̠vātú |
parā̠'nyo vấtu̠ yadrapáḥ |
yada̠do vấta te gr̠he |
a̠mr̥tásya ni̠dhirhi̠taḥ |
tató no dehi jī̠vasé |
tató no dhehi bheṣa̠jam |
tató no̠ maha̠ āváha |
vāta̠ āvấtu bheṣa̠jam |
śa̠mbhūrmáyo̠bhūrnó hr̠de || 8 ||))

**[[2-4-1-9]]**

प्र ण॒ आयू॒ꣳषि तारिषत्।

त्वम॑ग्ने अ॒याऽसि॑।

अ॒या सन्मन॑सा हि॒तः।

अ॒या सन्ह॒व्यमू॑हिषे।

अ॒या नो॑ धेहि भेष॒जम्।

इ॒ष्टो अ॒ग्निराहु॑तः।

स्वाहा॑कृतः पिपर्तु नः।

स्व॒गा दे॒वेभ्य॑ इ॒दं नमः॑।

कामो॑ भू॒तस्य॒ भव्य॑स्य।

स॒म्राडेको॒ विरा॑जति॥ ९॥

((pra ṇa̠ āyū̠ṁṣi tāriṣat |
tvamágne a̠yā'sí |
a̠yā sanmanásā hi̠taḥ |
a̠yā sanha̠vyamū́hiṣe |
a̠yā nó dhehi bheṣa̠jam |
i̠ṣṭo a̠gnirāhútaḥ |
svāhā́kr̥taḥ pipartu naḥ |
sva̠gā de̠vebhyá i̠daṃ namáḥ |
kāmó bhū̠tasya̠ bhavyásya |
sa̠mrāḍeko̠ virā́jati || 9 ||))

**[[2-4-1-10]]**

स इ॒दं प्रति॑पप्रथे।

ऋ॒तूनुत्सृ॑जते व॒शी।

काम॒स्तदग्रे॒ सम॑वर्त॒ताधि॑।

मन॑सो॒ रेतः॑ प्रथ॒मं यदासी᳚त्।

स॒तो बन्धु॒मस॑ति॒ निर॑विन्दन्।

हृ॒दि प्र॒तीष्या॑ क॒वयो॑ मनी॒षा।

त्वया॑ मन्यो स॒रथ॑मारु॒जन्तः॑।

हर्ष॑माणासो धृष॒ता म॑रुत्वः।

ति॒ग्मेष॑व॒ आयु॑धा स॒ꣳशिशा॑नाः।

उ॒पप्रय॑न्ति॒ नरो॑ अ॒ग्निरू॑पाः॥ १०॥

((sa i̠daṃ pratípaprathe |
r̠tūnutsŕ̥jate va̠śī |
kāma̠stadagre̠ samávarta̠tādhí |
manáso̠ retáḥ pratha̠maṃ yadāsī̈t |
sa̠to bandhu̠masáti̠ nirávindan |
hr̠di pra̠tīṣyá ka̠vayó manī̠ṣā |
tvayá manyo sa̠rathámāru̠jantáḥ |
harṣámāṇāso dhr̥ṣa̠tā márutvaḥ |
ti̠gmeṣáva̠ āyúdhā sa̠ṁśiśā́nāḥ |
upa̠prayánti̠ naró a̠gnirū́pāḥ || 10 ||))

**[[2-4-1-11]]**

म॒न्युर्भगो॑ म॒न्युरे॒वास॑ दे॒वः।

म॒न्युर्होता॑ वरु॑णो वि॒श्ववे॑दाः।

म॒न्युं विश॑ ईडते दे॒वयन्ती᳚ः।

पा॒हि नो॑ मन्यो॒ तप॑सा॒ श्रमे॑ण।

त्वम॑ग्ने व्रत॒भृच्छुचि॑ः।

दे॒वाꣳ आसा॑दया इ॒ह।

अग्ने॑ ह॒व्याय॒ वोढ॑वे।

व्र॒ता नु बिभ्र॑द्व्रत॒पा अदा᳚भ्यः।

यजा॑नो दे॒वाꣳ अ॒जरः॑ सु॒वीरः॑।

दध॒द्रत्ना॑नि सुवि॒दानो॒ अग्ने॑।

गो॒पाय॑ नो॑ जी॒वसे॑ जातवेदः॥ ११॥

जिघा॑ꣳसत्यमित्रा᳚ञ्जघन्वानी॑डते॒ सर्वा॒ अꣳह॑सो वातो हृ॒दे
रा॑जत्य॒ग्निरू॑पाः सुवि॒दानो॒ अग्न॒ एकं॑ च॥ १॥

((ma̠nyurbhagó ma̠nyure̠vāsá de̠vaḥ |
ma̠nyurhotā̠ varúṇo vi̠śvavédāḥ |
ma̠nyuṃ viśá īḍate deva̠yantī̈ḥ |
pāhi nó manyo̠ tapásā̠ śraméṇa |
tvamágne vrata̠bhr̥cchucíḥ |
de̠vām̐ āsádayā i̠ha |
agné ha̠vyāya̠ vo̠ḍháve |
vra̠tā nu bibhrádvrata̠pā adā̈bhyaḥ |
yajā́no de̠vām̐ a̠jaráḥ su̠vīráḥ |
dadha̠dratnā́ni suvidā̠no ágne |
go̠pāya nó jī̠vasé jātavedaḥ || 11 ||
jighām̐satya̠mitrā̈ñjagha̠nvānī́ḍate̠ sarvā̠ am̐háso vāto hr̠de rā́jatya̠gnirū́pāḥ suvidā̠no ágna̠ ekaṃ ca || 1 ||))

**[[2-4-2-1]]**

चक्षु॑षो हेते॒ मन॑सो हेते।

वाचो॑ हेते ब्रह्म॑णो हेते।
यो मा॑ऽघायुर॑भि॒दास॑ति।
तम॑ग्ने मे॒न्याऽमे॒निं कृ॑णु।
यो मा॒ चक्षु॑षा॒ यो मन॑सा।
यो वा॒चा ब्रह्म॑णाऽघा॒युर॑भि॒दास॑ति।
तया॑ऽग्ने॒ त्वं मे॒न्या।
अ॒मुम॑मे॒निं कृ॑णु।
यत्किंचा॒सौ मन॑सा॒ यच्च॑ वा॒चा।
य॒ज्ञैर्जु॒होति॒ यजु॑षा ह॒विर्भिः॑॥ १॥

((cakṣu̍ṣo hete̱ mana̍so hete ।
vāco̍ hete̱ brahma̍ṇo hete ।
yo mā̍'ghā̱yura̍bhi̱dāsa̍ti ।
tama̍gne me̱nyā'me̱nim̍ kr̥̍ṇu ।
yo mā̱ cakṣu̍ṣā̱ yo mana̍sā ।
yo vā̱cā brahma̍ṇā'ghā̱yura̍bhi̱dāsa̍ti ।
tayā̍'gne̱ tvam me̱nyā ।
a̱muma̍me̱nim kr̥̍ṇu ।
yatkiṃcā̱sau mana̍sā̱ yacca̍ vā̱cā ।
ya̱jñairju̱hoti̱ yaju̍ṣā ha̱virbhi̍ḥ ॥ 1 ॥))

**[[2-4-2-2]]**

तन्मृ॒त्युर्निर्ऋ॑त्या संविदा॒नः।
पु॒रा दि॒ष्टादाहु॑तीरस्य हन्तु।
या॒तु॒धाना॒ निर्ऋ॑ति॒रादु॒ रक्षः॑।
ते अ॑स्य घ्न॒न्त्वनृ॑तेन स॒त्यम्।
इन्द्रे॑षिता॒ आज्य॑मस्य मथ्नन्तु।
मा तत्सम॑ृद्धि॒ यद॒सौ क॒रोति॑।
हन्मि॑ ते॒ऽहं कृ॒तꣳ ह॒विः।
यो मे॑ घो॒रमची॑कृतः।
अपा॑ञ्चौ त उ॒भौ बा॒हू।
अप॑नह्याम्या॒स्य॑म्॥ २॥

((tanmr̥̱tyurnirr̥̍tyā saṃvidā̱naḥ ।
pu̱rā di̱ṣṭādāhu̍tīrasya hantu ।
yā̱tu̱dhānā̱ nirr̥̍ti̱rādu̱ rakṣa̍ḥ ।
te a̍sya ghna̱ntvanr̥̍tena sa̱tyam ।
indre̍ṣitā̱ ājya̍masya mathnantu ।
mā tatsamr̥̍ddhi̱ yada̱sau ka̱roti̍ ।
hanmi̍ te̱'haṃ kr̥̱tam̐ ha̱viḥ ।
yo me̍ gho̱ramacī̍kr̥taḥ ।
apā̍ñcau ta u̱bhau bā̱hū ।
apa̍nahyāmyā̱syā̍m ॥ 2 ॥))

**[[2-4-2-3]]**

अप॑नह्यामि ते बा॒हू।
अप॑नह्याम्या॒स्य॑म्।
अ॒ग्नेर्दे॒वस्य॒ ब्रह्म॑णा।
सर्वं॑ तेऽवधिषं कृ॒तम्।
पु॒राऽमुष्य॑ वषट्का॒रात्।
य॒ज्ञं दे॒वेषु॑ नस्कृधि।
स्वि॒ष्टम॒स्माकं॑ भूयात्।
माऽस्मान्प्राप॒न्नरा॑तयः।
अन्ति॑ दू॒रे स॒तो अ॑ग्ने।
भ्रातृ॑व्यस्याभि॒दास॑तः॥ ३॥

((apa̍nahyāmi te bā̱hū ।
apa̍nahyāmyā̱syā̍m ।
a̱gnerde̱vasya̱ brahma̍ṇā ।
sarva̍ṃ te'vadhiṣaṃ kr̥̱tam ।
pu̱rā'muṣya̍ vaṣaṭkā̱rāt ।
ya̱jñaṃ de̱veṣu̍ naskr̥dhi ।
svi̱ṣṭama̱smākam̍ bhūyāt ।
mā'smānprāpa̱nnarā̍tayaḥ ।
anti̍ dū̱re sa̱to a̍gne ।
bhrātr̥̍vyasyābhi̱dāsa̍taḥ ॥ 3 ॥))

**[[2-4-2-4]]**

व॒षट्का॒रेण॒ वज्रे॑ण।
कृ॒त्याꣳ हन्मि॑ कृ॒ताम॒हम्।
यो मा॒ नक्तं॑ दिवा॑ सा॒यम्।
प्रा॒तश्चाह्नो॑ नि॒पीय॑ति।
अ॒द्या तमि॑न्द्र॒ वज्रे॑ण।
भ्रातृ॑व्यं पादयामसि।
इन्द्र॑स्य गृ॒हो॑ऽसि॒ तं त्वा॑।
प्रप॑द्ये॒ सगु॒ः साश्वः॑।
स॒ह यन्मे॒ अस्ति॒ तेन॑।
ईडे॑ अ॒ग्निं वि॒प॒श्चित॑म्॥ ४॥

((va̱ṣa̱ṭkā̱re̱ṇa̱ vajre̍ṇa ।
kr̥̱tyām̐ ha̍nmi kr̥̱tāma̱ham ।
yo mā̱ nakta̱ṃ divā̍ sā̱yam ।
prā̱taścāhno̍ ni̱pīya̍ti ।
a̱dyā tami̍ndra̱ vajre̍ṇa ।
bhrātr̥̍vyaṃ pādayāmasi̱ ।
indra̍sya gr̥̱ho̍'si̱ taṃ tvā̍ ।
prapa̍dye̱ sagu̱ḥ sāśva̍ḥ ।
sa̱ha yanme̱ asti̱ tena̍ ।
īḍe̍ a̱gniṃ vi̍pa̱ścitā̍m ॥ 4 ॥))

**[[2-4-2-5]]**

गि॒रा य॒ज्ञस्य॒ साध॑नम्।
श्रु॒ष्टी॒वानं॑ धि॒तावा॑नम्।
अग्ने॑ श॒केम॑ ते व॒यम्।
यमं॑ दे॒वस्य॑ वा॒जिनः॑।
अति॒ द्वेषा॑ꣳषि तरेम।
अव॑तं मा॒ सम॑नसौ॒ समो॑कसौ।
सचे॑तसौ॒ सरे॑तसौ।
उ॒भौ माम॑वतं जातवेदसौ।
शि॒वौ भ॑वतम॒द्य नः॑।
स्व॒यं कृ॑ण्वा॒नः सु॒गमप्र॑यावम्॥ ५॥

((gi̱rā ya̱jñasya̱ sādha̍naml
śru̱ṣṭī̱vāna̍ṃ dhi̱tāvā̍nam l
agne̍ śa̱kema̍ te va̱yam l
yama̍ṃ de̱vasya̍ vā̱jina̍ḥ l
ati̱ dveṣā̍m̐ṣi tarema l
ava̍taṃ mā̱ sama̍nasau̱ samo̍kasau l
sace̍tasau̱ sare̍tasau l
u̱bhau māma̍vataṃ jātavedasau l
śi̱vau bha̍vatama̱dya na̍ḥ l
sva̱yaṃ kṛ̍ṇvā̱naḥ su̱gamapra̍yāvam ll 5 ll))

**[[2-4-2-6]]**

ति॒ग्मशृ॑ङ्गो वृष॒भः शोशु॑चानः।
प्र॒त्नꣳ स॒धस्थ॒मनु॒पश्य॑मानः।
आ तन्तु॑मग्निर्दि॒व्यं त॑तान।
त्वं न॒स्तन्तु॑रु॒त सेतु॑रग्ने।
त्वं पन्था॑ भवसि दे॒वयानः॑।
त्वया᳚ऽग्ने पृ॒ष्ठं व॒यमारु॑हेम।
अथा॑ दे॒वैः स॑ध॒मादं॑ मदेम।
उदु॑त्त॒मं मु॑मुग्धि नः।
वि पाशं॑ मध्य॒मं चृ॑त।
अवा॑ध॒मानि॑ जी॒वसे᳚॥

((ti̱gmaśṛ̍ṅgo vṛ̱ṣa̱bhaḥ śośu̍cānaḥ l
pra̱tnam̐̍ sa̱dhastha̱manu̱paśya̍mānaḥ l
ā tantu̍magnirdi̱vyaṃ ta̍tāna l
tvaṃ na̱stantu̍ru̱ta setu̍ragne l
tvaṃ panthā̍ bhavasi deva̱yāna̍ḥ l
tvayā̎'gne pṛ̱ṣṭhaṃ va̱yamāru̍hema l
athā̍ de̱vaiḥ sa̍dha̱māda̍ṃ madema l
udu̍tta̱maṃ mu̍mugdhi naḥ l
vi pāśa̍ṃ madhya̱maṃ cṛ̍ta l
avā̍dha̱māni̍ jī̱vase̎ ll))

**[[2-4-2-7]]**

व॒यꣳ सो॑म व्र॒ते तव॑।
मन॑स्त॒नूषु॒ बिभ्र॑तः।
प्र॒जाव॑न्तो अशीमहि।
इ॒न्द्रा॒णी दे॒वी सु॒भगा॑ सु॒पत्नी᳚।
उदꣳ॑शेन पति॒विद्ये॑ जिगाय।
त्रि॒ꣳशद॑स्या ज॒घनं॒ योज॑नानि।
उ॒पस्थ॒ इन्द्र॒ꣳ᳚ स्थवि॑रं बिभर्ति॥
सेना॑ ह॒ नाम॑ पृथि॒वी धन॑ञ्ज॒या।
वि॒श्वव्य॑चा॒ अदि॑तिः सूर्य॑त्वक्।
इ॒न्द्रा॒णी दे॒वी प्रा॒सहा॒ ददा॑ना॥ ७॥

((va̱yam̐ so̍ma vra̱te tava̍ l
mana̍sta̱nūṣu̱ bibhra̍taḥ l
pra̱jāva̍nto aśīmahi l
i̱ndrā̱ṇī de̱vī su̱bhagā̍ su̱patnī̎ l
udam̐̍śena pati̱vidye̍ jigāya l
tri̱m̐śada̍syā ja̱ghana̱ṃ yoja̍nāni l
u̱pastha̱ indra̱m̐̎ sthavi̍raṃ bibharti ll
senā̍ ha̱ nāma̍ pṛ̱thi̱vī dha̍nañja̱yā l
vi̱śvavya̍cā̱ adi̍ti̱ḥ sūrya̍tvak l
i̱ndrā̱ṇī de̱vī prā̱sahā̱ dadā̍nā ll 7 ll))

**[[2-4-2-8]]**

सा नो॑ दे॒वी सु॒हवा॒ शर्म॑ यच्छतु॥
आ त्वा॑ऽहार्षम॒न्तर॑भूः।
ध्रु॒वस्ति॒ष्ठावि॑चाचलिः।
वि॒श॑स्त्वा॒ सर्वा॑ वाञ्छन्तु।
मा त्वद्रा॒ष्ट्रमधि॑भ्रशत्।
ध्रु॒वा द्यौर्ध्रु॒वा पृ॑थि॒वी।
ध्रु॒वं विश्व॑मि॒दं जग॑त्।
ध्रु॒वा ह॒ पर्व॑ता इ॒मे।
ध्रु॒वो राजा॑ वि॒शाम॒यम्।
इ॒हैवैधि॒ मा व्य॑थिष्ठाः॥ ८॥

((sā no̍ de̱vī su̱havā̱ śarma̍ yacchatu ll
ā tvā̍'hārṣama̱ntara̍bhūḥ l
dhru̱vasti̱ṣṭhāvi̍cācaliḥ l
vi̱śa̍stvā̱ sarvā̍ vāñchantu l
mā tvadrā̱ṣṭramadhi̍bhraśat l
dhru̱vā dyaurdhru̱vā pṛ̍thi̱vī l
dhru̱vaṃ viśva̍mi̱daṃ jaga̍t l
dhru̱vā ha̱ parva̍tā i̱me l
dhru̱vo rājā̍ vi̱śāma̱yam l

i̱haivaidhi̱ mā vya̍thiṣṭhāḥ || 8 ||))

**[[2-4-2-9]]**

पर्व॑त इ॒वावि॑चाचलिः।
इन्द्र॑ इ॒वेह ध्रु॒वस्ति॑ष्ठ।
इ॒ह रा॒ष्ट्रमु॑ धारय॥
अ॒भिति॑ष्ठ पृतन्य॒तः।
अध॑रे सन्तु॒ शत्र॑वः।
इन्द्र॑ इव वृत्र॒हा ति॑ष्ठ।
अ॒पः क्षेत्रा॑णि सं॒जय॑न्।
इन्द्र॑ एणमदीधरत्।
ध्रु॒वं ध्रु॒वेण॑ ह॒विषा᳚।
तस्मै॑ दे॒वा अधि॑ब्रवन्।
अ॒यं च॒ ब्रह्म॑णस्पतिः॥
ह॒विर्भि॑रा॒स्य॑मभि॒ दास॑तो विप॒श्चित॒मप्र॑यावं जी॒वसे॒ द॒दा॑ना व्यथिष्ठा ब्रव॒न्नेकं॑ च॥ २॥

((parva̍ta i̱vāvi̍cācaliḥ |
indra̍ ive̱ha dhru̱vasti̍ṣṭha |
i̱ha rā̱ṣṭramu̍ dhāraya ||
a̱bhiti̍ṣṭha pṛtanya̱taḥ |
adha̍re santu̱ śatra̍vaḥ |
indra̍ iva vṛtra̱hā ti̍ṣṭha |
a̱paḥ kṣetrā̍ṇi sa̱ṃjaya̍n |
indra̍ eṇamadīdharat |
dhru̱vaṃ dhru̱veṇa̍ ha̱viṣā̍̍ |
tasmai̍ de̱vā adhi̍bravan |
a̱yaṃ ca̱ brahma̍ṇaspati̍ḥ ||
ha̱virbhi̍rā̱sya̍mabhi̱ dāsa̍to vipa̱ścita̱mapra̍yāvaṃ
jī̱vase̱ dada̍̄nā vyathiṣṭhā brava̱nneka̍ṃ ca || 2 ||))

**[[2-4-3-1]]**

जुष्टी॑ नरो॒ ब्रह्म॑णा वः पितृ॒णाम्।
अक्ष॑मव्य॒यं न किला॑ रिषाथ।
यच्छक्व॑रीषु बृह॒ता र॒वेण॑।
इन्द्रे॒ शुष्म॒मद॒॑धाथा वसिष्ठाः।
पा॒व॒का न॒ः सर॑स्वती।
वाजे॑भिर्वा॒जिनी॑वती।
य॒ज्ञं व॑ष्टु धि॒या व॑सुः।
सर॑स्वत्य॒भि नो॑ नेषि॒ वस्यः॑।
मा प॑स्फरीः पय॑सा॒ मा न॒ आध॑क्।
जु॒षस्व॑ नः स॒ख्या॑ वे॒श्या॑ च॥ १॥

((ju̱ṣṭī̍ naro̱ brahma̍ṇā vaḥ pitṛ̱ṇām |
akṣa̍mavya̱yam̱ na kilā̍ riṣātha |
yacchakva̍rīṣu bṛha̱tā rave̍ṇa |
indre̱ śuṣma̱mada̍dhāthā vasiṣṭhāḥ |
pā̱va̱kā na̱ḥ sara̍svatī |
vāje̍bhirvā̱jinī̍vatī |
ya̱jñam̱ va̍ṣṭu dhi̱yā va̍suḥ |
sara̍svatya̱bhi no̍ neṣi̱ vasya̍ḥ |
mā pa̍spharī̱ḥ paya̍sā̱ mā na̱ ādha̍k |
ju̱ṣasva̍ naḥ sa̱khyā̍ ve̱śyā̍ ca || 1 ||))

**[[2-4-3-2]]**

मा त्वत्क्षेत्रा॒ण्यर॑णानि गन्म।
वृ॒ञ्जे ह॒विर्नम॑सा ब॒र्हिर॒ग्नौ।
अया॑मि॒ स्रुग्घृ॒तव॑ती सुवृ॒क्तिः।
अम्य॑क्षि॒ सद्म॒ सद॑ने पृथि॒व्याः।
अश्रा॑यि य॒ज्ञः सूर्ये॒ न चक्षुः॑।
इ॒हार्वाञ्च॒मति॑ह्वये।
इन्द्रं॒ जैत्रा॑य॒ जेत॑वे।
अ॒स्माक॑मस्तु॒ केव॑लः।
अ॒र्वाञ्च॒मिन्द्र॑म॒मुतो॑ हवामहे।
यो गो॒जिद्ध॑न॒जिद॑श्व॒जिद्यः॥ २॥

((mā tvatkṣetrā̱ṇyara̍ṇāni ganma |
vṛ̱ñje ha̱virnama̍sā ba̱rhira̱gnau |
ayā̍mi̱ srugghṛ̱tava̍tī suvṛ̱ktiḥ |
amya̍kṣi̱ sadma̱ sada̍ne pṛthi̱vyāḥ |
aśrā̍yi ya̱jñaḥ sūrye̱ na cakṣu̍ḥ |
i̱hārvāñca̱mati̍hvaye |
indra̱ṃ jaitrā̍ya̱ jeta̍ve |
a̱smāka̍mastu̱ keva̍laḥ |
a̱rvāñca̱mindra̍ma̱muto̍ havāmahe |
yo go̱jiddha̍na̱jida̍śva̱jidyaḥ || 2 ||))

**[[2-4-3-3]]**

इ॒मं नो॑ य॒ज्ञं वि॑ह॒वे जु॑षस्व।
अ॒स्य कु॑र्मो हरिवो मे॒दिनं॑ त्वा।
अस॑मृष्टो जायसे मातृ॒वोः शुचिः॑।
म॒न्द्रः क॒विरुद॑तिष्ठो॒ विव॑स्वतः।
घृ॒तेन॑ त्वाऽवर्धयन्नग्न आहुत।
धू॒मस्ते॑ के॒तुर॑भवद्दि॒वि श्रि॒तः॥
अ॒ग्निर॒ग्रे॑ प्रथ॒मो दे॒वता॑नाम्।
सं॒या॑तानामुत्त॒मो विष्णु॑रासीत्।
यज॑मानाय परि॒गृह्य॑ दे॒वान्।
दी॒क्षये॒दꣳ ह॒विराग॑च्छतं नः॥ ३॥

((i̱maṃ no̍ ya̱jñaṃ vi̍ha̱ve ju̍ṣasva ।
a̱sya ku̍rmo harivo me̱dinaṃ̍ tvā ।
asaṃ̍mṛṣṭo jāyase mātṛ̱voḥ śuci̍ḥ ।
ma̱ndraḥ ka̱virudā̍tiṣṭho̱ vivā̍svataḥ ।
ghṛ̱tenā̍ tvā'vardhayannagna āhuta ।
dhū̱maste̍ ke̱turā̍bhavaddi̱vi śri̱taḥ ॥
a̱gnira̱gre̍ pratha̱mo de̱vatā̍nām ।
saṃyā̍tānāmutta̱mo viṣṇu̍rāsīt ।
yajā̍mānāya pari̱gṛhya̍ de̱vān ।
dī̱kṣaye̱daṃ̍ ha̱virāga̍cchataṃ naḥ ॥ 3 ॥))

**[[2-4-3-4]]**

अ॒ग्निश्च॑ विष्णो॒ तप॑ उत्त॒मं म॒हः।
दी॒क्षा॒पा॒लेभ्यो॒ वन॑त॒ꣳ॒ हि श॒क्रा।
विश्वै॑र्दे॒वैर्य॒ज्ञियै॑ः संविदा॒नौ।
दी॒क्षाम॒स्मै यज॑मानाय धत्तम्।
प्र तद्विष्णु॑ः स्तवते वी॒र्या॑य।
मृ॒गो न भी॒मः कु॑च॒रो गि॑रि॒ष्ठाः।
यस्यो॒रुषु॑ त्रि॒षु वि॒क्रम॑णेषु।
अधि॑क्षि॒यन्ति॒ भुव॑नानि॒ विश्वा᳚।
नू मर्तो᳚ दयते सनि॒ष्यन्यः॑।
विष्ण॑व उरुगा॒याय॒ दाश॑त्॥ ४॥

((a̱gniśca̍ viṣṇo̱ tapa̍ utta̱maṃ ma̱haḥ ।
dī̱kṣā̱pā̱lebhyo̱ vanā̍ta̱ṃ̍ hi śa̍krā ।
viśvai̍rde̱vairya̱jñiyai̍ḥ saṃvi̱dānau ।
dīkṣāma̱smai yajā̍mānāya dhattam ।
pra tadviṣṇu̍ḥ stavate vī̱ryā̍ya ।
mṛ̱go na bhī̱maḥ ku̍ca̱ro gi̍ri̱ṣṭhāḥ ।
yasyo̱ruṣu̍ tri̱ṣu vi̱krame̍ṇeṣu ।
adhi̍kṣi̱yanti̱ bhuva̍nāni̱ viśvā᳚ ।
nū marto̍ dayate sani̱ṣyanyaḥ ।
viṣṇa̍va urugā̱yāya̱ dāśa̍t ॥ 4 ॥))

**[[2-4-3-5]]**

प्र यः स॒त्राचा॒ मन॑सा॒ यजा॑तै।
ए॒ताव॑न्तं॒ नर्यै॑मा॒विवा॑सात्।
विच॑क्रमे पृथि॒वीमे॒ष ए॒ताम्।
क्षेत्रा॑य विष्णु॒र्मनु॑षे द॒शस्यन्।
ध्रु॒वासो॑ अस्य की॒रयो॒ जना॑सः।
उ॒रु॒क्षि॒तिꣳ सु॒जनि॑माचकार।
त्रिर्दे॒वः पृ॑थि॒वीमे॒ष ए॒ताम्।
विच॑क्रमे श॒तर्च॑सं महि॒त्वा।
प्र विष्णु॑रस्तु त॒वस॒स्तवी॑यान्।
त्वे॒षꣳ ह्य॑स्य स्थवि॑रस्य॒ नाम॑॥ ५॥

((pra yaḥ sa̱trācā̱ manā̍sā̱ yajā̍tai ।
e̱tāvā̍nta̱ṃ naryā̍mā̱vivā̍sāt ।
vicā̍krame pṛ̱thi̱vīme̱ṣa e̱tām ।
kṣetrā̍ya̱ viṣṇu̱rmanu̍ṣe da̱śa̱syan ।
dhru̱vāso̍ asya kī̱rayo̱ janā̍saḥ ।
u̱ru̱kṣi̱tiṃ̍ su̱jani̍mācakāra ।
trirde̱vaḥ pṛ̍thi̱vīme̱ṣa e̱tām ।
vicā̍krame śa̱tarcā̍sam mahi̱tvā ।
pra viṣṇu̍rastu ta̱vasa̱stavī̍yān ।
tve̱ṣaṃ̍ hyā̍sya sthavi̍rasya̱ nāmā̍ ॥ 5 ॥))

**[[2-4-3-6]]**

होता॑रं चि॒त्ररथ॑मध्व॒रस्य॑।
य॒ज्ञस्य॑ य॒ज्ञस्य॑ के॒तुꣳ रुश॑न्तम्।
प्रत्य॑र्धिं दे॒वस्य॑ देवस्य म॒ह्ना।
श्रि॒या त्व॑ग्निमति॑थिं॒ जना॑नाम्।
आ नो॒ विश्वा॑भिरू॒तिभि॑ः स॒जोषा᳚ः।
ब्रह्म॑ जुषा॒णो ह॑र्यश्व याहि।
वरी॑वृ॒जत्स्थवि॑रेभिः सुशिप्र।
अ॒स्मे द॒धद्वृष॑ण॒ꣳ॒ शुष्म॑मिन्द्र।
इन्द्र॑ः सुव॒र्षा ज॒नय॒न्नहा॑नि।
जि॒गायो॒शिग्भि॑ः पृत॑ना अभि॒श्रीः॥ ६॥

((hotā̍raṃ ci̱trarā̍thamadhva̱rasyā̍ ।
ya̱jñasyā̍ yajñasya ke̱tuṃ̍ ruśā̍ntam ।
pratyā̍rdhiṃ de̱vasyā̍ devasya ma̱hnā ।
śri̱yā tvā̍gnimati̍thiṃ̱ janā̍nām ।
ā no̱ viśvā̍bhirū̱tibhi̍ḥ sa̱jo̱ṣā̍ḥ ।
brahmā̍ ju̱ṣā̱ṇo hā̍ryaśva yāhi ।
vari̍vṛ̱jatsthavi̍rebhiḥ suśipra ।
a̱sme dadha̱dvṛ̱ṣā̍ṇa̱ṃ̍ śuṣmā̍mindra ।
indrā̍ḥ suva̱rṣā ja̱naya̱nnahā̍ni ।
ji̱gāyo̱śigbhi̍ḥ pṛ̱tanā̍ abhi̱śrīḥ ॥ 6 ॥))

**[[2-4-3-7]]**

प्रारो॑चयन्म॒नवे॑ के॒तुम॒ह्ना᳚म्।
अवि॑न्द॒ज्ज्योति॑र्बृह॒ते रणा॑य।
अश्वि॑नाव॒वसे॒ निह्व॑ये वाम्।
आ नू॒नं या॑तꣳ सु॒कृता॑य विप्रा।
प्रा॒तर्यु॑क्तेन सु॒वृता॒ रथे॑न।
उपाग॑च्छतम॒वसाऽऽग॑तं नः।
अवि॑ष्टं धी॒ष्वश्वि॑ना न आ॒सु।
प्र॒जाव॒द्रेतो॒ अह्र॑यं नो अस्तु।

आवाँ॑ तो॒के तन॑ये॒ तूतु॑जानाः।
सु॒रत्नासो॑ दे॒ववी॑तिं गमेम॥ ७॥

((prā̍rócaya̱nmanáve ke̱tumahnā̎m ।
avi̍nda̱jjyoti̍rbṛha̱te raṇā̍ya ।
aśvi̍nā̱vavavá̍se̱ nihvá̍ye vām।
ā nū̱nam̱ yā̍tam̐ sukṛ̱tāya̍ viprā ।
prā̱ta̱ryu̱ktena̍ su̱vṛtā̱ rathe̍na ।
u̱pāgá̍cchata̱mava̍sā''gá̍tam̱ naḥ ।
a̱vi̱ṣṭam̱ dhī̱ṣvaśvi̍nā na ā̱su ।
pra̱jāva̍dreto̱ ahrá̍yam̱ no astu ।
āvā̎ṃ to̱ke tanáye̱ tūtú̍jānāḥ ।
su̱ratnā̍so de̱vavī̍tiṃ gamema ॥ 7 ॥))

**[[2-4-3-8]]**

त्वꣳ सो॑म॒ क्रतु॑भिः सु॒क्रतु॑र्भूः।
त्वं दक्षैः॑ सु॒दक्षो॑ वि॒श्ववे॑दाः।
त्वं वृषा॑ वृ॒षत्वेभि॑र्महि॒त्वा।
द्यु॒म्नेभि॑र्द्यु॒म्न्य॑भवो नृ॒चक्षाः॑।
अषा॑ढं यु॒त्सु पृत॑नासु॒ पप्रिं॑म्।
सु॒व॒र्षाम॒प्स्वां वृ॒जन॑स्य॒ गोपाम्।
भ॒रे॒षु॒जाꣳ सु॑क्षि॒तिꣳ सु॒श्रव॑सम्।
जय॑न्तं॒ त्वामनु॑ मदेम सोम।
भवा॑ मि॒त्रो न शेव्यो॑ घृ॒तासु॑तिः।
विभू॑तद्युम्न ए॒वया॑ उ॑ स॒प्रथाः॑॥ ८॥

((tvam̐ so̍ma̱ kratu̍bhiḥ su̱kratu̍rbhūḥ ।
tvaṃ dakṣai̍ḥ su̱dakṣo̍ vi̱śvave̍dāḥ ।
tvaṃ vṛṣā̍ vṛ̱ṣatvebhi̍rmahi̱tvā ।
dyu̱mnebhi̍rdyu̱mnyá̍bhavo nṛ̱cakṣā̎ḥ ।
a̱ṣā̍ḍha̱ṃ yu̱tsu pṛta̍nāsu̱ papri̍m ।
su̱va̱rṣāma̱psvāṃ vṛ̱jana̍sya go̱pām ।
bha̱re̱ṣu̱jām̐ sú̍kṣi̱tim̐ su̱śrava̍sam ।
jayá̍nta̱ṃ tvāmanú̍ madema soma ।
bhavā̍ mi̱tro na śevyo̍ ghṛ̱tāsú̍tiḥ ।
vibhū̍tadyumna eva̱yā ú sa̱prathā̎ḥ ॥ 8 ॥))

**[[2-4-3-9]]**

अधा॑ ते विष्णो वि॒दुषा॑चि॒द्दृध्यः॑।
स्तोमो॑ य॒ज्ञस्य॒ राध्यो॑ ह॒विष्म॑तः।
यः पू॒र्व्याय॑ वे॒धसे॒ नवी॑यसे।
सु॒मज्जा॑नये॒ विष्ण॑वे॒ ददा॑शति।
यो जा॒तम॒स्य म॑ह॒तो म॒हि ब्रवा॑त्।
से॒दुः श्रवो॑भि॒र्युज्यं॑चिद॒भ्य॑सत्।
तमु॑ स्तो॒तारः॑ पू॒र्व्यं यथा॑ वि॒द ऋ॒तस्य॑।
गर्भꣳ॑ ह॒विषा॑ पिपर्तन।
आऽस्य॑ जा॒नन्तो॒ नाम॑चिद्विवक्तन।
बृ॒हत्ते॑ विष्णो सु॒म॒तिं भ॑जामहे॥ ९॥

((adhā̍ te viṣṇo vi̱duṣā̍ci̱dṛdhyá̍ḥ ।
stomo̍ ya̱jñasya̱ rādhyo̍ ha̱viṣmá̍taḥ ।
yaḥ pū̱rvyāyá̍ ve̱dhase̱ navī̍yase ।
su̱majjā̍naye̱ viṣṇá̍ve̱ dadā̍śati ।
yo jā̱tama̱sya má̍hato ma̱hi bravā̎t ।
seduḥ̱ śravo̍bhiryu̱jyam̍cida̱bhyá̍sat ।
tamú stotāraḥ pū̱rvyam̱ yathā̍ vi̱da ṛ̱tasyá ।
garbham̐ ha̱viṣā̍ pipartana ।
ā'syá jā̱nanto̱ nāmá̍cidvivaktana ।
bṛ̱hatte̍ viṣṇo suma̱tim̱ bhá̍jāmahe ॥ 9 ॥))

**[[2-4-3-10]]**

इ॒मा धा॒ना घृ॒त॒स्नुवः॑।
हरी॑ इ॒होप॑वक्षतः।
इन्द्रꣳ॑ सु॒खत॑मे॒ रथे॑।
ए॒ष ब्र॒ह्मा प्र ते॑ म॒हे।
वि॒दथे॑ शꣳसि॒षꣳ॒ हरी॑।
य ऋ॒त्विय॒ः प्र ते॑ वन्वे।
व॒नुषो॑ ह॒र्य॑तं मदं॑म्।
इन्द्रो॒ नाम॑ घृ॒तं न यः।
हरि॑भि॒श्चारु॒ सेच॑ते।
श्रु॒तो ग॒ण आ त्वा॑ विशन्तु॥ १०॥

((i̱mā dhā̱nā ghṛ̍ta̱snuvá̍ḥ ।
harī̍ i̱hopá̍vakṣataḥ ।
indram̐ su̱khatá̍me̱ rathē ।
e̱ṣa bra̱hmā pra te̍ ma̱he ।
vi̱dathe̍ śam̐siṣam̐ harī̎ ।
ya ṛ̱tviya̱ḥ pra te̍ vanve ।
va̱nuṣo̍ harya̱tam̱ madā̎m ।
indro̱ nāmá̍ ghṛ̱tam̱ na yaḥ ।
hari̍bhi̱ścāru̱ secá̍te ।
śru̱to ga̱ṇa ā tvā̍ viśantu ॥ 10 ॥))

**[[2-4-3-11]]**

हरि॑वर्पसं॒ गिरः॑।
आ च॑र्षणि॒प्रा वृ॒ष॒भो जना॑नाम्।
राजा॑ कृ॒ष्टीनां॑ पुरुहू॒त इन्द्रः॑।
स्तु॒तः श्र॑व॒स्यन्न॒वसोप॑मद्रिक्।
यु॒क्त्वा हरी॒ वृष॑णाऽऽया॑ह्यर्वाङ्।
प्र यत्सिन्ध॑वः प्रस॒वं यदाय॑न्।

आपः समुद्रꣳ रथ्येव जग्मुः।
अतश्चिदिन्द्रः सदसो वरीयान्।
यदीꣳ सोमः पृणाति दुग्धो अꣳशुः।
ह्वयामसि त्वेन्द्र याह्यर्वाङ्॥ ११॥

((harivarpasaṃ giraḥ ।
ā carṣaṇiprā vṛṣabho janānām ।
rājā kṛṣṭīnāṃ puruhūta indraḥ ।
stutaḥ śravasyannavasopamadrik ।
yuktvā harī vṛṣaṇā''yāhyarvāṅ ।
pra yatsindhavaḥ prasavaṃ yadāyan ।
āpaḥ samudraṃ rathyeva jagmuḥ ।
ataścidindraḥ sadaso varīyān ।
yadīṃ somaḥ pṛṇāti dugdho aṃśuḥ ।
hvayāmasi tvendra yāhyarvāṅ ॥ 11 ॥))

**[[2-4-3-12]]**

अरं ते सोमस्तनुवे भवाति।
शतक्रतो मादयस्वा सुतेषु।
प्रास्माꣳ अव पृतनासु प्र युत्सु।
इन्द्राय सोमाः प्रदिवो विदानाः।
ऋभुर्येभिर्वृषपर्वा विहायाः।
प्रयम्यमाणान्प्रति षू गृभाय।
इन्द्र पिब वृषधूतस्य वृष्णः।
अहेडमान उपयाहि यज्ञम्।
तुभ्यं पवन्त इन्दवः सुतासः।
गावो न वज्रिन्त्स्वमोको अच्छ॥ १२॥

((araṃ te somastanuve bhavāti ।
śatakrato mādayasvā suteṣu ।
prāsmāṃ ava pṛtanāsu pra yutsu ।
indrāya somāḥ pradivo vidānāḥ ।
ṛbhuryebhirvṛṣaparvā vihāyāḥ ।
prayamyamāṇānprati ṣū gṛbhāya ।
indra piba vṛṣadhūtasya vṛṣṇaḥ ।
aheḍamāna upayāhi yajñam ।
tubhyaṃ pavanta indavaḥ sutāsaḥ ।
gāvo na vajrintsvamoko accha ॥ 12 ॥))

**[[2-4-3-13]]**

इन्द्रागहि प्रथमो यज्ञियानाम्।
या ते काकुत्सुकृता या वरिष्ठा।
यया शश्वत्पिबसि मध्व ऊर्मिम्।
तया पाहि प्र ते अध्वर्युरस्थात्।
सं ते वज्रो वर्ततामिन्द्र गव्युः।
प्रातर्युजा विबोधय।
अश्विना वेह गच्छतम्।
अस्य सोमस्य पीतये।
प्रातर्यावाणा प्रथमा यजध्वम्।
पुरा गृध्रादररुषः पिबाथः।
प्रातर्हि यज्ञमश्विना दधाते।
प्रशꣳसन्ति कवयः पूर्वभाजः।
प्रातर्यजध्वमश्विना हिनोत।
न सायमस्ति देवया अजुष्टम्।
उतान्यो अस्मद्यजते विचायः।
पूर्वः पूर्वो यजमानो वनीयान्॥ १३॥
चाश्वजिद्यो गच्छतं नो दाशन्नामाभिश्रीर्गमेम सप्रथा
भजामहे विशन्तु याह्यर्वाङच्छ पिबाथः षट्च॥ ३॥

((indrāgahi prathamo yajñiyānām ।
yā te kākutsukṛtā yā variṣṭhā ।
yayā śaśvatpibasi madhva ūrmim ।
tayā pāhi pra te adhvaryurasthāt।
saṃ te vajro vartatāmindra gavyuḥ ।
prātaryujā vibodhaya ।
aśvinā veha gacchatam ।
asya somasya pītaye ।
prātaryāvāṇā prathamā yajadhvam।
purā gṛdhrādararuṣaḥ pibāthaḥ ।
prātarhi yajñamaśvinā dadhāte ।
praśaṃsanti kavayaḥ pūrvabhājaḥ ।
prātaryajadhvamaśvinā hinota ।
na sāyamasti devayā ajuṣṭam।
utānyo asmadyajate vicāyaḥ ।
pūrvaḥ pūrvo yajamāno vanīyān ॥ 13 ॥
cāśvajidyo gacchataṃ no dāśannāmābhiśrīrgamema
saprathā bhajāmahe viśantu yāhyarvāṅacchā
pibāthaḥ ṣaṭca ॥ 3 ॥))

**[[2-4-4-1]]**

नक्तं जाताऽस्योषधे।
रामे कृष्णे असिक्नि च।
इदꣳ रजनि रजय।
किलासं पलितं च यत्।
किलासं च पलितं च।
निरितो नाशया पृषत्।
आ नः स्वो अश्नुतां वर्णः।
परा श्वेतानि पातय।
असितं ते निलयनम्।

आ॒स्थान॒मसि॑तं॒ तव॑॥ १॥

((na̱ktaṃ̱ jā̱tā'syo̍ṣadhe I
rāme̱ kṛṣṇe̱ asi̍kni ca I
i̱dam̐ ra̍jani rajaya I
ki̱lāsa̍ṃ pali̱taṃ ca̱ yat I
ki̱lāsa̍ṃ ca pali̱taṃ ca̍ I
niri̱to na̍śayā̱ pṛṣa̍t I
ā na̱ḥ svo a̍śnutā̱ṃ varṇa̍ḥ I
parā̍ śve̱tāni̍ pātaya I
asi̍taṃ te ni̱laya̍nam I
ā̱sthāna̱masi̱taṃ tava̍ II 1 II))

**[[2-4-4-2]]**

असि॑क्निय॒स्योष॑धे।
निरि॒तो ना॑शया॒ पृष॑त्।
अ॒स्थि॒जस्य॑ कि॒लास॑स्य।
त॒नू॒जस्य॑ च॒ यत्त्व॒चि।
कृ॒त्यया॑ कृ॒तस्य॒ ब्रह्म॑णा।
लक्ष्म॑ श्वे॒तम॑नीनशम्।
सरू॑पा॒ नाम॑ ते मा॒ता।
सरू॑पो॒ नाम॑ ते पि॒ता।
सरू॑पाऽस्योषधे॒ सा।
सरू॑पमि॒दं कृ॑धि॥ २॥

((asi̍kniyasyoṣadhe I
niri̱to na̍śayā̱ pṛṣa̍t I
a̱sthijasya̍ ki̱lāsa̍sya I
ta̱nū̱jasya̍ ca̱ yattva̱ci I
kṛ̱tyayā̍ kṛ̱tasya̱ brahma̍ṇā I
lakṣma̍ śve̱tama̍nīnaśam I
sarū̍pā̱ nāma̍ te mā̱tā I
sarū̍po̱ nāma̍ te pi̱tā I
sarū̍pā'syoṣadhe̱ sā I
sarū̍pami̱daṃ kṛ̍dhi II 2 II))

**[[2-4-4-3]]**

शु॒नꣳ हु॑वेम म॒घवा॑न॒मिन्द्र॑म्।
अ॒स्मिन्भरे॒ नृत॑मं॒ वाज॑सातौ।
शृ॒ण्वन्त॑मु॒ग्रमू॒तये॑ स॒मत्सु॑।
घ्नन्तं॑ वृ॒त्राणि॑ सं॒जितं॒ धना॑नाम्।
धू॒नु॒थ द्यां पर्व॑तान्दा॒शुषे॒ वसु॑।
नि वो॒ वना॑ जिहते॒ याम॑नो भि॒या।
को॒पय॑थ पृथि॒वीं पृश्नि॑मातरः।
यु॒धे यदु॑ग्राः॒ पृष॑ती॒रयु॑ग्ध्वम्।
प्र॒वेप॑यन्ति॒ पर्व॑तान्।
वि॒विञ्च॑न्ति॒ व॒न॒स्पती॑न्॥ ३॥

((śu̱nam̐ hu̍vema ma̱ghavā̍na̱mindrā̍m I
a̱sminbhare̱ nṛta̍mam̱ vāja̍sātau I
śṛ̱ṇvanta̍mu̱gramū̱taye̍ sa̱matsu̍ I
ghnanta̍ṃ vṛ̱trāṇi̍ sa̱ṃjita̱ṃ dhanā̍nām I
dhū̱nu̱tha dyāṃ parva̍tāndā̱śuṣe̱ vasu̍ I
ni vo̱ vanā̍ jihate̱ yāma̍no bhi̱yā I
ko̱paya̍tha pṛthi̱vīṃ pṛśni̍mātaraḥ I
yu̱dhe yadu̍grā̱ḥ pṛṣa̍tī̱rayu̍gdhvam I
pra̱ve̍payanti̱ parva̍tān I
vi̱viñca̍nti̱ vana̱spatī̍n II 3 II))

**[[2-4-4-4]]**

प्रोऽवा॑रत म॒रुतो दु॒र्मदा॑ इव।
देवा॑सः॒ सर्व॑या वि॒शा।
पु॒रु॒त्रा हि स॒दृङ्ङसि॑।
वि॒शो॒ विश्वा॒ अनु॑ प्र॒भु।
स॒मत्सु॑ त्वा हवामहे।
स॒मत्स्व॒ग्निमव॑से।
वा॒जय॑न्तो हवामहे।
वाजे॑षु चि॒त्रराधसम्।
संग॑च्छध्व॒ꣳ संव॑दध्वम्।
सं वो॒ मनाꣳ॑सि जानताम्॥ ४॥

((pro'vā̍rata maruto du̱rmadā̍ iva I
devā̍sa̱ḥ sarva̍yā vi̱śā I
pu̱ru̱trā hi sa̱dṛṅṅasi̍ I
viśo̱ viśvā̱ anu̍ pra̱bhu I
sa̱matsu̍ tvā havāmahe I
sa̱matsva̱gnimava̍se I
vā̱ja̱yanto̍ havāmahe I
vāje̍ṣu ci̱trarā̍dhasam I
saṃga̍cchadhva̱m̐ saṃva̍dadhvam I
saṃ vo̱ manā̍m̐si jānatāmII 4 II))

**[[2-4-4-5]]**

दे॒वा भा॒गं यथा॒ पूर्वे॑।
सं॒जा॒ना॒ना उ॒पास॑त।
स॒मा॒नो मन्त्रः॒ समि॑तिः समा॒नी।
स॒मा॒नं मनः॑ स॒ह चि॒त्तमे॑षाम्।
स॒मा॒नं केतो॑ अ॒भि सꣳर॑भध्वम्।
सं॒ज्ञाने॑न वो ह॒विषा॑ यजामः।
स॒मा॒नी व॒ आकू॑तिः।

स॒मा॒ना हृद॑यानि वः।
स॒मा॒नम॑स्तु वो॒ मन॑ः।
यथा॑ व॒ः सु॒सहास॑ति॥ ५॥

((de̱vā bhā̱gaṃ yathā̱ pūrve̍ |
sa̱mjā̱nā̱nā u̱pāsa̍ta |
sa̱mā̱no mantra̱ḥ sami̍tiḥ samā̱nī |
sa̱mā̱naṃ mana̍ḥ sa̱ha ci̱ttame̍ṣām|
sa̱mā̱naṃ keto̍ a̱bhi saṃ̍rabhadhvam|
sa̱mjñāne̍na vo ha̱viṣā̍ yajāmaḥ |
sa̱mā̱nī va̱ ākū̍tiḥ |
sa̱mā̱nā hṛda̍yāni vaḥ |
sa̱mā̱nama̍stu vo̱ mana̍ḥ |
yathā̍ va̱ḥ susa̱hāsa̍ti || 5 ||))

**[[2-4-4-6]]**

सं॒ज्ञानं॑ न॒ः स्वैः।
सं॒ज्ञान॒मर॑णैः।
सं॒ज्ञान॑मश्विना यु॒वम्।
इ॒हास्मासु॒ निय॑च्छतम्।
सं॒ज्ञानं॑ मे॒ बृह॒स्पति॑ः।
सं॒ज्ञानꣳ॑ सवि॒ता क॑रत्।
सं॒ज्ञान॑मश्विना यु॒वम्।
इ॒ह मह्यं॑ निय॑च्छतम्।
उप॑ च्छा॒यामि॑व॒ घृणे॑ः।
अग॑न्म॒ शर्म॑ ते व॒यम्॥ ६॥

((sa̱mjñānaṃ̍ na̱ḥ svaiḥ |
sa̱mjñāna̱mara̍ṇaiḥ |
sa̱mjñāna̍maśvinā yu̱vam |
i̱hāsmāsu̱ niya̍cchatam |
sa̱mjñānaṃ̍ me̱ bṛha̱spati̍ḥ |
sa̱mjñānaṃ̍ savi̱tā ka̍rat |
sa̱mjñāna̍maśvinā yu̱vam |
i̱ha mahya̱ṃ niya̍cchatam |
upa̍ cchā̱yāmi̍va̱ ghṛṇe̍ḥ |
aga̍nma̱ śarma̍ te va̱yam || 6 ||))

**[[2-4-4-7]]**

अग्ने॒ हिर॑ण्यसंदृशः।
अद॑ब्धेभिः सवितः पा॒युभि॒ष्ट्वम्।
शि॒वेभि॑रद्य परि॑पाहि नो॒ गय॑म्।
हिर॑न्यजिह्वः सुवि॒ताय॒ नव्य॑से।
रक्षा॒ माकि॑र्नो अ॒घशꣳ॑स ईशत।
मदे॑ मदे॒ हि नो॑ द॒दुः।

यू॒था गवा॑मृजु॒क्रतु॑ः।
सं॒गृ॑भाय पु॒रू॒श॒ता।
उ॒भ॒या ह॒स्त्या वसु॑।
शि॒शी॒हि रा॒य आभ॑र॥ ७॥

((agne̱ hira̍ṇyasaṃdṛśaḥ |
ada̍bdhebhiḥ savitaḥ pā̱yubhi̱ṣṭvam |
śi̱vebhi̍radya pari̍pāhi no̱ gaya̍m |
hira̍nyajihvaḥ suvi̱tāya̱ navya̍se |
rakṣā̱ mākir̍no a̱ghaśaṃ̍sa īśata |
made̍ made̱ hi no̍ da̱duḥ |
yū̱thā gavā̍mṛju̱kratu̍ḥ |
sa̱mgṛ̍bhāya pu̱rūśa̱tā |
u̱bha̱yā ha̱styā vasu̍ |
śi̱śī̱hi rā̱ya ābha̍ra || 7 ||))

**[[2-4-4-8]]**

शिप्रि॑न्वाजानां पते।
शची॑व॒स्तव॑ द॒ꣳसना॑।
आ तू न॑ इन्द्र भाजय।
गोष्वश्वे॑षु शु॒भ्रुषु॑।
स॒हस्रे॑षु तुवीमघ।
यद्दे॑वा दे॒व हेड॑नम्।
देवा॑सश्चकृ॒मा व॒यम्।
आदि॑त्या॒स्तस्मा॑न्मा यू॒यम्।
ऋ॒तस्य॒र्तेन॑ मुञ्चत।
ऋ॒तस्य॒र्तेना॑दित्याः॥ ८॥

((śipri̍nvājānām pate |
śacī̍va̱stava̍ da̱ṃsanā̍ |
ā tū na̍ indra bhājaya |
goṣvaśve̍ṣu śu̱bhruṣu̍ |
sa̱hasre̍ṣu tuvīmagha |
yadde̍vā deva̱ heḍa̍nam |
devā̍saścakṛ̱mā va̱yam |
ādi̍tyā̱stasmā̍nmā yū̱yam |
ṛ̱tasya̱rtena̍ muñcata |
ṛ̱tasya̱rtenā̍dityāḥ || 8 ||))

**[[2-4-4-9]]**

यज॑त्रा मु॒ञ्चते॒ह मा॑।
य॒ज्ञैर्वो॑ य॒ज्ञवाहसः।
आ॒शिक्ष॑न्तो॒ न शे॑किम।
मेद॑स्वता॒ यज॑मानाः।
स्रु॒चाऽऽज्ये॑न॒ जुह्व॑तः।

अकामा वो विश्वे देवाः।
शिक्षन्तो नोपशेकिम।
यदि दिवा यदि नक्तम्।
एनं एनस्योऽकरत्।
भूतं मा तस्माद्भव्यं च॥ ९॥

((yajātrā muñcateha mā |
yajñairvo yajñavāhasaḥ |
āśikṣanto na śekima |
medasvatā yajamānāḥ |
srucā''jyena juhvataḥ |
akāmā vo viśve devāḥ |
śikṣanto nopaśekima |
yadi divā yadi naktam |
ena enasyo'karat |
bhūtaṃ mā tasmādbhavyaṃ ca || 9 ||))

**[[2-4-4-10]]**

द्रुपदादिव मुञ्चतु।
द्रुपदादिवेन्मुमुचानः।
स्विन्नः स्नात्वी मलादिव।
पूतं पवित्रेणेवाज्यम्।
विश्वे मुञ्चन्तु मैनसः।
उद्वयं तमसस्परि।
पश्यन्तो ज्योतिरुत्तरम्।
देवं देवत्रा सूर्यम्।
अगन्म ज्योतिरुत्तमम्॥ १०॥
तव कृधि वनस्पतीञ्ज्ञानतामसति वयं भरादित्याश्च नव च॥ ४॥

((drupadādiva muñcatu |
drupadādivenmumucānaḥ |
svinnaḥ snātvī malādiva |
pūtaṃ pavitreṇevājyam |
viśve muñcantu mainasaḥ |
udvayaṃ tamasaspari |
paśyanto jyotiruttaram |
devaṃ devatrā sūryam |
aganma jyotiruttamam || 10 ||
tava kṛdhi vanaspatīñjānatāmasati vayaṃ bharādityāśca nava ca || 4 ||))

**[[2-4-5-1]]**

वृषा सो अꣳशुः पवते हविष्मान्त्सोमः।
इन्द्रस्य भाग ऋतयुः शतायुः।
समा वृषाणं वृषभं कृणोतु।
प्रियं विशाꣳ सर्ववीरꣳ सुवीरम्।
कस्य वृषा सुते सचा।
नियुत्वान्वृषभो रणत्।
वृत्रहा सोमपीतये।
यस्ते शृङ्ग वृषो नपात्।
प्रणपात्कुण्डपाय्यः।
न्यस्मिन्दध्र आ मनः॥ १॥

((vṛṣā so aṃśuḥ pavate haviṣmāntsomaḥ |
indrasya bhāga ṛtayuḥ śatāyuḥ |
samā vṛṣāṇaṃ vṛṣabhaṃ kṛṇotu |
priyaṃ viśāṃ sarvavīraṃ suvīrām |
kasya vṛṣā sute sacā |
niyutvānvṛṣabho raṇat |
vṛtrahā somapītaye |
yaste śṛṅga vṛṣo napāt |
praṇapātkuṇḍapāyyaḥ |
nyasmindadhra ā manaḥ || 1 ||))

**[[2-4-5-2]]**

तꣳ सध्रीचीरूतयो वृष्णियानि।
पौꣳस्यानि नियुतः सश्चुरिन्द्रम्।
समुद्रं न सिन्धव उक्थशुष्माः।
उरुव्यचसं गिर आविशन्ति।
इन्द्राय गिरो अनिशितसर्गाः।
अपः प्रैरयन्त्सगरस्य बुध्नात्।
यो अक्षेणेव चक्रिया शचीभिः।
विष्वक्तस्तम्भ पृथिवीमुत द्याम्।
अक्षोदयच्छवसा क्षाम बुध्नम्।
वार्णवातस्तविषीभिरिन्द्रः॥ २॥

((taṃ sadhrīcīrūtayo vṛṣṇiyāni |
pauṃsyāni niyutaḥ saścurindram |
samudraṃ na sindhava ukthaśuṣmāḥ |
uruvyacasam gira āviśanti |
indrāya giro aniśitasargāḥ |
apaḥ prairayantsagarasya budhnāt |
yo akṣeṇeva cakriyā śacībhiḥ |
viṣvaktastambha pṛthivīmuta dyām |
akṣodayacchavasā kṣāma budhnam |
vārṇavātastaviṣībhirindraḥ || 2 ||))

**[[2-4-5-3]]**

दृढान्यौघ्नादुशमान ओजः।
अवाभिनत्ककुभः पर्वतानाम्।

आ नो॑ अग्ने सु॒के॒तुना᳚।
र॒यिं वि॒श्वायु॑पोषसम्।
मा॒र्डी॒कं धे॑हि जी॒वसे᳚।
त्वꣳ सो॑म म॒हे भगा᳚म्।
त्वं यून॑ ऋताय॒ते।
दक्ष॑ं दधासि जी॒वसे᳚।
रथ॑ं युञ्जते म॒रुत॑ः शु॒भे सु॒गम्।
सूरो॒ न मि॑त्रावरुणा॒ गवि॑ष्टिषु॥ ३॥

((dṛ̱ḍhānyaủghnādu̱śamā̍na̱ ojā̍ḥ ।
avā̍bhinatka̱kubha̱ḥ parvā̍tānām ।
ā no̍ agne suke̱tunā̎ ।
ra̱yiṃ vi̱śvāyu̍poṣasam ।
mā̱rḍī̱kaṃ dhe̍hi jī̱vase̎ ।
tvaṃ̍ so̍ma ma̱he bhagā̎m ।
tvaṃ yūna̍ ṛtāya̱te ।
dakṣa̍ṃ dadhāsi jī̱vase̎ ।
ratha̍ṃ yuñjate ma̱rutā̍ḥ śu̱bhe su̱gam ।
sūro̱ na mi̍trāvaru̱ṇā̱ gavi̍ṣṭiṣu ॥ 3 ॥))

**[[2-4-5-4]]**
रजा॑ꣳसि चि॒त्रा विच॑रन्ति त॒न्यव॑ः।
दि॒वः सम्रा॑जा॒ पय॑सा न उक्षतम्।
वाच॒ꣳ॒ सु मि॑त्रावरुणा॒विरा॑वतीम्।
प॒र्जन्य॑श्चि॒त्रां वद॑ति॒ त्विषी॑मतीम्।
अ॒भ्रा व॑सत मरुतः सु मा॒यया᳚।
द्यां व॑र्षयतम॒रुणाम॑रे॒पसा᳚म्।
अयु॑क्त स॒प्त शु॒न्ध्युव॑ः।
सूरो॒ रथ॑स्य न॒प्त्रिय॑ः।
ताभि॑र्याति॒ स्वयु॑क्तिभिः।
वहि॑ष्ठेभिर्वि॒हर॑न्यासि॒ तन्तु᳚म्॥ ४॥

((rajāṃ̍si ci̱trā vicā̍ranti ta̱nyavā̍ḥ ।
di̱vaḥ sā̍mrājā̱ payā̍sā na ukṣatam ।
vācaṃ̍ su mi̍trāvaru̱ṇā̱virā̍vatīm ।
pa̱rjanyā̍ści̱trāṃ vā̍dati̱ tviṣi̍matīm ।
a̱bhrā vā̍sata marutaḥ su mā̱yayā̎ ।
dyāṃ vā̍rṣayatamaru̱ṇāmā̍re̱pasām ।
ayu̍kta sa̱pta śu̱ndhyuvā̍ḥ ।
sūro̱ rathā̍sya na̱ptriyā̍ḥ ।
tābhi̍ryāti̱ svayu̍ktibhiḥ ।
vahi̍ṣṭhebhirvi̱harā̍nyāsi̱ tantū̎m ॥ 4 ॥))

**[[2-4-5-5]]**
अ॒व॒व्य॒यन्नसि॑तं दे॒व वस्व॑ः।
दवि॑ध्वतो र॒श्मय॑ः सूर्य॑स्य।
चर्मे॒वावा॑धु॒स्तमो॑ अ॒प्स्व॑न्तः।
प॒र्जन्या॑य॒ प्रगा॑यत।
दि॒वस्पु॒त्राय॑ मी॒ढुषे᳚।
स नो॑ य॒वस॑मिच्छतु।
अच्छा॑ वद त॒वस॑ं गी॒र्भिरा॒भिः।
स्तु॒हि प॒र्जन्य॑ं नम॒सा विवा॑स।
कनि॑क्रदद्वृ॒षभो॑ जी॒रदा॑नुः।
रेतो॑ दधा॒त्वोष॑धीषु॒ गर्भ᳚म्॥ ५॥

((a̱va̱vya̱ya̱nnasi̍taṃ deva̱ vasvā̍ḥ ।
davi̍dhvato ra̱śmaya̱ḥ sūryā̍sya ।
carme̱vāvā̍dhu̱stamo̍ a̱psvā̍ntaḥ ।
pa̱rjanyā̍ya̱ pragā̍yata ।
di̱vaspu̱trāya̍ mī̱ḍhuṣe̎ ।
sa no̍ ya̱vasā̍micchatu ।
acchā̍ vada ta̱vasa̍ṃ gī̱rbhirā̱bhiḥ ।
stu̱hi pa̱rjanya̍ṃ nama̱sā vi̍vāsa ।
kani̍kradadvṛ̱ṣabho jī̱radā̍nuḥ ।
reto̍ dadhā̱tvoṣā̍dhīṣu̱ garbhā̎m ॥ 5 ॥))

**[[2-4-5-6]]**
यो गर्भ॑मोष॑धीनाम्।
गवा᳚ं कृ॒णोत्यर्व॑ताम्।
प॒र्जन्य॑ः पुरु॒षीणा᳚म्।
तस्मा॑ इदा॒स्ये॑ ह॒विः।
जु॒होता॒ मधु॑मत्तमम्।
इडा᳚ं नः सं॒यत॑ं करत्।
ति॒स्रो यद॑ग्ने श॒रद॒स्त्वामित्।
शुचि॑ं घृ॒तेन॒ शुच॑यः सप॒र्यन्।
नामा॑नि चिद्दधिरे य॒ज्ञिया॑नि।
असू॑दयन्त त॒नुव॑ः सुजा॑ताः॥ ६॥

((yo garbha̱moṣā̍dhīnām ।
gavā̎ṃ kṛ̱ṇotyarvā̍tām ।
pa̱rjanyā̍ḥ puru̱ṣīṇā̎m ।
tasmā̱ idā̱sye̍ ha̱viḥ ।
ju̱hotā̱ madhu̍mattamam ।
i̱ḍā̎ṃ naḥ sa̱ṃyata̍ṃ karat ।
ti̱sro yadā̍gne śa̱rada̱stvāmit ।
śuci̍ṃ ghṛ̱tena̱ śucā̍yaḥ sapa̱ryan ।
nāmā̍ni ciddadhire ya̱jñiyā̍ni ।
asū̍dayanta ta̱nuva̱ḥ sujā̍tāḥ ॥ 6 ॥))

**[[2-4-5-7]]**

इन्द्र॑श्च नः शुनासीरौ।
इ॒मं य॒ज्ञं मि॑मिक्षतम्।
गर्भँ॑ धत्तꣳ॑ स्व॒स्तयँ॑।
ययो॑रि॒दं विश्वं॒ भुव॑नमावि॒वेश॑।
ययो॑रान॒न्दो निहि॑तो॒ मह॑श्च।
शु॒ना॑सीरावृ॒तुभि॑ः संविदा॒नौ।
इन्द्र॑वन्तौ ह॒विरि॒दं जु॑षेथाम्।
आ घा॒ ये अ॒ग्निमि॑न्ध॒ते।
स्तृ॒णन्ति॑ ब॒र्हिरा॑नुषक्।
ये॒षामिन्द्रो॒ युवा॒ सखाँ॑।
अग्न॒ इन्द्र॑श्च मे॒दिनाँ॑।
ह॒थो वृ॒त्राण्य॑प्र॒ति।
यु॒वꣳ हि वृ॑त्र॒हन्त॑मा।
याभ्या॒ꣳ॒ सुव॒रज॑य॒न्नग्र॑ ए॒व।
यावा॑तस्थ॒तुर्भुव॑नस्य॒ मध्यँ॑।
प्रच॑र्ष॒णी वृ॑षणा॒ वज्र॑बाहू।
अ॒ग्नी इन्द्रा॑ वृत्र॒हणा॑ हुवे वाम्॥ ७॥
मन॒ इन्द्रो॒ गवि॑ष्टिषु॒ तन्तु॒ं गर्भ॒ꣳ॒ सुजा॑ता॒ः सखा॑ स॒प्त च॑॥
५॥

((indráśca naḥ śunāsīrau ।
i̱maṃ ya̱jñaṃ mi̍mikṣatam ।
garbhaṃ̍ dhattaṃ̍ sva̱stayĕ ।
yayo̍ri̱daṃ viśvaṃ̱ bhuva̍namāvi̱veśa̍ ।
yayo̍rāna̱ndo nihi̍to̱ maha̍śca ।
śuna̍sīrāvṛ̱tubhi̍ḥ saṃvidā̱nau ।
indra̍vantau ha̱viri̱daṃ ju̍ṣethām ।
ā ghā̱ ye a̱gnimi̍ndha̱te ।
stṛ̱ṇanti̍ ba̱rhirā̍nu̱ṣak ।
yeṣā̱mindro̱ yuvā̱ sakhā̍ ।
agna̱ indra̍śca me̱dinā̍ ।
ha̱tho vṛ̱trāṇya̍pra̱ti ।
yu̱vaṃ̍ hi vṛ̍tra̱hanta̍mā ।
yābhyā̱ṃ̍ suva̱rajā̍ya̱nnagra̍ e̱va ।
yāvā̍tastha̱turbhuva̍nasya̱ madhyĕ ।
praca̍rṣa̱ṇī vṛ̍ṣa̱ṇā̱ vajra̍bāhū ।
a̱gnī indra̍ vṛ̱tra̱haṇā̍ huve vām ॥ 7 ॥
mana̱ indro̱ gavi̍ṣṭi̱ṣu̱ tantu̱ṃ garbha̱ṃ̍ sujā̍tā̱ḥ
sakhā̍ sa̱pta ca̍ ॥ 5 ॥))

**[[2-4-6-1]]**

उ॒त न॑ः प्रि॒या प्रि॒यासु॑।
स॒प्तस्व॑सा॒ सुजु॑ष्टा।
सर॑स्वती॒ स्तोम्या॑ऽभूत्।
इ॒मा जु॒ह्वा॑ना यु॒ष्मदा॒ नमो॑भिः।
प्रति॒ स्तोम॒ꣳ॒ सर॑स्वति जुषस्व।
तव॒ शर्म॑न्प्रि॒यत॑मे॒ दधा॑नाः।
उप॑स्थेयाम श॒रणं न वृ॒क्षम्।
त्रीणि॑ प॒दा वि च॑क्रमे।
विष्णु॑र्गो॒पा अदा॑भ्यः।
तत॒ो धर्मा॑णि धा॒रय॑न्॥ १॥

((u̱ta na̍ḥ pri̱yā pri̱yāsu̍ ।
sa̱ptasvasā̱ suju̍ṣṭā ।
sara̍svatī̱ stomyā̍'bhūt ।
i̱mā juhvā̍nā yu̱ṣmadā̱ namo̍bhiḥ ।
prati̱ stomaṃ̍ sarasvati ju̱ṣasva ।
tava̱ śarma̍npri̱yata̍me̱ dadhā̍nāḥ ।
upa̍stheyāma śara̱ṇaṃ na vṛ̱kṣam ।
trīṇi̱ pa̱dā vica̍krame ।
viṣṇu̍rgo̱pā adā̍bhyaḥ ।
tato̱ dharmā̍ṇi dhā̱raya̍n ॥ 1 ॥))

**[[2-4-6-2]]**

तद॑स्य प्रि॒यम॒भि पाथो॑ अश्याम्।
नरो॒ यत्र॑ दे॒वय॑वो॒ मद॑न्ति।
उ॒रु॒क्र॒मस्य॒ स हि बन्धु॑रि॒त्था।
विष्णो॑ः प॒दे प॑र॒मे मध्व॒ उत्स॑ः।
क्रत्वा॒ दा अस्थु॒ श्रेष्ठ॑ः।
अ॒द्य त्वा॑ व॒न्वन्त्सु॒रेक्णा॑ः।
मर्त॑ आनाश सु॒वृक्तिम्।
इ॒मा ब्रह्म॑ ब्रह्मवाह।
प्रि॒या त॒ आ ब॒र्हिः सी॑द।
वी॒हि सू॑र पु॒रो॒डाश॑म्॥ २॥

((tada̍sya pri̱yama̱bhi pātho̍ aśyām ।
naro̱ yatra̍ deva̱yavo̱ mada̍nti ।
u̱ru̱kra̱masya̱ sa hi bandhu̍ri̱tthā ।
viṣṇo̍ḥ pa̱de pa̍ra̱me madhva̱ utsa̍ḥ ।
kra̱tvā̱ dā a̍sthu̱ śreṣṭha̍ḥ ।
a̱dya tvā̍ va̱nvantsu̱rekṇā̍ḥ ।
marta̍ ānāśa suvṛ̱ktim ।
i̱mā brahma̍ brahmavāha ।
pri̱yā ta̱ ā ba̱rhiḥ sī̍da ।
vī̱hi sū̍ra puro̱ḍāśa̍m ॥ 2 ॥))

**[[2-4-6-3]]**

उप॑ नः सू॒नवो॒ गिर॑ः।
शृ॒ण्वन्त्व॒मृत॑स्य॒ ये।

सु॒मृ॒डी॒का भ॑वन्तु नः।
अ॒द्या नो॑ देव सवितः।
प्र॒जाव॑त्सावीः॒ सौभ॑गम्।
परा॑ दु॒ष्ष्वप्नि॑यꣳ सुव।
विश्वा॑नि देव सवितः।
दु॒रि॒तानि॒ परा॑सुव।
यद्भ॒द्रं तन्म॒ आसु॑व।
शुचि॑म॒र्कैर्बृह॒स्पति॑म्॥ ३॥

((upa̍ naḥ sū̱navo̱ gira̍ḥ ।
śṛ̱ṇvantva̱mṛta̍sya̱ ye ।
su̱mṛ̱ḍī̱kā bha̍vantu naḥ ।
a̱dyā no̍ deva savitaḥ ।
pra̱jāva̍tsāvī̱ḥ saubha̍gam ।
parā̍ du̱ṣṣvapni̍yam̐ suva ।
viśvā̍ni deva savitaḥ ।
du̱ri̱tāni̱ parā̍suva ।
yadbha̱draṃ tanma̱ āsu̍va ।
śuci̍ma̱rkairbṛha̱spati̍m ॥ 3 ॥))

**[[2-4-6-4]]**

अ॒ध्व॒रेषु॑ नमस्यत।
अ॒ना॒म्योज॒ आच॑के।
याऽधा॒रय॑न्त दे॒वा सु॒दक्षा॒ दक्ष॑पितारा।
अ॒सु॒र्या॑य प्रम॑हसा।
स इत्क्षे॑ति॒ सुधि॑त॒ ओक॑सि॒ स्वे।
तस्मा॒ इडा॑ पिन्वते विश्व॒दानी॑।
तस्मै॒ विशः॑ स्व॒यमे॒वान॑मन्ति।
यस्मि॒न्ब्र॒ह्मा राज॑नि॒ पूर्व॒ एति॑।
सकू॑तिमिन्द्र॒ सच्यु॑तिम्।
सच्यु॑तिं ज॒घन॑च्युतिम्॥ ४॥

((a̱dhva̱reṣu̍ namasyata ।
a̱nā̱myoja̱ āca̍ke ।
yā'dhā̱raya̍nta de̱vā su̱dakṣā̱ dakṣa̍pitārā ।
a̱su̱ryā̍ya prama̍hasā ।
sa itkṣe̍ti̱ sudhi̍ta̱ oka̍si̱ sve ।
tasmā̱ iḍā̍ pinvate viśva̱dānī̍ ।
tasmai̱ viśa̍ḥ sva̱yame̱vāna̍manti ।
yasmi̱nbra̱hmā rāja̍ni̱ pūrva̱ eti̍ ।
sakū̍timindra̱ sacyu̍tim ।
sacyu̍tiṃ ja̱ghana̍cyutim ॥ 4 ॥))

**[[2-4-6-5]]**

क॒नात्का॒भां न॒ आभ॑र।
प्र॒य॒प्स्यन्नि॑व स॒क्थ्यौ॑।
वि न॑ इन्द्र॒ मृधो॑ जहि।
कनी॑खुनदिव सा॒पय॑न्।
अ॒भि न॒ः सुष्टु॑तिं नय।
प्र॒जाप॑तिः स्त्रि॒यां यश॑ः।
मु॒ष्कयो॑रदधा॒त्सप॑म्।
काम॑स्य॒ तृप्ति॑मान॒न्दम्।
तस्या॑ग्ने भाजये॒ह मा॑।
मोद॑ः प्रमो॒द आ॑न॒न्दः॥ ५॥

((ka̱nātkā̱bhāṃ na̱ ābha̍ra ।
pra̱ya̱psyanni̍va sa̱kthyau̍ ।
vi na̍ indra̱ mṛdho̍ jahi ।
kanī̍khunadiva sā̱paya̍n ।
a̱bhi na̱ḥ suṣṭu̍tiṃ naya ।
pra̱jāpa̍tiḥ stri̱yāṃ yaśa̍ḥ ।
mu̱ṣkayo̍radadhā̱tsapa̍m ।
kāma̍sya̱ tṛpti̍māna̱ndam ।
tasyā̍gne bhājaye̱ha mā̍ ।
moda̍ḥ pramo̱da ā̍na̱ndaḥ ॥ 5 ॥))

**[[2-4-6-6]]**

मु॒ष्कयो॒र्निहि॑त॒ः सप॑ः।
सृ॒त्वेव॒ काम॑स्य तृप्या॒णि।
दक्षि॑णानां प्रतिग्र॒हे।
मन॑सश्चि॒त्तमाकू॑तिम्।
वा॒चः स॒त्यम॑शीमहि।
प॒शू॒नाꣳ रू॒पमन्न॑स्य।
य॒शः श्रीः श्र॑यतां॒ मयि॑।
यथा॒ऽहम॒स्या अ॒तृप॑ꣳ स्त्रि॒यै पुमा॑न्।
यथा॒ स्त्री तृप्य॑ति॒ पुꣳसि॑ प्रि॒ये प्रि॒या।
ए॒वं भग॑स्य तृप्या॒णि॥ ६॥

((mu̱ṣkayo̱rnihi̍ta̱ḥ sapa̍ḥ ।
sṛ̱tveva̱ kāma̍sya tṛpyā̱ṇi ।
dakṣi̍ṇānāṃ pratigra̱he ।
mana̍saści̱ttamākū̍tim ।
vā̱caḥ sa̱tyama̍śīmahi ।
pa̱śū̱nām̐ rū̱pamanna̍sya ।
ya̱śaḥ śrīḥ śra̍yatāṃ̱ mayi̍ ।
yathā̱'hama̱syā a̱tṛpa̍m̐ stri̱yai pumā̍n ।
yathā̱ strī tṛpya̍ti̱ pum̐si̍ pri̱ye pri̱yā ।
e̱vaṃ bhaga̍sya tṛpyā̱ṇi ॥ 6 ॥))

**[[2-4-6-7]]**

य॒ज्ञस्य॒ काम्य॑ः प्रि॒यः।
द॒दा॒मीत्य॒ग्निर्व॑दति।
तथेति॑ वा॒युरा᳚ह॒ तत्।
हन्तेति॑ स॒त्यं च॒न्द्रमा᳚ः।
आ॒दि॒त्यः स॒त्यमोमिति॑।
आप॒स्तत्स॒त्यमाभ॑रन्।
यशो॑ य॒ज्ञस्य॒ दक्षि॑णाम्।
अ॒सौ मे॒ काम॒ः समृ॑द्ध्यताम्।
न हि स्पश॒मवि॑दन्न॒न्यम॒स्मात्।
वै॒श्वा॒न॒रात्पु॑र ए॒तार॑म॒ग्नेः॥ ७॥

((ya̱jñasya̱ kāmya̍ḥ pri̱yaḥ ।
dadā̱mītya̱gnirva̍dati ।
tatheti̍ vā̱yurā̍ha̱ tat ।
hanteti̍ sa̱tyaṃ ca̱ndramā̎ḥ ।
ā̱di̱tyaḥ sa̱tyamomiti̍ ।
āpa̱statsa̱tyamābha̍ran ।
yaśo̍ ya̱jñasya̱ dakṣi̍ṇām ।
a̱sau me̱ kāma̱ḥ samṛ̍ddhyatām ।
na hi spaśa̱mavi̍danna̱nyama̱smāt ।
vai̱śvā̱na̱rātpu̍ra e̱tāra̍ma̱gneḥ ॥ 7 ॥))

**[[2-4-6-8]]**

अथे॑ममन्थन्न॒मृत॒ममू᳚राः।
वै॒श्वा॒न॒रं क्षे᳚त्र॒जित्या᳚य दे॒वाः।
येषा᳚मि॒मे पूर्वे॒ अर्मा᳚स॒ आस॑न्।
अ॒यू॒पाः सद्म॒ विभृ॑ता पु॒रूणि॑।
वैश्वा᳚नर॒ त्वया॒ ते नु॒त्ताः।
पृ॒थि॒वीम॒न्याम॒भित॑स्थु॒र्जना᳚सः।
पृ॒थि॒वीं मा॒तरं॑ म॒हीम्।
अ॒न्तरि॑क्ष॒मुप॑ब्रुवे।
बृ॒ह॒तीमू॒तये॒ दिव᳚म्।
विश्वं॑ बिभर्ति पृथि॒वी॥ ८॥

((athe̍mamanthanna̱mṛta̱mamū̎rāḥ ।
vai̱śvā̱na̱raṃ kṣe̎tra̱jityā̎ya de̱vāḥ ।
yeṣā̎mi̱me pūrve̱ armā̎sa̱ āsa̍n ।
a̱yū̱pāḥ sadma̱ vibhṛ̍tā pu̱rūṇi̍ ।
vaiśvā̎nara̱ tvayā̱ te nu̱ttāḥ ।
pṛthi̱vīma̱nyāma̱bhita̍sthu̱rjanā̎saḥ ।
pṛthi̱vīṃ mā̱tara̍ṃ ma̱hīm ।
a̱ntari̍kṣa̱mupa̍bruve ।
bṛha̱tīmū̱taye̱ divā̎m ।
viśva̍ṃ bibharti pṛthi̱vī ॥ 8 ॥))

**[[2-4-6-9]]**

अ॒न्तरि॑क्षं॒ विप॑प्रथे।
दु॒हे द्यौर्बृ॑ह॒ती पय॑ः।
न ता न॑शन्ति॒ न द॑भाति॒ तस्क॑रः।
नैना᳚ अमि॒त्रो व्यथि॒राद॑धर्षति।
दे॒वांश्च॒ याभि॒र्यज॑ते॒ ददा᳚ति च।
ज्योगित्ताभि॑ः सचते॒ गोप॑तिः स॒ह।
न ता अर्वा᳚ रे॒णुक॑काटो अश्नुते।
न सꣳ᳚स्कृत॒त्रमुप॑यन्ति॒ ता अ॒भि।
उ॒रु॒गा॒यमभ॑यं॒ तस्य॒ ता अनु॑।
गावो॒ मर्त्य॑स्य॒ विच॑रन्ति॒ यज्व॑नः॥ ९॥

((a̱ntari̍kṣaṃ̱ vipa̍prathe ।
du̱he dyaurbṛ̍ha̱tī paya̍ḥ ।
na tā na̍śanti̱ na da̍bhāti̱ taska̍raḥ ।
nainā̎ ami̱tro vyathi̱rāda̍dharṣati ।
de̱vāṃ̎śca̱ yābhi̱ryaja̍te̱ dadā̎ti ca ।
jyogittābhi̍ḥ sacate̱ gopa̍tiḥ sa̱ha ।
na tā arvā̎ re̱ṇuka̍kāṭo aśnute ।
na saṃ̎skṛta̱tramupa̍yanti̱ tā a̱bhi ।
u̱ru̱gā̱yamabha̍yaṃ̱ tasya̱ tā anu̍ ।
gāvo̱ martya̍sya̱ vica̍ranti̱ yajva̍naḥ ॥ 9 ॥))

**[[2-4-6-10]]**

रात्री॒ व्य॑ख्यदाय॒ती।
पु॒रु॒त्रा दे॒व्य॑क्षभि॑ः।
विश्वा॒ अधि॒ श्रियो॑ऽधित।
उप॑ ते॒ गा इ॒वाक॑रम्।
वृ॒णी॒ष्व दु॑हितर्दिवः।
रात्री॒ स्तोमं॒ न जि॒ग्युषी᳚।
दे॒वीं वाच॑मजनयन्त दे॒वाः।
तां वि॒श्वरू᳚पाः प॒शवो॑ वदन्ति।
सा नो॑ म॒न्द्रेष॒मूर्जं॒ दुहा᳚ना।
धे॒नुर्वाग॒स्मानुप॒ सुष्टु॒तैतु॑॥ १०॥

((rātrī̱ vya̍khyadāya̱tī ।
pu̱ru̱trā de̱vya̍kṣabhi̍ḥ ।
viśvā̱ adhi̱ śriyo̍'dhita ।
upa̍ te̱ gā i̱vāka̍ram ।
vṛ̱ṇī̱ṣva du̍hitardivaḥ ।
rātrī̱ stomaṃ̱ na ji̱gyuṣī̎ ।
de̱vīṃ vāca̍majanayanta de̱vāḥ ।
tāṃ vi̱śvarū̍pāḥ pa̱śavo̍ vadanti ।
sā no̍ ma̱ndreṣa̱mūrjaṃ̱ duhā̎nā ।
dhe̱nurvāga̱smānupa̱ suṣṭu̱taitu̍ ॥ 10 ॥))

**[[2-4-6-11]]**

यद्वाग्वदन्त्यविचेतनानि।
राष्ट्री देवानाꣳ निषसाद मन्द्रा।
चतस्र ऊर्जं दुदुहे पयाꣳसि।
क्व स्विदस्याः परमं जगाम।
गौरी मिमाय सलिलानि तक्षती।
एकपदी द्विपदी सा चतुष्पदी।
अष्टापदी नवपदी बभूवुषी।
सहस्राक्षरा परमे व्योमन्।
तस्याꣳ समुद्रा अधि विक्षरन्ति।
तेन जीवन्ति प्रदिशश्चतस्रः॥ ११॥

((yadvāgvadantyavicetanāni |
rāṣṭrī devānāꣳ niṣasāda mandrā |
catasra ūrjaṃ duduhe payāꣳsi |
kva svidasyāḥ paramaṃ jagāma |
gaurī mimāya salilāni takṣatī |
ekapadī dvipadī sā catuṣpadī |
aṣṭāpadī navapadī babhūvuṣī |
sahasrākṣarā parame vyoman |
tasyāꣳ samudrā adhi vikṣaranti |
tena jīvanti pradiśaścatasraḥ || 11 ||))

**[[2-4-6-12]]**

ततः क्षरत्यक्षरम्।
तद्विश्वमुपजीवति।
इन्द्रा सूरा जनयन्विश्वकर्मा।
मरुत्वाꣳ अस्तु गणवान्त्सजातवान्।
अस्य स्नुषा श्वशुरस्य प्रशिष्टिम्।
सपत्ना वाचं मनसा उपासताम्।
इन्द्रः सूरो अतरद्रजाꣳसि।
स्नुषा सपत्नाः श्वशुरोऽयमस्तु।
अयꣳ शत्रूञ्जयतु जर्हृषाणः।
अयं वाजं जयतु वाजसातौ।
अग्निः क्षत्रभृदनिभृष्टमोजः।
सहस्रियो दीप्यतामप्रयुच्छन्।
विभ्राजमानः समिधान उग्रः।
आऽन्तरिक्षमरुहदगन्द्याम्॥ १२॥
धारयन्पुरोडाशं बृहस्पतिं जघनच्युतिमानन्दो भगस्य तृप्याण्यग्नेः पृथिवी यज्वन एतु प्रदिशश्चतस्रो वाजसातौ चत्वारि च॥ ६॥

((tataḥ kṣaratyakṣaram |
tadviśvamupajīvati |
indrā sūrā janayanviśvakarmā |
marutvāꣳ astu gaṇavāntsajātavān |
asya snuṣā śvaśurasya praśiṣṭim |
sapatnā vācaṃ manasā upāsatām |
indraḥ sūro ataradrajāꣳsi |
snuṣā sapatnāḥ śvaśuro'yamastu |
ayaꣳ śatrūñjayatu jarhṛṣāṇaḥ |
ayaṃ vājaṃ jayatu vājasātau |
agniḥ kṣatrabhṛdanibhṛṣṭamojaḥ |
sahasriyo dīpyatāmaprayucchan |
vibhrājamānaḥ samidhāna ugraḥ |
ā'ntarikṣamaruhadagandyām || 12 ||
dhārayanpuroḍāśaṃ bṛhaspatiṃ jaghanacyutimānando bhagasya tṛpyāṇyagneḥ pṛthivī yajvana etu pradiśaścatasro vājasātau catvāri ca || 6 ||))

**[[2-4-7-1]]**

वृषाऽस्यꣳशुर्वृषभाय गृह्यसे।
वृषाऽयमुग्रो नृचक्षसे।
दिव्यः कर्मण्यो हितो बृहन्नाम।
वृषभस्य या ककुत्।
विषूवान्विष्णो भवतु।
अयं यो मामको वृषा।
अथो इन्द्र इव देवेभ्यः।
विब्रवीतु जनेभ्यः।
आयुष्मन्तं वर्चस्वन्तम्।
अथो अधिपतिं विशाम्॥ १॥

((vṛṣā'syaꣳśurvṛṣabhāya gṛhyase |
vṛṣā'yamugro nṛcakṣase |
divyaḥ karmaṇyo hito bṛhannāmā |
vṛṣabhasya yā kakut |
viṣūvānviṣṇo bhavatu |
ayaṃ yo māmako vṛṣā |
atho indra iva devebhyaḥ |
vibravītu janebhyaḥ |
āyuṣmantaṃ varcasvantam |
atho adhipatiṃ viśām || 1 ||))

**[[2-4-7-2]]**

अस्याः पृथिव्या अध्यक्षम्।
इममिन्द्र वृषभं कृणु।
यः सुशृङ्गः सुवृषभः।

कल्या॒णो द्रो॒ण आहि॑तः।
कार्षी॑वलप्रगाणेन।
वृ॒ष॒भेण॑ यजामहे।
वृ॒ष॒भेण॒ यज॑मानाः।
अक्रू॑रेणेव स॒र्पिषा᳚।
मृध॑श्च स॒र्वा॒ इन्द्रे॑ण।
पृत॑नाश्च जयामसि॥ २॥

((a̱syāḥ pṛ̍thi̱vyā adhya̍kṣam ।
i̱mami̍ndra vṛ̱ṣa̱bhaṃ kṛ̍ṇu ।
yaḥ su̱śṛṅga̍ḥ suvṛ̱ṣa̱bhaḥ ।
ka̱lyāṇo̱ droṇa̱ āhi̍taḥ ।
kārṣi̍valapragāṇena ।
vṛ̱ṣa̱bheṇa̍ yajāmahe ।
vṛ̱ṣa̱bheṇa̱ yaja̍mānāḥ ।
akrū̍reṇeva sa̱rpiṣā̎ ।
mṛdha̍śca̱ sarvā̱ indre̍ṇa ।
pṛta̍nāśca jayāmasi ॥ 2 ॥))

**[[2-4-7-3]]**

यस्या॒यमृ॑ष॒भो ह॒विः।
इन्द्रा॑य परि॒णी॒यते᳚।
जया॑ति॒ शत्रु॑मा॒यन्ता᳚म्।
अथो॑ हन्ति पृतन्य॒तः।
नृ॒णाम॑ह प्र॒णीरस॑त्।
अग्र॑ उद्भि॒न्द॒ताम॑सत्।
इन्द्र॒ शुष्मं॑ त॒नुवा॒ मेर॑यस्व।
नी॒चा विश्वा॑ अ॒भिति॑ष्ठा॒भिमा॑तीः।
निश्शृ॑णीह्याबा॒धं यो नो॒ अस्ति॑।
उ॒रुं नो॑ लो॒कं कृ॑णुहि जीरदानो॥ ३॥

((yasyā̱yamṛ̍ṣa̱bho ha̱viḥ ।
indrā̍ya pari̱ṇī̱yate̎ ।
jayā̍ti̱ śatru̍mā̱yantā̎m ।
atho̍ hanti pṛtanya̱taḥ ।
nṛ̱ṇāmaha̍ pra̱ṇīrasa̍t ।
agra̍ udbhinda̱tāma̍sat ।
indra̱ śuṣmaṃ̍ ta̱nuvā̱ mera̍yasva ।
nī̱cā viśvā̍ a̱bhiti̍ṣṭhā̱bhimā̍tīḥ ।
niśṛ̍ṇīhyābā̱dhaṃ yo no̱ asti̍ ।
u̱ruṃ no̍ lo̱kaṃ kṛ̍ṇuhi jīradāno ॥ 3 ॥))

**[[2-4-7-4]]**

प्रेह्य॒भिप्रे॑हि॒ प्रभ॑रा॒ सह॑स्व।
मा विवे॑नो॒ विशृ॑णुष्वा॒ जने॑षु।
उदी॑डि॒तो वृ॑षभ॒ तिष्ठ॒ शुष्मै᳚ः।
इन्द्र॒ शत्रू᳚न्पु॒रो अ॒स्माक॑ युध्य।
अग्ने॒ जेता॒ त्वं ज॑य।
शत्रू᳚न्त्सहस॒ ओज॑सा।
वि शत्रू॒न्विमृधो॑ नुद।
ए॒तं ते॒ स्तोमं॑ तुविजात॒ विप्र॑ः।
रथं॒ न धीर॒ः स्वपा॑ अतक्षम्।
यदीद॑ग्ने॒ प्रति॒ त्वं दे॑व॒ हर्या᳚ः॥ ४॥

((prehya̱bhiprehi̱ prabha̍rā̱ saha̍sva ।
mā vive̍no̱ viśṛ̍ṇuṣvā̱ jane̍ṣu ।
udi̍ḍi̱to vṛ̍ṣabha̱ tiṣṭha̱ śuṣmai̎ḥ ।
indra̱ śatrū̎npu̱ro a̱smāka̍ yudhya ।
agne̱ jetā̱ tvaṃ ja̍ya ।
śatrū̎ntsahasa̱ ojā̍sā ।
vi śatrū̱nvimṛdho̍ nuda ।
e̱taṃ te̱ stomaṃ̍ tuvijāta̱ viprā̍ḥ ।
rathaṃ̱ na dhīra̱ḥ svapā̍ atakṣam।
yadīda̍gne̱ prati̱ tvaṃ de̍va̱ haryā̎ḥ ॥ 4 ॥))

**[[2-4-7-5]]**

सुव॑र्वतीर॒प ए॑ना जयेम।
यो घृ॒तेना॒भिमा॑नितः।
इन्द्र॒ जैत्रा॑य जज्ञिषे।
स न॒ः संका॑सु पारय।
पृ॒त॒ना॒साह्ये॑षु च।
इन्द्रो॑ जिगाय पृथि॒वीम्।
अ॒न्तरि॑क्षꣳ सुव॑र्म॒हत्।
वृ॒त्र॒हा पु॑रु॒चेत॑नः।
इन्द्रो॑ जिगाय॒ सह॑सा॒ सहा॑ꣳसि।
इन्द्रो॑ जिगाय॒ पृत॑नानि॒ विश्वा᳚॥ ५॥

((suva̍rvatīra̱pa e̍nā jayema ।
yo ghṛ̱tenā̱bhimā̍nitaḥ ।
indra̱ jaitrā̍ya jajñiṣe ।
sa na̱ḥ saṃkā̍su pāraya ।
pṛ̱ta̱nā̱sāhye̍ṣu ca ।
indro̍ jigāya pṛthi̱vīm ।
a̱ntari̍kṣaṃ̍ suva̍rma̱hat ।
vṛ̱trahā pu̍ru̱ceta̍naḥ ।
indro̍ jigāya̱ saha̍sā̱ sahā̍ṃsi ।
indro̍ jigāya̱ pṛta̍nāni̱ viśvā̎ ॥ 5 ॥))

**[[2-4-7-6]]**

इन्द्रो॑ जा॒तो वि पुरो॑ रुरोज।

स नः॑ पर॒स्पा वरि॑वः कृणातु।
अ॒य कृ॒त्नुर॑गृ॒भीतः।
वि॒श्व॒जिदु॒द्भिदि॒त्सोमः॑।
ऋषि॒र्विप्रः॒ काव्ये॑न।
वा॒युर॑ग्रे॒गा य॑ज्ञ॒प्रीः।
सा॒कं ग॒न्मन॑सा य॒ज्ञम्।
शि॒वो नि॒युद्भिः॑ शि॒वाभिः॑।
वायो॑ शु॒क्रो अ॑यामि ते।
मध्वो॒ अग्रं॑ दि॒विष्टि॑षु॥ ६॥

((indro̍ jā̱to vi puro̍ ruroja ।
sa na̍ḥ pa̱raspā vari̍vaḥ kṛṇātu ।
a̱ya kṛ̱tnuragṛ̍bhītaḥ ।
vi̱śva̱jidu̱dbhiditsoma̍ḥ ।
ṛ̱ṣi̱rvipra̱ḥ kāvye̍na ।
vā̱yura̍gre̱gā ya̍jña̱prīḥ ।
sā̱kaṃ ga̱nmana̍sā ya̱jñam ।
śi̱vo ni̱yudbhi̍ḥ śi̱vābhi̍ḥ ।
vāyo̍ śu̱kro a̍yāmi te ।
madhvo̱ agra̱ṃ divi̍ṣṭi̱ṣu ॥ 6 ॥))

**[[2-4-7-7]]**

आया॑हि॒ सोम॑पीतये।
स्वा॒रु॒हो दे॑व नि॒युत्व॑ता।
इ॒ममि॑न्द्र वर्धय क्ष॒त्त्रिया॑णाम्।
अ॒यं वि॒शां वि॒श्पति॑रस्तु॒ राजा॑ँ।
अ॒स्मा इ॑न्द्र॒ महि॒ वर्चा॑ꣳसि धेहि।
अ॒व॒र्च॒सं॑ कृणुहि॒ शत्रु॑मस्य।
इ॒ममा॑भज॒ ग्रामे॒ अश्वे॑षु॒ गोषु॑।
निर॒मुं भ॑ज॒ यो॑ऽमित्रो॑ अस्य।
वर्ष्म॑न्क्ष॒त्त्रस्य॑ क॒कुभि॑ श्रयस्व।
ततो॑ न उ॒ग्रो वि॑भजा॒ वसू॑नि॥ ७॥

((āyā̍hi̱ somȧpītaye ।
svā̱ru̱ho de̍va ni̱yutva̍tā ।
i̱mami̍ndra vardhaya kṣa̱ttriyā̍ṇām ।
a̱yaṃ vi̱śāṃ vi̱śpati̍rastu̱ rājā̍ṃ ।
a̱smā i̍ndra̱ ma̱hi̱varcā̍ṃsi dhehi ।
a̱varcasa̍ṃ kṛṇuhi̱ śatru̍masya ।
i̱mamābha̍ja̱ grāme̱ aśve̍ṣu̱ goṣu̍ ।
nira̱muṃ bha̍ja̱ yo̍'mitro̍ asya ।
varṣma̍nkṣa̱ttrasya̍ ka̱kubhi̍ śrayasva ।
tato̍ na u̱gro vibha̍jā̱ vasū̍ni ॥ 7 ॥))

**[[2-4-7-8]]**

अ॒स्मे द्यावा॑पृथिवी॒ भूरि॑ वा॒मम्।
सं॒दु॑हाथां घर्म॒दुघे॑व धे॒नुः।
अ॒यꣳ राजा॑ँ प्रि॒य इन्द्र॑स्य भूयात्।
प्रि॒यो गवा॒मोष॑धीनामु॒तापाम्।
यु॒नज्मि॑ त उत्त॒राव॑न्त॒मिन्द्र॑ँम्।
येन॒ जया॑सि॒ न प॒राजया॑सै।
स त्वा॑ऽकरेकवृष॒भꣳ स्वाना॑ँम्।
अथो॑ राजन्नुत्त॒मं मान॑वाना॑ँम्।
उत्त॑रस्त्वमध॑रे ते स॒पत्ना॑ः।
एक॑वृषा॒ इन्द्र॑सखा जिगी॒वान्॥ ८॥

((a̱sme dyā̍vāpṛthivī̱ bhūri̍ vā̱mam ।
sa̱ṃdu̍hāthāṃ gharma̱dughe̍va dhe̱nuḥ ।
a̱yaṃ rājā̍ṃ pri̱ya indra̍sya bhūyāt ।
pri̱yo gavā̱moṣa̍dhīnāmu̱tāpām ।
yu̱najmi̍ ta utta̱rāva̍nta̱mindra̍m ।
yena̱ jayā̍si na pa̱rājayā̍sai ।
sa tvā̍'karekavṛṣa̱bhaṃ svānā̍m ।
atho̍ rājannutta̱maṃ mā̍na̱vānā̍m ।
utta̍ra̱stvamadha̍re te sa̱patnā̍ḥ ।
ekā̍vṛṣā̱ indrȧsakhā jigī̱vān ॥ 8 ॥))

**[[2-4-7-9]]**

विश्वा॒ आशाः॒ पृत॑नाः सं॒ जयं॒ जय॑न्।
अ॒भिति॑ष्ठ शत्रूय॒तः स॑हस्व।
तुभ्यं॑ भरन्ति क्षि॒तयो॑ यविष्ठ।
ब॒लिम॑ग्ने॒ अन्ति॑ त॒ ओत दू॒रात्।
आ भन्दि॑ष्ठस्य सु॒मतिं॒ चि॑किद्धि।
बृ॒हत्ते॑ अग्ने॒ महि॒ शर्म॑ भ॒द्रम्।
यो दे॒ह्यो अन॑मयद्व॒धस्मैः।
यो अ॒र्यप॑त्नीरु॒षस॑श्च॒कार॑।
स नि॒रुध्या॒ नहु॑षो य॒ह्वो अ॒ग्निः।
वि॒श॑श्चक्रे बलि॒हृतः॒ सहो॑भिः॥ ९॥

((viśvā̱ āśā̱ḥ pṛta̍nāḥ sa̱ṃ jaya̱ṃ jaya̍n ।
a̱bhiti̍ṣṭha śatrūya̱taḥ sa̍hasva ।
tubhya̍ṃ bharanti kṣi̱tayo̍ yaviṣṭha ।
ba̱limȧgne̱ anti̍ ta̱ ota dū̱rāt ।
ā bhandi̍ṣṭhasya suma̱tiṃ̱ ci̍kiddhi ।
bṛ̱hatte̍ agne̱ mahi̱ śarma̍ bha̱dram ।
yo de̱hyo ana̍mayadvadha̱smaiḥ ।
yo arya̍patnīru̱ṣasa̍ścakārȧ ।
sa ni̱rudhyā̱ nahu̍ṣo ya̱hvo a̱gniḥ ।
viśa̍ścakre bali̱hṛta̱ḥ saho̍bhiḥ ॥ 9 ॥))

**[[2-4-7-10]]**

प्र स॒द्यो अ॑ग्ने॒ अत्ये᳚ष्य॒न्यान्।
आ॒विर्य॑स्मै॒ चारु॑तरो ब॒भूथ॑।
ई॒डे॒न्यो॑ वपु॒ष्यो॑ वि॒भावा᳚।
प्रि॒यो वि॒शामति॑थि॒र्मानु॑षीणाम्।
ब्रह्म॑ ज्येष्ठा वी॒र्या᳚ संभृ॑तानि।
ब्रह्माग्रे॒ ज्येष्ठं॒ दि॒वमात॑तान।
ऋ॒तस्य॒ ब्रह्म॑ प्रथ॒मोत ज॑ज्ञे।
तेना॑र्हति॒ ब्रह्म॑णा॒ स्पर्धि॑तुं॒ कः।
ब्रह्म॒ स्रुचो॑ घृ॒तव॑तीः।
ब्रह्म॑णा॒ स्वर॑वो मि॒ताः॥ १०॥

((pra sa̱dyo a̍gne̱ atye̎ṣya̱nyān ।
ā̱viryasmai̱ cāru̍taro ba̱bhūtha̍ ।
ī̱denyo̍ vapu̱ṣyo̍ vi̱bhāva̎ ।
pri̱yo vi̱śāmati̍thi̱rmānu̍ṣī̱ṇām ।
brahma̍ jyeṣṭhā vīrya̎ sambhṛ̍tāni ।
brahmāgre̱ jyeṣṭha̱m diva̱mātatāna ।
ṛ̱tasya̱ brahma̍ pratha̱mota ja̍jñe ।
tena̍rhati̱ brahma̍ṇā̱ spardhi̍tu̱m kaḥ ।
brahma̱ sruco̍ ghṛ̱tava̍tīḥ ।
brahma̍ṇā̱ svara̍vo mi̱tāḥ ॥ 10 ॥))

**[[2-4-7-11]]**

ब्रह्म॑ य॒ज्ञस्य॒ तन्त॑वः।
ऋ॒त्विजो॒ ये ह॑वि॒ष्कृतः॑।
शृङ्गा॑णी॒वेच्छृ॒ङ्गिणा॒ꣳ॒ संद॑दृश्रिरे।
च॒षाल॑वन्तः॒ स्वर॑वः पृथि॒व्याम्।
ते दे॒वासः॒ स्वर॑वस्तस्थि॒वाꣳसः॑।
न॒मः सखि॑भ्यः स॒न्नान्माऽव॑गात।
अ॒भि॒भूर॒ग्निर॑तर॒द्रजा॑ꣳसि।
स्पृधो॑ वि॒हत्य॒ पृत॑ना अ॒भिश्रीः॑।
जु॒षाणो॑ म॒ आहु॑तिं मा महि॒ष्ट।
ह॒त्वा स॒पत्ना॒न्वरि॑वस्करं नः।
ईशा॑नं त्वा॒ भुव॑नानामभि॒श्रिय॑म्।
स्तौम्य॑ग्न उ॒रु कृ॒तꣳ सु॒वीर᳚म्।
ह॒विर्जु॑षा॒णः स॒पत्ना᳚ꣳ अ॒भि॒भूर॑सि।
ज॒हि शत्रू॒ꣳ॒रप॒ मृधो॑ नुदस्व॥ ११॥
वि॒शां जया॑मसि जीरदानो॒ हर्या॒ विश्वा॒ दिवि॑ष्टिषु॒ वसू॑नि
जिगी॒वान्त्सहो॑भिर्मि॒ता नश्च॒त्वारि॑ च॥ ७॥

((brahma̍ ya̱jñasya̱ tanta̍vaḥ ।
ṛ̱tvijo̱ ye ha̍vi̱ṣkṛtaḥ̍ ।
śṛṅgā̍ṇī̱vecchṛ̱ṅgiṇā̱m̐ saṃda̍dṛśrire ।
ca̱ṣāla̍vanta̱ḥ svara̍vaḥ pṛthi̱vyām।
te de̱vāsa̱ḥ svara̍vastasthi̱vām̐sa̍ḥ ।
na̱maḥ sakhi̍bhyaḥ sa̱nnānmā'va̍gāta ।
a̱bhi̱bhūra̱gnira̍tara̱drajā̍m̐si ।
spṛdho̍ vi̱hatya̱ pṛta̍nā abhi̱śrīḥ̍ ।
ju̱ṣāṇo̍ ma̱ āhu̍tim mā mahi̱ṣṭa ।
ha̱tvā sa̱patnā̱nvari̍vaskaram naḥ ।
īśā̍nam tvā̱ bhuva̍nānāmabhi̱śriya̍m ।
staumya̍gna uru̱ kṛ̱tam̐ su̱vīra̎m ।
ha̱virju̍ṣā̱ṇaḥ sa̱patnā̎m̐ abhi̱bhūra̍si ।
ja̱hi śatrū̱m̐rapa̱ mṛdho̍ nudasva ॥ 11 ॥
vi̱śām ja̍yāmasi jīradāno̱ haryā̱ viśvā̱ divi̍ṣṭiṣu̱ vasū̍ni
jigī̱vāntsaho̍bhirmi̱tā na̍ścatvāri̍ ca ॥ 7 ॥))

**[[2-4-8-1]]**

स प्र॒त्नव॒न्नवी॑यसा।
अग्ने॑ द्यु॒म्नेन॑ सं॒यता᳚।
बृ॒हत्त॑नन्थ भा॒नुना᳚।
नवं॑ नु स्तोम॑म॒ग्नये᳚।
दि॒वः श्ये॒नाय॑ जीजनम्।
वसोः᳚ कु॒विद्व॒नाति॑ नः।
स्वा॒रु॒हा यस्य॒ श्रियो॑ दृ॒शे।
र॒यिर्वी॒रव॑तो यथा।
अग्रे॑ य॒ज्ञस्य॒ चेत॑तः।
अदा᳚भ्यः पुर ए॒ता॥ १॥

((sa pra̍tna̱vannavi̍yasā ।
agne̍ dyu̱mnena̍ sa̱myatā̎ ।
bṛ̱hatta̍nantha bhā̱nunā̎ ।
nava̱m nu stoma̍ma̱gnaye̎ ।
di̱vaḥ śye̱nāya̍ jī̱janam ।
vaso̎ḥ ku̱vidva̱nāti̍ naḥ ।
svā̱ru̱hā yasya̱ śriyo̍ dṛ̱śe ।
ra̱yirvī̱rava̍to yathā ।
agre̱ ya̱jñasya̱ ceta̍taḥ ।
adā̎bhyaḥ pura e̱tā ॥ 1 ॥))

**[[2-4-8-2]]**

अ॒ग्निर्वि॒शां मानु॑षीणाम्।
तू॒र्णी रथः॒ सदा॒नवः॑।
नव॒ꣳ॒ सोमा॑य वा॒जिने᳚।
आज्यं॒ पय॑सोऽजनि।
जु॒ष्टꣳ॒ शुचि॑तमं॒ वसु॑।
नव॒ꣳ॒ सोम जुषस्व नः।

पी॒यूष॑स्ये॒ह तृ॑प्णुहि।
यस्ते॑ भा॒ग ऋ॒ता व॒यम्।
नव॑स्य सोम ते व॒यम्।
आ सु॑म॒तिं वृ॑णीमहे॥ २॥

((a̱gnirvi̱śā̍m mānu̍ṣī̱ṇām |
tūrṇī̱ ratha̱ḥ sadā̱nava̍ḥ |
nava̱m̐ somā̍ya vā̱jine̎ |
ājya̱m paya̍so'jani |
juṣṭa̱m̐ śuci̍tamama̱ vasu̍ |
nava̍m̐ soma juṣasva naḥ |
pīyūṣa̍sye̱ha tṛ̍pṇuhi |
yaste̍ bhā̱ga ṛ̱tā va̱yam |
nava̍sya soma te va̱yam |
ā su̍ma̱tim vṛ̍ṇīmahe || 2 ||))

[[2-4-8-3]]
स नो॑ रास्व सह॒स्रिणः॑।
नव॑ꣳ ह॒विर्जु॑षस्व नः।
ऋ॒तुभिः॑ सोम॒ भूत॑मम्।
तद॒ङ्ग प्रति॑हर्य नः।
राजा᳚न्त्सोम स्व॒स्तये᳚।
नव॒ꣳ॒ स्तोम॒ं नव॑ꣳ ह॒विः।
इ॒न्द्रा॒ग्निभ्यां॒ निवे॑दय।
तज्जु॑षेता॒ꣳ॒ सचे॑तसा।
शुचि॑ं नु स्तोम॒ं नव॑जातम॒द्य।
इन्द्रा᳚ग्नी वृत्रहणा जु॒षेथा᳚म्॥ ३॥

((sa no̍ rāsva saha̱sriṇa̍ḥ |
nava̍m̐ ha̱virju̍ṣasva naḥ |
ṛ̱tubhi̍ḥ soma̱ bhūta̍mam |
tada̱ṅga prati̍harya naḥ |
rājā̎ntsoma sva̱staye̎ |
nava̱m̱̐ stoma̱m nava̍m̐ ha̱viḥ |
i̱ndrā̱gnibhyā̱m nive̍daya |
tajju̍ṣetā̱m̱̐ sace̍tasā |
śuci̍m nu stoma̱m nava̍jātama̱dya |
indrā̎gnī vṛtrahaṇā ju̱ṣethā̎m || 3 ||))

[[2-4-8-4]]
उ॒भा हि वा॑ꣳ सु॒हवा॒ जोह॑वीमि।
ता वाज॑ꣳ स॒द्य उ॑श॒ते धेष्ठा᳚।
अ॒ग्निरिन्द्रो॒ नव॑स्य नः।
अ॒स्य ह॒व्यस्य॑ तृप्यताम्।
इ॒ह दे॒वौ स॑ह॒स्रिणौ᳚।
य॒ज्ञं न॒ आ हि गच्छ॑ताम्।
वसु॑मन्तꣳ सु॒वर्वि॑दा᳚म्।
अ॒स्य ह॒व्यस्य॑ तृप्यताम्।
अ॒ग्निरिन्द्रो॒ नव॑स्य नः।
विश्वा᳚न्दे॒वाꣳस्त॑र्पयत॥ ४॥

((u̱bhā hi vā̍m̐ su̱havā̱ joha̍vīmi |
tā vāja̍m̐ sa̱dya u̍śa̱te dheṣṭhā̎ |
a̱gnirindro̱ nava̍sya naḥ |
a̱sya ha̱vyasya̍ tṛpyatām|
i̱ha de̱vau sa̍ha̱sriṇau̎ |
ya̱jñam na̱ ā hi gaccha̍tām |
vasu̍mantam̐ suva̱rvidā̎m |
a̱sya ha̱vyasya̍ tṛpyatām |
a̱gnirindro̱ nava̍sya naḥ |
viśvā̎nde̱vām̐sta̍rpayata || 4 ||))

[[2-4-8-5]]
ह॒विषो॒ऽस्य नव॑स्य नः।
सु॒वर्वि॑दो॒ हि ज॑ज्ञि॒रे।
ए॒दं ब॒र्हिः सु॒ष्टरी॑मा॒ नवे॑न।
अ॒यं य॒ज्ञो यज॑मानस्य भा॒गः।
अ॒यं ब॑भूव भुव॑नस्य॒ गर्भः॑।
विश्वे॑ दे॒वा इ॒दम॒द्याग॑मिष्ठाः।
इ॒मे नु द्यावा॑पृथि॒वी स॒मीची᳚।
त॒न्वा॒ने य॒ज्ञं पु॑रु॒पेश॑सं धि॒या।
आऽस्मै॑ पृ॒णीता॒ं भुव॑नानि॒ विश्वा᳚।
प्र॒जां पुष्टि॑म॒मृत॒ं नवे॑न॥ ५॥

((ha̱viṣo̱'sya nava̍sya naḥ |
su̱va̱rvido̱ hi ja̍jñi̱re |
edam ba̱rhiḥ su̱ṣṭarī̍mā̱ nave̍na |
a̱yam ya̱jño yaja̍mānasya bhā̱gaḥ |
a̱yam ba̍bhūva̱ bhuva̍nasya̱ garbha̍ḥ |
viśve̍ de̱vā i̱dama̱dyāga̍miṣṭhāḥ |
i̱me nu dyāvā̍pṛthi̱vī sa̱mīcī̎ |
ta̱nvā̱ne ya̱jñam pu̍ru̱peśa̍sam dhi̱yā |
ā'smai̍ pṛ̱ṇītā̱m bhuva̍nāni̱ viśvā̎ |
pra̱jām puṣṭi̍ma̱mṛta̱m nave̍na || 5 ||))

[[2-4-8-6]]
इ॒मे धे॒नू अ॒मृत॒ं ये दु॒हाते᳚।
पय॑स्वत्यु॒त्तरामे॑तु॒ पुष्टिः॑।
इ॒मं य॒ज्ञं जु॒षमा॑णे॒ नवे॑न।
स॒मीची॒ द्यावा॑पृथि॒वी घृ॒ताची᳚।

यविष्ठो हव्यवाहनः।
चित्रभानुर्घृतासुतिः।
नवजातो विरोचसे।
अग्ने तत्ते महित्वनम्।
त्वमग्ने देवताभ्यः।
भागे देव न मीयसे॥ ६॥

((ime dhenū amṛtam ye duhāte l
payasvatyuttarāmetu puṣṭiḥ l
imam yajñam juṣamāṇe navena l
samīcī dyāvāpṛthivī ghṛtācī l
yaviṣṭho havyavāhanaḥ l
citrabhānurghṛtāsutiḥ l
navajāto virocase l
agne tatte mahitvanam l
tvamagne devatābhyaḥ l
bhāge deva na mīyase ll 6 ll))

**[[2-4-8-7]]**

स एना विद्वान्यक्ष्यसि।
नवꣳ स्तोमं जुषस्व नः॥
अग्निः प्रथमः प्राश्नातु।
स हि वेद यथा हविः।
शिवा अस्मभ्यमोषधीः।
कृणोतु विश्वचर्षणिः।
भद्रान्नः श्रेयः समनैष्ट देवाः।
त्वयाऽवसेन समशीमहि त्वा।
स नो मयोभूः पितो आविशस्व।
शं तोकाय तनुवे स्योनः।
एतमु त्यं मधुना संयुतं यवम्।
सरस्वत्या अधिमनावचर्कृषुः।
इन्द्र आसीत्सीरपतिः शतक्रतुः।
कीनाशा आसन्मरुतः सुदानवः॥ ७॥
पुरएता वृणीमहे जुषेथाँ तर्पयतामृतं नवेन मीयसे
स्योनश्चत्वारि च॥ ८॥
जुष्टश्चक्षुषो जुष्टी नरो नक्तं जाता वृषास उत नो
वृषाऽस्यꣳशुः स प्रत्नवदष्टौ॥ ८॥
जुष्टो मन्युर्भगो जुष्टी नरो हरिवर्पसं गिरः
शिप्रिन्वाजानामुत नो यद्वाग्वदन्ती विश्वा आशा
अशीतिः॥ ८०॥

((sa enā vidvānyakṣyasi l
navam̐ stomaṃ juṣasva naḥ ll
agniḥ prathamaḥ prāśnātu l
sa hi veda yathā haviḥ l
śivā asmabhyamoṣadhīḥ l
kṛṇotu viśvacarṣaṇiḥ l
bhadrānnaḥ śreyaḥ samanaiṣṭa devāḥ l
tvayā'vasena samaśīmahi tvā l
sa no mayobhūḥ pito āviśasva l
śaṃ tokāya tanuve syonaḥ l
etamu tyaṃ madhunā saṃyutaṃ yavam l
sarasvatyā adhimanāvacarkṛṣuḥ l
indra āsītsīrapatiḥ śatakratuḥ l
kīnāśā āsanmarutaḥ sudānavaḥ ll 7 ll
puraetā vṛṇīmahe juṣethām̐ tarpayatāmṛtaṃ navena
mīyase syonaścatvāri ca ll 8 ll
juṣṭaścakṣuṣo juṣṭī naro naktaṃ jātā vṛṣāsa uta no
vṛṣā'syam̐śuḥ sa pratnavadaṣṭau ll 8 ll
juṣṭo manyurbhago juṣṭī naro harivarpasaṃ giraḥ
śiprinvājānāmuta no yadvāgvadantī viśvā āśā aśītiḥ
ll 80 ll))

# Taittirīya-Brāhmaṇa
# Book 2, Chapter 5

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[2-5-1-1]]**

प्रा॒णो रक्ष॑ति॒ विश्व॒मेज॑त्।
इर्यो॑ भू॒त्वा ब॑हु॒धा ब॒हूनि॑।
स इत्सर्व॒ं व्या॑नशे।
यो दे॒वो दे॒वेषु॑ वि॒भूर॒न्तः।
आवृ॑दूदात्क्षेत्रि॒यध्व॒गद्वृषा᳚।
तमित्प्रा॒णं मन॒सोप॑शिक्षत।
अग्र॑ं दे॒वाना॑मि॒दम॑त्तु नो ह॒विः।
मन॑स॒श्चित्ते॒दम्।
भू॒तं भव्य॑ं च गुप्यते।
तद्धि दे॒वेष्व॑ग्रि॒यम्॥ १॥

((prā̱ṇo ra̍kṣati̱ viśva̱meja̍t ।
iryo̍ bhū̱tvā ba̍hu̱dhā ba̱hūni̍ ।
sa itsarva̱ṃ vya̍naśe ।
yo de̱vo de̱veṣu̍ vi̱bhūra̱ntaḥ ।
āvṛ̍dū̱dātkṣetriya̍dhva̱gadvṛṣā̎ ।
tamitprā̱ṇaṃ mana̱sopa̍śikṣata ।
agra̱ṃ de̱vānā̍mi̱dama̍ttu no ha̱viḥ ।
mana̍sa̱ścitte̱dam ।
bhū̱taṃ bhavya̱ṃ ca gupyate ।
taddhi de̱veṣva̍gri̱yam ॥ 1 ॥))

**[[2-5-1-2]]**

आ न॑ एतु पु॒रश्च॒रम्।
स॒ह दे॒वैरि॒मꣳ ह॒वा᳚म्।
मन॒ः श्रेय॑सि श्रेयसि।
कर्म॑न्यज्ञप॑तिं॒ दध॑त्।
जु॒षता᳚ꣳ मे॒ वागि॒दꣳ ह॒विः।
वि॒राड्दे॒वी पु॒रोहि॑ता।
ह॒व्य॒वाड॒न॑पायिनी।
यया॑ रू॒पाणि॑ बहु॒धा वद॑न्ति।
पेशा॑ꣳसि दे॒वाः प॑र॒मे ज॒नित्रे᳚।
सा नो॑ वि॒राड॒न॑पस्फुरन्ती॥ २॥

((ā na̍ etu pu̱raśca̱ram ।
sa̱ha de̱vairi̱mam̐ ha̱vām̐ ।
mana̱ḥ śreya̍si śreyasi ।
karma̍nyaj̱ñapa̍ti̱ṃ dadha̍t ।
ju̱ṣatā̱m̐ me̱ vāgi̱dam̐ ha̱viḥ ।
vi̱rāḍḍe̱vī pu̱rohi̍tā ।
ha̱vya̱vāḍa̱na̍pāyinī ।
yayā̍ rū̱pāṇi̍ bahu̱dhā vada̍nti ।
peśā̍m̐si de̱vāḥ pa̍ra̱me ja̱nitrē ।
sā no̍ vi̱rāḍa̱na̍pasphurantī ॥ 2 ॥))

**[[2-5-1-3]]**

वाग्दे॒वी जु॑षतामि॒दꣳ ह॒विः।
चक्षु॑र्दे॒वाना॒ं ज्योति॑र॒मृते॒ न्य॑क्तम्।
अ॒स्य वि॒ज्ञाना॑य बहु॒धा निधी॑यते।
तस्य॑ सु॒म्नम॑शीमहि।
मा नो॑ हासीद्विचक्ष॒णम्।
आयु॑रि॒न्नः प्रती᳚र्यताम्।
अन॑न्धाश्च॒क्षुषा॑ व॒यम्।
जी॒वा ज्योति॑रशीमहि।
सुव॒र्ज्योति॑रु॒तामृता᳚म्।
श्रोत्रे॑ण भ॒द्रमु॒त शृ॑ण्वन्ति स॒त्यम्।
श्रोत्रे॑ण॒ वाच॑ं बहु॒धोद्यमा॑नाम्।
श्रोत्रे॑ण॒ मोद॑श्च॒ मह॑श्च श्रूयते।
श्रोत्रे॑ण॒ सर्वा॑ दि॒श आशृ॑णोमि।
येन॒ प्राच्या॑ उ॒त दक्षि॑णा।
प्र॒तीच्यै॑ दि॒शः शृ॒ण्वन्त्यु॑त्त॒रात्।
तदिच्छ्रोत्र॑ं बहु॒धोद्यमा॑नम्।
अ॒रान्न ने॒मिः परि॒ सर्व॑ं बभूव॥ ३॥
अ॒ग्रि॒यमन॑पस्फुरन्ती स॒त्यꣳ स॒प्त च॑॥ १॥

((vāgde̱vī ju̍ṣatāmi̱dam̐ ha̱viḥ ।
cakṣu̍rde̱vānā̱ṃ jyoti̍ra̱mṛte̱ nya̍ktam ।
a̱sya vijñānā̍ya bahu̱dhā nidhī̍yate ।
tasya̍ su̱mnamaśīmahi ।
mā no̍ hāsīdvicakṣa̱ṇam ।
āyu̱rinna̱ḥ pratī̎ryatām ।
ana̍ndhā̱ścakṣu̍ṣā va̱yam ।
jī̱vā jyoti̍raśīmahi ।
suva̱rjyoti̍ru̱tāmṛtām ।
śrotre̍ṇa bha̱dramuta̱ śṛ̱ṇvanti sa̱tyam ।
śrotre̍ṇa̱ vāca̱ṃ bahu̱dhodyamā̍nām ।
śrotre̍ṇa̱ modā̍śca̱ mahā̍śca śrūyate ।
śrotre̍ṇa̱ sarvā̱ di̱śa āśṛ̱ṇomi ।
yena̱ prācyā̍ u̱ta dakṣi̱ṇā ।
pra̱tīcyai di̱śaḥ śṛ̱ṇvantyu̍tta̱rāt ।
tadicchrotra̱ṃ bahu̱dhodyamā̍nam ।

a̱rānna ne̱miḥ pari̱ sarva̱ṁ babhūva || 3 ||
a̱gri̱yamana̍pasphurantī sa̱tyaṁ sa̱pta ca̍ || 1 ||))

**[[2-5-2-1]]**

उ॒देहि॑ वाजि॒न्यो अ॑स्य॒प्स्व॑न्तः।
इ॒दꣳ रा॒ष्ट्रमावि॑श सू॒नृता॑वत्।
यो रोहि॑तो॒ विश्व॑मि॒दं ज॒जान॑।
स नो॑ रा॒ष्ट्रेषु॒ सुधि॑तां दधातु।
रोह॑ꣳ रोह॒ꣳ रोहि॑त॒ आरु॑रोह।
प्र॒जाभि॒र्वृद्धि॑ं ज॒नुषा॑मु॒पस्थ॑ँम्।
ताभि॒ः सꣳर॑ब्धो अवि॒द॒त्षडु॒र्वीः।
गा॒तुं प्रपश्य॑न्नि॒ह रा॒ष्ट्रमाहाँ॑ः।
आहा॑र्षीद्रा॒ष्ट्रमि॒ह रोहि॑तः।
मृधो॒ व्या॑स्थ॒दभ॑यं नो अस्तु॥ १॥

((u̱dehi̍ vāji̱nyo a̍sya̱psva̍ntaḥ |
i̱daṁ rā̱ṣṭramāvi̍śa sū̱nṛta̍vat |
yo rohi̍to̱ viśva̍mi̱daṃ ja̱jāna̍ |
sa no̍ rā̱ṣṭreṣu̱ sudhi̍tāṃ dadhātu |
roha̍ṁ roha̱ṁ rohi̍ta̱ āru̍roha |
pra̱jābhi̱rvṛddhi̍ṃ ja̱nuṣa̍mu̱pasthä̆m |
tābhi̱ḥ saṁra̍bdho avida̱tṣa̱ḍu̱rvīḥ |
gātuṃ prapaśya̍nni̱ha rā̱ṣṭramāhā̆̍ḥ |
āhā̍rṣīdrā̱ṣṭrami̱ha rohi̍taḥ |
mṛdho̱ vyā̍stha̱dabha̍yaṃ no astu || 1 ||))

**[[2-5-2-2]]**

अ॒स्मभ्य॑ं द्यावापृथिवी॒ शक्व॑रीभिः।
रा॒ष्ट्रं दु॑हाथामि॒ह रे॒वती॑भिः।
विम॑मर्श रोहि॑तो वि॒श्वरू॑पः।
स॒मा॒च॒क्रा॒णः प्र॒रुहो॒ रुह॑श्च।
दिव॑ं ग॒त्वाय॑ मह॒ता म॑हि॒म्ना।
वि नो॑ रा॒ष्ट्रमु॑नत्तु॒ पय॑सा॒ स्वेन॑।
यास्ते॒ विश॒स्तप॑सा संबभू॒वुः।
गा॒य॒त्रं व॒त्सम॑नु॒ तास्त॒ आगुः॑।
तास्त्वा॒ विश॑न्तु॒ मह॑सा॒ स्वेन॑।
सं मा॑ता पु॒त्रो अ॒भ्ये॑तु॒ रोहि॑तः॥ २॥

((a̱smabhyaṃ dyāvāpṛthivī̱ śakva̍rībhiḥ |
rā̱ṣṭraṃ du̍hāthāmi̱ha re̱vati̍bhiḥ |
vima̍marśa rohi̍to vi̱śvarū̍paḥ |
sa̱mā̱ca̱krā̱ṇaḥ pra̱ruho̱ ruha̍śca |
divaṃ ga̱tvāya̍ maha̱tā ma̍hi̱mnā |
vi no̍ rā̱ṣṭramu̍nattu̱ paya̍sā̱ svena̍ |
yāste̱ viśa̱stapa̍sā saṃbabhū̱vuḥ |
gā̱ya̱traṃ va̱tsamanu̱ tāsta̱ āgu̍ḥ |
tāstvā viśa̍ntu̱ maha̍sā̱ svena̍ |
saṃ mā̍tā pu̱tro a̱bhye̍tu̱ rohi̍taḥ || 2 ||))

**[[2-5-2-3]]**

यू॒यमु॑ग्रा मरुतः पृश्निमातरः।
इन्द्रे॑ण स॒युजा॒ प्रमृ॑णीथ॒ शत्रू॑न्।
आ वो॒ रोहि॑तो अशृणोदभिद्यवः।
त्रिस॑प्तासो मरुतः स्वादुसंमुदः।
रोहि॑तो॒ द्यावा॑पृथि॒वी ज॑जान।
तस्मि॑ꣳ॒स्तन्तु॑ं परमे॒ष्ठी त॑तान।
तस्मि॑ञ्छिश्रिये अ॒ज एक॑पात्।
अदृ॑ꣳह॒द्द्यावा॑पृथि॒वी बले॑न।
रोहि॑तो॒ द्यावा॑पृथि॒वी अदृ॑ꣳहत्।
तेन॒ सुव॑ः स्तभि॒तं तेन॒ नाकः॑॥ ३॥

((yūyamu̍grā marutaḥ pṛśnimātaraḥ |
indre̍ṇa sa̱yujā̱ pramṛ̍ṇītha̱ śatrū̍n |
ā vo̱ rohi̍to aśṛ̱ṇodabhidyavaḥ |
trisa̍ptāso marutaḥ svādusaṃmudaḥ |
rohi̍to̱ dyāvā̍pṛthi̱vī ja̍jāna |
tasmi̍ṁ̱stantuṃ parame̱ṣṭhī ta̍tāna |
tasmi̍ñchiśriye a̱ja eka̍pāt |
adṛ̍ṁha̱ddyāvā̍pṛthi̱vī bale̍na |
rohi̍to̱ dyāvā̍pṛthi̱vī a̍dṛṁhat |
tena̱ suva̍ḥ stabhi̱taṃ tena̱ nāka̍ḥ || 3 ||))

**[[2-5-2-4]]**

सो अ॒न्तरि॑क्षे॒ रज॑सो वि॒मान॑ः।
तेन॑ दे॒वाः सु॒वर॒न्वविन्दन्।
सु॒शेव॑ं त्वा भा॒नवो॑ दीदि॒वाꣳस॑म्।
सम॑ग्रासो जु॒ह्वो॑ जातवेदः।
उ॒क्षन्ति॑ त्वा वा॒जिन॒माघृतेन॑।
सꣳस॑मग्ने युवसे॒ भोज॑नानि।
अग्ने॒ शर्ध॑ महते सौभ॑गाय।
तव॑ द्यु॒म्नान्यु॑त्तमानि॑ सन्तु।
सं जा॑स्प॒त्यꣳ सु॒यम॒माकृ॑णुष्व।
श॒त्रू॒य॒ताम॒भिति॑ष्ठा॒ महा॑ꣳसि॥ ४॥
अ॒स्त्वेतु॒ रोहि॑तो॒ नाको॒ महा॑ꣳसि॥ २॥

((so a̱ntari̍kṣe̱ rajа̍so vi̱māna̍ḥ |
tena̍ de̱vāḥ su̱vara̱nva̍vindan |
su̱śevaṃ tvā bhā̱navo̍ dīdi̱vāṁsam |
sama̍grāso ju̱hvo̍ jātavedaḥ |

u̱kṣanti̍ tvā vā̱jina̱māghṛ̱tena̍ |
saṃsa̍magne yuvase̱ bhoja̍nāni |
agne̱ śardha̍ maha̱te saubha̍gāya |
tava̍ dyu̱mnānyu̍tta̱māni̍ santu |
saṃ jā̎spa̱tyaṃ su̱yama̱mākṛ̍ṇuṣva |
śa̱trū̱ya̱tāma̱bhiti̍ṣṭhā̱ mahā̎ṃsi || 4 ||
a̱stve̱tu̱ rohi̍to̱ nāko̱ mahā̎ṃsi || 2 ||))

**[[2-5-3-1]]**

पुन॑र्न॒ इन्द्रो॑ म॒घवा॑ ददातु।
धना॑नि श॒क्रो धन्य॑ः सु॒राधा᳚ः।
अ॒र्वा॒चीनं॑ कृणुतां याचि॒तो मन॑ः।
श्रु॒ष्टी नो॑ अ॒स्य ह॒विषो॑ जुषा॒णः।
यानि॑ नो जि॒नन्धना॑नि।
ज॒हर्थ॑ शूर म॒न्युना᳚।
इन्द्रा॒नु॑विन्द न॒स्तानि॑।
अ॒नेन॑ ह॒विषा॒ पुन॑ः।
इन्द्र॒ आशा᳚भ्यः॒ परि॑।
सर्वा॒भ्योऽभ॑यं करत्॥ १॥

((puna̍rna̱ indro̍ ma̱ghavā̍ dadātu |
dhanā̍ni śa̱kro dhanya̍ḥ su̱rādhā̎ḥ |
a̱rvā̱cīna̍ṃ kṛṇutāṃ yāci̱to mana̍ḥ |
śru̱ṣṭī no̍ a̱sya ha̱viṣo̍ juṣā̱ṇaḥ |
yāni̍ no ji̱nandhanā̍ni |
ja̱hartha̍ śūra ma̱nyunā̎ |
indrānu̍vinda na̱stāni̍ |
a̱nena̍ ha̱viṣā̱ puna̍ḥ |
indra̱ āśā̎bhya̱ḥ pari̍ |
sarvā̱bhyo'bha̍yaṃ karat || 1 ||))

**[[2-5-3-2]]**

जेता॒ शत्रू॒न्विच॑र्षणिः।
आकू᳚त्यै त्वा॒ कामा॑य त्वा स॒मृधे᳚ त्वा।
पु॒रो द॑धे अ॒मृ॒त॒त्वाय॑ जी॒वसे᳚।
आकू॑तिम॒स्याव॑से।
काम॑मस्य॒ समृ॑द्ध्यै।
इन्द्र॑स्य युञ्ज॒ते धिय॑ः।
आकू॑तिं दे॒वीं मन॑सः पु॒रो द॑धे।
य॒ज्ञस्य॑ मा॒ता सु॒हवा॑ मे अस्तु।
यदि॒च्छामि॒ मन॑सा॒ सका॑मः।
वि॒देय॑मेन॒द्धृद॑ये॒ निवि॑ष्टम्॥ २॥

((jetā̱ śatrū̱nvica̍rṣa̱ṇiḥ |
ākū̎tyai tvā̱ kāmā̍ya tvā sa̱mṛdhe̎ tvā |
pu̱ro da̍dhe amṛ̱ta̱tvāya̍ jī̱vase̎ |
ākū̍tima̱syāva̍se |
kāma̍masya̱ samṛ̍ddhyai |
indra̍sya yuñja̱te dhiya̍ḥ |
ākū̍tiṃ de̱vīṃ mana̍saḥ pu̱ro da̍dhe |
ya̱jñasya̍ mā̱tā su̱havā̍ me astu |
yadi̱cchāmi̱ mana̍sā̱ sakā̍maḥ |
vi̱deya̍mena̱ddhṛda̍ye̱ nivi̍ṣṭam || 2 ||))

**[[2-5-3-3]]**

सेद॒ग्निर॒ग्नीꣳ रत्ये᳚त्य॒न्यान्।
यत्र॑ वा॒जी तन॑यो वी॒डुपा॑णिः।
स॒हस्र॑पाथा अ॒क्षरा॑ स॒मेति॑।
आशा॑नां त्वाऽऽशापा॒लेभ्य॑ः।
च॒तुर्भ्यो॑ अ॒मृते᳚भ्यः।
इ॒दं भू॒तस्याध्य॑क्षेभ्यः।
वि॒धेम॑ ह॒विषा॑ व॒यम्।
विश्वा॒ आशा॒ मधु॑ना॒ सꣳसृ॑जामि।
अ॒न॒मीवा आप॒ ओष॑धयो भवन्तु।
अ॒यं यज॑मानो॒ मृधो॒ व्य॑स्यताम्।
अगृ॑भीताः प॒शव॑ः सन्तु॒ सर्वे᳚।
अ॒ग्निः सोमो॒ वरु॑णो मि॒त्र इन्द्र॑ः।
बृह॒स्पति॑ः सवि॒ता यः स॑ह॒स्री।
पू॒षा नो॒ गोभि॒रव॑सा॒ सर॑स्वती।
त्वष्टा॑ रू॒पाणि॒ सम॑नक्तु य॒ज्ञैः।
त्वष्टा॑ रू॒पाणि॒ दध॑ती॒ सर॑स्वती।
पू॒षा भग॑ꣳ सवि॒ता नो॑ ददातु।
बृह॒स्पति॒र्दद॒दिन्द्र॑ः स॒हस्र᳚म्।
मि॒त्रो दा॒ता वरु॑णः॒ सोमो॑ अ॒ग्निः॥ ३॥
क॒र॒न्निवि॑ष्टमस्यतां॒ नव॑ च॥ ३॥

((seda̱gnira̱gnīṃ ratye̎tya̱nyān |
yatra̍ vā̱jī tana̍yo vī̱ḍupā̍ṇiḥ |
sa̱hasra̍pāthā a̱kṣarā̍ sa̱meti̍ |
āśā̍nāṃ tvā''śāpā̱lebhya̍ḥ |
ca̱turbhyo̍ a̱mṛte̎bhyaḥ |
i̱daṃ bhū̱tasyādhya̍kṣebhyaḥ |
vi̱dhema̍ ha̱viṣā̍ va̱yam |
viśvā̱ āśā̱ madhu̍nā̱ saṃsṛ̍jāmi |
a̱na̱mīvā āpa̱ oṣa̍dhayo bhavantu |
a̱yaṃ yaja̍māno̱ mṛdho̱ vya̍syatām |
agṛ̍bhītāḥ pa̱śava̍ḥ santu̱ sarve̎ |
a̱gniḥ somo̱ varu̍ṇo mi̱tra indra̍ḥ |
bṛ̱haspati̱ḥ savi̱tā yaḥ sa̍ha̱srī |
pū̱ṣā no̱ gobhi̱ravā̍sā̱ sara̍svatī |
tvaṣṭā̍ rū̱pāṇi̱ samā̍naktu ya̱jñaiḥ |

tvaṣṭa̍ rūpāṇi̱ dadha̍tī sara̍svatī |
pūṣā bhaga̎ṃ savi̱tā no̍ dadātu |
bṛ̱haspati̱rdada̱dindra̍ḥ sa̱hasra̎m |
mi̱tro dā̱tā varu̍ṇa̱ḥ somo̍ a̱gniḥ || 3 ||
ka̱ranniviṣṭa̍masyatā̱m nava̍ ca || 3 ||))

**[[2-5-4-1]]**

आ नो॑ भर॒ भग॑मिन्द्र द्यु॒मन्त᳚म्।
नि ते॑ दे॒ष्णस्य॑ धीमहि॒ प्ररे॒के।
उ॒र्व इ॑व पप्रथे॒ कामो॑ अ॒स्मे।
तमा॑पृणा वसुपते॒ वसू॑नाम्।
इ॒मं काम॑ मन्दया॒ गोभि॒रश्वैः॑।
च॒न्द्रव॑ता॒ राध॑सा प॒प्रथ॑श्च।
सु॒व॒र्यवो॑ म॒तिभि॒स्तुभ्यं॒ विप्राः᳚।
इन्द्रा॑य॒ वाहः॑ कुशि॒कासो॑ अक्रन्।
इन्द्र॑स्य॒ नु वी॒र्या॑णि॒ प्रवो॑चम्।
यानि॑ च॒कार॑ प्रथ॒मानि॑ व॒ज्री॥ १॥

((ā no̍ bhara̱ bhaga̍mindra dyu̱manta̎m |
ni te̍ de̱ṣṇasya̍ dhīmahi̱ prare̱ke |
u̱rva i̍va paprathe̱ kāmo̍ a̱sme |
tamā̍pṛṇā vasupate̱ vasū̍nām |
i̱maṃ kāma̍ṃ mandayā̱ gobhi̱raśvai̎ḥ |
ca̱ndrava̍tā rādha̍sā pa̱pratha̍śca |
su̱va̱ryavo̍ ma̱tibhi̱stubhya̱ṃ viprā̎ḥ |
indrā̍ya̱ vāhā̍ḥ kuśi̱kāso̍ akran |
indra̍sya̱ nu vī̱ryā̍ṇi̱ pravo̍cam |
yāni̍ ca̱kāra̍ pratha̱māni̍ va̱jrī || 1 ||))

**[[2-5-4-2]]**

अह॒न्नहि॒मन्व॒पस्त॑तर्द।
प्र व॒क्षणा॑ अभि॒नत्पर्व॑तानाम्।
अह॒न्नहिं॒ पर्व॑ते शिश्रिया॒णम्।
त्वष्टा᳚ऽस्मै॒ वज्र᳚ꣳ स्व॒र्यं᳚ ततक्ष।
वा॒श्रा इ॑व धे॒नवः॒ स्यन्द॑मानाः।
अञ्जः॑ समु॒द्रमव॑जग्मु॒रापः॑।
वृ॒षा॒यमा॑णोऽवृणीत॒ सोम᳚म्।
त्रिक॑द्रुकेष्वपिबत्सु॒तस्य॑।
आ साय॑कं म॒घवा॑ऽऽदत्त॒ वज्र᳚म्।
अह॑न्नेनं प्रथम॒जामही॑नाम्॥ २॥

((aha̱nnahi̱manva̱pasta̍tarda |
pra va̱kṣaṇa̍ abhi̱natparva̍tānām |
ahannahi̱ṃ parva̍te śiśriyā̱ṇam |
tvaṣṭā̎'smai̱ vajra̎ṃ sva̱rya̎ṃ tatakṣa |
vā̱śrā i̍va dhe̱nava̍ḥ syanda̍mānāḥ |
añja̍ḥ samu̱dramava̍jagmu̱rāpa̍ḥ |
vṛ̱ṣā̱yamā̍ṇo'vṛṇīta̱ somā̎m |
trika̍drukeṣvapibatsu̱tasya̍ |
ā sāya̍kaṃ ma̱ghavā̍''datta̱ vajra̎m |
aha̍nnenaṃ prathama̱jāmahī̍nām || 2 ||))

**[[2-5-4-3]]**

यदि॑न्द्राह॑न्प्रथम॒जामही॑नाम्।
आन्मा॒यिना॒ममि॑नाः॒ प्रोत मा॒याः।
आत्सूर्यं᳚ ज॒नय॒न्द्यामु॒षास᳚म्।
ता॒दीक्ना॒ शत्रू॒न्न किला॑विवित्से।
अह॒न्वृ॒त्रं वृ॑त्र॒तरं॒ व्यꣳस᳚म्।
इन्द्रो॒ वज्रे॑ण मह॒ता व॒धेन॑।
स्कन्धाꣳ॑सीव॒ कुलि॑शेना॒ विवृ॑क्णा।
अहिः॑ शयत उप॒पृक्पृ॑थि॒व्याम्।
अ॒यो॒ध्येव दु॒र्मद॒ आ हि जु॒ह्वे।
म॒हा॒वी॒रं तु॑ विबा॒धमृ॒जी॒षम्॥ ३॥

((yadindrāha̍nprathama̱jāmahī̍nām |
ānmā̱yinā̱mamī̍nā̱ḥ prota mā̱yāḥ |
ātsūrya̎ṃ ja̱naya̱ndyāmu̱ṣāsa̎m |
tā̱dīknā̱ śatrū̱nna kilā̍vivitse |
aha̍nvṛ̱traṃ vṛ̍tra̱tara̱ṃ vyaꣳsa̎m |
indro̱ vajre̍ṇa maha̱tā va̱dhena̍ |
skandhāꣳ̍sīva̱ kuli̍śenā̱ vivṛ̍knā |
ahi̍ḥ śayata upa̱pṛkpṛ̍thi̱vyām |
a̱yo̱dhyeva du̱rmada̱ ā hi ju̱hve |
ma̱hā̱vī̱raṃ tu̍ vibā̱dhamṛ̍jī̱ṣam || 3 ||))

**[[2-5-4-4]]**

नाता॑रीरस्य॒ समृ॑तिं व॒धाना᳚म्।
सꣳ रु॒जानाः᳚ पिपिष॒ इन्द्र॑शत्रुः।
विश्वो॒ विहा॑या अ॒रतिः।
वसु॑र्द॒धे ह॒स्ते दक्षि॑णे।
त॒रणि॒र्न शि॑श्रथत्।
श्र॒व॒स्य॑या न शि॑श्रथत्।
विश्व॑स्मा॒ इदि॑षुध्यसे।
दे॒व॒त्रा ह॒व्यमूहि॑षे।
विश्व॑स्मा॒ इत्सु॒कृते॒ वार॑मृण्वति।
अ॒ग्निर्द्वा॒रा व्यृ॑ण्वति॥ ४॥

((nātā̍rīrasya̱ samṛ̍tiṃ va̱dhānā̎m |
sa̎ṃ ru̱jānā̎ḥ pipiṣa̱ indra̍śatruḥ |
viśvo̱ vihā̍yā a̱ratiḥ |

vasu̍rdadhe̱ haste̱ dakṣi̍ṇe̱ |
ta̱ra̱ṇi̍rna śi̍śrathat |
śra̱va̱syayā̍ na śi̍śrathat |
viśva̍smā̱ idi̍ṣudhya̱se |
de̱va̱trā ha̱vyamūhi̍ṣe |
viśva̍smā̱ itsu̱kṛte̱ vāra̍mṛ̱ṇvati |
a̱gnirdvārā̱ vyṛ̍ṇvati || 4 ||))

**[[2-5-4-5]]**

उ॒दु॒ज्जिहा॑नो अ॒भिकाम॑मी॒रय॑न्।
प्र॒पृ॒ञ्चन्विश्वा॒ भुव॑नानि पू॒र्वथा॑।
आ के॒तुना॒ सु॒षमि॑द्धो॒ यजि॑ष्ठः।
कामं॑ नो अग्ने अ॒भिह॑र्य दि॒ग्भ्यः।
जु॒षा॒णो ह॒व्यम॒मृते॑षु दू॒ढ्यः॑।
आ नो॑ र॒यिं ब॑हु॒लां गोम॑ती॒मिष॑म्।
नि॒धे॑हि॒ य॒क्षद॑मृ॒ते॑षु॒ भूष॑न्।
अ॒श्वि॑ना य॒ज्ञमाग॑तम्।
दा॒शुषः॒ पु॒रु॑दꣳससा।
पू॒षा र॑क्षतु नो र॒यिम्॥ ५॥

((udu̱jjihā̍no a̱bhikāma̍mī̱raya̍n |
pra̱pṛ̱ñcanviśvā̱ bhuva̍nāni pū̱rvathā̍ |
ā ke̱tunā̱ su̱ṣami̍ddho̱ yaji̍ṣṭhaḥ |
kāma̍ṃ no agne a̱bhiha̍rya di̱gbhyaḥ |
ju̱ṣā̱ṇo ha̱vyama̱mṛte̍ṣu dū̱ḍhya̍ḥ |
ā no̍ ra̱yiṃ ba̍hu̱lāṃ goma̍tī̱miṣa̍m |
nidhe̍hi̱ yakṣa̍da̱mṛte̍ṣu̱ bhūṣa̍n |
aśvi̍nā ya̱jñamāga̍tam |
dā̱śuṣa̱ḥ puru̍daꣳsasā |
pū̱ṣā ra̍kṣatu no ra̱yim || 5 ||))

**[[2-5-4-6]]**

इ॒मं य॒ज्ञम॒श्विना॑ व॒र्धय॑न्ता।
इ॒मौ र॒यिं यज॑मानाय धत्तम्।
इ॒मौ प॒शून्रक्ष॑तां वि॒श्वतो॑ नः।
पू॒षा नः॑ पातु॒ सद॒मप्र॑युच्छन्।
प्र ते॑ म॒हे सर॑स्वति।
सुभ॑गे॒ वाजि॑नीवति।
स॒त्यवा॑चे॒ भरे म॒तिम्।
इ॒दं ते॑ ह॒व्यं घृ॒तव॑त्सरस्वति।
स॒त्यवा॑चे॒ प्रभ॑रेमा ह॒वीꣳषि॑।
इ॒मानि॑ ते दु॒रि॒ता सौभ॑गानि।
तेभि॑र्व॒यꣳ सु॒भगा॑सः स्याम॥ ६॥
व॒ज्र्यही॑नामृजी॒षं व्यृ॑ण्वति रक्षतु नो र॒यिꣳ सौभ॑गा॒न्येकं॑ च॥ ४॥

((i̱maṃ ya̱jñama̱śvinā̍ va̱rdhaya̍ntā |
i̱mau ra̱yiṃ yaja̍mānāya dhattam |
i̱mau pa̱śūnra̍kṣatāṃ vi̱śvato̍ naḥ |
pū̱ṣā na̍ḥ pātu̱ sada̱mapra̍yucchan |
pra te̍ ma̱he sa̍rasvati |
subha̍ge̱ vāji̍nīvati |
sa̱tya̱vāce̍ bhare ma̱tim |
i̱daṃ te̍ ha̱vyaṃ ghṛ̱tava̍tsarasvati |
sa̱tya̱vāce̱ prabha̍remā ha̱vīꣳṣi̍ |
i̱māni̍ te duri̱tā saubha̍gāni |
tebhi̍rva̱yaꣳ su̱bhagā̍saḥ syāma || 6 ||
va̱jryahi̍nāmṛjī̱ṣaṃ vyṛ̍ṇvati rakṣatu no ra̱yiꣳ saubha̍gā̱nyekaṃ̍ ca || 4 ||))

**[[2-5-5-1]]**

य॒ज्ञो रा॒यो य॒ज्ञ ई॑शे॒ वसू॑नाम्।
य॒ज्ञः स॒स्याना॑मु॒त सु॑क्षि॒ती॒नाम्।
य॒ज्ञ इ॒ष्टः पू॒र्वचि॑त्तिं दधातु।
य॒ज्ञो ब्रह्म॑ण्वाꣳ अप्ये॑तु दे॒वान्।
अ॒यं य॒ज्ञो व॑र्धतां॒ गोभि॒रश्वैः॑।
इ॒यं वेदिः॑ स्वप॒त्या सु॒वीरा॑।
इ॒दं ब॒र्हिरति॑ ब॒र्हीꣳष्य॒न्या।
इ॒मं य॒ज्ञं विश्वे॑ अवन्तु दे॒वाः।
भग॑ ए॒व भग॑वाꣳ अस्तु दे॒वाः।
तेन॑ व॒यं भग॑वन्तः स्याम॥ १॥

((ya̱jño rā̱yo ya̱jña ī̍śe̱ vasū̍nām |
ya̱jñaḥ sa̱syānā̍mu̱ta su̍kṣi̱tī̱nām |
ya̱jña i̱ṣṭaḥ pū̱rvaci̍ttiṃ dadhātu |
ya̱jño brahma̍ṇvāꣳ apye̍tu de̱vān |
a̱yaṃ ya̱jño va̍rdhatā̱ṃ gobhi̱raśvai̍ḥ |
i̱yaṃ vedi̍ḥ svapa̱tyā su̱vīrā̍ |
i̱daṃ ba̱rhirati̍ ba̱rhīꣳṣya̱nyā |
i̱maṃ ya̱jñaṃ viśve̍ avantu de̱vāḥ |
bhaga̍ e̱va bhaga̍vāꣳ astu devāḥ |
tena̍ va̱yaṃ bhaga̍vantaḥ syāma || 1 ||))

**[[2-5-5-2]]**

तं त्वा॑ भग॒ सर्व॒ इज्जो॑हवीमि।
स नो॑ भग पुर ए॒ता भ॑वे॒ह।
भग॒ प्रणे॑त॒र्भग॒ सत्य॑राधः।
भगे॒मां धिय॒मुद्॑वद॒दन्नः॑।
भग॒ प्रणो॑ जनय॒ गोभि॒रश्वैः॑।
भग॒ प्र नृ॒भिर्नृ॒वन्तः॑ स्याम।
शश्व॑तीः॒ समा॒ उप॑यन्ति लो॒काः।

शश्व॑तीः स॒मा उप॑यन्त्याप॑ः।
इ॒ष्टं पू॒र्त॑ꣳ शश्व॑तीना॒ꣳ॒ समा॑नाꣳ शाश्वते॒न॑।
ह॒विषे॒ष्ट्वाऽन॒न्तं लो॒कं प॒रमारु॑रोह॥ २॥

((taṃ tvȧ bhaga̱ sarva̱ ijjȯhavīmi |
sa nȯ bhaga pura e̱tā bhȧve̱ha |
bhaga̱ prane̱ta̱rbhaga̱ satyȧrādhaḥ |
bhage̱māṃ dhiya̱mudȧva̱dadȧnnaḥ |
bhaga̱ pranȯ janaya̱ gobhi̱raśvaiḥ |
bhaga̱ pra nṛbhi̱rnṛ̱vantȧḥ syāma |
śaśvȧtī̱ḥ samā̱ upȧyanti lo̱kāḥ |
śaśvȧtī̱ḥ samā̱ upȧyantyāpȧḥ |
i̱ṣṭaṃ pū̱rtam̐ śaśvȧtīnā̱m̐ samȧnām̐ śāśva̱tenȧ |
ha̱viṣe̱ṣṭvā'na̱ntaṃ lo̱kaṃ para̱mārȯroha || 2 ||))

**[[2-5-5-3]]**

इ॒यमे॒व सा या प्र॑थ॒मा व्यौच्छ॑त्।
सा रू॒पाणि॑ कुरु॒ते पञ्च॑ दे॒वी।
द्वे स्वसा॑रौ वयत॒स्तन्त्र॑मे॒तत्।
स॒ना॒तन॒ं वित॑त॒ꣳ॒ षण्म॑यूखम्।
अवा॒न्याꣳस्तन्तूꣳ॑न्किरतो॑ ध॒त्तो अ॒न्यान्।
नाव॑पृज्याते॒ न गमा॑ते॒ अन्त॑म्।
आ वो॑ यन्तूदवा॒हासो॑ अ॒द्य।
वृ॒ष्टिं ये विश्वे॑ म॒रुतो॑ जु॒नन्ति॑।
अ॒यं यो अ॒ग्निर्मरु॑त॒ः समि॑द्धः।
ए॒तं जु॑षध्वं कवयो युवानः॥ ३॥

((i̱yame̱va sā yā prȧtha̱mā vyaucchȧt |
sā rū̱pāṇi̱ kurute̱ pañcȧ de̱vī |
dve svasȧrau vayata̱stantrȧme̱tat |
sa̱nā̱tanam̱ vitȧta̱m̐ ṣaṇmȧyūkham|
avā̱nyām̐stantū̐nki̱ratȯ dha̱tto a̱nyān |
nāvȧpṛjyāte̱ na gȧmāte̱ antȧm |
ā vȯ yantūdavā̱hāsȯ a̱dya |
vṛ̱ṣṭiṃ ye viśvȧ ma̱rutȯ ju̱nanti |
a̱yaṃ yo a̱gnirmȧruta̱ḥ samiddhaḥ |
e̱taṃ jȯṣadhvaṃ kavayo yuvānaḥ || 3 ||))

**[[2-5-5-4]]**

धा॒रा॒व॒रा म॒रुतो॑ धृ॒ष्णुवो॑जसः।
मृ॒गा न भी॒मास्तवि॑षेभि॑रू॒र्मिभि॑ः।
अ॒ग्नयो॒ न शु॑शुचा॒ना ऋजी॑षिण॑ः।
भ्रुमिं॒ धम॑न्त॒ उप॒ गा अ॑वृण्वत।
वि॒च॑क्रमे॒ त्रिर्दे॑वः।
आवे॒धस॒ं नील॑पृष्ठं बृ॒हन्त॑म्।

बृ॒हस्पति॒ꣳ॒ सद॑ने सादयध्वम्।
सा॒दद्यो॑निं॒ दम॒ आदी॑दि॒वाꣳस॑म्।
हिर॑ण्यवर्णमरु॒षꣳ सप॑ेम।
स हि शुचि॑ः श॒तप॑त्र॒ः स शु॒न्ध्यूः॥ ४॥

((dhā̱rā̱va̱rā ma̱rutȯ dhṛ̱ṣṇurvȯjasaḥ |
mṛ̱gā na bhī̱māstȧvi̱ṣebhi̱rū̱rmibhi̱ḥ |
a̱gnayo̱ na śȯśucā̱nā ṛ̱jī̱ṣiṇȧḥ |
bhrumi̱ṃ dhamȧnta̱ upa̱ gā ȧvṛṇvata |
vicȧkrame̱ trirde̱vaḥ |
āve̱dhasa̱ṃ nīlȧpṛ̱ṣṭhaṃ bṛ̱hantam |
bṛ̱haspati̱m̐ sadȧne sādayadhvam |
sā̱dadyȯni̱ṃ dama̱ ādi̱di̱vām̐sam |
hirȧṇyavarṇamaru̱ṣam̐ sȧpema |
sa hi śuci̱ḥ śa̱tapȧtra̱ḥ sa śu̱ndhyūḥ || 4 ||))

**[[2-5-5-5]]**

हिर॑ण्यवाशीरिषि॒रः सु॒वर्षाः।
बृ॒हस्पति॒ः स स्वावे॒श ऋ॒ष्वाः।
पू॒रू सखि॑भ्य आ सु॒तिं करि॑ष्ठः।
पूष॒ꣳस्तव॑ व्र॒ते व॒यम्।
न रि॑ष्येम क॒दाच॒न।
स्तो॒तार॑स्त इ॒ह स्म॑सि।
यास्ते॑ पूष॒न्नावो॑ अ॒न्तः स॑मु॒द्रे।
हि॒रण्ययी॑र॒न्तरि॑क्षे॒ चर॑न्ति।
याभि॑र्यासि दू॒त्याꣳ सूर्य॑स्य।
कामे॑न कृ॒तः श्रव॑ इ॒च्छमा॑नः॥ ५॥

((hirȧṇyavāśīri̱ṣi̱raḥ sȯva̱rṣāḥ |
bṛ̱haspati̱ḥ sa svȧve̱śa ṛ̱svāḥ |
pūrū sakhi̱bhya ā su̱tiṃ kȧri̱ṣṭhaḥ |
pūṣa̱m̐stavȧ vra̱te va̱yam |
na ri̱ṣyema ka̱dāca̱na |
sto̱tārȧsta i̱ha smȧsi |
yāstȧ pū̱ṣannāvȯ a̱ntaḥ sȧmu̱dre |
hi̱ra̱ṇyayi̱rantari̱kṣe̱ carȧnti |
yābhi̱ryāsi dū̱tyām̐ sūryȧsya |
kāmȧna kṛ̱taḥ śravȧ i̱cchamȧnaḥ || 5 ||))

**[[2-5-5-6]]**

अर॑ण्या॒न्यर॑ण्यान्यसौ।
या प्रेव॒ नश्य॑सि।
क॒था ग्राम॒ं न पृ॑च्छसि।
न त्वा॒ भीरि॑व विन्दती३।
वृ॒षा॒रवा॒य वद॑ते।

यदु॒पाव॑ति चिच्चि॒कः।
आ॒घा॒टीभि॑रिव धा॒वय॑न्।
अ॒र॒ण्या॒निर्म॑हीयते।
उ॒त गाव॑ इवादन्।
उ॒तो वेश्मे॑व दृश्यते॥ ६॥

((ara̍ṇyā̱nyara̍ṇyā̱nya̱sau |
yā preva̱ naśya̍si |
ka̱thā grāma̱ṃ na pṛ̍cchasi |
na tva̱ bhīri̍va vindatī3 |
vṛ̱ṣā̱ra̱vāya̱ vada̍te |
yadu̱pāva̍ti cicci̱kaḥ |
ā̱ghā̱ṭībhi̍riva dhā̱vaya̍n |
a̱ra̱ṇyā̱nirma̍hīyate |
u̱ta gāva̍ ivādan |
u̱to veśme̍va dṛśyate || 6 ||))

**[[2-5-5-7]]**

उ॒तो अ॑रण्या॒निः सा॒यम्।
श॒कटी॑रिव सर्जति।
गाम॒ङ्गैष॒ आह्व॑यति।
दार्व॒ङ्गैष॒ उपाव॑धीत्।
वस॑न्नरण्या॒न्याꣳ सा॒यम्।
अक्रु॑क्ष॒दिति॑ मन्यते।
न वा अ॑रण्या॒निर्ह॑न्ति।
अ॒न्यश्चेन्नाभि॒गच्छ॑ति।
स्वा॒दोः फल॑स्य ज॒ग्ध्वा।
यत्र॒ काम॒ं निप॑द्यते।
आञ्ज॑नगन्धीꣳ सु॒र॒भीम्।
ब॒ह्वन्नामकृ॑षीवलाम्।
प्राहं मृ॒गाणा॒ꣳ मा॒तर॑म्।
अ॒र॒ण्या॒नीम॑शꣳसिषम्॥ ७॥
स्या॒म॒ रु॒रो॒ह॒ यु॒वा॒नः शु॒न्ध्यूरि॒च्छमा॑नो दृश्यते॒ निप॑द्यते
च॒त्वारि॑ च॥ ५॥

((u̱to a̍raṇyā̱niḥ sā̱yam |
śa̱kaṭī̍riva sarjati |
gāma̱ṅgaiṣa̱ āhva̍yati |
dārva̱ṅgaiṣa̱ upā̍vadhīt|
vasa̍nnaraṇyā̱nyām̐ sā̱yam |
akru̍kṣa̱diti̍ manyate |
na vā a̍raṇyā̱nirha̍nti |
a̱nyaścennābhi̱gaccha̍ti |
svā̱doḥ phala̍sya ja̱gdhvā |
yatra̱ kāma̱ṃ nipa̍dyate |
āñja̍nagandhīm̐ su̱ra̱bhīm |
ba̱hva̱nnāmakṛ̍ṣīvalām |
prāhaṃ mṛ̱gāṇā̱m̐ mā̱tara̍m |
a̱ra̱ṇyā̱nīma̍śam̐siṣam || 7 ||
syā̱ma̱ ru̱ro̱ha̱ yu̱vā̱na̱ḥ śu̱ndhyūri̱cchamā̍no dṛśyate̱
nipa̍dyate ca̱tvāri̍ ca || 5 ||))

**[[2-5-6-1]]**

वा॒र्त्र॑हत्याय॒ शव॑से।
पृ॒त॒ना॒साह्या॑य च।
इन्द्र॒ त्वाऽऽव॑र्तयामसि।
सु॒ब्र॒ह्माणं॑ वी॒रव॑न्तं बृ॒हन्त॑म्।
उ॒रुं ग॑भी॒रं पृ॒थुबु॑ध्नमिन्द्र।
श्रु॒तर्षि॑मु॒ग्रम॑भिमाति॒षाह॑म्।
अ॒स्मभ्य॑ं चि॒त्रं वृष॑णꣳ र॒यिं दाः॑।
क्षे॒त्रि॒यै त्वा॒ निरृ॑त्यै त्वा।
द्रु॒हो मु॑ञ्चामि॒ वरु॑णस्य॒ पाशा॑त्।
अ॒ना॒गस॒ं ब्रह्म॑णे त्वा करोमि॥ १॥

((vārtra̍hatyāya̱ śava̍se |
pṛ̱ta̱nā̱sāhya̍ya ca |
indra̱ tvā''va̍rtayāmasi |
su̱brahma̍ṇaṃ vī̱rava̍ntaṃ bṛ̱hanta̍m |
u̱ruṃ ga̍bhī̱raṃ pṛ̱thubu̍dhnamindra |
śru̱tarṣi̍mu̱grama̍bhimāti̱ṣāha̍m |
a̱smabhya̍ṃ ci̱traṃ vṛṣa̍ṇam̐ ra̱yiṃ dā̍ḥ |
kṣe̱tri̱yai tvā̱ nirṛ̍tyai tvā |
dru̱ho mu̍ñcāmi̱ varu̍ṇasya̱ pāśā̍t |
a̱nā̱gasa̱ṃ brahma̍ṇe tvā karomi || 1 ||))

**[[2-5-6-2]]**

शि॒वे ते॒ द्यावा॑पृथि॒वी उ॒भे इ॒मे।
शं ते॑ अ॒ग्निः स॒हाद्भिर॑स्तु।
शं द्यावा॑पृथि॒वी स॒हौष॑धीभिः।
शम॒न्तरि॑क्षꣳ स॒ह वाते॑न ते।
शं ते॒ चत॑स्रः प्र॒दिशो॑ भवन्तु।
या दैवी॒श्चत॑स्रः प्र॒दिशः॑।
वात॑पत्नीर॒भि सूर्यो॑ वि॒चष्टे।
तासा॑ं त्वा ज॒रस॒ आद॑धामि।
प्र यक्ष्म॑ एतु॒ निरृ॑तिं परा॒चैः।
अमो॑चि॒ यक्ष्मा॑द्दुरि॒तादव॑र्त्यै॥ २॥

((śi̱ve te̱ dyāvā̍pṛthi̱vī u̱bhe i̱me |
śaṃ te̍ a̱gniḥ sa̱hādbhira̍stu |
śaṃ dyāvā̍pṛthi̱vī sa̱hauṣa̍dhībhiḥ |

śa̱mantari̍kṣa̱m̐ sa̱ha vāte̍na te ।
śa̱ṃ te̱ catasra̍ḥ pra̱diśo̍ bhavantu ।
yā daivī̱ścata̍sraḥ pra̱diśa̍ḥ ।
vāta̍patnīra̱bhi sūryo̍ vica̱ṣṭe ।
tāsā̍m̐ tvā ja̱rasa̱ ādadhāmi ।
pra yakṣma̍ etu̱ nirṛ̍tiṃ pa̱rā̱caiḥ ।
amoci̱ yakṣmā̎ddu̱ri̱tādava̍rtyai ॥ 2 ॥))

**[[2-5-6-3]]**

द्रु॒हः पाशा॒ं निर्ऋ॑त्यै चोद॑मोचि।
अहा॒ अव॑र्ति॒मवि॑दत्स्यो॒नम्।
अप्य॑भूद्भ॒द्रे सु॑कृ॒तस्य॑ लो॒के।
सूर्य॑मृ॒तं तम॑सो ग्रा॒ह्या॒ यत्।
दे॒वा अमु॑ञ्च॒न्नसृ॑ज॒न्व्ये॑नसः।
ए॒वम॒हमि॒मं क्षे॑त्रि॒याज्जा॑मिश॒ꣳसात्।
द्रु॒हो मु॑ञ्चामि॒ वरु॑णस्य॒ पाशा॑त्।
बृह॑स्पते यु॒वमिन्द्र॑श्च॒ वस्व॑ः।
दि॒व्यस्ये॑शाथे उ॒त पार्थि॑वस्य।
ध॒त्तꣳ र॒यिꣳ स्तु॑वते॒ कीरये॑चित्॥ ३॥

((dru̱haḥ pāśā̱ṃ nirṛ̍tyai̱ codámoci ।
ahā̱ avárti̱mavi̍datsyo̱nam ।
apyábhūdbha̱dre sukṛ̍tasyá lo̱ke ।
sūryámṛ̱taṃ tamáso̱ grāhyā̱ yat ।
de̱vā amúñca̱nnasṛ̍ja̱nvyénasaḥ ।
e̱vama̱hami̱maṃ kṣe̎tri̱yājjā̍miśa̱m̐sāt ।
dru̱ho múñcāmi̱ varúṇasya̱ pāśā̎t ।
bṛhá̍spate yu̱vamindráśca̱ vasvá̍ḥ ।
di̱vyasyéśāthe u̱ta pārthi̍vasya ।
dha̱ttam̐ ra̱yim̐ stúvate̱ kī̱rayécit ॥ 3 ॥))

**[[2-5-6-4]]**

यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः।
दे॒वा॒यु॒धमिन्द्र॒माजोहु॑वानाः।
वि॒श्वा॒वृध॑म॒भि ये रक्ष॑माणाः।
येन॑ ह॒ता दी॒र्घमध्वा॑न॒मायन्॑।
अ॒नन्तमर्थ॒मनि॑वर्त्स्यमानाः।
यत्ते॑ सुजा॒ते हि॒मव॑त्सु भे॒षजम्।
म॒यो॒भूः शंत॑मा॒ यद्धृ॒दोऽसि॑।
ततो॑ नो देहि सीबले।
अ॒दो गि॒रिभ्यो॒ अधि॒ यत्प्र॒धाव॑सि।
स॒ꣳशोभ॑माना क॒न्ये॑व शुभ्रे॥ ४॥

((yūya̱ṃ pā̍ta sva̱stibhi̱ḥ sadā̍ naḥ ।
de̱vā̱yudha̱mindra̱mājohúvānāḥ ।
vi̱śvā̱vṛdhá̱ma̱bhi ye rakṣámāṇāḥ ।
yena̍ ha̱tā dīrghamadhvā̍na̱māyan̍ ।
a̱nantamartha̱mani̍vartsyamānāḥ ।
yatte̍ sujāte hi̱mava̍tsu bhe̱ṣajam ।
ma̱yo̱bhūḥ śaṃtáma̱ yaddhṛ̱do'si̍ ।
tato̍ no dehi sībale ।
a̱do gi̱ribhyo̱ adhi̱ yatpra̱dhāva̍si ।
sa̱m̐śobhámānā ka̱nyeva śubhre ॥ 4 ॥))

**[[2-5-6-5]]**

तां त्वा॒ मु॒द्ग॒ला ह॒विषा॑ वर्धयन्ति।
सा नः॑ सीबले र॒यिमाभा॑जये॒ह।
पूर्वं॑ दे॒वा अप॑रेणानु॒पश्य॒ञ्जन्म॑भिः।
जन्मा॒न्यव॑रै॒ः परा॑णि।
वेदा॑नि देवा अ॒यम॒स्मीति॒ माम्।
अ॒हꣳ हि॒त्वा शरी॑रं ज॒रस॑ः प॒रस्ता॑त्।
प्रा॒णा॒पा॒नौ चक्षु॒ः श्रोत्रा॑म्।
वाचं॒ मन॑सि॒ संभृ॑ताम्।
हि॒त्वा शरी॑रं ज॒रस॑ः प॒रस्ता॑त्।
आ भूति॒ं भूति॑ं व॒यम॑श्नवामहै।
इ॒मा ए॒व ता उ॒षसो॒ याः प्र॑थ॒मा व्यौच्छन्॑।
ता दे॒व्य॑ः कु॒र्वते॒ पञ्च॑ रू॒पा।
शश्व॑तीर्नाव॑पृज्यन्ति।
न ग॑म॒न्त्यन्ता॑म्॥ ५॥
क॒रो॒म्यव॑र्त्यै चिच्छभ्रेऽश्नवामहै च॒त्वारि॑ च॥ ६॥

((tāṃ tvā̱ mudgalā ha̱viṣā̍ vardhayanti ।
sā na̍ḥ sībale ra̱yimābhā̍jaye̱ha ।
pūrva̱ṃ de̱vā apáreṇā̱nu̱paśya̱ñjanmábhiḥ ।
janmā̱nyava̍raiḥ parā̍ṇi ।
vedā̍ni de̱vā a̱yama̱smīti̱ mām ।
a̱ham̐ hi̱tvā śarī̍raṃ ja̱rasa̍ḥ pa̱rastā̎t ।
prā̱ṇā̱pā̱nau cakṣu̱ḥ śrotrā̎m ।
vāca̱ṃ mana̍si̱ saṃbhṛ̍tām ।
hi̱tvā śarī̍raṃ ja̱rasa̍ḥ pa̱rastā̎t ।
ā bhūti̱ṃ bhūti̱ṃ va̱yama̍śnavāmahai ।
i̱mā e̱va tā u̱ṣaso̱ yāḥ prá̱tha̱mā vyaucchan̍ ।
tā de̱vya̍ḥ kurvate̱ pañca̍ rū̱pā ।
śaśva̍tīrnāva̍pṛjyanti ।
na ga̍ma̱ntyantā̎m ॥ 5 ॥
ka̱ro̱myava̍rtyai cicchabhre'śnavāmahai ca̱tvāri̍ ca ॥ 6 ॥))

**[[2-5-7-1]]**

वसू॑ना॒ं त्वाऽधी॑तेन।
रु॒द्राणा॒मूर्म्या॑।
आ॒दि॒त्याना॒ं तेज॑सा।

विश्वे॑षां दे॒वानां॒ क्रतु॑ना।
म॒रुता॑मे॒म्ना जु॑हो॒मि॒ स्वाहा᳚।
अ॒भि॒भूति॑र॒हमाग॑मम्।
इन्द्र॑सखा स्वा॒यु॑धः।
आ॒स्वाशा॑सु दु॒ष्षह॑ः।
इ॒दं वर्चो॑ अ॒ग्निना॑ द॒त्तमागा᳚त्।
यशो॒ भर्ग॒ः सह॒ ओजो॒ बलं॑ च॥ १॥

((vasu̍nām̠ tvā'dhi̍tena ।
ru̠drāṇā̍mū̠rmyā ।
ā̠di̠tyānām̠ teja̍sā ।
viśve̍ṣām̠ de̠vānām̠ kratu̍nā ।
ma̠rutā̠memnā̍ juhomi̠ svāhā̎ ।
a̠bhibhū̍tira̠hamāga̍mam ।
indra̍sakhā svā̠yudha̍ḥ ।
āsvāśa̍su du̠ṣṣaha̍ḥ ।
i̠dam̐ varco̍ a̠gninā̍ da̠ttamāgā̎t ।
yaśo̠ bharga̠ḥ saha̠ ojo̠ bala̍m̐ ca ॥ 1 ॥))

**[[2-5-7-2]]**

दी॒र्घा॒यु॒त्वाय॑ श॒तशा॑रदाय।
प्रति॑गृभ्णामि मह॒ते वी॒र्या॑य।
आयु॑रसि वि॒श्वायु॑रसि।
स॒र्वायु॑रसि॒ सर्व॒मायु॑रसि।
सर्वं॑ म॒ आयु॑र्भूयात्।
सर्व॒मायु॑र्गेषम्।
भूर्भु॒वः सुवः॑।
अ॒ग्निर्धर्मे॑णान्ना॒दः।
मृ॒त्युर्धर्मे॒णान्न॑पतिः।
ब्रह्म॑ क्ष॒त्रꣳ स्वाहा᳚॥ २॥

((dīrghā̠yu̠tvāya̍ śa̠taśā̍radāya ।
prati̍gṛbhṇāmi maha̠te vīrya̍ya ।
āyu̍rasi vi̠śvāyu̍rasi ।
sa̠rvāyu̍rasi̠ sarva̠māyu̍rasi ।
sarvam̐ ma̠ āyu̍rbhūyāt ।
sarva̠māyu̍rgeṣam ।
bhūrbhuva̠ḥ suva̍ḥ ।
a̠gnirdharme̍ṇānnā̠daḥ ।
mṛ̠tyurdharme̠ṇānna̍patiḥ ।
brahma̍ kṣa̠tram̐ svāhā̎ ॥ 2 ॥))

**[[2-5-7-3]]**

प्र॒जाप॑तिः प्रणे॒ता।
बृह॒स्पति॑ः पुर ए॒ता।
य॒मः पन्था᳚ः।
च॒न्द्रमा᳚ः पुनर॒सुः स्वाहा᳚।
अ॒ग्निर॑न्ना॒दोऽन्न॑पतिः।
अ॒न्नाद्य॑म॒स्मिन्य॒ज्ञे यज॑मानाय ददा॒तु स्वाहा᳚।
सोमो॒ राजा॒ राज॑पतिः।
रा॒ज्यम॒स्मिन्य॒ज्ञे यज॑मानाय ददा॒तु स्वाहा᳚।
वरु॑णः स॒म्राट्स॒म्राट्प॑तिः।
साम्रा᳚ज्यम॒स्मिन्य॒ज्ञे यज॑मानाय ददा॒तु स्वाहा᳚॥ ३॥

((pra̠jāpa̍tiḥ pra̠ṇe̠tā ।
bṛ̠haspati̍ḥ pura e̠tā ।
ya̠maḥ panthā̎ḥ ।
ca̠ndramā̎ḥ punara̠suḥ svāhā̎ ।
a̠gnira̍nnā̠do'nna̍patiḥ ।
a̠nnādya̍ma̠sminya̠jñe yaja̍mānāya dadātu̠ svāhā̎ ।
somo̠ rājā̠ rāja̍patiḥ ।
rā̠jyama̠sminya̠jñe yaja̍mānāya dadātu̠ svāhā̎ ।
varu̍ṇaḥ sa̠mrāṭsa̠mrāṭpa̍tiḥ ।
sāmrā̎jyama̠sminya̠jñe yaja̍mānāya dadātu̠ svāhā̎ ॥ 3 ॥))

**[[2-5-7-4]]**

मि॒त्रः क्ष॒त्रं क्ष॒त्रप॑तिः।
क्ष॒त्रम॒स्मिन्य॒ज्ञे यज॑मानाय ददा॒तु स्वाहा᳚।
इन्द्रो॒ बलं॒ बल॑पतिः।
बल॑म॒स्मिन्य॒ज्ञे यज॑मानाय ददा॒तु स्वाहा᳚।
बृह॒स्पति॒र्ब्रह्म॒ ब्रह्म॑पतिः।
ब्रह्मा॒स्मिन्य॒ज्ञे यज॑मानाय ददा॒तु स्वाहा᳚।
स॒विता रा॒ष्ट्रꣳ रा॒ष्ट्रप॑तिः।
रा॒ष्ट्रम॒स्मिन्य॒ज्ञे यज॑मानाय ददा॒तु स्वाहा᳚।
पूषा वि॒शां वि॒ट्पतिः।
वि॒श॑म॒स्मिन्य॒ज्ञे यज॑मानाय ददा॒तु स्वाहा᳚।
सर॑स्वती॒ पुष्टिः पुष्टि॑पत्नी।
पुष्टि॑म॒स्मिन्य॒ज्ञे यज॑मानाय ददा॒तु स्वाहा᳚।
त्वष्टा॑ पशू॒नां मि॑थु॒नाना॑ꣳ रू॒पकृ॒द्रूपप॑तिः।
रू॒पेणा॒स्मिन्य॒ज्ञे यज॑मानाय प॒शून्ददा॒तु स्वाहा᳚॥ ४॥
च॒ स्वाहा॒ साम्रा᳚ज्यम॒स्मिन्य॒ज्ञे यज॑मानाय ददा॒तु स्वाहा॒
वि॒श॑म॒स्मिन्य॒ज्ञे यज॑मानाय ददा॒तु स्वाहा॑ च॒त्वारि॑ च॥
७॥
अ॒ग्निः सोमो॒ वरु॑णो मि॒त्र इन्द्रो॒ बृह॒स्पति॑ः स॒वि॒ता पू॒षा

सर॑स्वती॒ त्वष्टा॒ दश॑॥

((mi̱traḥ kṣa̱traṃ kṣa̱trapa̍tiḥ ।
kṣa̱trama̱sminya̱jñe yaja̍mānāya dadātu̱ svāhā̎ ।
indro̱ bala̱ṃ bala̍patiḥ ।
bala̍ma̱sminya̱jñe yaja̍mānāya dadātu̱ svāhā̎ ।
bṛha̱spati̱rbrahma̱ brahma̍patiḥ ।
brahmā̱sminya̱jñe yaja̍mānāya dadātu̱ svāhā̎ ।
sa̱vitā rā̱ṣṭraṃ̐ rā̱ṣṭrapa̍tiḥ ।
rā̱ṣṭrama̱sminya̱jñe yaja̍mānāya dadātu̱ svāhā̎ ।
pū̱ṣā vi̱śāṃ vi̱ṭpa̍tiḥ ।
viśa̍ma̱sminya̱jñe yaja̍mānāya dadātu̱ svāhā̎ ।
sara̍svatī̱ pu̱ṣṭi̱ḥ pu̱ṣṭi̍patnī ।
pu̱ṣṭi̍ma̱sminya̱jñe yaja̍mānāya dadātu̱ svāhā̎ ।
tva̱ṣṭā̍ paśū̱nāṃ mi̍thu̱nānā̎ṃ̐ rūpa̱kṛdrū̱papa̍tiḥ ।
rū̱pe̱ṇā̱sminya̱jñe yaja̍mānāya pa̱śūnda̍dātu̱ svāhā̎ ॥ 4 ॥
ca̱ svāhā̱ sāmrā̎jyama̱sminya̱jñe yaja̍mānāya dadātu̱ svāhā̱ viśa̍ma̱sminya̱jñe yaja̍mānāya dadātu̱ svāhā̍ ca̱tvāri̍ ca ॥ 7 ॥
a̱gniḥ so̱mo varu̍ṇo mi̱tra indro̱ bṛha̱spati̍ḥ savi̱tā pū̱ṣā sara̍svatī̱ tva̱ṣṭā̱ daśa̍ ॥))

**[[2-5-8-1]]**

स ई॑ं पाहि॒ य ऋ॑जी॒षी तरु॑त्रः।
यः शिप्र॑वान्वृष॒भो यो म॑ती॒नाम्।
यो गो॑त्र॒भिद्व॑ज्र॒भृद्यो ह॑रि॒ष्ठाः।
स इ॑न्द्र चि॒त्राꣳ अ॒भितृ॑न्धि॒ वाजा॑न्।
आ ते॒ शुष्मो॑ वृष॒भ ए॑तु प॒श्चात्।
ओत्त॒राद॑ध॒रागा पु॒रस्ता॑त्।
आ वि॒श्वतो॑ अ॒भि समे॑त्व॒र्वाङ्।
इन्द्र॑ द्यु॒म्नꣳ सुव॑र्वद्धेह्य॒स्मे।
प्रोष्व॑स्मै पु॒रो र॒थम्।
इन्द्रा॑य शू॒षम॑र्चत॥ १॥

((sa īṃ̍ pāhi̱ ya ṛ̍jī̱ṣī taru̍traḥ ।
yaḥ śipra̍vānvṛṣa̱bho yo ma̍tī̱nām ।
yo gō̎tra̱bhidva̍jra̱bhṛdyo ha̍ri̱ṣṭhāḥ ।
sa i̍ndra ci̱trāṃ̐ a̱bhitṛ̍ndhi̱ vājā̍n ।
ā te̱ śuṣmo̍ vṛṣa̱bha e̍tu pa̱ścāt ।
otta̱rāda̍dha̱rāgā pu̱rastā̎t ।
ā vi̱śvato̍ a̱bhi samē̎tva̱rvāṅ ।
indra̍ dyu̱mnaṃ̐ suva̍rvaddhehya̱sme ।
proṣva̍smai puro ra̱tham ।
indrā̍ya śū̱ṣama̍rcata ॥ 1 ॥))

**[[2-5-8-2]]**

अ॒भी के॑चिदु लोक॒कृत्।
स॒ङ्गे स॒मत्सु॑ वृत्र॒हा।
अ॒स्माकं॑ बोधि चोदि॒ता।
नभ॑न्तामन्य॒केषा॑म्।
ज्या॒का अधि॒ धन्व॑सु।
इन्द्रं॑ व॒यꣳ शु॒नासी॑रम्।
अ॒स्मिन्य॒ज्ञे ह॑वामहे।
आ वाजै॒रुप॑ नो गमत्।
इन्द्रा॑य॒ शु॒नासी॑राय।
स्रु॒चा जु॑हुत नो ह॒विः॥ २॥

((a̱bhī ke̍cidu loka̱kṛt ।
sa̱ṅge sa̱matsu̍ vṛtra̱hā ।
a̱smākaṃ̍ bodhi codi̱tā ।
nabha̍ntāmanya̱keṣā̎m ।
jyā̱kā adhi̱ dhanva̍su ।
indraṃ̍ va̱yaṃ̐ śu̍nā̱sīrā̎m ।
a̱sminya̱jñe ha̍vāmahe ।
ā vājai̱rupa̍ no gamat ।
indrā̎ya̱ śunā̱sīrā̍ya ।
sru̱cā ju̍huta no ha̱viḥ ॥ 2 ॥))

**[[2-5-8-3]]**

जु॒षता॒ं प्रति॒ मेधि॑रः।
प्र ह॒व्यानि॑ घृ॒तव॑न्त्यस्मै।
हर्य॑श्वाय भरता स॒जोषा॑ः।
इन्द्र॒र्तुभि॒र्ब्रह्म॑णा वावृधा॒नः।
शु॒नासी॒री ह॒विरि॒दं जु॑षस्व।
वय॑ः सुप॒र्णा उप॑सेदु॒रिन्द्र॑म्।
प्रि॒यमे॑धा॒ ऋष॑यो॒ नाध॑मानाः।
अप॑ ध्वा॒न्तमू॑र्णु॒हि पू॒र्धि चक्षु॑ः।
मु॒मु॒ग्ध्य॑स्मान्नि॒धये॑व ब॒द्धान्।
बृ॒हदिन्द्रा॑य गायत॥ ३॥

((ju̱ṣatā̱ṃ prati̱ medhi̍raḥ ।
pra ha̱vyāni̍ ghṛ̱tava̍ntyasmai ।
harya̍śvāya bharatā sa̱joṣā̎ḥ ।
indra̱rtubhi̱rbrahma̍ṇā vāvṛ̱dhā̱naḥ ।
śu̱nā̱sī̱rī ha̱viri̱daṃ ju̍ṣasva ।
vaya̍ḥ supa̱rṇā upa̍sedu̱rindrā̎m ।
pri̱yame̍dhā̱ ṛ̱ṣa̍yo̱ nādha̍mānāḥ ।
apa̍ dhvā̱ntamū̎rṇuhi pū̱rdhi cakṣu̍ḥ ।
mu̱mu̱gdhya̍smānni̱dhaye̍va ba̱ddhān ।
bṛ̱hadindrā̍ya gāyata ॥ 3 ॥))

**[[2-5-8-4]]**

म॒रुतो॑ वृ॒त्रहन्त॑मम्।
येन॒ ज्योति॒रज॑नयन्नृता॒वृध॑ः।

दे॒वं दे॒वाय॒ जागृ॑वि॥
का मि॒हैका॒ः क इ॒मे प॑त॒ङ्गाः।
मा॒न्था॒लाः कुलि॒ परि॑ मा पतन्ति।
अना॑वृतैना॒न्प्रध॑मन्तु दे॒वाः।
सौप॑र्ण॒ं चक्षु॑स्त॒नुवा॑ विदेय।
ए॒वाव॑न्दस्व॒ वरु॑णं बृ॒हन्ता᳚म्।
न॒म॒स्या धीर॑म॒मृत॑स्य गो॒पाम्।
स न॒ः शर्म॑ त्रि॒वरू॑थं॒ विय॑ꣳसत्॥ ४॥

((maru̍to vṛtra̱hanta̍mam ।
yena̱ jyoti̱raja̍nayannṛtā̱vṛdha̍ḥ ।
de̱vaṃ de̱vāya̱ jāgṛ̍vi ॥
kā mi̱haikā̱ḥ ka i̱me pa̍ta̱ṅgāḥ ।
mānthā̱lāḥ kuli̱ pari̍ mā patanti ।
anā̍vṛtainā̱npradha̍mantu de̱vāḥ ।
saupa̍rṇa̱ṃ cakṣu̍sta̱nuvā̍ videya ।
e̱vāva̍ndasva̱ varu̍ṇaṃ bṛ̱hantā̎m ।
na̱ma̱syā dhīra̍ma̱mṛta̍sya go̱pām ।
sa na̱ḥ śarma̍ tri̱varū̍tha̱ṃ viya̍ṃsat ॥ 4 ॥))

**[[2-5-8-5]]**

यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः।
नाके॑ सुप॒र्णमुप॒ यत्पत॑न्तम्।
हृ॒दा वेन॑न्तो अ॒भ्यच॑क्षत त्वा।
हिर॑ण्यपक्ष॒ं वरु॑णस्य दू॒तम्।
य॒मस्य॒ योनौ॑ शकु॒नं भु॑र॒ण्युम्।
शं नो॑ दे॒वीर॒भिष्ट॑ये।
आपो॑ भवन्तु पी॒तये᳚।
शं योर॒भिस्र॑वन्तु नः।
ईशा॑ना॒ वार्या॑णाम्।
क्षय॑न्तीश्चर्ष॒णी॒नाम्॥ ५॥

((yūyaṃ pā̍ta sva̱stibhi̱ḥ sadā̍ naḥ ।
nāke̍ supa̱rṇamupa̱ yatpata̍ntam ।
hṛ̱dā vena̍nto a̱bhyaca̍kṣata tvā ।
hira̍ṇyapakṣa̱ṃ varu̍ṇasya dū̱tam ।
ya̱masya̱ yonau̍ śaku̱naṃ bhu̍ra̱ṇyum ।
śaṃ no̍ de̱vīra̱bhiṣṭa̍ye ।
āpo̍ bhavantu pī̱taye̎ ।
śaṃ yora̱bhisra̍vantu naḥ ।
īśā̍nā̱ vāryā̍ṇām ।
kṣaya̍ntīścarṣa̱ṇī̱nām ॥ 5 ॥))

**[[2-5-8-6]]**

अ॒पो या॑चामि भेष॒जम्।
अ॒प्सु मे॒ सोमो॑ अब्रवीत्।
अ॒न्तर्विश्वा॑नि भेष॒जा।
अ॒ग्निं च॑ वि॒श्वश॑म्भुवम्।
आप॑श्च वि॒श्वभे॑षजीः।
यद॒प्सु ते॑ सरस्वति।
गोष्वश्वे॑षु॒ यन्मधु॑।
तेन॑ मे वाजिनीवति।
मुख॑मङ्ग्धि सरस्वति।
या सर॑स्वती वैशम्भ॒ल्या॥ ६॥

((a̱po ya̍cāmi bheṣa̱jam ।
a̱psu me̱ somo̍ abravīt ।
a̱ntarviśvā̍ni bheṣa̱jā ।
a̱gniṃ ca̍ vi̱śvaśa̍mbhuvam ।
āpa̍śca vi̱śvabhe̍ṣajīḥ ।
yada̱psu te̍ sarasvati ।
goṣvaśve̍ṣu̱ yanmadhu̍ ।
tena̍ me vājinīvati ।
mukha̍maṅgdhi sarasvati ।
yā sara̍svatī vaiśambha̱lyā ॥ 6 ॥))

**[[2-5-8-7]]**

तस्यां᳚ मे रास्व।
तस्या᳚स्ते भक्षीय।
तस्या᳚स्ते भूयिष्ठ॒भाजो॑ भूयास्म।
अ॒हं त्वद॑स्मि॒ मद॑सि॒ त्वमे॒तत्।
ममा॑सि॒ योनि॒स्तव॒ योनि॑रस्मि।
ममै॒व सन्वह॑ ह॒व्यान्य॑ग्ने।
पु॒त्रः पि॒त्रे लो॑क॒कृज्जा॑तवेदः।
इ॒हैव सन्तत्र॒ सन्तं॑ त्वाऽग्ने।
प्रा॒णेन॑ वा॒चा मन॑सा बिभर्मि।
ति॒रो मा॒ सन्त॒मायु॒र्मा प्रहा॑सीत्॥ ७॥

((tasyā̎ṃ me rāsva ।
tasyā̎ste bhakṣīya ।
tasyā̎ste bhūyiṣṭha̱bhājo̍ bhūyāsma ।
a̱haṃ tvada̍smi̱ mada̍si̱ tvame̱tat ।
mamā̍si̱ yoni̱stava̱ yoni̍rasmi ।
mamai̱va sanvaha̍ ha̱vyānya̍gne ।
pu̱traḥ pi̱tre lo̍ka̱kṛjjā̍tavedaḥ ।
i̱haiva santatra̱ santa̍ṃ tvā'gne ।
prā̱ṇena̍ vā̱cā mana̍sā bibharmi ।
ti̱ro mā̱ santa̱māyu̱rmā prahā̍sīt ॥ 7 ॥))

**[[2-5-8-8]]**

ज्योति॑षा त्वा वैश्वान॒रेणोप॑तिष्ठे।
अ॒यं ते॒ योनि॑र्ऋ॒त्विय॑ः।
यतो॑ जा॒तो अरो॑चथाः।
तं जा॒नन्न॑ग्न॒ आरो॑ह।
अथा॑ नो वर्धया र॒यिम्।
या ते॑ अग्ने य॒ज्ञिया॑ त॒नूस्तये॒ह्यारो॑हा॒त्माऽऽत्मान॑म्।
अच्छा॒ वसू॑नि कृ॒ण्वन्न॒स्मे नर्या॑ पु॒रूणि॑।
य॒ज्ञो भू॒त्वा य॒ज्ञमासी॑द॒ स्वां योनि॑म्।
जात॑वेदो॒ भुव॒ आजाय॑मान॒ः सक्ष॑य॒ एहि॑।
उ॒पाव॑रोह जातवेद॒ः पुन॒स्त्वम्॥ ८॥

((jyoti̍ṣā tvā vaiśvāna̱reṇopa̍tiṣṭhe |
a̱yaṃ te̱ yoni̍rṛ̱tviya̍ḥ |
yato̍ jā̱to aro̍cathāḥ |
taṃ jā̱nanna̍gna̱ āro̍ha |
atha̍ no vardhayā ra̱yim |
yā te̍ agne ya̱jñiya̍ ta̱nūstayehyāro̍hā̱tmā''tmānā̍m |
acchā̱ vasū̍ni kṛ̱ṇvanna̱sme narya̍ pu̱rūṇi̍ |
ya̱jño bhū̱tvā ya̱jñamāsī̍da̱ svāṃ yoni̍m |
jāta̍vedo̱ bhuva̱ ājāya̍māna̱ḥ sakṣa̍ya̱ ehi̍ |
u̱pāva̍roha jātaveda̱ḥ puna̱stvam || 8 ||))

**[[2-5-8-9]]**

दे॒वेभ्यो॑ ह॒व्यं व॑ह नः प्रजा॒नन्।
आयु॑ः प्र॒जाꣳ र॒यिम॒स्मासु॑ धेहि।
अज॑स्रो दीदिहि नो दु॒रो॒णे।
तमिन्द्रं॑ जोहवीमि म॒घवा॑नमु॒ग्रम्।
स॒त्रादधा॑न॒मप्र॑तिष्कुत॒ꣳ शवाꣳ॑सि।
मꣳहि॑ष्ठो गी॒र्भिरा च॑ य॒ज्ञियो॑ऽव॒वर्त॑त्।
रा॒ये नो॒ विश्वा॑ सु॒पथा॑ कृणोतु व॒ज्री।
त्रिक॑द्रुकेषु महि॒षो यवा॑शिरं तुवि॒शुष्म॑स्तृ॒पत्।
सोम॑मपिब॒द्विष्णु॑ना सु॒तं यथाव॑शत्।
स ईं॑ ममाद॒ महि॒ कर्म॒ कर्त॑वे म॒हामु॒रुम्॥ ९॥

((de̱vebhyo̍ ha̱vyaṃ va̍ha naḥ prajā̱nan |
āyu̍ḥ pra̱jāṁ̐ ra̱yima̱smāsu̍ dhehi |
aja̍sro dīdihi no duro̱ṇe |
tamindra̍ṃ johavīmi ma̱ghava̍namu̱gram |
sa̱trādadha̍na̱maprati̍ṣkuta̱ṁ̐ śavā̍ṁ̐si |
ma̍ṁ̐hi̍ṣṭho gīrbhirā ca̍ ya̱jñiyo̍'va̱vartat |
rāye no̱ viśva̍ su̱patha̍ kṛṇotu va̱jrī |
trika̍drukeṣu mahi̱ṣo yava̍śiraṃ tuviśuṣma̍stṛpat |
soma̍mapiba̱dviṣṇu̍nā su̱taṃ yathāva̍śat |
sa īm̍ mamāda̱ mahi̱ karma̱ karta̍ve ma̱hāmu̱rum || 9 ||))

**[[2-5-8-10]]**

सैनꣳ॑ सश्चद्दे॒वं दे॒वः स॒त्यमिन्दुꣳ॑ स॒त्य इन्द्र॑ः।
वि॒दद्य॑ती स॒रमा॑ रु॒ग्णमद्रे॑ः।
महि॒ पाथ॑ः पू॒र्व्यꣳ स॒ध्रिय॑क्कः।
अग्र॑ं नयत्सु॒पद्यक्ष॑राणाम्।
अच्छा॒ रव॑ं प्रथ॒मा जा॑न॒ती गा॑त्।
वि॒दद्ग॒व्यꣳ॑ स॒रमा॑ दृ॒ढमू॒र्वम्।
येना॒ नु॒कं मानु॑षी॒ भोज॑ते॒ विट्।
आ ये विश्वा॑ स्वप॒त्यानि॑ च॒क्रुः।
कृ॒ण्वा॒नासो॑ अमृत॒त्वाय॑ गा॒तुम्।
त्वं नृ॒भिर्नृ॑पते दे॒वहू॑तौ॥ १०॥

((sainaṁ̐ saścadde̱vaṃ de̱vaḥ sa̱tyaminduṁ̐ sa̱tya indra̍ḥ |
vi̱dadyati̍ sa̱ramā̍ ru̱gṇamadre̍ḥ |
mahi̱ pātha̍ḥ pū̱rvyaṁ̐ sa̱dhriya̍kkaḥ |
agra̍ṃ nayatsu̱padyakṣa̍rāṇām |
acchā̱ rava̍ṃ pratha̱mā jā̍na̱tī gā̍t |
vi̱dadgavyaṁ̐ sa̱ramā̍ dṛ̱ḍhamū̱rvam |
yenā̱ nuka̱ṃ mānu̍ṣī̱ bhoja̍te̱ viṭ |
ā ye viśvā̍ svapa̱tyāni̍ ca̱kruḥ |
kṛ̱ṇvā̱nāso̍ amṛ̱ta̱tvāya̍ gā̱tum |
tvaṃ nṛ̱bhirnṛ̱pate de̱vahū̍tau || 10 ||))

**[[2-5-8-11]]**

भूरी॑णि वृ॒त्वा हर्य॑श्व हꣳसि।
त्वं निद॑स्युं॒ चुमु॑रिम्।
धुनि॒ं चास्वा॑पयो द॒भीत॑ये सु॒हन्तु॑।
ए॒वा पा॑हि प्र॒त्नथा॒ मन्द॑तु त्वा।
श्रु॒धि ब्रह्म॑ वावृ॒धस्वो॒त गी॒र्भिः।
आ॒विः सूर्य॑ं कृणु॒हि पी॑पिही॒षः।
ज॒हि शत्रूꣳ॑र॒भि गा इन्द्र॑ तृन्धि।
अग्ने॒ बाध॑स्व॒ वि मृधो॑ नुदस्व।
अपामी॑वा॒ अप॒ रक्षाꣳ॑सि सेध।
अ॒स्मात्स॑मु॒द्राद्बृ॑ह॒तो दि॒वो नः॥ ११॥

((bhūri̍ṇi vṛ̱tvā ha̍ryaśva haṁ̐si |
tvaṃ nida̍syuṃ̱ cumu̍rim |
dhuni̱ṃ cāsva̍payo da̱bhīta̍ye su̱hantu̍ |
e̱vā pa̍hi pra̱tnathā̱ manda̍tu tvā |
śru̱dhi brahma̍ vāvṛ̱dhasvo̱ta gīrbhiḥ |
ā̱viḥ sūrya̱ṃ kṛṇu̱hi pī̱pihī̱ṣaḥ |
ja̱hi śatrūṁ̐ra̱bhi gā i̍ndra tṛndhi |
agne̱ bādha̍sva̱ vi mṛdho̍ nudasva |

apāmi̍vā̱ apa̱ rakṣā̎ṃsi sedha |
a̱smātsa̍mu̱drādbṛ̍ha̱to di̱vo na̍ḥ || 11 ||))

**[[2-5-8-12]]**

अ॒पां भू॒मान॒मुप॑ नः सृजे॒ह ।
य॒ज्ञ प्रति॑तिष्ठ सु॒मतौ॑ सु॒शेवा॒ आ त्वा᳚ ।
वसू॑नि पु॒रु॒धा वि॑शन्तु ।
दी॒र्घमायु॒र्यज॑मानाय कृ॒ण्वन् ।
अधा॒मृते॑न जरि॒तार॑मङ्धि ।
इन्द्र॑ः शु॒नाव॒द्वित॑नोति॒ सीर᳚म् ।
सं॒व॒त्स॒रस्य॑ प्रति॒माण॑मे॒तत् ।
अ॒र्कस्य॒ ज्योति॒स्तदिदा॑स॒ ज्येष्ठ᳚म् ।
सं॒व॒त्स॒रꣳ शु॒नव॒त्सीर॑मे॒तत् ।
इन्द्र॑स्य॒ राध॒ः प्रय॑तं पु॒रु त्मना᳚ ।
तद॒र्करू॒पं वि॒मिमा॑नमेति ।
द्वाद॑शारे॒ प्रति॑तिष्ठ॒तीद्वृषा᳚ ।
अ॒श्वा॒यन्तो॑ ग॒व्यन्तो॑ वा॒जय॑न्तः ।
हवा॑महे॒ त्वोप॑गन्त॒ वा उ॑ ।
आ॒भूष॑न्तस्त्वा सु॒मतौ॒ नवा॑याम् ।
व॒यमि॑न्द्र त्वा शु॒नꣳ हु॑वेम ॥ १२ ॥
अ॒र्च॒त॒ ह॒विर्गा॑यत॒ यꣳसच्चर्षणी॒नां वैशम्भ॒ल्या हा॑सी॒त्त्वमु॒रुं दे॒वहू॑तौ न॒स्त्मना॒ षट्च॑ ॥ ८ ॥
प्रा॒ण उ॒देहि॒ पुन॒रा नो॑ भर य॒ज्ञो रा॒यो वार्त्र॑हत्याय॒ वसू॑नाꣳ स ईꣳ॑ पाह्य॒ष्टौ ॥ ८ ॥
प्रा॒णो र॑क्ष॒त्यगृ॑भीता धारा॒वरा॑ म॒रुतो॑ दी॒र्घायु॒त्वाय॒ ज्योति॑षा त्वा॒ पञ्च॑चत्वारिꣳशत् ॥ ४५ ॥

((a̱pāṃ bhū̱māna̱mupa̍ naḥ sṛje̱ha |
yajña̱ prati̍tiṣṭha suma̱tau su̱śevā̱ ā tvā̎ |
vasū̍ni puru̱dhā vi̍śantu |
dīrghamāyu̱ryaja̍mānāya kṛ̱ṇvan |
adhā̱mṛte̍na jari̱tāra̍maṅgdhi |
indra̍ḥ śu̱nāva̱dvita̍noti̱ sīrā̎m |
saṃ̱va̱tsa̱rasya̍ prati̱māṇa̍me̱tat |
a̱rkasya̱ jyoti̱stadidā̍sa̱ jyeṣṭhā̎m |
saṃ̱va̱tsa̱raꣳ śu̱nava̱tsīra̍me̱tat |
indra̍sya̱ rādha̱ḥ praya̍taṃ pu̱ru tmanā̎ |
tada̍rkarū̱paṃ vi̱mimā̍nameti |
dvāda̍śāre̱ prati̍tiṣṭha̱tīdvṛṣā̎ |
a̱śvā̱yanto̍ ga̱vyanto̍ vā̱jaya̍ntaḥ |
havā̍mahe̱ tvopa̍ganta̱ vā u̍ |
ā̱bhūṣa̍ntastvā suma̱tau navā̍yām |
va̱yami̍ndra tvā śu̱naꣳ hu̍vema || 12 ||
a̱rca̱ta̱ ha̱virgā̍yata yaꣳsaccarṣa̱ṇī̱nāṃ
vai̍śambha̱lyā hā̍sī̱ttvamu̱ruṃ de̱vahū̍tau na̱stmanā̱ ṣaṭca̍ || 8 ||
prā̱ṇa u̱dehi̱ puna̱rā no̍ bhara ya̱jño rā̱yo
vārtra̍hatyāya̱ vasū̍nā̱ꣳ sa īꣳ̍ pāhya̱ṣṭau || 8 ||
prā̱ṇo ra̍kṣa̱tyagṛ̍bhītā dhārāva̱rā ma̱ruto̍
dīrghāyu̱tvāya̱ jyoti̍ṣā tvā̱ pañca̍catvāriꣳśat || 45 ||))

# Taittirīya-Brāhmaṇa
# Book 2, Chapter 6

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[2-6-1-1]]**

स्वा॒द्वीं त्वा᳚ स्वा॒दुना᳚।
ती॒व्रां ती॒व्रेण॑।
अ॒मृता॑म॒मृते॑न।
मधु॑मतीं॒ मधु॑मता।
सृजा॑मि॒ सꣳसोमे॑न।
सोमो᳚ऽस्य॒श्विभ्यां᳚ पच्यस्व।
सर॑स्वत्यै पच्यस्व।
इन्द्रा॑य सु॒त्राम्णे॑ पच्यस्व।
परी॒तो षि॑ञ्चता सु॒तम्।
सोमो॒ य उ॑त्त॒मꣳ ह॒विः॥ १॥

((sva̱dvīm̱ tvā̎ svā̱dunā̎ ।
tī̱vrām̱ tī̱vreṇa̍ ।
a̱mṛta̍ma̱mṛte̍na ।
madhu̍matī̱m madhu̍matā ।
sṛjā̍mi̱ sam̐some̍na ।
somo̎'sya̱śvibhyā̎m̐ pacyasva ।
sara̍svatyai pacyasva ।
indrā̍ya su̱trāmṇe̍ pacyasva ।
parī̱to ṣi̍ñcatā su̱tam ।
somo̱ ya u̍tta̱mam̐ ha̱viḥ ॥ 1 ॥))

**[[2-6-1-2]]**

द॒धन्वा॒ यो नर्यो᳚ अ॒प्स्व॑न्तरा।
सु॒षाव॒ सोम॒मद्रि॑भिः।
पु॒नातु॑ ते परि॒स्रुता᳚म्।
सोम॒ꣳ सूर्य॑स्य दुहि॒ता।
वारे॑ण॒ शश्व॑ता॒ तना᳚।
वा॒युः पू॒तः प॒वित्रे॑ण।
प्राङ्ख्सोमो॒ अति॑द्रुतः।
इन्द्र॑स्य॒ युज्यः॒ सखा᳚।
वा॒युः पू॒तः प॒वित्रे॑ण।
प्र॒त्यङ्ख्सोमो॒ अति॑द्रुतः॥ २॥

((da̱dhanvā yo naryo̍ a̱psva̍ntarā ।
su̱ṣāva̱ soma̱madri̍bhiḥ ।
pu̱nātu̍ te pari̱srutā̎m ।
soma̱m̐ sūrya̍sya duhi̱tā ।
vāre̍ṇa̱ śaśva̍tā̱ tanā̎ ।
vā̱yuḥ pū̱taḥ pa̱vitre̍ṇa ।
prāṅkhsomo̱ ati̍drutaḥ ।
indra̍sya̱ yujya̱ḥ sakhā̎ ।
vā̱yuḥ pū̱taḥ pa̱vitre̍ṇa ।
pra̱tyaṅkhsomo̱ ati̍drutaḥ ॥ 2 ॥))

**[[2-6-1-3]]**

इन्द्र॑स्य॒ युज्यः॒ सखा᳚।
ब्रह्म॑ क्ष॒त्रं पव॑ते॒ तेज॑ इन्द्रि॒यम्।
सुर॑या॒ सोमः॑ सु॒त आसु॑तो॒ मदा॑य।
शु॒क्रेण॑ देव दे॒वताः᳚ पिपृग्धि।
रसे॒नान्नं॒ यज॑मानाय धेहि।
कु॒विद॒ङ्ग यव॑मन्तो॒ यवं॑ चित्।
यथा॒ दान्त्य॑नुपू॒र्वं वि॒यूय॑।
इ॒हेहै॑षां कृणुत॒ भोज॑नानि।
ये ब॒र्हिषो॒ नमो॑वृक्तिं॒ न ज॒ग्मुः।
उ॒प॒या॒मगृ॑हीतोऽस्य॒श्विभ्यां᳚ त्वा॒ जुष्टं॑ गृह्णामि॥ ३॥

((indra̍sya̱ yujya̱ḥ sakhā̎ ।
brahma̍ kṣa̱tram̱ pava̍te̱ teja̍ indri̱yam ।
sura̍yā̱ soma̍ḥ su̱ta āsu̍to̱ madā̍ya ।
śu̱kreṇa̍ deva de̱vatā̎ḥ pipṛgdhi ।
rase̱nānnam̱ yaja̍mānāya dhehi ।
ku̱vida̱ṅga yava̍manto̱ yava̍m cit ।
yathā̱ dāntya̍nupū̱rvam̱ vi̱yūya̍ ।
i̱hehai̍ṣām̱ kṛṇuta̱ bhoja̍nāni ।
ye ba̱rhiṣo̱ namo̍vṛkti̱m na ja̱gmuḥ ।
u̱pa̱yā̱magṛ̍hīto'sya̱śvibhyā̎m̐ tvā̱ juṣṭa̍m gṛhṇāmi ॥ 3 ॥))

**[[2-6-1-4]]**

सर॑स्वत्या॒ इन्द्रा॑य सु॒त्राम्णे᳚।
ए॒ष ते॒ योनि॒स्तेज॑से त्वा।
वी॒र्या॑य त्वा॒ बला॑य त्वा।
तेजो᳚ऽसि॒ तेजो॒ मयि॑ धेहि।
वी॒र्य॑मसि वी॒र्यं॑ मयि॑ धेहि।
बल॑मसि॒ बलं॒ मयि॑ धेहि।
नाना॒ हि वां᳚ दे॒वहि॑त॒ꣳ सदः॑ कृ॒तम्।
मा सꣳसृ॑क्षाथां पर॒मे व्यो॑मन्।
सुरा॒ त्वमसि॑ शु॒ष्मिणी॒ सोम॑ ए॒षः।

मा मा॑ हि॒ꣳसीः॒ स्वां योनि॑मावि॒शन्॥ ४॥

((sarasvatyā indrāya sutrāmṇe |
eṣa te yonistejase tvā |
vīryāya tvā balāya tvā |
tejo'si tejo mayi dhehi |
vīryamasi vīryaṃ mayi dhehi |
balamasi balaṃ mayi dhehi |
nānā hi vāṃ devahitaṃ sadaḥ kṛtam |
mā saṃsṛkṣāthāṃ parame vyoman |
surā tvamasi śuṣmiṇī soma eṣaḥ |
mā mā hiṃsīḥ svāṃ yonimāviśan || 4 ||))

[[2-6-1-5]]

उ॒प॒या॒मगृ॑हीतोऽस्याश्वि॒नं तेजः॑।
सा॒र॒स्व॒तं वी॒र्य॑म्।
ऐ॒न्द्रं बल॑म्।
ए॒ष ते॒ योनि॒र्मोदा॑य त्वा।
आ॒न॒न्दाय॑ त्वा॒ मह॑से त्वा।
ओजो॒ऽस्योजो॒ मयि॑ धेहि।
म॒न्युर॑सि म॒न्युं मयि॑ धेहि।
महो॑ऽसि॒ महो॒ मयि॑ धेहि।
सहो॑ऽसि॒ सहो॒ मयि॑ धेहि।
या व्या॒घ्रं विषू॑चिका।
उ॒भौ वृकं॑ च॒ रक्ष॑ति।
श्ये॒नं प॑त॒त्रिण॑ꣳ सि॒ꣳहम्।
सेमं पा॒त्वꣳह॑सः।
सं॒पृचः॑ स्थ॒ सं मा॑ भ॒द्रेण॑ पृङ्क्त।
वि॒पृचः॑ स्थ॒ वि मा॑ पा॒प्मना॑ पृङ्क्त॥ ५॥
ह॒विः प्र॒त्यङ्ख्सोमो॒ अति॑द्रुतो गृ॒ह्णाम्यावि॒शन्विषू॑चिका॒ पञ्च॑ च॥ १॥

((upayāmagṛhīto'syāśvinaṃ tejaḥ |
sārasvataṃ vīryam |
aindraṃ balam |
eṣa te yonirmodāya tvā |
ānandāya tvā mahase tvā |
ojo'syojo mayi dhehi |
manyurasi manyuṃ mayi dhehi |
maho'si maho mayi dhehi |
saho'si saho mayi dhehi |
yā vyāghraṃ viṣūcikā |
ubhau vṛkaṃ ca rakṣati |
śyenaṃ patatriṇaṃ siṃham |
semaṃ pātvaṃhasaḥ |
saṃpṛcaḥ stha saṃ mā bhadreṇa pṛṅkta |
vipṛcaḥ stha vi mā pāpmanā pṛṅkta || 5 ||
haviḥ pratyaṅkhsomo atidruto
gṛhṇāmyāviśanviṣūcikā pañca ca || 1 ||))

[[2-6-2-1]]

सोमो॒ राजा॒ऽमृत॑ꣳ सु॒तः।
ऋ॒जी॒षेणा॑जहान्मृ॒त्युम्।
ऋ॒तेन॑ स॒त्यमि॑न्द्रि॒यम्।
वि॒पान॑ꣳ शु॒क्रमन्ध॑सः।
इन्द्र॑स्येन्द्रि॒यम्।
इ॒दं पयो॒ऽमृतं॒ मधु॑।
सोम॑म॒द्भ्यो व्य॑पिबत्।
छन्द॑सा ह॒ꣳसः शु॑चि॒षत्।
ऋ॒तेन॑ स॒त्यमि॑न्द्रि॒यम्।
अ॒द्भ्यः क्षी॒रं व्य॑पिबत्॥ १॥

((somo rājā'mṛtaṃ sutaḥ |
ṛjīṣeṇājahānmṛtyum |
ṛtena satyamindriyam |
vipānaṃ śukramandhasaḥ |
indrasyendriyam |
idaṃ payo'mṛtaṃ madhu |
somamadbhyo vyapibat |
chandasā haṃsaḥ śuciṣat |
ṛtena satyamindriyam |
adbhyaḥ kṣīraṃ vyapibat || 1 ||))

[[2-6-2-2]]

क्रुङ्ङा॑ङ्गि॒रसो॒ धि॒या।
ऋ॒तेन॑ स॒त्यमि॑न्द्रि॒यम्।
अन्ना॑त्परि॒स्रुतो॒ रस॑म्।
ब्रह्म॑णा॒ व्य॑पिबत्क्ष॒त्त्रम्।
ऋ॒तेन॑ स॒त्यमि॑न्द्रि॒यम्।
रेतो॒ मूत्रं॒ विज॑हाति।
योनिं॑ प्रवि॒शदि॑न्द्रि॒यम्।
गर्भो॑ ज॒रायु॒णाऽऽवृ॑तः।
उल्बं॑ जहाति॒ जन्म॑ना।
ऋ॒तेन॑ स॒त्यमि॑न्द्रि॒यम्॥ २॥

((kruṅṅāṅgiraso dhiyā |
ṛtena satyamindriyam |
annātparisruto rasam |
brahmaṇā vyapibatkṣattram |
ṛtena satyamindriyam |
reto mūtraṃ vijahāti |
yoniṃ praviśadindriyam |

garbhȍ ja̱rāyu̱ṇā''vṛ̍taḥ ।
ulba̍ṃ jahāti̱ janma̍nā ।
ṛ̱tena̍ sa̱tyami̍ndri̱yam ॥ 2 ॥))

**[[2-6-2-3]]**

वेदे॑न रू॒पे व्य॑करोत् ।
स॒ता॒स॒ती प्र॒जाप॑तिः ।
ऋ॒तेन॑ स॒त्यमि॑न्द्रि॒यम् ।
सोमे॑न॒ सोमौ॒ व्य॑पिबत् ।
सु॒ता॒सु॒तौ प्र॒जाप॑तिः ।
ऋ॒तेन॑ स॒त्यमि॑न्द्रि॒यम् ।
दृ॒ष्ट्वा रू॒पे व्याक॑रोत् ।
स॒त्या॒नृ॒ते प्र॒जाप॑तिः ।
अश्र॑द्धा॒मनृ॑ते॒ऽद॑धात् ।
श्र॒द्धाꣳ स॒त्ये प्र॒जाप॑तिः ।
ऋ॒तेन॑ स॒त्यमि॑न्द्रि॒यम् ।
दृ॒ष्ट्वा प॑रि॒स्रुतो॒ रसँ॑म् ।
शु॒क्रेण॑ शु॒क्रं व्य॑पिबत् ।
पयः॒ सोमं॑ प्र॒जाप॑तिः ।
ऋ॒तेन॑ स॒त्यमि॑न्द्रि॒यम् ।
वि॒पान॑ꣳ शु॒क्रमन्ध॑सः ।
इन्द्र॑स्येन्द्रि॒यम् ।
इ॒दं पयो॒ऽमृतं॒ मधु॑ ॥ ३ ॥
अ॒द्भ्यः क्षी॒रं व्य॑पिब॒ज्जन्म॑न॒र्तेन॑ स॒त्यमि॑न्द्रि॒यꣳ॒ श्र॒द्धाꣳ स॒त्ये प्र॒जाप॑तिर॒ष्टौ च॑ ॥ २ ॥
सोमो॒ राजा॒ वि॒पान॒ꣳ॒ सोम॑म॒द्भ्योऽन्ना॒द्रेतो॒ मूत्रं॒ वेदे॑न स॒ता॒स॒ती सोमे॑न सु॒ता॒सु॒तौ दृ॒ष्ट्वा रू॒पे दृ॒ष्ट्वा प॑रि॒स्रुता॒ रसं॒ वि॒पानं॒ दश॑ ॥

((vedėna rū̱pe vyȧkarot।
sa̱tā̱sa̱tī pra̱jāpȧtiḥ ।
ṛ̱tenȧ sa̱tyami̍ndri̱yam ।
somėna̱ somau̱ vyȧpibat ।
su̱tā̱su̱tau pra̱jāpȧtiḥ ।
ṛ̱tenȧ sa̱tyami̍ndri̱yam ।
dṛ̱ṣṭvā rū̱pe vyākȧrot ।
sa̱tyā̱nṛ̱te pra̱jāpȧtiḥ ।
aśrȧddhā̱manṛ̍te'dȧdhāt ।
śra̱ddhā̐ sa̱tye pra̱jāpȧtiḥ ।
ṛ̱tenȧ sa̱tyami̍ndri̱yam ।
dṛ̱ṣṭvā pȧri̱sruto̱ rasa̐m ।
śu̱kreṇȧ śu̱kra̱ṃ vyȧpibat ।
paya̱ḥ soma̍ṃ pra̱jāpȧtiḥ ।
ṛ̱tenȧ sa̱tyami̍ndri̱yam ।
vi̱pāna̐ṃ śu̱kramandhȧsaḥ ।
indrȧsyendri̱yam ।
i̱daṃ payo̱'mṛta̱ṃ madhu̍ ॥ 3 ॥
a̱dbhyaḥ kṣī̱raṃ vyȧpiba̱jjanmȧna̱rtenȧ sa̱tyami̍ndri̱ya̱̐ṃ śra̱ddhā̐ sa̱tye pra̱jāpȧtira̱ṣṭau cȧ ॥ 2 ॥
somo̱ rājā̱ vipāna̱̐ṃ somȧma̱dbhyo'nnā̱dreto̱ mūtra̱ṃ vedėna satāsa̱tī somėna sutāsu̱tau dṛ̱ṣṭvā rū̱pe dṛ̱ṣṭvā pȧri̱srutā̱ rasa̱ṃ vipāna̱ṃ daśȧ ॥))

**[[2-6-3-1]]**

सु॒राव॑न्तं ब॒र्हि॒षद॑ꣳ सु॒वीरँ॑म् ।
य॒ज्ञꣳ हि॑न्वन्ति महि॒षा नमो॑भिः ।
दधा॑नाः॒ सोमं॑ दि॒वि दे॒वता॑सु ।
मदे॒मेन्द्रं॒ यज॑मानाः॒ स्व॒र्काः ।
यस्ते॒ रसः॒ संभृ॑त॒ ओष॑धीषु ।
सोम॑स्य॒ शुष्मः॒ सुर॑या सु॒तस्य॑ ।
तेन॑ जि॒न्व यज॑मानं॒ मदे॑न ।
सर॑स्वतीम॒श्विना॒विन्द्र॑म॒ग्निम् ।
यम॒श्विना॒ नमु॑चेरासु॒रादधि॑ ।
सर॑स्व॒त्यस॑नोदिन्द्रि॒याय॑ ॥ १ ॥

((surȧvanta̱ṃ barhi̱ṣada̐ṃ su̱vīra̐m ।
ya̱jña̐ṃ hi̍nvanti mahi̱ṣā namȯbhiḥ ।
dadhȧnā̱ḥ soma̍ṃ di̱vi de̱vatȧsu ।
made̱mendra̱ṃ yajȧmānā̱ḥ sva̱rkāḥ ।
yaste̱ rasa̱ḥ saṃbhṛ̍ta̱ oṣȧdhīṣu ।
somȧsya̱ śuṣma̱ḥ surȧyā su̱tasyȧ ।
tenȧ ji̱nva yajȧmāna̱ṃ madėna ।
sarȧsvatīma̱śvinā̱vindrȧma̱gnim ।
yama̱śvinā̱ namu̍cerāsu̱rādadhi̍ ।
sarȧsva̱tyasȧnodindri̱yāyȧ ॥ 1 ॥))

**[[2-6-3-2]]**

इ॒मं तꣳ शु॒क्रं मधु॑मन्त॒मिन्दुँ॑म् ।
सोम॒ꣳ॒ राजा॑नमि॒ह भ॑क्षयामि ।
यदत्र॑ रि॒प्तꣳ र॒सिनः॑ सु॒तस्य॑ ।
यदिन्द्रो॒ अपि॑ब॒च्छची॑भिः ।
अ॒हं तद॑स्य॒ मन॑सा शि॒वेन॑ ।
सोम॒ꣳ॒ राजा॑नमि॒ह भ॑क्षयामि ।
पि॒तृभ्यः॑ स्वधा॒विभ्यः॑ स्व॒धा नमः॑ ।
पि॒ता॒म॒हेभ्यः॑ स्वधा॒विभ्यः॑ स्व॒धा नमः॑ ।
प्रपि॑तामहेभ्यः स्वधा॒विभ्यः॑ स्व॒धा नमः॑ ।
अक्ष॑न्पि॒तरः॑ ॥ २ ॥

((imaṃ taṁ śukraṃ madhúmantamindúm ।
somaṁ rājánamiha bhákṣayāmi ।
yadatrá riptaṁ rasináḥ sutasyá ।
yadindro apíbacchacíbhiḥ ।
ahaṃ tadásya manásā śivená ।
somaṁ rājánamiha bhákṣayāmi ।
pitṛbhyáḥ svadhāvibhyáḥ svadhā namáḥ ।
pitāmahebhyáḥ svadhāvibhyáḥ svadhā namáḥ ।
prapitāmahebhyaḥ svadhāvibhyáḥ svadhā namáḥ ।
akṣánpitaráḥ ॥ 2 ॥))

**[[2-6-3-3]]**

अमीमदन्त पितरः।
अतीतृपन्त पितरः।
अमीमृजन्त पितरः।
पितरः शुन्धध्वम्।
पुनन्तु मा पितरः सोम्यासः।
पुनन्तु मा पितामहाः।
पुनन्तु प्रपितामहाः।
पवित्रेण शतायुषा।
पुनन्तु मा पितामहाः।
पुनन्तु प्रपितामहाः॥ ३॥

((amīmádanta pitaráḥ ।
atítṛpanta pitaráḥ ।
amímṛjanta pitaráḥ ।
pitáraḥ śundhádhvam ।
punantú mā pitaráḥ somyāsáḥ ।
punantú mā pitāmaháḥ ।
punantu prapitāmahāḥ ।
pavitréṇa śatāyúṣā ।
punantú mā pitāmahāḥ ।
punantu prapitāmahāḥ ॥ 3 ॥))

**[[2-6-3-4]]**

पवित्रेण शतायुषा।
विश्वमायुर्व्यश्नवै।
अग्न आयूꣳषि पवसेऽग्ने पवस्व।
पवमानः सुवर्जनः पुनन्तु मा देवजनाः।
जातवेदः पवित्रवद्यत्ते पवित्रमर्चिषि।
उभाभ्याँ देव सवितर्वैश्वदेवी पुनती।
ये समानाः समनसः।
पितरो यमराज्ये।
तेषाँ लोकः स्वधा नमः।
यज्ञो देवेषु कल्पताम्॥ ४॥

((pavitréṇa śatāyúṣā ।
viśvamāyurvyáśnavai ।
agna āyūṁṣi pavase'gne pavásva ।
pavámānaḥ suvarjanáḥ punantú mā devajanāḥ ।
jātávedaḥ pavitrávadyatté pavitrámarciṣi ।
ubhābhyāṁ deva savitarvaiśvadevī púnatī ।
ye sámānāḥ samánasaḥ ।
pitaró yamarājyë ।
teṣāṁ lokaḥ svadhā namáḥ ।
yajño deveṣú kalpatām ॥ 4 ॥))

**[[2-6-3-5]]**

ये सजाताः समनसः।
जीवा जीवेषु मामकाः।
तेषाꣳ श्रीर्मयि कल्पताम्।
अस्मिँल्लोके शतꣳ समाः।
द्वे स्रुती अश्रृणवं पितृणाम्।
अहं देवानामुत मर्त्यानाम्।
याभ्यामिदं विश्वमेजत्समेति।
यदन्तरा पितरं मातरं च।
इदꣳ हविः प्रजननं मे अस्तु।
दशवीरꣳ सर्वगणꣳ स्वस्तये।
आत्मसनि प्रजासनि।
पशुसन्यभयसनि लोकसनि।
अग्निः प्रजां बहुलां मे करोतु।
अन्नं पयो रेतो अस्मासु धत्त।
रायस्पोषमिषमूर्जमस्मासु दीधरत्स्वाहा॥ ५॥
इन्द्रियाय पितरः शतायुषा पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः कल्पताꣳ स्वस्तये पञ्च च॥ ३॥

((ye sájātāḥ samánasaḥ ।
jīvā jīveṣú māmakāḥ ।
teṣāṁ śrīrmayí kalpatām ।
asmiṁlloke śataṁ samāḥ ।
dve srutī áśṛṇavaṃ pitṛṇām ।
ahaṃ devānámuta martyánām ।
yābhyámidaṃ viśvamejatsaméti ।
yadántarā pitaraṃ mātaraṃ ca ।
idaṁ haviḥ prajananaṃ me astu ।
daśávīraṁ sarvagáṇaṁ svastayë ।
ātmasaní prajāsaní ।
paśusanyábhayasaní lokasaní ।
agniḥ prajāṃ báhulāṃ mé karotu ।
annaṃ payo retó asmāsú dhatta ।
rāyaspoṣamiṣamúrjamasmāsú dīdharatsvāhā ॥ 5 ॥

i̱ndri̱yāya̍ pi̱tara̍ḥ śa̱tāyu̍ṣā pu̱nantu̍ mā pitāma̱hāḥ pu̱nantu̱ prapi̍tāmahāḥ kalpatām̐ sva̱staye̱ pañca̍ ca ॥ 3 ॥))

**[[2-6-4-1]]**

सीसे॑न॒ तन्त्रं॒ मन॑सा मनी॒षिण॑ः।
उ॒र्णा॒सू॒त्रेण॑ क॒वयो॑ वयन्ति।
अ॒श्विना॑ य॒ज्ञꣳ स॑वि॒ता सर॑स्वती।
इन्द्र॑स्य रू॒पं वरु॑णो भि॒षज्यन्।
तद॑स्य रू॒पम॒मृत॒ꣳ शची॑भिः।
ति॒स्रो द॑धुर्दे॒वता᳚ः सꣳररा॒णाः।
लोमा॑नि॒ शष्पै᳚र्बहु॒धा न तोक्म॑भिः।
त्वग॑स्य मा॒ꣳसम॑भव॒न्न ला॒जाः।
तद॒श्विना॑ भि॒षजा॑ रु॒द्रव॑र्तनी।
सर॑स्वती वयति॒ पेशो॒ अन्त॑रः॥ १॥

((sīse̍na̱ tantra̱m mana̍sā manī̱ṣiṇa̍ḥ ।
u̱rṇā̱sū̱treṇa̍ ka̱vayo̍ vayanti ।
a̱śvina̍ ya̱jñam̐ sa̍vi̱tā sara̍svatī ।
indra̍sya rū̱paṃ varu̍ṇo bhi̱ṣajyan ।
tada̍sya rū̱pama̱mṛta̱m̐ śacī̍bhiḥ ।
ti̱sro da̍dhurde̱vatā̎ḥ sam̐rarā̱ṇāḥ ।
lomā̍ni̱ śaṣpai̎rbahu̱dhā na tokma̍bhiḥ ।
tvaga̍sya mā̱m̐sama̍bhava̱nna lā̱jāḥ ।
tada̱śvinā̍ bhi̱ṣajā̍ ru̱drava̍rtanī ।
sara̍svatī vayati̱ peśo̱ anta̍raḥ ॥ 1 ॥))

**[[2-6-4-2]]**

अस्थि॑ म॒ज्जानं॒ मास॑रैः।
का॒रो॒त॒रे॒ण॒ दध॑तो॒ गवां᳚ त्व॒चि।
सर॑स्वती॒ मन॑सा पे॒शलं॒ वसु॑।
नास॑त्याभ्यां वयति दर्श॒तं वपु॑ः।
रसं॑ परि॒स्रुता॒ न रोहि॑तम्।
न॒ग्नहु॒र्धीर॒स्तस॑रं॒ न वेम॑।
पय॑सा शु॒क्रम॒मृतं॑ ज॒नित्र᳚म्।
सुर॑या मू॒त्रा᳚ज्जनयन्ति॒ रेत॑ः।
अपाम॑तिं दु॒र्मतिं॒ बाध॑मानाः।
ऊव॑ध्यं॒ वात॒ꣳ᳚ स॒बुवं॒ तदा॒रात्॥ २॥

((asthi̍ ma̱jjāna̱ṃ māsa̍raiḥ ।
kā̱ro̱ta̱re̱ṇa̱ dadha̍to̱ gavā̎m̐ tva̱ci ।
sara̍svatī̱ mana̍sā pe̱śala̱ṃ vasu̍ ।
nāsa̍tyābhyāṃ vayati darśa̱taṃ vapu̍ḥ ।
rasa̍ṃ pari̱srutā̱ na rohi̍tam ।
na̱gnahu̱rdhīra̱stasa̍ra̱ṃ na vema̍ ।
paya̍sā śu̱krama̱mṛta̱ṃ ja̱nitra̎m ।
sura̍yā mū̱trā̎jjanayanti̱ reta̍ḥ ।
apāma̍tiṃ durma̱tiṃ bādha̍mānāḥ ।
ūva̍dhya̱ṃ vāta̎m̐ sa̱buva̱ṃ tadā̱rāt ॥ 2 ॥))

**[[2-6-4-3]]**

इन्द्र॑ः सु॒त्रामा॒ हृद॑येन स॒त्यम्।
पु॒रो॒डाशे॑न सवि॒ता ज॑जान।
यकृ॑त्क्लो॒मानं॒ वरु॑णो भि॒षज्यन्।
मत॑स्ने वाय॒व्यै᳚र्न मि॑नाति पि॒त्तम्।
आ॒न्त्राणि॑ स्था॒ली मधु॒ पिन्व॑माना।
गु॒दा॒ पात्रा॑णि सु॒दुघा॒ न धे॒नुः।
श्ये॒नस्य॒ पत्रं॒ न प्ली॒हा शची॑भिः।
आ॒स॒न्दी नाभि॑रु॒दरं॒ न मा॒ता।
कु॒म्भो व॑नि॒ष्ठुर्ज॑नि॒ता शची॑भिः।
यस्मि॒न्नग्रे॒ योन्यां॒ गर्भो॑ अ॒न्तः॥ ३॥

((indra̍ḥ su̱trāmā̱ hṛda̍yena sa̱tyam ।
pu̱ro̱ḍāśe̍na savi̱tā ja̍jāna ।
yakṛ̍tklo̱māna̱ṃ varu̍ṇo bhi̱ṣajyan ।
mata̍sne vāya̱vyai̎rna mi̍nāti pi̱ttam ।
ā̱ntrāṇi̍ sthā̱lī madhu̱ pinva̍mānā ।
gu̱dā̱ pātrā̍ṇi su̱dughā̱ na dhe̱nuḥ ।
śye̱nasya̱ patra̱ṃ na plī̱hā śacī̍bhiḥ ।
ā̱sa̱ndī nābhi̍ru̱dara̱ṃ na mā̱tā ।
ku̱mbho va̍ni̱ṣṭhurja̍ni̱tā śacī̍bhiḥ ।
yasmi̱nnagre̱ yonyā̱ṃ garbho̍ a̱ntaḥ ॥ 3 ॥))

**[[2-6-4-4]]**

प्ला॒शीर्व्य॑क्तः श॒तधा॑र॒ उत्स॑ः।
दु॒हे न कु॒म्भीꣳ᳚ स्व॒धां पि॒तृभ्य॑ः।
मु॒खꣳ॒ सद॑स्य॒ शिर॒ इत्सदे॑न।
जि॒ह्वा प॒वित्र॑म॒श्विना॒ सꣳ सर॑स्वती।
चप्यं॒ न पा॒युर्भि॒षग॑स्य॒ वाला॑ः।
व॒स्तिर्न शेपो॒ हर॑सा तर॒स्वी।
अ॒श्विभ्यां॒ चक्षु॑रमृतं॒ ग्रहा᳚भ्याम्।
छागे॑न॒ तेजो॑ ह॒विषा॑ शृ॒तेन॑।
पक्ष्मा॑णि गो॒धूमै॑ः कुव॑लैरु॒तानि॑।
पेशो॒ न शु॒क्लमसि॑तं वसाते॥ ४॥

((plā̱śīrvya̍ktaḥ śa̱tadhā̎ra̱ utsa̍ḥ ।
du̱he na ku̱mbhīm̐ sva̱dhāṃ pi̱tṛbhya̍ḥ ।
mu̱kha̱m̐ sada̍sya̱ śira̱ itsade̍na ।
ji̱hvā pa̱vitra̍ma̱śvinā̱ sam̐ sara̍svatī ।
capya̱ṃ na pā̱yurbhi̱ṣaga̍sya̱ vālā̍ḥ ।

va̱stirna śepo̱ hara̍sā tara̱svī ।
a̱śvibhyā̱m̐ cakṣu̍ra̱mṛta̱m̐ graha̎bhyām ।
chāge̍na̱ tejo̍ ha̱viṣā̍ śṛ̱tena̍ ।
pakṣmā̍ṇi go̱dhūmai̱ḥ kva̍lairu̱tāni̍ ।
peśo̱ na śu̱klamasi̍taṃ vasāte ॥ 4 ॥))

**[[2-6-4-5]]**

अवि॒र्न मे॒षो न॒सि वी॒र्या॑य।
प्रा॒णस्य॒ पन्था॑ अ॒मृतो॒ ग्रहा᳚भ्याम्।
सर॑स्वत्युपवा॒कैर्व्या॒नम्।
नस्या॑नि ब॒र्हिर्बद॑रैर्जजान।
इन्द्र॑स्य रू॒पमृ॑ष॒भो बला॑य।
कर्णा᳚भ्या॒ꣳ॒ श्रोत्र॑म॒मृतं॒ ग्रहा᳚भ्याम्।
यवा॒ न ब॒र्हिर्भ्रु॒वि केस॑राणि।
क॒र्कन्धु॑ जज्ञे॒ मधु॑ सार॒घं मुखा᳚त्।
आ॒त्मन्नु॒पस्थे॒ न वृक॑स्य॒ लोम॑।
मुखे॒ श्मश्रू॑णि॒ न व्या᳚घ्रलो॒मम्॥ ५॥

((avi̱rna me̱ṣo na̱si vī̱ryā̍ya ।
prā̱ṇasya̱ panthā̍ a̱mṛto̱ grahā̎bhyām ।
sara̍svatyupa̱vākai̍rvyā̱nam ।
nasyā̍ni ba̱rhirbada̍rairjajāna ।
indra̍sya rū̱pamṛ̍ṣa̱bho balā̍ya ।
karṇā̎bhyā̱m̐ śrotra̍ma̱mṛta̱ṃ grahā̎bhyām ।
yavā̱ na ba̱rhirbhru̱vi kesa̍rāṇi ।
ka̱rkandhu̍ jajñe̱ madhu̍ sāra̱ghaṃ mukhā̎t ।
ā̱tmannu̱pasthe̱ na vṛka̍sya̱ loma̍ ।
mukhe̱ śmaśrū̍ṇi̱ na vyā̎ghralo̱mam ॥ 5 ॥))

**[[2-6-4-6]]**

केशा॒ न शी॒र्षन्यश॑से श्रि॒यै शिखा᳚।
सि॒ꣳ॒हस्य॒ लोम॒ त्विषि॑रिन्द्रि॒याणि॑।
अङ्गा᳚न्यात्मन्भि॒षजा॒ तद॒श्विना᳚।
आ॒त्मान॒मङ्गैः॒ सम॑धा॒त्सर॑स्वती।
इन्द्र॑स्य रू॒पꣳ श॒तमा॑न॒मायुः॑।
च॒न्द्रेण॒ ज्योति॑र॒मृतं॒ दधा॑ना।
सर॑स्वती॒ योन्यां॒ गर्भ॑म॒न्तः।
अ॒श्विभ्यां॒ पत्नी॒ सुकृ॑तं बिभर्ति।
अ॒पाꣳ रसे॑न॒ वरु॑णो॒ न साम्ना᳚।
इन्द्रꣳ॑ श्रि॒यै ज॒नय॑न्न॒प्सु राजा᳚।
तेज॑ः प॒शूना॒ꣳ॒ ह॒विरि॑न्द्रि॒याव॑त्।
प॒रि॒स्रु॒ता पय॑सा सार॒घं मधु॑।
अ॒श्विभ्या᳚ं दु॒ग्धं भि॒षजा॒ सर॑स्वत्या सुतासु॒ताभ्या᳚म्।
अ॒मृत॒ः सोम॒ इन्दु॑ः॥ ६॥
अन्त॑र आ॒राद॒न्तर्व॑साते व्याघ्रलो॒मꣳ राजा॑ च॒त्वारि॑ च॥ ४॥

((keśā̱ na śī̱rṣanyaśa̍se śri̱yai śikhā̎ ।
si̱m̐hasya̱ loma̱ tviṣi̍rindri̱yāṇi̍ ।
aṅgā̎nyā̱tmanbhi̱ṣajā̱ tada̱śvinā̎ ।
ā̱tmāna̱maṅgai̱ḥ sama̍dhā̱tsara̍svatī ।
indra̍sya rū̱pam̐ śa̱tamā̍na̱māyu̍ḥ ।
ca̱ndreṇa̱ jyoti̍ra̱mṛta̱ṃ dadhā̍nā ।
sara̍svatī̱ yonyā̱ṃ garbha̍ma̱ntaḥ ।
a̱śvibhyā̱ṃ patnī̱ sukṛ̍taṃ bibharti ।
a̱pām̐ rase̍na̱ varu̍ṇo̱ na sāmnā̎ ।
indra̍m̐ śri̱yai ja̱naya̍nna̱psu rājā̎ ।
teja̍ḥ pa̱śūnā̱m̐ ha̱viri̍ndri̱yāva̍t ।
pa̱risrutā̱ paya̍sā sāra̱ghaṃ madhu̍ ।
a̱śvibhyā̎m̐ du̱gdhaṃ bhi̱ṣajā̱ sara̍svatyā
sutāsu̱tābhyā̎m ।
a̱mṛta̱ḥ soma̱ indu̍ḥ ॥ 6 ॥
anta̍ra ā̱rāda̱ntarva̍sāte vyāghralo̱mam̐ rājā̍ ca̱tvāri̍
ca ॥ 4 ॥))

**[[2-6-5-1]]**

मि॒त्रो॑ऽसि॒ वरु॑णोऽसि।
सम॒हं विश्वै᳚र्दे॒वैः।
क्ष॒त्त्रस्य॒ नाभि॑रसि।
क्ष॒त्त्रस्य॒ योनि॑रसि।
स्यो॒ना मा सी॑द।
सु॒षदा॒ मा सी॑द।
मा त्वा॑ हि॒ꣳ॒सीत्।
मा मा॑ हि॒ꣳ॒सीत्।
नि॒षसा॑द धृ॒तव्र॑तो॒ वरु॑णः।
प॒स्त्या᳚स्वा॥ १॥

((mi̱tro̍'si̱ varu̍ṇo'si ।
sama̱haṃ vi̎śvairde̱vaiḥ ।
kṣa̱ttrasya̱ nābhi̍rasi ।
kṣa̱ttrasya̱ yoni̍rasi ।
syo̱nā mā sī̍da ।
su̱ṣadā̱ mā sī̍da ।
mā tvā̍ hi̱m̐sīt ।
mā mā̍ hi̱m̐sīt।
ni̱ṣasā̍da dhṛ̱tavra̍to̱ varu̍ṇaḥ ।
pa̱styā̎svā ॥ 1 ॥))

**[[2-6-5-2]]**

साम्रा᳚ज्याय सु॒क्रतु॑ः।
दे॒वस्य॑ त्वा सवि॒तुः प्र॑सवे।

अ॒श्विनो᳚र्बा॒हुभ्या᳚म्।
पू॒ष्णो हस्ता᳚भ्याम्।
अ॒श्विनो॒र्भैष॑ज्येन।
तेज॑से ब्रह्मवर्च॒साया॒भिषि॑ञ्चामि।
दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे।
अ॒श्विनो᳚र्बा॒हुभ्या᳚म्।
पू॒ष्णो हस्ता᳚भ्याम्।
सर॑स्वत्यै॒ भैष॑ज्येन॥ २॥

((sāmrā̈jyāya su̱kratú̱ḥ |
de̱vasyá tvā savi̱tuḥ prása̱ve |
a̱śvinō̈rbā̱hubhyā̈m |
pū̱ṣṇo hastā̈bhyām |
a̱śvino̱rbhaiṣájyena |
tejáse brahmavarca̱sāyā̱bhiṣíñcāmi |
de̱vasyá tvā savi̱tuḥ prása̱ve |
a̱śvinō̈rbā̱hubhyā̈m |
pū̱ṣṇo hastā̈bhyām |
sarásvatyai̱ bhaiṣájyena || 2 ||))

**[[2-6-5-3]]**

वी॒र्या॑या॒न्नाद्या॑या॒भिषि॑ञ्चामि।
दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे।
अ॒श्विनो᳚र्ब॒हुभ्या᳚म्।
पू॒ष्णो हस्ता᳚भ्याम्।
इन्द्र॑स्येन्द्रि॒येण॑।
श्रि॒यै यश॑से॒ बला॑या॒भिषि॑ञ्चामि।
को॑ऽसि कत॒मो॑ऽसि।
कस्मै᳚ त्वा॒ काय॑ त्वा।
सु॒श्लो॒काँ᳚४ सु॒मङ्ग॒लाँ᳚४ सत्य॑रा॒जा३न्।
शिरो॑ मे॒ श्रीः॥ ३॥

((vī̱ryáyā̱nnādyáyā̱bhiṣíñcāmi |
de̱vasyá tvā savi̱tuḥ prása̱ve |
a̱śvinō̈rba̱hubhyā̈m |
pū̱ṣṇo hastā̈bhyām |
indrásyendri̱yeṇá |
śri̱yai yaśáse̱ balā́yā̱bhiṣíñcāmi |
kó'si kata̱mó'si |
kasmaï tva̱ kāyá tvā |
suślo̱kā̈m̐4 sumáṅga̱lā̈m̐4 satyárā̱jā3n |
śiró me̱ śrī̱ḥ || 3 ||))

**[[2-6-5-4]]**

यशो॒ मुख᳚म्।
त्विषि॒ः केशा᳚श्च॒ श्मश्रू॑णि।
राजा॑ मे प्रा॒णो॑ऽमृत᳚म्।
स॒म्राट्चक्षुः॑।
वि॒राट्छ्रोत्र᳚म्।
जि॒ह्वा मे॑ भ॒द्रम्।
वाङ्मह॑ः।
मनो॑ म॒न्युः।
स्व॒राड्भाम॑ः।
मोदा᳚ः प्रमो॒दा अ॒ङ्गुली॒रङ्गा॑नि॥ ४॥

((yaśo̱ mukhä̈m |
tviṣi̱ḥ keśā̈śca̱ śmaśrū́ṇi |
rājá me prā̱ṇó'mṛtä̈m |
sa̱mrāṭcakṣúḥ |
vi̱rāṭchroträ̈m |
ji̱hvā mé bha̱dram |
vāṅmaháḥ |
manó ma̱nyuḥ |
sva̱rā̱ḍbhāmáḥ |
modā̈ḥ pramo̱dā a̱ṅgulī̱raṅgáni || 4 ||))

**[[2-6-5-5]]**

चि॒त्तं मे॒ सह॑ः।
बा॒हू मे॒ बल॑मिन्द्रि॒यम्।
हस्तौ॑ मे॒ कर्म॑ वी॒र्य᳚म्।
आ॒त्मा क्ष॒त्रमुरो॒ मम॑।
पृ॒ष्टीर्मे॑ रा॒ष्ट्रमु॒दर॒मꣳसौ᳚।
ग्री॒वाश्च॒ श्रोण्यौ᳚।
ऊ॒रू अ॑र॒त्नी जानु॑नी।
विशो॒ मेऽङ्गा॑नि स॒र्वत॑ः।
नाभि॑र्मे चि॒त्तं वि॒ज्ञान᳚म्।
पा॒युर्मेऽप॑चितिर्भ॒सत्॥ ५॥

((ci̱ttaṃ me̱ saháḥ |
bā̱hū me̱ balámindri̱yam |
hastaú me̱ karmá vī̱ryä̈m |
ā̱tmā kṣa̱tramuro̱ mamá |
pṛ̱ṣṭīrmé rā̱ṣṭramu̱dara̱mam̐saü |
grī̱vāśca̱ śroṇyaü |
ūrū̱ árаtnī jānúnī |
viśo̱ me'ṅgáni sa̱rvatáḥ |
nābhírme ci̱ttaṃ vi̱jñānä̈m |
pā̱yurme'pácitirbha̱sat || 5 ||))

**[[2-6-5-6]]**

आ॒न॒न्द॒न॒न्दा॒वा॒ण्डौ मे᳚।
भ॒गः॒ सौभा᳚ग्यं॒ पसः॑।
जङ्घा᳚भ्यां प॒द्भ्यां धर्मो᳚ऽस्मि।
वि॒शि राजा॒ प्रति॑ष्ठितः।
प्रति॑क्ष॒त्त्रे प्रति॑तिष्ठामि रा॒ष्ट्रे।
प्रत्यश्वे॑षु प्रति॑तिष्ठामि॒ गोषु॑।
प्रत्यङ्गे॑षु प्रति॑तिष्ठाम्या॒त्मन्।
प्रति॑प्रा॒णेषु॒ प्रति॑तिष्ठामि पु॒ष्टे।
प्रति॒द्यावा॑पृथि॒व्योः।
प्रति॑तिष्ठामि य॒ज्ञे॥ ६॥

((ā̠na̠nda̠na̠ndāvā̠ṇḍau mē̈ |
bhaga̠ḥ saubhā̈gyam̠ pasáḥ |
jaṅghā̈bhyām̠ pa̠dbhyām̠ dharmö'smi |
viśi rājā̠ pratiṣṭhitaḥ |
pratikṣattre pratitiṣṭhami rā̠ṣṭre |
pratyaśvéṣu pratitiṣṭhāmi̠ goṣú |
pratyaṅgéṣu̠ pratitiṣṭhāmyā̠tman |
pratiprā̠ṇeṣu̠ pratitiṣṭhāmi pu̠ṣṭe |
prati̠dyāvā́pṛthi̠vyoḥ |
pratitiṣṭhāmi ya̠jñe || 6 ||))

[[2-6-5-7]]

त्र॒या दे॒वा एका॑दश।
त्र॒य॒स्त्रि॒ꣳ॒शाः सु॒राध॑सः।
बृ॒ह॒स्पति॑पुरोहिताः।
दे॒वस्य॑ सवि॒तुः स॒वे।
दे॒वा दे॒वैर॑वन्तु मा।
प्र॒थ॒मा द्वि॒तीयैः॑।
द्वि॒तीया᳚स्तृ॒तीयैः᳚।
तृ॒तीयाः᳚ स॒त्येन॑।
स॒त्यं य॒ज्ञेन॑।
य॒ज्ञो यजु॑र्भिः॥ ७॥

(( tra̠yā de̠vā ekā́daśa |
traya̠strim̠̈śāḥ su̠rādhásaḥ |
bṛha̠spatipurohitāḥ |
de̠vasyá savi̠tuḥ sa̠ve |
de̠vā de̠vairávantu mā |
pra̠tha̠mā dvi̠tīyaiḥ |
dvi̠tīyā̈stṛ̠tīyaïḥ |
tṛ̠tīyā̈ḥ sa̠tyená |
sa̠tyam̠ ya̠jñená |
ya̠jño yajúrbhiḥ || 7 ||))

[[2-6-5-8]]

यजूꣳ॑षि॒ सामा॑भिः।
सामा᳚न्यृ॒ग्भिः।
ऋचो॑ या॒ज्या॑भिः।
या॒ज्या॑ वषट्का॒रैः।
व॒ष॒ट्का॒रा आहु॑तिभिः।
आहु॑तयो मे॒ कामा॒न्त्सम॑र्धयन्तु।
भूः स्वाहा᳚।
लोमा॑नि॒ प्रय॑ति॒र्मम॑।
त्वङ्म॒ आन॑ति॒राग॑तिः।
मा॒ꣳ॒सं म॒ उप॑नतिः।
वस्वस्थि॑।
म॒ज्जा म॒ आन॑तिः॥ ८॥
प॒स्त्या᳚स्वा सर॑स्वत्यै भैष॑ज्येन॒ श्रीरङ्गा॑नि भ॒सद्य॒ज्ञे य॒ज्ञो यजु॑र्भि॒रुप॑नति॒र्द्वे च॑॥ ५॥

((yajūm̈ṣi̠ sāmábhiḥ |
sāmā̈nyṛ̠gbhiḥ |
ṛcó yā̠jyā́bhiḥ |
yā̠jyā́ vaṣaṭkā̠raiḥ |
va̠ṣa̠ṭkā̠rā āhútibhiḥ |
āhútayo me̠ kāmā̠ntsamárdhayantu |
bhūḥ svāhā̈ |
lománi̠ prayáti̠rmamá |
tvaṅma̠ ānáti̠rāgátiḥ |
mā̠m̈sam̠ ma̠ upánatiḥ |
vasvasthí |
ma̠jjā ma̠ ānátiḥ || 8 ||
pa̠styā̈svā sarásvatyai̠ bhaiṣájyena̠ śrīraṅgáni
bha̠sadya̠jñe ya̠jño yajúrbhi̠rupánati̠rdve cá || 5 ||))

[[2-6-6-1]]

यद्दे॒वा दे॒वहे॑डनम्।
देवा॑सश्चकृ॒मा व॒यम्।
अ॒ग्निर्मा॒ तस्मा॒देन॑सः।
विश्वा᳚न्मुञ्च॒त्वꣳह॑सः।
यदि॒ दिवा॒ यदि॒ नक्त᳚म्।
एना॒ꣳ॑सि चकृ॒मा व॒यम्।
वा॒युर्मा॒ तस्मा॒देन॑सः।
विश्वा᳚न्मुञ्च॒त्वꣳह॑सः।
यदि॒ जाग्र॒द्यदि॒ स्वप्ने᳚।
एना॒ꣳ॑सि चकृ॒मा व॒यम्॥ १॥

((yadde̍vā de̱vahe̍ḍa̍nam |
de̍vāsaścakṛ̱mā va̱yam |
a̱gnirmā̱ tasmā̱dena̍saḥ |
viśvā̎nmuñca̱tvam̐ha̍saḥ |
yadi̱ divā̱ yadi̱ nakta̎m |
enā̎m̐si cakṛ̱mā va̱yam |
vā̱yurmā̱ tasmā̱dena̍saḥ |
viśvā̎nmuñca̱tvam̐ha̍saḥ |
yadi̱ jāgra̱dyadi̱ svapne̎ |
enā̎m̐si cakṛ̱mā va̱yam || 1 ||))

**[[2-6-6-2]]**

सूर्यो॑ मा॒ तस्मा॒देन॑सः।

विश्वा᳚न्मुञ्च॒त्वꣳह॑सः।

यद्ग्रामे॒ यद॑रण्ये।

यत्स॒भायां॒ यदि॑न्द्रि॒ये।

यच्छू॒द्रे यद॒र्ये᳚।

एन॑श्चकृ॒मा व॒यम्।

यदे॒क॒स्याधि॒ धर्म॑णि।

तस्याव॑यज॑नमसि।

यदापो॒ अघ्नि॑या॒ वरु॒णेति॒ शपा॑महे।

ततो॑ वरुण नो मुञ्च॥ २॥

((sūryo̍ mā̱ tasmā̱dena̍saḥ |
viśvā̎nmuñca̱tvam̐ha̍saḥ |
yadgrāme̱ yadara̍ṇye |
yatsa̱bhāyā̱ṃ yadi̍ndri̱ye |
yacchū̱dre yada̱rye̎ |
ena̍ścakṛ̱mā va̱yam |
yadeka̱syādhi̱ dharma̍ṇi |
tasyā̍vayaja̍namasi |
yadāpo̱ aghni̍yā̱ varu̱ṇeti̱ śapā̍mahe |
tato̍ varuṇa no muñca || 2 ||))

**[[2-6-6-3]]**

अव॑भृथ निचङ्कुण निचे॒रुर॑सि निचङ्कुण।

अव॑ दे॒वैर्दे॒वकृ॑त॒मेनो॑ऽयाट्।

अव॒ मर्त्यै॒र्मर्त्य॑कृतम्।

उ॒रोरा नो॑ देव रि॒षस्पा॑हि।

सु॒मि॒त्रा न॒ आप॒ ओष॑धयः सन्तु।

दु॒र्मि॒त्रास्तस्मै॑ भुयासुः।

यो᳚ऽस्मान्द्वेष्टि॑।

यं च॑ व॒यं द्वि॒ष्मः।

द्रु॒प॒दादि॒वेन्मु॑मुचा॒नः।

स्वि॒न्नः स्ना॒त्वी मला॑दिव॥ ३॥

(( ava̍bhṛtha nicaṅkuṇa nice̱rura̍si nicaṅkuṇa |
ava̍ de̱vairde̱vakṛ̍ta̱meno̍'yāṭ |
ava̱ martyai̱rmartya̍kṛtam|
u̱rorā no̍ deva ri̱ṣaspā̍hi |
su̱mi̱trā na̱ āpa̱ oṣa̍dhayaḥ santu |
du̱rmi̱trāstasmai̍ bhuyāsuḥ |
yo̎'smāndveṣṭi̍ |
yaṃ ca̍ va̱yaṃ dvi̱ṣmaḥ |
dru̱pa̱dādi̱venmu̍mucā̱naḥ |
svi̱nnaḥ snā̱tvī malā̍diva || 3 ||))

**[[2-6-6-4]]**

पू॒तं प॒वित्रे॑णे॒वाज्य᳚म्।

आप॑ः शुन्धन्तु॒ मैन॑सः।

उ॒द्व॒यं तम॑स॒स्परि॑।

पश्य॑न्तो॒ ज्योति॒रुत्त॑रम्।

दे॒वं दे॑व॒त्रा सूर्य᳚म्।

अग॑न्म॒ ज्योति॑रु॒त्तमम्।

प्रति॑युतो॒ वरु॑णस्य॒ पाशा॑ः।

प्रत्य॑स्तो॒ वरु॑णस्य॒ पाशा॑ः।

एधो᳚ऽस्येधिषी॒महि॑।

स॒मिद॑सि॥ ४॥

((pūta̱ṃ pa̱vitre̍ṇe̱vājya̎m |
āpa̍ḥ śundhantu̱ maina̍saḥ |
udva̱yaṃ tama̍sa̱spari̍ |
paśya̍nto̱ jyoti̱rutta̍ram |
de̱vaṃ de̍va̱trā sūrya̎m |
aga̍nma̱ jyoti̍ruttamam |
prati̍yuto̱ varu̍ṇasya̱ pāśa̍ḥ |
pratya̍sto̱ varu̍ṇasya̱ pāśa̍ḥ |
edho̎'syedhiṣī̱mahi̍ |
sa̱mida̍si || 4 ||))

**[[2-6-6-5]]**

तेजो॑ऽसि॒ तेजो॒ मयि॑ धेहि।

अ॒पो अन्व॑चारिषम्।

रसे॑न॒ सम॑सृक्ष्महि।

पय॑स्वाँ अग्न॒ आग॑मम्।

तं मा॒ सꣳसृ॑ज॒ वर्च॑सा।

प्र॒जया॑ च॒ धने॑न च।

स॒मा॒व॑वर्ति पृथि॒वी।

सम॒ुषाः।

स॒मु॒ सूर्यः॑ ।
स॒मु॒ विश्वा॑मि॒दं जग॑त् ।
वै॒श्वा॒न॒र ज्योति॑र्भूयासम् ।
वि॒भुं काम॒ं व्य॑श्नवै ।
भूः स्वाहा᳚ ॥ ५ ॥
स्वप्न॒ एना॑ꣳसि चकृ॒मा व॒यं मु॑ञ्च॒ मला॑दिव स॒मिद॑सि॒
जग॒त्त्रीणि॑ च ॥ ६ ॥

((tejo̍'si̱ tejo̱ mayi̍ dhehi |
a̱po anva̍cāriṣam |
rase̍na̱ sama̍sṛkṣmahi |
paya̍svām̐ agna̱ āga̍mam |
taṃ mā̱ sam̐sṛ̱ja̱ varca̍sā |
pra̱jayā̍ ca̱ dhane̍na ca |
sa̱māva̍varti pṛ̱thi̱vī |
sam̱uṣā̱ḥ |
samu̱ sūrya̍ḥ |
samu̱ viśva̍mi̱daṃ jaga̍t |
vai̱śvā̱na̱ra jyo̍tirbhūyāsam |
vi̱bhuṃ kāma̱ṃ vya̍śnavai |
bhūḥ svāhā̎ || 5 ||
svapna̱ enām̐si cakṛ̱mā va̱yaṃ mu̍ñca̱ malā̍diva sa̱mida̍si̱ jaga̱ttrīṇi̍ ca || 6 ||))

**[[2-6-7-1]]**

होता॑ यक्षत्स॒मिधेन्द्र॑मि॒डस्प॒दे ।
नाभा॑ पृथि॒व्या अधि॑ ।
दि॒वो वर्ष्म॒न्त्समि॑ध्यते ।
ओजि॑ष्ठश्चर्षणी॒सहा॑न् ।
वेत्वाज्य॑स्य॒ होत॒र्यज॑ ।
होता॑ यक्ष॒त्तनूनपा॑तम् ।
ऊ॒तिभि॒र्जेता॑र॒मप॑राजितम् ।
इन्द्रं॑ दे॒वꣳ सु॑व॒र्विद᳚म् ।
प॒थिभि॒र्मधु॑मत्तमैः ।
न॒रा॒शꣳसे॑न॒ तेज॑सा ॥ १ ॥

((hotā̍ yakṣatsa̱midhendra̍mi̱daspa̱de |
nābhā̍ pṛthi̱vyā adhi̍ |
di̱vo varṣma̱ntsami̍dhyate |
oji̍ṣṭhaścarṣa̱ṇī̱sahā̍n |
vetvājya̍sya̱ hota̱ryaja̍ |
hotā̍ yakṣa̱ttanū̱napā̍tam |
ū̱tibhi̱rjetā̍ra̱mapa̍rājitam |
indra̍ṃ de̱vam̐ su̍va̱rvidā̎m |
pa̱thibhi̱rmadhu̍mattamaiḥ |
na̱rā̱śam̐se̍na̱ teja̍sā || 1 ||))

**[[2-6-7-2]]**

वेत्वाज्य॑स्य॒ होत॒र्यज॑ ।
होता॑ यक्ष॒दि॒डा॑भि॒रिन्द्र॑मीडि॒तम् ।
आ॒जुह्वा॑न॒मम॑र्त्यम् ।
दे॒वो दे॒वैः सवी᳚र्यः ।
वज्र॑हस्तः पुरंद॒रः ।
वेत्वाज्य॑स्य॒ होत॒र्यज॑ ।
होता॑ यक्षद्ब॒र्हिषीन्द्रं॑ निष॒द्व॒रम् ।
वृ॒ष॒भं नर्या॑पसम् ।
वसु॑भी रु॒द्रैरा॑दि॒त्यैः ।
स॒युग्भि॑र्ब॒र्हिरास॑दत् ॥ २ ॥

((vetvājya̍sya̱ hota̱ryaja̍ |
hotā̍ yakṣa̱di̱ḍā̍bhi̱rindra̍mīḍi̱tam |
ā̱juhvā̍na̱mama̍rtyam |
de̱vo de̱vaiḥ savī̎ryaḥ |
vajra̍hastaḥ puraṃda̱raḥ |
vetvājya̍sya̱ hota̱ryaja̍ |
hotā̍ yakṣadba̱rhiṣīndra̍ṃ niṣa̱dva̱ram |
vṛ̱ṣa̱bhaṃ naryā̍pasam |
vasu̍bhī ru̱drairā̍di̱tyaiḥ |
sa̱yugbhi̍rba̱rhirāsa̍dat || 2 ||))

**[[2-6-7-3]]**

वेत्वाज्य॑स्य॒ होत॒र्यज॑ ।
होता॑ यक्ष॒दोजो॒ न वी॒र्य᳚म् ।
स॒हो॒ द्वार॒ इन्द्र॑मवर्धयन् ।
सु॒प्रा॒य॒णा विश्र॑यन्तामृता॒वृधः॑ ।
द्वार॒ इन्द्रा॑य मी॒ढुषे᳚ ।
वि॒यन्त्वाज्य॑स्य॒ होत॒र्यज॑ ।
होता॑ यक्षदु॒षे इन्द्र॑स्य धे॒नू ।
सु॒दुघे॑ मा॒तरौ॑ म॒ही ।
स॒वा॒तरौ॒ न तेज॑सी ।
व॒त्समिन्द्र॑मवर्धताम् ॥ ३ ॥

((vetvājya̍sya̱ hota̱ryaja̍ |
hotā̍ yakṣa̱dojo̱ na vīrya̎m |
saho̱ dvāra̱ indra̍mavardhayan |
su̱prā̱ya̱ṇā viśra̍yantāmṛ̱tā̱vṛdha̍ḥ |
dvāra̱ indrā̍ya mī̱ḍhuṣe̎ |
vi̱yantvājya̍sya̱ hota̱ryaja̍ |
hotā̍ yakṣadu̱ṣe indra̍sya dhe̱nū |
su̱dughe̍ mā̱tarau̍ ma̱hī |
savā̱tarau̱ na teja̍sī |
va̱tsamindra̍mavardhatām || 3 ||))

**[[2-6-7-4]]**

वी॒तामाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्ष॒द्दैवया॒ होता॑रा।
भि॒षजा॒ सखा॑या।
ह॒विषेन्द्रं॑ भिषज्यतः।
क॒वी दे॒वौ प्रचे॑तसौ।
इन्द्रा॑य धत्त इन्द्रि॒यम्।
वी॒तामाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्ष॒त्तिस्रो॑ दे॒वीः।
त्रय॑स्त्रि॒धात॑वो॒ऽपसः॑।
इ॒डा सर॑स्वती॒ भार॑ती॥ ४॥

((vītāmājyásya hotaryajá ǀ
hotá yakṣaddaivayā hotā́rā ǀ
bhiṣajā sakhā́yā ǀ
haviṣendraṃ bhiṣajyataḥ ǀ
kavī devau pracétasau ǀ
indrā́ya dhatta indriyam ǀ
vītāmājyásya hotaryajá ǀ
hotá yakṣattisro devīḥ ǀ
trayástridhātávo'pasáḥ ǀ
iḍā sarásvatī bhārátī ǁ 4 ǁ))

**[[2-6-7-5]]**

म॒हीन्द्र॑पत्नीर्ह॒विष्म॑तीः।
वि॒यन्त्वाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्ष॒त्त्वष्टा॑र॒मिन्द्रं॑ दे॒वम्।
भि॒षज॑ꣳ सु॒यजं॑ घृत॒श्रिय᳚म्।
पु॒रु॒रूप॑ꣳ सु॒रेत॑सं म॒घोनि᳚म्।
इन्द्रा॑य॒ त्वष्टा॒ दध॑दिन्द्रि॒याणि॑।
वेत्वाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्ष॒द्वन॒स्पति᳚म्।
श॒मि॒तार॑ꣳ श॒तक्र॑तुम्।
धि॒यो जो॒ष्टार॑मिन्द्रि॒यम्॥ ५॥

((mahīndrápatnīrhaviṣmátīḥ ǀ
viyantvājyásya hotaryajá ǀ
hotá yakṣattvaṣṭā́ramindraṃ devam ǀ
bhiṣajaṃ́ suyajaṃ ghṛtaśriyam̐ ǀ
pururūpaṃ́ suretásaṃ maghonim̐ ǀ
indrā́ya tvaṣṭā dadhádindriyāṇi ǀ
vetvājyásya hotaryajá ǀ
hotá yakṣadvanaspatim̐ ǀ
śamitāraṃ́ śatakrátum ǀ
dhiyo joṣṭā́ramindriyam ǁ 5 ǁ))

**[[2-6-7-6]]**

मध्वा॑ सम॒ञ्जन्प॒थिभिः॑ सु॒गेभिः॑।
स्वदा॑ति ह॒व्यं मधु॑ना घृ॒तेन॑।
वेत्वाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्ष॒दिन्द्र॒ꣳ᳚ स्वाहाऽऽज्य॑स्य।
स्वाहा॒ मेद॑सः।
स्वाहा᳚ स्तो॒काना᳚म्।
स्वाहा॒ स्वाहा॑कृतीनाम्।
स्वाहा॑ ह॒व्यसू᳚क्तीनाम्।
स्वाहा॑ दे॒वाꣳ॑ आ᳚ज्य॒पान्।
स्वाहेन्द्रꣳ॑ हो॒त्राज्जु॑षा॒णाः।
इन्द्र॒ आज्य॑स्य वियन्तु।
होत॒र्यज॑॥ ६॥
तेज॑साऽऽसददवर्धतां॒ भार॑तीन्द्रि॒यं जु॑षा॒णा द्वे च॑॥ ७॥
स॒मिधेन्द्रं॑ तनू॒नपा॑त॒मिडा॑भिर्ब॒र्हिश॑योज॑ उ॒षे दैव्या॑
ति॒स्रस्त्वष्टा॑रं॒ वन॒स्पति॒मिन्द्र᳚म्। स॒मिधेन्द्रं॑ च॒तुर्वे॑त्वेको॑
वियन्तु॒ द्विर्वी॒तामेको॑ वियन्तु॒ द्विर्वे॑त्वेको॑ वियन्तु॒
होत॒र्यज॑॥

((madhvá samañjanpathibhiḥ sugebhiḥ ǀ
svadā́ti havyaṃ madhúnā ghṛtená ǀ
vetvājyásya hotaryajá ǀ
hotá yakṣadindraṃ̐ svāhā''jyásya ǀ
svāhā medásaḥ ǀ
svāhā̐ stokānām̐ ǀ
svāhā svāhā́kṛtīnām ǀ
svāhá havyasū̐ktīnām ǀ
svāhá devām̐́ ā̐jyapān ǀ
svāhendraṃ́ hotrājjúṣāṇāḥ ǀ
indra ājyásya viyantu ǀ
hotaryajá ǁ 6 ǁ
tejásā''sadadavardhatāṃ bhārátīndriyaṃ júṣāṇā
dve cá ǁ 7 ǁ
samidhendraṃ tanūnapā́tamiḍā́bhirbarhiśayojá uṣe
daivyá tisrastvaṣṭā́raṃ vanaspatimindrā̐m ǀ
samidhendraṃ caturvetvekó viyantu dvirvītāmekó
viyantu dvirvetvekó viyantu hotaryajá ǁ))

**[[2-6-8-1]]**

समि॑द्ध इन्द्र॑ उ॒षसा॒मनी॑के।
पु॒रो॒रुचा॑ पू॒र्व॒कृद्वा॑वृधा॒नः।
त्रि॒भिर्दे॒वैस्त्रि॒ꣳ॒शता॒ वज्र॑बाहुः।
ज॒घान॑ वृ॒त्रं वि दुरो॑ ववार।

न॒रा॒शꣳस॒ः प्रति॒ शूरो॒ मिमा॑नः।
तनू॒नपा॒त्प्रति॑ य॒ज्ञस्य॒ धाम॑।
गोभि॑र्वपावा॒न्मधु॑ना सम॒ञ्जन्।
हि॑रण्यैश्च॒न्द्री य॑जति॒ प्रचे॑ताः।
ई॒डि॒तो दे॒वैर्हरि॑वाꣳ अभि॒ष्टिः।
आ॒जुह्वा॑नो ह॒विषा॒ शर्ध॑मानः॥ १॥

((sami̍ddha̱ indra̍ u̱ṣasā̱mani̍ke |
pu̱ro̱rucā̍ pūrva̱kṛdvā̍vṛdhā̱naḥ |
tri̱bhirde̱vaistri̱m̐śatā̱ vajra̍bāhuḥ |
ja̱ghāna̍ vṛ̱traṃ vi duro̍ vavāra |
narā̱śam̐sa̱ḥ prati̱ śūro̱ mimā̍naḥ |
tanū̱napā̱tprati̍ ya̱jñasya̱ dhāma̍ |
gobhi̍rvapāvā̱nmadhu̍nā sama̱ñjan |
hi̍raṇyaiśca̱ndrī ya̍jati̱ prace̍tāḥ |
ī̱ḍi̱to de̱vairhari̍vām̐ abhi̱ṣṭiḥ |
ā̱juhvā̍no ha̱viṣā̱ śardha̍mānaḥ || 1 ||))

**[[2-6-8-2]]**

पु॒रं॒द॒रो म॒घवा॒न्वज्र॑बाहुः।
आया॑तु य॒ज्ञमुप॑ नो जुषा॒णः।
जु॒षा॒णो ब॒र्हिर्हरि॑वान्न॒ इन्द्रः॑।
प्राचीनꣳ॑ सीदत्प्र॒दिशा॑ पृथि॒व्याः।
उ॒रु॒व्यचा॒ः प्रथ॑मानꣴ॑ स्यो॒नम्।
आ॒दि॒त्यैर॒क्तं वसु॑भिः स॒जोषाः॑।
इन्द्रं॒ दुर॑ः कव॒ष्यो॑ धाव॑मानाः।
वृषा॑णं यन्तु॒ जन॑यः सु॒पत्नीः॑।
द्वारो॑ दे॒वीर॒भितो॒ विश्र॑यन्ताम्।
सु॒वीरा॑ वी॒रं प्रथ॑माना॒ महो॑भिः॥ २॥

((pu̱ra̱ṃda̱ro ma̱ghavā̱nvajra̍bāhuḥ |
āyā̍tu ya̱jñamupa̍ no juṣā̱ṇaḥ |
ju̱ṣā̱ṇo ba̱rhirhari̍vānna̱ indra̍ḥ |
prācīnam̐̍ sīdatpra̱diśā̍ pṛthi̱vyāḥ |
u̱ru̱vyacā̱ḥ pratha̍mānam̐̍ syo̱nam |
ā̱di̱tyaira̱ktaṃ vasu̍bhiḥ sa̱joṣā̍ḥ |
indra̱ṃ dura̍ḥ kava̱ṣyo̍ dhāva̍mānāḥ |
vṛṣā̍ṇaṃ yantu̱ jana̍yaḥ su̱patnī̍ḥ |
dvāro̍ de̱vīra̱bhito̱ viśra̍yantām |
su̱vīrā̍ vī̱raṃ pratha̍mānā̱ maho̍bhiḥ || 2 ||))

**[[2-6-8-3]]**

उ॒षासा॒ नक्ता॑ बृह॒ती बृ॒हन्त॑म्।
पय॑स्वती सु॒दुघे॒ शूर॒मिन्द्र॑म्।
पेश॑स्वती॒ तन्तु॑ना सं॒व्यय॑न्ती।
दे॒वानां॑ दे॒वं यज॑तः सु॒रुक्मे।
दैव्या॒ मिमा॑ना॒ मन॑सा पुरु॒त्रा।
होता॑रा॒विन्द्रं॑ प्रथ॒मा सु॒वाचा॑।
मू॒र्धन्य॒ज्ञस्य॒ मधु॑ना॒ दधा॑ना।
प्रा॒चीनं॒ ज्योति॑र्ह॒विषा॑ वृधातः।
ति॒स्रो दे॒वीर्ह॒विषा॒ वर्ध॑मानाः।
इन्द्रं॑ जुषा॒णा वृष॑णं॒ न पत्नीः॑॥ ३॥

((u̱ṣāsā̱ naktā̍ bṛ̱hatī bṛ̱hantā̍m |
paya̍svatī su̱dughe̱ śūra̱mindrā̍m |
peśa̍svatī̱ tantu̍nā sa̱ṃvyaya̍ntī |
de̱vānā̍m̐ de̱vaṃ ya̍jataḥ suru̱kme |
daivyā̱ mimā̍nā̱ mana̍sā puru̱trā |
hotā̍rā̱vindra̍ṃ pratha̱mā su̱vācā̍ |
mūrdhanya̱jñasya̱ madhu̍nā̱ dadhā̍nā |
prā̱cīna̱ṃ jyoti̍rha̱viṣā̍ vṛdhātaḥ |
ti̱sro de̱vīrha̱viṣā̱ vardha̍mānāḥ |
indra̍ṃ juṣā̱ṇā vṛṣa̍ṇa̱ṃ na patnī̍ḥ || 3 ||))

**[[2-6-8-4]]**

अच्छि॑न्नं॒ तन्तुं॒ पय॑सा॒ सर॑स्वती।
इडा॑ दे॒वी भार॑ती वि॒श्वतू॑र्तिः।
त्वष्टा॒ दध॒दिन्द्रा॑य॒ शुष्म॑म्।
अपा॒कोऽचि॑ष्टुर्य॒शसे॑ पु॒रूणि॑।
वृषा॒ यज॒न्वृष॑णं॒ भूरि॑रेताः।
मू॒र्धन्य॒ज्ञस्य॒ सम॑नक्तु दे॒वान्।
व॒नस्पति॒रव॑सृष्टो॒ न पाशैः॑।
त्मन्या॑ सम॒ञ्जञ्छमि॑ता न दे॒वः।
इन्द्र॑स्य ह॒व्यैर्ज॒ठरं॑ पृणा॒नः।
स्वदा॑ति ह॒व्यं मधु॑ना घृ॒तेन॑।
स्तो॒काना॒मिन्दुं॒ प्रति॒ शूर॒ इन्द्रः॑।
वृ॒षा॒यमा॑णो वृष॒भस्तु॑रा॒षाट्।
घृ॒त॒प्रुषा॒ मधु॑ना ह॒व्यमु॒न्दन्।
मू॒र्धन्य॒ज्ञस्य॑ जुषता॒ꣳ स्वाहा॑॥ ४॥
शर्ध॑मानो॒ महो॑भिः पत्नी॑र्घृ॒तेन॑ च॒त्वारि॑ च॥ ८॥
इति कृष्णयजुर्वेदीयतैत्तरीयब्राह्मणे द्वितीयाष्टके
षष्ठाध्यायेऽष्टमोऽनुवाकः॥ ८॥

((acchi̍nnaṃ̱ tantu̱ṃ paya̍sā̱ sara̍svatī |
iḍā̍ de̱vī bhāra̍tī vi̱śvatū̍rtiḥ |
tvaṣṭā̱ dadha̱dindrā̍ya̱ śuṣmā̍m |
apā̱ko'rci̍ṣṭurya̱śase̍ pu̱rūṇi̍ |

vṛṣā̱ yaja̱nvṛṣa̍ṇaṃ bhūri̍retāḥ |
mū̱rdhanya̱jñasya̍ sama̍naktu de̱vān |
va̱naspati̱ravasṛ̍ṣṭo̱ na pāśai̎ḥ |
tmanyā̍ sama̱ñjacchami̍tā na de̱vaḥ |
indra̍sya ha̱vyairja̱ṭhara̍ṃ pṛṇā̱naḥ |
svadā̍ti ha̱vyaṃ madhu̍nā ghṛ̱tena̍ |
sto̱kānā̱mindu̱ṃ prati̱ śūra̱ indra̍ḥ |
vṛ̱ṣā̱yamā̍ṇo vṛṣa̱bhastu̍rā̱ṣāṭ |
ghṛ̱ta̱pruṣā̱ madhu̍nā ha̱vyamu̱ndan |
mū̱rdhanya̱jñasya̍ juṣatā̱gṃ svāhā̎ || 4 ||
śardha̍māno̱ maho̍bhi̱ḥ patnī̎rghṛ̱tena̍ ca̱tvāri̍ ca || 8 ||
iti kṛṣṇayajurvedīyataittarīyabrāhmaṇe dvitīyāṣṭake
ṣaṣṭhādhyāye'ṣṭamo'nuvākaḥ || 8 ||))

**[[2-6-9-1]]**

आच॑र्षणि॒ प्रा वि॒वे॒ष॒ यन्मा᳚।
तꣳ स॒ध्रीची᳚ः।
स॒त्यमित्तन्न त्वावाꣳ॑ अ॒न्यो अस्ति॑।
इन्द्र॑ दे॒वो न मर्त्यो॒ ज्याया॑न्।
अह॒न्नहि॑ं परि॒शया॑न॒मर्ण॑ः।
अवा॑सृजो॒ऽपो अच्छा॑ समु॒द्रम्।
प्रस॑साहिषे पुरुहूत॒ शत्रू॑न्।
ज्येष्ठ॑स्ते॒ शुष्म॑ इ॒ह रा॒तिर॑स्तु।
इन्द्राभ॑र॒ दक्षि॑णेना॒ वसू॑नि।
पति॒ः सिन्धू॑नामसि रे॒वती॑नाम्।
स शेवृ॑धमधि॒धा द्यु॒म्नम॒स्मे।
महि॑ क्ष॒त्रं जना॑षा॒डि॑न्द्र॒ तव्य॑म्।
रक्षा॑ च नो म॒घोन॑ः पा॒हि सू॒रीन्।
रा॒ये च॑ नः स्वप॒त्या इ॒षे धा᳚ः॥ १॥
रे॒वती॑नां च॒त्वारि॑ च॥ ९॥

((ācarṣa̍ṇi̱ prā vi̱veṣa̱ yanmā̎ |
tagṃ sa̱dhrīcī̎ḥ |
sa̱tyamittanna tvāvāgṃ̍ a̱nyo asti̍ |
indra̍ de̱vo na martyo̱ jyāyā̍n |
aha̱nnahi̍ṃ pari̱śayā̍na̱marṇa̍ḥ |
avā̍sṛjo̱'po acchā̍ samu̱dram |
prasa̍sāhiṣe puruhūta̱ śatrū̍n |
jyeṣṭha̍ste̱ śuṣma̍ i̱ha rā̱tira̍stu |
indrābha̍ra̱ dakṣi̍ṇenā̱ vasū̍ni |
pati̱ḥ sindhū̍nāmasi re̱vatī̍nām |
sa śevṛ̍dhamadhi̱dhā dyu̱mnama̱sme |
mahi̍ kṣa̱traṃ janā̍ṣā̱ḍi̍ndra̱ tavya̍m |
rakṣā̍ ca no ma̱ghona̍ḥ pā̱hi sū̱rīn |
rā̱ye ca̍ naḥ svapa̱tyā i̱ṣe dhā̎ḥ || 1 ||
re̱vatī̍nāṃ ca̱tvāri̍ ca || 9 ||))

**[[2-6-10-1]]**

दे॒वं ब॒र्हिरिन्द्रꣳ॑ सुदे॒वं दे॒वैः।
वी॒रव॑त्स्ती॒र्णं वेद्या॑मवर्धयत्।
वस्तो᳚र्वृ॒तं प्राक्तो᳚र्भृ॒तम्।
रा॒या ब॒र्हिष्म॒तोऽत्य॑गात्।
व॒सु॒वने॑ वसु॒धेय॑स्य वेतु॒ यज॑।
दे॒वीर्द्वार॒ इन्द्रꣳ॑ संघा॒ते।
वि॒ड्वीर्या॑मन्नवर्धयन्।
आ व॒त्सेन॒ तरु॑णेन कुमा॒रेण॑ च मीवि॒ता अपार्वा᳚णम्।
रे॒णुक॑काटं नुदन्ताम्।
व॒सु॒वने॑ वसु॒धेय॑स्य वियन्तु॒ यज॑॥ १॥

((de̱vaṃ ba̱rhirindragṃ̍ sude̱vaṃ de̱vaiḥ |
vī̱rava̍tstī̱rṇaṃ vedyā̍mavardhayat |
vastō̎rvṛ̱taṃ prāktō̎rbhṛ̱tam |
rā̱yā ba̱rhiṣma̱to'tya̍gāt |
va̱su̱vane̍ vasu̱dheya̍sya vetu̱ yaja̍ |
de̱vīrdvāra̱ indragṃ̍ saṃghā̱te |
vi̱ḍvīryā̍mannavardhayan |
ā va̱tsena̱ taru̍ṇena kumā̱reṇa̍ ca mīvi̱tā apārvā̎ṇam |
re̱ṇuka̍kāṭaṃ nudantām |
va̱su̱vane̍ vasu̱dheya̍sya viyantu̱ yaja̍ || 1 ||))

**[[2-6-10-2]]**

दे॒वी उ॒षासा॒ नक्ता᳚।
इन्द्र॑ं य॒ज्ञे प्र॑य॒त्य॑ह्वेताम्।
दैवी॒र्विश॑ः प्राया॑सिष्टाम्।
सु॒प्री॑ते॒ सुधि॑ते अभूताम्।
व॒सु॒वने॑ वसु॒धेय॑स्य वीता॒ं यज॑।
दे॒वी जोष्ट्री॒ वसु॑धिती।
दे॒वमिन्द्र॑मवर्धताम्।
अया᳚व्य॒न्याऽघा द्वेषाꣳ॑सि।
आऽन्याऽवा᳚क्षी॒द्वसु॒ वार्या॑णि।
यज॑मानाय शिक्षि॒ते॥ २॥

((de̱vī u̱ṣāsā̱ naktā̎ |
indra̍ṃ ya̱jñe pra̍ya̱tya̍hvetām |
daivī̱rviśa̱ḥ prāyā̍siṣṭām |
suprī̍te̱ sudhi̍te abhūtām |
va̱su̱vane̍ vasu̱dheya̍sya vītā̱ṃ yaja̍ |
de̱vī joṣṭrī̱ vasu̍dhitī |
de̱vamindra̍mavardhatām |
ayā̎vya̱nyā'ghā dveṣāgṃ̍ si |
ā'nyā'vā̎kṣī̱dvasu̱ vāryā̍ṇi |
yaja̍mānāya śikṣi̱te || 2 ||))

**[[2-6-10-3]]**

व॒सु॒वने॑ वसु॒धेय॑स्य वीता॒ं यज॑।
दे॒वी ऊ॒र्जाहु॑ती॒ दुघे॑ सु॒दुघे᳚।
पय॒सेन्द्र॑मवर्धताम्।
इ॒षमूर्ज॑म॒न्याऽवा᳚क्षीत्।
सग्धि॒ꣳ सपी॑तिम॒न्या।
नवे॑न॒ पूर्व॒ं दय॑माने।
पु॒रा॒णेन॒ नव᳚म्।
अधा॑ता॒मूर्ज॑मू॒र्जाहु॑ती॒ वसु॒ वार्या᳚णि।
यज॑मानाय शिक्षि॒ते।
व॒सु॒वने॑ वसु॒धेय॑स्य वीता॒ं यज॑॥ ३॥

((va̱su̱vanė vasu̱dheyȧsya vītā̱m̱ yajȧ ।
de̱vī ū̱rjāhu̇tī̱ dughė su̱dughė̈ ।
paya̱sendrȧmavardhatām ।
iṣa̱mūrjȧma̱nyā'vā̈kṣīt।
sagdhi̱m̐ sapi̇tima̱nyā ।
navėna̱ pūrva̱m̱ dayȧmāne ।
pu̱rā̱ṇena̱ navā̈m ।
adhȧtā̱mūrjȧmū̱rjāhu̇tī̱ vasu̱ vāryȧ̈ṇi ।
yajȧmānāya śikṣi̱te ।
va̱su̱vanė vasu̱dheyȧsya vītā̱m̱ yajȧ ॥ 3 ॥))

[[2-6-10-4]]
दे॒वा दैव्या॒ होता॑रा।
दे॒वमिन्द्र॑मवर्धताम्।
ह॒ताघ॑शꣳसा॒वाभा᳚र्ष्टां॒ वसु॒ वार्या᳚णि।
यज॑मानाय शिक्षि॒तौ।
व॒सु॒वने॑ वसु॒धेय॑स्य वीता॒ं यज॑।
दे॒वीस्ति॒स्रस्ति॒स्रो दे॒वीः।
पति॒मिन्द्र॑मवर्धयन्।
अस्पृ॑क्ष॒द्भार॑ती॒ दिव᳚म्।
रु॒द्रैर्य॒ज्ञꣳ सर॑स्वती।
इडा॒ वसु॑मती गृ॒हान्॥ ४॥

((de̱vā daivyā̱ hotȧrā ।
de̱vamindrȧmavardhatām ।
ha̱tāghȧśam̐sa̱vābhā̈rṣṭā̱m̱ vasu̱ vāryȧ̈ṇi ।
yajȧmānāya śikṣi̱tau ।
va̱su̱vanė vasu̱dheyȧsya vītā̱m̱ yajȧ ।
de̱vīsti̱srasti̱sro de̱vīḥ ।
pati̱mindrȧmavardhayan ।
aspṛ̇kṣa̱dbhārȧtī̱ divā̈m ।
ru̱drairya̱jñam̐ sarȧsvatī ।
iḍā̱ vasu̇matī gṛ̱hān ॥ 4 ॥))

[[2-6-10-5]]
व॒सु॒वने॑ वसु॒धेय॑स्य वियन्तु॒ यज॑।
दे॒व इन्द्रो॒ नरा॒शꣳस॑ः।
त्रि॒व॒रू॒थस्त्रि॑वन्धु॒रः।
दे॒वमिन्द्र॑मवर्धयत्।
श॒तेन॑ शितिपृ॒ष्ठाना॒माहि॑तः।
स॒हस्रे॑ण॒ प्रव॑र्तते।
मि॒त्रावरु॒णेद॑स्य हो॒त्रमर्ह॑तः।
बृ॒हस्पति॑ः स्तो॒त्रम्।
अ॒श्विनाऽऽध्व॑र्यवम्।
व॒सु॒वने॑ वसु॒धेय॑स्य वेतु॒ यज॑॥ ५॥

((va̱su̱vanė vasu̱dheyȧsya viyantu̱ yajȧ ।
de̱va indro̱ narā̱śam̐sȧḥ ।
tri̱va̱rū̱thastri̇vandhu̱raḥ ।
de̱vamindrȧmavardhayat।
śa̱tenȧ śitipṛ̱ṣṭhānā̱māhi̇taḥ ।
sa̱hasrėṇa̱ pravȧrtate ।
mi̱trāvaru̱ṇedȧsya ho̱tramarhȧtaḥ ।
bṛ̱haspati̇ḥ sto̱tram ।
a̱śvinā''dhvȧryavam ।
va̱su̱vanė vasu̱dheyȧsya vetu̱ yajȧ ॥ 5 ॥))

[[2-6-10-6]]
दे॒व इन्द्रो॒ वन॒स्पति॑ः।
हिर॑ण्यपर्णो॒ मधु॑शाखः सुपि॒प्पलः।
दे॒वमिन्द्र॑मवर्धयत्।
दिव॒मग्रे॑णाप्रात्।
आऽन्तरि॑क्षं पृथि॒वीम॑दृꣳहीत्।
व॒सु॒वने॑ वसु॒धेय॑स्य वेतु॒ यज॑।
दे॒वं ब॒र्हिर्वारि॑तीनाम्।
दे॒वमिन्द्र॑मवर्धयत्।
स्वा॒स॒स्थमिन्द्रे॒णास॑न्नम्।
अ॒न्या ब॒र्हीꣳष्य॒भ्य॑भूत्।
व॒सु॒वने॑ वसु॒धेय॑स्य वेतु॒ यज॑।
दे॒वो अ॒ग्निः स्वि॑ष्ट॒कृत्।
दे॒वमिन्द्र॑मवर्धयत्।
स्वि॒ष्टं कु॒र्वन्त्स्वि॑ष्ट॒कृत्।
स्वि॒ष्टम॒द्य क॑रोतु नः।
व॒सु॒वने॑ वसु॒धेय॑स्य वेतु॒ यज॑॥ ६॥

वि॒य॒न्तु॒ यज॑ शिक्षि॒ते  शि॑क्षि॒ते व॑सु॒वने॑ वसु॒धेय॑स्य वीता॒ं
यज॑ गृ॒हान्वे॑तु॒ यजा᳚भू॒त्षट्च॑॥ १०॥
दे॒वं  ब॒र्हिर्दे॒वीर्द्वारो॑ दे॒वी उ॒षासा॒ नक्तो॑ दे॒वी जोष्ट्री᳚ दे॒वी
ऊ॒र्जाहु॑ती दे॒वा दैव्या॒ होता᳚रा शिक्षि॒तौ दे॒वीस्ति॒स्रस्ति॒स्रो
दे॒वीः पति॑ं दे॒व इन्द्रो॒ नरा॒शꣳसो॑ दे॒व इन्द्रो॒ व॒नस्पति॑र्दे॒वं
ब॒र्हिर्वारि॑तीनां दे॒वो अ॒ग्निः स्वि॑ष्ट॒कृद्दे॒वम्॥
वे॒तु॒ वि॒य॒न्तु॒ च॒तुर्वी᳚ता॒मेको॑ वियन्तु च॒तुर्वे॑तु।
अ॒व॒र्ध॒य॒द॒व॒र्ध॒य॒न्त्रिर॑वर्धता॒मेको॑ऽवर्धय॒ꣳ॒श्च॒तुर॑वर्धयत्।
वस्तो॒रा व॒त्सेन॒ दैवी॒रया॒वीष॑ꣳ ह॒तास्पृ॑क्षच्छ॒तेन॒
दि॒वमिन्द्र॑ꣳ॒ स्वास॒स्थꣳ॒ स्वि॑ष्टम्। स्वि॑ष्टꣳ शि॑क्षि॒ते शि॑क्षि॒ते
शि॑क्षि॒तौ॥

((de̱va indro̱ vana̱spati̍ḥ ।
hira̍ṇyaparṇo̱ madhu̍śākhaḥ supippa̱laḥ ।
de̱vamindra̍mavardhayat ।
diva̱magre̍ṇāprāt ।
ā'ntari̍kṣaṃ pṛthi̱vīma̍dṛm̐hīt ।
va̱su̱vane̍ vasu̱dheya̍sya vetu̱ yaja̍ ।
de̱vaṃ ba̱rhirvāri̍tīnām ।
de̱vamindra̍mavardhayat ।
svā̱sa̱sthamindre̱ṇāsa̍nnam ।
a̱nyā ba̱rhīm̐ṣya̱bhya̍bhūt ।
va̱su̱vane̍ vasu̱dheya̍sya vetu̱ yaja̍ ।
de̱vo a̱gniḥ svi̍ṣṭa̱kṛt ।
de̱vamindra̍mavardhayat ।
svi̍ṣṭaṃ ku̱rvantsvi̍ṣṭa̱kṛt ।
svi̍ṣṭama̱dya ka̍rotu naḥ ।
va̱su̱vane̍ vasu̱dheya̍sya vetu̱ yaja̍ ॥ 6 ॥
vi̱ya̱ntu̱ yaja̍ śikṣi̱te  śi̍kṣi̱te va̍su̱vane̍ vasu̱dheya̍sya
vītā̱ṃ yaja̍ gṛ̱hānve̍tu̱ yajā̎bhū̱tṣaṭca̍ ॥ 10 ॥
de̱vaṃ  ba̱rhirde̱vīrdvāro̍ de̱vī u̱ṣāsā̱ nakto̍ de̱vī joṣṭrī̎
de̱vī ū̱rjāhu̍tī de̱vā daivyā̱ hotā̎rā śikṣi̱tau
de̱vīsti̱srasti̱sro de̱vīḥ pati̍ṃ de̱va indro̱ narā̱śam̐so̍
de̱va indro̱ vana̱spati̍rde̱vaṃ ba̱rhirvāri̍tīnāṃ de̱vo
a̱gniḥ svi̍ṣṭa̱kṛdde̱vam ॥
ve̱tu̱ vi̱ya̱ntu̱ ca̱turvī̎tā̱meko̍ viyantu ca̱turve̍tu ।
a̱va̱rdha̱ya̱da̱va̱rdha̱ya̱ntrira̍vardhatā̱meko̍'vardhaya
m̐̐śca̱tura̍vardhayat । vasto̱rā va̱tsena̱
daivī̱rayā̱vīṣam̐ ha̱tāspṛ̍kṣaccha̱tena̱ diva̱mindram̐̐
svāsa̱stham̐̐ svi̍ṣṭam । svi̍ṣṭam̐ śikṣi̱te śi̍kṣi̱te śi̍kṣi̱tau
॥))

**[[2-6-11-1]]**

होता॑ यक्षत्स॒मिधा॒ऽग्निमि॒डस्प॒दे।
अ॒श्विनेन्द्र॒ꣳ॒ सर॑स्वतीम्।
अ॒जो धू॒म्रो न गो॒धू॒मैः क्वलै᳚र्भे॒ष॒जम्।
मधु॒ शष्पै॒र्न तेज॑ इन्द्रि॒यम्।
पय॒ः सोम॑ः परि॒स्रुता॑ घृ॒तं मधु॑।
वि॒यन्त्वाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्ष॒त्तनू॒नपा॒त्सर॑स्वती।
अवि॑र्मे॒षो न भे॑ष॒जम्।
प॒था मधु॑म॒ताऽऽभ॑रन्।
अ॒श्विनेन्द्रा॑य वी॒र्य᳚म्॥ १॥

((hotā̎ yakṣatsa̱midhā̱'gnimi̱ḍaspa̱de ।
a̱śvinendra̱m̱̐ sara̍svatīm ।
a̱jo dhū̱mro na go̱dhūma̱iḥ kva̍lairbheṣa̱jam ।
madhu̱ śaṣpa̱irna teja̍ indri̱yam ।
paya̱ḥ soma̍ḥ pari̱srutā̎ ghṛ̱taṃ madhu̍ ।
vi̱yantvājya̍sya̱ hota̱ryaja̍ ।
hotā̎ yakṣa̱ttanū̱napā̱tsara̍svatī ।
avi̍rme̱ṣo na bhe̍ṣa̱jam ।
pa̱thā madhu̍ma̱tā''bha̍ran ।
a̱śvinendrā̎ya vī̱ryā̎m ॥ 1 ॥))

**[[2-6-11-2]]**

बद॑रैरुप॒वाका॑भिर्भे॒षजं तोक्म॑भिः।
पय॒ः सोम॑ः परि॒स्रुता॑ घृ॒तं मधु॑।
वि॒यन्त्वाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्ष॒न्नरा॒शꣳस॒ं न न॒ग्नहु᳚म्।
प॒ति॒ꣳसुरा॑यै भे॒षजम्।
मे॒षः सर॑स्वती भि॒षक्।
रथो॒ न च॒न्द्र्य॑श्विनो᳚र्व॒पा इन्द्र॑स्य वी॒र्य᳚म्।
बद॑रैरुप॒वाका॑भिर्भे॒षजं तोक्म॑भिः।
पय॒ः सोम॑ः परि॒स्रुता॑ घृ॒तं मधु॑।
वि॒यन्त्वाज्य॑स्य॒ होत॒र्यज॑॥ २॥

((bada̍rairupa̱vākā̎bhirbheṣa̱jaṃ tokma̍bhiḥ ।
paya̱ḥ soma̍ḥ pari̱srutā̎ ghṛ̱taṃ madhu̍ ।
vi̱yantvājya̍sya̱ hota̱ryaja̍ ।
hotā̎ yakṣannarā̱śam̐sa̱ṃ na na̱gnahu̎m ।
pati̱m̱̐surā̎yai bheṣa̱jam ।
me̱ṣaḥ sara̍svatī bhi̱ṣak ।
ratho̱ na ca̱ndrya̍śvino̎rva̱pā indra̍sya vī̱ryā̎m ।
bada̍rairupa̱vākā̎bhirbheṣa̱jaṃ tokma̍bhiḥ ।
paya̱ḥ soma̍ḥ pari̱srutā̎ ghṛ̱taṃ madhu̍ ।
vi̱yantvājya̍sya̱ hota̱ryaja̍ ॥ 2 ॥))

**[[2-6-11-3]]**

होता॑ यक्षदि॒डेडि॒त आ॒जुह्वा॑न॒ः सर॑स्वतीम्।
इन्द्र॒ं बले॑न व॒र्धय॑न्।
ऋ॒ष॒भेण॒ गवे᳚न्द्रि॒यम्।
अ॒श्विनेन्द्रा॑य वी॒र्य᳚म्।

यवैः॑ क॒र्कन्धु॑भिः।
मधु॑ ला॒जैर्न मास॑रम्।
पयः॒ सोमः॑ परि॒स्रुता॑ घृ॒तं मधु॑।
वि॒यन्त्वाज्य॑स्य॒ हो॒त॒र्यज॑।
होता॑ यक्षद्ब॒र्हिः सु॒ष्टरी॒मोर्ण॑म्रदाः।
भि॒षङ्नास॑त्या॥ ३॥

((hotā̍ yakṣadi̱ḍe̱dita ā̱juhvā̍na̱ḥ sara̍svatīm ।
indra̱ṃ bale̍na va̱rdhaya̍n ।
ṛ̱ṣa̱bheṇa̱ gave̍ndri̱yam ।
a̱śvinendrā̍ya vī̱ryā̍m ।
yavai̍ḥ ka̱rkandhu̍bhiḥ ।
madhu̍ lā̱jairna māsa̍ram।
paya̱ḥ soma̍ḥ pari̱srutā̍ ghṛ̱taṃ madhu̍ ।
vi̱yantvājya̍sya̱ hota̱ryaja̍ ।
hotā̍ yakṣadba̱rhiḥ su̱ṣṭarī̱morṇa̍mradāḥ ।
bhi̱ṣaṅnāsa̍tyā ॥ 3 ॥))

**[[2-6-11-4]]**

भि॒षजा॒ऽश्विनाऽश्वा॒ शिशु॑मती।
भि॒षग्धे॒नुः सर॑स्वती।
भि॒षग्दु॒ह इन्द्रा॑य भेष॒जम्।
पयः॒ सोमः॑ परि॒स्रुता॑ घृ॒तं मधु॑।
वि॒यन्त्वाज्य॑स्य॒ हो॒त॒र्यज॑।
होता॑ यक्ष॒द्दुरो॒ दिशः॑।
क॒व॒ष्यो॑ न॒ व्यच॑स्वतीः।
अ॒श्विभ्यां॒ न दुरो॒ दिशः॑।
इन्द्रो॒ न रोद॑सी॒ दुघे॑।
दु॒हे कामा॒न्त्सर॑स्वती॥ ४॥

((bhi̱ṣajā̱'śvinā'śvā̱ śiśu̍matī ।
bhi̱ṣagdhe̱nuḥ sara̍svatī ।
bhi̱ṣagdu̱ha indrā̍ya bheṣa̱jam ।
paya̱ḥ soma̍ḥ pari̱srutā̍ ghṛ̱taṃ madhu̍ ।
vi̱yantvājya̍sya̱ hota̱ryaja̍ ।
hotā̍ yakṣa̱dduro̱ diśa̍ḥ ।
ka̱va̱ṣyo̍ na̱ vyaca̍svatīḥ ।
a̱śvibhyā̱ṃ na duro̱ diśa̍ḥ ।
indro̱ na roda̍sī̱ dughe̍ ।
du̱he kāmā̱ntsara̍svatī ॥ 4 ॥))

**[[2-6-11-5]]**

अ॒श्विनेन्द्रा॑य भेष॒जम्।
शु॒क्रं न ज्योति॑रिन्द्रि॒यम्।
पयः॒ सोमः॑ परि॒स्रुता॑ घृ॒तं मधु॑।
वि॒यन्त्वाज्य॑स्य॒ हो॒त॒र्यज॑।
होता॑ यक्षत्सु॒पेश॑सो॒षे नक्तं॒दिवा॑।
अ॒श्विना॑ सं॒जाना॒ने।
सम॑ञ्जाते॒ सर॑स्वत्या।
त्विषि॒मिन्द्रे॒ न भे॑ष॒जम्।
श्ये॒नो न रज॑सा हृ॒दा।
पयः॒ सोमः॑ परि॒स्रुता॑ घृ॒तं मधु॑॥ ५॥

((a̱śvinendrā̍ya bheṣa̱jam ।
śu̱kraṃ na jyoti̍rindri̱yam ।
paya̱ḥ soma̍ḥ pari̱srutā̍ ghṛ̱taṃ madhu̍ ।
vi̱yantvājya̍sya̱ hota̱ryaja̍ ।
hotā̍ yakṣatsu̱peśa̍so̱ṣe naktaṃ̱divā̍ ।
a̱śvinā̍ saṃ̱jānā̱ne ।
samā̍ñjāte̱ sara̍svatyā ।
tviṣi̱mindre̱ na bhe̍ṣajam ।
śye̱no na raja̍sā hṛ̱dā ।
paya̱ḥ soma̍ḥ pari̱srutā̍ ghṛ̱taṃ madhu̍ ॥ 5 ॥))

**[[2-6-11-6]]**

वि॒यन्त्वाज्य॑स्य॒ हो॒त॒र्यज॑।
होता॑ यक्ष॒द्दैव्या॒ होता॑रा भि॒षजा॒ऽश्विना॑।
इन्द्रं॒ न जागृ॑वी॒ दिवा॒ नक्तं॒ न भे॑ष॒जैः।
शूष॑ꣳ सर॑स्वती भि॒षक्।
सीसे॑न दुह इन्द्रि॒यम्।
पयः॒ सोमः॑ परि॒स्रुता॑ घृ॒तं मधु॑।
वि॒यन्त्वाज्य॑स्य॒ हो॒त॒र्यज॑।
होता॑ यक्षत्ति॒स्रो दे॒वीर्न भे॑ष॒जम्।
त्रय॑स्त्रि॒धात॑वो॒ऽपसः॑।
रू॒पमिन्द्रे॑ हिर॒ण्यय॑म्॥

((vi̱yantvājya̍sya̱ hota̱ryaja̍ ।
hotā̍ yakṣa̱ddaivyā̱ hotā̍rā bhi̱ṣajā̱'śvinā̍ ।
indra̱ṃ na jāgṛ̍vī̱ divā̱ nakta̱ṃ na bhe̍ṣa̱jaiḥ ।
śūṣa̱ṃ sara̍svatī bhi̱ṣak ।
sīse̍na duha indri̱yam ।
paya̱ḥ soma̍ḥ pari̱srutā̍ ghṛ̱taṃ madhu̍ ।
vi̱yantvājya̍sya̱ hota̱ryaja̍ ।
hotā̍ yakṣattisro de̱vīrna bhe̍ṣajam ।
trayā̍stri̱dhāta̍vo̱'pasa̍ḥ ।
rū̱pamindre̍ hira̱ṇyayā̍m ॥))

**[[2-6-11-7]]**

अ॒श्विनेडा॒ न भार॑ती।
वा॒चा सर॑स्वती।

मह॒ इन्द्रा॑य दधुरिन्द्रि॒यम्।
पय॒ः सोम॑ः परि॒स्रुता॑ घृ॒तं मधु॑।
वि॒यन्त्वाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्ष॒त्त्वष्टा॑र॒मिन्द्र॑म॒श्विना᳚।
भी॒षजं॒ न सर॑स्वतीम्।
ओजो॒ न जू॒तिरि॑न्द्रि॒यम्।
वृको॒ न र॑भ॒सो भि॒षक्।
यश॒ः सुर॑या भे॒षजम्॥ ७॥

((a̱śvineḍā̱ na bhāra̍tī ।
vā̱cā sara̍svatī ।
maha̱ indra̍ya dadhurindri̱yam ।
paya̱ḥ soma̍ḥ pari̱srutā̍ ghṛ̱taṃ madhu̍ ।
vi̱yantvājya̍sya̱ hota̱ryaja̍ ।
hotā̍ yakṣa̱ttvaṣṭā̍ra̱mindra̍ma̱śvinā̎ ।
bhī̱ṣaja̱ṃ na sara̍svatīm ।
ojo̱ na jū̱tiri̍ndri̱yam ।
vṛko̱ na ra̍bha̱so bhi̱ṣak ।
yaśa̱ḥ sura̍yā bheṣa̱jam ॥ 7 ॥))

**[[2-6-11-8]]**

श्रि॒या न मास॑रम्।
पय॒ः सोम॑ः परि॒स्रुता॑ घृ॒तं मधु॑।
वि॒यन्त्वाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्ष॒द्वन॒स्पति᳚म्।
श॒मि॒तार॑ꣳ श॒तक्र॑तुम्।
भी॒मं न म॒न्युꣳ राजा॑नं व्या॒घ्रं नम॑सा॒ऽश्विना॒ भाम᳚म्।
सर॑स्वती भि॒षक्।
इन्द्रा॑य दुह इन्द्रि॒यम्।
पय॒ः सोम॑ः परि॒स्रुता॑ घृ॒तं मधु॑।
वि॒यन्त्वाज्य॑स्य॒ होत॒र्यज॑॥ ८॥

((śri̱yā na māsa̍ram ।
paya̱ḥ soma̍ḥ pari̱srutā̍ ghṛ̱taṃ madhu̍ ।
vi̱yantvājya̍sya̱ hota̱ryaja̍ ।
hotā̍ yakṣa̱dvana̱spati̎m ।
śa̱mi̱tāra̍m̐ śa̱takra̍tum ।
bhī̱maṃ na ma̱nyum̐ rājā̍naṃ vyā̱ghraṃ
nama̍sā̱'śvinā̱ bhāma̎m ।
sara̍svatī bhi̱ṣak ।
indrā̍ya duha indri̱yam ।
paya̱ḥ soma̍ḥ pari̱srutā̍ ghṛ̱taṃ madhu̍ ।
vi̱yantvājya̍sya̱ hota̱ryaja̍ ॥ 8 ॥))

**[[2-6-11-9]]**

होता॑ यक्षद॒ग्निꣳ स्वाहाऽऽज्य॑स्य स्तो॒काना᳚म्।
स्वाहा॒ मेद॑सां॒ पृथ॑क्।
स्वाहा॒ छाग॑म॒श्विभ्या᳚म्।
स्वाहा॑ मे॒षꣳ सर॑स्वत्यै।
स्वाह॑र्ष॒भमिन्द्रा॑य सि॒ꣳहाय॒ सह॑सेन्द्रि॒यम्।
स्वाहा॒ऽग्निं न भे॑ष॒जम्।
स्वाहा॒ सोम॑मिन्द्रि॒यम्।
स्वाहेन्द्र॑ꣳ सु॒त्रामा॑नꣳ सवि॒तार॒ं वरु॑णं भि॒षजां॒ पति᳚म्।
स्वाहा॒ वन॒स्पति॑ं प्रि॒यं पाथो॒ न भे॑ष॒जम्।
स्वहा॑ दे॒वाꣳ आ᳚ज्य॒पान्॥ ९॥

((hotā̍ yakṣada̱gnim̐̎ svāhā''jya̍sya sto̱kānā̎m ।
svāhā̱ meda̍sā̱ṃ pṛtha̍k ।
svāhā̱ chāga̍ma̱śvibhyā̎m ।
svāhā̍ me̱ṣam̐ sara̍svatyai ।
svāha̍rṣa̱bhamindrā̍ya si̱m̐hāya̱ saha̍sendri̱yam ।
svāhā̱'gni̍ṃ na bhe̍ṣa̱jam ।
svāhā̱ soma̍mindri̱yam ।
svāhendra̍m̐ su̱trāmā̍nam̐ savi̱tāra̱ṃ va̍ruṇaṃ
bhi̱ṣajā̱ṃ pati̎m ।
svāhā̱ vana̱spati̍ṃ pri̱yaṃ pātho̱ na bhe̍ṣa̱jam ।
svahā̍ de̱vām̐ ā̎jya̱pān ॥ 9 ॥))

**[[2-6-11-10]]**

स्वाहा॒ऽग्निꣳ हो॒त्राज्जु॒षा॒णो अ॒ग्निर्भे॑ष॒जम्।
पय॒ः सोम॑ः परि॒स्रुता॑ घृ॒तं मधु॑।
वि॒यन्त्वाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्षद॒श्विना॒ सर॑स्व॒तीमिन्द्र॑ꣳ सु॒त्रामा॑णम्।
इ॒मे सोमा᳚ः सु॒रामा॑णः।
छाग॑ैर्न मे॒षैर्ऋ॑ष॒भैः सु॒ताः।
शष्पै॑र्न तोक्म॑भिः।
ला॒जैर्मह॑स्वन्तः।
मदा॒ मास॑रेण॒ परि॑ष्कृताः।
शु॒क्राः पय॑स्वन्तो॒ऽमृता᳚ः।
प्रस्थि॑ता वो मधु॒श्चुत॑ः।
तान॒श्विना॒ सर॑स्व॒तीन्द्र॑ः सु॒त्रामा॑ वृत्र॒हा।
जु॒षन्ता॑ꣳ सौ॒म्यं मधु॑।
पिब॑न्तु॒ मद॑न्तु॒ वि॒यन्तु॒ सोम᳚म्।
होत॒र्यज॑॥ १०॥
वी॒र्य॑ं वि॒यन्त्वाज्य॑स्य॒ होत॒र्यज॒ नास॑त्या॒ सर॑स्वती॒ मधु॑
हि॒रण्य॑यं॒ भेष॑जं वि॒यन्त्वाज्य॑स्य॒ होत॒र्यजा॒ज्य॑पा॒नमृ॒ता॒ पञ्च॑

च॥ ११॥

स॒मिधा॒ऽग्निꣳ ष॒ट्। त॒नूनपा᳚त्स॒प्त। न॒रा॒शꣳस॒मृ॒षि॑।
इ॒डे॒डि॒तो य॒वै॑र॒ष्टौ। ब॒र्हिः स॒प्त। दु॒रो॒ऽश्विना॒ नव॑।
सु॒पेश॑सो॒षे नक्त॒मृ॒षि॑ः। दैव्या॒ होता॑रा॒ सीसे॑न॒ रस॑ः।
ति॒स्रस्त्व॒ष्टा॑रम॒ष्टाव॑ष्टौ। व॒न॒स्पति॒मृ॒षि॑। अ॒ग्निं त्रयो॑दश।
अ॒श्विना॒ द्वाद॑श॒ त्रयो॑दश॥
स॒मिधा॒ऽग्निं बद॑रै॒र्बद॑रै॒र्यवै॑र॒श्विना॒ त्विषि॑म॒श्विना॒ न भे॑ष॒जꣳ
रू॒पम॒श्विना॑ भी॒मं भामा᳚म्॥

((svāha̱'gnim̐ ho̱trājjuśa̱ṇo a̱gnirbheṣa̱jam ।
paya̱ḥ somaḥ pari̱srutā ghṛ̱taṃ madhu ।
vi̱yantvājyasya̱ hota̱ryaja ।
hota yakṣada̱śvinā̱ sarasvatī̱mindram̐ su̱trāmāṇam ।
i̱me somā̎ḥ su̱rāmāṇaḥ ।
chāgai̱rna me̱ṣairṛ̱ṣa̱bhaiḥ su̱tāḥ ।
śaṣpai̱rna tokmabhiḥ ।
lā̱jairmahasvantaḥ ।
madā̱ māsare̱ṇa̱ pariṣkṛtāḥ ।
śu̱krāḥ payasvanto̱'mṛtā̎ḥ ।
prasthitā vo madhu̱ścutaḥ ।
tāna̱śvinā̱ sarasva̱tīndraḥ su̱trāmā vṛtra̱hā ।
ju̱ṣantām̐ sau̱myaṃ madhu ।
pibantu̱ madantu vi̱yantu̱ somā̎m ।
hota̱ryaja ॥ 10 ॥
vī̱ryaṃ vi̱yantvājyasya̱ hota̱ryaja̱ nāsatyā̱ sarasvatī̱
madhu hira̱ṇyayaṃ bheṣa̱jaṃ vi̱yantvājyasya̱
hota̱ryajā̎jya̱pāna̱mṛtā̱ pañca ca ॥ 11 ॥
sa̱midhā̱'gnim̐ ṣaṭ । tanū̱napā̎tsa̱pta । narā̱śam̐sa̱mṛṣi
। i̱ḍe̱ḍi̱to yavaira̱ṣṭau । ba̱rhiḥ sa̱pta । duro̱'śvinā̱ nava
। su̱peśaso̱ṣe nakta̱mṛṣiḥ । daivyā̱ hotārā̱ sīsena̱
rasaḥ । ti̱srastvaṣṭārama̱ṣṭāvaṣṭau । vana̱spati̱mṛṣi ।
a̱gniṃ trayodaśa । a̱śvinā̱ dvādaśa̱ trayodaśa ॥
sa̱midhā̱'gniṃ badarai̱rbadarai̱ryavaira̱śvinā̱
tviṣima̱śvinā̱ na bheṣa̱jam̐ rū̱pama̱śvinā bhī̱maṃ
bhāmā̎m ॥))

**[[2-6-12-1]]**

समि॑द्धो अ॒ग्निर॑श्विना।
त॒प्तो घ॒र्मो वि॒राट्थ्सु॒तः।
दु॒हे धे॒नुः सर॑स्वती।
सोम॑ꣳ शु॒क्रमि॒हेन्द्रि॒यम्।
त॒नूपा भि॒षजा॑ सु॒ते।
अ॒श्विनो॒भा सर॑स्वती।
मध्वा॒ रजा॑ꣳसीन्द्रि॒यम्।
इन्द्रा॑य प॒थिभि॒र्वहान्।
इन्द्रा॒येन्दु॒ꣳ सर॑स्वती।
न॒रा॒शꣳसे॑न न॒ग्नहु॑ः॥ १॥

((samiddho a̱gniraśvinā ।
ta̱pto gha̱rmo vi̱rāṭthsu̱taḥ ।
du̱he dhe̱nuḥ sarasvatī ।
somam̐ śu̱krami̱hendri̱yam ।
ta̱nū̱pā bhi̱ṣajā su̱te ।
a̱śvino̱bhā sarasvatī ।
madhvā̱ rajām̐sīndri̱yam ।
indrāya pa̱thibhirvahān ।
indrā̱yendu̱m̐ sarasvatī ।
narā̱śam̐sena na̱gnahuḥ ॥ 1 ॥))

**[[2-6-12-2]]**

अधा॑ताम॒श्विना॒ मधु॑।
भे॒ष॒जं भि॒षजा॑ सु॒ते।
आ॒जु॒ह्वाना॒ सर॑स्वती।
इन्द्रा॑येन्द्रि॒याणि॑ वी॒र्या᳚म्।
इडा॑भिर॒श्विना॒विषा᳚म्।
समू॒र्ज॒ꣳ सꣳ र॒यिं द॑धुः।
अ॒श्वि॑ना॒ नमु॑चेः सु॒तम्।
सोम॑ꣳ शु॒क्रं परि॑स्रु॒ता᳚।
सर॑स्वती॒ तमाभ॑रत्।
ब॒र्हि॒षेन्द्रा॑य॒ पात॑वे॥ २॥

((adhātāma̱śvinā̱ madhu ।
bhe̱ṣa̱jaṃ bhi̱ṣajā su̱te ।
ā̱juhvānā̱ sarasvatī ।
indrāyendri̱yāṇi vī̱ryā̎m ।
iḍābhiraśvinā̱viṣā̎m ।
samūrja̱m̐ sam̐ ra̱yiṃ dadhuḥ ।
aśvinā̱ namuceḥ su̱tam ।
somam̐ śu̱kraṃ pari̱srutā̎ ।
sarasvatī̱ tamābharat ।
ba̱rhiṣendrāya̱ pātave ॥ 2 ॥))

**[[2-6-12-3]]**

क॒वष्यौ॒ न व्यच॑स्वतीः।
अ॒श्विभ्यां॒ न दुरो॒ दिश॑ः।
इन्द्रो॒ न रोद॑सी॒ दुघे᳚।
दु॒हे कामा॒न्त्सर॑स्वती।
उ॒षासा॒ नक्त॑म॒श्विना।
दिवेन्द्र॑ꣳ सा॒यमि॑न्द्रि॒यैः।
सं॒जा॒नाने॒ सु॒पेश॑सा।
सम॑ञ्जा॒ते॒ सर॑स्वत्या।
पा॒तं नो॑ अ॒श्विना॒ दिवा᳚।

पा॒हि नक्त॑ꣳ सरस्वति॥ ३॥

((ka̱va̱ṣyo̍ na vyaca̍svatīḥ ।
a̱śvibhyā̱ṃ na duro̱ diśa̍ḥ ।
indro̱ na roda̍sī̱ dughe̎ ।
du̱he kāma̱ntsara̍svatī ।
u̱ṣāsā̱ nakta̍maśvinā ।
divendra̍ṁ sā̱yamindri̍yaiḥ ।
sa̱ṃjā̱nā̱ne su̱peśa̍sā ।
sama̍ñjāte̱ sara̍svatyā ।
pā̱taṃ no̍ aśvinā̱ divā̎ ।
pā̱hi nakta̍ṁ sarasvati ॥ 3 ॥))

**[[2-6-12-4]]**

दैव्या॑ हो॒तारा भिषजा।
पा॒तमिन्द्र॒ꣳ सचा॑ सु॒ते।
ति॒स्रस्त्रे॒धा सर॑स्वती।
अ॒श्विना भा॒रतीडाॎ।
ती॒व्रं पर॑ि॒स्रुता॒ सोमाॎम्।
इन्द्रा॑य सुषवु॒र्मदाॎम्।
अ॒श्वि॑ना भे॒षजं मधु॑।
भे॒षजं न॒ः सर॑स्वती।
इन्द्रे॒ त्वष्टा॒ यश॒ः श्रियाॎम्।
रू॒पꣳ रू॑पमधुः सु॒ते।
ऋ॒तु॒थेन्द्रो॒ व॒न॒स्पति॑ः।
श॒शा॒मा॒नः पर॑ि॒स्रुताॎ।
की॒ला॒ल॑म॒श्विभ्या॒ं मधु॑।
दु॒हे धे॒नुः सर॑स्वती।
गोभि॒र्न सोम॑मश्विना।
मा॒सर॑ेण परि॒ष्कृताॎ।
सम॑धाता॒ꣳ सर॑स्वत्या।
स्वाहेन्द्रे॑ सु॒तं मधु॑॥ ४॥
न॒ग्नहु॒ः पात॑वे सरस्वत्यधुः सु॒तेॎऽष्टौ च॑॥ १२॥

((daivya̍ hotārā bhiṣajā ।
pā̱tamindra̱ṁ sacā̍ su̱te ।
ti̱srastre̱dhā sara̍svatī ।
a̱śvinā̱ bhāra̱tīḍā̎ ।
tī̱vraṃ pari̍sru̱tā̱ somä̎m ।
indrā̍ya suṣavu̱rmadä̎m ।
aśvi̍nā bheṣa̱jaṃ madhu̍ ।
bhe̱ṣajaṃ na̱ḥ sara̍svatī ।
indre̱ tvaṣṭā̱ yaśa̱ḥ śriyä̎m ।
rū̱paṁ rū̍pamadhuḥ su̱te ।
ṛ̱tu̱thendro̱ va̱na̱spati̍ḥ ।
śa̱śa̱mā̱naḥ pari̍sru̱tā̎ ।
kī̱lā̱la̍ma̱śvibhyā̱ṃ madhu̍ ।
du̱he dhe̱nuḥ sara̍svatī ।
gobhi̱rna soma̍maśvinā ।
māsa̍reṇa pari̱ṣkṛtā̎ ।
sama̍dhātā̱ṁ sara̍svatyā ।
svāhendre̍ su̱taṃ madhu̍ ॥ 4 ॥
na̱gnahu̱ḥ pāta̍ve sarasvatyadhuḥ su̱te̎'ṣṭau ca̍ ॥ 12 ॥))

**[[2-6-13-1]]**

अ॒श्विना॑ ह॒विरि॑न्द्रि॒यम्।
नमु॑चेर्धि॒या सर॑स्वती।
आ शु॒क्रमा॑सु॒राद्व॒सु।
म॒घमिन्द्रा॑य जभ्रिरे।
यम॒श्विना॒ सर॑स्वती।
ह॒विषेन्द्र॒मव॑र्धयन्।
स बि॑भेद॒ व॒लं म॒घम्।
नमु॑चावासु॒रे सचाॎ।
तमिन्द्रं॑ प॒शव॒ः सचाॎ।
अ॒श्विनो॒भा सर॑स्वती॥ १॥

((a̱śvinā̍ ha̱virindri̱yam ।
namu̍cerdhi̱yā sara̍svatī ।
ā śu̱kramā̍su̱rādva̱su ।
ma̱ghamindrā̍ya jabhrire ।
yama̱śvinā̱ sara̍svatī ।
ha̱viṣendra̱mava̍rdhayan।
sa bi̍bheda va̱laṃ ma̱gham ।
namu̍cāvāsu̱re sacā̎ ।
tamindra̍ṃ pa̱śava̱ḥ sacā̎ ।
a̱śvino̱bhā sara̍svatī ॥ 1 ॥))

**[[2-6-13-2]]**

द॒धा॑ना अ॒भ्य॑नूषत।
ह॒विषा॑ य॒ज्ञमि॑न्द्रि॒यम्।
य इन्द्र॑ इन्द्रि॒यं द॒धुः।
स॒वि॒ता वरु॑णो॒ भगः॑।
स सु॒त्रामा॑ ह॒विष्प॑तिः।
यज॑मानाय सश्चत।
स॒वि॒ता वरु॑णो॒ दध॑त्।
यज॑मानाय दा॒शुषेॎ।
आद॑त्त॒ नमु॑चे॒र्वसु॑।
सु॒त्रामा॒ बल॑मिन्द्रि॒यम्॥ २॥

((dadhā̍nā a̱bhyá̍nūṣata ǀ
ha̱viṣā̍ ya̱jñamíndri̱yam ǀ
ya indrá indri̱yaṃ da̱dhuḥ ǀ
sa̱vi̱tā varú̍ṇo̱ bhagá̍ḥ ǀ
sa su̱trāmā̍ ha̱viṣpá̍tiḥ ǀ
yajá̍mānāya saścata ǀ
sa̱vi̱tā varú̍ṇo̱ dadhá̍t ǀ
yajá̍mānāya dā̱śuṣe̎ ǀ
ādá̍tta̱ namú̍ce̱rvasú̍ ǀ
su̱trāmā̱ balá̍mindri̱yam ǁ 2 ǁ))

[[2-6-13-3]]

वरु॑णः क्ष॒त्त्रमि॑न्द्रि॒यम्।

भगे॑न सवि॒ता श्रिय᳚म्।

सु॒त्रामा॒ यश॑सा॒ बल᳚म्।

द॒धा॑ना य॒ज्ञमा॑शत।

अ॒श्वि॑ना॒ गोभि॑रिन्द्रि॒यम्।

अश्वे॑भिर्वी॒र्य᳚ं बल᳚म्।

ह॒विषेन्द्र॒ꣳ᳚ सर॑स्वती।

यज॑मानमवर्ध॑यन्।

ता नास॑त्या सु॒पेश॑सा।

हिर॑ण्यवर्तनी॒ नरा᳚।

सर॑स्वती ह॒विष्म॑ती।

इन्द्र॒ कर्म॑सु नोऽवत।

ता भि॒षजा॑ सु॒कर्म॑णा।

सा सु॒दुघा॒ सर॑स्वती।

स वृ॑त्र॒हा श॒तक्र॑तुः।

इन्द्रा॑य दधुरिन्द्रि॒यम्॥ ३॥

उ॒भा सर॑स्वती॒ बल॑मिन्द्रि॒यं नरा॒ षट्च॑॥ १३॥

((varú̍ṇaḥ kṣa̱ttramíndri̱yam ǀ
bhagé̍na savi̱tā śriyä̍m ǀ
su̱trāmā̱ yaśá̍sā̱ balä̍m ǀ
dadhā̍nā ya̱jñamā̍śata ǀ
aśví̍nā̱ gobhí̍rindri̱yam ǀ
aśvé̍bhirvī̱ryaṃ̍ balä̍m ǀ
ha̱viṣendra̱ṃ̈ sará̍svatī ǀ
yajá̍mānamavardhayan ǀ
tā nāsá̍tyā su̱peśá̍sā ǀ
hirá̍ṇyavartanī̱ narä̍ ǀ
sará̍svatī ha̱viṣmá̍tī ǀ
indra̱ karmá̍su no'vata ǀ
tā bhi̱ṣajá̍ su̱karmá̍ṇā ǀ
sā su̱dughā̱ sará̍svatī ǀ
sa vṛ́̍tra̱hā śa̱takrá̍tuḥ ǀ
indrā̍ya dadhurindri̱yam ǁ 3 ǁ
u̱bhā sará̍svatī̱ balá̍mindri̱yaṃ narā̱ ṣaṭcá̍ ǁ 13 ǁ))

[[2-6-14-1]]

दे॒वं ब॒र्हिः सर॑स्वती।

सु॒दे॒वमिन्द्रे॑ अ॒श्विना᳚।

तेजो॒ न चक्षु॑र॒क्ष्योः।

ब॒र्हिषा॑ दधुरिन्द्रि॒यम्।

व॒सु॒वने॑ वसु॒धेय॑स्य वियन्तु॒ यज॑।

दे॒वीर्द्वारो॑ अ॒श्विना᳚।

भि॒षजेन्द्रे॒ सर॑स्वती।

प्रा॒णं न वी॒र्यं॑ न॒सि।

द्वारो॑ दधुरिन्द्रि॒यम्।

व॒सु॒वने॑ वसु॒धेय॑स्य वियन्तु॒ यज॑॥ १॥

((de̱vaṃ ba̱rhiḥ sará̍svatī ǀ
su̱de̱vamindré̍ a̱śvinä̍ ǀ
tejo̱ na cakṣú̍ra̱kṣyoḥ ǀ
ba̱rhiṣā̍ dadhurindri̱yam ǀ
va̱su̱vané̍ vasu̱dheyá̍sya viyantu̱ yajá̍ ǀ
de̱vīrdvāró̍ a̱śvinä̍ ǀ
bhi̱ṣajendre̱ sará̍svatī ǀ
prā̱ṇaṃ na vī̱ryaṃ na̱si ǀ
dvāró̍ dadhurindri̱yam ǀ
va̱su̱vané̍ vasu̱dheyá̍sya viyantu̱ yajá̍ ǁ 1 ǁ))

[[2-6-14-2]]

दे॒वी उ॒षासा॑व॒श्विना᳚।

भि॒षजेन्द्रे॒ सर॑स्वती।

बल॒ं न वाच॑मा॒स्ये᳚।

उ॒षाभ्या᳚ं दधुरिन्द्रि॒यम्।

व॒सु॒वने॑ वसु॒धेय॑स्य वियन्तु॒ यज॑।

दे॒वी जोष्ट्री॑ अ॒श्विना᳚।

सु॒त्रामेन्द्रे॒ सर॑स्वती।

श्रोत्र॒ं न कर्ण॑यो॒र्यशः॑।

जो॒ष्ट्री᳚भ्यां दधुरिन्द्रि॒यम्।

व॒सु॒वने॑ वसु॒धेय॑स्य वियन्तु॒ यज॑॥ २॥

((de̱vī u̱ṣāsá̍va̱śvinä̍ ǀ
bhi̱ṣajendre̱ sará̍svatī ǀ
bala̱ṃ na vācá̍mā̱sye̎ ǀ
u̱ṣābhyā̍ṃ̈ dadhurindri̱yam ǀ
va̱su̱vané̍ vasu̱dheyá̍sya viyantu̱ yajá̍ ǀ
de̱vī jo̱ṣṭrí̍ a̱śvinä̍ ǀ
su̱trāmendre̱ sará̍svatī ǀ
śrotra̱ṃ na kaṟṇá̍yo̱ryaśá̍ḥ ǀ
jo̱ṣṭrī̈bhyā̱ṃ dadhurindri̱yam ǀ
va̱su̱vané̍ vasu̱dheyá̍sya viyantu̱ yajá̍ ǁ 2 ǁ))

**[[2-6-14-3]]**

दे॒वी ऊ॒र्जाहु॑ती॒ दुघे॑ सु॒दुघे᳚।
प॒य॒सेन्द्र॒ꣳ॒ सर॑स्वत्य॒श्विना॑ भि॒षजा॒ऽवत।
शु॒क्रं न ज्योति॒ः स्तन॑यो॒राहु॑ती धत्त इन्द्रि॒यम्।
व॒सु॒वने॑ वसु॒धेय॑स्य वियन्तु॒ यज॑।
दे॒वा दे॒वाना᳚ं भि॒षजा᳚।
होता॑रा॒विन्द्र॑म॒श्विना᳚।
व॒ष॒ट्का॒रैः सर॑स्वती।
त्विषिं॒ न हृ॒दये॑ म॒तिम्।
होतृ॒भ्यां दधुरिन्द्रि॒यम्।
व॒सु॒वने॑ वसु॒धेय॑स्य वियन्तु॒ यज॑॥ ३॥

((de̱vī ū̱rjāhu̍tī̱ dughe̍ su̱dughe̎ |
paya̱sendra̱m̐ sara̍svatya̱śvinā̍ bhi̱ṣajā̍'vata |
śu̱kraṃ na jyoti̱ḥ stana̍yo̱rāhu̍tī dhatta indri̱yam |
va̱su̱vane̍ vasu̱dheya̍sya viyantu̱ yajā̍ |
de̱vā de̱vānā̎m̐ bhi̱ṣajā̎ |
hotā̍rā̱vindra̍ma̱śvinā̎ |
va̱ṣa̱ṭkā̱raiḥ sara̍svatī |
tviṣi̱ṃ na hṛ̱daye̍ ma̱tim |
hotṛ̍bhyā̱ṃ dadhurindri̱yam |
va̱su̱vane̍ vasu̱dheya̍sya viyantu̱ yajā̍ || 3 ||))

**[[2-6-14-4]]**

दे॒वीस्ति॒स्रस्ति॒स्रो दे॒वीः।
सर॑स्वत्य॒श्विना॒ भार॒तीडा᳚।
शूषं॒ न मध्ये॒ नाभ्या᳚म्।
इन्द्रा॑य दधुरिन्द्रि॒यम्।
व॒सु॒वने॑ वसु॒धेय॑स्य वियन्तु॒ यज॑।
दे॒व इन्द्रो॒ नरा॒शꣳस॑ः।
त्रि॒व॒रू॒थः सर॑स्वत्या॒ऽश्विभ्या᳚मीयते॒ रथ॑ः।
रेतो॒ न रू॒पम॒मृतं॑ ज॒नित्र᳚म्।
इन्द्रा॑य॒ त्वष्टा॒ दध॑दिन्द्रि॒याणि॑।
व॒सु॒वने॑ वसु॒धेय॑स्य वियन्तु॒ यज॑॥ ४॥

((de̱vīsti̱srasti̱sro de̱vīḥ |
sara̍svatya̱śvinā̱ bhāra̱tīḍā̎ |
śūṣa̱ṃ na madhye̱ nābhyā̎m |
indrā̍ya dadhurindri̱yam |
va̱su̱vane̍ vasu̱dheya̍sya viyantu̱ yajā̍ |
de̱va indro̱ narā̱śam̐sa̍ḥ |
tri̱va̱rū̱thaḥ sara̍svatyā̱'śvibhyā̎mīyate̱ ratha̍ḥ |
reto̱ na rū̱pama̱mṛta̍ṃ ja̱nitrā̎m |
indrā̍ya̱ tvaṣṭā̱ dadha̍dindri̱yāṇi̍ |
va̱su̱vane̍ vasu̱dheya̍sya viyantu̱ yajā̍ || 4 ||))

**[[2-6-14-5]]**

दे॒व इन्द्रो॒ व॒न॒स्पति॑ः।
हि॒र॑ण्यपर्णो॒ अ॒श्विभ्या᳚म्।
सर॑स्वत्याः सुपि॒प्प॒लः।
इन्द्रा॑य पच्यते॒ मधु॑।
ओजो॒ न जू॒तिमृ॑ष॒भो न भाम᳚म्।
व॒न॒स॒पति॑र्नो॒ दध॑दिन्द्रि॒याणि॑।
व॒सु॒वने॑ वसु॒धेय॑स्य वियन्तु॒ यज॑।
दे॒वं ब॒र्हिर्वारि॑तीनाम्।
अ॒ध्व॒रे स्ती॒र्णम॒श्विभ्या᳚म्।
ऊर्ण॑म्रदाः॒ सर॑स्वत्याः॥ ५॥

((de̱va indro̱ vana̱spati̍ḥ |
hira̱ṇyaparṇo̱ a̱śvibhyā̎m |
sara̍svatyāḥ supippa̱laḥ |
indrā̍ya pacyate̱ madhu̍ |
ojo̱ na jū̱timṛ̍ṣa̱bho na bhāmā̎m |
vana̱sapati̍rno̱ dadha̍dindri̱yāṇi̍ |
va̱su̱vane̍ vasu̱dheya̍sya viyantu̱ yajā̍ |
de̱vaṃ ba̱rhirvāri̍tīnām |
a̱dhva̱re stī̱rṇama̱śvibhyā̎m |
ūrṇa̍mrada̱ḥ sara̍svatyāḥ || 5 ||))

**[[2-6-14-6]]**

स्यो॒नमि॑न्द्र ते॒ सद॑ः।
ई॒शायै॑ म॒न्युꣳ॒ राजा॑नं ब॒र्हिषा॑ दधुरिन्द्रि॒यम्।
व॒सु॒वने॑ वसु॒धेय॑स्य वियन्तु॒ यज॑।
दे॒वो अ॒ग्निः स्वि॑ष्ट॒कृत्।
दे॒वान्य॑क्षद्यथाय॒थम्।
होता॑रा॒विन्द्र॑म॒श्विना᳚।
वा॒चा वा॒चꣳ॒ सर॑स्वतीम्।
अ॒ग्निꣳ सोम॒ꣳ॒ स्वि॒ष्ट॒कृत्।
स्वि॒ष्ट इन्द्र॑ः सु॒त्रामा॑ सवि॒ता वरु॑णो भि॒षक्।
इ॒ष्टो दे॒वो वन॒सप॒ति॑ः।
स्वि॒ष्टा दे॒वा आ᳚ज्य॒पाः।
इ॒ष्टो अ॒ग्निर॒ग्निना᳚।
होता॑ हो॒त्रे स्वि॒ष्ट॒कृत्।
यशो॒ न दध॑दिन्द्रि॒यम्।
ऊर्ज॒मप॑चितिꣳ॒ स्व॒धाम्।

व॒सु॒वने॑ वसु॒धेय॑स्य वियन्तु॒ यज॑॥ ६॥
द्वारो॑ दधुरि॒न्द्रियं॒ वसु॑वने॑ वसु॒धेय॑स्य वियन्तु॒ यज॒
जोष्ट्री॒भ्यां दधुरि॒न्द्रियं॒ वसु॑वने॑ वसु॒धेय॑स्य वियन्तु॒ यज॒
होतृ॒भ्यां दधुरि॒न्द्रियं॒ वसु॑वने॑ वसु॒धेय॑स्य वियन्तु॒
यजॆ॑न्द्रि॒याणि॑ वसुवने॑ वसु॒धेय॑स्य वियन्तु॒ यज॒ सर॑स्वत्या॒
वन॒स्पति॒ः षट्च॑॥ १४॥
दे॒वं ब॒र्हिर्दे॒वीर्द्वारो॑ दे॒वी उ॒षासा॑व॒श्विना॑ दे॒वी जोष्ट्री॑ दे॒वी
ऊ॒र्जाहु॑ती दे॒वा दे॒वाना॑ँ भि॒षजा॑ वषट्का॒रैर्दे॒वीस्ति॒स्रस्ति॒स्रो
दे॒वीः सर॑स्वती दे॒व इन्द्रो॒ नरा॒शꣳसो॑ दे॒व इन्द्रो॒
वन॒स्पति॑र्दे॒वं ब॒र्हिवारि॑तीनां दे॒वो अ॒ग्निः स्वि॑ष्ट॒कृद्दे॒वान्॥
स॒मिधा॒ऽग्निं दे॒वं ब॒र्हिः सर॑स्वत्य॒श्विना॒ सर्वं॑ वियन्तु।
द्वार॑स्ति॒स्रः सर्वं॑ वियन्तु। अ॒ज इन्द्र॒मोजो॒ऽग्निंपर॒ः
सर॑स्वतीम्। नक्तं॒पूर्व॒ः सर॑स्वति। अ॒न्यत्र॒ सर॑स्वती।
भि॒षक्पूर्वं॑ दुह॑ इन्द्रि॒यम्। अ॒न्यत्र॒ दधु॑रिन्द्रि॒यम्।
सौ॒त्रा॒म॒ण्याꣳ सु॑तासु॒ती। अ॒ञ्जन्त्य॒यं यज॑मानः॥

((syo̱namindra te̱ sadaḥ |
ī̱śāyai ma̱nyuṁ rājānaṃ ba̱rhiṣā dadhurindri̱yam |
va̱su̱vane vasu̱dheyasya viyantu̱ yaja |
de̱vo a̱gniḥ sviṣṭa̱kṛt |
de̱vānyakṣadyathāya̱tham |
hotārā̱vindrama̱śvinā |
vā̱cā vāca̱ṃ sarasvatīm |
a̱gniṁ somaṁ sviṣṭa̱kṛt |
sviṣṭa̱ indraḥ su̱trāmā savi̱tā varuṇo bhi̱ṣak |
i̱ṣṭo de̱vo vana̱sapatiḥ |
sviṣṭā de̱vā ājya̱pāḥ |
i̱ṣṭo a̱gnira̱gninā |
hotā ho̱tre sviṣṭa̱kṛt |
yaśo̱ na dadhadindri̱yam |
ūrja̱mapacitiṁ sva̱dhām |
va̱su̱vane vasu̱dheyasya viyantu̱ yaja || 6 ||
dvāro dadhurindri̱yaṃ vasu̱vane vasu̱dheyasya
viyantu̱ yaja̱ joṣṭrībhyāṃ dadhurindri̱yaṃ vasu̱vane
vasu̱dheyasya viyantu̱ yaja̱ hotṛbhyāṃ
dadhurindri̱yaṃ vasu̱vane vasu̱dheyasya viyantu̱
yajëndri̱yāṇi vasu̱vane vasu̱dheyasya viyantu̱ yaja̱
sarasvatyā̱ vana̱spati̱ḥ ṣaṭca || 14 ||
de̱vaṃ ba̱rhirde̱vīrdvāro de̱vī u̱ṣāsāva̱śvinā de̱vī
joṣṭrī de̱vī ū̱rjāhutī de̱vā de̱vānāṁ bhi̱ṣajā
vaṣaṭkā̱rairde̱vīsti̱srasti̱sro de̱vīḥ sarasvatī de̱va
indro̱ narā̱śaṁso de̱va indro̱ vana̱spatirde̱vaṃ
ba̱rhivāritīnāṃ de̱vo a̱gniḥ sviṣṭa̱kṛdde̱vān ||
sa̱midhā̱'gniṃ de̱vaṃ ba̱rhiḥ sarasvatya̱śvinā̱
sarvaṃ viyantu | dvārasti̱sraḥ sarvaṃ viyantu | a̱ja
indra̱mojo̱'gniṃpara̱ḥ sarasvatīm | naktaṃ̱pūrva̱ḥ
sarasvati | a̱nyatra̱ sara̱svatī | bhi̱ṣakpūrvaṃ duha
indri̱yam | a̱nyatra̱ dadhurindri̱yam | sau̱trāma̱ṇyāṁ
sutāsu̱tī | a̱ñjantya̱yaṃ yajamānaḥ ||))

**[[2-6-15-1]]**

अ॒ग्निम॒द्य होता॑रमवृणीत।
अ॒यꣳ सु॑तासु॒ती यज॑मानः।
पच॒न्प॒क्तीः।
पच॒न्पु॒रो॒डाशा॑न्।
गृ॒ह्णन्ग्रहा॑न्।
ब॒न्धन्न॒श्विभ्या॒ं छाग॒ꣳ सर॑स्वत्या॒ इन्द्रा॑य।
ब॒न्धन्त्सर॑स्वत्यै मे॒षमिन्द्रा॑या॒श्विभ्या॑म्।
ब॒न्धन्निन्द्रा॑यर्ष॒भम॒श्विभ्या॒ꣳ सर॑स्वत्यै।
सू॒प॒स्था अ॒द्य दे॒वो वन॒स्पति॑रभवत्।
अ॒श्विभ्या॒ं छागे॑न॒ सर॑स्वत्या॒ इन्द्रा॑य॥ १॥

((a̱gnima̱dya hotāramavṛṇīta |
a̱yaṁ sutāsu̱tī yajamānaḥ |
pacanpa̱ktīḥ |
pacanpuro̱ḍāśān |
gṛhṇangrahān |
ba̱ndhanna̱śvibhyā̱ṃ chāga̱ṁ sarasvatyā̱ indrāya |
ba̱ndhantsarasvatyai me̱ṣamindrāyā̱śvibhyām |
ba̱ndhannindrāyarṣa̱bhama̱śvibhyā̱ṁ sarasvatyai |
sū̱pa̱sthā a̱dya de̱vo vana̱spatirabhavat |
a̱śvibhyā̱ṃ chāgena̱ sarasvatyā̱ indrāya || 1 ||))

**[[2-6-15-2]]**

सर॑स्वत्यै मे॒षेणेन्द्रा॑या॒श्विभ्या॑म्।
इन्द्रा॑यर्ष॒भेणा॒श्विभ्या॒ꣳ सर॑स्वत्यै।
अक्ष॒ꣳस्तान्मेद॑स्तः प्रति॑ पच॒ताऽग्र॑भीषुः।
अवी॑वृधन्त॒ ग्रहैः॑।
अपा॑ताम॒श्विना॒ सर॑स्व॒तीन्द्रः॑ सु॒त्रामा॑ वृत्र॒हा।
सोमा॑न्त्सु॒राम्ण॑ः।
उपो॑ उ॒क्थाम॒दाः श्रौ॒द्विम॒दा॑ अद॒न्।
अवी॑वृधन्ताङ्गू॒षैः।
त्वाम॒द्यर्षे॑ आर्षेयर्षीणां नपादवृणीत।
अ॒यꣳ सु॑तासु॒ती यज॑मानः।
ब॒हुभ्य॒ आसंग॑तेभ्यः।
ए॒ष मे॑ दे॒वेषु॒ वसु॒वार्या॑ य॑क्ष्यत॒ इति॑।
ता या दे॒वा दे॑वदाना॒न्यदु॑ः।
तान्य॑स्मा॒ आ च॒ शास्स्व॑।
आ च॑ गुरस्व।
इ॒षि॒तश्च॑ होत॒रसि॑ भद्र॒वाच्या॑य॒ प्रेषि॑तो॒ मानु॑षः।

सू॒क्तवा॒का॑य सू॒क्ता ब्रू॑हि॥ २॥
इन्द्रा॑य॒ यज॑मानः स॒प्त च॑॥ १५॥

((sara̍svatyai me̱ṣe̱ṇendra̍̍yā̱śvibhya̍̐m ।
indra̍̍yarṣa̱bhe̱ṇā̱śvibhyā̱m̐ sara̍svatyai ।
akṣa̱m̐stānme̍da̱staḥ prati̍ paca̱tā'gra̍bhīṣuḥ ।
avi̍vṛdhanta̱ graha̍i̍ḥ ।
apa̍tāma̱śvinā̱ sara̍sva̱tīndra̍ḥ su̱trāma̍ vṛtra̱hā ।
soma̍̍ntsu̱rāmṇa̍ḥ ।
upo̍ ukthāma̱dāḥ śrau̱dvimada̍ adan ।
avi̍vṛdhantā̱ṅgū̱ṣaiḥ ।
tvāma̱dyarṣa̍ ārṣeyarṣī̱ṇām̱ napādavṛ̱ṇīta ।
a̱yam̐ su̍tāsu̱tī yaja̍mānaḥ ।
ba̱hubhya̱ āsa̱ṃga̍tebhyaḥ ।
e̱ṣa me̍ de̱veṣu̱ vasu̱vāryā ya̍kṣyata̱ iti̍ ।
tā yā de̱vā de̍va̱dānā̱nyadu̍ḥ ।
tānya̍smā̱ ā ca̱ śāssva̍ ।
ā ca̍ gurasva ।
i̱ṣi̱taśca̍ hota̱rasi̍ bhadra̱vācyā̍ya̱ preṣi̍to̱ mānu̍ṣaḥ ।
sū̱ktavā̱kāya̍ sū̱ktā bru̍hi ॥ 2 ॥
indra̍̍ya̱ yaja̍mānaḥ sa̱pta ca̍ ॥ 15 ॥))

**[[2-6-16-1]]**

उ॒शन्त॑स्त्वा हवामह॒ आ नो॑ अग्ने सुके॒तुना॑ँ।
त्वꣳ सो॑म म॒हे भग॑ं त्वꣳ सो॑म॒ प्रचि॑कितो मनी॒षा।
त्वया॒ हि नः॑ पि॒तरः॑ सोम॒ पूर्वे॒ त्वꣳ सो॑म पि॒तृभिः॑
संवि॒दानः॑।
ब॒र्हि॒षदः पितर॒ आऽहं पि॒तॄन्।
उप॑हूताः पि॒तरो॑ऽग्नि॒ष्वात्ताः पितरः।
अ॒ग्नि॒ष्वा॒त्तानृ॑तु॒मतो॑ हवामहे।
नरा॒शꣳसे॑ सोमपी॒थं य आ॒शुः।
ते नो॒ अर्व॑न्तः सु॒हवा॑ भवन्तु।
शं नो॑ भवन्तु द्वि॒पदे॒ शं चतु॑ष्पदे।
ये अ॑ग्नि॒ष्वात्ता येऽन॑ग्नि॒ष्वात्ताः॥ १॥

((u̱śanta̍stvā havāmaha̱ ā no̍ agne suke̱tunā̍̐ ।
tvam̐ so̍ma ma̱he bhaga̱ṃ tvam̐ so̍ma̱ praci̍kito
manī̱ṣā ।
tvayā̱ hi na̍ḥ pi̱tara̍ḥ soma̱ pūrve̱ tvam̐ so̍ma pi̱tṛbhi̍ḥ
sa̱ṃvi̱dānaḥ ।
barhi̍ṣadaḥ pitara̱ ā'ha̱ṃ pi̱tṝn ।
upa̍hūtāḥ pi̱taro'gni̱ṣvāttāḥ pitaraḥ ।
a̱gni̱ṣvā̱ttānṛ̍tu̱mato̍ havāmahe ।
narā̱śam̐se̍ somapī̱tha̱ṃ ya ā̱śuḥ ।
te no̱ arva̍ntaḥ su̱hava̍ bhavantu ।
śa̱ṃ no̍ bhavantu dvi̱pade̱ śa̱ṃ catu̍ṣpade ।
ye a̍gniṣvā̱ttā ye'na̍gniṣvā̱ttāḥ ॥ 1 ॥))

**[[2-6-16-2]]**

अꣳहो॒मुचः॑ पि॒तरः॑ सो॒म्यासः॑।
परेऽव॑रे॒ऽमृता॑सो॒ भव॑न्तः।
अधि॑ब्रुवन्तु॒ ते अ॑वन्त्व॒स्मान्।
वा॒न्या॑यै दु॒ग्धे जु॒षमा॑णाः कर॒म्भम्।
उ॒दीरा॑णा॒ अव॑रे॒ परे॑ च।
अ॒ग्नि॒ष्वा॒त्ता ऋ॒तुभिः॑ संवि॒दा॒नाः।
इन्द्र॑वन्तो ह॒विरि॒दं जु॑षन्ताम्।
यद॑ग्ने कव्यवाहन॒ त्वम॑ग्न ईडि॒तो जा॑तवेदः।
माता॑ली क॒व्यैः।
ये ता॑तृ॒पुर्दे॑वत्रा जेह॑मानाः।
हो॒त्रा॒वृधः स्तोम॑तष्टासो अ॒र्कैः।
आऽग्ने॑ याहि सुवि॒दत्रे॑भिर॒र्वाङ्।
स॒त्यैः क॒व्यैः पि॒तृभि॑र्घर्म॒सद्भिः॑।
ह॒व्य॒वाह॑मजरं॑ पुरुप्रि॒यम्।
अ॒ग्निं घृ॒तेन॑ ह॒विषा॑ सप॒र्यन्।
उपा॑सदं कव्य॒वाहं॑ पि॒तृणाम्।
स नः॑ प्र॒जां वी॒रव॑तीꣳ॒ समृ॒ण्वतु॥ २॥
अन॑ग्नि॒ष्वात्ता॒ जेह॑मानाः स॒प्त च॑॥ १६॥

((a̱m̐ho̱muca̍ḥ pi̱tara̍ḥ so̱myāsa̍ḥ ।
pare'va̍re̱'mṛta̍so̱ bhava̍ntaḥ ।
adhi̍bruvantu̱ te a̍vantva̱smān ।
vā̱nya̍̍yai du̱gdhe ju̱ṣamā̍ṇāḥ kara̱mbham ।
u̱dīrā̍ṇā̱ ava̍re̱ pare̍ ca ।
a̱gni̱ṣvā̱ttā ṛ̱tubhi̍ḥ sa̱ṃvidā̱nāḥ ।
indra̍vanto ha̱viri̱da̱ṃ ju̍ṣantām ।
yada̍gne kavyavāhana̱ tvama̍gna īḍi̱to ja̍tavedaḥ ।
mātā̍lī ka̱vyaiḥ ।
ye tā̍tṛ̱purde̍vatrā jeha̍mānāḥ ।
ho̱trā̱vṛdhaḥ stoma̍taṣṭāso a̱rkaiḥ ।
ā'gne̍ yāhi suvi̱datre̍bhira̱rvāṅ ।
sa̱tyaiḥ ka̱vyaiḥ pi̱tṛbhi̍rgharma̱sadbhi̍ḥ ।
ha̱vya̱vāha̍maja̱ra̍ṃ purupri̱yam ।
a̱gni̱ṃ ghṛ̱tena̍ ha̱viṣā̍ sapa̱ryan ।
upa̍sada̱ṃ kavya̱vāha̱ṃ pi̱tṛ̱ṇām ।
sa na̍ḥ pra̱jā̱ṃ vī̱rava̍tī̱m̐ sa̱mṛ̱ṇvatu ॥ 2 ॥
ana̍gni̱ṣvāttā̱ jeha̍mānāḥ sa̱pta ca̍ ॥ 16 ॥))

**[[2-6-17-1]]**

होता॑ यक्षदि॒डस्प॒दे।
स॒मि॒धा॒नं म॒हद्यशः॑।
सुष॑मिद्धं॒ वरे॑ण्यम्।
अ॒ग्निमिन्द्रं॑ वयो॒धस॑म्।
गा॒य॒त्रीं छन्द॑ इन्द्रि॒यम्।

त्र्य॒विं गां वयो॒ दध॑त्।
वेत्वाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्ष॒च्छुचि॑व्रतम्।
तनू॒नपा॑तमु॒द्भिद᳚म्।
यं गर्भ॒मदि॑तिर्द॒धे॥ १॥

((hota̍ yakṣadi̱ḍaspa̱de |
sa̱midhā̱naṃ ma̱hadyaśa̍ḥ |
suṣa̍middhaṃ̱ vare̎ṇyam |
a̱gnimindraṃ̍ vayo̱dhasa̎m |
gā̱ya̱trīṃ chanda̍ indri̱yam |
tryavi̱ṃ gāṃ vayo̱ dadha̍t |
vetvājya̍sya̱ hota̱ryaja̍ |
hota̍ yakṣa̱cchuci̍vratam |
tanū̱napa̍tamu̱dbhida̎m |
yaṃ garbha̱madi̍tirda̱dhe || 1 ||))

**[[2-6-17-2]]**

शुचि॒मिन्द्रं॑ वयो॒धस᳚म्।
उ॒ष्णिहं॒ छन्द॑ इन्द्रि॒यम्।
दि॒त्य॒वाहं॒ गां वयो॒ दध॑त्।
वेत्वाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्षदी॒डेन्य᳚म्।
ई॒डि॒तं वृ॑त्र॒हन्त॑मम्।
इडा॑भि॒रीड्य॒ꣳ॒ सह॑ः।
सोम॒मिन्द्रं॑ वयो॒धस᳚म्।
अ॒नु॒ष्टुभं॒ छन्द॑ इन्द्रि॒यम्।
त्रि॒व॒त्सं गां वयो॒ दध॑त्॥

((śuci̱mindraṃ̍ vayo̱dhasa̎m |
u̱ṣṇihaṃ̱ chanda̍ indri̱yam |
di̱tya̱vāhaṃ̱ gāṃ vayo̱ dadha̍t |
vetvājya̍sya̱ hota̱ryaja̍ |
hota̍ yakṣadī̱ḍenya̎m |
ī̱ḍi̱taṃ vṛ̍tra̱hanta̍mam |
iḍa̍bhi̱rīḍya̱ṃ̍ saha̍ḥ |
soma̱mindraṃ̍ vayo̱dhasa̎m |
a̱nuṣṭubhaṃ̱ chanda̍ indri̱yam |
tri̱va̱tsaṃ gāṃ vayo̱ dadha̍t||))

**[[2-6-17-3]]**

वेत्वाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्षत्सुब॒र्हि॒षद᳚म्।
पू॒ष॒ण्वन्त॒मम॑र्त्यम्।
सीद॑न्तं ब॒र्हिषि॑ प्रि॒ये।
अ॒मृ॒तेन्द्रं॑ वयो॒धस᳚म्।
बृ॒ह॒तीं छन्द॑ इन्द्रि॒यम्।
प॒ञ्चा॑विं॒ गां वयो॒ दध॑त्।
वेत्वाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्ष॒द्व्यच॑स्वतीः।
सु॒प्रा॒य॒णा ऋ॑ता॒वृध॑ः॥ ३॥

((vetvājya̍sya̱ hota̱ryaja̍ |
hota̍ yakṣatsubarhi̱ṣada̎m |
pū̱ṣa̱ṇvanta̱mama̍rtyam |
sīda̍ntaṃ ba̱rhiṣi̍ pri̱ye |
a̱mṛtendraṃ̍ vayo̱dhasa̎m |
bṛ̱ha̱tīṃ chanda̍ indri̱yam |
pañca̍vi̱ṃ gāṃ vayo̱ dadha̍t |
vetvājya̍sya̱ hota̱ryaja̍ |
hota̍ yakṣa̱dvyaca̍svatīḥ |
su̱prā̱ya̱ṇā ṛ̍tā̱vṛdha̍ḥ || 3 ||))

**[[2-6-17-4]]**

द्वारो॑ दे॒वीर्हि॑र॒ण्ययी᳚ः।
ब्र॒ह्माण॒ इन्द्रं॑ वयो॒धस᳚म्।
प॒ङ्क्तिं छन्द॑ इ॒हेन्द्रि॒यम्।
तु॒र्य॒वाहं॒ गां वयो॒ दध॑त्।
वेत्वाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्षत्सु॒पेश॑से।
सु॒शि॒ल्पे बृ॑ह॒ती उ॒भे।
नक्तो॒षासा॒ न द॑र्श॒ते।
विश्व॒मिन्द्रं॑ वयो॒धस᳚म्।
त्रि॒ष्टुभं॒ छन्द॑ इन्द्रि॒यम्॥ ४॥

((dvāro̍ de̱vīrhi̍ra̱ṇyayī̎ḥ |
bra̱hmāṇa̱ indraṃ̍ vayo̱dhasa̎m |
pa̱ṅktiṃ chanda̍ i̱hendri̱yam |
tu̱rya̱vāhaṃ̱ gāṃ vayo̱ dadha̍t |
vetvājya̍sya̱ hota̱ryaja̍ |
hota̍ yakṣatsu̱peśa̍se |
su̱śi̱lpe bṛ̍ha̱tī u̱bhe |
nakto̱ṣāsā̱ na da̍rśa̱te |
viśva̱mindraṃ̍ vayo̱dhasa̎m |
tri̱ṣṭubhaṃ̱ chanda̍ indri̱yam || 4 ||))

**[[2-6-17-5]]**

प॒ष्ठ॒वाहं॒ गां वयो॒ दध॑त्।
वेत्वाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्ष॒त्प्रचे॑तसा।

दे॒वाना॑मुत्त॒मं यश॑ः।
होता॑रा॒ दैव्या॑ क॒वी।
स॒युजेन्द्रं॑ वयो॒धसं᳚म्।
जग॑तीं॒ छन्द॑ इ॒हेन्द्रि॒यम्।
अ॒न॒ड्वाहं॒ गां वयो॒ दध॑त्।
वे॒त्वाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्ष॒त्पेश॑स्वतीः॥ ५॥

((paṣṭhavāhaṃ gāṃ vayo dadhat |
vetvājyasya hotaryaja |
hotā yakṣatpracetasā |
devānāmuttamaṃ yaśaḥ |
hotārā daivyā kavī |
sayujendraṃ vayodhasām̐ |
jagatīṃ chanda ihendriyam |
anaḍvāhaṃ gāṃ vayo dadhat |
vetvājyasya hotaryaja |
hotā yakṣatpeśasvatīḥ || 5 ||))

**[[2-6-17-6]]**

ति॒स्रो दे॒वीर्हि॑र॒ण्ययी᳚ः।
भार॑तीर्बृह॒तीर्म॒हीः।
पति॒मिन्द्रं॑ वयो॒धसं᳚म्।
वि॒राजं॒ छन्द॑ इ॒हेन्द्रि॒यम्।
धे॒नुं गां न वयो॒ दध॑त्।
वे॒त्वाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्षत्सु॒रेत॑सम्।
त्वष्टा॑रं पुष्टि॒वर्ध॑नम्।
रू॒पाणि॒ बिभ्र॑तं॒ पृथ॑क्।
पुष्टि॒मिन्द्रं॑ वयो॒धसं᳚म्॥ ६॥

((tisro devīrhiraṇyayīḥ |
bhāratīrbṛhatīrmahīḥ |
patimindraṃ vayodhasām̐ |
virājaṃ chanda ihendriyam |
dhenuṃ gāṃ na vayo dadhat |
vetvājyasya hotaryaja |
hotā yakṣatsuretasam |
tvaṣṭāraṃ puṣṭivardhanam |
rūpāṇi bibhratam pṛthak |
puṣṭimindraṃ vayodhasām̐ || 6 ||))

**[[2-6-17-7]]**

द्वि॒पदं॒ छन्द॑ इ॒हेन्द्रि॒यम्।
उ॒क्षाणं॒ गां न वयो॒ दध॑त्।
वे॒त्वाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्षच्छ॒तक्र॑तुम्।
हि॒र॑ण्यपर्णमु॒क्थिनं᳚म्।
र॒श॒नां बिभ्र॑तं व॒शिम्।
भग॒मिन्द्रं॑ वयो॒धसं᳚म्।
क॒कु॒भं॒ छन्द॑ इ॒हेन्द्रि॒यम्।
व॒शां वे॒हतं॒ गां न वयो॒ दध॑त्।
वे॒त्वाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्षत्स्वाहा॑कृतीः।
अ॒ग्निं गृ॒हप॑तिं॒ पृथ॑क्।
वरु॑णं भेष॒जं क॒विम्।
क्ष॒त्त्रमिन्द्रं॑ वयो॒धसं᳚म्।
अति॑च्छन्दसं॒ छन्द॑ इन्द्रि॒यम्।
बृ॒हदृ॑ष॒भं गां वयो॒ दध॑त्।
वे॒त्वाज्य॑स्य॒ होत॒र्यज॑॥ ७॥
द॒धे दध॑द्दतावृ॒धं इन्द्रि॒यं पेश॑स्वतीर्वयो॒धसं॑ वे॒त्वाज्य॑स्य॒
होत॒र्यज॑ स॒प्त च॑॥ १७॥
इ॒डस्प॒दे᳚ऽग्निं गा॑य॒त्रीं त्र्यवि᳚म्। शुचि॑व्रत॒ꣳ॒शुचि॑मु॒ष्णिहं᳚
दि॒त्यवा॑ह᳚म्। ई॒डे॒ऽन्य॒ꣳ॒ सोम॑मनु॒ष्टुभं᳚ त्रि॒वत्स॑म्।
सु॒ब॒र्हि॒षद॑म॒मृतेन्द्रं॑ बृ॒हतीं॑ पञ्चा॑विम्। व्यच॑स्वतीः सुप्राय॒णा
द्वारो᳚ ब्र॒ह्माण॑ः प॒ङ्क्तिमि॒ह तु॒र्यवा॑ह᳚म्। सु॒पेश॑से॒ विश्व॒मिन्द्रं᳚
त्रि॒ष्टुभं᳚ पष्ठ॒वाह᳚म्। प्रचे॑तसा स॒युजेन्द्रं॒
जग॑तीमि॒हान॒ड्वाह᳚म्। पेश॑स्वतीस्ति॒स्रो भार॑तीः पतिं॑
वि॒राज॑मि॒ह धे॒नुं न। श॒तक्र॑तुं॒ भग॒मिन्द्रं॑ क॒कुभ॑मि॒ह व॒शां
वे॒हतं॒ गां न। स्वाहा॑कृतीः क्ष॒त्त्रमति॑च्छन्दसं बृ॒हदृ॑ष॒भं गां
वय॑ः। इ॒न्द्रि॒यमृ॑षिवसुन॒वद॒शेहैं᳚न्द्रि॒यम॒ष्टे नव॒ द॒श॒ गां न
वयो॒ द॒ध॒त्सर्वे॑वे॒तु॥

((dvipadaṃ chanda ihendriyam |
ukṣāṇaṃ gāṃ na vayo dadhat |
vetvājyasya hotaryaja |
hotā yakṣacchatakratum |
hiraṇyaparṇamukthinām̐ |
raśanāṃ bibhratam vaśim |
bhagamindraṃ vayodhasām̐ |
kakubhaṃ chanda ihendriyam |
vaśāṃ vehataṃ gāṃ na vayo dadhat |
vetvājyasya hotaryaja |
hotā yakṣatsvāhākṛtīḥ |
agniṃ gṛhapatiṃ pṛthak|

varu̍ṇaṃ bheṣa̱jaṃ ka̱vim ।
kṣa̱ttramindra̍ṃ vayo̱dhasa̎m ।
ati̍cchandasa̱ṃ chanda̍ indri̱yam ।
bṛ̱hadṛ̍ṣa̱bhaṃ gāṃ vayo̱ dadha̍t ।
vetvājya̍sya̱ hota̱ryaja̍ ॥ 7 ॥
da̱dhe dadha̍dṛtā̱vṛdha̍ indri̱yam
peśa̍svatīrvayo̱dhasa̱ṃ vetvājya̍sya̱ hota̱ryaja̍ sa̱pta ca̍ ॥ 17 ॥
iḍa̱spa̱de̍'gniṃ ga̍ya̱trīṃ tryavi̎m ।
śuci̍vrata̱ṃ̍śuci̍mu̱ṣṇiha̍ṃ ditya̱vāha̎m । īḍe'nya̱ṃ̎
so̍mamanu̱ṣṭubha̍ṃ triva̱tsam ।
su̱ba̱rhi̱ṣada̍ma̱mṛtendra̍ṃ bṛ̱ha̱tīṃ pañca̍vim ।
vyaca̍svatīḥ suprāya̱ṇā dvāro̎ bra̱hmāṇa̍ḥ
pa̱ṅktimi̱ha tu̍rya̱vāha̎m । su̱peśa̍se̱ viśva̱mindra̍ṃ
tri̱ṣṭubha̍ṃ pa̱ṣṭha̱vāha̎m । prace̍tasā sa̱yujendra̱ṃ
jaga̍tīmi̱hāna̱ḍvāha̎m । peśa̍svatīsti̱sro bhāra̍tī̱ḥ
pati̍ṃ vi̱rāja̍mi̱ha dhe̱nuṃ na । śa̱takra̍tu̱ṃ
bhaga̱mindra̍ṃ ka̱kubha̍mi̱ha va̱śāṃ ve̱hata̱ṃ gāṃ
na । svāha̍kṛtīḥ kṣa̱ttramati̱cchandasa̱ṃ
bṛ̱hadṛ̍ṣa̱bhaṃ gāṃ vaya̍ḥ ।
i̱ndri̱yamṛ̱ṣi̱vasu̱nava̍da̱śehe̎ndriya̱maṣṭa̍ nava daśa̱
gāṃ na vayo̱ dadha̱tsarva̍vetu ॥))

**[[2-6-18-1]]**

समि॑द्धो अ॒ग्निः स॒मिधा᳚ ।
सुष॑मिद्धो॒ वरे᳚ण्यः ।
गा॒य॒त्री छन्द॑ इन्द्रि॒यम् ।
त्र्यवि॒र्गौर्वयो॑ दधुः ।
तनू॒नपा॒च्छुचि॑व्रतः ।
त॒नू॒नपा॑च्च॒ सर॑स्वती ।
उ॒ष्णिक्छन्द॑ इन्द्रि॒यम् ।
दि॒त्य॒वाड्गौर्वयो॑ दधुः ।
इडा॑भिर॒ग्निरीड्य॑ः ।
सोमो॑ दे॒वो अम॑र्त्यः ॥ १ ॥

((sami̍ddho a̱gniḥ sa̱midhā̎ ।
suṣa̍middho̱ vare̎ṇyaḥ ।
gā̱ya̱trī chanda̍ indri̱yam।
tryavi̱rgaurvayo̍ dadhuḥ ।
tanū̱napā̱cchuci̍vrataḥ ।
ta̱nū̱napācca̱ sara̍svatī ।
u̱ṣṇikchanda̍ indri̱yam ।
di̱tya̱vāḍgaurvayo̍ dadhuḥ ।
iḍa̍bhira̱gnirīḍya̍ḥ ।
somo̍ de̱vo ama̍rtyaḥ ॥ 1 ॥))

**[[2-6-18-2]]**

अ॒नु॒ष्टुप्छन्द॑ इन्द्रि॒यम् ।
त्रि॒वत्सो गौर्वयो॑ दधुः ।
सु॒ब॒र्हिर॒ग्निः पू॑ष॒ण्वान् ।
स्ती॒र्णब॑र्हि॒रम॑र्त्यः ।
बृ॒ह॒ती छन्द॑ इन्द्रि॒यम् ।
प॒ञ्चा॑वि॒र्गौर्वयो॑ दधुः ।
दुरो॑ दे॒वीर्दिशो॑ म॒हीः ।
ब्र॒ह्मा दे॒वो बृ॒ह॒स्पति॑ः ।
प॒ङ्क्तिश्छन्द॑ इ॒हेन्द्रि॒यम् ।
तु॒र्य॒वाड्गौर्वयो॑ दधुः ॥ २ ॥

((a̱nu̱ṣṭupchanda̍ indri̱yam ।
tri̱va̱tso gaurvayo̍ dadhuḥ ।
su̱ba̱rhira̱gniḥ pū̍ṣa̱ṇvān ।
stī̱rṇaba̍rhi̱rama̍rtyaḥ ।
bṛ̱ha̱tī chanda̍ indri̱yam ।
pañca̍vi̱rgaurvayo̍ dadhuḥ ।
duro̍ de̱vīrdiśo̍ ma̱hīḥ ।
bra̱hmā de̱vo bṛ̱ha̱spati̍ḥ ।
pa̱ṅktiśchanda̍ i̱hendri̱yam ।
tu̱rya̱vāḍgaurvayo̍ dadhuḥ ॥ 2 ॥))

**[[2-6-18-3]]**

उ॒षे य॒ह्वी सु॒पेश॑सा ।
विश्वे॑ दे॒वा अम॑र्त्याः ।
त्रि॒ष्टुप्छन्द॑ इन्द्रि॒यम् ।
प॒ष्ठ॒वाड्गौर्वयो॑ दधुः ।
दैव्या॑ होतारा भिषजा ।
इन्द्रे॑ण स॒युजा॑ यु॒जा ।
जग॑ती छन्द॑ इ॒हेन्द्रि॒यम् ।
अ॒न॒ड्वान्गौर्वयो॑ दधुः ।
ति॒स्र इडा॒ सर॑स्वती ।
भार॑ती म॒रुतो॒ विश॑ः ॥ ३ ॥

((u̱ṣe ya̱hvī su̱peśa̍sā ।
viśve̍ de̱vā ama̍rtyāḥ ।
tri̱ṣṭupchanda̍ indri̱yam ।
pa̱ṣṭha̱vāḍgaurvayo̍ dadhuḥ ।
daivya̍ hotārā bhiṣajā ।
indre̍ṇa sa̱yuja̍ yu̱jā ।
jaga̍tī̱ chanda̍ i̱hendri̱yam।
a̱na̱ḍvāṅgaurvayo̍ dadhuḥ ।
ti̱sra iḍā̱ sara̍svatī ।
bhāra̍tī ma̱ruto̱ viśa̍ḥ ॥ 3 ॥))

**[[2-6-18-4]]**

वि॒राट् छन्द॑ इ॒हेन्द्रि॒यम् ।
धे॒नुर्गौर्न वयो॑ दधुः ।

त्वष्टा॑ तु॒रीपो॒ अद्भु॑तः।
इ॒न्द्रा॒ग्नी पु॑ष्टि॒वर्ध॑ना।
द्वि॒पाच्छन्द॑ इ॒हेन्द्रि॒यम्।
उ॒क्षा गौर्न वयो॑ दधुः।
श॒मि॒ता नो॒ वन॒स्पति॑ः।
स॒वि॒ता प्र॑सु॒वन्भग᳚म्।
क॒कुच्छन्द॑ इ॒हेन्द्रि॒यम्।
व॒शा वे॒हद्गौर्न वयो॑ दधुः।
स्वाहा॑ य॒ज्ञं वरु॑णः।
सु॒क्ष॒त्रो भे॑ष॒जं क॑रत्।
अति॑च्छन्दा॒श्छन्द॑ इन्द्रि॒यम्।
बृ॒हदृ॑ष॒भो गौर्वयो॑ दधुः॥ ४॥
अम॑र्त्यस्तु॒र्य॒वाङ्गौर्वयो॑ दधु॒र्विशो॑ व॒शा वे॒हद्गौर्न वयो॑
दधुश्च॒त्वारि॑ च॥ १८॥

((vi̱rāṭ chanda̍ i̱hendri̱yam |
dhe̱nurgaurna vayo̍ dadhuḥ |
tvaṣṭā̍ tu̱rīpo̱ adbhu̍taḥ |
i̱ndrā̱gnī pu̍ṣṭi̱vardha̍nā |
dvi̱pācchanda̍ i̱hendri̱yam |
u̱kṣā gaurna vayo̍ dadhuḥ |
śa̱mi̱tā no̱ vana̱spati̍ḥ |
sa̱vi̱tā pra̍su̱vanbhaga̎m |
ka̱kucchanda̍ i̱hendri̱yam |
va̱śā ve̱hadgaurna vayo̍ dadhuḥ |
svāhā̍ ya̱jñaṃ varu̍ṇaḥ |
su̱kṣa̱tro bhe̍ṣa̱jaṃ ka̍rat |
ati̍cchandā̱śchanda̍ indri̱yam |
bṛ̱hadṛ̍ṣa̱bho gaurvayo̍ dadhuḥ || 4 ||
ama̍rtyasturya̱vāḍgaurvayo̍ dadhu̱rviśo va̱śā
ve̱hadgaurna vayo̍ dadhuśca̱tvāri̍ ca || 18 ||))

**[[2-6-19-1]]**
व॒सन्ते॑न॒र्तुना॑ दे॒वाः।
व॒स॑वस्त्रि॒वृता᳚ स्तु॒तम्।
र॒थ॒न्त॒रेण॒ तेज॑सा।
ह॒विरिन्द्रे॒ वयो॑ दधुः।
ग्री॒ष्मेण॑ दे॒वा ऋ॒तुना᳚।
रु॒द्राः प॑ञ्चद॒शे स्तु॒तम्।
बृ॒ह॒ता य॒श॑सा॒ बल᳚म्।
ह॒विरिन्द्रे॒ वयो॑ दधुः।
व॒र्षाभि॑र्ऋ॒तुना॑ऽऽदि॒त्याः।
स्तोमे॑ सप्तद॒शे स्तु॒तम्॥ १॥

((va̱sa̱ntena̱rtunā̍ de̱vāḥ |
vasa̍vastri̱vṛtā̎ stu̱tam |
ra̱tha̱nta̱reṇa̱ teja̍sā |
ha̱virindre̱ vayo̍ dadhuḥ |
grī̱ṣmeṇa̍ de̱vā ṛ̱tunā̎ |
ru̱drāḥ pa̍ñcada̱śe stu̱tam |
bṛ̱ha̱tā ya̱śa̍sā̱ bala̎m |
ha̱virindre̱ vayo̍ dadhuḥ |
va̱rṣābhi̍rṛ̱tunā̍''di̱tyāḥ |
stome̍ saptada̱śe stu̱tam || 1 ||))

**[[2-6-19-2]]**
वै॒रू॒पेण॑ वि॒शौज॑सा।
ह॒विरिन्द्रे॒ वयो॑ दधुः।
शा॒र॒देन॒र्तुना॑ दे॒वाः।
ए॒क॒वि॒ꣳ॒श ऋ॒भव॑ः स्तु॒तम्।
वै॒रा॒जेन॑ श्रि॒या श्रि॒य᳚म्।
ह॒विरिन्द्रे॒ वयो॑ दधुः।
हे॒म॒न्तेन॒र्तुना॑ दे॒वाः।
म॒रुत॑स्त्रि॒ण॒वे स्तु॒तम्।
बले॑न॒ शक्व॑रीः॒ सह॑ः।
ह॒विरिन्द्रे॒ वयो॑ दधुः।
शै॒शि॒रेण॒र्तुना॑ दे॒वाः।
त्र॒य॒स्त्रि॒ꣳ॒शे॑ऽमृ॒तꣳ᳚ स्तु॒तम्।
स॒त्येन॑ रे॒वती᳚ः क्ष॒त्त्रम्।
ह॒विरिन्द्रे॒ वयो॑ दधुः॥ २॥
स्तोमे॑ सप्तद॒शे स्तु॒तꣳ सहो॑ ह॒विरिन्द्रे॒ वयो॑ दधु॒श्च॒त्वारि॑
च॥ १९॥
व॒सन्ते॑न ग्रि॒ष्मेण॑ व॒र्षाभि॑ः शा॒र॒देन॑ हे॒म॒न्तेन॑ शै॒शि॒रेण॒
षट्॥

((vai̱rū̱peṇa̍ vi̱śauja̍sā |
ha̱virindre̱ vayo̍ dadhuḥ |
śā̱ra̱dena̱rtunā̍ de̱vāḥ |
e̱ka̱vi̱m̱̐śa ṛ̱bhava̍ḥ stu̱tam |
vai̱rā̱jena̍ śri̱yā śri̱ya̎m |
ha̱virindre̱ vayo̍ dadhuḥ |
he̱ma̱ntena̱rtunā̍ de̱vāḥ |
ma̱ruta̍stri̱ṇa̱ve stu̱tam |
bale̍na̱ śakva̍rī̱ḥ saha̍ḥ |
ha̱virindre̱ vayo̍ dadhuḥ |
śai̱śi̱re̱ṇa̱rtunā̍ de̱vāḥ |
tra̱ya̱stri̱m̱̐śe̍'mṛ̱tam̐̎ stu̱tam |
sa̱tyena̍ re̱vatī̎ḥ kṣa̱ttram |

havirindrẹ vayȯ dadhuḥ ॥ 2 ॥
stomė saptadaṩe stụtaṁ̇ sahȯ hạvirindrẹ vayȯ
dadhuśc̣atvārị ca ॥ 19 ॥
vạsantenȧ grịṣmeṇȧ vạrṣābhiḥ̇ śārạdenȧ hemạntenȧ
śaiśịreṇạ ṣaṭ ॥))

**[[2-6-20-1]]**

दे॒वं ब॒र्हिरिन्द्रं॑ वयो॒धसं᳚म्।
दे॒वं दे॒वम॑वर्धयत्।
गा॒य॒त्रिया छन्द॑सेन्द्रि॒यम्।
तेज॒ इन्द्रे॒ वयो॒ दध॑त्।
व॒सु॒वने॑ वसु॒धेय॑स्य वेतु॒ यज॑।
दे॒वीर्द्वारो॑ दे॒वमिन्द्रं॑ वयो॒धसं᳚म्।
दे॒वीर्दे॒वम॑वर्धयन्।
उ॒ष्णिहा॒ छन्द॑सेन्द्रि॒यम्।
प्रा॒णमिन्द्रे॒ वयो॒ दध॑त्।
व॒सु॒वने॑ वसु॒धेय॑स्य वियन्तु॒ यज॑॥ १॥

((dẹvaṃ bạrhirindraṁ̇ vayọdhasā̈m ।
dẹvaṃ dẹvamȧvardhayat ।
gāyạtrịyā chandȧsendrịyam ।
tejạ indrẹ vayọ dadhȧt ।
vạsụvanė vasụdheyȧsya vetụ yajȧ ।
dẹvīrdvārȯ dẹvamindraṁ̇ vayọdhasā̈m ।
dẹvīrdẹvamȧvardhayan ।
ụṣṇihạ chandȧsendrịyam ।
prāṇạmindrẹ vayọ dadhȧt ।
vạsụvanė vasụdheyȧsya viyantụ yajȧ ॥ 1 ॥))

**[[2-6-20-2]]**

दे॒वी दे॒वं वयो॒धसं᳚म्।
उ॒षे इन्द्र॑मवर्धताम्।
अ॒नु॒ष्टुभा॒ छन्द॑सेन्द्रि॒यम्।
वा॒चमिन्द्रे॒ वयो॒ दध॑त्।
व॒सु॒वने॑ वसु॒धेय॑स्य वीतां॒ यज॑।
दे॒वी जोष्ट्री॑ दे॒वमिन्द्रं॑ वयो॒धसं᳚म्।
दे॒वी दे॒वम॑वर्धताम्।
बृ॒ह॒त्या छन्द॑सेन्द्रि॒यम्।
श्रोत्र॒मिन्द्रे॒ वयो॒ दध॑त्।
व॒सु॒वने॑ वसु॒धेय॑स्य वीतां॒ यज॑॥ २॥

((dẹvī dẹvaṃ vȧyọdhasā̈m ।
ụṣe indrȧmavardhatām ।
ạnuṣṭụbhạ chandȧsendrịyam ।
vācạmindrẹ vayọ dadhȧt ।
vạsụvanė vasụdheyȧsya vītāṃ̣ yajȧ ।
dẹvī joṣṭrị dẹvamindraṁ̇ vayọdhasā̈m ।
dẹvī dẹvamȧvardhatām ।
bṛhạtyā chandȧsendrịyam ।
śrotrạmindrẹ vayọ dadhȧt ।
vạsụvanė vasụdheyȧsya vītāṃ̣ yajȧ ॥ 2 ॥))

**[[2-6-20-3]]**

दे॒वी ऊ॒र्जाहु॑ती दे॒वमिन्द्रं॑ वयो॒धसं᳚म्।
दे॒वी दे॒वम॑वर्धताम्।
प॒ङ्क्त्या छन्द॑सेन्द्रि॒यम्।
शु॒क्रमिन्द्रे॒ वयो॒ दध॑त्।
व॒सु॒वने॑ वसु॒धेय॑स्य वीतां॒ यज॑।
दे॒वा दैव्या॒ होता॑रा दे॒वमिन्द्रं॑ वयो॒धसं᳚म्।
दे॒वा दे॒वम॑वर्धताम्।
त्रि॒ष्टुभा॒ छन्द॑सेन्द्रि॒यम्।
त्वि॒षिमिन्द्रे॒ वयो॒ दध॑त्।
व॒सु॒वने॑ वसु॒धेय॑स्य वीतां॒ यज॑॥ ३॥

((dẹvī ūrjāhȧtī dẹvamindraṁ̇ vayọdhasā̈m ।
dẹvī dẹvamȧvardhatām ।
paṅktyā chandȧsendrịyam ।
śụkramindrẹ vayọ dadhȧt ।
vạsụvanė vasụdheyȧsya vītāṃ̣ yajȧ ।
dẹvā daivyạ hotȧrā dẹvamindraṁ̇ vayọdhasā̈m ।
dẹvā dẹvamȧvardhatām ।
trịṣṭubhạ chandȧsendrịyam ।
tvịṣimindrẹ vayọ dadhȧt ।
vạsụvanė vasụdheyȧsya vītāṃ̣ yajȧ ॥ 3 ॥))

**[[2-6-20-4]]**

दे॒वीस्ति॒स्रस्ति॒स्रो दे॒वीर्वयो॒धसं᳚म्।
पति॒मिन्द्र॑मवर्धयन्।
जग॑त्या॒ छन्द॑सेन्द्रि॒यम्।
बल॒मिन्द्रे॒ वयो॒ दध॑त्।
व॒सु॒वने॑ वसु॒धेय॑स्य वियन्तु॒ यज॑।
दे॒वो न॒राशꣳसो॑ दे॒वमिन्द्रं॑ वयो॒धसं᳚म्।
दे॒वो दे॒वम॑वर्धयत्।
वि॒राजा॒ छन्द॑सेन्द्रि॒यम्।
रेत॒ इन्द्रे॒ वयो॒ दध॑त्।
व॒सु॒वने॑ वसु॒धेय॑स्य वेतु॒ यज॑॥ ४॥

((dẹvīstịsrastịsro dẹvīrvȧyọdhasā̈m ।
patịmindrȧmavardhayan ।
jagȧtyạ chandȧsendrịyam ।

balamindre vayo dadhát |
vasuvane vasudheyásya viyantu yajá |
devo narāśaṁsó devamindraṁ vayodhasam̐ |
devo devamávardhayat |
virājā chandásendriyam |
reta indre vayo dadhát |
vasuvane vasudheyásya vetu yajá || 4 ||))

**[[2-6-20-5]]**

दे॒वो व॒नस्पति॑र्दे॒वमिन्द्रं॑ वयो॒धस॑म्।
दे॒वो दे॒वम॑वर्धयत्।
द्वि॒पदा॒ छन्द॑सेन्द्रि॒यम्।
भ॒गमिन्द्रे॒ वयो॒ दध॑त्।
व॒सु॒वने॑ वसु॒धेय॑स्य वेतु॒ यज॑।
दे॒वं ब॒र्हिर्वारि॑तीनां दे॒वमिन्द्रं॑ वयो॒धस॑म्।
दे॒वो दे॒वम॑वर्धयत्।
क॒कु॒भा छन्द॑सेन्द्रि॒यम्।
यश॒ इन्द्रे॒ वयो॒ दध॑त्।
व॒सु॒वने॑ वसु॒धेय॑स्य वेतु॒ यज॑।
दे॒वो अ॒ग्निः स्वि॑ष्ट॒कृद्दे॒वमिन्द्रं॑ वयो॒धस॑म्।
दे॒वो दे॒वम॑वर्धयत्।
अति॑च्छन्दसा॒ छन्द॑सेन्द्रि॒यम्।
क्ष॒त्त्रमिन्द्रे॒ वयो॒ दध॑त्।
व॒सु॒वने॑ वसु॒धेय॑स्य वेतु॒ यज॑॥ ५॥
वि॒यन्तु॒ यज॑ वी॒तां॒ यज॑ वी॒तां॒ यज॑ वेतु॒ यज॑ वेतु॒ यज॒ पञ्च॑ च॥ २०॥
दे॒वं ब॒र्हिर्गा॑यत्रि॒या तेज॑ः। दे॒वीर्द्वार॑ उ॒ष्णिहा॑ प्रा॒णम्। दे॒वी दे॒वमु॒षे अ॑नु॒ष्टुभा॒ वाच॑म्। दे॒वी जो॒ष्ट्री॑ बृ॒ह॒त्या श्रोत्र॑म्। दे॒वी ऊ॒र्जाहु॑ती प॒ङ्क्त्या शु॒क्रम्। दे॒वा दैव्या॒ होता॑रा त्रि॒ष्टुभा॒ त्विषि॑म्। दे॒वीस्ति॒स्रस्ति॒स्रो दे॒वीः पति॑ं जग॑त्या॒ बल॑म्। दे॒वो न॒राश॒ꣳसो॑ वि॒राजा॒ रेत॑ः। दे॒वो व॒नस्पति॑र्द्वि॒पदा॒ भग॑म्। दे॒वं ब॒र्हिर्वारि॑तीनां क॒कु॒भा य॒शः। दे॒वो अ॒ग्निः स्वि॑ष्ट॒कृदति॑च्छन्दसा क्ष॒त्त्रम्। वे॒तु वि॒यन्तु॑ च॒तुर्वी॑ता॒मेको॑ वि॒यन्तु च॒तुर्वे॑तु। अ॒व॒र्ध॒य॒द॒व॒र्ध॒य॒ꣳ श्च॒तुर॑वर्धता॒मेको॑ऽवर्धय॒ꣳ श्च॒तुर॑वर्धयत्॥
स्वा॒द्वीं त्वा॒ सोम॑ः सु॒राव॑न्त॒ꣳ सीसे॑न मि॒त्रो॑ऽसि॒ यद्दे॑वा॒ होता॑ यक्षत्स॒मिधेन्द्र॒ꣳ समि॑द्ध इन्द्र॒ आच॑र्षणि॒प्रा दे॒वं ब॒र्हिरिन्द्र॒ꣳ सुदे॒वꣳ होता॑ यक्षत्स॒मिधा॒ऽग्निꣳ समि॑द्धो अ॒ग्निर॒श्विना॒ऽश्विना॑ ह॒विरि॑न्द्रि॒यं दे॒वं ब॒र्हिः सर॑स्वत्य॒ग्निम॒द्योश॑न्तो॒ होता॑ यक्षदि॒डस्प॒दे समि॑द्धो अ॒ग्निः स॒मिधा॑ वस॒न्तेन॑ दे॒वं ब॒र्हिरिन्द्रं॑ वयो॒धसं॑ विꣳश॒तिः॥ २०॥
स्वा॒द्वीं त्वाऽमी॑ मदन्त पि॒तर॑ः साम्रा॒ज्याय पू॒तं प॒वित्रे॑णे॒वाज्य॑मु॒षासा॒नक्ता॑ बद॑रैर॒धाता॑म॒श्विना॑ दे॒व इन्द्रो॒ व॒नस्पति॑ः पष्ठ॒वाह॒ं गां दे॒वी दे॒वं व॑यो॒धस॒ं चतु॑र्नवतिः॥ ९४॥

((devo vanaspatirdevamindraṁ vayodhasam̐ |
devo devamávardhayat |
dvipadā chandásendriyam |
bhagamindre vayo dadhát |
vasuvane vasudheyásya vetu yajá |
devaṃ barhirvārítīnāṃ devamindraṁ vayodhasam̐ |
devo devamávardhayat |
kakubhā chandásendriyam |
yaśa indre vayo dadhát |
vasuvane vasudheyásya vetu yajá |
devo agniḥ sviṣṭakṛddevamindraṁ vayodhasam̐ |
devo devamávardhayat |
aticchandasā chandásendriyam |
kṣattramindre vayo dadhát |
vasuvane vasudheyásya vetu yajá || 5 ||
viyantu yajá vītāṃ yajá vītāṃ yajá vetu yajá vetu yaja pañcá ca || 20 ||
devaṃ barhirgáyatriyā tejáḥ | devīrdvārá uṣṇihā̐ prāṇam | devī devamuṣe ánuṣṭubhā vācam̐ | devī joṣṭrī́ bṛhatyā śrotram̐ | devī ūrjāhútī paṅktyā śukram | devā daivyā hotárā triṣṭubhā tviṣim̐ | devīstisrastisro devīḥ patiṃ jagátyā balam̐ | devo narāśaṁsó virājā retáḥ | devo vanaspatirdvipadā bhagam̐ | devaṃ barhivārítīnāṃ kakubhā yaśáḥ | devo agniḥ sviṣṭakṛdaticchandasā kṣattram | vetu viyantu caturvítāmekó viyantu caturvétu | avardhayadavardhayam̐ ścaturávardhatāmekó'vardhayam̐ ścaturávardhayat ||
svādvīṃ tvā somaḥ surávantam̐ sīsena mitró'si yaddévā hotá yakṣatsamidhendram̐ samíddha indra ācárṣaṇiprā devaṃ barhirindram̐ sudevam̐ hotá yakṣatsamidhā'gnim̐ samíddho agniráśvinā'śviná havirindriyaṃ devaṃ barhiḥ sarásvatyagnimadyośanto hotá yakṣadiḍaspade samíddho agniḥ samidhá vasantená devaṃ barhirindraṃ vayodhasaṃ vim̐śatiḥ || 20 ||
svādvīṃ tvā'mí madanta pitaraḥ sāmrā̐jyāya pūtaṃ pavitréṇevājyámuṣāsānaktā badárairadhátāmaśviná deva indro vanaspatiḥ paṣṭhavāhaṃ gāṃ devī devaṃ váyodhasaṃ catúrnavatiḥ || 94 ||))

# Taittirīya-Brāhmaṇa
# Book 2, Chapter 7

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[2-7-1-1]]**

त्रि॒वृत्स्तोमो॑ भवति।
ब्र॒ह्म॒व॒र्च॒सं वै त्रि॒वृत्।
ब्र॒ह्म॒व॒र्च॒समे॒वाव॑रुन्धे।
अ॒ग्नि॒ष्टो॒मः सोमो॑ भवति।
ब्र॒ह्म॒व॒र्च॒सं वा अ॑ग्निष्टो॒मः।
ब्र॒ह्म॒व॒र्च॒समे॒वाव॑रुन्धे।
र॒थं॒त॒रꣳ साम॑ भवति।
ब्र॒ह्म॒व॒र्च॒सं वै र॑थंत॒रम्।
ब्र॒ह्म॒व॒र्च॒समे॒वाव॑रुन्धे।
प॒रि॒स्र॒जी होता॑ भवति॥ १॥

((tri̱vṛ̱tstomó bhavati ।
bra̱hma̱va̱rca̱saṃ vai tri̱vṛt ।
bra̱hma̱va̱rca̱same̱vāvárundhe ।
a̱gni̱ṣṭo̱maḥ somó bhavati ।
bra̱hma̱va̱rca̱saṃ vā ágniṣṭo̱maḥ ।
bra̱hma̱va̱rca̱same̱vāvárundhe ।
ra̱thaṃ̱ta̱raṃ̍ sāmá bhavati ।
bra̱hma̱va̱rca̱saṃ vai ráthaṃta̱ram ।
bra̱hma̱va̱rca̱same̱vāvárundhe ।
pa̱ri̱sra̱jī hotá bhavati ॥ 1 ॥))

**[[2-7-1-2]]**

अ॒रु॒णो मि॑र्मि॒रस्त्रि॒शु॑क्रः।
ए॒तद्वै ब्र॑ह्मवर्च॒सस्य॑ रू॒पम्।
रू॒पेणै॒व ब्र॑ह्मवर्च॒समव॑रुन्धे।
बृ॒हस्पति॑रकामयत दे॒वाना᳚ं पुरो॒धां ग॑च्छे॒यमिति॑।
स ए॒तं बृ॑हस्पतिस॒वम॑पश्यत्।
तमाह॑रत्।
तेना॑यजत।
ततो॒ वै स दे॒वाना᳚ं पुरो॒धामग॑च्छत्।
यः पु॑रो॒धाका॑मः स्यात्।
स बृ॑हस्पतिस॒वेन॑ यजेत॥ २॥

((a̱ru̱ṇo mírmi̱rastriśúkraḥ ।
e̱tadvai bráhmavarca̱sasyá rūpam ।
rū̱peṇa̱iva bráhmavarca̱samavárundhe ।
bṛ̱haspatírakāmayata de̱vānā̍ṃ puro̱dhāṃ gáccheya̱mití ।
sa e̱taṃ bṛ́haspatisa̱vamápaśyat ।
tamāhárat ।
tenáyajata ।
tato̱ vai sa de̱vānā̍ṃ puro̱dhāmagácchat ।
yaḥ púro̱dhākáma̱ḥ syāt ।
sa bṛ́haspatisa̱vená yajeta ॥ 2 ॥))

**[[2-7-1-3]]**

पु॒रो॒धामे॒व ग॑च्छति।
तस्य॑ प्रातःसव॒ने स॒न्नेषु॑ नाराश॒ꣳ॒सेषु॑।
एका॑दश॒ दक्षि॑णा नीयन्ते।
एका॑दश॒ माध्यं॑दिने॒ सव॑ने स॒न्नेषु॑ नाराश॒ꣳ॒सेषु॑।
एका॑दश तृतीयसव॒ने स॒न्नेषु॑ नाराश॒ꣳ॒सेषु॑।
त्रय॑स्त्रिꣳश॒त्संप॑द्यन्ते।
त्रय॑स्त्रिꣳश॒द्वै दे॒वताः᳚।
दे॒वता॑ ए॒वाव॑रुन्धे।
अश्व॑श्चतुस्त्रि॒ꣳ॒शः।
प्रा॒जा॒प॒त्यो वा अश्वः॑॥ ३॥

((pu̱ro̱dhāme̱va gácchati ।
tasyá prātaḥsava̱ne sa̱nneṣú nārāśa̱ṃ̱seṣú ।
ekádaśa̱ dakṣiṇā nīyante ।
ekádaśa̱ mādhyaṃ́dine̱ savá̱ne sa̱nneṣú nārāśa̱ṃ̱seṣú ।
ekádaśa tṛtīyasava̱ne sa̱nneṣú nārāśa̱ṃ̱seṣú ।
trayástriṃ́śa̱tsampádyante ।
trayástriṃ́śa̱dvai de̱vatā̍ḥ ।
de̱vatá e̱vāvárundhe ।
aśváścatustri̱ṃ̱śaḥ ।
prā̱jā̱pa̱tyo vā aśváḥ ॥ 3 ॥))

**[[2-7-1-4]]**

प्र॒जाप॑तिश्चतुस्त्रि॒ꣳ॒शो दे॒वता॑नां।
याव॑तीरेव दे॒वताः᳚।
ता ए॒वाव॑रुन्धे।
कृ॒ष्णा॒जि॒ने॑ऽभिषि॑ञ्चति।
ब्रह्म॑णो वा ए॒तद्रू॒पम्।
यत्कृ॑ष्णाजि॒नम्।
ब्र॒ह्म॒व॒र्च॒सेनै॒वैन॒ꣳ॒ सम॑र्धयति।
आज्ये॑ना॒भिषि॑ञ्चति।
तेजो॒ वा आज्य᳚म्।

तेज॑ ए॒वास्मि॑न्दधाति ॥ ४ ॥

होता॑ भवति यजत॒ वा अश्वो॑ दधाति ॥ १ ॥

((pra̱jāpa̍tiśca̱tustri̱m̐̍śo de̱vatā̍nām ।
yāva̍tīre̱va de̱vatā̎ḥ ।
tā e̱vāva̍rundhe ।
kṛ̱ṣṇā̱ji̱ne̍'bhiṣi̍ñcati ।
bra̱hma̍ṇo̱ vā e̱tadrū̱pam ।
yatkṛ̍ṣṇāji̱nam ।
bra̱hma̱va̱rca̱senai̱vaina̱m̐̎ sama̍rdhayati ।
ā̱jye̍nā̱bhiṣi̍ñcati ।
tejo̱ vā ājya̍m ।
teja̍ e̱vāsmi̍ndadhāti ॥ 4 ॥
hotā̍ bhavati yajata̱ vā aśvo̍ dadhāti ॥ 1 ॥))

**[[2-7-2-1]]**

यदा᳚ग्ने॒यो भव॑ति ।

अ॒ग्निमु॑खा॒ ह्यृद्धिः॑ ।

अथ॒ यत्पौ॒ष्णः ।

पुष्टि॒र्वै पू॒षा ।

पुष्टि॒र्वैश्य॑स्य ।

पुष्टि॑मे॒वाव॑रुन्धे ।

प्र॒स॒वाय॑ सावि॒त्रः ।

अथ॒ यत्त्वा॒ष्ट्रः ।

त्वष्टा॒ हि रू॒पाणि॑ विक॒रोति॑ ।

नि॒र्व॒रु॒ण॒त्वाय॑ वारु॒णः ॥ १ ॥

((yadā̎gne̱yo bhava̍ti ।
a̱gnimu̍khā̱ hyṛ̱ddhi̍ḥ ।
atha̱ yatpau̱ṣṇaḥ ।
puṣṭi̱rvai pū̱ṣā ।
puṣṭi̱rvaiśya̍sya ।
puṣṭi̍me̱vāva̍rundhe ।
pra̱sa̱vāya̍ sāvi̱traḥ ।
atha̱ yattvā̱ṣṭraḥ ।
tvaṣṭā̱ hi rū̱pāṇi̍ vika̱roti̍ ।
ni̱rva̱ru̱ṇa̱tvāya̍ vāru̱ṇaḥ ॥ 1 ॥))

**[[2-7-2-2]]**

अथो॒ य॑ ए॒व कश्च॒ सन्त्सू॒यते᳚ ।

स हि वा॑रु॒णः ।

अथ॒ यद्वै᳚श्वदे॒वः ।

वै॒श्व॒दे॒वो हि वैश्य॑ः ।

अथ॒ यन्मा॑रु॒तः ।

मा॒रु॒तो हि वैश्य॑ः ।

स॒प्तैतानि॑ ह॒वीꣳषि॑ भवन्ति ।

स॒प्त ग॑णा॒ वै म॒रुत॑ः ।

पृश्नि॑ः पष्ठौ॒ही मा॑रु॒त्याल॑भ्यते ।

वि॒द्वै म॒रुत॑ः ।

विश॑ ए॒वैतन्म॑ध्य॒तो॑ऽभिषि॑च्यते ।

तस्मा॒द्वा ए॒ष वि॒शः प्रि॒यः ।

वि॒शो हि म॑ध्य॒तो॑ऽभिषि॒च्यते᳚ ।

ऋ॒ष॒भ॒च॒र्मे॑ऽध्य॒भिषि॑ञ्चति ।

स हि प्र॑जनयि॒ता ।

द॒ध्नाऽभिषि॑ञ्चति ।

ऊर्ग्वा अ॒न्नाद्य॑ं दधि॑ ।

ऊ॒र्जैवैन॑म॒न्नाद्ये॑न॒ सम॑र्धयति ॥ २ ॥

वा॒रु॒णो वि॒द्वै म॒रु॒तो॒ऽष्टौ च॑ ॥ २ ॥

((atho̱ ya̍ e̱va kaśca̱ santsū̱yate̎ ।
sa hi vā̍ru̱ṇaḥ ।
atha̱ yadvai̎śvade̱vaḥ ।
vai̱śva̱de̱vo hi vaiśya̍ḥ ।
atha̱ yanmā̍ru̱taḥ ।
mā̱ru̱to hi vaiśya̍ḥ ।
sa̱ptaitāni̍ ha̱vīm̐̍ṣi̍ bhavanti ।
sa̱pta ga̍ṇā̱ vai ma̱ruta̍ḥ ।
pṛ̱śni̍ḥ paṣṭhau̱hī mā̍ru̱tyālā̍bhyate ।
vi̱dvai ma̱ruta̍ḥ ।
viśa̍ e̱vaitanma̍dhya̱to̍'bhiṣi̍cyate ।
tasmā̱dvā e̱ṣa vi̱śaḥ pri̱yaḥ ।
vi̱śo hi ma̍dhya̱to̍'bhiṣi̱cyate̎ ।
ṛ̱ṣa̱bha̱ca̱rme'dhya̱bhiṣi̍ñcati ।
sa hi pra̍janayi̱tā ।
da̱dhnā'bhiṣi̍ñcati ।
ūrgvā a̱nnādya̱m dadhi̍ ।
ū̱rjaivaina̍ma̱nnādye̍na̱ sama̍rdhayati ॥ 2 ॥
vā̱ru̱ṇo vi̱dvai ma̱ruto̱'ṣṭau ca̍ ॥ 2 ॥))

**[[2-7-3-1]]**

यदा᳚ग्ने॒यो भव॑ति ।

आ॒ग्ने॒यो वै ब्रा᳚ह्म॒णः ।

अथ॒ यत्सौ॒म्यः ।

सौ॒म्यो हि ब्रा᳚ह्म॒णः ।

प्र॒स॒वायै॒व सा॑वि॒त्रः ।

अथ॒ यद्बा॑र्हस्प॒त्यः ।

ए॒तद्वै ब्रा᳚ह्म॒णस्य॑ वाक्प॒तीय᳚म् ।

अथ॒ यद॑ग्नीषो॒मीय॑ः ।

आ॒ग्ने॒यो वै ब्रा᳚ह्म॒णः ।

तौ य॒दा सं॒गच्छे॑ते ॥ १ ॥

((yadāgneyo bhavati |
āgneyo vai brāhmaṇaḥ |
atha yatsaumyaḥ |
saumyo hi brāhmaṇaḥ |
prasavāyaiva sāvitraḥ |
atha yadbārhaspatyaḥ |
etadvai brāhmaṇasya vākpatīyām |
atha yadāgnīṣomīyaḥ |
āgneyo vai brāhmaṇaḥ |
tau yadā saṃgacchete || 1 ||))

**[[2-7-3-2]]**

अथ वीर्यावत्तरो भवति।
अथ यत्सारस्वतः।
एतद्धि प्रत्यक्षं ब्राह्मणस्य वाक्पतीयम्।
निर्वरुणत्वायैव वारुणः।
अथो य एव कश्च सन्त्सूयते।
स हि वारुणः।
अथ यद्द्यावापृथिव्यः।
इन्द्रो वृत्राय वज्रमुदयच्छत्।
तं द्यावापृथिवी नान्वमन्येताम्।
तमेतेनैव भागधेयेनान्वमन्येताम्॥ २॥

((atha vīryāvattaro bhavati |
atha yatsārasvataḥ |
etaddhi pratyakṣaṃ brāhmaṇasya vākpatīyām |
nirvaruṇatvāyaiva vāruṇaḥ |
atho ya eva kaśca santsūyate |
sa hi vāruṇaḥ |
atha yaddyāvāpṛthivyaḥ |
indro vṛtrāya vajramudayacchat |
taṃ dyāvāpṛthivī nānvamanyetām |
tametenaiva bhāgadheyenānvamanyetām || 2 ||))

**[[2-7-3-3]]**

वज्रस्य वा एषोऽनुमानाय।
अनुमतवज्रः सूयाता इति।
अष्टावेतानि हवीꣳषि भवन्ति।
अष्टाक्षरा गायत्री।
गायत्री ब्रह्मवर्चसम्।
गायत्रियैव ब्रह्मवर्चसमवरुन्धे॥
हिरण्येन घृतमुत्पुनाति।
तेजस एव रुचे।
कृष्णाजिनेऽभिषिञ्चति।
ब्रह्मणो वा एतदृक्सामयो रूपम्।
यत्कृष्णाजिनम्।
ब्रह्मन्नेवैनमृक्सामयोरध्यभिषिञ्चति।
घृतेनाभिषिञ्चति।
तथा वीर्यावत्तरो भवति॥ ३॥
संगच्छेते भागधेयेनान्वमन्येताꣳ रूपं चत्वारि च॥ ३॥

((vajrasya vā eṣo'numānāya |
anumatavajraḥ sūyātā iti |
aṣṭāvetāni havīṃṣi bhavanti |
aṣṭākṣarā gāyatrī |
gāyatrī brahmavarcasam |
gāyatriyaiva brahmavarcasamavarundhe ||
hiraṇyena ghṛtamutpunāti |
tejasa eva ruce |
kṛṣṇājine'bhiṣiñcati |
brahmaṇo vā etadṛksāmayo rūpam |
yatkṛṣṇājinam |
brahmannevainamṛksāmayoradhyabhiṣiñcati |
ghṛtenābhiṣiñcati |
tathā vīryavattaro bhavati || 3 ||
saṃgacchete bhāgadheyenānvamanyetāṃ rūpaṃ catvāri ca || 3 ||))

**[[2-7-4-1]]**

न वै सोमेन सोमस्य सवोऽस्ति।
हतो ह्येषः।
अभिषुतो ह्येषः।
न हि हतः सूयते।
सौमीꣳ सूतवशामालभते।
सोमो वै रेतोधाः।
रेत एव तद्दधाति।
सौम्यर्चाऽभिषिञ्चति।
रेतोधा ह्येषा।
रेतः सोमः।
रेत एवास्मिन्दधाति।
यत्किंच राजसूयमृते सोमम्।
तत्सर्वं भवति।
अषाढं युत्सु पृतनासु पप्रिम्।
सुवर्षामप्स्वां वृजनस्य गोपाम्।
भरेषुजाꣳ सुक्षितिं सुश्रवसम्।
जयन्तं त्वामनु मदेम सोम॥ १॥

रे॒तः सोम॑ः स॒प्त च॑॥ ४॥

((na vai some̍na̱ soma̍sya sa̱vo̎'sti |
ha̱to hye̍ṣa̱ḥ |
a̱bhiṣu̍to̱ hye̍ṣa̱ḥ |
na hi ha̱taḥ sū̱yate̎ |
sa̱umī̱m̐ sū̱tava̍śā̱mālā̍bhate |
somo̱ vai re̍to̱dhāḥ |
reta̍ e̱va tadda̍dhāti |
sa̱umyarcā'bhiṣi̍ñcati |
re̱to̱dhā hye̍ṣā |
reta̱ḥ soma̍ḥ |
reta̍ e̱vāsmi̍ndadhāti |
yatkiṃca̍ rāja̱sūya̍mṛ̱te somā̎m |
tatsarva̍ṃ bhavati |
a̱ṣāḍha̱ṃ yu̱tsu pṛta̍nāsu̱ papri̎m |
su̱var̥ṣāma̱psvāṃ vṛ̱jana̍sya go̱pām |
bha̱reṣu̱jām̐ su̍kṣi̱tiṃ su̱śrava̍sam|
jaya̍ntaṃ̱ tvāmanu̍ madema soma || 1 ||
reta̱ḥ soma̍ḥ sa̱pta ca̍ || 4 ||))

**[[2-7-5-1]]**

यो वै सोमे॑न सू॒यते᳚।
स दे॑वस॒वः।
यः प॒शुना॑ सू॒यते᳚।
स दे॑वस॒वः।
य इष्ट्या॑ सू॒यते᳚।
स म॑नुष्यस॒वः।
ए॒तं वै पृथ॑ये दे॒वाः प्राय॑च्छन्।
ततो॒ वै सोऽप्या॑र॒ण्याना᳚ं प॒शूनाम॑सूयत।
याव॑ती॒ः किय॑तीश्च प्र॒जा वाच॒ं वद॑न्ति।
तासा॒ꣳ सर्वा॑साꣳ सूयते॥

((yo vai some̍na sū̱yate̎ |
sa de̍vasa̱vaḥ |
yaḥ pa̱śunā̍ sū̱yate̎ |
sa de̍vasa̱vaḥ |
ya iṣṭyā̍ sū̱yate̎ |
sa ma̍nuṣyasa̱vaḥ |
e̱taṃ vai pṛtha̍ye de̱vāḥ prāya̍cchan |
tato̱ vai so'pyā̍ra̱ṇyānā̎ṃ paśū̱nāma̍sūyata |
yāva̍tī̱ḥ kiya̍tīśca pra̱jā vāca̱ṃ vada̍nti |
tāsā̱m̐ sarvā̍sām̐ sūyate ||))

**[[2-7-5-2]]**

य ए॒तेन॒ यज॑ते।
य उ॑ चैनमे॒वं वेद॑।
ना॒रा॒श॒ꣳस्यर्चाऽभिषि॑ञ्चति।
म॒नु॒ष्या॑ वै न॒रा॒शꣳस॑ः।
नि॒ह्नुत्य॒ वावै तत्।
अथा॒भिषि॑ञ्चति।
यत्किंच॑ राज॒सूय॑मनुत्तरवे॒दीका᳚म्।
तत्सर्व॑ं भवति।
ये मे॑ पञ्चा॒शत॑ं द॒दुः।
अश्वा॑नाꣳ स॒धस्तु॑तिः।
द्यु॒मद॑ग्ने महि॒ श्रव॑ः।
बृ॒हत्कृ॑धि म॒घोना᳚म्।
नृ॒वद॑मृत नृ॒णाम्॥ २॥
सू॒यते॒ स॒धस्तु॑ति॒स्त्रिणि॑ च॥ ५॥

((ya e̱tena̱ yaja̍te |
ya u̍ cainame̱vaṃ veda̍ |
nā̱rā̱śa̱m̐syarcā'bhiṣi̍ñcati |
ma̱nu̱ṣyā̍ vai narā̱śam̐sa̍ḥ |
ni̱hnutya̱ vāvai tat |
athā̱bhiṣi̍ñcati |
yatkiṃca̍ rāja̱sūya̍manuttarave̱dīkā̎m |
tatsarva̍ṃ bhavati |
ye me̍ pañcā̱śata̍ṃ da̱duḥ |
aśvā̍nām̐ sa̱dhastu̍tiḥ |
dyu̱mada̍gne̱ mahi̱ śrava̍ḥ |
bṛ̱hatkṛ̍dhi ma̱ghonā̎m |
nṛ̱vada̍mṛta nṛ̱ṇām || 2 ||
sū̱yate̱ sa̱dhastu̍ti̱striṇi̍ ca || 5 ||))

**[[2-7-6-1]]**

ए॒ष गो॑स॒वः।
ष॒ट्त्रि॒ꣳश उ॒क्थ्यो॑ बृ॒हत्सा॑मा।
पव॑माने कण्वरथन्त॒रं भ॑वति।
यो वै वा॑ज॒पेय॑ः।
स स॑म्राट्त्स॒वः।
यो रा॑ज॒सूय॑ः।
स व॑रुणस॒वः।
प्र॒जाप॑ति॒ः स्वारा᳚ज्यं परमे॒ष्ठी।
स्वारा᳚ज्यं गौ॑रिव।
गौरि॑व भवति॥ १॥

((e̱ṣa go̍sa̱vaḥ |
ṣa̱ṭtri̱m̐śa u̱kthyo̍ bṛ̱hatsā̍mā |
pava̍māne kaṇvarathanta̱raṃ bha̍vati |
yo vai vā̍ja̱peya̍ḥ |
sa sa̍mrāṭtsa̱vaḥ |
yo rā̍ja̱sūya̍ḥ |
sa va̍ruṇasa̱vaḥ |

prajāpátiḥ svārā̎jyam parameṣṭhī ।
svārā̎jyam gaureva ।
gaurívа bhavati ॥ 1 ॥))

**[[2-7-6-2]]**

य ए॒तेन॑ यज॑ते।
य उ॑ चैनमे॒वं वेद॑।
उ॒भे बृ॑हद्रथंत॒रे भ॑वतः।
तद्धि स्वारा॒ज्यम्।।
अ॒यु॒तं दक्षि॑णाः।
तद्धि स्वारा॒ज्यम्।
प्र॒ति॒धुषा॒ऽभिषि॑ञ्चति।
तद्धि स्वारा॒ज्यम्।
अनु॑द्धते वेद्यै॑ दक्षिण॒त आ॑ह॒वनीय॑स्य बृह॒तस्तो॒त्रं
प्रत्य॒भिषि॑ञ्चति।
इ॒यं वाव र॑थंत॒रम्।

((ya etena yajáte ।
ya ú cainamevaṃ vedá ।
ubhe bṛ́hadrathaṃtare bhávataḥ ।
taddhi svārā̎jyam। ।
ayutaṃ dakṣíṇāḥ ।
taddhi svārā̎jyam ।
pratidhuṣā'bhiṣíñcati ।
taddhi svārā̎jyam ।
anúddhate vedyaí dakṣiṇata á̄havanīyásya
bṛhatastotraṃ pratyabhiṣíñcati ।
iyaṃ vāva ráthaṃtaram ।))

**[[2-7-6-3]]**

अ॒सौ बृ॒हत्।
अ॒नयो॑रे॒वैन॒मन॑न्तर्हितम॒भिषि॑ञ्चति।
प॒शु॒स्तो॒मो वा ए॒षः।
तेन॑ गोस॒वः।
ष॒ट्त्रि॒ꣳशः सर्वैः॑।
रे॒वज्जा॒तः सह॑सा वृद्धः।
क्ष॒त्राणा॒ं क्षत्त्र॒भृत्त॑मो वयो॒धाः।
म॒हान्म॑हि॒त्वे त॑स्तभा॒नः।
क्ष॒त्त्रे रा॒ष्ट्रे च॑ जागृहि।
प्र॒जाप॑तेस्त्वा परमे॒ष्ठिनः॑ स्वारा॒ज्येना॒भिषि॑ञ्चा॒मीत्या॑ह।
स्वारा॒ज्यमे॒वैन॑ं गमयति॥ ३॥
इ॒व भ॒व॒ति॒ र॒थंत॒रमा॒हैकं॑ च॥ ६॥

((asau bṛhat ।
anayórevainamanántarhitamabhiṣíñcati ।
paśustomo vā eṣaḥ ।
tená gosavaḥ ।
ṣattriṁ̎śaḥ sarváḥ ।
revajjātaḥ sahásā vṛddhaḥ ।
kṣatrāṇām̎ kṣattrabhṛttámo vayodhāḥ ।
mahānmáhitve tástabhānaḥ ।
kṣattre rāṣṭre cá jāgṛhi ।
prajāpátestvā parameṣṭhinaḥ
svārā̎jyenābhiṣíñcāmītyáha ।
svārā̎jyamevainaṁ gamayati ॥ 3 ॥
iva bhavati rathaṃtaramāhaikaṁ ca ॥ 6 ॥))

**[[2-7-7-1]]**

सि॒ꣳहे व्या॒घ्र उ॒त या पृदा॑कौ।
त्विषि॑र॒ग्नौ ब्रा॑ह्म॒णे सूर्ये॑ या।
इन्द्रं॒ या दे॒वी सु॒भगा॑ ज॒जान॑।
सा न॒ आग॒न्वर्च॑सा संवि॒दा॒ना।
या रा॑ज॒न्ये॑ दु॒न्दु॒भावाय॑तायाम्।
अश्व॑स्य॒ क्रन्द्ये॒ पुरु॑षस्य मा॒यौ।
इन्द्रं॒ या दे॒वी सु॒भगा॑ ज॒जान॑।
सा न॒ आग॒न्वर्च॑सा संवि॒दा॒ना।
या ह॒स्तिनि॑ द्वी॒पिनि॒ या हिर॑ण्ये।
त्विषि॒रश्वे॑षु॒ पुरु॑षे॒षु॒ गोषु॑॥ १॥

((siṁ̎he vyāghra uta yā pṛdákau ।
tviṣiragnau brā̎hmaṇe sūrye yā ।
indraṃ yā devī subhagá̄ jajāná ।
sā na āganvarcásā saṃvidānā ।
yā rájanyé dundubhāvāyátāyām ।
aśvásya krandye purúṣasya māyau ।
indraṃ yā devī subhagá̄ jajāná ।
sā na āganvarcásā saṃvidānā ।
yā hastini dvipini yā hiráṇye ।
tviṣiraśvéṣu purúṣeṣu goṣú ॥ 1 ॥))

**[[2-7-7-2]]**

इन्द्रं॒ या दे॒वी सु॒भगा॑ ज॒जान॑।
सा न॒ आग॒न्वर्च॑सा संवि॒दा॒ना।
रथे॑ अ॒क्षेषु॑ वृ॒षभ॑स्य॒ वाजे॑।
वाते॑ प॒र्जन्ये॒ वरु॑णस्य॒ शुष्मे॑।
इन्द्रं॒ या दे॒वी सु॒भगा॑ ज॒जान॑।
सा न॒ आग॒न्वर्च॑सा संवि॒दा॒ना।
राड॑सि वि॒राड॑सि।
स॒म्राड॑सि स्व॒राड॑सि।

इन्द्रा॑य त्वा॒ तेज॑स्वते॒ तेज॑स्वन्तꣳ श्रीणामि।
इन्द्रा॑य॒ त्वौज॑स्वत॒ ओज॑सवन्तꣳ श्रीणामि॥ २॥

((i̱ndraṃ yā de̱vī su̱bhagā̎ ja̱jāna̍ |
sā na̱ āga̱nvarca̍sā saṃvidā̱nā |
rathe a̱kṣeṣu̍ vṛṣa̱bhasya̱ vāje̎ |
vāte̍ pa̱rjanye̱ varu̍ṇasya̱ śuṣme̎ |
indraṃ yā de̱vī su̱bhagā̎ ja̱jāna̍ |
sā na̱ āga̱nvarca̍sā saṃvidā̱nā |
rāḍa̍si vi̱rāḍa̍si |
sa̱mrāḍa̍si sva̱rāḍa̍si |
indrā̎ya tvā̱ teja̍svate̱ teja̍svanta̎ṁ śrīṇāmi |
indrā̎ya̱ tvauja̍svata̱ oja̍savanta̎ṁ śrīṇāmi || 2 ||))

**[[2-7-7-3]]**

इन्द्रा॑य त्वा॒ पय॑स्वते॒ पय॑स्वन्तꣳ श्रीणामि।
इन्द्रा॑य॒ त्वाऽऽयु॑ष्मत॒ आयु॑ष्मन्तꣳ श्रीणामि।
तेजो॑ऽसि।
तत्ते॒ प्रय॑च्छामि।
तेज॑स्वदस्तु मे॒ मुख᳚म्।
तेज॑स्व॒च्छिरो॑ अस्तु मे।
तेज॑स्वान्वि॒श्वत॑ः प्र॒त्यङ्।
तेज॑सा॒ संपि॑पृग्धि मा।
ओजो॑ऽसि।
तत्ते॒ प्रय॑च्छामि॥ ३॥

((indrā̎ya tvā̱ paya̍svate̱ paya̍svanta̎ṁ śrīṇāmi |
indrā̎ya̱ tvā''yu̍ṣmata̱ āyu̍ṣmanta̎ṁ śrīṇāmi |
tejo̍'si |
tatte̱ praya̍cchāmi |
teja̍svadastu me̱ mukha̎m |
teja̍sva̱cchiro̍ astu me |
teja̍svānvi̱śvata̍ḥ pra̱tyaṅ |
teja̍sā̱ saṃpi̍pṛgdhi mā |
ojo̍'si |
tatte̱ praya̍cchāmi || 3 ||))

**[[2-7-7-4]]**

ओज॑स्वदस्तु मे॒ मुख᳚म्।
ओज॑स्व॒च्छिरो॑ अस्तु मे।
ओज॑स्वान्वि॒श्वत॑ः प्र॒त्यङ्।
ओज॑सा॒ संपि॑पृग्धि मा।
पयो॑ऽसि।
तत्ते॒ प्रय॑च्छामि।
पय॑स्वदस्तु मे॒ मुख᳚म्।
पय॑स्व॒च्छिरो॑ अस्तु मे।
पय॑स्वान्वि॒श्वत॑ः प्र॒त्यङ्।
पय॑सा॒ संपि॑पृग्धि मा॥ ४॥

((oja̍svadastu me̱ mukha̎m |
oja̍sva̱cchiro̍ astu me |
oja̍svānvi̱śvata̍ḥ pra̱tyaṅ |
oja̍sā̱ saṃpi̍pṛgdhi mā |
payo̍'si |
tatte̱ praya̍cchāmi |
paya̍svadastu me̱ mukha̎m |
paya̍sva̱cchiro̍ astu me |
paya̍svānvi̱śvata̍ḥ pra̱tyaṅ |
paya̍sā̱ saṃpi̍pṛgdhi mā || 4 ||))

**[[2-7-7-5]]**

आयु॑रसि।
तत्ते॒ प्रय॑च्छामि।
आयु॑ष्मदस्तु मे॒ मुख᳚म्।
आयु॑ष्म॒च्छिरो॑ अस्तु मे।
आयु॑ष्मान्वि॒श्वत॑ः प्र॒त्यङ्।
आयु॑षा॒ संपि॑पृग्धि मा।
इ॒मम॑ग्न॒ आयु॑षे॒ वर्च॑से कृधि।
प्रि॒यꣳ रेतो॑ वरुण सोम राजन्।
मा॒तेवा᳚स्मा अदि॒ते शर्म॑ यच्छ।
विश्वे॑ दे॒वा॒ जर॑दष्टि॒र्यथा स॑त्॥ ५॥

((āyu̍rasi |
tatte̱ praya̍cchāmi |
āyu̍ṣmadastu me̱ mukha̎m |
āyu̍ṣma̱cchiro̍ astu me |
āyu̍ṣmānvi̱śvata̍ḥ pra̱tyaṅ |
āyu̍ṣā̱ saṃpi̍pṛgdhi mā |
i̱mama̍gna̱ āyu̍ṣe̱ varca̍se kṛdhi |
pri̱yaṁ reto̍ varuṇa soma rājan |
mā̱tevā̎smā adi̱te śarma̍ yaccha |
viśve̍ devā̱ jara̍daṣṭi̱ryathā sa̍t || 5 ||))

**[[2-7-7-6]]**

आयु॑रसि वि॒श्वायु॑रसि।
स॒र्वायु॑रसि॒ सर्व॑मायु॑रसि।
यतो॒ वातो॒ मनो॑जवाः।
यत॒ः क्षर॑न्ति॒ सिन्ध॑वः।
तासा᳚ं त्वा॒ सर्वा॑साꣳ रु॒चा।
अ॒भिषि॑ञ्चामि॒ वर्च॑सा।

स॒मु॒द्र इ॑वासि ग॒ह्मना॑ ।
सोम॑ इवा॒स्यदा॑भ्यः ।
अ॒ग्निरि॑व वि॒श्वत॑ः प्र॒त्यङ् ।
सूर्य॑ इ॒व ज्योति॑षा वि॒भूः ॥ ६ ॥

((āyu̍rasi vi̱śvāyu̍rasi |
sa̱rvāyu̍rasi̱ sarva̱māyu̍rasi |
yato̱ vāto̱ mano̍javāḥ |
yata̱ḥ kṣara̍nti̱ sindhava̍ḥ |
tāsā̎ṃ tva̱ sarva̍sā̎ṃ ru̱cā |
a̱bhiṣi̍ñcāmi̱ varca̍sā |
sa̱mu̱dra i̍vāsi ga̱hmanā̎ |
soma̍ ivā̱syadā̎bhyaḥ |
a̱gniri̍va vi̱śvata̍ḥ pra̱tyaṅ |
sūrya̍ iva̱ jyoti̍ṣā vi̱bhūḥ || 6 ||))

**[[2-7-7-7]]**

अ॒पां यो द्र॒वण॑े रस॑ः ।
तम॒ह॒म॒स्मा आ॑मुष्याय॒णाय॑ ।
तेज॑से ब्रह्मवर्च॒साय॑ गृह्णामि ।
अ॒पां य ऊ॒र्मौ रस॑ः ।
तम॒ह॒म॒स्मा आ॑मुष्याय॒णाय॑ ।
ओज॑से वी॒र्या॑य गृह्णामि ।
अ॒पां यो म॑ध्य॒तो रस॑ः ।
तम॒ह॒म॒स्मा आ॑मुष्याय॒णाय॑ ।
पु॒ष्ट्यै॑ प्र॒जन॑नाय गृह्णामि ।
अ॒पां यो य॒ज्ञियो॒ रस॑ः ।
तम॒ह॒म॒स्मा आ॑मुष्याय॒णाय॑ ।
आयु॑षे दी॒र्घायु॒त्वाय॑ गृह्णामि ॥ ७ ॥
गोष्वोज॑स्वन्तꣳ श्रीणा॒म्योजो॑ऽसि॒ तत्ते प्रय॑च्छामि॒ पय॑सा॒
संपि॑पृग्धि॒ मा सद्वि॒भूर्य॒ज्ञियो॒ रसो॒ द्वे च॑ ॥ ७ ॥

((a̱pāṃ yo drava̍ṇe̱ rasa̍ḥ |
ta̱ma̱hama̱smā a̍muṣyāya̱ṇāya̍ |
teja̍se brahmavarca̱sāya̍ gṛhṇāmi |
a̱pāṃ ya u̱rmau rasa̍ḥ |
ta̱ma̱hama̱smā a̍muṣyāya̱ṇāya̍ |
oja̍se vī̱ryā̍ya gṛhṇāmi |
a̱pāṃ yo ma̍dhya̱to rasa̍ḥ |
ta̱ma̱hama̱smā a̍muṣyāya̱ṇāya̍ |
puṣ̱ṭyai̎ pra̱jana̍nāya gṛhṇāmi |
a̱pāṃ yo ya̱jñiyo̱ rasa̍ḥ |
ta̱ma̱hama̱smā a̍muṣyāya̱ṇāya̍ |
āyu̍ṣe dīrghāyu̱tvāya̍ gṛhṇāmi || 7 ||
goṣvoja̍svanta̎ṃ śrīṇā̱myojo̍'si̱ tatte praya̍cchāmi̱
paya̍sā̱ saṃpi̍pṛgdhi̱ mā sadvi̱bhūrya̱jñiyo̱ raso̱ dve
ca̍ || 7 ||))

**[[2-7-8-1]]**

अ॒भिप्रेहि॑ वी॒रय॑स्व ।
उ॒ग्रश्चेत्ता॑ सपत्न॒हा ।
आति॑ष्ठ मित्र॒वर्ध॑नः ।
तुभ्य॑ं दे॒वा अधि॑ब्रुवन् ।
अ॒ङ्कौ न्य॒ङ्कावभि॒त आति॑ष्ठ वृत्रह॒न्रथ॑म् ।
आति॑ष्ठन्तं॒ परि॒ विश्वे॑ अभूषन् ।
श्रियं॒ वसा॑नश्चरति॒ स्वरो॑चाः ।
म॒हत्तद॒स्यासु॑रस्य॒ नाम॑ ।
आ वि॒श्वरू॑पो अ॒मृता॑नि तस्थौ ।
अनु॒ त्वेन्द्रो॑ मद॒त्वनु॒ बृ॒ह॒स्पति॑ः ॥ १ ॥

((a̱bhiprehi̍ vī̱raya̍sva |
u̱graścettā̍ sapatna̱hā |
āti̍ṣṭha mitra̱vardha̍naḥ |
tubhya̍ṃ de̱vā adhi̍bruvan |
a̱ṅkau nya̱ṅkāva̱bhita̱ āti̍ṣṭha vṛtraha̱nrathā̎m |
āti̍ṣṭha̍nta̱ṃ pari̱ viśve̍ abhūṣan |
śriya̱ṃ vasā̍naścarati̱ svaro̍cāḥ |
ma̱hattada̱syāsu̍rasya̱ nāma̍ |
ā vi̱śvarū̍po a̱mṛtā̍ni tasthau |
anu̱ tvendro̍ mada̱tvanu̱ bṛ̱ha̱spati̍ḥ || 1 ||))

**[[2-7-8-2]]**

अनु॒ सोमो॒ अन्व॒ग्निरा॑वीत् ।
अनु॑ त्वा॒ विश्वे॑ दे॒वा अ॑वन्तु ।
अनु॑ स॒प्त राजा॑नो॒ य उ॒ताभि॒षि॑क्ताः ।
अनु॑ त्वा मि॒त्रावरु॑णावि॒हाव॑तम् ।
अनु॒द्यावा॑पृथि॒वी वि॒श्वश॑म्भू ।
सूर्यो॑ अहो॑भिरनु॑ त्वाऽवतु ।
च॒न्द्रमा॒ नक्ष॑त्रैरनु॑ त्वाऽवतु ।
द्यौश्च॑ त्वा पृथि॒वी च॒ प्रचे॑तसा ।
शु॒क्रो बृ॒हद्दक्षि॑णा त्वा पिपर्तु ।
अनु॑ स्व॒धा चि॑किता॒ꣳ सोमो॑ अ॒ग्निः ।
आऽयं॑ पृणक्तु॒ रज॑सी उ॒पस्थ॑म् ॥ २ ॥
बृ॒ह॒स्पति॑ः सोमो॑ अ॒ग्निरेक॑ं च ॥ ८ ॥

((anu̱ somo̱ anva̱gnirā̍vīt |
anu̍ tvā̱ viśve̍ de̱vā a̍vantu |
anu̍ sa̱pta rājā̍no̱ ya u̱tābhiṣi̍ktāḥ |
anu̍ tvā mi̱trāvaru̍ṇāvi̱hāva̍tam |
anu̱dyāvā̍pṛthi̱vī vi̱śvaśa̍ṃbhū |

sūryo ahobhiranu tvā'vatu |
candramā nakṣatrairanu tvā'vatu |
dyauśca tvā pṛthivī ca pracetasā |
śukro bṛhaddakṣiṇā tvā pipartu |
anu svadhā cikitām̐ somo agniḥ |
ā'yam pṛṇaktu rajasī upasthām̐ || 2 ||
bṛhaspatiḥ somo agnirekam ca || 8 ||))

**[[2-7-9-1]]**

प्रजापतिः प्रजा असृजत।
ता अस्मात्सृष्टाः पराचीरायन्।
स एतं प्रजापतिरोदनमपश्यत्।
सोऽन्नं भूतोऽतिष्ठत्।
ता अन्यत्रान्नाद्यमवित्त्वा।
प्रजापतिं प्रजा उपावर्तन्त।
अन्नमेवैनं भूतं पश्यन्तीः प्रजा उपावर्तन्ते।
य एतेन यजते।
य उ चैनमेवं वेद।
सर्वाण्यन्नानि भवन्ति॥ १॥

((prajāpatiḥ prajā asṛjata |
tā asmātsṛṣṭāḥ parācīrāyan |
sa etam prajāpatirodanamapaśyat |
so'nnam bhūto'tiṣṭhat |
tā anyatrānnādyamavittvā |
prajāpatim prajā upāvartanta |
annamevainam bhūtam paśyantīḥ prajā upāvartante |
ya etena yajate |
ya u cainamevam veda |
sarvāṇyannāni bhavanti || 1 ||))

**[[2-7-9-2]]**

सर्वे पुरुषाः।
सर्वाण्येवान्नान्यवरुन्धे।
सर्वान्पुरुषान्।
राडसि विराडसीत्याह।
स्वाराज्यमेवैनं गमयति।
यद्धिरण्यं ददाति।
तेजस्तेनावरुन्धे।
यत्तिसृधन्वम्।
वीर्यं तेन।
यदष्ट्राम्॥ २॥

((sarve puruṣāḥ |
sarvāṇyevānnānyavarundhe |
sarvānpuruṣān |
rāḍasi virāḍasītyāha |
svārājyamevainam gamayati |
yaddhiraṇyam dadāti |
tejastenāvarundhe |
yattisṛdhanvam |
vīryam tena |
yadaṣṭrām̐ || 2 ||))

**[[2-7-9-3]]**

पुष्टिं तेन।
यत्कमण्डलुम्।
आयुष्टेन।
यद्धिरण्यमाबध्नाति।
ज्योतिर्वै हिरण्यम्।
ज्योतिरेवास्मिन्दधाति।
अथो तेजो वै हिरण्यम्।
तेज एवात्मन्धत्ते।
यदोदनं प्राश्नाति।
एतदेव सर्वमवरुध्य॥ ३॥

((puṣṭim tena |
yatkamaṇḍalum̐ |
āyuṣṭena |
yaddhiraṇyamābadhnāti |
jyotirvai hiraṇyam|
jyotirevāsmindadhāti |
atho tejo vai hiraṇyam |
teja evātmandhatte |
yadodanam prāśnāti |
etadeva sarvamavarudhya || 3 ||))

**[[2-7-9-4]]**

तदस्मिन्नेकधाऽधात्।
रोहिण्यां कार्यः।
यद्ब्राह्मण एव रोहिणी।
तस्मादेव।
अथो वर्ष्मैवैनꣳ समानानां करोति।
उद्यता सूर्येण कार्यः।
उद्यन्तं वा एतꣳ सर्वाः प्रजाः प्रतिनन्दन्ति॥
दिदृक्षेण्यो दर्शनीयो भवति।
य एवं वेद।
ब्रह्मवादिनो वदन्ति॥ ४॥

((tada̍sminneka̱dhā'dhā̎t |
ro̱hi̱ṇyā̱ṃ kā̱rya̍ḥ |
yadbrā̎hma̱ṇa e̱va ro̍hi̱ṇī |
tasmā̍de̱va |
atho̱ varṣmai̱vainam̐̍ samā̱nānā̱m̐ karoti |
u̱dya̱tā sūrye̍ṇa kā̱rya̍ḥ |
u̱dyanta̱ṃ vā e̱tam̐̍ sarvā̎ḥ pra̱jāḥ prati̍nandanti ||
di̱dṛ̱kṣe̱ṇyo̍ darśa̱nīyo̍ bhavati |
ya e̱va̱ṃ veda̍ |
bra̱hma̱vā̱dino̍ vadanti || 4 ||))

**[[2-7-9-5]]**

अ॒वेत्यो॑ऽवभृ॒था३ ना३ इति॑।
यद्द॑र्भपुञ्जी॒लैः प॒वय॑ति।
तत्स्वि॑दे॒वावै॑ति।
तन्नावै॑ति।
त्रि॒भिः प॑वयति।
त्रय॑ इ॒मे लो॒काः।
ए॒भिरे॒वैनं॑ लो॒कैः प॑वयति।
अथो॑ अ॒पां वा ए॒तत्तेजो॒ वर्चः॑।
यद्द॒र्भाः।
यद्द॑र्भपुञ्जी॒लैः प॒वय॑ति।
अ॒पामे॒वैनं॒ तेज॑सा॒ वर्च॑सा॒ऽभिषि॑ञ्चति॥ ५॥
भ॒व॒न्त्य॒ष्ट्राम॑व॒रुध्य॑ वदन्ति द॒र्भा यद्द॑र्भपुञ्जी॒लैः प॒व॒य॒त्येकं॑ च॥ ९॥

((a̱vetyo̍'vabhṛ̱thā3 nā3 iti̍ |
yadda̍rbhapuñjī̱laiḥ pa̱vaya̍ti |
tatsvi̍de̱vāvai̍ti |
tannāvai̍ti |
tri̱bhiḥ pa̍vayati |
traya̍ i̱me lo̱kāḥ |
e̱bhire̱vaina̱ṃ lo̱kaiḥ pa̍vayati |
atho̍ a̱pā̱ṃ vā e̱tattejo̱ varca̍ḥ |
yadda̱rbhāḥ |
yadda̍rbhapuñjī̱laiḥ pa̱vaya̍ti |
a̱pāme̱vaina̱ṃ teja̍sā̱ varca̍sā̱'bhiṣi̍ñcati || 5 ||
bha̱va̱ntya̱ṣṭrāma̍va̱rudhya̍ vadanti da̱rbhā yadda̍rbhapuñjī̱laiḥ pa̱va̱ya̱tyekam̍ ca || 9 ||))

**[[2-7-10-1]]**

प्र॒जाप॑तिरकामयत ब॒होर्भू॒याँन्त्स्या॒मिति॑।
स ए॒तं प॑ञ्चशा॒र॒दीय॑मपश्यत्।
तमाह॑रत्।
तेना॑यजत।
ततो॒ वै स ब॒होर्भू॒यानभवत्।
यः का॒मये॑त ब॒होर्भू॒याँन्त्स्या॒मिति॑।
स प॑ञ्चशार॒दीये॑न यजेत।
ब॒होरे॒व भू॒याँन्भवति।
म॒रु॒त्स्तो॒मो वा ए॒षः।
म॒रुतो॒ हि दे॒वानां॒ भूयि॑ष्ठाः॥ १॥

((pra̱jāpa̍tirakāmayata ba̱horbhūyā̎ntsyā̱miti̍ |
sa e̱ta̱ṃ pa̍ñcaśāra̱dīya̍mapaśyat |
tamāha̍rat |
tenā̍yajata |
tato̱ vai sa ba̱horbhūyā̍nabhavat|
yaḥ kā̱maye̍ta ba̱horbhūyā̎ntsyā̱miti̍ |
sa pa̍ñcaśāra̱dīye̍na yajeta |
ba̱hore̱va bhūyā̎nbhavati |
ma̱ru̱tsto̱mo vā e̱ṣaḥ |
ma̱ruto̱ hi de̱vānā̱ṃ bhūyi̍ṣṭhāḥ || 1 ||))

**[[2-7-10-2]]**

ब॒हुर्भ॑वति।
य ए॒ते॒न यज॑ते।
य उ॑ चैन॒मे॒वं वेद॑।
प॒ञ्च॒शा॒र॒दीयो॑ भवति।
पञ्च॒ वा ऋ॒तव॑ः संवत्स॒रः।
ऋ॒तुष्वे॒व सं॑वत्स॒रे प्रति॑तिष्ठति।
अथो॒ पञ्चा॑क्षरा प॒ङ्क्तिः।
पाङ्क्तो॑ य॒ज्ञः।
य॒ज्ञमे॒वाव॑रुन्धे॥
स॒प्त॒द॒शꣳ स्तोमा॒ नाति॑यन्ति।
स॒प्त॒द॒शः प्र॒जाप॑तिः।
प्र॒जाप॑ते॒राप्त्यै॑॥ २॥
भूयि॑ष्ठा यन्ति॒ द्वे च॑॥ १०॥

((ba̱hurbha̍vati |
ya e̱tena̱ yaja̍te |
ya u̍ cainame̱vaṃ veda̍ |
pa̱ñca̱śā̱ra̱dīyo̍ bhavati |
pañca̱ vā ṛ̱tava̍ḥ sa̱ṃvatsa̱raḥ |
ṛ̱tuṣve̱va sa̍ṃvatsa̱re prati̍tiṣṭhati |
atho̱ pañcā̎kṣarā pa̱ṅktiḥ |
pāṅkto̍ ya̱jñaḥ |
yajñame̱vāva̍rundhe ||
sa̱pta̱da̱śam̐̎ stomā̱ nāti̍yanti |
sa̱pta̱da̱śaḥ pra̱jāpa̍tiḥ |
pra̱jāpa̍te̱rāptyai̎ || 2 ||
bhūyi̱ṣṭhā̍ yanti̱ dve ca̍ || 10 ||))

**[[2-7-11-1]]**

अगस्त्यो मरुद्भ्य उक्ष्णः प्रौक्षत्।
तानिन्द्र आदत्त।
त एनं वज्रमुद्यत्याभ्यायन्त।
तानगस्त्यश्चैवेन्द्रश्च कयाशुभीयेनाशमयताम्।
ताञ्छान्तानुपाह्वयत।
यत्कयाशुभीयं भवति शान्त्यै।
तस्मादेत ऐन्द्रा मारुता उक्षाणः सवनीया भवन्ति।
त्रयः प्रथमेऽहन्नालभ्यन्ते।
एवं द्वितीये।
एवं तृतीये॥ १॥

((agastyo marudbhya ukṣṇaḥ praukṣat |
tānindra ādatta |
ta enaṃ vajramudyatyābhyāyanta |
tānagastyaścaivendraśca kayāśubhīyenāśamayatām |
tāñchāntānupāhvayata |
yatkayāśubhīyaṃ bhavati śāntyai |
tasmādeta aindrā mārutā ukṣāṇaḥ savanīyā bhavanti |
trayaḥ prathame'hannālabhyante |
evaṃ dvitīye |
evaṃ tṛtīye || 1 ||))

**[[2-7-11-2]]**

एवं चतुर्थे।
पञ्चोत्तमेऽहन्नालभ्यन्ते।
वर्षिष्ठमिव ह्येतदहः।
वर्षिष्ठः समानानां भवति।
य एतेन यजते।
य उ चैनमेवं वेद।
स्वाराज्यं वा एष यज्ञः।
एतेन वा एकयावा कान्दमः स्वाराज्यमगच्छत्।
स्वाराज्यं गच्छति।
य एतेन यजते॥ २॥

((evaṃ caturthe |
pañcottame'hannālabhyante |
varṣiṣṭhamiva hyetadahaḥ |
varṣiṣṭhaḥ samānānāṃ bhavati |
ya etena yajate |
ya u cainamevaṃ veda |
svārājyaṃ vā eṣa yajñaḥ |
etena vā ekayāvā kāndamaḥ svārājyamagacchat |
svārājyaṃ gacchati |
ya etena yajate || 2 ||))

**[[2-7-11-3]]**

य उ चैनमेवं वेद।
मारुतो वा एष स्तोमः।
एतेन वै मरुतो देवानां भूयिष्ठा अभवन्।
भूयिष्ठः समानानां भवति।
य एतेन यजते।
य उ चैनमेवं वेद।
पञ्चशारदीयो वा एष यज्ञः।
आ पञ्चमात्पुरुषादन्नमत्ति।
य एतेन यजते।
य उ चैनमेवं वेद।
सप्तदशꣳ स्तोमा नातियन्ति।
सप्तदशः प्रजापतिः।
प्रजापतेरेव नैति॥ ३॥
तृतीये गच्छति य एतेन यजतेऽत्ति य एतेन यजते य उ चैनमेवं वेद त्रीणि च॥ ११॥
अगस्त्यः स्वाराज्यं मारुतः पञ्चशारदीयो वा एष यज्ञः सप्तदशः प्रजापतेरेव नैति॥

((ya u cainamevaṃ veda |
māruto vā eṣa stomaḥ |
etena vai maruto devānāṃ bhūyiṣṭhā abhavan |
bhūyiṣṭhaḥ samānānāṃ bhavati |
ya etena yajate |
ya u cainamevaṃ veda |
pañcaśāradīyo vā eṣa yajñaḥ |
ā pañcamātpuruṣādannamatti |
ya etena yajate |
ya u cainamevaṃ veda |
saptadaśaṃ stomā nātiyanti |
saptadaśaḥ prajāpatiḥ |
prajāpatereva naiti || 3 ||
tṛtīye gacchati ya etena yajate'tti ya etena yajate ya u cainamevaṃ veda trīṇi ca || 11 ||
agastyaḥ svārājyaṃ mārutaḥ pañcaśāradīyo vā eṣa yajñaḥ saptadaśaḥ prajāpatereva naiti ||))

**[[2-7-12-1]]**

अस्याजरासो दमा मरित्राः।
अर्चद्धूमासो अग्नयः पावकाः।
श्विचीचयः श्वात्रासो भुरण्यवः।
वनर्षदो वायवो न सोमाः।

यजा॑ नो मि॒त्रावरु॑णा।
यजा॑ दे॒वाꣳ ऋ॒तं बृ॒हत्।
अग्ने॑ यक्षि॒ स्वं दमा᳚म्।
अश्वि॑ना॒ पिब॑तꣳ सु॒तम्।
दीद्य॑ग्नी शुचिव्रता।
ऋ॒तुना॑ यज्ञवाहसा॥ १॥

((a̱syājarā̍so damā ma̱ritrā̎ḥ |
a̱rcaddhū̍māso a̱gnayā̍ḥ pāva̱kāḥ |
śvi̱cī̱cayā̍ḥ śvā̱trāso̍ bhura̱ṇyavā̍ḥ |
va̱na̱rṣado̍ vā̱yavo̱ na somā̎ḥ |
yajā̍ no mi̱trāvaru̍ṇā |
yajā̍ de̱vām̐ ṛ̱taṃ bṛ̱hat |
agne̱ yakṣi̱ svaṃ damā̎m |
aśvi̍nā̱ pibā̍tam̐ su̱tam |
dīdyā̍gnī śucivratā |
ṛ̱tunā̍ yajñavāhasā || 1 ||))

**[[2-7-12-2]]**

द्वे विरू॑पे चरतः॒ स्वर्थे᳚।
अ॒न्याऽन्या॑ व॒त्सममुप॑धापयेते।
हरि॑र॒न्यस्यां॒ भव॑ति स्व॒धावा॑न्।
शु॒क्रो अ॒न्यस्यां᳚ ददृशे सुव॒र्चाः᳚।
पू॒र्वा॒प॒रं चर॑तो मा॒यये॒तौ।
शिशू॒ क्रीड॑न्तौ॒ परि॑यातो अ॒ध्व॒रम्।
विश्वा᳚न्य॒न्यो भुव॑नाऽभि॒चष्टे᳚।
ऋ॒तून॒न्यो वि॒दध॑ज्जायते॒ पुनः॑।
त्रीणि॑ श॒ता त्री॒षहस्रा᳚ण्य॒ग्निम्।
त्रि॒ꣳ॒शच्च॑ दे॒वा नव॑ चासपर्यन्॥ २॥

((dve virū̍pe cara̱taḥ svarthē̎ |
a̱nyā'nyā̍ va̱tsamupa̍dhāpayete |
hari̍ra̱nyasyā̱ṃ bhavā̍ti sva̱dhāvā̍n |
śu̱kro a̱nyasyā̎m̐ dadṛ̱śe su̱varcā̎ḥ |
pū̱rvā̱pa̱raṃ ca̍rato mā̱yayai̱tau |
śiśū̱ krī̱ḍa̍ntau̱ pari̍yāto adhva̱ram |
viśvā̎nya̱nyo bhuva̍nā'bhi̱caṣṭē̎ |
ṛ̱tūna̱nyo vi̱dadha̍jjāyate̱ puna̍ḥ |
trīṇi̍ śa̱tā trī̱ṣa̱hasrā̎ṇya̱gnim |
tri̱m̐śacca̍ de̱vā nava̍ cāsaparyan || 2 ||))

**[[2-7-12-3]]**

औक्ष॑न्घृ॒तैरास्तृ॑णन्ब॒र्हिर॑स्मै।
आदिद्धोता॑रं॒ न्य॑षादयन्त॥
अ॒ग्निना॒ऽग्निः समि॑ध्यते।
क॒विर्गृ॒हप॑ति॒र्युवा᳚।
ह॒व्य॒वाड्जु॒ह्वा᳚स्यः।
अ॒ग्निर्दे॒वानां᳚ ज॒ठरा᳚म्।
पू॒तद॑क्षः क॒विक्र॑तुः।
दे॒वो दे॒वेभि॒राग॑मत्।
अ॒ग्नि॒श्रियो॑ म॒रुतो॑ वि॒श्वकृ॑ष्टयः।
आ त्वे॒षमु॒ग्रमव॑ ईमहे व॒यम्॥ ३॥

((aukṣa̍nghṛ̱tairāstṛ̍ṇanba̱rhira̍smai |
ādiddhotā̍ra̱ṃ nya̍ṣādayanta ||
a̱gninā̱.āgniḥ sami̍dhyate |
ka̱virgṛ̱hapa̍ti̱ryuvā̎ |
ha̱vya̱vāḍju̱hvā̎syaḥ |
a̱gnirde̱vānā̎m̐ ja̱ṭharā̎m |
pū̱tada̍kṣaḥ ka̱vikra̍tuḥ |
de̱vo de̱vebhi̱rāga̍mat |
a̱gni̱śriyo̍ ma̱ruto̍ vi̱śvakṛ̍ṣṭayaḥ |
ā tve̱ṣamu̱gramava̍ īmahe va̱yam || 3 ||))

**[[2-7-12-4]]**

ते स्वा॒मिनो॑ रु॒द्रिया॑ व॒र्षनि॑र्णिजः।
सि॒ꣳ॒हा न हे॒षक्र॑तवः सु॒दान॑वः।
यदु॑त्त॒मे म॑रुतो मध्य॒मे वा᳚।
यद्वा॑ऽव॒मे सु॑भगासो दि॒विष्ठ।
ततो॑ नो रुद्रा उ॒त वा॒ऽन्वस्य॑।
अग्ने॑ वि॒त्ताद्धविषो॒ यद्यजा॑मः।
ईडे॑ अ॒ग्निꣳ स्व॒वस॑ꣳ॒ नमो॑भिः।
इ॒ह प्र॑सप्तो वि॒च॑यत्कृ॒तं नः॑।
रथै॑रिव॒ प्रभ॑रे वाज॒यद्भिः॑।
प्र॒द॒क्षि॒णिन्म॒रुता॒ꣳ॒ स्तोम॑मृध्याम्॥ ४॥

((te svā̱mino̍ ru̱driyā̍ va̱rṣani̍rṇijaḥ |
si̱m̐hā na he̱ṣakra̍tavaḥ su̱dāna̍vaḥ |
yadu̍ttame ma̍ruto madhya̱me vā̎ |
yadvā̍'va̱me su̍bhagāso di̱viṣṭha |
tato̍ no rudrā u̱ta vā̱'nvasya̍ |
agne̍ vi̱ttāddhavi̱ṣo̱ yadyajā̍maḥ |
īḍe̍ a̱gnim̐ svava̍sa̱ṃ namo̍bhiḥ |
i̱ha pra̍sa̱pto vica̍yatkṛ̱taṃ na̍ḥ |
rathai̍riva̱ prabha̍re vāja̱yadbhi̍ḥ |
pra̱da̱kṣi̱ṇinma̱rutā̱m̐ stoma̍mṛdhyām || 4 ||))

**[[2-7-12-5]]**

श्रु॒धि श्रु॑त्कर्ण॒ वह्नि॑भिः।
दे॒वैर॑ग्ने स॒याव॑भिः।

आसी॑दन्तु ब॒र्हिषि॑।
मि॒त्रो वरु॑णो अर्य॒मा।
प्रा॒त॒र्यावा॑णो अध्व॒रम्।
विश्वे॑षा॒मदि॑तिर्य॒ज्ञिया॑नाम्।
विश्वे॑षा॒मति॑थि॒र्मानु॑षाणाम्।
अ॒ग्निर्दे॒वाना॒मव॑ आवृणा॒नः।
सु॒मृ॒डी॒को भ॑वतु वि॒श्ववे॑दाः।
त्वे अ॑ग्ने सुम॒तिं भिक्ष॑माणाः॥ ५॥

((śrudhi śrutkarṇa vahnibhiḥ ।
devairagne sayāvabhiḥ ।
āsidantu barhiṣi ।
mitro varuṇo aryamā ।
prātaryāvāṇo adhvaram ।
viśveṣāmaditiryajñiyānām ।
viśveṣāmatithirmānuṣāṇām ।
agnirdevānāmava āvṛṇānaḥ ।
sumṛḍīko bhavatu viśvavedāḥ ।
tve agne sumatiṃ bhikṣamāṇāḥ ॥ 5 ॥))

**[[2-7-12-6]]**

दि॒वि श्रवो॑ दधिरे य॒ज्ञिया॑सः।
नक्ता॑ च च॒क्रुरु॒षसा॒ विरू॑पे।
कृ॒ष्णं च॒ वर्ण॑मरु॒णं च॒ संधुः॑।
त्वाम॑ग्न आदि॒त्यास॑ आ॒स्य॑म्।
त्वां जि॒ह्वाꣳ शुच॑यश्चक्रिरे कवे।
त्वाꣳ रा॑ति॒षाचो॑ अध्व॒रेषु॑ सश्चिरे।
त्वे दे॒वा ह॒विर॑द॒न्त्याहु॑तम्।
नि त्वा॑ य॒ज्ञस्य॒ साध॑नम्।
अग्ने॒ होता॑रमृ॒त्विज॑म्।
व॒नु॒ष्वद्दे॑व धीमहि॒ प्रचे॑तसम्।
जी॒रं दू॒तमम॑र्त्यम्॥ ६॥
य॒ज्ञ॒वा॒ह॒सा॒ स॒प॒र्य॒न्व॒यमृ॑ध्यां॒ भिक्ष॑माणाः॒ प्रचे॑तस॒मेकं॑ च॥ १२॥

((divi śravo dadhire yajñiyāsaḥ ।
naktā ca cakruruṣasā virūpe ।
kṛṣṇaṃ ca varṇamaruṇaṃ ca saṃdhuḥ ।
tvāmagna ādityāsa āsyam ।
tvāṃ jihvāṃ śucayaścakrire kave ।
tvāṃ rātiṣāco adhvareṣu saścire ।
tve devā haviradantyāhutam ।
ni tvā yajñasya sādhanam ।
agne hotāramṛtvijam ।
vanuṣvaddeva dhīmahi pracetasam ।
jīraṃ dūtamamartyam ॥ 6 ॥
yajñavāhasā saparyanvayamṛdhyāṃ bhikṣamāṇāḥ pracetasamekaṃ ca ॥ 12 ॥))

**[[2-7-13-1]]**

तिष्ठा॒ हरी॒ रथ॒ आ यु॒ज्यमा॑ना या॒हि।
वा॒युर्न नि॒युतो॑ नो॒ अच्छ॑।
पिबा॒स्यन्धो॑ अ॒भिसृ॑ष्टो अ॒स्मे।
इन्द्र॒ स्वाहा॑ ररि॒मा ते॒ मदा॑य।
कस्य॒ वृषा॑ सु॒ते सचा॑।
नि॒युत्वा॑न्वृष॒भो रण॑त्।
वृ॒त्र॒हा सोम॑पीतये।
इन्द्रं॑ व॒यं म॑हाध॒ने।
इन्द्र॒मर्भे॑ हवामहे।
यु॒जं॑ वृ॒त्रेषु॑ व॒ज्रिण॑म्॥ १॥

((tiṣṭhā harī ratha ā yujyamānā yāhi ।
vāyurna niyuto no accha ।
pibāsyandho abhisṛṣṭo asme ।
indra svāhā rarimā te madāya ।
kasya vṛṣā sute sacā ।
niyutvānvṛṣabho raṇat ।
vṛtrahā somapītaye ।
indraṃ vayaṃ mahādhane ।
indramarbhe havāmahe ।
yujaṃ vṛtreṣu vajriṇam ॥ 1 ॥))

**[[2-7-13-2]]**

द्वि॒तायो॑ वृ॒त्रह॒न्तमः॑।
वि॒द इन्द्रः॑ श॒तक्र॑तुः।
उप॑ नो॒ हरि॑भिः सु॒तम्।
स सूर॒ आ ज॒नय॒ञ्ज्योति॒रिन्द्र॑म्।
अ॒या धि॒या त॒रणि॒रद्रि॑बर्हाः।
ऋ॒तेन॒ शुष्मी॒नव॑मानो अ॒र्कैः।
व्यु॑स्रि॒धो अ॒स्रो अद्रि॑र्बिभेद।
उ॒त त्यदा॒श्वश्वि॑यम्।
यदि॑न्द्र॒ नाहु॑षी॒ष्वा।
अग्रे॑ वि॒क्षु प्र॒तीद॑यत्॥ २॥

((dvitāyo vṛtrahantamaḥ ।
vida indraḥ śatakratuḥ ।
upa no haribhiḥ sutam ।
sa sūra ā janayañjyotirindram ।
ayā dhiyā taraṇiradribarhāḥ ।
ṛtena śuṣmīnavamāno arkaiḥ ।

vyusridho asro adrirbibheda |
uta tyadāśvaśviyam |
yadindra nāhuṣīṣvā |
agre vikṣu pratīdayat || 2 ||))

**[[2-7-13-3]]**

भरेष्विन्द्रꣳ सुहवꣳ हवामहे।
अꣳहोमुचꣳ सुकृतं दैव्यं जनम्।
अग्निं मित्रं वरुणꣳ सातये भगम्।
द्यावापृथिवी मरुतः स्वस्तये।
महि क्षेत्रं पुरुश्चन्द्रं विविद्वान्।
आदित्सखिभ्यश्च रथꣳ समैरत्।
इन्द्रो नृभिरजनद्दीद्यानः साकम्।
सूर्यमुषसं गातुमग्निम्।
उरुं नो लोकमनुनेषि विद्वान्।
सुवर्वज्ज्योतिरभयꣳ स्वस्ति॥ ३॥

((bhareṣvindraṁ suhavaṁ havāmahe |
aṁhomucaṁ sukṛtaṃ daivyaṃ janām |
agniṃ mitraṃ varuṇaṁ sātaye bhagām |
dyāvāpṛthivī marutaḥ svastaye |
mahi kṣetraṃ puruścandraṃ vividvān |
āditsakhibhyaśca rathaṁ samairat |
indro nṛbhirajanaddīdyānaḥ sākam |
sūryamuṣasaṃ gātumagnim |
uruṃ no lokamanuneṣi vidvān |
suvarvajjyotirabhayaṁ svasti || 3 ||))

**[[2-7-13-4]]**

ऋष्वा त इन्द्र स्थविरस्य बाहू।
उपस्थेयाम शरणा बृहन्ता।
आ नो विश्वाभिरूतिभिः सजोषाः।
ब्रह्म जुषाणो हर्यश्व याहि।
वरीवृजत्स्थविरेभिः सुशिप्र।
अस्मे दधद्वृषणꣳ शुष्ममिन्द्र।
इन्द्राय गाव आशिरम्।
दुदुह्रे वज्रिणे मधु।
यत्सीमुपह्वरेऽविदत्।
तास्ते वज्रिन्धेनवो जोजयुर्नः॥ ४॥

((ṛṣvā ta indra sthavirasya bāhū |
upastheyāma śaraṇā bṛhantā |
ā no viśvābhirūtibhiḥ sajoṣāḥ |
brahma juṣāṇo haryaśva yāhi |
varīvṛjatsthavirebhiḥ suśipra |
asme dadhadvṛṣaṇaṁ śuṣmamindra |
indrāya gāva āśirām |
duduhre vajriṇe madhu |
yatsimupahvare'vidat |
tāste vajrindhenavo jojayurnaḥ || 4 ||))

**[[2-7-13-5]]**

गभस्तयो नियुतो विश्ववाराः।
अहरहर्भूय इज्जोगुवानाः।
पूर्णा इन्द्र क्षुमतो भोजनस्य।
इमां ते धियं प्रभरे महो महीम्।
अस्य स्तोत्रे धिषणा यत्त आनजे।
तमुत्सवे च प्रसवे च सासहिम्।
इन्द्रं देवासः शवसा मदन्ननु॥ ५॥
वज्रिणमयत्स्वस्ति जोजयुर्नः सप्त च॥ १३॥

((gabhastayo niyuto viśvavārāḥ |
aharaharbhūya ijjoguvānāḥ |
pūrṇā indra kṣumato bhojanasya |
imāṃ te dhiyaṃ prabhare maho mahīm |
asya stotre dhiṣaṇā yatta ānaje |
tamutsave ca prasave ca sāsahim |
indraṃ devāsaḥ śavasā madannanu || 5 ||
vajriṇamayatsvasti jojayurnaḥ sapta ca || 13 ||))

**[[2-7-14-1]]**

प्रजापतिः पशूनसृजत।
तेऽस्मात्सृष्टाः पराञ्च आयन्।
तानग्निष्टोमेन नाप्नोत्।
तानुक्थ्येन नाप्नोत्।
तान्षोडशिना नाप्नोत्।
तान्रात्रिया नाप्नोत्।
तान्त्संधिना नाप्नोत्।
सोऽग्निमब्रवीत्।
इमान्म ईप्सेति।
तानग्निस्त्रिवृता स्तोमेन नाप्नोत्॥ १॥

((prajāpatiḥ paśūnasṛjata |
te'smātsṛṣṭāḥ parāñca āyan |
tānagniṣṭomena nāpnot |
tānukthyena nāpnot |
tānṣoḍaśinā nāpnot|
tānrātriyā nāpnot |
tāntsaṃdhinā nāpnot |
so'gnimabravīt |
imānma īpseti |
tānagnistrivṛtā stomena nāpnot || 1 ||))

[[2-7-14-2]]

स इन्द्र॑मब्रवीत्।
इ॒मान्म॑ ई॒प्सेति॑।
तानिन्द्रः॑ पञ्चद॒शेन॒ स्तोमे॑न॒ नाप्नो॑त्।
स विश्वा॑न्दे॒वान॑ब्रवीत्।
इ॒मान्म॑ ईप्स॒तेति॑।
तान्विश्वे॑ दे॒वाः स॑प्तद॒शेन॒ स्तोमे॑न॒ नाप्नु॑वन्।
स विष्णु॑मब्रवीत्।
इ॒मान्म॑ ई॒प्सेति॑।
तान्विष्णु॑रेकवि॒ꣳशेन॒ स्तोमे॑नाप्नोत्।
वा॒र॒व॒न्तीये॑नावारयत॥ २॥

((sa indrámabravīt ǀ
i̱mānmá ī̱pseti̍ ǀ
tānindrá̍ḥ pañcada̱śena̱ stoména̱ nāpnöt ǀ
sa viśvā̍nde̱vānábravīt ǀ
i̱mānmá īpsa̱teti̍ ǀ
tānviśvé de̱vāḥ sáptada̱śena̱ stoména̱ nāpnúvan ǀ
sa viṣṇúmabravīt ǀ
i̱mānmá ī̱pseti̍ ǀ
tānviṣṇúrekavi̱m̐śena̱ stoménāpnot ǀ
vā̱ra̱va̱ntīyénāvārayata ǁ 2 ǁ))

[[2-7-14-3]]

इ॒दं विष्णु॒र्विच॑क्रम॒ इति व्य॑क्रमत।
यस्मा॑त्प॒शवः॒ प्र प्रे॒व भ्रꣳशे॑रन्।
स ए॒तेन॑ यजेत।
यदाप्नो॑त्।
तद॒प्तोर्या॒मस्या॑प्तोर्या॒म॒त्वम्।
ए॒तेन॒ वै दे॒वा जैत्वा॑नि जि॒त्वा।
यं का॒म॒मका॑मयन्त॒ तमा॑प्नुवन्।
यं काम॑ं का॒मय॑ते।
तमे॒तेना॑प्नोति॥ ३॥
स्तोमे॑न॒ नाप्नो॑दवारयत॒ नव॑ च॥ १४॥

((i̱dam̱ vi̱ṣṇu̱rvicákrama̱ iti vyákramata ǀ
yasmā̍tpa̱śava̱ḥ pra preva̱ bhram̐śéran ǀ
sa e̱tená yajeta ǀ
yadāpnöt ǀ
tada̱ptoryāmásyāptoryāma̱tvam ǀ
e̱tena̱ vai de̱vā jaitvā́ni ji̱tvā ǀ
yam̱ kāma̱makā́mayanta̱ tamā̍pnuvan ǀ
yam̱ kāmam̍ kā̱mayáte ǀ
tame̱tenā̍pnoti ǁ 3 ǁ
stoména̱ nāpnódavārayata̱ navá ca ǁ 14 ǁ))

[[2-7-15-1]]

व्या॒घ्रो॑ऽयम॒ग्नौ च॑रति॒ प्रवि॑ष्टः।
ऋषी॑णां पु॒त्रो अ॑भिशस्ति॒पा अ॒यम्।
न॒म॒स्का॒रेण॒ नम॑सा ते जुहोमि।
मा दे॒वाना॑ं मिथु॒या क॑र्म भा॒गम्।
सावी॒र्हि दे॑व प्रस॒वाय॑ पित्रे।
व॒र्ष्माण॑मस्मै व॒रि॒माण॑मस्मै।
अथा॒स्मभ्य॑ꣳ सवितः स॒र्वता॑ता।
दि॒वे दि॒व आसु॑वा॒ भूरि॑पश्वः।
भूतो भु॒तेषु॒ चरति॒ प्रवि॑ष्टः।
स भू॒ताना॒मधि॑पतिर्बभूव॥ १॥

((vyā̱ghró'yama̱gnau cárati̱ praviṣ̍ṭaḥ ǀ
ṛṣi̍ṇām pu̱tro ábhiśasti̱pā a̱yam ǀ
na̱ma̱skāre̱ṇa̱ namásā te juhomi ǀ
mā de̱vānā̍m̐ mithu̱yā kárma bhā̱gam ǀ
sāvī̱rhi déva prasa̱vāyá pitre ǀ
va̱rṣmāṇámasmai va̱ri̱māṇámasmai ǀ
athā̱smabhyam̐ savitaḥ sa̱rvatā́tā ǀ
di̱ve diva̱ āsúvā̱ bhūri̍paśvaḥ ǀ
bhūto bhu̱teṣú carati̱ praviṣ̍ṭaḥ ǀ
sa bhū̱tānā̱madhi̍patirbabhūva ǁ 1 ǁ))

[[2-7-15-2]]

तस्य॑ मृ॒त्यौ च॑रति रा॒जसू॑यम्।
स राजा॑ रा॒ज्यमनु॑मन्यता॒मि॒दम्।
येभि॒ः शिल्पैः॑ पप्रथा॒नामदृ॑ꣳहत्।
येभि॒र्द्याम॒भ्यपि॑ꣳशत्प्र॒जाप॑तिः।
येभि॒र्वाचं॑ विश्वरू॑पाꣳ स॒मव्य॑यत्।
तेने॒मम॑ग्न इ॒ह वर्च॑सा॒ सम॑ङ्ग्धि।
येभि॑रादि॒त्यस्तप॑ति॒ प्रके॒तुभिः॑।
येभि॒ः सूर्यो॑ ददृ॒शे चि॒त्रभा॑नुः।
येभि॒र्वाचं॑ पुष्क॒लेभि॒रव्य॑यत्।
तेने॒मम॑ग्न इ॒ह वर्च॑सा॒ सम॑ङ्ग्धि॥ २॥

((tasyá mṛ̱tyau cárati rāja̱sūyā̍m ǀ
sa rājā́ rā̱jyamanúmanyatāmi̱dam ǀ
yebhi̱ḥ śilpai̍ḥ paprathā̱nāmadṛ̍m̐hat ǀ
yebhi̱rdyāma̱bhyapim̐̍śatpra̱jāpátiḥ ǀ
yebhi̱rvācam̍ vi̱śvarúpām̐ sa̱mavyáyat ǀ
tene̱mamágna i̱ha varcása̱ samáṅgdhi ǀ
yebhi̍rādi̱tyastapáti̱ prake̱tubhi̍ḥ ǀ
yebhi̱ḥ sūryó dadṛ̱śe ci̱trabhā́nuḥ ǀ

yebhi̱rvācaṃ̍ puṣka̱lebhi̱ravya̍yat|
tene̱mama̍gna i̱ha varca̍sā̱ sama̍ṅgdhi || 2 ||))

**[[2-7-15-3]]**

आऽयं भा॑तु॒ शव॑सा॒ पञ्च॑ कृ॒ष्टीः।
इन्द्र॑ इव ज्ये॒ष्ठो भ॑वतु प्र॒जावा॑न्।
अ॒स्मा अ॑स्तु पुष्क॒लं चि॒त्रभा॑नु।
आऽयं पृ॑णक्तु॒ रज॑सी उ॒पस्थ॒म्।
यत्ते॒ शिल्पं॑ कश्यप रोच॒नाव॑त्।
इ॒न्द्रि॒याव॑त्पुष्क॒लं चि॒त्रभा॑नु।
यस्मि॒न्त्सूर्या॒ अर्पि॑ताः स॒प्त सा॒कम्।
तस्मि॒न्राजा॑न॒मधि॒विश्र॑ये॒मम्।
द्यौर॑सि पृथि॒व्य॑सि।
व्या॒घ्रो वैया॒घ्रेऽधि॑॥ ३॥

((ā'yaṃ bha̍tu̱ śava̍sā̱ pañca̍ kṛ̱ṣṭī̱ḥ |
indra̍ iva jye̱ṣṭho bha̍vatu pra̱jāvā̍n |
a̱smā a̍stu puṣka̱laṃ ci̱trabhā̍nu |
ā'yaṃ pṛ̱ṇaktu̱ raja̍sī u̱pastha̍m |
yatte̱ śilpaṃ̍ kaśyapa roca̱nāva̍t |
i̱ndri̱yāva̍tpuṣka̱laṃ ci̱trabhā̍nu |
yasmi̱ntsūryā̱ arpi̍tāḥ sa̱pta sā̱kam |
tasmi̱nrājā̍na̱madhi̱viśra̍ye̱mam |
dyaura̍si pṛthi̱vya̍si |
vyā̱ghro vaiyā̱ghre'dhi̍ || 3 ||))

**[[2-7-15-4]]**

विश्र॑यस्व॒ दिशो॑ म॒हीः।
विश॑स्त्वा॒ सर्वा॑ वाञ्छन्तु।
मा त्वद्रा॒ष्ट्रमधि॑भ्रशत्॥
या दि॒व्या आप॒ः पय॑सा संबभूवुः।
या अ॒न्तरि॑क्ष उ॒त पार्थि॑वीर्याः।
तासा॑ं त्वा॒ सर्वा॑साꣳ रु॒चा।
अ॒भिषि॑ञ्चामि॒ वर्च॑सा।
अ॒भि त्वा॒ वर्च॑सा सिचं दि॒व्येन॑।
पय॑सा स॒ह।
यथाऽऽसा॑ राष्ट्र॒वर्ध॑नः॥ ४॥

((viśra̍yasva̱ diśo̍ ma̱hīḥ |
viśa̍stvā̱ sarvā̍ vāñchantu |
mā tvadrā̱ṣṭramadhi̍bhraśat||
yā di̱vyā āpa̱ḥ paya̍sā saṃbabhū̱vuḥ |
yā a̱ntari̍kṣa u̱ta pārthi̍vīryāḥ |
tāsā̍ṃ tvā̱ sarvā̍sāꣳ ru̱cā |
a̱bhiṣi̍ñcāmi̱ varca̍sā |
a̱bhi tvā̱ varca̍sā sicaṃ di̱vyena̍ |
paya̍sā sa̱ha |
yathā''sa̍ rāṣṭra̱vardha̍naḥ || 4 ||))

**[[2-7-15-5]]**

तथा॑ त्वा सवि॒ता क॑रत्।
इन्द्रं॒ विश्वा॑ अवीवृधन्।
स॒मु॒द्रव्य॑चसं॒ गिरः॑।
र॒थीत॑मꣳ र॒थीना॑म्।
वाजा॑नाꣳ॒ सत्प॑तिं॒ पति॑म्।
वस॑वस्त्वा पु॒रस्ता॑द॒भिषि॑ञ्चन्तु गाय॒त्रेण॒ छन्द॑सा।
रु॒द्रास्त्वा॑ दक्षिण॒तो॑ऽभिषि॑ञ्चन्तु॒ त्रैष्टु॑भेन॒ छन्द॑सा।
आ॒दि॒त्यास्त्वा॑ प॒श्चाद॒भिषि॑ञ्चन्तु॒ जाग॑तेन॒ छन्द॑सा।
विश्वे॑ त्वा दे॒वा उत्त॑र॒तो॑ऽभिषि॑ञ्च॒न्त्वानु॑ष्टुभेन॒ छन्द॑सा।
बृ॒ह॒स्पति॑स्त्वो॒परि॑ष्टाद॒भिषि॑ञ्च॒तु॒ पाङ्क्ते॑न॒ छन्द॑सा॥ ५॥

((tathā̍ tvā sa̱vi̱tā ka̍rat |
indra̱ṃ viśvā̍ avīvṛ̱dhan |
sa̱mu̱dravya̍casa̱ṃ gira̍ḥ |
ra̱thīta̍maꣳ ra̱thīnā̍m |
vājā̍nā̱ꣳ satpa̍ti̱ṃ pati̍m |
vasa̍vastvā pu̱rasta̍da̱bhiṣi̍ñcantu gāya̱treṇa̱
chanda̍sā |
ru̱drāstvā̍ dakṣiṇa̱to̍'bhiṣi̍ñcantu̱ traiṣṭu̍bhena̱
chanda̍sā |
ā̱di̱tyāstvā̍ pa̱ścāda̱bhiṣi̍ñcantu̱ jāga̍tena̱ chanda̍sā |
viśve̍ tvā de̱vā utta̍ra̱to̍'bhiṣi̍ñca̱ntvānu̍ṣṭubhena̱
chanda̍sā |
bṛ̱ha̱spati̍stvo̱pari̍ṣṭāda̱bhiṣi̍ñca̱tu̱ pāṅkte̍na̱
chanda̍sā || 5 ||))

**[[2-7-15-6]]**

अ॒रु॒णं त्वा॒ वृक॑मु॒ग्रं ख॑जंक॒रम्।
रोच॑मानं म॒रुता॒मग्रे॑ अ॒र्चिषः॑।
सूर्य॑वन्तं म॒घवा॑नं विषा॒सहि॑म्।
इन्द्र॑मु॒क्थ्येषु॑ नाम॒हूत॑मꣳ हुवेम।
प्र बा॒हवा॑ सिसृतं जी॒वसे॑ नः।
आ नो॒ गव्यू॑तिमुक्षतं घृ॒तेन॑।
आ नो॒ जने॑ श्रवयतं युवाना।
श्रुतं मे॑ मित्रावरुणा॒ ह॒वेमा।
इन्द्र॑स्य ते वी॒र्य॑कृतः।
बा॒हू उ॒पाव॑हरामि॥ ६॥
ब॒भू॒वाव्य॑यत्ते॒नेम॒मग्न इ॒ह वर्च॑सा॒ सम॑ङ्ग्धि वैया॒घ्रेऽधि
रा॒ष्ट्रव॒र्ध॑नः पाङ्क्ते॑न॒ छन्द॒सोपा॒व॑हरामि॥ १५॥

((aru̱ṇaṃ tvā̱ vṛka̍mu̱graṃ khaja̍ṃka̱ram |
rocamā̍naṃ ma̱rutā̱magre̍ a̱rciṣa̍ḥ |
sūrya̍vantaṃ ma̱ghavā̍naṃ viṣāsa̱him |
indra̍mu̱kthyeṣu̍ nāma̱hūta̍mam̐ huvema |
pra bā̱hava̍ sisṛtaṃ jī̱vase̍ naḥ |
ā no̱ gavyū̍timukṣataṃ ghṛ̱tena̍ |
ā no̱ jane̎ śravayataṃ yuvānā |
śru̱taṃ me̍ mitrāvaru̱ṇā̱ have̱mā |
indra̍sya te vīrya̱kṛta̍ḥ |
bā̱hū u̱pāva̍harāmi || 6 ||
ba̱bhū̱vāvyya̍yattene̱mama̍gna i̱ha varca̍sā̱
sama̍ṅgdhi̱ vaiyā̱ghre'dhi̍ rāṣṭrā̱vardha̍na̱ḥ pāṅkte̍na̱
chanda̍so̱pāva̍harāmi || 15 ||))

**[[2-7-16-1]]**

अ॒भि प्रेहि॑ वी॒रय॑स्व।
उ॒ग्रश्चे॒त्ता स॑पत्न॒हा।
आति॑ष्ठ वृत्र॒हन्त॑मः।
तुभ्यं॑ दे॒वा अधि॑ब्रुवन्।
अ॒ङ्कौ न्य॒ङ्कावभितो॒ रथं॒ यौ।
ध्वा॒न्तं वा॑ता॒ग्रमनु॑सं॒चर॑न्तौ।
दू॒रे हे॑तिरिन्द्रि॒यावा॑न्पत॒त्री।
ते नो॒ऽग्नयः॒ पप्र॑यः पारयन्तु।
नम॑स्त ऋषे गद।
अव्य॑थायै त्वा स्व॒धायै॑ त्वा॥ १॥

((a̱bhi prehi̍ vī̱raya̍sva |
u̱graśce̱ttā̍ sapatna̱hā |
āti̍ṣṭha vṛtra̱hanta̍maḥ |
tubhya̍ṃ de̱vā adhi̍bruvan|
a̱ṅkau nya̱ṅkāva̱bhito̱ ratha̱ṃ yau |
dhvā̱ntaṃ vā̍tā̱gramanu̍saṃ̱cara̍ntau |
dū̱re he̍tirindri̱yāvā̎npata̱trī |
te no̱'gnaya̱ḥ papra̍yaḥ pārayantu |
nama̍sta ṛ̱ṣe gada |
avya̍thāyai tvā sva̱dhāyai̍ tvā || 1 ||))

**[[2-7-16-2]]**

मा न॑ इन्द्रा॒भित॒स्त्वदृ॒ष्वारि॑ष्टासः।
ए॒वा ब्र॑ह्मन्तवेद॑स्तु।
तिष्ठा॑ रथे॒ अधि॒ यद्वज्र॑हस्तः।
आ र॒श्मीन्दे॑व युवसे॒ स्वश्वः॑।
आति॑ष्ठ वृत्रहन्ना॒तिष्ठ॑न्तं॒ परि॑।
अनु॒ त्वेन्द्रो॑ मद॒त्वनु॒ त्वा मि॒त्रावरु॑णौ।
द्यौश्च॑ त्वा पृ॒थि॒वी च॒ प्रचे॑तसा।
शु॒क्रो बृ॒हद्दक्षि॑णा त्वा पिपर्तु।
अनु॑ स्व॒धा चि॑किता॒ꣳ सोमो॑ अ॒ग्निः।
अनु॑ त्वाऽवतु स॒वि॒ता स॒वेन॑॥ २॥

((mā na̍ indrā̱bhita̱stvadṛ̱ṣvāri̍ṣṭāsaḥ |
e̱vā bra̍hma̱ntaveda̍stu |
tiṣṭhā̍ rathe̱ adhi̱ yadvajra̍hastaḥ |
ā ra̱śmīnde̍va yuvase̱ svaśva̍ḥ |
āti̱ṣṭha vṛtrahannā̱tiṣṭha̍ntaṃ̱ pari̍ |
anu̱ tvendro̍ mada̱tvanu̍ tvā mi̱trāvaru̍ṇau |
dyauśca̍ tvā pṛ̱thi̱vī ca̱ prace̍tasā |
śu̱kro bṛ̱haddakṣi̍ṇā tvā pipartu |
anu̍ sva̱dhā cikitā̱m̐ somo̍ a̱gniḥ |
anu̍ tvā'vatu savi̱tā sa̱vena̍ || 2 ||))

**[[2-7-16-3]]**

इन्द्रं॑ विश्वा॑ अवीवृधन्।
स॒मु॒द्रव्य॑चसं॒ गिरः॑।
र॒थीत॑मꣳ र॒थीना॑म्।
वाजा॑ना॒ꣳ सत्प॑तिं॒ पति॑म्।
परि॑ मा से॒न्या घोषाः॑।
ज्याना॑ं वृ॒ञ्जन्तु गृ॒ध्नवः॑।
मे॒थि॒ष्ठाः पिन्व॑माना इ॒ह।
मां गोप॑तिम॒भिसं॑विशन्तु।
तन्मेऽनु॑मति॒रनु॑मन्यताम्।
तन्मा॒ता पृ॑थि॒वी तत्पि॒ता द्यौः॥ ३॥

((indra̱ṃ viśva̍ avīvṛdhan|
sa̱mu̱dravya̍casa̱ṃ gira̍ḥ |
ra̱thīta̍mam̐ rathī̱nām |
vāja̍nā̱m̐ satpa̍ti̱ṃ pati̎m |
pari̍ mā se̱nyā ghoṣā̎ḥ |
jyānā̎ṃ vṛñjantu gṛ̱dhnava̍ḥ |
me̱thi̱ṣṭhā̱ḥ pinva̍mānā i̱ha |
mā̱ṃ gopa̍tima̱bhisa̱ṃviśa̍ntu |
tanme'nu̍mati̱ranu̍manyatām |
tanmā̱tā pṛ̍thi̱vī tatpi̱tā dyauḥ || 3 ||))

**[[2-7-16-4]]**

त॒द्ग्रावा॑णः सोम॒सुतो॑ मयो॒भुवः॑।
तद॑श्विना शृणुतꣳ सौभगा यु॒वम्।
अव॑ते॒ हेड॒ उदु॑त्त॒मम्।
ए॒ना व्या॑घ्र॒ परि॑षस्वजा॒नाः।
सि॒ꣳह॒ꣳ हि॑न्वन्ति म॒ह॒ते सौभ॑गाय।
स॒मु॒द्रं न सु॒हवं॑ तस्थि॒वाꣳस॑म्।
म॒र्मृ॒ज्यन्ते॑ द्वीपिन॑म॒प्स्व॑न्तः।

उद॒सावे॑तु॒ सूर्यः॑।
उदि॒दं मा॑म॒कं वचः॑।
उदि॑हि देव सूर्य।
स॒ह व॒ग्नुना॒ मम॑।
अ॒हं वा॒चो वि॒वाच॑नम्।
मयि॒ वाग॑स्तु ध॒र्ण॒सिः।
यन्तु॑ न॒दयो॒ वर्ष॑न्तु प॒र्जन्या᳚ः।
सु॒पि॒प्प॒ला ओष॑धयो भवन्तु।
अन्न॑वतामोद॒नव॑तामा॒मिक्ष॑वताम्।
ए॒षाꣳ राजा॑ भूयासम्॥ ४॥
स्व॒धायै᳚ त्वा स॒वेन॒ द्यौस्सू᳚र्य स॒प्त च॑॥ १६॥

((tadgrāva̍ṇa̱ḥ soma̱suto̍ mayo̱bhuva̍ḥ ।
tada̍śvinā śṛṇu̱taꣳ saubhagā yu̱vam ।
ava̍te̱ he̱ḍa u̱du̍tta̱mam ।
e̱nā vyā̱ghra pa̍ri̱ṣasvajā̱nāḥ ।
si̱ꣳhaꣳ hi̍nvanti maha̱te saubha̍gāya ।
sa̱mu̱draṃ na su̱havaṃ tasthi̱vāꣳsa̍m ।
ma̱rmṛ̱jyante᳚ dvī̱pinā̍ma̱psva̍ntaḥ ।
uda̱sāve̍tu̱ sūrya̍ḥ ।
udi̱daṃ mā̍ma̱kaṃ vaca̍ḥ ।
udi̍hi deva sūrya ।
sa̱ha va̱gnunā̱ mama̍ ।
a̱haṃ vā̱co vi̱vāca̍nam।
mayi̱ vāga̍stu dharṇa̱siḥ ।
yantu̍ na̱dayo̱ varṣa̍ntu pa̱rjanyā᳚ḥ ।
su̱pi̱ppa̱lā oṣa̍dhayo bhavantu ।
anna̍vatāmoda̱nava̍tāmā̱mikṣa̍vatām ।
e̱ṣāꣳ rājā̍ bhūyāsam ॥ 4 ॥
sva̱dhāyai᳚ tvā sa̱vena̱ dyaussū᳚rya sa̱pta ca̍ ॥ 16 ॥))

**[[2-7-17-1]]**

ये के॒शिनः॑ प्रथ॒माः स॒त्रमास॑त।
येभि॒राभृ॑तं॒ यदि॒दं वि॒रोच॑ते।
तेभ्यो॑ जुहोमि ब॒हु॒धा घृ॒तेन॑।
रा॒यस्पोषे॑णे॒मं वर्च॑सा॒ सꣳसृ॑जाथ।
नर्ते॑ ब्रह्म॑णस्त॒प॑सो वि॒मो॒कः।
द्वि॒नाम्नी॑ दी॒क्षा व॒शिनी॒ ह्यु॑ग्रा।
प्र के॒शाः᳚ सु॒वते॑ का॒ण्डिनो॑ भवन्ति।
तेषा॒ᳪ ब्र॒ह्मेदी॑शे॒ वप॑नस्य॒ नान्यः।
आरो॑ह॒ प्रोष्ठं॒ विष॑हस्व॒ शत्रू॑न्।
अवा᳚स्राग्दी॒क्षा व॒शिनी॒ ह्यु॑ग्रा॥ १॥

((ye ke̱śina̍ḥ pratha̱māḥ sa̱tramāsa̍ta ।
yebhi̱rābhṛ̍ta̱ṃ yadi̱daṃ vi̱roca̍te ।
tebhyo̍ juhomi bahu̱dhā ghṛ̱tena̍ ।
rā̱yaspoṣe̍ṇe̱maṃ varca̍sā̱ saꣳsṛ̍jātha ।
narte brahma̍ṇa̱stapa̍so vimo̱kaḥ ।
dvi̱nāmnī̍ dī̱kṣā va̱śinī̱ hyu̍grā ।
pra keśā᳚ḥ su̱vate̍ kā̱ṇḍi̱no̍ bhavanti ।
te̱ṣā᳚ṃ bra̱hmedīśe̱ vapa̍nasya̱ nānyaḥ ।
āro̍ha̱ proṣṭha̱ṃ viṣa̍hasva̱ śatrū̍n ।
avā᳚srāgdī̱kṣā va̱śinī̱ hyu̍grā ॥ 1 ॥))

**[[2-7-17-2]]**

दे॒हि द॒क्षिणां॒ प्रति॑र॒स्वायुः॑।
अथा॑ मुच्यस्व॒ वरु॑णस्य॒ पाशा᳚त्।
येनाव॑पत्सवि॒ता क्षु॒रेण॑।
सोम॑स्य॒ राज्ञो॒ वरु॑णस्य वि॒द्वान्।
तेन॑ ब्रह्माणो वपते॒द॒मस्योर्जे॑मम्।
र॒य्या वर्च॑सा॒ सꣳसृ॑जाथ।
मा ते॒ केशा॒ननु॑ गा॒द्वर्च॑ ए॒तत्।
तथा॑ धा॒ता क॑रोतु ते।
तुभ्य॑मि॒न्द्रो बृह॒स्पतिः॑।
स॒वि॒ता वर्च॒ आद॑धात्॥ २॥

((de̱hi dakṣi̱ṇā̱ṃ prati̍ra̱svāyu̍ḥ ।
athā̍ mucyasva̱ varu̍ṇasya̱ pāśā᳚t ।
yenāva̍patsavi̱tā kṣu̱reṇa̍ ।
soma̍sya̱ rājño̱ varu̍ṇasya vi̱dvān ।
tena̍ brahmāṇo vapate̱dama̱syorjemam ।
ra̱yyā varca̍sā̱ saꣳsṛ̍jātha ।
mā te̱ keśā̱nanu̍ gā̱dvarca̍ e̱tat ।
tathā̍ dhā̱tā ka̍rotu te ।
tubhya̱mindro̱ bṛha̱spati̍ḥ ।
sa̱vi̱tā varca̱ āda̍dhāt ॥ 2 ॥))

**[[2-7-17-3]]**

तेभ्यो॑ नि॒धानं॑ बहु॒धा व्यैच्छन्॑।
अ॒न्तरा द्यावा॑पृथि॒वी अ॒पः सुवः॑।
द॒र्भ॒स्त॒म्बे वी॒र्य॑कृते नि॒धाय॑।
पौꣳस्ये॑ने॒मं वर्च॑सा॒ सꣳसृ॑जाथ।
बलं॑ ते बा॒हुवोः॑ सवि॒ता द॑धातु।
सोम॑स्त्वाऽनक्तु॒ पय॑सा घृ॒तेन॑।
स्त्री॒षु रू॒पम॑श्विनै॒तन्निध॑त्तम्।
पौꣳस्ये॑ने॒मं वर्च॑सा॒ सꣳसृ॑जाथ॥
यत्सी॒मन्तं॒ कङ्क॑तस्ते लि॒लेख॑।
यद्वा᳚ क्षु॒रः प॑रि॒वव॒र्जं वप॑ꣴस्ते।
स्त्री॒षु रू॒पम॑श्विनै॒तन्निध॑त्तम्।

पौꣳस्येनेमꣳ सꣳसृजाथो वीर्येण॥ ३॥
अवाँस्रागदीक्षा वशिनी ह्युग्राऽऽदधाद्ववर्ज वपꣳस्ते द्वे च॥ १७॥
ये केशिनो नर्ते मा ते बलं यत्सीमन्तं पञ्च॥

((tebhyo nidhānaṃ bahudhā vyaicchan ।
antarā dyāvāpṛthivī apaḥ suvaḥ ।
darbhastambe vīryakṛte nidhāya ।
pauꣳsyenemaṃ varcasā saꣳsṛjātha ।
balaṃ te bāhuvoḥ savitā dadhātu ।
somastvā'naktu payasā ghṛtena ।
strīṣu rūpamaśvinaitannidhattam ।
pauꣳsyenemaṃ varcasā saꣳsṛjātha ॥
yatsīmantaṃ kaṅkataste lilekha ।
yadvā kṣuraḥ parivavarja vapaꣳste ।
strīṣu rūpamaśvinaitannidhattam ।
pauꣳsyenemaꣳ saꣳsṛjātho vīryeṇa ॥ 3 ॥
avāsrāgdīkṣā vaśinī hyugrā''dadhādvavarja vapaꣳste dve ca ॥ 17 ॥
ye keśino narte mā te balaṃ yatsīmantaṃ pañca ॥))

**[[2-7-18-1]]**

इन्द्रं वै स्वा विशो मरुतो नापाचायन्।
सोऽनपचाय्यमान एतं विघनमपश्यत्।
तमाहरत्।
तेनायजत।
तेनैवासां तꣳ सꣳस्तम्भं व्यहन्।
यद्व्यहन्।
तद्विघनस्य विघनत्वम्।
वि पाप्मानं भ्रातृव्यꣳ हते।
य एतेन यजते।
य उ चैनमेवं वेद॥ १॥

((indraṃ vai svā viśo maruto nāpācāyan ।
so'napacāyyamāna etaṃ vighanamapaśyat ।
tamāharat ।
tenāyajata ।
tenaivāsāṃ taꣳ saꣳstambhaṃ vyahan ।
yadvyahan ।
tadvighanasya vighanatvam ।
vi pāpmānaṃ bhrātṛvyaꣳ hate ।
ya etena yajate ।
ya u cainamevaṃ veda ॥ 1 ॥))

**[[2-7-18-2]]**

यꣳ राजानं विशो नापचायेयुः।
यो वाँ ब्राह्मणस्तमसा पाप्मना प्रावृतः स्यात्।
स एतेन यजेत।
विघनेनैवैनद्विहत्य।
विशामाधिपत्यं गच्छति।
तस्य द्वे द्वादशे स्तोत्रे भवतः।
द्वे चतुर्विꣳशे।
औद्भिद्यमेव तत्।
एतद्वै क्षत्त्रस्यौद्भिद्यम्।
यदस्मै स्वा विशो बलिꣳ हरन्ति॥ २॥

((yaꣳ rājānaṃ viśo nāpacāyeyuḥ ।
yo vā brāhmaṇastamasā pāpmanā prāvṛtaḥ syāt।
sa etena yajeta ।
vighanenaivainadvihatya ।
viśāmādhipatyaṃ gacchati ।
tasya dve dvādaśe stotre bhavataḥ ।
dve caturviꣳśe ।
audbhidyameva tat ।
etadvai kṣattrasyaudbhidyam।
yadasmai svā viśo baliꣳ haranti ॥ 2 ॥))

**[[2-7-18-3]]**

हरन्त्यस्मै विशो बलिम्।
ऐनमप्रतिख्यातं गच्छति।
य एवं वेद।
प्रबाहुग्वा अग्रे क्षत्त्राण्यातेपुः।
तेषामिन्द्रः क्षत्त्राण्यादत्त।
न वा इमानि क्षत्त्राण्यभूवन्निति।
तन्नक्षत्राणां नक्षत्रत्वम्।
आ श्रेयसो भ्रातृव्यस्य तेज इन्द्रियं दत्ते।
य एतेन यजते।
य उ चैनमेवं वेद॥ ३॥

((harantyasmai viśo balim ।
ainamapratikhyātaṃ gacchati ।
ya evaṃ veda ।
prabāhugvā agre kṣattrāṇyātepuḥ ।
teṣāmindraḥ kṣattrāṇyādatta ।
na vā imāni kṣattrāṇyabhūvanniti ।
tannakṣatrāṇāṃ nakṣatratvam ।
ā śreyaso bhrātṛvyasya teja indriyaṃ datte ।
ya etena yajate ।
ya u cainamevaṃ veda ॥ 3 ॥))

**[[2-7-18-4]]**

तद्यथा ह वै संचाक्रिणौ कल्पकावुपावहितौ स्याताम्।
एवमेतौ युग्मन्तौ स्तोमौ।

अयुक्षु स्तोमेषु क्रियेते।
पाप्मनोऽपहत्यै।
अप पाप्मानं भ्रातृव्यꣳ हते।
य एतेन यजते।
य उ चैनमेवं वेद।
तद्यथा ह वै सूतग्रामण्यः।
एवं छन्दाꣳसि।
तेष्वसावादित्यो बृहतीरभ्यूढः॥ ४॥

((tadyathā ha vai sácākriṇau kaplákāvupāvāhitau syātām ।
evametau yugmantau stomaü ।
ayukṣu stomeṣu kriyete ।
pāpmano'pahatyai ।
apa pāpmānam bhrātṛvyam̐ hate ।
ya etena yajate ।
ya u cainamevam veda ।
tadyathā ha vai sūtagrāmaṇyaḥ ।
evam chandām̐si ।
teṣvasāvādityo bṛhatīrabhyūḍhaḥ ॥ 4 ॥))

**[[2-7-18-5]]**

सतोबृहतीषु स्तुवते सतो बृहन्।
प्रजया पशुभिरसानीत्येव।
व्यतिषक्ताभिः स्तुवते।
व्यतिषक्तं वै क्षत्त्रं विशा।
विशैवैनं क्षत्त्रेण व्यतिषजति।
व्यतिषक्ताभिः स्तुवते।
व्यतिषक्तो वै ग्रामणीः सजातैः।
सजातैरेवैनं व्यतिषजति।
व्यतिषक्ताभिः स्तुवते।
व्यतिषक्तो वै पुरुषः पाप्मभिः।
व्यतिषक्ताभिरेवास्य पाप्मनो नुदते॥ ५॥
वेद हरन्त्येनमेवं वेदाभ्यूढः पाप्मभिरेकं च॥ १८॥
त्रिवृद्यदाग्नेयोऽग्निमुखा ह्यृद्धिर्यदाग्नेय आग्नेयो न वै सोमेन यो वै सोमेनैष गोसवः सिꣳहेऽभिप्रेहि मित्रवर्धनः प्रजापतिस्ता ओदनं प्रजापतिरकामयत बहोर्भूयानगस्त्योऽस्याजरासास्तिष्ठा हरी प्रजापतिः पशून्व्याघ्रोऽभिप्रेहि वृत्रहन्तमो ये केशिन इन्द्रं वा अष्टादश॥ १८॥
त्रिवृद्यो वै सोमेनायुरसि विश्वायुर्बहुर्भवति तिष्ठा हरीरथ आऽयं भातु तेभ्यो निधानꣳ षट्त्षष्टिः॥ ६६॥

((satobṛhatīṣu stuvate sato bṛhan ।
prajayā paśubhirasānītyeva ।
vyatiṣaktābhiḥ stuvate ।
vyatiṣaktam vai kṣattram viśā ।
viśaivainam kṣattreṇa vyatiṣajati ।
vyatiṣaktābhiḥ stuvate ।
vyatiṣakto vai grāmaṇīḥ sajātaiḥ ।
sajātairevainam vyatiṣajati ।
vyatiṣaktābhiḥ stuvate ।
vyatiṣakto vai puruṣaḥ pāpmabhiḥ ।
vyatiṣaktābhirevāsya pāpmano nudate ॥ 5 ॥
veda harantyenamevam vedābhyūḍhaḥ pāpmabhirekam ca ॥ 18 ॥
trivṛdyadāgneyo'gnimukhā hyṛddhiryadāgneya āgneyo na vai somena yo vai somenaiṣa gosavaḥ sim̐he'bhiprehi mitravardhanaḥ prajāpatistā odanam prajāpatirakāmayata bahorbhūyānagastyo'syājarāsāstiṣṭhā harī prajāpatiḥ paśūnvyāghro'bhiprehi vṛtrahantamo ye keśina indram vā aṣṭādaśa ॥ 18 ॥
trivṛdyo vai somenāyurasi viśvāyurbahurbhavati tiṣṭhā harīratha ā'yam bhātu tebhyo nidhānam̐ ṣaṭtṣaṣṭiḥ ॥ 66 ॥))

# Taittirīya-Brāhmaṇa
# Book 2, Chapter 8

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[2-8-1-1]]**

पीवो॑न्नाꣳ रयि॒वृध॑ः सुमे॒धाः।
श्वे॒तः सि॑षक्ति नि॒युता॑मभि॒श्रीः।
ते वा॒यवे॒ सम॑नसो॒ वित॑स्थुः।
विश्वेन्नर॑ः स्वप॒त्यानि॑ चक्रुः।
रा॒येऽनु यं ज॒ज्ञतू॒ रोद॑सी उ॒भे।
रा॒ये दे॒वी धि॒षणा॑ धाति दे॒वम्।
अधा॑ वा॒युं नि॒युत॑ः सश्चत॒ स्वाः।
उ॒त श्वे॒तं वसु॑धितिं निरे॒के।
आ वा॑यो॒ प्रयाभि॑ः।
प्र वा॒युमच्छा॑ बृह॒ती म॑नी॒षा॥ १॥

((pīvo̍nnām̐ rayi̱vṛdha̍ḥ sume̱dhāḥ |
śve̱taḥ si̍ṣakti ni̱yutā̍mabhi̱śrīḥ |
te vā̱yave̱ sama̍naso̱ vita̍sthuḥ |
viśvennara̍ḥ svapa̱tyāni̍ cakruḥ |
rā̱ye'nu yaṃ ja̱jñatū̱ roda̍sī u̱bhe |
rā̱ye de̱vī dhi̱ṣaṇā̍ dhāti de̱vam |
adhā̍ vā̱yuṃ ni̱yuta̍ḥ saścata̱ svāḥ |
u̱ta śve̱taṃ vasu̍dhitiṃ nire̱ke |
ā vā̍yo̱ prayābhi̍ḥ |
pra vā̱yumacchā̍ bṛha̱tī ma̍nī̱ṣā || 1 ||))

**[[2-8-1-2]]**

बृ॒हद्र॑यिं वि॒श्ववा॑राꣳ रथ॒प्राम्।
द्यु॒तद्या॑मा नि॒युत॒ः पत्य॑मानः।
क॒विः क॒विमि॑यक्षसि प्रयज्यो।
आ नो॑ नि॒युद्भि॑ः श॒तिनी॑भिरध्व॒रम्।
स॒ह॒स्रिणी॑भि॒रुप॑ याहि य॒ज्ञम्।
वायो॑ अ॒स्मिन्ह॒विषि॑ मादयस्व।
यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः।
प्रजा॑पते॒ न त्वदे॒तान्य॒न्यः।
विश्वा॑ जा॒तानि॒ परि॒ ता ब॑भूव।
यत्का॑मास्ते जुहु॒मस्तन्नो॑ अस्तु॥ २॥

((bṛ̱hadra̍yiṃ vi̱śvavā̍rām̐ ratha̱prām |
dyu̱tadyā̍mā ni̱yuta̱ḥ patya̍mānaḥ |
ka̱viḥ ka̱vimi̍yakṣasi prayajyo |
ā no̍ ni̱yudbhi̍ḥ śa̱tinī̍bhiradhva̱ram |
sa̱ha̱sriṇī̍bhi̱rupa̍ yāhi ya̱jñam |
vāyo̍ a̱sminha̱viṣi̍ mādayasva |
yū̱yaṃ pā̍ta sva̱stibhi̱ḥ sadā̍ naḥ |
prajā̍pate̱ na tvade̱tānya̱nyaḥ |
viśvā̍ jā̱tāni̱ pari̱ tā ba̍bhūva |
yatkā̍māste juhu̱mastanno̍ astu || 2 ||))

**[[2-8-1-3]]**

व॒यꣳ स्या॑म॒ पत॑यो रयी॒णाम्।
र॒यी॒णां पति॑ं यज॒तं बृ॒हन्त॑म्।
अ॒स्मिन्भ॑रे॒ नृत॑मं॒ वाज॑सातौ।
प्र॒जाप॑तिं प्रथम॒जामृ॒तस्य॑।
यजा॑म दे॒वमधि॑ नो ब्रवीतु।
प्रजा॑पते॒ त्वं नि॑धि॒पाः पु॑रा॒णः।
दे॒वाना॑ं पि॒ता ज॑नि॒ता प्र॒जाना॑म्।
पति॒र्विश्व॑स्य॒ जग॑तः पर॒स्पाः।
ह॒विर्नो॑ देव वि॒हवे॑ जुषस्व।
तवे॒मे लो॒काः प्र॒दिशो॒ दिश॑श्च॥ ३॥

((va̱yam̐ syā̍ma̱ pata̍yo rayī̱ṇām |
ra̱yī̱ṇām pati̍ṃ yaja̱taṃ bṛ̱hanta̍m |
a̱sminbhare̱ nṛta̍maṃ̱ vāja̍sātau |
pra̱jāpa̍tiṃ prathama̱jāmṛ̱tasya̍ |
yajā̍ma de̱vamadhi̍ no bravītu |
prajā̍pate̱ tvaṃ ni̍dhi̱pāḥ pu̍rā̱ṇaḥ |
de̱vānā̍ṃ pi̱tā ja̍ni̱tā pra̱jānā̍m |
pati̱rviśva̍sya̱ jaga̍taḥ para̱spāḥ |
ha̱virno̍ deva vi̱have ju̍ṣasva |
tave̱me lo̱kāḥ pra̱diśo̱ diśa̍śca || 3 ||))

**[[2-8-1-4]]**

प॒रा॒वतो॑ नि॒वत॑ उ॒द्वत॑श्च।
प्रजा॑पते विश्वसृज्जीवध॑न्य इ॒दं नो॑ देव।
प्रति॑हर्य ह॒व्यम्।
प्र॒जाप॑तिं प्र॒थमं॑ य॒ज्ञिया॑नाम्।
दे॒वाना॒मग्रे॑ यज॒तं य॑जध्वम्।
स नो॑ ददातु द्र॒विण॑ꣳ सु॒वीर्य॑म्।
रा॒यस्पोषं॑ विष्य॑तु॒ नाभि॑म॒स्मे।
यो रा॒य ईशे॑ शतदा॒य उ॒क्थ्य॑ः।
यः प॒शूनाꣳ॑ र॑क्षि॒ता विष्ठि॑तानाम्।
प्र॒जाप॑तिः प्रथम॒जा ऋ॒तस्य॑॥ ४॥

((pa̱rā̱vato̍ ni̱vata̍ u̱dvata̍śca l
pra̱jā̍pate viśva̱sṛjjī̱vadha̍nya i̱daṃ no̍ deva l
prati̍harya ha̱vyam l
pra̱jāpa̍tiṃ pratha̱mam̱ ya̱jñiya̍nām l
de̱vānā̱magre̍ yaja̱taṃ ya̍jadhvam l
sa no̍ dadātu dravi̍ṇa̱ṃ su̱vīrya̍m l
rā̱yaspoṣa̱ṃ vi̱ṣya̍tu nābhima̱sme l
yo rā̱ya īśe̍ śatadā̱ya u̱kthya̍ḥ l
yaḥ pa̍śū̱nāṃ̍ ra̍kṣi̱tā vi̱ṣṭhi̍tānām l
pra̱jāpa̍tiḥ pratha̱ma̱jā ṛ̱tasya̍ II 4 II))

**[[2-8-1-5]]**

स॒हस्र॑धामा जुषता॒ꣳ ह॒विर्न॑ः।
सोमा॑पूषणे॒मौ दे॒वौ।
सोमा॑पूषणा॒ रज॑सो वि॒माना॑म्।
स॒प्तच॑क्र॒ꣳ रथ॒मवि॑श्वमिन्वम्।
वि॒षू॒वृतं॒ मन॑सा यु॒ज्यमा॑नम्।
तं जि॑न्वथो वृषणा॒ पञ्च॑रश्मिम्।
दि॒व्य॑न्यः सद॑नं च॒क्र उ॒च्चा।
पृ॒थि॒व्याम॒न्यो अध्य॒न्तरि॑क्षे।
ताव॒स्मभ्यं॑ पुरु॒वारं॑ पुरु॒क्षुम्।
रा॒यस्पोष॒ं वि॒ष्य॑तां॒ नाभि॑म॒स्मे॥ ५॥

((sa̱hasra̍dhāmā ju̱ṣatā̱ṃ ha̱virna̍ḥ l
somā̍pūṣaṇe̱mau de̱vau l
somā̍pūṣaṇā̱ raja̍so vi̱mānā̍m l
sa̱ptaca̍kra̱ṃ ratha̱mavi̍śvaminvam l
vi̱ṣū̱vṛta̱ṃ mana̍sā yu̱jyamā̍nam l
taṃ ji̍nvatho vṛṣaṇā̱ pañca̍raśmim l
di̱vya̍nyaḥ sada̍naṃ ca̱kra u̱ccā l
pṛ̱thi̱vyāma̱nyo adhya̱ntari̍kṣe l
tāva̱smabhya̍ṃ puru̱vāra̍ṃ puru̱kṣum l
rā̱yaspoṣa̱ṃ vi̱ṣya̍tā̱ṃ nābhi̍ma̱sme II 5 II))

**[[2-8-1-6]]**

धियं॑ पू॒षा जि॑न्वतु विश्वमि॒न्वः।
र॒यिꣳ सोमो॑ र॒यिप॑ति॒र्द॑धातु।
अव॑तु दे॒व्यदि॑तिरन॒र्वा।
बृ॒हद्व॑देम वि॒दथे॑ सु॒वीराः॑।
विश्वा॒न्यन्यो भुव॑ना ज॒जान॑।
विश्व॑म॒न्यो अ॑भि॒चक्षा॑ण एति।
सोमा॑पूषणा॒वव॑तं॒ धियं॑ मे।
यु॒वभ्यां॒ विश्वाः॒ पृत॑ना जयेम।
उदु॑त्त॒मं व॑रु॒णास्त॑भ्ना॒द्द्याम्।
यत्किं॑चे॒दं कि॑त॒वास॑ः।
अव॑ ते॒ हे॒ड॒स्तत्त्वा॑ यामि।
आ॒दि॒त्याना॒मव॑सा॒ न द॑क्षिणा।
धा॒रय॑न्त आदि॒त्यास॒स्ति॒स्रो भूमी॒र्धार॑यन्।
य॒ज्ञो दे॒वाना॒ꣳ शुचि॑र॒पः॥ ६॥
म॒नी॒षाऽस्तु॑ च॒र्तस्या॒स्मे कि॑त॒वा॑सश्च॒त्वारि॑ च॥ १॥

((dhiya̍ṃ pū̱ṣā ji̍nvatu viśvami̱nvaḥ l
ra̱yiṃ somo̍ ra̱yipa̍ti̱rdadhātu l
ava̍tu de̱vyaditi̍rana̱rvā l
bṛ̱hadva̍dema vi̱dathe̍ su̱vīrā̍ḥ l
viśvā̱nya̱nyo bhuva̍nā ja̱jāna̍ l
viśva̍ma̱nyo a̍bhi̱cakṣā̍ṇa eti l
somā̍pūṣaṇā̱vava̍taṃ dhiya̍ṃ me l
yu̱vabhyā̱ṃ viśvā̱ḥ pṛta̍nā jayema l
udu̍tta̱maṃ va̍ru̱ṇāsta̍bhnā̱ddyām l
yatki̱ṃce̱daṃ ki̍ta̱vāsa̍ḥ l
ava̍ te̱ he̍ḍa̱stattva̍ yāmi l
ā̱di̱tyānā̱mava̍sā̱ na da̍kṣi̱ṇā l
dhā̱raya̍nta ā̱di̱tyāsa̍sti̱sro bhūmī̱rdhārayan l
ya̱jño de̱vānā̱ṃ śuci̍ra̱paḥ II 6 II
ma̱nī̱ṣā'stu̍ ca̱rtasyā̱sme ki̍ta̱va̍saśca̱tvāri̍ ca II 1 II))

**[[2-8-2-1]]**

ते शु॒क्रास॑ः शुच॑यो र॒श्मि॒वन्त॑ः।
सीद॑न्नादि॒त्या अधि॑ ब॒र्हिषि॑ प्रि॒ये।
कामे॑न दे॒वाः स॒रथं॑ दि॒वो न॑ः।
आया॑न्तु य॒ज्ञमुप॑ नो जु॒षा॒णाः।
ते सू॒नवो॒ अदि॑तेः पीव॒सामि॒षम्॑।
घृ॒तं पि॑न्व॒त्प्रति॑हर्य॒न्नृ॒तेजाः।
प्र य॒ज्ञिया॒ यज॑मानाय येमुरे।
आ॒दि॒त्याः कामं॑ पितु॒मन्त॑म॒स्मे।
आ न॑ः पु॒त्रा अदि॑ते॒र्या॑न्तु य॒ज्ञम्।
आ॒दि॒त्यास॑ः प॒थिभि॑र्दे॒वया॒नैः॑॥ १॥

((te śu̱krāsa̱ḥ śuca̍yo raśmi̱vanta̍ḥ l
sīda̍nnādi̱tyā adhi̍ ba̱rhiṣi̍ pri̱ye l
kāme̍na de̱vāḥ sa̱ratha̍ṃ di̱vo na̍ḥ l
āyā̍ntu ya̱jñamupa̍ no ju̱ṣā̱ṇāḥ l
te sū̱navo̱ adi̍teḥ pīva̱sāmi̱ṣam l
ghṛ̱taṃ pinva̱tprati̍harya̱nnṛte̱jāḥ l
pra ya̱jñiyā̱ yaja̍mānāya yemure l
ā̱di̱tyāḥ kāma̍ṃ pitu̱manta̍ma̱sme l
ā na̍ḥ pu̱trā aditeryāntu ya̱jñam l
ā̱di̱tyāsa̍ḥ pa̱thibhi̍rdeva̱yānai̍ḥ II 1 II))

**[[2-8-2-2]]**

अ॒स्मे कामं॑ दा॒शुषे॑ स॒न्नम॑न्तः।

पु॒रो॒डाशं॑ घृ॒तव॑न्तं जुषन्ताम्।
स्क॒भा॒य॒त॒ निर्ऋ॑तिꣳ॒ सेध॒ताम॑तिम्।
प्र र॒श्मिभि॒र्यत॑माना अमृ॒ध्राः।
आदि॑त्याः॒ काम॒ प्रय॑तां॒ वष॑ट्कृतिम्।
जु॒षध्वं॑ नो ह॒व्यदा॑तिं यजत्राः।
आ॒दि॒त्यान्काम॒मम॑वसे हुवेम।
ये भू॒तानि॑ ज॒नय॑न्तो विचि॒ख्युः।
सीद॑न्तु पु॒त्रा अदि॑तेरु॒पस्थ᳚म्।
स्ती॒र्णं ब॒र्हिर्ह॑वि॒रद्या॑य दे॒वाः॥ २॥

((a̱sme kāmaṃ dā̱śuṣe̍ sa̱nnama̍ntaḥ |
pu̱ro̱ḍāśaṃ ghr̥̱tava̍ntaṃ juṣantām |
ska̱bhā̱yata̱ nirr̥̍ti̱m̐ sedha̱tāma̍tim |
pra ra̱śmibhi̱ryata̍mānā amr̥̱dhrāḥ |
ādi̍tyā̱ḥ kāma̱ praya̍tā̱ṃ vaṣa̍ṭkr̥tim |
ju̱ṣadhvaṃ̍ no ha̱vyadā̍tiṃ yajatrāḥ |
ā̱di̱tyānkāma̱mama̍vase huvema |
ye bhū̱tāni̍ ja̱naya̍nto vici̱khyuḥ |
sīda̍ntu pu̱trā adi̍teru̱pasthã̍m |
stī̱rṇaṃ ba̱rhirha̍vi̱radyā̍ya de̱vāḥ || 2 ||))

[[2-8-2-3]]
स्ती॒र्णं ब॒र्हिः सीदता य॒ज्ञे अ॒स्मिन्।
ध्रा॒जाः सेध॑न्तो॒ अम॑तिं दु॒रेवा᳚म्।
अ॒स्मभ्यं॑ पु॒त्रा अदि॑तेः॒ प्रयꣳ॑सत।
आदि॑त्याः॒ काम॑ ह॒विषो॑ जुषा॒णाः।
अग्ने॒ नय॑ सु॒पथा॑ रा॒ये अ॒स्मान्।
विश्वा॑नि देव व॒युना॑नि वि॒द्वान्।
यु॒यो॒ध्य॑स्म॒ज्जु॑हुरा॒णमेनः॑।
भूयि॑ष्ठां ते॒ नम॑उक्तिं विधेम।
प्र वः॑ शु॒क्राय॑ भा॒नवे॑ भरध्वम्।
ह॒व्यं म॒तिं चा॒ग्नये॒ सुपू॑तम्॥ ३॥

((stī̱rṇaṃ ba̱rhiḥ sīdatā ya̱jñe a̱smin |
dhrā̱jāḥ sedha̍nto̱ ama̍tiṃ du̱revã̍m |
a̱smabhya̍ṃ pu̱trā adi̍te̱ḥ praya̍m̐sata |
ādi̍tyā̱ḥ kāma̍ ha̱viṣo̍ ju̱ṣā̱ṇāḥ |
agne̱ naya̍ su̱pathā̍ rā̱ye a̱smān |
viśvā̍ni deva va̱yunā̍ni vi̱dvān |
yu̱yo̱dhya̍sma̱jju̍hurā̱ṇamena̍ḥ |
bhūyi̍ṣṭhāṃ te̱ nama̍uktiṃ vidhema |
pra va̍ḥ śu̱krāya̍ bhā̱nave̍ bharadhvam |
ha̱vyaṃ ma̱tiṃ cā̱gnaye̱ supū̍tam || 3 ||))

[[2-8-2-4]]
यो दैव्या॑नि॒ मानु॑षा ज॒नूꣳ॑षि।
अ॒न्तर्विश्वा॑नि वि॒द्मना॑ जिगा॑ति।
अच्छा॒ गिरो॑ म॒तयो॑ दे॒वयन्तीः᳚।
अ॒ग्निं य॑न्ति॒ द्रवि॑णं॒ भिक्ष॑माणाः।
सु॒सं॒दृशꣳ॑ सु॒प्रती॑कꣳ॒ स्वञ्च᳚म्।
ह॒व्य॒वाह॑मर॒तिं मानु॑षाणाम्।
अग्ने॒ त्वम॒स्मद्यु॑योध्यमी॑वाः।
अन॑ग्नित्रा अ॒भ्यम॑न्त कृ॒ष्टीः।
पुन॑र॒स्मभ्यꣳ॑ सुवि॒ताय॑ देव।
क्षां विश्वे॑भिर॒जरे॑भिर्यजत्र॥ ४॥

((yo daivyā̍ni̱ mānu̍ṣā ja̱nūm̐̍ṣi |
a̱ntarviśvā̍ni vi̱dmanā̱ jigā̍ti |
acchā̱ giro̍ ma̱tayo̍ deva̱yantī̍ḥ |
a̱gniṃ ya̍nti̱ dravi̍ṇa̱ṃ bhikṣa̍māṇāḥ |
su̱sa̱ṃdr̥śa̍m̐ su̱pratī̍ka̱m̐ svañcã̍m |
ha̱vya̱vāha̍mara̱tiṃ mānu̍ṣāṇām |
agne̱ tvama̱smadyu̍yo̱dhyamī̍vāḥ |
ana̍gnitrā a̱bhyama̍nta kr̥̱ṣṭīḥ |
puna̍ra̱smabhya̍m̐ suvi̱tāya̍ deva |
kṣāṃ viśve̍bhira̱jare̍bhiryajatra || 4 ||))

[[2-8-2-5]]
अग्ने॒ त्वं पा॑रया॒ नव्यो॑ अ॒स्मान्।
स्व॒स्तिभि॒रति॑ दु॒र्गाणि॒ विश्वा᳚।
पूश्च॑ पृ॒थ्वी ब॑हु॒ला न॑ उ॒र्वी।
भवा॑ तो॒काय॒ तन॑याय॒ शं योः।
प्र का॑रवो मन॒ना व॒च्यमा॑नाः।
दे॒व॒द्रीचीं᳚ नयथ दे॒वय॑न्तः।
द॒क्षि॒णा॒वाड्वा॒जिनी॒ प्राच्ये॑ति।
ह॒विर्भ॑र॒न्त्य॒ग्नये॑ घृ॒ताची᳚।
इन्द्रं॒ नरो॑ यु॒जे रथ᳚म्।
ज॒गृ॒भ्णा ते॒ दक्षि॑णामिन्द्र॒ हस्त᳚म्॥ ५॥

((agne̱ tvaṃ pā̍rayā̱ navyo̍ a̱smān |
sva̱stibhi̱rati̍ du̱rgāṇi̱ viśvã̍ |
pūśca̍ pr̥̱thvī ba̍hu̱lā na̍ u̱rvī |
bhavā̍ to̱kāya̱ tana̍yāya̱ śaṃ yoḥ |
pra kā̍ravo mana̱nā va̱cyamā̍nāḥ |
de̱va̱drīcī̍ṃ nayatha deva̱yanta̍ḥ |
da̱kṣi̱ṇā̱vā̱ḍvā̱jinī̱ prācye̍ti |
ha̱virbha̍ranty̱agnaye̍ ghr̥̱tācī̍ |
indra̱ṃ naro̍ yu̱je rathã̍m |
ja̱gr̥̱bhṇā te̱ dakṣi̍ṇāmindra̱ hastã̍m || 5 ||))

[[2-8-2-6]]

वसूयवो वसुपते वसूनाम्।
विद्मा हि त्वा गोपतिꣳ शूर गोनाम्।
अस्मभ्यं चित्रं वृषणं रयिं दाः।
तवेदं विश्वमभितः पशव्यम्।
यत्पश्यसि चक्षसा सूर्यस्य।
गवामसि गोपतिरेक इन्द्र।
भक्षीमहि ते प्रयतस्य वस्वः।
समिन्द्र णो मनसा नेषि गोभिः।
सꣳ सूरिभिर्मघवन्त्सꣳ स्वस्त्या।
सं ब्रह्मणा देवकृतं यदस्ति॥ ६॥

((vasūyavo vasupate vasūnām ।
vidmā hi tvā gopatim̐ śūra gonām̐ ।
asmabhyaṃ citraṃ vṛṣaṇaṃ rayiṃ dāḥ ।
tavedaṃ viśvamabhitaḥ paśavyam̐ ।
yatpaśyasi cakṣasā sūryasya ।
gavāmasi gopatireka indra ।
bhakṣīmahi te prayatasya vasvaḥ ।
samindra ṇo manasā neṣi gobhiḥ ।
sam̐ sūribhirmaghavantsam̐ svastyā ।
saṃ brahmaṇā devakṛtaṃ yadasti ॥ 6 ॥))

[[2-8-2-7]]

सं देवानाꣳ सुमत्या यज्ञियानाम्।
आराच्छत्रुमपबाधस्व दूरम्।
उग्रो यः शम्बः पुरुहूत तेन।
अस्मे धेहि यवमद्गोमदिन्द्र।
कृधी धियं जरित्रे वाजरत्नाम्।
आवेधसꣳ स हि शुचिः।
बृहस्पतिः प्रथमं जायमानः।
महोज्योतिषः परमे व्योमन्।
सप्तास्यस्तुविजातो रवेण।
वि सप्तरश्मिरधमत्तमाꣳसि॥ ७॥

((saṃ devānām̐ sumatyā yajñiyānām ।
ārācchatrumapabādhasva dūram ।
ugro yaḥ śambaḥ puruhūta tena ।
asme dhehi yavamadgomadindra ।
kṛdhī dhiyaṃ jaritre vājaratnām।
āvedhasam̐ sa hi śuciḥ ।
bṛhaspatiḥ prathamaṃ jāyamānaḥ ।
mahojyotiṣaḥ parame vyoman ।
saptāsyastuvijāto raveṇa ।
vi saptaraśmiradhamattamām̐si ॥ 7 ॥))

[[2-8-2-8]]

बृहस्पतिः समजयद्वसूनि।
महो व्रजान्गोमतो देव एषः।
अपः सिषासन्त्सुवरप्रतीत्तः।
बृहस्पतिर्हन्त्यमित्रमर्कैः।
बृहस्पते पर्येवा पित्रे।
आ नो दिवः पावीरवी।
इमा जुह्वाना यस्ते स्तनः।
सरस्वत्यभि नो नेषि।
इयꣳ शुष्मेभिर्बिसखा इवारुजत्।
सानु गिरीणां तविषेभिरूर्मिभिः।
पारावदघ्नीमवसे सुवृक्तिभिः।
सरस्वतीमाविवासेम धीतिभिः॥ ८॥
देवयोनैर्देवाः सुपूतं यजत्र हस्तमस्ति तमाꣳ स्यूर्मिभिर्द्वे च॥ २॥

((bṛhaspatiḥ samajayadvasūni ।
maho vrajāngomato deva eṣaḥ ।
apaḥ siṣāsantsuvarapratīttaḥ ।
bṛhaspatirhantyamitramarkaiḥ ।
bṛhaspate paryevā pitre ।
ā no divaḥ pāviravī ।
imā juhvānā yaste stanaḥ ।
sarasvatyabhi no neṣi ।
iyam̐ śuṣmebhirbisakhā ivārujat।
sānu girīṇāṃ taviṣebhirūrmibhiḥ ।
pārāvadaghnīmavase suvṛktibhiḥ ।
sarasvatīmāvivāsema dhītibhiḥ ॥ 8 ॥
devayonairdevāḥ supūtaṃ yajatra hastamasti tamām̐ syūrmibhirdve ca ॥ 2 ॥))

[[2-8-3-1]]

सोमो धेनुꣳ सोमो अर्वन्तमाशुम्।
सोमो वीरं कर्मण्यं ददातु।
सादन्यं विदथ्यꣳ सभेयम्।
पितुःश्रवणं यो ददाशदस्मै।
अषाढं युत्सु त्वꣳ सोम क्रतुभिः।
या ते धामानि हविषा यजन्ति।
त्वमिमा ओषधीः सोम विश्वाः।
त्वमपो अजनयस्त्वं गाः।
त्वमाततन्थोर्वन्तरिक्षम्।

त्वं ज्योति॑षा॒ वित॑मो॑ ववर्थ॥ १॥

((somȯ dhe̱num̐ somo̱ arvȧntamā̱śum ।
somȯ vī̱raṃ kȧrma̱ṇyaṃ̍ dadātu ।
sā̱da̱nyaṃ̍ vida̱thyam̐ sa̱bheyā̎m ।
pi̱tu̱ḥśravȧṇa̱m yo dadȧ̍śadasmai ।
aṣȧ̍ḍhaṃ yu̱tsu tvam̐ sȯma̱ kratu̍bhiḥ ।
yā te̱ dhāmȧ̍ni ha̱viṣā̱ yajȧ̍nti ।
tvami̱mā oṣȧdhīḥ soma̱ viśvā̎ḥ ।
tvama̱po ȧjanaya̱stvaṃ gāḥ ।
tvamātȧtanthoṟvȧntari̍kṣam ।
tvaṃ jyoti̍ṣā̱ vitamȯ vavartha ॥ 1 ॥))

**[[2-8-3-2]]**

या ते॒ धामा॑नि दि॒वि या पृ॑थि॒व्याम्।
या पर्व॑ते॒ष्वोष॑धीष्व॒प्सु।
तेभि॑र्नो॒ विश्वै॑ः सु॒मना॒ अहे॑डन्।
राज॑न्त्सोम॒ प्रति॑ ह॒व्या गृ॑भाय।
विष्णो॒र्नु कं॒ तद॑स्य प्रि॒यम्।
प्र तद्विष्णु॑ः।
प॒रो मात्र॑या त॒नुवा॑ वृधान।
न ते॑ महि॒त्वमन्व॑श्नुवन्ति।
उ॒भे ते॑ विद्म रज॑सी पृथि॒व्या विष्णो॑ दे॒व त्वम्।
प॒रमस्य॑ वित्से॥ २॥

((yā te̱ dhāmȧ̍ni di̱vi yā pṛ̍thi̱vyām ।
yā parvȧte̱ṣvoṣȧthīṣva̱psu ।
tebhi̍rno̱ viśvai̎ḥ su̱manā̱ ahȧ̍ḍan ।
rājȧ̍ntsoma̱ prati̍ ha̱vyā gṛ̍bhāya ।
viṣṇo̱rnu ka̱ṃ tadȧsya pri̱yam ।
pra tadviṣṇu̍ḥ ।
pa̱ro mātrȧyā ta̱nuvȧ̍ vṛdhāna ।
na tė mahi̱tvamanvȧśnuvanti ।
u̱bhe tė vidma̱ rajȧsī pṛthi̱vyā viṣṇȯ deva̱ tvam ।
pa̱ra̱masyȧ vitse ॥ 2 ॥))

**[[2-8-3-3]]**

वि॒च॑क्रमे॒ त्रि॒र्दे॑वः।
आ ते॑ म॒हो यो जा॒त ए॒व।
अ॒भि गो॒त्राणि॑।
आभि॒ः स्पृधो॑ मिथ॒तीररि॑षण्यन्।
अ॒मित्र॑स्य व्यथया म॒न्युमि॑न्द्र।
आभि॒र्विश्वा॑ अभि॒युजो॒ विषू॑चीः।
आर्या॑य विशोऽव॑तरी॒र्दासी॑ः।
अ॒यꣳ शृ॑ण्वे॒ अध॒ जय॑न्नुत घ्नन्।

अ॒यमुत प्रकृ॑णुते यु॒धा गाः।
य॒दा स॒त्यं कृ॑णुते म॒न्युमिन्द्र॑ः॥ ३॥

((vicȧkrame̱ trirde̱vaḥ ।
ā tė ma̱ho yo jā̱ta e̱va ।
a̱bhi go̱trāṇi̍ ।
ābhi̱ḥ spṛdhȯ mitha̱tīrari̍ṣa̱ṇyan ।
a̱mitrȧsya vyathayā ma̱nyumi̍ndra ।
ābhi̱rviśvȧ abhi̱yujo̱ viṣu̍cīḥ ।
āryȧ̱ya viśo'vȧtarī̱rdāsī̎ḥ ।
a̱yam̐ śṛ̍ṇve̱ adha̱ jayȧnnu̱ta ghnan ।
a̱yamu̱ta prakṛ̍ṇute yu̱dhā gāḥ ।
ya̱dā sa̱tyaṃ kṛ̍ṇu̱te ma̱nyumindrȧ̍ḥ ॥ 3 ॥))

**[[2-8-3-4]]**

विश्वं॑ दृ॒ढं भ॑यत ए॒ज॑द॒स्मात्।
अनु॑ स्व॒धाम॑क्षर॒न्नापो॑ अस्य।
अव॑र्धत म॒ध्य आ ना॒व्या॑नाम्।
स॒ध्रीचीने॑न मन॑सा॒ तमि॑न्द्र॒ ओजि॑ष्ठेन।
हन्म॑नाऽहन्न॒भिद्यून्।
म॒रुत्व॑न्तं वृ॒षभं वा॑वृधा॒नम्।
अक॑वारिं दि॒व्यꣳ शा॒समिन्द्र॑म्।
वि॒श्वासाह॒मव॑से॒ नूत॑नाय।
उ॒ग्रꣳ स॑हो॒दामि॒ह तꣳ हु॑वेम।
जनि॑ष्ठा उ॒ग्रः सह॑से तु॒राय॑॥ ४॥

((viśvaṃ̍ dṛ̱ḍhaṃ bhȧyata̱ ejȧdasmāt ।
anu̍ sva̱dhāmȧkṣara̱nnāpȯ asya ।
avȧrdhata̱ madhya̱ ā nā̱vyȧnām ।
sa̱dhrī̱cīnė̱na̱ manȧsā̱ tami̍ndra̱ oji̍ṣṭhena ।
hanmȧnā'hanna̱bhidyūn ।
ma̱rutvȧntaṃ vṛ̱ṣa̱bhaṃ vȧvṛdhā̱nam ।
akȧvāriṃ di̱vyam̐ śā̱samindrā̎m ।
vi̱śvā̱sāha̱mavȧse̱ nūtȧnāya ।
u̱gram̐ sȧho̱dāmi̱ha tam̐ hu̍vema ।
jani̍ṣṭhā u̱graḥ sahȧse tu̱rāyȧ ॥ 4 ॥))

**[[2-8-3-5]]**

म॒न्द्र ओजि॑ष्ठो ब॒हु॒लाभि॑मानः।
अव॑र्धन्निन्द्रं॑ म॒रुत॑श्चिदत्र।
मा॒ता यद्वीरं॑ द॒धन॒द्धनि॑ष्ठा।
क्व॑ स्या वो॑ मरुतः स्व॒धाऽऽसी॑त्।
यन्मामेक॑ꣳ स॒मध॑त्ताहि॒हत्ये॑।
अ॒हꣳ ह्यु॒ग्रस्त॑वि॒षस्तुवि॑ष्मान्।
विश्व॑स्य॒ शत्रो॒रन॑मं वध॒स्नैः।

वृत्रस्य त्वा श्वसथादीषमाणाः।
विश्वे देवा अजहुर्ये सखायः।
मरुद्भिरिन्द्र सख्यं ते अस्तु॥ ५॥

((mandra ojiṣṭho bahulābhimānaḥ |
avardhannindram marutaścidatra |
mātā yadvīram dadhanaddhaniṣṭhā |
kva syā vo marutaḥ svadhā''sīt|
yanmāmekam samadhattāhihatye |
aham hyugrastaviṣastuviṣmān|
viśvasya śatroranamam vadhasnaiḥ |
vṛtrasya tvā śvasathādīṣamāṇāḥ |
viśve devā ajahurye sakhāyaḥ |
marudbhirindra sakhyam te astu || 5 ||))

**[[2-8-3-6]]**

अथेमा विश्वाः पृतना जयासि।
वधीं वृत्रं मरुत इन्द्रियेण।
स्वेन भामेन तविषो बभूवान्।
अहमेता मनवे विश्वश्चन्द्राः।
सुगा अपश्चकर वज्रबाहुः।
स यो वृषा वृष्णियेभिः समोकाः।
महो दिवः पृथिव्याश्च सम्राट्।
सतीनसत्त्वा हव्यो भरेषु।
मरुत्वाँन्नो भवत्विन्द्र ऊती।
इन्द्रो वृत्रमतरद्वृत्रतूर्ये॥ ६॥

((athemā viśvāḥ pṛtanā jayāsi |
vadhīm vṛtram maruta indriyeṇa |
svena bhāmena taviṣo babhūvān |
ahametā manave viśvaścandrāḥ |
sugā apaścakara vajrabāhuḥ |
sa yo vṛṣā vṛṣṇiyebhiḥ samokāḥ |
maho divaḥ pṛthivyāśca samrāṭ |
satīnasattvā havyo bhareṣu |
marutvānno bhavatvindra ūtī |
indro vṛtramataradvṛtratūrye || 6 ||))

**[[2-8-3-7]]**

अनाधृष्यो मघवा शूर इन्द्रः।
अन्वेनं विशो अमदन्त पूर्वीः।
अयꣳ राजा जगतश्चर्षणीनाम्।
स एव वीरः स उ वीर्यावान्।
स एकराजो जगतः परस्पाः।
यदा वृत्रमतरच्छूर इन्द्रः।
अथाभवद्दमिताऽभिक्रतूनाम्।
इन्द्रो यज्ञं वर्धयन्विश्ववेदाः।
पुरोडाशस्य जुषताꣳ हविर्नः।
वृत्रं तीर्त्वा दानवं वज्रबाहुः॥ ७॥

((anādhṛṣyo maghavā śūra indraḥ |
anvenam viśo amadanta pūrvīḥ |
ayam rājā jagataścarṣaṇīnām |
sa eva vīraḥ sa u vīryavān |
sa ekarājo jagataḥ paraspāḥ |
yadā vṛtramataracchūra indraḥ |
athābhavaddamitā'bhikratūnām |
indro yajñam vardhayanviśvavedāḥ |
puroḍāśasya juṣatām havirnaḥ |
vṛtram tīrtvā dānavam vajrabāhuḥ || 7 ||))

**[[2-8-3-8]]**

दिशोऽदृꣳहद्दृꣳहिता दृꣳहणेन।
इमं यज्ञं वर्धयन्विश्ववेदाः।
पुरोडाशं प्रतिगृभ्णात्विन्द्रः।
यदा वृत्रमतरच्छूर इन्द्रः।
अथैकराजो अभवज्जनानाम्।
इन्द्रो देवाञ्छम्बरहत्य आवत्।
इन्द्रो देवानामभवत्पुरोगाः।
इन्द्रो यज्ञे हविषा वावृधानः।
वृत्रतूर्णो अभयꣳ शर्म यꣳसत्।
यः सप्त सिन्धूꣳरदधात्पृथिव्याम्।
यः सप्त लोकानकृणोद्दिशश्च।
इन्द्रो हविष्मान्त्सगणो मरुद्भिः।
वृत्रतूर्णो यज्ञमिहोपयासत्॥ ८॥
ववर्थ वित्स इन्द्रस्तु रायाँस्तु वृत्रतूर्ये वज्रबाहुः पृथिव्यां त्रीणि च॥ ३॥

((diśo'dṛmhaddṛmhitā dṛmhaṇena |
imam yajñam vardhayanviśvavedāḥ |
puroḍāśam pratigṛbhṇātvindraḥ |
yadā vṛtramataracchūra indraḥ |
athaikarājo abhavajjanānām |
indro devāñchambarahatya āvat |
indro devānāmabhavatpurogāḥ |
indro yajñe haviṣā vāvṛdhānaḥ |
vṛtratūrṇo abhayam śarma yamsat |
yaḥ sapta sindhūmradadhātpṛthivyām |
yaḥ sapta lokānakṛṇoddiśaśca |
indro haviṣmāntsagaṇo marudbhiḥ |
vṛtratūrṇo yajñamihopayāsat || 8 ||

va̱va̱rtha̱ vi̱tsa̱ indra̍stu̱ rāyā̎stu vṛ̱tra̱tūrye̱
vajra̍bāhuḥ pṛ̱thi̱vyāṃ trīṇi̍ ca ॥ 3 ॥))

**[[2-8-4-1]]**

इन्द्र॒स्तर॑स्वानभि॒माति॒होग्रः।
हि॒र॑ण्यवाशीरिषि॒रः सु॑व॒र्षाः।
तस्य॑ व॒यꣳ सु॑म॒तौ य॒ज्ञिय॑स्य।
अपि॑ भ॒द्रे सौ॑मन॒से स्या॑म।
हि॒र॑ण्यवर्णो॒ अभ॑यं कृणोतु।
अ॒भि॒मा॒ति॒हेन्द्रः पृत॑नासु जि॒ष्णुः।
स न॒ः शर्म॑ त्रि॒वरू॑थं वियꣳ॑सत्।
यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः।
इन्द्रꣳ॑ स्तुहि व॒ज्रिणꣳ॑ स्तोम॑पृष्ठम्।
पु॒रो॒डाश॑स्य जुषताꣳ ह॒विर्नः॑॥ १॥

((indra̱stara̍svānabhimāti̱hograḥ ।
hira̍ṇyavāśīriṣi̱raḥ su̍va̱rṣāḥ ।
tasya̍ va̱yaꣳ su̍ma̱tau ya̱jñiya̍sya ।
api̍ bha̱dre sau̍mana̱se syā̍ma ।
hira̍ṇyavarṇo̱ abha̍yaṃ kṛṇotu ।
a̱bhi̱mā̱ti̱hendra̱ḥ pṛta̍nāsu ji̱ṣṇuḥ ।
sa na̱ḥ śarma̍ tri̱varū̍tha̱ṃ viyaꣳ̍sat ।
yū̱yaṃ pā̍ta sva̱stibhi̱ḥ sadā̍ naḥ ।
indraꣳ̍ stuhi va̱jriṇa̱ꣳ̍ stoma̍pṛṣṭham ।
pu̱ro̱ḍāśa̍sya juṣatāꣳ ha̱virna̍ḥ ॥ 1 ॥))

**[[2-8-4-2]]**

ह॒त्वाऽभिमा॑तीः पृत॑ना॒ः सहस्वान्।
अथाभ॑यं कृणुहि वि॒श्वतो॑ नः।
स्तु॒हि शूर॑ं व॒ज्रिण॒मप्र॑तीत्तम्।
अ॒भि॒मा॒ति॒हन॑ं पुरुहू॒तमिन्द्र॑म्।
य एक॒ इच्छ॒तप॑ति॒र्जने॑षु।
तस्मा॒ इन्द्रा॑य ह॒विराजु॑होत।
इन्द्रो॑ दे॒वाना॑मधि॒पाः पु॒रोहि॑तः।
दि॒शां पति॑रभवद्वा॒जिनी॑वान्।
अ॒भि॒मा॒ति॒हा त॑वि॒षस्तुवि॑ष्मान्।
अ॒स्मभ्य॑ं चि॒त्रं वृष॑णꣳ र॒यिं दा॑त्॥ २॥

((ha̱tvā'bhimā̍tīḥ pṛta̍nā̱ḥ sahasvān ।
athābha̍yaṃ kṛṇuhi vi̱śvato̍ naḥ ।
stu̱hi śūra̍ṃ va̱jriṇa̱mapra̍tīttam ।
a̱bhi̱mā̱ti̱hana̍ṃ puruhū̱tamindra̍m ।
ya eka̱ iccha̱tapa̍ti̱rjane̍ṣu ।
tasmā̱ indrā̍ya ha̱virāju̍hota ।
indro̍ de̱vānā̍madhi̱pāḥ pu̱rohi̍taḥ ।
di̱śāṃ pati̍rabhavadvā̱jinī̍vān ।
a̱bhi̱mā̱ti̱hā ta̍vi̱ṣastuvi̍ṣmān ।
a̱smabhya̍ṃ ci̱traṃ vṛṣa̍ṇaꣳ ra̱yiṃ dā̍t ॥ 2 ॥))

**[[2-8-4-3]]**

य इ॒मे द्यावा॑पृथि॒वी म॑हि॒त्वा।
ब॒लेना॒दृꣳ॑हद॒भि॒मा॒ति॒हेन्द्रः॑।
स नो॑ ह॒विः प्रति॑गृभ्णातु रा॒तये॑।
दे॒वाना॑ं दे॒वो नि॑धि॒पा नो॑ अव्यात्।
अन॑वस्ते॒ रथ॒ं वृष्णे॒ यत्ते॑।
इन्द्र॑स्य॒ नु वी॒र्या॑ण्यह॒न्नहि॑म्।
इन्द्रो॑ या॒तोऽव॑सितस्य॒ राजा॑।
शम॑स्य च शृ॒ङ्गिणो॒ वज्र॑बाहुः।
सेदु॒ राजा॑ क्षेति चर्षणी॒नाम्।
अ॒रान्न ने॒मिः परि॒ता ब॑भूव॥ ३॥

((ya i̱me dyāvā̍pṛthi̱vī mahi̱tvā ।
bale̱nādṛꣳ̍hadabhimāti̱hendra̍ḥ ।
sa no̍ ha̱viḥ prati̍gṛbhṇātu rā̱taye̍ ।
de̱vānā̍ṃ de̱vo ni̍dhi̱pā no̍ avyāt ।
ana̍vaste̱ ratha̱ṃ vṛṣṇe̱ yatte̍ ।
indra̍sya̱ nu vī̱ryā̍ṇyaha̱nnahi̍m ।
indro̍ yā̱to'va̍sitasya̱ rājā̍ ।
śama̍sya ca śṛ̱ṅgiṇo̱ vajra̍bāhuḥ ।
sedu̱ rājā̍ kṣeti carṣa̱ṇīnām ।
a̱rānna ne̱miḥ pari̱tā ba̍bhūva ॥ 3 ॥))

**[[2-8-4-4]]**

अ॒भि सि॒ध्मो अ॑जिगादस्य॒ शत्रू॑न्।
वि ति॒ग्मेन॑ वृष॒भेणा॒ पुरो॑ऽभेत्।
सं वज्रे॑णासृजद्वृ॒त्रमिन्द्र॑ः।
प्र स्वां म॒तिम॑तिर॒च्छाश॑दानः।
विष्णु॑ं दे॒वं वरु॑णमू॒तये॒ भग॑म्।
मेद॑सा दे॒वा व॒पया॑ यजध्वम्।
ता नो॑ य॒ज्ञमाग॑तं वि॒श्वधे॑ना।
प्र॒जाव॑द॒स्मे द्रवि॑णे॒ह ध॑त्तम्।
मेद॑सा दे॒वा व॒पया॑ यजध्वम्।
विष्णु॑ं च दे॒वं वरु॑णं च रा॒तिम्॥ ४॥

((a̱bhi si̱dhmo a̍jigādasya̱ śatrū̍n ।
vi ti̱gmena̍ vṛṣa̱bheṇā̱ puro̍'bhet ।
saṃ vajre̍ṇāsṛjadvṛ̱tramindra̍ḥ ।
pra svāṃ ma̱tima̍tira̱cchāśa̍dānaḥ ।
viṣṇu̍ṃ de̱vaṃ varu̍ṇamū̱taye̱ bhagā̍m ।
meda̍sā de̱vā va̱payā̍ yajadhvam ।

tā nȯ yajñamāgȧtaṃ viśvadhėnā ।
prajāvȧdasme dravinėha dhȧttam ।
medȧsā dėvā vapayȧ yajadhvam ।
viṣṇuṃ ca dėvaṃ varuṇaṃ ca rātim ॥ 4 ॥))

**[[2-8-4-5]]**

ता नो अमीवा अपबाधमानौ।
इमं यज्ञं जुषमाणावुपेतम्।
विष्णूवरुणा युवमध्वराय नः।
विशे जनाय महि शर्म यच्छतम्।
दीर्घप्रयज्यू हविषा वृधाना।
ज्योतिषाऽरातीर्दहतं तमाꣳसि।
ययोरोजसा स्कभिता रजाꣳसि।
वीर्येभिर्वीरतमा शविष्ठा।
या पत्येते अप्रतीत्ता सहोभिः।
विष्णू अगन्वरुणा पूर्वहूतौ॥ ५॥

((tā no amīvā apabādhamānau ।
imaṃ yajñaṃ juṣamāṇāvupetām ।
viṣṇūvaruṇā yuvamadhvarāya naḥ ।
viśe janāya mahi śarma yacchatam ।
dīrghaprayajyū haviṣā vṛdhānā ।
jyotiṣā'rātīrdahataṃ tamām̐si ।
yayorojasā skabhitā rajām̐si ।
vīryebhirvīratamā śaviṣṭhā ।
yā patyete apratīttā sahobhiḥ ।
viṣṇū aganvaruṇā pūrvahūtau ॥ 5 ॥))

**[[2-8-4-6]]**

विष्णूवरुणावभिशस्तिपा वाम्।
देवा यजन्त हविषा घृतेन।
अपामीवाꣳ सेधतꣳ रक्षसश्च।
अथा धत्तं यजमानाय शं योः।
अꣳहोमुचा वृषभा सुप्रतूर्ती।
देवानां देवतमा शचिष्ठा।
विष्णूवरुणा प्रतिहर्यतं नः।
इदं नरा प्रयतमूतये हविः।
मही नु द्यावापृथिवी इह ज्येष्ठे।
रुचा भवताꣳ शुचयद्भिरर्कैः॥ ६॥

((viṣṇūvaruṇāvabhiśastipā vām ।
devā yajanta haviṣā ghṛtena ।
apāmīvām̐ sedhatam̐ rakṣasaśca ।
athā dhattaṃ yajamānāya śaṃ yoḥ ।
am̐homucā vṛṣabhā supratūrtī ।
devānām̐ devatamā śaciṣṭhā ।
viṣṇūvaruṇā pratiharyataṃ naḥ ।
idaṃ narā prayatamūtaye haviḥ ।
mahī nu dyāvāpṛthivī iha jyeṣṭhe ।
rucā bhavatām̐ śucayadbhirarkaiḥ ॥ 6 ॥))

**[[2-8-4-7]]**

यत्सीं वरिष्ठे बृहती विमिन्वन्।
नृवद्भ्योऽक्षा पप्रथानेभिरेवैः।
प्र पूर्वजे पितरा नव्यसीभिः।
गीर्भिः कृणुध्वꣳ सदने ऋतस्य।
आ नो द्यावापृथिवी दैव्येन।
जनेन यातं महि वां वरूथम्।
स इत्स्वपा भुवनेष्वास।
य इमे द्यावापृथिवी जजान।
उर्वी गभीरे रजसी सुमेके।
अवꣳशे धीरः शच्या समैरत्॥ ७॥

((yatsīṃ variṣṭhe bṛhatī viminvan।
nṛvadbhyo'kṣā paprathānebhirevaiḥ ।
pra pūrvaje pitarā navyasībhiḥ ।
gīrbhiḥ kṛṇudhvam̐ sadane ṛtasya ।
ā no dyāvāpṛthivī daivyena ।
janena yātaṃ mahi vāṃ varūtham ।
sa itsvapā bhuvaneṣvāsa ।
ya ime dyāvāpṛthivī jajāna ।
urvī gabhīre rajasī sumeke ।
avam̐śe dhīraḥ śacyā samairat ॥ 7 ॥))

**[[2-8-4-8]]**

भूरि द्वे अचरन्ती चरन्तम्।
पद्वन्तं गर्भमपदी दधाते।
नित्यं न सूनुं पित्रोरुपस्थे।
तं पिपृतꣳ रोदसी सत्यवाचम्।
इदं द्यावापृथिवी सत्यमस्तु।
पितर्मातर्यदिहोपब्रुवे वाम्।
भूतं देवानामवमे अवोभिः।
विद्यामेषं वृजनं जीरदानुम्।
उर्वी पृथ्वी बहुले दूरे अन्ते।
उपब्रुवे नमसा यज्ञे अस्मिन्।
दधाते ये सुभगे सुप्रतूर्ती।
द्यावा रक्षतं पृथिवी नो अभ्वात्।
या जाता ओषधयोऽतिविश्वाः परिष्ठाः।

या ओष॑धयः॒ सोम॑ राज्ञीरश्वाव॒तीꣳ सोम॑व॒तीम्।
ओष॑धीरि॒ति॑ मात॒रोऽन्या वो॑ अ॒न्याम॑वतु॥ ८॥
ह॒विर्नो॑ दाद्बभूव रा॒तिं पू॒र्वहू॑ताव॒र्कैरै॑रद॒स्मिन्पञ्च॑ च॥ ४॥

((bhūrim̱ dve acárantī̱ carántam ।
pa̱dvantam̱ garbhámapadī́ dadhāte ।
nityam̱ na sū̱num̱ pi̱troru̱pasthē̃ ।
tam̱ pipṛ̱tam̐ rodasī satya̱vācam̐ ।
i̱dam̱ dyávāpṛthivī sa̱tyamástu ।
pita̱rmāta̱ryadi̱hopábru̱ve vām̐ ।
bhū̱tam̱ de̱vānámava̱me avóbhiḥ ।
vidyāme̱ṣam̱ vṛ̱janam̱ jī̱radánum ।
u̱rvī pṛ̱thvī báhu̱le dū̱re ánte ।
upábruve̱ namásā ya̱jñe a̱smin ।
dadhā́te̱ ye su̱bhagé̱ supratū̃rtī ।
dyāvā̱ rakṣa̱tam̱ pṛthi̱vī no̱ abhvā̃t ।
yā jā̱tā oṣádha̱yo'ti̱viśvā̃ḥ pa̱riṣṭhāḥ ।
yā oṣádhaya̱ḥ somá rājñīraśvāva̱tīm̐ sómava̱tīm ।
oṣádhī̱rití̱ māta̱ro'nyā vó a̱nyāmávatu ॥ 8 ॥
ha̱virnó dādbabhūva rā̱tim̱
pū̱rvahū́tāva̱rkairairada̱sminpañcá ca ॥ 4 ॥))

**[[2-8-5-1]]**

शु॒चिं॒ नु स्तोम॒ꣳ॒ श्नथ॑द्वृ॒त्रम्।
उ॒भा वा॑मिन्द्राग्नी॒ प्र॒च॑र्ष॒णिभ्यः॑।
आवृ॑त्रहणा गी॒र्भिर्विप्रः॑।
ब्रह्म॑णस्पते॒ त्वम॒स्य य॒न्ता।
सू॒क्तस्य॑ बोधि॒ तन॑यं च जिन्व।
विश्वं॑ त॒द्भद्रं यद॒वन्ति॑ दे॒वाः।
बृ॒हद्व॑देम वि॒दथे॑ सु॒वीराः॑।
स ईꣳ॑ स॒त्येभि॒ः सखि॑भिः शु॒चद्भि॑ः।
गोधा॑यसं॒ वि ध॑न॒सैर॑तर्दत्।
ब्रह्म॑ण॒स्पति॒र्वृष॑भि॒र्व॒राहैः॑॥ १॥

((śucim̱ nu stomam̱̐ śnathádvṛ̱tram ।
u̱bhā vámindrāgnī̱ pracárṣa̱ṇibhyaḥ ।
āvṛ́trahaṇā gī̱rbhirvipráḥ ।
brahmáṇaspate̱ tvama̱sya ya̱ntā ।
sū̱ktasyá bodhi̱ tanáyam̱ ca jinva ।
viśvam̱ tadbhadram̱ yada̱vantí de̱vāḥ ।
bṛ̱hadvádema vi̱dathé su̱vīrā̃ḥ ।
sa īm̐ sa̱tyebhi̱ḥ sakhíbhiḥ śu̱cadbhi̱ḥ ।
godháyasam̱ vi dhána̱sairátardat ।
brahmáṇaspati̱rvṛṣábhirva̱rāhaiḥ ॥ 1 ॥))

**[[2-8-5-2]]**

घ॒र्मस्वे॑दोभि॒र्द्रवि॑णं॒ व्या॑नट्।
ब्रह्म॑ण॒स्पते॑रभवद्यथा व॒शम्।
स॒त्यो म॒न्युर्महि॒ कर्मा॑ करिष्य॒तः।
यो गा उ॒दाज॒त्स दि॒वे वि चा॑भजत्।
म॒हीव॑ री॒तिः शव॑सा सर॒त्पृथ॑क्।
इन्धा॑नो अ॒ग्निं वन॑वद्वनुष्य॒तः।
कृ॒तब्र॑ह्मा शूशुवद्रा॒तह॑व्य॒ इत्।
जा॒तेन॑ जा॒तमति॒ सृत्प्रसृꣳ॑सते।
यं य॒ं युजं॑ कृणु॒ते ब्रह्म॑ण॒स्पति॑ः।
ब्रह्म॑णस्पते सु॒यम॑स्य वि॒श्वहा॑॥ २॥

((gha̱rmasvédobhi̱rdraviṇam̱ vyánaṭ ।
brahmáṇa̱spateṛabhavadyathā va̱śam ।
sa̱tyo ma̱nyurmahi̱ karmá kariṣya̱taḥ ।
yo gā u̱dāja̱tsa di̱ve vi cábhajat ।
ma̱hīvá rī̱tiḥ śavásā sara̱tpṛthák ।
indháno a̱gnim̱ vánavadvanuṣya̱taḥ ।
kṛ̱tabráhmā śūśuvadrā̱tahávya̱ it ।
jā̱tená jā̱tamati̱ sṛtprasṛm̐sate ।
yam̱ yam̱ yujam̱ kṛṇu̱te brahmáṇa̱spatiḥ ।
brahmáṇaspate su̱yamásya vi̱śvahā̃ ॥ 2 ॥))

**[[2-8-5-3]]**

रा॒यः स्या॑म र॒थ्यो॑ विव॑स्वतः।
वी॒रेषु॑ वी॒राꣳ उप॑पृङ्धि न॒स्त्वम्।
यदीशा॑नो॒ ब्रह्म॑णा॒ वेषि॑ मे॒ हव॑म्।
स इज्जने॑न॒ स वि॒शा स जन्म॑ना।
स पु॒त्रैर्वाजं॑ भरते॒ धना॒ नृभिः॑।
दे॒वाना॒ं यः पि॒तर॑मा॒विवा॑सति।
श्र॒द्धाम॑ना ह॒विषा॒ ब्रह्म॑ण॒स्पति॑म्।
यास्ते॑ पूषन्ना॒ वो॑ अ॒न्तः।
शु॒क्रं ते॑ अ॒न्यत्पू॒षेमा आशाः॑।
प्रप॑थे प॒थाम॑जनिष्ट पू॒षा॥ ३॥

((rā̱yaḥ syáma ra̱thyó vivásvataḥ ।
vī̱reṣú vīrām̐ upápṛṅgdhi na̱stvam ।
yadīśáno̱ brahmáṇā̱ veṣí me̱ havām̐ ।
sa ijjanéna̱ sa vi̱śā sa janmánā ।
sa pu̱trairvājam̱ bharate̱ dhanā̱ nṛbhíḥ ।
de̱vānām̱ yaḥ pi̱tarámā̱vivásati ।
śra̱ddhāmánā ha̱viṣā̱ brahmáṇa̱spatīm ।
yāsté pūṣa̱nnā vó a̱ntaḥ ।
śu̱kram̱ té a̱nyatpū̱ṣemā āśā̃ḥ ।
prapáthe pa̱thāmájaniṣṭa pū̱ṣā ॥ 3 ॥))

**[[2-8-5-4]]**

प्रप॑थे दि॒वः प्रप॑थे पृथि॒व्याः।

उ॒भे अ॒भि प्रि॒यत॑मे स॒धस्थे᳚।
आ च॒ परा॑ च चरति प्रजा॒नन्।
पूषा सु॒बन्धु॑र्दि॒व आपृ॑थि॒व्याः।
इ॒डस्पति॑र्म॒घवा॑ द॒स्मव॑र्चाः।
तं दे॒वासो॒ अद॑दुः सू॒र्यायै᳚।
कामे॑न कृ॒तं त॒वस॒ꣳ᳚ स्वञ्च᳚म्।
अ॒जाश्व॑ः पशु॒पा वाज॑वस्त्यः।
धि॒यं॒जि॒न्वो विश्वे॒ भुव॑ने॒ अर्पि॑तः।
अष्ट्रा᳚ं पू॒षा शि॑थि॒रामु॒द्वरी॑वृजत्॥ ४॥

((prapa̍the di̱vaḥ prapa̍the pṛ̱thi̱vyāḥ ।
u̱bhe a̱bhi pri̱yata̍me sa̱dhasthe̎ ।
ā ca̱ parā̍ ca carati prajā̱nan ।
pūṣā su̱bandhu̍rdi̱va āpṛ̍thi̱vyāḥ ।
i̱daspati̍rma̱ghavā̍ da̱smava̍rcāḥ ।
taṃ de̱vāso̱ ada̍duḥ sū̱ryāyai̎ ।
kāme̍na kṛ̱taṃ ta̱vasa̱m̐̎ svañca̎m ।
a̱jāśva̍ḥ paśu̱pā vāja̍vastyaḥ ।
dhi̱yaṃ̱ji̱nvo viśve̱ bhuva̍ne̱ arpi̍taḥ ।
aṣṭrā̎m̐ pū̱ṣā śi̍thi̱rāmu̱dvarī̍vṛjat ॥ 4 ॥))

**[[2-8-5-5]]**

सं॒च॒क्षाणो॒ भुव॑ना दे॒व ई॑यते।
शुची॑ वो ह॒व्या म॑रुतः शु॒ची॑नाम्।
शुचि॑ꣳ हिनोम्यध्व॒रꣳ शुचि॑भ्यः।
ऋ॒तेन॑ स॒त्यमृ॒तसाप॑ आयन्।
शुचि॑जन्मानः शुच॑यः पाव॒काः।
प्र चि॒त्रम॒र्कं गृ॑ण॒ते तु॒राय॑।
मारु॑ताय स्वत॑वसे भरध्वम्।
ये सहा॒ꣳसि॒ सह॑सा॒ सह॑न्ते।
रेज॑ते अग्ने पृथि॒वी म॒खेभ्यः॑।
अꣳसे॒ष्वा म॑रुतः खा॒दयो॑ वः॥ ५॥

((sa̱ṃcakṣā̍ṇo̱ bhuva̍nā de̱va ī̍yate ।
śucī̍ vo ha̱vyā ma̍rutaḥ śuci̍nām ।
śuci̍m̐ hinomyadhva̱ram̐ śuci̍bhyaḥ ।
ṛ̱tena sa̱tyamṛ̱tasāpa̍ āyan ।
śuci̍janmānaḥ śuca̍yaḥ pāva̱kāḥ ।
pra ci̱tramaṟkaṃ gṛ̍ṇa̱te tu̱rāya̍ ।
māru̍tāya̱ svata̍vase bharadhvam ।
ye sahā̍m̐si̱ saha̍sā̱ saha̍nte ।
reja̍te agne pṛthi̱vī ma̱khebhya̍ḥ ।
am̐se̱ṣvā ma̍rutaḥ khā̱dayo̍ vaḥ ॥ 5 ॥))

**[[2-8-5-6]]**

वक्ष॑स्सु रु॒क्मा उप॑शिश्रिया॒णाः।
वि वि॒द्युतो॒ न वृ॒ष्टिभी॑ रुचा॒नाः।
अनु॑ स्व॒धामायु॑धै॒र्यच्छ॑मानाः।
या वः॒ शर्म॑ शशमा॒नाय॒ सन्ति॑।
त्रि॒धातू॑नि दा॒शुषे॑ यच्छ॒ताधि॑।
अ॒स्मभ्यं॒ तानि॑ मरुतो॒ विय॑न्त।
र॒यिं नो॑ धत्त वृषणः सु॒वीर᳚म्।
इ॒मे तु॒रं म॒रुतो॑ रामयन्ति।
इ॒मे स॒हः सह॑स॒ आन॑मन्ति।
इ॒मे शꣳस॑ं वनुष्य॒तो निपा᳚न्ति॥ ६॥

((vakṣa̍ssu ru̱kmā upa̍śiśriyā̱ṇāḥ ।
vi vi̱dyuto̱ na vṛ̱ṣṭibhī̍ rucā̱nāḥ ।
anu̍ sva̱dhāmāyu̍dhai̱ryaccha̍mānāḥ ।
yā va̱ḥ śarma̍ śaśamā̱nāya̱ santi̍ ।
tri̱dhātū̍ni dā̱śuṣe̍ yaccha̱tādhi̍ ।
a̱smabhya̱ṃ tāni̍ maruto̱ viya̍nta ।
ra̱yiṃ no̍ dhatta vṛṣaṇaḥ su̱vīra̎m ।
i̱me tu̱raṃ ma̱ruto̍ rāmayanti ।
i̱me sa̱haḥ saha̍sa̱ āna̍manti ।
i̱me śam̐sa̍ṃ vanuṣya̱to nipā̎nti ॥ 6 ॥))

**[[2-8-5-7]]**

गु॒रु॒द्वेषो॒ अर॑रुषे दधन्ति।
अ॒रा इ॒वेदच॑रमा॒ अहे॑व।
प्र प्र॑जायन्ते॒ अक॑वा॒ महो॑भिः।
पृश्ञे᳚ः पु॒त्रा उप॑मासो॒ रभि॑ष्ठाः।
स्वया॑ म॒त्या म॒रुतः॒ संमि॑मिक्षुः।
अनु॑ ते दायि म॒ह इ॑न्द्रि॒याय॑।
स॒त्रा ते॒ विश्व॒मनु॑ वृत्र॒हत्ये᳚।
अनु॑ क्ष॒त्त्रमनु॒ सहो॑ यजत्र।
इन्द्र॑ दे॒वेभि॒रनु॑ ते नृ॒षह्ये᳚।
य इन्द्र॒ शुष्मो॑ मघवन्ते॒ अस्ति॑॥ ७॥

((gu̱rudveṣo̱ ara̍ruṣe dadhanti ।
a̱rā i̱vedaca̍ramā̱ ahe̍va ।
pra pra̍jāyante̱ aka̍vā̱ maho̍bhiḥ ।
pṛśñe̎ḥ pu̱trā upa̍māso̱ rabhi̍ṣṭhāḥ ।
svayā̍ ma̱tyā ma̱ruta̱ḥ sammi̍mikṣuḥ ।
anu̍ te dāyi ma̱ha i̍ndri̱yāya̍ ।
sa̱trā te̱ viśva̱manu̍ vṛtra̱hatye̎ ।
anu̍ kṣa̱ttramanu̱ saho̍ yajatra ।
indra̍ de̱vebhi̱ranu̍ te nṛ̱ṣahye̎ ।
ya indra̱ śuṣmo̍ maghavante̱ asti̍ ॥ 7 ॥))

**[[2-8-5-8]]**

शिक्षा॒ सखि॑भ्यः पुरुहू॒त नृभ्यः॑।
त्वꣳ हि दृ॒ढा म॑घव॒न्विचे॑ताः।
अपा॑वृधि॒ परि॑वृतिं॒ न राधः॑।
इन्द्रो॒ राजा॒ जग॑तश्चर्षणी॒नाम्।
अधि॒क्षमि॒ विषु॑रूपं॒ यदस्ति॑।
ततो॑ ददातु दा॒शुषे॒ वसू॑नि।
चोद॒द्राध॒ उप॑स्तुतश्चिद॒र्वाक्।
तमु॑ ष्टुहि॒ यो अ॒भिभू᳚त्योजाः।
व॒न्वन्नवा॑तः पुरुहू॒त इन्द्रः॑।
अषा॑ढमुग्रꣳ सह॑मानमा॒भिः।
गी॒र्भिर्व॑र्ध वृ॒षभं॒ च॑र्षणी॒नाम्।
स्थू॒रस्य॑ रा॒यो बृ॑ह॒तो य ईशे᳚।
तमु॑ ष्टवाम वि॒दथे॑ष्विन्द्र᳚म्।
यो वा॒युना॒ जय॑ति॒ गोम॑तीषु।
प्र धृ॑ष्णु॒या न॑यति॒ वस्यो॒ अच्छ॑।
आ ते॒ शुष्मो॑ वृ॒षभ॒ ए॑तु प॒श्चात्।
ओत्त॒राद॑ध॒रागा॒ पु॒रस्ता᳚त्।
आ वि॒श्वतो॑ अ॒भि समे᳚त्व॒र्वाङ्।
इन्द्र॑ द्यु॒म्नꣳ सुव॑र्वद्धेह्य॒स्मे॥ ८॥
व॒राहै᳚र्वि॒श्वहा॑ऽजनिष्ट पूषोद्वरी॑वृजत्खा॒दयो॑ वः
पा॒न्त्यस्त्या॒भिर्नव॑ च॥ ५॥

((śikṣā̱ sakhi̍bhyaḥ puruhūta̱ nṛbhya̍ḥ ।
tvam̐ hi dṛ̱ḍhā ma̍ghava̱nvice̍tāḥ ।
apā̍vṛdhi̱ pari̍vṛti̱m na rādha̍ḥ ।
indro̱ rājā̱ jaga̍taścarṣaṇī̱nām ।
adhi̱kṣami̱ viṣu̍rūpa̱m yadasti̍ ।
tato̍ dadātu dā̱śuṣe̱ vasū̍ni ।
coda̱drādha̱ upa̍stutaścida̱rvāk ।
tamu̍ ṣṭuhi̱ yo a̱bhibhū̎tyojāḥ ।
va̱nvannavā̍taḥ puruhūta̱ indra̍ḥ ।
aṣā̍ḍhamugram̐ saha̍mānamā̱bhiḥ ।
gīrbhirva̍rdha vṛ̱ṣabha̱m ca̍rṣaṇī̱nām ।
sthū̱rasya̍ rā̱yo bṛ̍ha̱to ya īśe̎ ।
tamu̍ ṣṭavāma vi̱dathe̍ṣvindra̎m ।
yo vā̱yunā̱ jaya̍ti̱ goma̍tīṣu ।
pra dhṛ̍ṣṇu̱yā na̍yati̱ vasyo̱ accha̍ ।
ā te̱ śuṣmo̍ vṛ̱ṣabha e̍tu pa̱ścāt ।
otta̱rāda̍dha̱rāgā̱ pu̱rastā̎t ।
ā vi̱śvato̍ a̱bhi same̎tva̱rvāṅ ।
indra̍ dyu̱mnam̐ suva̍rvaddhehya̱sme ॥ 8 ॥
va̱rāhai̎rvi̱śvahā̍'janiṣṭa pūṣodvarī̍vṛjatkhā̱dayo̍ vaḥ
pā̱ntyastyā̱bhirnava̍ ca ॥ 5 ॥))

**[[2-8-6-1]]**

आ दे॒वो या॑तु सवि॒ता सु॒रत्नः॑।
अ॒न्त॒रि॒क्ष॒प्रा वह॑मानो॒ अश्वैः᳚।
हस्ते॒ दधा॑नो॒ नर्या॑ पु॒रूणि॑।
नि॒वे॒शय॑न् च प्रसु॒वन् च॒ भूम॑।
अ॒भीवृ॑तं॒ कृश॑नैर्वि॒श्वरू॑पम्।
हिर॑ण्यशम्यं यज॒तो बृ॒हन्त᳚म्।
आस्था॒द्रथꣳ॑ सवि॒ता चि॒त्रभा॑नुः।
कृ॒ष्णा रजाꣳ॑सि॒ तवि॑षीं॒ दधा॑नः।
सघा॑ नो दे॒वः स॑वि॒ता स॒वाय॑।
आसा॑विष॒द्वसु॑पति॒र्वसू॑नि॥ १॥

((ā de̱vo yā̍tu savi̱tā su̱ratna̍ḥ ।
a̱nta̱ri̱kṣa̱prā vaha̍māno̱ aśvai̎ḥ ।
haste̱ dadhā̍no̱ naryā̍ pu̱rūṇi̍ ।
ni̱ve̱śaya̍n ca prasu̱van ca̱ bhūma̍ ।
a̱bhīvṛ̍ta̱m kṛśa̍nairvi̱śvarū̍pam ।
hira̍ṇyaśamyam yaja̱to bṛ̱hanta̎m ।
āsthā̱dratham̐̍ savi̱tā ci̱trabhā̍nuḥ ।
kṛ̱ṣṇā rajām̐̍si̱ tavi̍ṣī̱m dadhā̍naḥ ।
saghā̍ no de̱vaḥ sa̍vi̱tā sa̱vāya̍ ।
āsā̍viṣa̱dvasu̍pati̱rvasū̍ni ॥ 1 ॥))

**[[2-8-6-2]]**

वि॒श्रय॑माणो॒ अम॑तिमु॒रूचीम्।
म॒र्त॒भोज॑न॒मध॑ रासते न।
वि जना᳚ञ्छ्या॒वाः शि॑ति॒पादो॑ अख्यन्।
रथꣳ॒ हिर॑ण्यप्र उ॒गं वह॑न्तः।
शश्व॒द्दिशः॑ सवि॒तुर्दैव्य॑स्य।
उ॒पस्थे॒ विश्वा॒ भुव॑नानि तस्थुः।
वि सु॑प॒र्णो अ॒न्तरि॑क्षाण्यख्यत्।
ग॒भी॒रवे॑पा॒ असु॑रः सुनी॒थः।
क्वे॑दानीꣳ॒ सूर्यः॑ कश्चि॑केत।
क॒त॒मां द्याꣳ र॒श्मिर॒स्याता॑तान॥ २॥

((vi̱śraya̍māṇo̱ ama̍timu̱rūcīm ।
ma̱rta̱bhoja̍na̱madha̍ rāsate na ।
vi janā̎ñchyā̱vāḥ śi̍ti̱pādo̍ akhyan ।
ratham̱̐ hira̍ṇyapra u̱gam̱ vaha̍ntaḥ ।
śaśva̱ddiśa̍ḥ savi̱turdaivya̍sya ।
u̱pasthe̱ viśvā̱ bhuva̍nāni tasthuḥ ।
vi su̍pa̱rṇo a̱ntari̍kṣāṇyakhyat ।
ga̱bhī̱rave̍pā̱ asu̍raḥ sunī̱thaḥ ।
kve̍dānīm̱̐ sūrya̍ḥ kaści̍keta ।
ka̱ta̱mām̱ dyām̐ ra̱śmira̱syātā̍tāna ॥ 2 ॥))

**[[2-8-6-3]]**

भ॒गं धि॒यं॑ वा॒जय॑न्तः॒ पुर॑न्धिम्।
न॒रा॒शꣳसो॒ ग्नास्पति॑र्नो अव्यात्।
आऽये वा॒मस्य॑ संग॒थे र॑यी॒णाम्।
प्रि॒या दे॒वस्य॑ सवि॒तुः स्या॑म।
आ नो॒ विश्वे॒ अस्क्रा॑ गमन्तु दे॒वाः।
मि॒त्रो अ॑र्य॒मा वरु॑णः स॒जोषाः॑।
भुव॒न्यथा॑ नो॒ विश्वे॑ वृ॒धासः॑।
करा॑न्त्सु॒षहा॑ वि॒थुरं॑ न शवः॑।
शं नो॑ दे॒वा वि॒श्वदे॑वा भवन्तु।
शꣳ सर॑स्वती स॒ह धी॒भिर॑स्तु॥ ३॥

((bh̠agaṃ dhiyaṃ vā̠jayaṃ̍ta̠ḥ puraṃ̍dhim ।
narā̠śaṃ̐so̠ gnāspati̍rno avyāt ।
ā'ye vā̠masya̍ saṃga̠the ra̍yī̠ṇām ।
pri̠yā de̠vasya̍ savi̠tuḥ syā̍ma ।
ā no̠ viśve̠ askrā̍ gamantu de̠vāḥ ।
mi̠tro a̍rya̠mā varu̍ṇaḥ sa̠joṣā̍ḥ ।
bhuva̠nyathā̍ no̠ viśve̍ vṛ̠dhāsa̍ḥ ।
karā̍ntsu̠ṣahā̍ vithu̠raṃ na śava̍ḥ ।
śaṃ no̍ de̠vā vi̠śvade̍vā bhavantu ।
śaṃ̐ sara̍svatī sa̠ha dhī̠bhira̍stu ॥ 3 ॥))

**[[2-8-6-4]]**

शम॑भि॒षाचः॒ शमु॑ राति॒षाचः॑।
शं नो॑ दि॒व्याः पार्थि॑वाः॒ शं नो॒ अप्याः॑।
ये स॑वि॒तुः स॒त्यस॑वस्य॒ विश्वे॑।
मि॒त्रस्य॑ व्र॒ते वरु॑णस्य दे॒वाः।
ते सौभ॑गं वी॒रव॒द्गोम॒दप्नः॑।
द॒धा॑तन॒ द्रवि॑णं चि॒त्रम॒स्मे।
अग्ने॑ या॒हि दू॒त्यं॑ वारि॑षे॒ण्यः।
दे॒वाꣳ अच्छा॑ ब्रह्म॒कृता॑ ग॒णेन॑।
सर॑स्वतीं म॒रुतो॑ अ॒श्विना॒ऽपः।
यक्षि॒ दे॒वान्र॑त्न॒धेया॑य॒ विश्वा॑न्॥ ४॥

((śama̍bhi̠ṣāca̠ḥ śamu̍ rāti̠ṣāca̍ḥ ।
śaṃ no̍ di̠vyāḥ pārthi̍vā̠ḥ śaṃ no̠ apyā̍ḥ ।
ye sa̍vi̠tuḥ sa̠tyasa̍vasya̠ viśve̍ ।
mi̠trasya̍ vra̠te varu̍ṇasya de̠vāḥ ।
te saubha̍gaṃ vī̠rava̠dgoma̠dapna̍ḥ ।
dadhā̍tana̠ dravi̠ṇaṃ ci̠trama̠sme ।
agne̍ yā̠hi dū̠tyaṃ̍ vāri̍ṣe̠ṇyaḥ ।
de̠vāṃ̐ acchā̍ brahma̠kṛtā̍ ga̠ṇena̍ ।
sara̍svatīṃ ma̠ruto̍ a̠śvinā̠'paḥ ।
ya̠kṣi̠ de̠vānra̍tna̠dheyā̍ya̠ viśvā̍n ॥ 4 ॥))

**[[2-8-6-5]]**

द्यौः॑ पि॑तः॒ पृथि॑वि॒ मात॒रध्रु॑क्।
अग्ने॑ भ्रातर्व॑सवो मृ॒डता॑ नः।
विश्व॑ आदित्या आदिते स॒जोषाः॑।
अ॒स्मभ्य॒ꣳ शर्म॑ बहु॒लं वि॑यन्त।
विश्वे॑ दे॒वाः शृ॒णु॒तेमꣳ हवं॑ मे।
ये अ॒न्तरि॑क्षे॒ य उप॒ द्यवि॒ ष्ठ।
ये अ॑ग्निजि॒ह्वा उ॒त वा॒ यज॑त्राः।
आ॒सद्या॒स्मिन्ब॒र्हिषि॑ मादयध्वम्।
आ वां॑ मित्रावरुणा ह॒व्यजु॑ष्टिम्।
नम॑सा देवा॒वव॑साऽऽववृत्याम्॥ ५॥

((dyauḥ pi̍taḥ pṛthi̍vi̠ māta̠radhru̍k ।
agne̍ bhrātarvasavo mṛ̠ḍatā̍ naḥ ।
viśva̍ ādityā ādite sa̠joṣā̍ḥ ।
a̠smabhya̠ṃ̐ śarma̍ bahu̠laṃ viya̍nta ।
viśve̍ devāḥ śṛ̠ṇu̠temaṃ̐ hava̍ṃ me ।
ye a̠ntari̍kṣe̠ ya upa̠ dyavi̠ ṣṭha ।
ye a̍gniji̠hvā u̠ta vā̠ yaja̍trāḥ ।
ā̠sadyā̠sminba̠rhiṣi̍ mādayadhvam ।
ā vāṃ̍ mitrāvaruṇā ha̠vyaju̍ṣṭim ।
nama̍sā devā̠vava̍sā''vavṛtyām ॥ 5 ॥))

**[[2-8-6-6]]**

अ॒स्माकं॑ ब्रह्म॒ पृत॑नासु सह्या अ॒स्माकं॑म्।
वृ॒ष्टिर्दि॒व्या सु॑पा॒रा।
यु॒वं व॒स्त्रा॑णि पीव॒सा व॑साथे।
यु॒वोर॒च्छिद्रा॒ मन्त॑वो ह॒ सर्गाः॑।
अवा॑तिरत॒मनृ॑तानि॒ विश्वा॑।
ऋ॒तेन॑ मित्रावरुणा सचेथे।
तत्सु वां॑ मित्रावरुणा महि॒त्वम्।
ईर्मा॑ त॒स्थुषी॒रह॑भिर्दुदुह्रे।
विश्वाः॑ पिन्वथ॒ स्वस॑रस्य॒ धेनाः॑।
अनु॑ वा॒मेकः॑ प॒विरा॑ववर्ति॥ ६॥

((a̠smākam̠ brahma̠ pṛtanā̍su sahyā a̠smākā̍m ।
vṛ̠ṣṭirdi̠vyā su̍pā̠rā ।
yu̠vaṃ̠ vastrā̍ṇi pīva̠sā va̍sāthe ।
yu̠voracchi̍drā̠ manta̍vo ha̠ sargā̍ḥ ।
avā̍tirata̠manṛ̍tāni̠ viśvā̍ ।
ṛ̠tena̍ mitrāvaruṇā sacethe ।
tatsu vāṃ̍ mitrāvaruṇā mahi̠tvam ।
īrmā ta̠sthuṣī̠raha̍bhirduduhre ।

viśvā̐ḥ pinvatha̱ svasa̍rasya̱ dhenā̐ḥ ।
anu̍ vā̱mekaḥ̍ pa̱virāvā̍varti ॥ 6 ॥))

**[[2-8-6-7]]**

यद्ब॑ꣳहि॑ष्ठं॒ नाति॒विधे॑ सुदानू।
अच्छि॑द्र॒ꣳ॒ शर्म॑ भुव॑नस्य गोपा।
ततो॑ नो मित्रावरुणाववीष्टम्।
सिषा॑सन्तो जीगि॒वाꣳस॑ः स्याम।
आ नो॑ मित्रावरुणा ह॒व्यदा॑तिम्।
घृ॒तैर्गव्यू॑तिमुक्षत॒मिडा॑भिः।
प्रति॑वामत्र॒ वर॒मा जना॑य।
पृ॒णी॒तमु॒द्नो दि॒व्यस्य॒ं चारोः॑।
प्र बा॒हवा॑ सिसृतं जी॒वसे॑ नः।
आ नो॒ गव्यू॑तिमुक्षतं घृ॒तेन॑॥ ७॥

((yadbam̐hi̍ṣṭha̱ṃ nāti̱vide̍ sudānū ।
acchi̍dra̱m̐ śarma̱ bhuva̍nasya gopā ।
tato̍ no mitrāvaruṇāvavīṣṭam ।
siṣā̍santo jīgi̱vām̐sa̍ḥ syāma ।
ā no̍ mitrāvaruṇā ha̱vyadā̍tim ।
ghṛ̱tairgavyū̍timukṣata̱miḍā̍bhiḥ ।
prati̍vāmatra̱ vara̱mā janā̍ya ।
pṛ̱ṇī̱tamu̱dgo di̱vyasya̱ṃ cāro̍ḥ ।
pra bā̱havā̍ sisṛtaṃ jī̱vase̍ naḥ ।
ā no̱ gavyū̍timukṣataṃ ghṛ̱tena̍ ॥ 7 ॥))

**[[2-8-6-8]]**

आ नो॒ जने॑ श्रवयतं युवाना।
श्रु॒तं मे॑ मित्रावरुणा॒ ह॒वेमा।
इ॒मा रु॒द्राय॑ स्थि॒रध॑न्वने॒ गिरः॑।
क्षि॒प्रेष॑वे दे॒वाय॑ स्व॒धाम्ने॑।
अषा॑ढाय॒ सह॑मानाय मी॒ढुषे॑।
ति॒ग्मायु॑धाय भरता शृ॒णोत॑न।
त्वा द॑त्तेभी रुद्र॒ शंत॑मेभिः।
श॒तꣳ हिमा॑ अशीय भेष॒जेभि॑ः।
व्य॑स्मद्द्वेषो॑ वि॒तरं व्यꣳहः॑।
व्यमी॑वाꣳश्चातयस्वा॒ विषू॑चीः॥ ८॥

((ā no̱ jane̍ śravayataṃ yuvānā ।
śru̱taṃ me̍ mitrāvaruṇā̱ have̱mā ।
i̱mā ru̱drāya̍ sthi̱radha̍nvane̱ gira̍ḥ ।
kṣi̱preṣa̍ve de̱vāya̍ sva̱dhāmne̍ ।
aṣā̍ḍhāya̱ saha̍mānāya mī̱ḍhuṣe̍ ।
ti̱gmāyu̍dhāya bharatā śṛ̱ṇota̍na ।
tvā da̍ttebhī rudra̱ śaṃta̍mebhiḥ ।
śa̱tam̐ himā̍ aśīya bheṣa̱jebhi̍ḥ ।
vya̍smaddveṣo̍ vita̱raṃ vyam̐ha̍ḥ ।
vyamī̍vām̐ścātayasvā̱ viṣū̍cīḥ ॥ 8 ॥))

**[[2-8-6-9]]**

अर्ह॑न्बिभर्षि॒ मा न॑स्तो॒के।
आ ते॑ पितर्म॒रुताꣳ सु॒म्नमे॑तु।
मा न॒ः सूर्य॑स्य सं॒दृशो॑ युयोथाः।
अ॒भि नो॑ वी॒रो अर्व॑ति क्षमेत।
प्रजा॑येमहि रुद्र प्र॒जाभि॑ः।
ए॒वा ब॑भ्रो वृषभ चेकितान।
यथा॑ दे॒व न हृ॑णी॒षे न हꣳसि॑।
हा॒वन॒श्रूर्नो॑ रु॒द्रेह बो॑धि।
बृ॒हद्व॑देम वि॒दथे॑ सु॒वीराः॑।
परि॑ णो रु॒द्रस्य॑ हे॒तिः स्तु॒हि श्रु॒तम्।
मी॒ढुष्ट॒मार्ह॑न्बिभर्षि।
त्वम॑ग्ने रु॒द्र आ वो॒ राजा॑नम्॥ ९॥
वसू॑नि ततानास्तु॒ विश्वा॑न्ववृत्यां ववर्ति॒ घृ॒तेन॒ विषू॑चीश्श्रुतं
द्वे च॑॥ ६॥

((arha̍nbibharṣi̱ mā na̍stoke ।
ā te̍ pitarmarutām̐ su̱mname̍tu ।
mā na̱ḥ sūrya̍sya sa̱ṃdṛśo̍ yuyothāḥ ।
a̱bhi no̍ vī̱ro arva̍ti kṣameta ।
prajā̍yemahi rudra pra̱jābhi̍ḥ ।
e̱vā ba̍bhro vṛṣabha cekitāna ।
yathā̍ de̱va na hṛ̍ṇī̱ṣe na ham̐si̍ ।
hā̱va̱na̱śrūrno̍ rudre̱ha bo̍dhi ।
bṛ̱hadva̍dema vi̱dathe̍ su̱vīrā̐ḥ ।
pari̍ ṇo ru̱drasya̍ he̱tiḥ stu̱hi śru̱tam ।
mī̱ḍhu̍ṣṭa̱mārha̍nbibharṣi ।
tvama̍gne ru̱dra ā vo̱ rājā̍nam ॥ 9 ॥
vasū̍ni tatānāstu̱ viśvā̍nvavṛtyāṃ vavarti ghṛ̱tena̱
viṣū̍cīśśru̱taṃ dve ca̍ ॥ 6 ॥))

**[[2-8-7-1]]**

सूर्यो॑ दे॒वीमु॒षस॒ꣳ रोच॑माना॒ मर्यः॑।
न योषा॑म॒भ्ये॑ति प॒श्चात्।
यत्रा॒ नरो॑ दे॒वयन्तो॑ यु॒गानि॑।
वि॒तन्व॒ते प्रति॑ भ॒द्राय॑ भ॒द्रम्।
भ॒द्रा अश्वा॑ ह॒रितः॒ सूर्य॑स्य।
चि॒त्रा एद॑ग्वा अनु॒माद्या॑सः।
न॒म॒स्यन्तो॑ दि॒व आ पृ॒ष्ठम॑स्थुः।
परि॒ द्यावा॑पृथिवी यन्ति स॒द्यः।

तत्सूर्य॑स्य दे॒व॒त्वं तन्म॑हि॒त्वम्।
म॒ध्या कर्तो॒र्वित॑त॒ꣳ॒ सं॒ज॑भार॥ १॥

((sūryo̍ de̱vīmu̱ṣasa̱m̐ roca̍mānā̱ marya̍ḥ |
na yo̱ṣā̍ma̱bhye̍ti pa̱ścāt |
yatrā̱ naro̍ deva̱yanto̍ yu̱gāni̍ |
vi̱ta̱nvate̱ prati̍ bha̱drāya̍ bha̱dram |
bha̱drā aśvā̍ hari̱ta̱ḥ sūryā̍sya |
ci̱trā edā̍gvā anu̱mādyā̍saḥ |
na̱ma̱syanto̍ di̱va ā pṛ̱ṣṭhamā̍sthuḥ |
pari̱ dyāvā̍pṛ̱thi̱vī ya̍nti sa̱dyaḥ |
tatsūryā̍sya deva̱tvaṃ tanma̍hi̱tvam |
ma̱dhyā karto̱rvita̍ta̱m̐ saṃja̍bhāra || 1 ||))

**[[2-8-7-2]]**

य॒देदयु॑क्त ह॒रित॑ः स॒धस्था॓त्।
आद्रात्री॒ वास॑स्तनुते सि॒मस्मै॓।
तन्मि॒त्रस्य॒ वरु॑णस्याभि॒चक्षे॓।
सूर्यो॑ रू॒पं कृ॑णुते॒ द्योरु॒पस्थे॓।
अ॒न॒न्तम॒न्यद्रु॒शद॑स्य॒ पाज॑ः।
कृ॒ष्णम॒न्यद्ध॒रित॑ः संभ॑रन्ति।
अ॒द्या दे॑वा॒ उदि॑ता॒ सूर्य॑स्य।
निरꣳह॑सः पिपृ॒तान्निर॑व॒द्यात्।
तन्नो॑ मि॒त्रो वरु॑णो मामहन्ताम्।
अदि॑तिः॒ सिन्धु॑ः पृथि॒वी उ॒त द्यौः॥ २॥

((ya̱dedayu̍kta ha̱rita̍ḥ sa̱dhasthā̎t |
ādrātrī̱ vāsa̍stanute si̱masmai̎ |
tanmi̱trasya̱ varu̍ṇasyābhi̱cakṣe̎ |
sūryo̍ rū̱paṃ kṛ̍ṇute̱ dyoru̱pasthe̎ |
a̱na̱ntama̱nyadruśa̍dasya̱ pāja̍ḥ |
kṛ̱ṣṇama̱nyaddha̱rita̱ḥ saṃbha̍ranti |
a̱dyā de̍vā̱ udi̍tā̱ sūryā̍sya |
nira̍m̐hasaḥ pipṛ̱tānnira̍va̱dyāt |
tanno̍ mi̱tro varu̍ṇo māmahantām |
aditi̱ḥ sindhu̍ḥ pṛthi̱vī u̱ta dyauḥ || 2 ||))

**[[2-8-7-3]]**

दि॒वो रु॒क्म उ॑रु॒चक्षा॒ उदे॑ति।
दू॒रेअ॑र्थस्त॒रणि॒र्भ्राज॑मानः।
नू॒नं जना॒ः सूर्ये॑ण॒ प्रसू॑ताः।
आयन्नर्था॑नि कृ॒णव॒न्नपा॒ꣳसि।
शं नो॑ भव॒ चक्ष॑सा॒ शं नो॒ अह्ना॓।
शं भा॒नुना॒ शꣳ॒ हि॒माशं॒ घृणेन॑।
यथा॒ शम॒स्मै शमस॑द्दुरो॒णे।
तत्सू॑र्य॒ द्रवि॑णं धे॒हि चि॒त्रम्।
चि॒त्रं दे॒वाना॒मुद॑गा॒दनी॑कम्।
चक्षु॑र्मि॒त्रस्य॒ वरु॑णस्या॒ग्नेः॥ ३॥

((di̱vo ru̱kma u̍ru̱cakṣā̱ ude̍ti |
dū̱rea̍rthasta̱raṇi̱rbhrāja̍mānaḥ |
nū̱naṃ janā̱ḥ sūrye̍ṇa̱ prasū̍tāḥ |
āyannarthā̍ni kṛ̱ṇava̱nnapām̐̍si |
śaṃ no̍ bhava̱ cakṣa̍sā̱ śaṃ no̱ ahnā̎ |
śaṃ bhā̱nunā̱ śam̱̐ hi̱māśaṃ ghṛ̱ṇena̍ |
yathā̱ śama̱smai śamasa̍dduro̱ṇe |
tatsū̍rya draviṇaṃ dhe̱hi ci̱tram |
ci̱traṃ de̱vānā̱muda̍gā̱danī̍kam |
cakṣu̍rmi̱trasya̱ varu̍ṇasyā̱gneḥ || 3 ||))

**[[2-8-7-4]]**

आप्रा॒ द्यावा॑पृथि॒वी अ॒न्तरि॑क्षम्।
सूर्य॑ आ॒त्मा जग॑तस्त॒स्थुष॑श्च।
त्वष्टा॒ द॒धत्तन्न॑स्तु॒रीप॑म्।
त्वष्टा॑ वी॒रं पि॒शङ्ग॑रूपः।
द॒शेमं त्वष्टु॑र्जनयन्त॒ गर्भ॓म्।
अत॑न्द्रासो युव॒तयो॒ बिभ॑र्त्रम्।
ति॒ग्मानी॑क॒ꣳ॒ स्वय॑शस॒ंजने॑षु।
वि॒रोच॑मानं॒ परि॑षीं॒ नयन्ति।
आवि॑ष्ट्यो॒ वर्धते॒ चारु॑रासु।
जि॒ह्माना॑मू॒र्ध्वः स्वय॑शा उ॒पस्थे॓॥ ४॥

((āprā̱ dyāvā̍pṛthi̱vī a̱ntari̍kṣam |
sūrya̍ ā̱tmā jaga̍tasta̱sthuṣa̍śca |
tvaṣṭā̱ dadhattanna̍stu̱rīpa̍m |
tvaṣṭā̍ vī̱raṃ pi̱śaṅga̍rūpaḥ |
daśe̱maṃ tvaṣṭu̍rjanayanta̱ garbhā̎m |
ata̍ndrāso yuva̱tayo̱ bibha̍rtram |
tigmānī̍kam̱̐̍ svaya̍śasa̱ṃjane̍ṣu |
vi̱roca̍mānaṃ̱ pari̍ṣī̱ṃ nayanti |
āvi̍ṣṭyo̍ vardhate̱ cāru̍rāsu |
ji̱hmānā̍mū̱rdhvaḥ svaya̍śā u̱pasthe̎ || 4 ||))

**[[2-8-7-5]]**

उ॒भे त्वष्टु॑र्बिभ्यतु॒र्जाय॑मानात्।
प्र॒तीची॑ सि॒ꣳहं प्रति॑जोषयेते।
मि॒त्रो जना॒न् प्रस॑मि॒त्र।
अ॒यं मि॒त्रो न॑म॒स्य॑ः सु॒शेव॑ः।
राजा॑ सुक्ष॒त्रो अ॑जनिष्ट वे॒धाः।
तस्य॑ व॒यꣳ सु॑म॒तौ य॒ज्ञिय॑स्य।

अपि॑ भ॒द्रे सौ॑मन॒से स्या॑म।

अ॒न॒मी॒वास॒ं इड॑या॒ मद॑न्तः।

मि॒तज्म॑वो॒ वरि॑म॒न्ना पृ॑थि॒व्याः।

आ॒दि॒त्यस्य॑ व्र॒तमु॑प॒क्ष्यन्त॑ः॥ ५॥

((u̱bhe tvaṣṭu̍rbibhyatu̱rjāya̍mānāt |
pra̱tīci̍ si̱m̐̍haṃ prati̍joṣayete |
mi̱tro janā̱n prasami̍tra |
a̱yaṃ mi̱tro na̍ma̱sya̍ḥ su̱śeva̍ḥ |
rājā̍ sukṣa̱tro a̍janiṣṭa ve̱dhāḥ |
tasya̍ va̱yam̐̍ su̍ma̱tau ya̱jñiya̍sya |
api̍ bha̱dre sau̍mana̱se syā̍ma |
a̱na̱mīvāsa̱ṃ iḍa̍yā̱ mada̍ntaḥ |
mi̱tajma̍vo̱ vari̍ma̱nnā pṛ̍thi̱vyāḥ |
ā̱di̱tyasya̍ vra̱tamu̍pa̱kṣyanta̍ḥ || 5 ||))

**[[2-8-7-6]]**

व॒यं मि॒त्रस्य॑ सुम॒तौ स्या॑म।

मि॒त्रं न ईꣳ॑ शिम्या॒ गोषु॑ ग॒व्यव॑त्।

स्वा॒धियो॑ वि॒दथे॑ अ॒प्स्वजी॑जनन्।

अरे॑जयताꣳ॒ रोद॑सी॒ पाज॑सा गि॒रा।

प्रति॑ प्रि॒यं यज॑तं ज॒नुषा॒मव॑ः।

म॒हाꣳ आ॑दि॒त्यो नम॑सोप॒सद्य॑ः।

या॒त॒यज्ज॑नो गृ॒ण॒ते सु॒शेव॑ः।

तस्मा॑ ए॒तत्पन्य॑तमाय॒ जुष्ट॑म्।

अ॒ग्नौ मि॒त्राय॑ ह॒विराजु॑होत।

आ वा॒ꣳ॒ रथो॒ रोद॑सी बद्बधा॒नः॥ ६॥

((va̱yaṃ mi̱trasya̍ suma̱tau syā̍ma |
mi̱traṃ na īm̐ śimyā̱ goṣu̍ ga̱vyava̍t |
svā̱dhiyo̍ vi̱dathe̍ a̱psvajī̍janan|
are̍jayatā̱m̐ roda̍sī̱ pāja̍sā gi̱rā |
prati̍ pri̱yaṃ yaja̍taṃ ja̱nuṣā̱mava̍ḥ |
ma̱hām̐ ā̍di̱tyo nama̍sopa̱sadya̍ḥ |
yā̱ta̱yajja̍no gṛ̱ṇa̱te su̱śeva̍ḥ |
tasmā̍ e̱tatpanya̍tamāya̱ juṣṭa̍m |
a̱gnau mi̱trāya̍ ha̱virāju̍hota |
ā vā̱m̐ ratho̱ roda̍sī badbadhā̱naḥ || 6 ||))

**[[2-8-7-7]]**

हि॒र॒ण्ययो॒ वृष॑भिर्या॒त्वश्वै॑ः।

घृ॒तव॑र्तनिः प॒विभी॑ रुचा॒नः।

इ॒षां वो॒ढा नृ॒पति॑र्वा॒जिनी॑वान्।

स प॑प्रथा॒नो अ॒भि पञ्च॒भूम॑।

त्रि॒व॒न्धु॒रो मन॒साऽऽया॑तु यु॒क्तः।

वि॒शो॒ येन॒ गच्छ॑थो दे॒व॒यन्ती॑ः।

कु॒त्रा॑चि॒द्याम॑मश्विना॒ दधा॑ना।

स्वश्वा॑ य॒शसाऽऽया॑तम॒र्वाक्।

द॒स्रा॑ नि॒धिं मधु॑मन्तं पिबाथः।

वि वा॒ꣳ॑ रथो॑ व॒ध्वा॑ याद॑मानः॥ ७॥

((hi̱ra̱ṇyayo̱ vṛṣa̍bhiryā̱tvaśvai̍ḥ |
ghṛ̱tava̍rtaniḥ pa̱vibhi̍ rucā̱naḥ |
i̱ṣāṃ vo̱ḍhā nṛ̱pati̍rvājini̍vān |
sa pa̍prathā̱no a̱bhi pañca̱bhūmā̍ |
tri̱va̱ndhu̱ro mana̱sā''yā̍tu yu̱ktaḥ |
vi̱śo̱ yena̱ gaccha̍tho deva̱yantī̍ḥ |
kutrā̍ci̱dyāma̍maśvinā̱ dadhā̍nā |
svaśvā̍ ya̱śasā''yā̍tama̱rvāk |
dasrā̍ ni̱dhiṃ madhu̍mantaṃ pibāthaḥ |
vi vā̱m̐̍ ratho̍ va̱dhvā̍ yāda̍mānaḥ || 7 ||))

**[[2-8-7-8]]**

अन्ता॑न्दि॒वो बाध॑ते वर्त॒निभ्या॑म्।

यु॒वोः श्रि॒यं परि॒ योषा॑ वृणीत।

सूरो॑ दुहि॒ता परि॑तक्मि॒यायाम्।

यद्दे॑वय॒न्तमव॑थः शची॑भिः।

परि॒घ्रꣳ॒स वां॒ मना॑ वां॒ वयो॑ गाम्।

यो ह॒ स्य वा॑ꣳ र॒थिरा॒ वस्त॑ उ॒स्राः।

रथो॑ युजा॒नः परि॒याति॑ व॒र्तिः।

तेन॑ न॒ः शं योरु॒षसो॒ व्युष्टौ।

न्य॑श्विना वहतं य॒ज्ञे अ॒स्मिन्।

यु॒वं भु॒ज्युमव॑विद्धꣳ समु॒द्रे॥ ८॥

((antā̍ndi̱vo bā̍dhate varta̱nibhyā̍m |
yu̱voḥ śriya̱ṃ pari̱ yoṣā̍ vṛ̱ṇīta |
sūro̍ duhi̱tā pari̍takmiyāyām |
yadde̍vaya̱nta̱mava̍thaḥ śaci̍bhiḥ |
parighra̱m̐̍sa vā̱ṃ manā̍ vā̱ṃ vayo̍ gām |
yo ha̱ sya vām̐̍ rathi̱rā vasta̍ u̱srāḥ |
ratho̍ yujā̱naḥ pa̍ri̱yāti̍ va̱rtiḥ |
tena̍ na̱ḥ śaṃ yoru̱ṣaso̱ vyu̍ṣṭau |
nya̍śvinā vahataṃ ya̱jñe a̱smin |
yu̱vaṃ bhujyumava̍viddham̐ samu̱dre || 8 ||))

**[[2-8-7-9]]**

उ॒दू॒हथु॒रर्ण॑सो अ॒स्त्रिधा॑नैः।

प॒त॒त्रिभि॑रश्र॒मैर॑व्य॒थिभि॑ः।

द॒ꣳ॒सना॑भिरश्विना पा॒रय॑न्ता।

अ॒ग्नीषो॑मा॒ यो अ॒द्य वा॑म्।

इदं वचः सपर्यति।
तस्मै धत्तꣳ सुवीर्यम्।
गवां पोषꣳ स्वश्वियम्।
यो अग्नीषोमा हविषा सपर्यात्।
देवद्रीचा मनसा यो घृतेन।
तस्य व्रतꣳ रक्षतं पातमꣳहसः॥ ९॥

((udūhathurarṇaso asridhānaiḥ |
patatribhiraśramairavyathibhiḥ |
daṁsanābhiraśvinā pārayantā |
agniṣomā yo adya vām |
idaṃ vacaḥ saparyati |
tasmai dhattaṁ suvīryam |
gavāṃ poṣaṁ svaśviyam |
yo agnīṣomā haviṣā saparyāt |
devadrīcā manasā yo ghṛtena |
tasya vrataṁ rakṣataṃ pātamaṁhasaḥ || 9 ||))

**[[2-8-7-10]]**

विशे जनाय महि शर्म यच्छतम्।
अग्नीषोमा य आहुतिम्।
यो वां दाशाद्धविष्कृतिम्।
स प्रजया सुवीर्यम्।
विश्वमायुर्व्यश्नवत्।
अग्नीषोमा चेति तद्वीर्यं वाम्।
यदमुष्णीतमवसं पणिं गोः।
अवातिरतं प्रथयस्य शेषः।
अविन्दतं ज्योतिरेकं बहुभ्यः।
अग्नीषोमाविमꣳ सुमेऽग्नीषोमा हविषः प्रस्थितस्य॥
१०॥
जभार द्यौरग्नेरुपस्थं उपक्ष्यन्तो बद्बधानो यादमानः
समुद्रेऽꣳहसः प्रस्थितस्य॥ ७॥

((viśe janāya mahi śarma yacchatam |
agniṣomā ya āhutim |
yo vāṃ dāśāddhaviṣkṛtim |
sa prajayā suvīryam |
viśvamāyurvyaśnavat |
agniṣomā ceti tadvīryaṃ vām |
yadamuṣṇītamavasaṃ paṇiṃ goḥ |
avātiratam prathayasya śeṣaḥ |
avindatam jyotirekaṃ bahubhyaḥ |
agniṣomāvimaṁ sume'gniṣomā haviṣaḥ
prasthitasya || 10 ||
jabhāra dyauragnerupastha upakṣyanto
badbadhāno yādamānaḥ samudre'ṁhasaḥ
prasthitasya || 7 ||))

**[[2-8-8-1]]**

अहमस्मि प्रथमजा ऋतस्य।
पूर्वं देवेभ्यो अमृतस्य नाभिः।
यो मा ददाति स इदेव माऽऽवाः।
अहमन्नमन्नमदन्तमद्मि।
पूर्वमग्नेरपि दहत्यन्नम्।
यत्तौ हाऽऽसाते अहमुत्तरेषु।
व्यात्तमस्य पशवः सुजम्भम्।
पश्यन्ति धीराः प्रचरन्ति पाकाः।
जहाम्यन्यं न जहाम्यन्यम्।
अहमन्नं वशमिच्चरामि॥ १॥

((ahamasmi prathamajā ṛtasya |
pūrvaṃ devebhyo amṛtasya nābhiḥ |
yo mā dadāti sa ideva mā''vāḥ |
ahamannamannamadantamadmi |
pūrvamagnerapi dahatyannam |
yattau hā''sāte ahamuttareṣu |
vyāttamasya paśavaḥ sujambham |
paśyanti dhīrāḥ pracaranti pākāḥ |
jahāmyanyaṃ na jahāmyanyam |
ahamannaṃ vaśamiccarāmi || 1 ||))

**[[2-8-8-2]]**

समानमर्थं पर्येमि भुञ्जत्।
को मामन्नं मनुष्यो दयेत।
पराके अन्नं निहितं लोक एतत्।
विश्वैर्देवैः पितृभिर्गुप्तमन्नम्।
यदद्यते लुप्यते यत्परोप्यते।
शततमी सा तनूर्मे बभूव।
महान्तौ चरू सकृद्दुग्धेन पप्रौ।
दिवं च पृश्नि पृथिवीं च साकम्।
तत्संपिबन्तो न मिनन्ति वेधसः।
नैतद्भूयो भवति नो कनीयः॥ २॥

((samānamarthaṃ paryemi bhuñjat |
ko māmannaṃ manuṣyo dayeta |
parāke annaṃ nihitaṃ loka etat |
viśvairdevaiḥ pitṛbhirguptamannam |
yadadyate lupyate yatparopyate |
śatatamī sā tanūrme babhūva |
mahāntau carū sakṛddugdhena paprau |
divaṃ ca pṛśni pṛthivīṃ ca sākam |

tatsaṃpibá̍nto̱ na mi̍nanti ve̱dhasa̍ḥ |
naitadbhūyo̱ bhava̍ti̱ no kanī̍yaḥ || 2 ||))

**[[2-8-8-3]]**

अन्नं॑ प्रा॒णमन्न॑मपा॒नमा॑हुः।
अन्नं॑ मृ॒त्युं तमु॑ जी॒वातु॑माहुः।
अन्नं॑ ब्र॒ह्माणो॑ ज॒रसं॑ वदन्ति।
अन्न॑माहुः प्र॒जन॑नं प्र॒जाना᳚म्।
मोघ॒मन्नं॑ विन्दते॒ अप्र॑चेताः।
स॒त्यं ब्र॑वीमि व॒ध इत्स तस्य॑।
नार्य॒मणं॒ पुष्य॑ति॒ नो सखा॑यम्।
केव॑लाघो भवति केवला॒दी।
अ॒हं मे॒घः स्त॒नय॒न्वर्ष॑न्नस्मि।
माम॑दन्त्य॒हम॑द्म्य॒न्यान्॥ ३॥

((annaṃ prā̱ṇamanná̍mapā̱namā̍huḥ |
annaṃ mṛ̱tyuṃ tamú̍ jī̱vātú̍māhuḥ |
annaṃ bra̱hmā̱ṇó̍ ja̱rasaṃ vadanti |
anná̍māhuḥ pra̱janá̍naṃ pra̱jānā᳚m |
mogha̱mannaṃ vindate̱ aprá̍cetāḥ |
sa̱tyaṃ brá̍vīmi va̱dha itsa tasyá̍ |
nārya̱maṇa̱ṃ puṣyá̍ti̱ no sakhā́̍yam |
kevá̍lāgho bhavati kevalā̱dī |
a̱haṃ me̱ghaḥ sta̱naya̱nvarṣá̍nnasmi |
māmá̍dantya̱hamá̍dmya̱nyān || 3 ||))

**[[2-8-8-4]]**

अ॒ह॒ꣳ सद॒मृतो॑ भवामि।
मदा॑दि॒त्या अधि॒ सर्वे॑ तपन्ति।
दे॒वीं वाच॑मजनयन्त॒ यद्वाग्वद॑न्ती।
अ॒न॒न्तामन्ता॒दधि॒निर्मि॑तां म॒हीम्।
यस्यां᳚ दे॒वा अद॑धु॒र्भोज॑नानि।
एका᳚क्षरां द्वि॒पदा॒ꣳ षट्प॑दां च।
वाचं॑ दे॒वा उप॑जीवन्ति॒ विश्वे᳚।
वाचं॑ दे॒वा उप॑जीवन्ति॒ विश्वे᳚।
वाचं॑ गन्ध॒र्वाः प॒शवो॑ मनु॒ष्या᳚ः।
वा॒चीमा विश्वा॒ भुव॑ना॒न्यर्पि॑ता॥ ४॥

((aha̱ṃ sada̱mṛtó̍ bhavāmi |
madā́̍di̱tyā adhi̱ sarvé̍ tapanti |
de̱vīṃ vācá̍majanayanta̱ yadvāgvadá̍ntī |
a̱na̱ntāmantā̱dadhi̱nirmi̍tāṃ ma̱hīm |
yasyā̱ṃ de̱vā á̍dadhu̱rbhojá̍nāni |
ekā̍kṣarāṃ dvi̱padā̱ṃ ṣaṭpá̍dāṃ ca |
vācaṃ de̱vā upá̍jīvanti̱ viśve̍ |
vācaṃ de̱vā upá̍jīvanti̱ viśve̍ |
vācaṃ gandha̱rvāḥ pa̱śavó̍ manu̱ṣyā̍ḥ |
vā̱cīmā viśvā̱ bhuvá̍nā̱nyarpi̍tā || 4 ||))

**[[2-8-8-5]]**

सा नो॒ ह॒वं॑ जुषता॒मिन्द्र॑पत्नी।
वा॒ग॒क्षरं॑ प्रथम॒जा ऋ॒तस्य॑।
वेदा॑नां मा॒ताऽमृत॑स्य॒ नाभि॑ः।
सा नो॑ जु॒षा॒णोप॑य॒ज्ञमागा᳚त्।
अव॑न्ती दे॒वी सु॒हवा॑ मे अस्तु।
यामृ॑षयो मन्त्र॒कृतो॑ मनी॒षिण॑ः।
अ॒न्वैच्छ॑न्दे॒वास्तप॑सा॒ श्रमे॑ण।
तां दे॒वीं वाच॑ꣳ ह॒विषा॑ यजामहे।
सा नो॑ दधातु सुकृ॒तस्य॑ लो॒के।
च॒त्वारि॒ वाक्परि॑मिता प॒दानि॑॥ ५॥

((sā no̱ havaṃ juṣatā̱mindrá̍patnī |
vāga̱kṣaraṃ prathama̱jā ṛ̱tasyá̍ |
vedā́̍nāṃ mā̱tā'mṛtá̍sya̱ nābhi̍ḥ |
sā nó̍ juṣā̱ṇopá̍ya̱jñamāgā̍t |
avá̍ntī de̱vī su̱havā́̍ me astu |
yāmṛ́̍ṣayo mantra̱kṛtó̍ manī̱ṣiṇá̍ḥ |
a̱nvaicchá̍nde̱vāstapá̍sā̱ śramé̍ṇa |
tāṃ de̱vīṃ vācaṃ̍ ha̱viṣā́̍ yajāmahe |
sā nó̍ dadhātu sukṛ̱tasyá̍ lo̱ke |
ca̱tvāri̱ vākparí̍mitā pa̱dāni̍ || 5 ||))

**[[2-8-8-6]]**

तानि॑ विदु॒र्ब्राह्म॒णा ये म॑नी॒षिण॑ः।
गुहा॒ त्रीणि॒ निहि॑ता॒ नेङ्ग॑यन्ति।
तु॒रीयं॑ वा॒चो म॑नु॒ष्या॑ वदन्ति।
श्र॒द्धया॒ऽग्निः समि॑ध्यते।
श्र॒द्धया॑ विन्दते ह॒विः।
श्र॒द्धां भग॑स्य मू॒र्धनि॑।
वच॒साऽऽवे॑दयामसि।
प्रि॒यꣳ श्र॑द्धे॒ दद॑तः।
प्रि॒यꣳ श्र॑द्धे॒ दिदा॑सतः।
प्रि॒यं भो॒जेषु यज्व॑सु॥ ६॥

((tāni̍ vidurbrāhma̱ṇā ye má̍nī̱ṣiṇá̍ḥ |
guhā̱ trī̱ṇi̱ nihi̍tā̱ neṅgá̍yanti |
tu̱rīyaṃ vā̱co má̍nu̱ṣyá̍ vadanti |
śra̱ddhayā̱'gniḥ sami̍dhyate |
śra̱ddhayā́̍ vindate ha̱viḥ |
śra̱ddhāṃ bhagá̍sya mū̱rdhani̍ |

vaca̱sā''ve̍dayāmasi |
pri̱yam̐̎ śra̍ddhe̱ dada̍taḥ |
pri̱yam̐̎ śra̍ddhe̱ dida̍̍sataḥ |
pri̱yaṃ bho̱jeṣu̱ yajva̍su || 6 ||))

**[[2-8-8-7]]**

इ॒दं म॑ उदि॒तं कृ॑धि।
यथा॑ दे॒वा असु॑रेषु।
श्र॒द्धामु॒ग्रेषु॑ चक्रि॒रे।
ए॒वं भो॒जेषु॒ यज्व॑सु।
अ॒स्माक॑मुदि॒तं कृ॑धि।
श्र॒द्धां दे॑वा॒ यज॑मानाः।
वा॒युगो॑पा॒ उपा॑सते।
श्र॒द्धाꣳ हृ॑द॒य्य॑याऽऽकू᳚त्या।
श्र॒द्धया॑ हूयते ह॒विः।
श्र॒द्धां प्रा॒तर्ह॑वामहे॥ ७॥

((i̱daṃ ma̍ udi̱taṃ kṛ̍dhi |
yathā̍ de̱vā asu̍reṣu |
śra̱ddhāmu̱greṣu̍ cakri̱re |
e̱vaṃ bho̱jeṣu̱ yajva̍su |
a̱smāka̍mudi̱taṃ kṛ̍dhi |
śra̱ddhāṃ de̍vā̱ yaja̍mānāḥ |
vā̱yugo̍pā̱ upā̍sate |
śra̱ddhām̐ hṛ̍da̱yya̍yā''kū̎tyā |
śra̱ddhayā̍ hūyate ha̱viḥ |
śra̱ddhāṃ prā̱tarha̍vāmahe || 7 ||))

**[[2-8-8-8]]**

श्र॒द्धां म॒ध्यंदि॑नं॒ परि॑।
श्र॒द्धाꣳ सूर्य॑स्य नि॒म्रुचि॑।
श्रद्धे॒ श्रद्धा॑पये॒ह मा᳚।
श्र॒द्धा दे॒वानधि॑वस्ते।
श्र॒द्धा विश्व॑मि॒दं जग॑त्।
श्र॒द्धां काम॑स्य मा॒तर᳚म्।
ह॒विषा॑ वर्धयामसि।
ब्रह्म॑ जज्ञा॒नं प्र॑थ॒मं पु॒रस्ता᳚त्।
वि सी॑म॒तः सु॒रुचो॑ वे॒न आ॑वः।
स बु॒ध्निया॑ उप॒मा अ॑स्य वि॒ष्ठाः॥ ८॥

((śra̱ddhāṃ ma̱dhyaṃdi̍naṃ̱ pari̍ |
śra̱ddhām̐ sūrya̍sya ni̱mruci̍ |
śraddhe̱ śraddhā̍paye̱ha mā̎ |
śra̱ddhā de̱vānadhi̍vaste |
śra̱ddhā viśva̍mi̱daṃ jaga̍t |
śra̱ddhāṃ kāma̍sya mā̱tara̎m |
ha̱viṣā̍ vardhayāmasi |
brahma̍ jajñā̱naṃ pra̍tha̱maṃ pu̱rastā̎t |
vi sī̍ma̱taḥ su̱ruco̍ ve̱na ā̍vaḥ |
sa bu̱dhniyā̍ upa̱mā a̍sya vi̱ṣṭhāḥ || 8 ||))

**[[2-8-8-9]]**

स॒तश्च॒ योनि॒मस॑तश्च॒ विवः॑।
पि॒ता वि॒राजा॑मृष॒भो र॑यी॒णाम्।
अ॒न्तरि॑क्षं वि॒श्वरू॑प॒ आवि॑वेश।
तम॒र्कैर॒भ्य॑र्चन्ति व॒त्सम्।
ब्रह्म॒ सन्तं॒ ब्रह्म॑णा व॒र्धय॑न्तः।
ब्रह्म॑ दे॒वान॑जनयत्।
ब्रह्म॒ विश्व॑मि॒दं जग॑त्।
ब्रह्म॑णः क्ष॒त्रं निर्मि॑तम्।
ब्रह्म॑ ब्राह्म॒ण आ॒त्मना᳚।
अ॒न्तर॑स्मिन्नि॒मे लो॒काः॥ ९॥

((sa̱taśca̱ yoni̱masa̍taśca̱ viva̍ḥ |
pi̱tā vi̱rājā̍mṛṣa̱bho ra̍yī̱ṇām |
a̱ntari̍kṣaṃ vi̱śvarū̍pa̱ āvi̍veśa |
tama̱rkaira̱bhya̍rcanti va̱tsam |
brahma̱ santa̱ṃ brahma̍ṇā va̱rdhaya̍ntaḥ |
brahma̍ de̱vāna̍janayat|
brahma̱ viśva̍mi̱daṃ jaga̍t |
brahma̍ṇaḥ kṣa̱traṃ nirmi̍tam |
brahma̍ brāhma̱ṇa ā̱tmanā̎ |
a̱ntara̍sminni̱me lo̱kāḥ || 9 ||))

**[[2-8-8-10]]**

अ॒न्तर्विश्व॑मि॒दं जग॑त्।
ब्रह्मै॒व भू॒ताना॒ं ज्येष्ठ᳚म्।
तेन॒ को॑ऽर्हति॒ स्पर्धि॑तुम्।
ब्रह्म॑न्दे॒वास्त्रय॑स्त्रिꣳशत्।
ब्रह्म॑न्निन्द्रप्रजाप॒ती।
ब्रह्म॑न्ह॒ विश्वा॑ भू॒तानि॑।
ना॒वीवा॒न्तः स॒माहि॑ता।
चत॑स्र॒ आशाः॒ प्रच॑रन्त्व॒ग्नय॑ः।
इ॒मं नो॑ य॒ज्ञं न॑यतु प्रजा॒नन्।
घृ॒तं पिन्व॑न्न॒जरꣳ॑ सु॒वीर᳚म्॥ १०॥

((a̱ntarviśva̍mi̱daṃ jaga̍t |
brahmai̱va bhū̱tānā̱ṃ jyeṣṭhā̎m |
tena̱ ko̍'rhati̱ spardhi̍tum |
brahma̍nde̱vāstraya̍strim̐śat |

brahmánnindraprajāpatī |
brahmánha viśvá bhūtānī |
nāvīvāntaḥ samāhitā |
catásra āśāḥ pracárantvagnayáḥ |
imaṃ nó yajñaṃ náyatu prajānan |
ghṛtaṃ pinvánnajaram̐ suvīrām || 10 ||))

**[[2-8-8-11]]**

ब्रह्म समिद्भवत्याहुतीनाम्।
आ गावो अग्मन्नुत भद्रमक्रन्।
सीदन्तु गोष्ठे रणयन्त्वस्मे।
प्रजावतीः पुरुरूपा इह स्युः।
इन्द्राय पूर्वीरुषसो दुहानाः।
इन्द्रो यज्वने पृणते च शिक्षति।
उपेद्ददाति न स्वं मुषायति।
भूयो भूयो रयिमिदस्य वर्धयन्।
अभिन्ने खिल्ले निदधाति देवयुम्।
न तानशन्ति न ता अर्वा॥ ११॥

((brahmá samidbhávatyāhútīnām |
ā gāvó agmannuta bhadramákran |
sīdántu goṣṭhe raṇayántvasme |
prajāvátīḥ pururūpá iha syuḥ |
indrāya pūrvīruṣaso duhānāḥ |
indro yajváne pṛṇate cá śikṣati |
upeddádāti na svaṃ múṣāyati |
bhūyó bhūyo rayimidásya vardhayan |
abhinne khille nidádhāti devayum |
na tānáśanti na tā arvā || 11 ||))

**[[2-8-8-12]]**

गावो भगो गाव इन्द्रो मे अच्छात्।
गावः सोमस्य प्रथमस्य भक्षः।
इमा या गावः स जनास इन्द्रः।
इच्छामीद्धृदा मनसा चिदिन्द्रम्।
यूयं गावो मेदयथा कृशं चित्।
अश्लीलं चित्कृणुथा सुप्रतीकम्।
भद्रं गृहं कृणुथ भद्रवाचः।
बृहद्वो वय उच्यते सभासु।
प्रजावतीः सूयवसꣳ रिशन्तीः।
शुद्धा अप सुप्रपाणे पिबन्तीः।
मा वः स्तेन ईशत माऽघशꣳसः।
परि वो हेती रुद्रस्य वृञ्ज्यात्।
उपेदमुपपर्चनम्।
आसु गोषूपपृच्यताम्।
उपर्षभस्य रेतसि।
उपेन्द्र तव वीर्ये॥ १२॥
चरामि कनीयोऽन्यानर्पिता पदानि यज्वसु हवामहे विष्ठा लोकाः सुवीरमर्वा पिबन्तीष्षट् च॥ ८॥

((gāvo bhago gāva indró me acchāt |
gāvaḥ somásya prathamasyá bhakṣaḥ |
imā yā gāvaḥ sa jánāsa indráḥ |
icchāmīddhṛdā manásā cidindrām |
yūyaṃ gávo medayathā kṛśaṃ cit |
aślīlaṃ citkṛṇuthā supratīkam |
bhadraṃ gṛhaṃ kṛṇutha bhadravācaḥ |
bṛhadvo vayá ucyate sabhāsú |
prajāvátīḥ sūyavásam̐ riśantīḥ |
śuddhā apa súprapāṇe pibántīḥ |
mā váḥ stena īśata mā'ghaśam̐saḥ |
pari vo hetī rudrasyá vṛñjyāt |
upedamúpaparcánam |
āsu goṣūpápṛcyatām |
upárṣabhasya retási |
upēndra tavá vīryē || 12 ||
carāmi kanīyo'nyānarpitā padāni yajvásu havāmahe viṣṭhā lokāḥ suvīramarvā pibántīṣṣaṭ cá || 8 ||))

**[[2-8-9-1]]**

ता सूर्याचन्द्रमसा विश्वभृत्तमा महत्।
तेजो वसुमद्राजतो दिवि।
सामात्माना चरतः सामचारिणा।
ययोर्व्रतं न ममे जातु देवयोः।
उभावन्तौ परियात अर्म्या।
दिवो न रश्मीꣳस्तनुतो व्यर्णवे।
उभा भुवन्ती भुवना कविक्रतू।
सूर्या न चन्द्रा चरतो हतामती।
पती द्युमद्विश्वविदा उभा दिवः।
सूर्या उभा चन्द्रमसा विचक्षणा॥ १॥

((tā sṻryācandramasá viśvabhṛttámā mahat |
tejo vasúmadrājato divi |
sāmā̈tmānā carataḥ sāmacāriṇā̈ |
yayōrvrataṃ na mame jātú devayōḥ |
ubhāvantau pariyāta armyā̈ |
divo na raśmīm̐stánuto vyárṇave |
ubhā bhúvantī bhuvánā kavikrátū |
sūryā na candrā cárato hatāmátī |
patī̈ dyumadviśvavidá ubhā divaḥ |
sūryá ubhā candramásā vicakṣaṇā || 1 ||))

**[[2-8-9-2]]**

वि॒श्ववा॑रा विरिवो॒भा वरे᳚ण्या।
ता नो॑ऽवतं मति॒मन्ता॒ महि॑व्रता।
वि॒श्वव॒प॑री प्र॒तर॑णा तर॒न्ता।
सु॒व॒र्विदा॑ दृ॒शये॒ भूरि॑रश्मी।
सूर्या॒ हि च॒न्द्रा वसु॑ त्वे॒ष दर्श॑ता।
म॒न॒स्विनो॒भाऽनु॑चर॒तो नु॒ सं दिवँ᳚म्।
अ॒स्य श्रवो॑ न॒द्यः॑ स॒प्त बि॑भ्रति।
द्यावा॒ क्षामा॑ पृ॒थि॒वी दर्श॒तं वपु॑ः।
अ॒स्मे सू᳚र्याचन्द्र॒मसा॑ऽभि॒चक्षे᳚।
श्र॒द्धे कमि॑न्द्र चरतो विचर्तु॒रम्॥ २॥

((vi̱śvavā̍rā virivo̱bhā varē̎ṇyā ।
tā no̍'vataṃ mati̱mantā̱ mahi̍vratā ।
vi̱śva̱vapa̍rī pra̱tara̍ṇā tara̱ntā ।
su̱va̱rvidā̍ dṛ̱śaye̱ bhūri̍raśmī ।
sūryā̱ hi ca̱ndrā vasu̍ tve̱ṣa da̍rśatā ।
ma̱na̱svino̱bhā'nu̍cara̱to nu̱ saṃ divā̎m ।
a̱sya śravo̍ na̱dya̍ḥ sa̱pta bi̍bhrati ।
dyāvā̱ kṣāmā̍ pṛthi̱vī da̍rśa̱taṃ vapu̍ḥ ।
a̱sme sū̎ryācandra̱masā̍'bhi̱cakṣē̎ ।
śra̱ddhe kami̍ndra carato vicartu̱ram ॥ 2 ॥))

**[[2-8-9-3]]**

पू॒र्वा॒प॒रं चर॑तो मा॒ययै॒तौ।
शि॒शू॒ क्रीड॑न्तौ॒ परि॑यातो अध्व॒रम्।
विश्वा᳚न्य॒न्यो भुव॑नाऽभि॒चष्टे᳚।
ऋ॒तू॒न॒न्यो वि॒दध॑ज्जायते॒ पुन॑ः।
हिर॑ण्यवर्णा॒ः शुच॑यः पाव॒का यासा॒ꣳ᳚ राजा᳚।
यासा᳚ꣳ दे॒वाः शि॒वेन॑ मा॒ चक्षु॑षा पश्यत।
आपो॑ भ॒द्रा आदित्प॑श्यामि।
नास॑दासी॒न्नो सदा॑सीत्त॒दानी᳚म्।
नासी॒द्रजो॒ नो व्यो॑मा॒परो॒ यत्।
किमाव॑रीव॒ः कुह॒ कस्य॒ शर्म॑न्॥ ३॥

((pū̱rvā̱pa̱raṃ ca̍rato mā̱yayai̱tau ।
śiśū̱ krīḍa̍ntau̱ pari̍yāto adhva̱ram ।
viśvā̎nya̱nyo bhuva̍nā'bhi̱caṣṭē̎ ।
ṛtūna̱nyo vi̱dadha̍jjāyate̱ puna̍ḥ ।
hira̍ṇyavarṇā̱ḥ śuca̍yaḥ pāva̱kā yāsā̱m̎ rājā̎ ।
yāsā̎ṃ de̱vāḥ śi̱vena̍ mā̱ cakṣu̍ṣā paśyata ।
āpo̍ bha̱drā āditpa̍śyāmi ।
nāsa̍dāsī̱nno sadā̍sītta̱dānī̎m ।
nāsī̱drajo̱ no vyo̍māpa̱ro yat ।
kimāva̍rīva̱ḥ kuha̱ kasya̱ śarma̍n ॥ 3 ॥))

**[[2-8-9-4]]**

अम्भ॒ः किमा॑सी॒द्गह॑नं गभी॒रम्।
न मृ॒त्युर॒मृतं॒ तर्हि॒ न।
रात्रि॑या॒ अह्न॑ आसीत्प्रके॒तः।
आनी॑दवा॒तꣴ᳚ स्व॒धया॒ तदेक᳚म्।
तस्मा᳚द्धा॒न्यं न प॒रः किं च॒ नास॑।
तम॑ आसी॒त्तम॑सा गू॒ढमग्रे᳚ प्रके॒तम्।
स॒लि॒लꣳ सर्व॑मा इ॒दम्।
तु॒च्छेना॒भ्वपि॑हितं॒ यदासी᳚त्।
तम॑स॒स्तन्म॑हि॒ना जाय॒तैक᳚म्।
काम॒स्तदग्रे॒ सम॑वर्त॒ताधि॑॥ ४॥

((ambha̱ḥ kimā̍sī̱dgaha̍naṃ gabhī̱ram ।
na mṛtyura̱mṛtaṃ tarhi̱ na ।
rātri̍yā̱ ahna̍ āsītprake̱taḥ ।
ānī̍davā̱tam̎ sva̱dhayā̱ tadekā̎m ।
tasmā̎ddhā̱nyaṃ na pa̱raḥ kiṃca̱ nāsa̍ ।
tama̍ āsī̱ttama̍sā gū̱ḍhamagrē̎ prake̱tam ।
sa̱li̱lam̍ sarva̍mā i̱dam ।
tu̱cchenā̱bhvapi̍hitaṃ yadāsī̎t ।
tama̍sa̱stanma̍hi̱nā jā̍ya̱taikā̎m ।
kāma̱stadagre̱ sama̍varta̱tādhi̍ ॥ 4 ॥))

**[[2-8-9-5]]**

मन॑सो॒ रेत॑ः प्रथ॒मं यदासी᳚त्।
स॒तो बन्धु॒मस॑ति॒ निर॑विन्दन्।
हृ॒दि प्र॒तीष्या॑ क॒वयो॑ मनी॒षा।
ति॒र॒श्चीनो॒ वित॑तो र॒श्मिरे॑षाम्।
अ॒धस्स्वि॑दा॒सी३दु॒परि॑ स्विदासी३त्।
रे॒तो॒धा आ॑सन्महि॒मान॑ आसन्।
स्व॒धा अ॒वस्ता॒त्प्रय॑तिः प॒रस्ता᳚त्।
को अ॒द्धा वेद॒ क इ॒ह प्रवो॑चत्।
कुत॒ आजा॑ता॒ कुत॑ इ॒यं विसृ॑ष्टिः।
अ॒र्वाग्दे॒वा अ॒स्य वि॒सर्ज॑नाय॥ ५॥

((mana̍so̱ reta̍ḥ pratha̱mamaṃ yadāsī̎t ।
sa̱to bandhu̱masa̍ti̱ nira̍vindan ।
hṛdi pra̱tīṣyā̍ ka̱vayo̍ manī̱ṣā ।
ti̱ra̱ścīno̱ vita̍to ra̱śmire̍ṣām ।
a̱dhassvi̍dā̱sī3du̱pari̍ svidāsī3t ।
re̱to̱dhā ā̍sanmahi̱māna̍ āsan ।
sva̱dhā a̱vastā̱tpraya̍tiḥ pa̱rastā̎t ।
ko a̱ddhā ve̍da̱ ka i̱ha pravo̍cat ।
kuta̱ ājā̍tā̱ kuta̍ i̱yaṃ visṛ̍ṣṭiḥ ।

a̱rvāgde̱vā a̱sya vi̱sarja̍nāya || 5 ||))

**[[2-8-9-6]]**

अथा̱ को वे॑द॒ यत॑ आ ब॒भूव॑।
इ॒यं वि॒सृ॑ष्टि॒र्यत॑ आब॒भूव॑।
यदि॑ वा द॒धे यदि॑ वा॒ न।
यो अ॒स्याध्य॑क्षः पर॒मे व्यो॑मन्।
सो अ॒ङ्ग वे॑द॒ यदि॑ वा॒ न वेद॑।
किꣳस्वि॒द्वनं॒ क उ॒ स वृ॒क्ष आ॑सीत्।
यतो॒ द्यावा॑पृथि॒वी नि॑ष्टत॒क्षुः।
मनी॑षिणो॒ मन॑सा पृ॒च्छतेदु॒ तत्।
यद॒ध्यति॑ष्ठ॒द्भुव॑नानि धा॒रयन्॑।
ब्रह्म॒ वनं॒ ब्रह्म॒ स वृ॒क्ष आ॑सीत्॥ ६॥

((athā̱ ko ve̍da̱ yata̍ ā ba̱bhūva̍ |
i̱yaṃ visṛ̍ṣṭi̱ryata̍ āba̱bhūva̍ |
yadi̍ vā da̱dhe yadi̍ vā̱ na |
yo a̱syādhya̍kṣaḥ para̱me vyo̍man |
so a̱ṅga ve̍da̱ yadi̍ vā̱ na veda̍ |
kiṁ̐svi̱dvanaṃ̱ ka u̱ sa vṛ̱kṣa ā̍sīt |
yato̱ dyāvā̍pṛthi̱vī ni̍ṣṭata̱kṣuḥ |
manī̍ṣiṇo̱ mana̍sā pṛ̱cchatedu̱ tat |
yada̱dhyati̍ṣṭha̱dbhuva̍nāni dhāraya̍n |
brahma̱ vanaṃ̱ brahma̱ sa vṛ̱kṣa ā̍sīt || 6 ||))

**[[2-8-9-7]]**

यतो॒ द्यावा॑पृथि॒वी नि॑ष्टत॒क्षुः।
मनी॑षिणो॒ मन॑सा॒ विब्र॑वीमि वः।
ब्रह्मा॒ध्यति॑ष्ठ॒द्भुव॑नानि धा॒रयन्॑।
प्रा॒तर॒ग्निं प्रा॒तरिन्द्रꣳ॑ हवामहे।
प्रा॒तर्मि॒त्रावरु॑णा प्रा॒तर॒श्विना᳚।
प्रा॒तर्भग॑ं पू॒षणं॒ ब्रह्म॑ण॒स्पति᳚म्।
प्रा॒तः सोम॑मु॒त रु॒द्रꣳ हु॑वेम।
प्रा॒तर्जि॒तं भग॑मु॒ग्रꣳ हु॑वेम।
व॒यं पु॒त्रमदि॑ते॒र्यो वि॑ध॒र्ता।
आ॒ध्रश्चि॒द्यं मन्य॑मानस्तु॒रश्चि॑त्॥ ७॥

((yato̱ dyāvā̍pṛthi̱vī ni̍ṣṭata̱kṣuḥ |
manī̍ṣiṇo̱ mana̍sā̱ vibra̍vīmi vaḥ |
brahmā̱dhyati̍ṣṭha̱dbhuva̍nāni dhāraya̍n |
prā̱tara̱gniṃ prā̱tarindraṁ̐ havāmahe |
prā̱tarmi̱trāvaru̍ṇā prā̱tara̱śvinā̎ |
prā̱tarbhaga̍ṃ pū̱ṣaṇaṃ̱ brahma̍ṇa̱spati̎m |
prā̱taḥ soma̍mu̱ta ru̱draṁ̐ hu̍vema |
prā̱ta̱rjitaṃ̱ bhaga̍mu̱graṁ̐ hu̍vema |
va̱yaṃ pu̱tramadi̍te̱ryo vi̍dha̱rtā |
ā̱dhraści̱dyaṃ manya̍mānastu̱raści̍t || 7 ||))

**[[2-8-9-8]]**

राजा॑चि॒द्यं भग॑ं भ॒क्षीत्याह॑।
भग॒ प्रणे॑त॒र्भग॒ सत्य॑राधः।
भगे॒मां धिय॒मुद॑व॒ दद॑न्नः।
भग॒ प्र णो॑ जनय॒ गोभि॒रश्वैः᳚।
भग॒ प्र नृभि॑र्नृ॒वन्त॑ः स्याम।
उ॒तेदानीं॒ भग॑वन्तः स्याम।
उ॒त प्र॒पि॒त्व उ॒त मध्ये॒ अह्ना᳚म्।
उ॒तोदि॑ता मघव॒न्त्सूर्य॑स्य।
व॒यं दे॒वानाꣳ॑ सुम॒तौ स्या॑म।
भग॑ ए॒व भग॑वाꣳ अस्तु देवाः॥ ८॥

((rājā̍ci̱dyaṃ bhaga̍ṃ bha̱kṣītyāha̍ |
bhaga̱ praṇe̍ta̱rbhaga̱ satya̍rādhaḥ |
bhage̱māṃ dhiya̱muda̍va̱ dada̍nnaḥ |
bhaga̱ pra ṇo̍ janaya̱ gobhi̱raśvai̎ḥ |
bhaga pra nṛbhirnṛ̱vanta̍ḥ syāma |
u̱tedānī̱ṃ bhaga̍vantaḥ syāma |
u̱ta prapi̱tva u̱ta madhye̱ ahnā̎m |
u̱todi̍tā maghava̱ntsūrya̍sya |
va̱yaṃ de̱vānā̍ṁ sumata̱u syā̍ma |
bhaga̍ e̱va bhaga̍vāṁ astu devāḥ || 8 ||))

**[[2-8-9-9]]**

तेन॑ व॒यं भग॑वन्तः स्याम।
तं त्वा॑ भग॒ सर्व॒ इज्जो॑हवीमि।
स नो॑ भग पुर ए॒ता भ॑वे॒ह।
सम॑ध्व॒रायो॒षसो॑ नमन्त।
द॒धि॒क्रावे॑व॒ शुच॑ये प॒दाय॑।
अ॒र्वा॒चीनं॒ व॑सु॒विदं॒ भग॑ं नः।
रथ॑मि॒वाश्वा॑ वा॒जिन॒ आव॑हन्तु।
अश्वा॑वती॒र्गोम॑तीर्न उ॒षास॑ः।
वी॒रव॑तीः॒ सद॑मुच्छन्तु भ॒द्राः।
घृ॒तं दुहा॑ना वि॒श्वतः॒ प्रपी॑नाः।
यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः॥ ९॥
वि॒चक्ष॑णा वि॒चतु॑रꣳ शर्म॑न्न॒धि॒विसर्ज॑नाय॒ ब्रह्म॒ वनं॒ ब्रह्म॒ स
वृ॒क्ष आ॑सीत्तु॒रश्चि॒द्देवाः॒ प्रपी॑ना॒ एकं॑ च॥ ९॥
पीवो᳚ऽन्ना॒न्ते शु॒क्रास॑ः सोमो॑ धे॒नुमिन्द्र॒स्तर॑स्वा॒ञ्छु॒चि॒मा

दे॒वो या॑तु सूर्यो॓ दे॒वीम॒हम॑स्मि॒ ता सू॒॑र्याचन्द्र॒मसा॒ नव॑॥
९॥
पीवो॓ऽन्ना॒मग्ने॒ त्वं पा॑रयानाधृ॒ष्यः शुचि॒ं नु स्तोम॑ं
वि॒श्रय॑माणो दि॒वो रु॒क्मोऽन्न॑ं प्रा॒णं ता सू॒॑र्याचन्द्र॒मसा॒
नव॑सप्ततिः॥ ७९॥

((tenȧ va̱yaṃ bhagȧvantaḥ syāma ǀ
taṃ tvȧ̇ bhaga̱ sarva̱ ijjȯhavīmi ǀ
sa nȯ bhaga pura e̱tā bhȧve̱ha ǀ
samȧdhva̱rāyo̱ṣasȯ namanta ǀ
da̱dhi̱krāvėva̱ śucȧye pa̱dāyȧ ǀ
a̱rvā̱cī̱naṃ vȧsu̱vidaṃ̱ bhagaṃ̇ naḥ ǀ
rathȧmi̱vāśvȧ̇ vā̱jina̱ āvȧhantu ǀ
aśvȧ̇vatī̱rgomȧtīrna u̱ṣāsȧḥ ǀ
vī̱ravȧtī̱ḥ sadȧmucchantu bha̱drāḥ ǀ
ghṛ̱taṃ duhȧ̇nā vi̱śvata̱ḥ prapi̇̄nāḥ ǀ
yū̱yaṃ pȧ̇ta sva̱stibhi̱ḥ sadȧ̇ naḥ ǁ 9 ǁ
vi̱ca̱kṣa̱ṇā vi̇cartu̱raṃ̇ śarma̱nnadhi̇vi̱sarjȧnāya̱
brahma̱ vanaṃ̱ brahma̱ sa vṛ̱kṣa ȧ̇sīttu̱raści̇ddevā̱ḥ
prapi̇̄nā̱ ekaṃ̇ ca ǁ 9 ǁ
pīvȫ'nnā̱nte śu̱krāsa̱ḥ somȯ
dhe̱numindra̱starȧsvā̱̄ñchuci̱mā de̱vo yȧ̇tu̱ sūryȯ
de̱vīma̱hamȧsmi̱ tā sṻryācandra̱masā̱ navȧ ǁ 9 ǁ
pīvȫ'nnā̱magne̱ tvaṃ pȧrayānādhṛ̱ṣyaḥ śuci̱ṃ nu
stomaṃ̇ vi̱śrayȧmāṇo di̱vo ru̱kmo'nnaṃ̇ prā̱ṇaṃ tā
sṻryācandra̱masā̱ navȧsaptatiḥ ǁ 79 ǁ))

# Taittirīya-Brāhmaṇa
# Book 3, Chapter 1

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[3-1-1-1]]**

अ॒ग्निर्नः॑ पातु॒ कृत्ति॑काः।
नक्ष॑त्रं दे॒वमि॑न्द्रि॒यम्।
इ॒दमा॑सां विचक्ष॒णम्।
ह॒विरा॒सं जु॑होतन।
यस्य॒ भान्ति॑ र॒श्मयो॒ यस्य॑ के॒तवः॑।
यस्ये॒मा विश्वा॒ भुव॑नानि॒ सर्वा᳚।
स कृत्ति॑काभिर॒भि सं॒वसा॑नः।
अ॒ग्निर्नो॑ दे॒वः सु॑वि॒ते द॑धातु।
प्र॒जाप॑ते रोहि॒णी वे॑तु॒ पत्नी᳚।
वि॒श्वरू॑पा बृह॒ती चि॒त्रभा॑नुः॥ १॥

((a̱gnirna̍ḥ pātu̱ kṛtti̍kāḥ |
nakṣa̍traṃ de̱vami̍ndri̱yam |
i̱dama̍sāṃ vicakṣa̱ṇam |
ha̱virā̱saṃ ju̍hotana |
yasya̱ bhānti̍ ra̱śmayo̱ yasya̍ ke̱tava̍ḥ |
yasye̱mā viśvā̱ bhuva̍nāni̱ sarvā̎ |
sa kṛtti̍kābhira̱bhi sa̱ṃvasā̍naḥ |
a̱gnirno̍ de̱vaḥ su̍vi̱te da̍dhātu |
pra̱jāpa̍te rohi̱ṇī ve̍tu̱ patnī̎ |
vi̱śvarū̍pā bṛha̱tī ci̱trabhā̍nuḥ || 1 ||))

**[[3-1-1-2]]**

सा नो॑ य॒ज्ञस्य॑ सुवि॒ते द॑धातु।
यथा॒ जीवे॑म श॒रदः॒ सवी॑राः।
रो॒हि॒णी दे॒व्युद॑गात्पु॒रस्ता᳚त्।
विश्वा॑ रू॒पाणि॑ प्रति॒मोद॑माना।
प्र॒जाप॑तिꣳ ह॒विषा॑ व॒र्धय॑न्ती।
प्रि॒या दे॒वाना॒मुप॑यातु य॒ज्ञम्।
सोमो॒ राजा॑ मृगशी॒र्षेण॒ आग॑न्।
शि॒वं नक्ष॑त्रं प्रि॒यम॑स्य॒ धाम॑।
आ॒प्याय॑मानो बहु॒धा जने॑षु।
रेतः॑ प्र॒जां यज॑माने दधातु॥ २॥

((sā no̍ ya̱jñasya̍ suvi̱te da̍dhātu |
yathā̱ jīve̍ma śa̱rada̱ḥ savī̍rāḥ |
ro̱hi̱ṇī de̱vyuda̍gātpu̱rastā̎t |
viśva̍ rū̱pāṇi̍ prati̱moda̍mānā |
pra̱jāpa̍tiṃ̐ ha̱viṣā̍ va̱rdhaya̍ntī |
pri̱yā de̱vānā̱mupa̍yātu ya̱jñam |
somo̱ rājā̍ mṛgaśī̱rṣeṇa̱ āga̍n |
śi̱vaṃ nakṣa̍traṃ pri̱yama̍sya̱ dhāma̍ |
ā̱pyāya̍māno bahu̱dhā jane̍ṣu |
reta̍ḥ pra̱jāṃ yaja̍māne dadhātu || 2 ||))

**[[3-1-1-3]]**

यत्ते॒ नक्ष॑त्रं मृगशी॒र्षमस्ति॑।
प्रि॒यꣳ रा॑जन्प्रि॒यत॑मं प्रि॒याणा᳚म्।
तस्मै॑ ते सोम ह॒विषा॑ विधेम।
शं न॑ एधि द्वि॒पदे॒ शं चतु॑ष्पदे।
आ॒र्द्रया॑ रु॒द्रः प्रथ॑मान एति।
श्रेष्ठो॑ दे॒वानां॒ पति॑रघ्नि॒याना᳚म्।
नक्ष॑त्रमस्य ह॒विषा॑ विधेम।
मा नः॑ प्र॒जाꣳ री॑रिष॒न्मोत वी॒रान्।
हे॒ती रु॒द्रस्य॒ परि॑ णो॒ वृण॒क्तु।
आ॒र्द्रा नक्ष॑त्रं जुषताꣳ ह॒विर्नः॑॥ ३॥

((yatte̱ nakṣa̍traṃ mṛgaśī̱rṣamasti̍ |
pri̱yaṃ̐ ra̍janpri̱yata̍mamṃ pri̱yāṇā̎m |
tasmai̍ te soma ha̱viṣā̍ vidhema |
śaṃ na̍ edhi dvi̱pade̱ śaṃ catu̍ṣpade |
ā̱rdraya̍ ru̱draḥ pratha̍māna eti |
śreṣṭho̍ de̱vānā̱ṃ pati̍raghni̱yānā̎m |
nakṣa̍tramasya ha̱viṣā̍ vidhema |
mā na̍ḥ pra̱jāṃ̐ rī̍riṣa̱nmota vī̱rān |
he̱tī ru̱drasya̱ pari̍ ṇo̱ vṛṇa̱ktu |
ā̱rdrā nakṣa̍traṃ juṣatāṃ̐ ha̱virna̍ḥ || 3 ||))

**[[3-1-1-4]]**

प्र॒मु॒ञ्चमा॑नौ दुरि॒तानि॒ विश्वा᳚।
अपा॒घश॑ꣳसं नु॒दता॒मरा॑तिम्।
पुन॑र्नो दे॒व्यदि॑तिः स्पृणोतु।
पुन॑र्वसू नः॒ पुन॒रेता᳚ य॒ज्ञम्।
पुन॑र्नो दे॒वा अ॒भिय॑न्तु॒ सर्वे᳚।
पुनः॑ पुन॒र्वो ह॒विषा॑ यजामः।
ए॒वा न दे॒व्यदि॑तिरन॒र्वा।
विश्व॑स्य भ॒र्त्री जग॑तः प्रति॒ष्ठा।
पुन॑र्वसू ह॒विषा॑ व॒र्धय॑न्ती।
प्रि॒यं दे॒वाना॒मप्ये॑तु॒ पाथः॑॥ ४॥

((pra̱mu̱ñcamā̍nau duri̱tāni̱ viśvā̎ ।
apā̱ghaśa̍m̐saṃ nudatā̱marā̍tim ।
puna̍rno de̱vyadi̍tiḥ spṛṇotu ।
puna̍rvasū na̱ḥ puna̱retā̱m̐ ya̱jñam ।
puna̍rno de̱vā a̱bhiya̍ntu̱ sarve̎ ।
puna̍ḥ punarvo ha̱viṣā̍ yajāmaḥ ।
e̱vā na de̱vyadi̍tirana̱rvā ।
viśva̍sya bha̱rtrī jaga̍taḥ prati̱ṣṭhā ।
puna̍rvasū ha̱viṣā̍ va̱rdhaya̍ntī ।
pri̱yaṃ de̱vānā̱mapye̍tu̱ pātha̍ḥ ॥ 4 ॥))

**[[3-1-1-5]]**

बृ॒ह॒स्पति॑ः प्रथ॒मं जाय॑मानः।
ति॒ष्यं॑ नक्ष॑त्रम॒भि संब॑भूव।
श्रेष्ठो॑ दे॒वानां॒ पृत॑नासु जि॒ष्णुः।
दिशो॒ नु॒ सर्वा॒ अभ॑यं नो अस्तु।
ति॒ष्य॑ः पु॒रस्ता॑दुत म॑ध्य॒तो न॑ः।
बृ॒ह॒स्पति॑र्न॒ः परि॑पातु प॒श्चात्।
बाधे॑तां॒ द्वेषो॒ अभ॑यं कृणुताम्।
सु॒वीर्य॑स्य॒ पत॑यः स्याम।
इ॒दꣳ स॒र्पेभ्यो॑ ह॒विर॑स्तु॒ जुष्ट᳚म्।
आ॒श्रे॒षा येषा॑मनु॒यन्ति॒ चेत॑ः॥

((bṛ̱ha̱spati̍ḥ pratha̱maṃ jāya̍mānaḥ ।
ti̱ṣya̍ṃ nakṣa̍trama̱bhi sa̱mba̍bhūva ।
śre̱ṣṭho̍ de̱vānā̱m pṛta̍nāsu ji̱ṣṇuḥ ।
diśo̱ nu̱ sarvā̱ abha̍yaṃ no astu ।
ti̱ṣya̍ḥ pu̱rastā̍du̱ta ma̍dhya̱to na̍ḥ ।
bṛ̱ha̱spati̍rna̱ḥ pari̍pātu pa̱ścāt ।
bādhe̍tā̱m dve̱ṣo̱ abha̍yaṃ kṛṇutām ।
su̱vīrya̍sya̱ pata̍yaḥ syāma ।
i̱dam̐ sa̱rpebhyo̍ ha̱vira̍stu̱ juṣṭa̎m ।
ā̱śre̱ṣā ye̱ṣa̍manu̱yanti̱ ceta̍ḥ ॥))

**[[3-1-1-6]]**

ये अ॒न्तरि॑क्षं पृ॒थि॒वीं क्षि॒यन्ति॑।
ते न॑ः स॒र्पासो॒ ह॒वमाग॑मिष्ठाः।
ये रो॑च॒ने सू॒र्य॑स्यापि॑ स॒र्पाः।
ये दिवं॑ दे॒वीमनु॑ सं॒चर॑न्ति।
येषा॑माश्रेषा अ॑नु॒यन्ति॒ काम᳚म्।
तेभ्य॑ः स॒र्पेभ्यो॒ मधु॑मज्जुहोमि।
उप॑हूताः पि॒तरो॒ ये म॒घासु॑।
मनो॑जवसः सु॒कृत॑ः सु॒कृ॒त्याः।
ते नो॒ नक्ष॑त्त्रे॒ ह॒वमाग॑मिष्ठाः।
स्व॒धाभि॑र्य॒ज्ञं प्रय॑तं जुषन्ताम्॥ ६॥

((ye a̱ntari̍kṣaṃ pṛ̱thi̱vīṃ kṣi̱yanti̍ ।
te na̍ḥ sa̱rpāso̱ hava̱māga̍miṣṭhāḥ ।
ye ro̍ca̱ne sūrya̱syāpi̍ sa̱rpāḥ ।
ye diva̍ṃ de̱vīmanu̍ sa̱ṃcara̍nti ।
yeṣa̍māśre̱ṣā a̍nu̱yanti̱ kāma̎m ।
tebhya̍ḥ sa̱rpebhyo̱ madhu̍majjuhomi ।
upa̍hūtāḥ pi̱taro̱ ye ma̱ghāsu̍ ।
mano̍javasaḥ su̱kṛta̍ḥ sukṛ̱tyāḥ ।
te no̱ nakṣa̍ttre̱ hava̱māga̍miṣṭhāḥ ।
sva̱dhābhi̍rya̱jñaṃ praya̍taṃ juṣantām ॥ 6 ॥))

**[[3-1-1-7]]**

ये अ॑ग्निद॒ग्धा येऽन॑ग्निदग्धाः।
ये॑ऽमुं लो॒कं पि॒तर॑ः क्षि॒यन्ति॑।
याꣳश्च॑ वि॒द्म याꣳ उ॑ च॒ न प्र॑वि॒द्म।
म॒घासु॑ य॒ज्ञꣳ सु॒कृ॑तं जुषन्ताम्।
गवां॒ पति॒ः फल्गु॑नीनामसि॒ त्वम्।
तद॑र्य॒मन्वरुण मित्र॒ चारु॑।
तं त्वा॑ व॒यꣳ स॑नि॒तारꣳ॑ सनी॒नाम्।
जी॒वा जीव॑न्त॒मुप॒ संवि॑शेम।
येने॒मा विश्वा॒ भुव॑नानि॒ संजि॑ता।
यस्य॑ दे॒वा अ॑नु॒ संयन्ति॒ चेत॑ः॥

((ye a̍gnida̱gdhā ye'na̍gnidagdhāḥ ।
ye̍'muṃ lo̱kaṃ pi̱tara̍ḥ kṣi̱yanti̍ ।
yām̐śca̍ vi̱dma yām̐ u̍ ca̱ na pra̍vidma̱ ।
ma̱ghāsu̍ ya̱jñam̐ su̱kṛ̍taṃ juṣantām ।
gavā̱m pati̱ḥ phalgu̍nīnāmasi̱ tvam ।
tada̍rya̱manvaru̱ṇa mitra̱ cāru̍ ।
taṃ tvā̍ va̱yam̐ sa̍ni̱tāram̐ sa̱nīnām ।
jī̱vā jīva̍nta̱mupa̱ saṃvi̍śema ।
yene̱mā viśvā̱ bhuva̍nāni̱ saṃji̍tā ।
yasya̍ de̱vā a̍nu sa̱ṃyanti̱ ceta̍ḥ ॥))

**[[3-1-1-8]]**

अ॒र्य॒मा रा॒जाऽज॒रस्तु॑विष्मान्।
फल्गु॑नीनामृष॒भो रो॑रवीति।
श्रेष्ठो॑ दे॒वानां॑ भगवो भगासि।
तत्त्वा॑ वि॒दुः फलुगु॑नी॒स्तस्य॑ वित्तात्।
अ॒स्मभ्यं॑ क्ष॒त्त्रम॒जरꣳ॑ सु॒वीर्य᳚म्।
गोम॒दश्व॑व॒दुप॒ संनु॑दे॒ह।
भगो॑ ह॒ दा॒ता भग॒ इत्प्र॑दा॒ता।
भगो॑ दे॒वीः फल्गु॑नी॒रावि॑वेश।

भ॒गस्येत्तं प्र॑स॒वं ग॑मेम।
यत्र॑ दे॒वैः स॑ध॒माद᳚ं मदेम॥ ८॥

((a̱rya̱mā rājā̱,'ja̱ra̱stuvi̍ṣmān ।
phalgu̍nīnāmṛṣa̱bho ro̍ravīti ।
śreṣṭho̍ de̱vānā̎m̐ bhagavo bhagāsi ।
tattva̎ vidu̱ḥ phalugu̍nī̱stasya̍ vittāt ।
a̱smabhya̍ṃ kṣa̱ttrama̱jara̎m̐ su̱vīrya̎m ।
goma̱daśva̍va̱dupa̱ saṃnu̍de̱ha ।
bhago̍ ha dā̱tā bhaga̱ itpra̍dā̱tā ।
bhago̍ de̱vīḥ phalgu̍nī̱rāvive̍śa ।
bhaga̱syettaṃ pra̍sa̱vaṃ ga̍mema ।
yatra̍ de̱vaiḥ sa̍dha̱mādaṃ madema ॥ 8 ॥))

**[[3-1-1-9]]**

आया॑तु दे॒वः स॑वि॒तोप॑यातु।
हि॒र॒ण्यये॑न सु॒वृता॒ रथे॑न।
वह॒न्हस्त॑ꣳ सु॒भग॑ं वि॒द्मनाप॑सम्।
प्र॒यच्छ॑न्त॒ं पपु॑रि॒ं पुण्य॒मच्छ॑।
हस्त॒ः प्रय॑च्छत्व॒मृत॒ं वसी॑यः।
दक्षि॑णेन॒ प्रति॑गृभ्णीम एनत्।
दा॒तार॑म॒द्य स॑वि॒ता वि॑देय।
यो नो॒ हस्ता॑य प्रसु॒वाति॑ य॒ज्ञम्।
त्वष्टा॒ नक्ष॑त्त्रम॒भ्येति॑ चि॒त्राम्।
सु॒भꣳस॑सं यु॒वतिꣳ॑ रोच॑मानाम्॥ ९॥

((āyā̎tu de̱vaḥ sa̍vi̱topa̍yātu ।
hi̱ra̱ṇyaye̍na su̱vṛtā̱ rathe̍na ।
vaha̱nhasta̎m̐ su̱bhaga̍ṃ vidma̱nāpa̍sam ।
pra̱yaccha̍nta̱ṃ papu̍ri̱ṃ puṇya̱maccha̍ ।
hasta̱ḥ praya̍cchatva̱mṛta̱ṃ vasī̍yaḥ ।
dakṣi̍ṇena̱ prati̍gṛbhṇīma enat ।
dā̱tāra̍ma̱dya sa̍vi̱tā vi̍deya ।
yo no̱ hastā̍ya prasu̱vāti̍ ya̱jñam ।
tva̱ṣṭā̱ nakṣa̍ttrama̱bhye̍ti ci̱trām ।
su̱bhaṁ̐sa̍sam yuva̱tiṁ̐ roca̍mānām ॥ 9 ॥))

**[[3-1-1-10]]**

नि॒वे॒शय॑न्न॒मृता॒न्मर्त्या॑ꣳश्च।
रू॒पाणि॑ पि॒ꣳ॒शन्भुव॑ना॒नि विश्वा᳚।
तन्न॒स्त्वष्टा॒ तदु॑ चि॒त्रा विच॑ष्टाम्।
तन्नक्ष॑त्रं भूरि॒दा अ॑स्तु॒ मह्य᳚म्।
तन्न॑ः प्र॒जां वी॒रव॑तीꣳ सनोतु।
गोभि॑र्नो॒ अश्वै॒ः सम॑नक्तु य॒ज्ञम्।
वा॒युर्नक्ष॑त्रम॒भ्येति॒ निष्ट्या᳚म्।
ति॒ग्मशृ॑ङ्गो वृष॒भो रोरु॑वाणः।
स॒मी॒र॒यन्भुव॑ना मा॒तरिश्वा᳚।
अप द्वेषा॑ꣳसि नुद॒तामरा॑तीः॥ १०॥

((ni̱ve̱śaya̍nna̱mṛtā̱nmartyā̎m̐śca ।
rū̱pāṇi̍ pi̱m̱̐śanbhuva̍nāni̱ viśvā̎ ।
tanna̱stvaṣṭā̱ tadu̍ ci̱trā vica̍ṣṭām ।
tannakṣa̍traṃ bhūri̱dā a̍stu̱ mahya̎m ।
tanna̍ḥ pra̱jāṃ vī̱rava̍tīm̐ sanotu ।
gobhi̍rno̱ aśvai̱ḥ sama̍naktu ya̱jñam ।
vā̱yurnakṣa̍trama̱bhye̍ti̱ niṣṭyā̎m ।
ti̱gmaśṛ̍ṅgo vṛṣa̱bho roru̍vāṇaḥ ।
sa̱mī̱raya̱nbhuva̍nā māta̱riśvā̎ ।
apa dveṣā̎m̐si nudatā̱marā̎tīḥ ॥ 10 ॥))

**[[3-1-1-11]]**

तन्नो॑ वा॒युस्तदु॒ निष्ट्या॑ शृणोतु।
तन्नक्ष॑त्रं भूरि॒दा अ॑स्तु॒ मह्य᳚म्।
तन्नो॑ दे॒वासो॒ अनु॑जानन्तु॒ काम᳚म्।
यथा॒ तरे॑म दुरि॒ताने॒ विश्वा᳚।
दू॒र॒मस्मच्छत्र॑वो यन्तु भी॒ताः।
तदि॑न्द्रा॒ग्नी कृ॑णुता॒ं तद्विशा॑खे।
तन्नो॑ दे॒वा अनु॑मदन्तु य॒ज्ञम्।
प॒श्चात्पु॒रस्ता॒दभ॑यं नो अस्तु।
नक्ष॑त्राणा॒मधि॑पत्नी॒ विशा॑खे।
श्रेष्ठा॑विन्द्रा॒ग्नी भुव॑नस्य गो॒पौ॥ ११॥

((tanno̍ vā̱yustadu̱ niṣṭyā̎ śṛṇotu ।
tannakṣa̍traṃ bhūri̱dā a̍stu̱ mahya̎m ।
tanno̍ de̱vāso̱ anu̍jānantu̱ kāmā̎m ।
yathā̱ tare̍ma duri̱tāni̱ viśvā̎ ।
dū̱ra̱masmacchatra̍vo yantu bhī̱tāḥ ।
tadi̍ndrā̱gnī kṛ̍ṇutā̱ṃ tadviśā̎khe ।
tanno̍ de̱vā anu̍madantu ya̱jñam ।
pa̱ścātpu̱rastā̱dabha̍yaṃ no astu ।
nakṣa̍trāṇā̱madhi̍patnī̱ viśā̍khe ।
śreṣṭhā̎vindrā̱gnī bhuva̍nasya go̱pau ॥ 11 ॥))

**[[3-1-1-12]]**

विषू॑च॒ः शत्रू॑नप॒बाध॑मानौ।
अप॒ क्षुध॑ं नुद॒तामरा॑तिम्।
पू॒र्णा प॒श्चादु॒त पू॒र्णा पु॒रस्ता᳚त्।
उन्म॑ध्य॒तः पौ᳚र्णमा॒सी जि॑गाय।
तस्या᳚ं दे॒वा अधि॑ सं॒वस॑न्तः।
उ॒त्त॒मे नाक॑ इ॒ह मा॑दयन्ताम्।

पृथ्वी सुवर्चा युवतिः सजोषाः।
पौर्णमास्युदगाच्छोभमाना।
आप्याययन्ती दुरितानि विश्वा।
उरुं दुहां यजमानाय यज्ञम्॥ १२॥
छित्रभानुर्यजमाने दधातु हविर्नः पाथश्चेतो जुषन्तां चेतो
मदेम रोचमानामरातीर्गोपौ यज्ञम्॥ १॥

((viṣūcaḥ śatrūnapabādhamānau |
apa kṣudhaṃ nudatāmarātim |
pūrṇā paścāduta pūrṇā purastāt |
unmadhyataḥ paurṇamāsī jigāya |
tasyāṃ devā adhi saṃvasantaḥ |
uttame nāka iha madayantām |
pṛthvī suvarcā yuvatiḥ sajoṣāḥ |
paurṇamāsyudagācchobhamānā |
āpyāyayantī duritāni viśvā |
uruṃ duhāṃ yajamānāya yajñam || 12 ||
chitrabhānuryajamāne dadhātu havirnaḥ
pāthaścetо juṣantāṃ ceto madema
rocamānāmarātīrgopau yajñam || 1 ||))

**[[3-1-2-1]]**

ऋध्यास्म हव्यैर्नमसोपसद्य।
मित्रं देवं मित्रधेयं नो अस्तु।
अनूराधान्हविषा वर्धयन्तः।
शतं जीवेम शरदः सवीराः।
चित्रं नक्षत्त्रमुदगात्पुरस्तात्।
अनूराधास इति यद्वदन्ति।
तन्मित्र एति पथिभिर्देवयानैः।
हिरण्ययैर्विततैरन्तरिक्षे।
इन्द्रो ज्येष्ठामनु नक्षत्त्रमेति।
यस्मिन्वृत्रं वृत्रतूर्ये ततार॥ १॥

((ṛdhyāsma havyairnamasopasadya |
mitraṃ devaṃ mitradheyaṃ no astu |
anūrādhānhaviṣā vardhayantaḥ |
śataṃ jīvema śaradaḥ savīrāḥ |
citraṃ nakṣattramudagātpurastāt |
anūrādhāsa iti yadvadanti |
tanmitra eti pathibhirdevayānaiḥ |
hiraṇyayairvitatairantarikṣe |
indro jyeṣṭhāmanu nakṣattrameti |
yasminvṛtraṃ vṛtratūrye tatāra || 1 ||))

**[[3-1-2-2]]**

तस्मिन्वयममृतं दुहानाः।
क्षुधं तरेम दुरितिं दुरिष्टिम्।
पुरन्दराय वृषभाय धृष्णवे।
अषाढाय सहमानाय मीढुषे।
इन्द्राय ज्येष्ठा मधुमद्दुहाना।
उरुं कृणोतु यजमानाय लोकम्।
मूलं प्रजां वीरवतीं विदेय।
पराच्येतु निर्ऋतिः पराचा।
गोभिर्नक्षत्त्रं पशुभिः समक्तम्।
अहर्भूयाद्यजमानाय मह्यम्॥ २॥

((tasminvayamamṛtaṃ duhānāḥ |
kṣudhaṃ tarema duritiṃ duriṣṭim|
purandarāya vṛṣabhāya dhṛṣṇave |
aṣāḍhāya sahamānāya mīḍhuṣe |
indrāya jyeṣṭhā madhumadduhānā |
uruṃ kṛṇotu yajamānāya lokam |
mūlaṃ prajāṃ vīravatīṃ videya |
parācyetu nirṛtiḥ parācā |
gobhirnakṣattraṃ paśubhiḥ samaktam |
aharbhūyādyajamānāya mahyam || 2 ||))

**[[3-1-2-3]]**

अहर्नो अद्य सुविते दधातु।
मूलं नक्षत्त्रमिति यद्वदन्ति।
पराचीं वाचा निर्ऋतिं नुदामि।
शिवं प्रजायै शिवमस्तु मह्यम्।
या दिव्या आपः पयसा संबभूवुः।
या अन्तरिक्ष उत पार्थिवीर्याः।
यासामषाढा अनुयन्ति कामम्।
ता न आपः शꣳ स्योना भवन्तु।
याश्च कूप्या याश्च नाद्याः समुद्रियाः।
याश्च वैशन्तीरुत प्रासचीर्याः॥ ३॥

((aharno adya suvite dadhātu |
mūlaṃ nakṣattramiti yadvadanti |
parācīṃ vācā nirṛtiṃ nudāmi |
śivaṃ prajāyai śivamastu mahyam |
yā divyā āpaḥ payasā saṃbabhūvuḥ |
yā antarikṣa uta pārthivīryāḥ |
yāsāmaṣāḍhā anuyanti kāmam |
tā na āpaḥ śaṃ syonā bhavantu |
yāśca kūpyā yāśca nādyāḥ samudriyāḥ |
yāśca vaiśantīruta prāsacīryāḥ || 3 ||))

**[[3-1-2-4]]**

यासामषाढा मधु भक्षयन्ति।

ता न॒ आप॒ः शꣳ स्यो॒ना भ॑वन्तु।
तन्नो॒ विश्वे॒ उप॑ शृण्वन्तु दे॒वाः।
तद॑षाढा अ॒भि संय॑न्तु य॒ज्ञम्।
तन्नक्ष॑त्त्रं प्रथतां प॒शुभ्य॑ः।
कृ॒षिर्वृ॒ष्टिर्यज॑मानाय कल्पताम्।
शु॒भ्राः क॒न्या॑ युव॒तय॑ः सु॒पेश॑सः।
क॒र्म॒कृत॑ः सु॒कृतो॑ वी॒र्या॑वतीः।
विश्वा॑न्दे॒वान्ह॒विषा॑ व॒र्धय॑न्तीः।
अ॒षा॒ढाः काम॒मुप॑यान्तु य॒ज्ञम्॥ ४॥

((yāsa̍maṣa̱ḍhā madhu̍ bha̱kṣaya̍nti ।
tā na̱ āpa̱ḥ śam̐ syo̱nā bha̍vantu ।
tanno̱ viśve̱ upa̍ śṛṇvantu de̱vāḥ ।
tada̍ṣāḍhā a̱bhi saṃya̍ntu ya̱jñam ।
tannakṣa̍ttraṃ prathatāṃ pa̱śubhya̍ḥ ।
kṛ̱ṣirvṛ̱ṣṭiryaja̍mānāya kalpatām ।
śu̱bhrāḥ ka̱nya̍ yuva̱taya̍ḥ su̱peśa̍saḥ ।
ka̱rma̱kṛta̍ḥ su̱kṛto̍ vī̱rya̍vatīḥ ।
viśvā̍nde̱vānha̱viṣa̍ va̱rdhaya̍ntīḥ ।
a̱ṣā̱ḍhāḥ kāma̱mupa̍yāntu ya̱jñam ॥ 4 ॥))

**[[3-1-2-5]]**

यस्मि॒न्ब्रह्मा॒भ्यज॑य॒त्सर्व॑मे॒तत्।
अ॒मुं च॑ लो॒कमि॒दमू॑ च॒ सर्व॑म्।
तन्नो॒ नक्ष॑त्त्रमभि॒जिद्वि॒जित्य॑।
श्रियं॑ दधा॒त्वहृ॑णीयमानम्।
उ॒भौ लो॒कौ ब्रह्म॑णा॒ संजि॑ते॒मौ।
तन्नो॒ नक्ष॑त्त्रमभि॒जिद्वि॒चष्टाम्।
तस्मि॑न्व॒यं पृत॑ना॒ः संज॑येम।
तं नो॑ दे॒वासो॒ अनु॑जानन्तु काम॑म्।
शृण्वन्ति॑ श्रो॒णाम॒मृत॑स्य गो॒पाम्।
पुण्या॑मस्या॒ उप॑शृणोमि॒ वाच॑म्॥ ५॥

((yasmi̱nbrahmā̱bhyaja̍ya̱tsarva̍me̱tat ।
a̱muṃ ca̍ lo̱kami̱damū̍ ca̱ sarva̍m ।
tanno̱ nakṣa̍ttramabhi̱jidvi̱jitya̍ ।
śriya̍ṃ dadhā̱tvahṛ̍ṇīyamānam ।
u̱bhau lo̱kau brahma̍ṇā̱ saṃji̍te̱mau ।
tanno̱ nakṣa̍ttramabhi̱jidvica̍ṣṭām।
tasmi̍nva̱yaṃ pṛta̍nā̱ḥ saṃja̍yema ।
taṃ no̍ de̱vāso̱ anu̍jānantu̱ kāma̍m ।
śṛ̱ṇvanti̍ śro̱ṇāma̱mṛta̍sya go̱pām ।
puṇya̍masyā̱ upa̍śṛṇomi̱ vāca̍m ॥ 5 ॥))

**[[3-1-2-6]]**

म॒हीं दे॒वीं विष्णु॑पत्नीमजू॒र्याम्।
प्र॒तीची॑मेनाꣳ ह॒विषा॑ यजामः।
त्रे॒धा विष्णु॑रुरुगा॒यो विच॑क्रमे।
म॒हीं दिव॑ं पृथि॒वीम॒न्तरि॑क्षम्।
त॒च्छ्रो॒णैति॒ श्रव॑ इ॒च्छमा॑ना।
पुण्य॒ꣳ श्लोकं॒ यज॑मानाय कृ॒ण्वती।
अ॒ष्टौ दे॒वा वस॑वः सो॒म्यास॑ः।
चत॑स्रो दे॒वीर॒जरा॒ः श्रवि॑ष्ठाः।
ते य॒ज्ञं पा॑न्तु॒ रज॑सः प॒रस्ता॑त्।
सं॒व॒त्स॒रीण॑म॒मृत॒ꣳ स्व॒स्ति॥ ६॥

((ma̱hīm̱ de̱vīm̱ viṣṇu̍patnīmajū̱ryām ।
pra̱tīcī̍menām̐ ha̱viṣa̍ yajāmaḥ ।
tre̱dhā viṣṇu̍rurugā̱yo vica̍krame ।
ma̱hīm divam̍ pṛthi̱vīma̱ntari̍kṣam।
tacchro̱naiti̱ śrava̍ i̱cchamā̍nā ।
puṇya̱m̐ ślokam̱ yaja̍mānāya kṛ̱ṇva̱tī ।
a̱ṣṭau de̱vā vasa̍vaḥ so̱myāsa̍ḥ ।
cata̍sro de̱vīra̱jarā̱ḥ śravi̍ṣṭhāḥ ।
te ya̱jñaṃ pā̍ntu̱ raja̍saḥ pa̱rastā̍t ।
sa̱ṃva̱tsa̱rīṇa̍ma̱mṛta̱m̐ sva̱sti ॥ 6 ॥))

**[[3-1-2-7]]**

य॒ज्ञं न॑ः पान्तु॒ वस॑वः पु॒रस्ता॑त्।
द॒क्षि॒ण॒तो॑ऽभिय॑न्तु॒ श्रवि॑ष्ठाः।
पुण्य॒ं नक्ष॑त्त्रम॒भि संवि॑शाम।
मा नो॒ अरा॑तिर॒घश॒ꣳसा ग॑न्।
क्ष॒त्त्रस्य॒ राजा॒ वरु॑णोऽधिरा॒जः।
नक्ष॑त्त्राणाꣳ श॒तभि॑षग्वसि॑ष्ठः।
तौ दे॒वेभ्य॑ः कृणुतो दी॒र्घमायु॑ः।
श॒तꣳ स॒हस्रा॑ भेष॒जानि॑ धत्तः।
य॒ज्ञं नो॒ राजा॒ वरु॑ण॒ उप॑यातु।
तं नो॒ विश्वे॑ अ॒भि संय॑न्तु दे॒वाः॥ ७॥

((ya̱jñaṃ na̍ḥ pāntu̱ vasa̍vaḥ pu̱rastā̍t ।
da̱kṣi̱ṇa̱to̍'bhiya̍ntu̱ śravi̍ṣṭhāḥ ।
puṇya̱ṃ nakṣa̍ttrama̱bhi saṃvi̍śāma ।
mā no̱ arā̍tira̱ghaśa̱m̐sā ga̍n ।
kṣa̱ttrasya̱ rājā̱ varu̍ṇo'dhirā̱jaḥ ।
nakṣa̍ttrāṇām̐ śa̱tabhi̍ṣagvasi̍ṣṭhaḥ ।
tau de̱vebhya̍ḥ kṛṇuto dī̱rghamāyu̍ḥ ।
śa̱tam̐ sa̱hasra̍ bheṣa̱jāni̍ dhattaḥ ।
ya̱jñaṃ no̱ rājā̱ varu̍ṇa̱ upa̍yātu ।
taṃ no̱ viśve̍ a̱bhi saṃya̍ntu de̱vāḥ ॥ 7 ॥))

**[[3-1-2-8]]**

तन्नो नक्षत्त्रꣳ शतभिषग्जुषाणम्।
दीर्घमायुः प्रतिरद्भेषजानि।
अज एकपादुदगात्पुरस्तात्।
विश्वा भूतानि प्रतिमोदमानः।
तस्य देवाः प्रसवं यन्ति सर्वे।
प्रोष्ठपदासो अमृतस्य गोपाः।
विभ्राजमानः समिधान उग्रः।
आऽन्तरिक्षमरुहदगन्द्याम्।
तꣳ सूर्यं देवमजमेकपादम्।
प्रोष्ठपदासो अनुयन्ति सर्वे॥ ८॥

((tanno nakṣattraṁ śatabhiṣagjuṣāṇam |
dīrghamāyuḥ pratiradbheṣajāni |
aja ekapādudagātpurastāt |
viśvā bhūtāni pratimodamānaḥ |
tasya devāḥ prasavaṃ yanti sarve |
proṣṭhapadāso amṛtasya gopāḥ |
vibhrājamānaḥ samidhāna ugraḥ |
ā.ntarikṣamaruhadagandyām |
taṁ sūryaṃ devamajamekapādam |
proṣṭhapadāso anuyanti sarve || 8 ||))

**[[3-1-2-9]]**

अहिर्बुध्नियः प्रथमान एति।
श्रेष्ठो देवानामुत मानुषाणाम्।
तं ब्राह्मणाः सोमपाः सोम्यासः।
प्रोष्ठपदासो अभिरक्षन्ति सर्वे।
चत्वार एकमभिकर्म देवाः।
प्रोष्ठपदास इति यान्वदन्ति।
ते बुध्नियं परिषद्यꣳ स्तुवन्तः।
अहिꣳ रक्षन्ति नमसोपसद्य।
पूषा रेवत्यन्वेति पन्थाम्।
पुष्टिपती पशुपा वाजबस्त्यौ॥ ९॥

((ahirbudhniyaḥ prathamāna eti |
śreṣṭho devānāmuta mānuṣāṇām |
taṃ brāhmaṇāḥ somapāḥ somyāsaḥ |
proṣṭhapadāso abhirakṣanti sarve |
catvāra ekamabhikarma devāḥ |
proṣṭhapadāsa iti yānvadanti |
te budhniyaṃ pariṣadyaṁ stuvantaḥ |
ahiṁ rakṣanti namasopasadya |
pūṣā revatyanveti panthām |
puṣṭipatī paśupā vājabastyau || 9 ||))

**[[3-1-2-10]]**

इमानि हव्या प्रयता जुषाणा।
सुगैर्नो यानैरुपयातां यज्ञम्।
क्षुद्रान्पशून्रक्षतु रेवती नः।
गावो नो अश्वाꣳ अन्वेतु पूषा।
अन्नꣳ रक्षन्तौ बहुधा विरूपम्।
वाजꣳ सनुतां यजमानाय यज्ञम्।
तदश्विनावश्वयुजोपयाताम्।
शुभं गमिष्ठौ सुयमेभिरश्वैः।
स्वं नक्षत्त्रꣳ हविषा यजन्तौ।
मध्वा संपृक्तौ यजुषा समक्तौ॥ १०॥

((imāni havyā prayatā juṣāṇā |
sugairno yānairupayātāṃ yajñam |
kṣudrānpaśūnrakṣatu revati naḥ |
gāvo no aśvāṁ anvetu pūṣā |
annaṁ rakṣantau bahudhā virūpam |
vājaṁ sanutāṃ yajamānāya yajñam |
tadaśvināvaśvayujopayātām |
śubhaṃ gamiṣṭhau suyamebhiraśvaiḥ |
svaṃ nakṣattraṁ haviṣā yajantau |
madhvā saṃpṛktau yajuṣā samaktau || 10 ||))

**[[3-1-2-11]]**

यौ देवानां भिषजौ हव्यवाहौ।
विश्वस्य दूतावमृतस्य गोपौ।
तौ नक्षत्त्रं जुजुषाणोपयाताम्।
नमोऽश्विभ्यां कृणुमोऽश्वयुग्भ्याम्।
अप पाप्मानं भरणीर्भरन्तु।
तद्यमो राजा भगवान्विचष्टाम्।
लोकस्य राजा महतो महान्हि।
सुगं नः पन्थामभयं कृणोतु।
यस्मिन्नक्षत्त्रे यम एति राजा।
यस्मिन्नेनमभ्यषिञ्चन्त देवाः।
तदस्य चित्रꣳ हविषा यजाम।
अप पाप्मानं भरणीर्भरन्तु।
निवेशनी यत्ते देवा अदधुः॥ ११॥
ततार महां प्रासचीर्या यान्तु यज्ञं वाचꣳ स्वस्ति देवा अनु
यन्ति सर्वे वाजबस्त्यौ समक्तौ देवास्त्रीणि च॥ २॥

((yau de̱vānā̃m̐ bhi̱ṣajau̍ havyavā̱hau |
viśva̍sya dū̱tāva̱mṛta̍sya go̱pau |
tau nakṣa̍ttram jujuṣā̱ṇopa̍yātām |
namo̱'śvibhyā̃m̐ kṛṇumo'śva̱yugbhyā̃m̐ |
apa̍ pā̱pmāna̱m bhara̍ṇīrbharantu |
tadya̱mo rājā̱ bhaga̍vā̱nvica̍ṣṭām |
lo̱kasya̱ rājā̍ maha̱to ma̱hānhi |
su̱gaṃ na̱ḥ panthā̱mabha̍yaṃ kṛṇotu |
yasmi̱nnakṣa̍ttre ya̱ma eti̱ rājā̃ |
yasmi̍nnenama̱bhyaṣi̍ñcanta de̱vāḥ |
tada̍sya ci̱tram̐ ha̱viṣā̍ yajāma |
apa̍ pā̱pmāna̱m bhara̍ṇīrbharantu |
ni̱veśa̍nī yatte̍ de̱vā ada̍dhuḥ || 11 ||
ta̱tāra̱ mahya̱m prāsa̱cīryā yā̃ntu ya̱jñam vāca̍m̐
sva̱sti de̱vā anu̍ yanti̱ sarve̱ vāja̍bastyau̱ sama̍ktau
de̱vāstrīṇi̍ ca || 2 ||))

**[[3-1-3-1]]**

नवो॑ नवो भवति॒ जाय॑मानो॒ यमा॑दि॒त्या
अ॒ꣳशुमा॑प्या॒यय॑न्ति।
ये विरू॑पे॒ सम॑नसा सं॒व्यय॑न्ती।
स॒मा॒नं तन्तुं॑ परि ता॒त॒नाते॑।
वि॒भू प्र॒भू अ॑नु॒भू वि॒श्वतो॑ हुवे।
ते नो॒ नक्ष॑त्त्रे ह॒वमाग॑मेतम्।
व॒यं दे॒वी ब्रह्म॑णा संविदा॒नाः।
सु॒रत्ना॑सो दे॒ववी॑तिं॒ दधा॑नाः।
अ॒हो॒रा॒त्रे ह॒विषा॑ व॒र्धय॑न्तः।
अति॑ पा॒प्मान॒मति॑मुक्त्या गमेम।
प्रत्यु॑वद्दृश्याय॒ती॥ १॥

((navo̍ navo bhavati̱ jāya̍māno̱ yamā̍di̱tyā
a̱m̐śumā̍pyā̱yaya̍nti |
ye virū̍pe̱ sama̍nasā sa̱ṃvyaya̍ntī |
sa̱mā̱naṃ tantu̍ṃ pari tāta̱nāte̍ |
vi̱bhū pra̱bhū a̍nu̱bhū vi̱śvato̍ huve |
te no̱ nakṣa̍ttre̱ hava̱māga̍metam |
va̱yaṃ de̱vī brahma̍ṇā saṃvidā̱nāḥ |
su̱ratnā̍so de̱vavī̍ti̱m dadhā̍nāḥ |
a̱ho̱rātre ha̱viṣā̍ va̱rdhaya̍ntaḥ |
ati̍ pā̱pmāna̱mati̍muktyā gamema |
pratyu̍vadṛ̱śyāya̱tī || 1 ||))

**[[3-1-3-2]]**

व्यु॒च्छन्ती॑ दुहि॒ता दि॒वः।
अ॒पो म॒ही वृ॑णु॒ते चक्षु॑षा।
तमो॒ ज्योति॑ष्कृणोति सू॒नरी॑।
उदु॒स्रियाः॑ सचते॒ सूर्यः॑।
सचा॑ उ॒द्यन्नक्ष॑त्त्रमर्चि॒मत्।
तवेदु॑षो व्यु॒षि॒ सूर्य॑स्य च।
सं भ॒क्तेन॑ गमेमहि।
तन्नो॒ नक्ष॑त्रमर्चि॒मत्।
भा॒नु॒मत्तेज॑ उ॒च्चर॑त्।
उप॑ य॒ज्ञमि॒हाग॑मत्॥ २॥

((vyu̱cchantī̍ duhi̱tā di̱vaḥ |
a̱po ma̱hī vṛ̍ṇute̱ cakṣu̍ṣā |
tamo̱ jyotiṣkṛṇoti sū̱narī̍ |
udu̱sriyā̍ḥ sacate̱ sūrya̍ḥ |
sacā̍ u̱dyannakṣa̍ttramarci̱mat |
tavedu̍ṣo̱ vyuṣi̱ sūrya̍sya ca |
saṃ bha̱ktena̍ gamemahi |
tanno̱ nakṣa̍tramarci̱mat |
bhā̱nu̱matteja̍ u̱ccara̍t |
upa̍ ya̱jñami̱hāga̍mat || 2 ||))

**[[3-1-3-3]]**

प्र नक्ष॑त्राय दे॒वाय॑।
इन्द्रा॒येन्दु॑ꣳ हवामहे।
स नः॑ सवि॒ता सु॒वत्स॒निम्।
पु॒ष्टि॒दां वी॒रव॑त्तमम्।
उदु॒ त्यं चि॒त्रम्।
अदि॑तिर्न उरुष्यतु म॒हीमू॒ षुमा॒तर॑म्।
इ॒दं विष्णुः॒ प्र तद्विष्णु॑ः।
अ॒ग्निर्मू॒र्धा भुव॑ः।
अनु॑ नो॒ऽद्यानु॑मति॒रन्विद॑नुमते॒ त्वम्।
ह॒व्य॒वा॒ह॒ꣳ स्वि॑ष्टम्॥ ३॥
आ॒य॒त्य॑गम॒त्स्वि॑ष्टम्॥ ३॥

((pra nakṣa̍trāya de̱vāya̍ |
indrā̱yendu̍m̐ havāmahe |
sa na̍ḥ savi̱tā su̍vatsa̱nim |
pu̱ṣṭi̱dāṃ vī̱rava̍ttamam |
udu̱ tyaṃ ci̱tram |
adi̍tirna uruṣyatu ma̱hīmū̱ ṣumā̱tarā̃m |
i̱daṃ viṣṇu̱ḥ pra tadviṣṇu̍ḥ |
a̱gnirmū̱rdhā bhuva̍ḥ |
anu̍ no̱'dyānu̍mati̱ranvida̍numate̱ tvam |
ha̱vya̱vāha̱m̐ sviṣṭam || 3 ||
ā̱ya̱tya̍gama̱tsviṣṭam || 3 ||))

**[[3-1-4-1]]**

अ॒ग्निर्वा अ॑कामयत।
अ॒न्ना॒दो दे॒वाना॑ꣳ स्या॒मिति॑।
स ए॒तम॒ग्नये॑ कृत्ति॑काभ्यः पुरो॒डाश॑म॒ष्टाक॑पालं॒ निर॑वपत्।

ततो॒ वै सो᳚ऽन्ना॒दो दे॒वाना॑मभवत्।
अ॒ग्निर्वै दे॒वाना॑मन्ना॒दः।
यथा॑ ह॒ वा अ॒ग्निर्दे॒वना॑मन्ना॒दः।
ए॒व२ँ ह॒ वा ए॒ष म॑नु॒ष्या॑णां भवति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैन॒देवं॒ वेद॑।
सोऽत्र॑ जुहोति।
अ॒ग्नये॒ स्वाहा॒ कृत्ति॑काभ्यः॒ स्वाहा᳚।
अ॒म्बायै॒ स्वाहा॑ दु॒लायै॒ स्वाहा᳚।
नि॒त॒त्न्यै स्वाहा॒ भ्रय॑न्त्यै॒ स्वाहा᳚।
मे॒घय॑न्त्यै॒ स्वाहा॑ व॒र्षय॑न्त्यै॒ स्वाहा᳚।
चु॒पु॒णीका॑यै॒ स्वाहेति॑॥ १॥

((a̱gnirvā ȧkāmayata |
a̱nnā̱do de̱vānā̱m̐ syā̱miti̍ |
sa e̱tama̱gnaye̱ kr̥tti̍kābhya̱ḥ
puro̱ḍāśȧmaṣṭākȧpālam̱ nirȧvapat |
tato̱ vai sȍ'nnā̱do de̱vānȧmabhavat |
a̱gnirvai de̱vānȧmannā̱daḥ |
yathȧ ha̱ vā a̱gnirde̱vanȧmannā̱daḥ |
e̱vam̐ ha̱ vā e̱ṣa mȧnu̱ṣyȧṇā̱m bhavati |
ya e̱tenȧ ha̱viṣā̱ yajȧte |
ya u̍ caina̱devam̱ vedȧ |
so'trȧ juhoti |
a̱gnaye̱ svāhā̱ kr̥tti̍kābhya̱ḥ svāhȁ |
a̱mbāya̱i svāhȧ du̱lāya̱i svāhȁ |
ni̱ta̱tnyai svāhā̱ bhrayȧntya̱i svāhȁ |
me̱ghayȧntya̱i svāhȧ va̱rṣayȧntya̱i svāhȁ |
cu̱pu̱ṇīkȧya̱i svāheti̍ || 1 ||))

**[[3-1-4-2]]**
प्र॒जाप॑तिः प्र॒जा अ॑सृजत।
ता अ॑स्मात्सृ॒ष्टाः परा॑चीरायन्न्।
तासा॒२ँ रोहि॒णीम॒भ्य॑ध्यायत्।
सो॑ऽकामयत।
उप॒ मा व॑र्तेत।
सम॑नया गच्छे॒येति॑।
स ए॒तं प्र॒जाप॑तये रोहि॒ण्यै च॒रुं निर॑वपत्।
ततो॒ वै सा तमु॒पाव॑र्तत।
सम॑नयाऽगच्छत।
उप॑ ह॒ वा ए॑नं प्रि॒यमाव॑र्तते।
सं प्रि॒येण॑ गच्छते।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
प्र॒जाप॑तये॒ स्वाहा॑ रोहि॒ण्यै स्वाहा᳚।
रोच॑मानायै॒ स्वाहा᳚ प्र॒जाभ्यः॒ स्वाहेति॑॥ २॥

((pra̱jāpȧtiḥ pra̱jā ȧsr̥jata |
tā ȧsmātsr̥̱ṣṭāḥ parȧcīrāyann|
tāsā̱m̐ rohi̱ṇīma̱bhyȧdhyāyat |
sȯ'kāmayata |
upa̱ mā vȧrteta |
samȧnayā gacche̱yeti̍ |
sa e̱taṃ pra̱jāpȧtaye rohi̱ṇyai ca̱ruṃ nirȧvapat |
tato̱ vai sā tamu̱pāvȧrtata |
samȧnayā'gacchata |
upȧ ha̱ vā ȧnaṃ pri̱yamāvȧrtate |
saṃ pri̱yeṇȧ gacchate |
ya e̱tenȧ ha̱viṣā̱ yajȧte |
ya u̍ cainade̱vaṃ vedȧ |
so'trȧ juhoti |
pra̱jāpȧtaye̱ svāhȧ rohi̱ṇyai svāhȁ |
rocȧmānāya̱i svāhȁ pra̱jābhya̱ḥ svāheti̍ || 2 ||))

**[[3-1-4-3]]**
सोमो॒ वा अ॑कामयत।
ओष॑धीना२ँ रा॒ज्यम॒भिज॑येय॒मिति॑।
स ए॒त२ँ सोमा॑य मृगशी॒र्षाय॑ श्यामा॒कं च॒रुं पय॑सि॒
निर॑वपत्।
ततो॒ वै स ओष॑धीना२ँ रा॒ज्यम॒भ्य॑जयत्।
स॒मा॒ना॒ना॒२ँ ह॒ वै रा॒ज्यम॒भिज॑यति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
सोमा॑य॒ स्वाहा॑ मृगशी॒र्षा॒य॒ स्वाहा᳚।
इ॒न्व॒काभ्यः॒ स्वाहौष॑धीभ्यः॒ स्वाहा᳚।
रा॒ज्याय॒ स्वाहा॒ऽभिजि॑त्यै॒ स्वाहेति॑॥ १॥

((somo̱ vā ȧkāmayata |
oṣȧdhīnā̱m̐ rā̱jyama̱bhijȧyeya̱miti̍ |
sa e̱tam̐ somȧya mr̥gaśī̱rṣāyȧ śyāmā̱kaṃ ca̱ruṃ
payȧsi̱ nirȧvapat |
tato̱ vai sa oṣȧdhīnā̱m̐ rā̱jyama̱bhyȧjayat|
sa̱mā̱nānā̱m̐ ha̱ vai rā̱jyama̱bhijȧyati |
ya e̱tenȧ ha̱viṣā̱ yajȧte |
ya u̍ cainade̱vaṃ vedȧ |
so'trȧ juhoti |
somȧya̱ svāhȧ mr̥gaśī̱rṣāya̱ svāhȁ |
i̱nva̱kābhya̱ḥ svāhauoṣȧdhībhya̱ḥ svāhȁ |

rājyāya̱ svāhā̱'bhiji̍tyai̱ svāheti̍ ॥ 1 ॥))

**[[3-1-4-4]]**

रु॒द्रो वा अ॑कामयत।

प॒शुमान्त्स्या॒मिति॑।

स ए॒तꣳ रु॒द्राया॒र्द्राये॒ प्रैय्य॑ङ्गवं च॒रुं पय॑सि॒ निर॑वपत्।

ततो॒ वै स प॑शु॒मान॑भवत्।

प॒शुमान्ह॒ वै भ॑वति।

य ए॒तेन॑ ह॒विषा॒ यज॑ते।

य उ॑ चैनदे॒वं वेद॑।

सोऽत्र॑ जुहोति।

रु॒द्राय॒ स्वाहा॒ऽऽर्द्रायै॒ स्वाहा᳚।

पिन्व॑मानायै॒ स्वाहा॑ प॒शुभ्य॒ः स्वाहेति॑॥ ४॥

((ru̱dro vā a̍kāmayata ।
pa̱śu̱māntsyā̱miti̍ ।
sa e̱tam̐ ru̱drāyā̱rdrāyai̱ praiyya̍ṅgavaṃ ca̱ruṃ
paya̍si̱ nira̍vapat ।
tato̱ vai sa pa̍śu̱mānā̍bhavat ।
pa̱śu̱mānha̱ vai bha̍vati ।
ya e̱tena̍ ha̱viṣā̱ yaja̍te ।
ya u̍ cainade̱vaṃ veda̍ ।
so'tra̍ juhoti ।
ru̱drāya̱ svāhā̱''rdrāyai̱ svāhā᳚ ।
pinva̍mānāyai̱ svāhā̍ pa̱śubhya̱ḥ svāheti̍ ॥ 4 ॥))

**[[3-1-4-5]]**

ऋ॒क्षा वा इ॒यम॑लो॒मका॑ऽऽसीत्।

साऽका॑मयत।

ओष॑धीभि॒र्वन॒स्पति॑भि॒ः प्रजा॑ये॒येति॑।

सैतमदि॑त्यै॒ पुन॑र्वसुभ्यां च॒रुं निर॑वपत्।

ततो॒ वा इ॒यमोष॑धीभि॒र्वन॒स्पति॑भि॒ः प्राजा॑यत।

प्रजा॑यते ह॒ वै प्रजया॑ प॒शुभि॑ः।

य ए॒तेन॑ ह॒विषा॒ यज॑ते।

य उ॑ चैनदे॒वं वेद॑।

सोऽत्र॑ जुहोति।

अदि॑त्यै॒ स्वाहा॒ पुन॑र्वसुभ्याम्।

स्वाहाऽऽभू᳚त्यै॒ स्वाहा॒ प्रजा᳚त्यै॒ स्वाहेति॑॥ ५॥

((ṛ̱kṣā vā i̱yama̍lo̱makā̍''sīt ।
sā'kā̍mayata ।
oṣa̍dhībhi̱rvana̱spati̍bhi̱ḥ prajā̍ye̱yeti̍ ।
saitamadi̍tyai̱ puna̍rvasubhyāṃ ca̱ruṃ nira̍vapat ।
tato̱ vā i̱yamoṣa̍dhībhi̱rvana̱spati̍bhi̱ḥ prājā̍yata ।
prajā̍yate ha̱ vai pra̱jayā̍ pa̱śubhi̍ḥ ।
ya e̱tena̍ ha̱viṣā̱ yaja̍te ।
ya u̍ cainade̱vaṃ veda̍ ।
so'tra̍ juhoti ।
adi̍tyai̱ svāhā̱ puna̍rvasubhyām ।
svāhā''bhū᳚tyai̱ svāhā̱ prajā᳚tyai̱ svāheti̍ ॥ 5 ॥))

**[[3-1-4-6]]**

बृ॒ह॒स्पति॒र्वा अ॑कामयत।

ब्र॒ह्म॒व॒र्च॒सी स्या॒मिति॑।

स ए॒तं बृ॒ह॒स्पत॑ये ति॒ष्या॑य नैवा॒रं च॒रुं पय॑सि॒ निर॑वपत्।

ततो॒ वै स ब्र॑ह्मवर्च॒स्य॑भवत्।

ब्र॒ह्म॒व॒र्च॒सी ह॒ वै भ॑वति।

य ए॒तेन॑ ह॒विषा॒ यज॑ते।

य उ॑ चैनदे॒वं वेद॑।

सोऽत्र॑ जुहोति।

बृ॒ह॒स्पत॑ये॒ स्वाहा॑ ति॒ष्या॑य॒ स्वहा᳚।

ब्र॒ह्म॒व॒र्च॒साय॒ स्वाहेति॑॥ ६॥

((bṛ̱ha̱spati̱rvā a̍kāmayata ।
bra̱hma̱va̱rca̱sī syā̱miti̍ ।
sa e̱taṃ bṛ̱ha̱spata̍ye ti̱ṣyā̍ya naivā̱raṃ ca̱ruṃ paya̍si̱
nira̍vapat ।
tato̱ vai sa bra̍hmavarca̱syā̍bhavat ।
bra̱hma̱va̱rca̱sī ha vai bha̍vati ।
ya e̱tena̍ ha̱viṣā̱ yaja̍te ।
ya u̍ cainade̱vaṃ veda̍ ।
so'tra̍ juhoti ।
bṛ̱ha̱spata̍ye̱ svāhā̍ ti̱ṣyā̍ya̱ svahā᳚ ।
bra̱hma̱va̱rca̱sāya̱ svāheti̍ ॥ 6 ॥))

**[[3-1-4-7]]**

दे॒वा॒सु॒राः संय॑त्ता आसन्न्।

ते दे॒वाः स॒र्पेभ्य॑ आश्रे॒षाभ्य॒ आज्ये॑ कर॒म्भं निर॑वपन्न्।

तने॒ताभि॑रे॒व दे॒वता॑भि॒रुपा॑नयन्।

ए॒ताभि॑र्ह॒ वै दे॒वता॑भिर्द्वि॒षन्तं॒ भ्रातृ॑व्य॒मुप॑नयति।

य ए॒तेन॑ ह॒विषा॒ यज॑ते।

य उ॑ चैनदे॒वं वेद॑।

सोऽत्र॑ जुहोति।

स॒र्पेभ्य॒ः स्वाहा॒ऽऽश्रे॒षाभ्य॒ः स्वाहा᳚।

द॒न्द॒शूके᳚भ्य॒ः स्वाहेति॑॥ ७॥

((de̱vā̱su̱rāḥ sa̱ṃya̍ttā āsann ।
te de̱vāḥ sa̱rpebhya̍ āśre̱ṣābhya̱ ājye̍ kara̱mbhaṃ
nira̍vapann ।
tane̱tābhi̍re̱va de̱vatā̍bhi̱rupā̍nayan ।

e̱tābhi̍rha̱ vai de̱vatā̍bhirdvi̱ṣanta̱m
bhrātṛ̍vya̱mupā̍nayati ।
ya e̱tena̍ ha̱viṣā̱ yaja̍te ।
ya u̍ cainade̱vaṃ veda̍ ।
so'tra̍ juhoti ।
sa̱rpebhya̱ḥ svāhā̎''śre̱ṣābhya̱ḥ svāhā̎ ।
da̱nda̱śūke̎bhya̱ḥ svāheti̍ ॥ 7 ॥))

**[[3-1-4-8]]**

पि॒तरो॒ वा अ॑कामयन्त।
पि॒तृ॒लो॒क ऋ॑ध्नु॒यामेति॑।
त ए॒तं पि॒तृभ्यो॑ म॒घाभ्यः॑ पु॒रो॒डा॒श॒ꣳ॒ षट्क॑पालं॒ निर॑वपन्न्।
ततो॒ वै ते पि॑तृलो॒क आ᳚र्ध्नुवन्।
पि॒तृ॒लो॒के ह॒ वा ऋ॑ध्नोति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
पि॒तृभ्य॒ः स्वाहा॑ म॒घाभ्यः॑।
स्वाहा॑ऽन॒घाभ्यः॒ स्वाहा॑ऽग॒दाभ्यः॑।
स्वाहा॑ऽरुन्ध॒तीभ्य॒ः स्वाहेति॑॥ ८॥

((pi̱taro̱ vā a̍kāmayanta ।
pi̱tṛ̱lo̱ka ṛ̍dhnu̱yāmeti̍ ।
ta e̱taṃ pi̱tṛbhyo̍ ma̱ghābhya̍ḥ puro̱ḍāśa̱m̱̐
ṣaṭka̍pāla̱ṃ nira̍vapann ।
tato̱ vai te pi̍tṛlo̱ka ā̎rdhnuvan ।
pi̱tṛ̱lo̱ke ha̱ vā ṛ̍dhnoti ।
ya e̱tena̍ ha̱viṣā̱ yaja̍te ।
ya u̍ cainade̱vaṃ veda̍ ।
so'tra̍ juhoti ।
pi̱tṛbhya̱ḥ svāhā̍ ma̱ghābhya̍ḥ ।
svāhā̍'na̱ghābhya̱ḥ svāhā̍'ga̱dābhya̍ḥ ।
svāhā̍'rundha̱tībhya̱ḥ svāheti̍ ॥ 8 ॥))

**[[3-1-4-9]]**

अ॒र्य॒मा वा अ॑कामयत।
प॒शु॒मान्त्स्या॒मिति॑।
स ए॒तम॑र्य॒म्णे फल्गु॑नीभ्यां च॒रुं निर॑वपत्।
ततो॒ वै स प॑शु॒मान॑भवत्।
प॒शु॒मान्ह॒ वै भ॑वति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
अ॒र्य॒म्णे स्वाहा॒ फल्गु॑नीभ्या॒ꣳ॒ स्वाहा᳚।
प॒शुभ्य॒ः स्वाहेति॑॥ ९॥

((a̱rya̱mā vā a̍kāmayata ।
pa̱śu̱māntsyā̱miti̍ ।
sa e̱tama̍rya̱mṇe phalgu̍nībhyā̱ṃ ca̱ruṃ nira̍vapat ।
tato̱ vai sa pa̍śu̱mānā̍bhavat ।
pa̱śu̱mānha̱ vai bha̍vati ।
ya e̱tena̍ ha̱viṣā̱ yaja̍te ।
ya u̍ cainade̱vaṃ veda̍ ।
so'tra̍ juhoti ।
a̱rya̱mṇe svāhā̱ phalgu̍nībhyā̱m̱̐ svāhā̎ ।
pa̱śubhya̱ḥ svāheti̍ ॥ 9 ॥))

**[[3-1-4-10]]**

भगो॒ वा अ॑कामयत।
भ॒गी श्रे॒ष्ठी दे॒वाना॒ꣳ॒ स्या॒मिति॑।
स ए॒तं भगा॑य फल्गु॑नीभ्यां च॒रुं निर॑वपत्।
ततो॒ वै स भ॒गी श्रे॒ष्ठी दे॒वाना॑मभवत्।
भ॒गी ह॒ वै श्रे॒ष्ठी स॑मा॒नाना᳚ं भवति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
भगा॑य स्वाहा॑ फल्गु॑नीभ्या॒ꣳ॒ स्वाहा᳚।
श्रै॒ष्ठ्या॑य॒ स्वाहेति॑॥ १०॥

((bha̱go̱ vā a̍kāmayata ।
bha̱gī śre̱ṣṭhī de̱vānā̱m̐ syā̱miti̍ ।
sa e̱taṃ bha̱gā̎ya pha̱lgu̍nībhyā̱ṃ ca̱ruṃ nira̍vapat ।
tato̱ vai sa bha̱gī śre̱ṣṭhī de̱vānā̍mabhavat ।
bha̱gī ha̱ vai śre̱ṣṭhī sa̍mā̱nānā̎ṃ bhavati ।
ya e̱tena̍ ha̱viṣā̱ yaja̍te ।
ya u̍ cainade̱vaṃ veda̍ ।
so'tra̍ juhoti ।
bhagā̎ya svāhā̍ phalgu̍nībhyā̱m̱̐ svāhā̎ ।
śraiṣṭhyā̎ya̱ svāheti̍ ॥ 10 ॥))

**[[3-1-4-11]]**

स॒वि॒ता वा अ॑कामयत।
श्रन्मे॑ दे॒वा द॒धीरन्न्।
स॒वि॒ता स्या॒मिति॑।
स ए॒तꣳ स॑वि॒त्रे हस्ता॑य पु॒रो॒डाशं॒ द्वाद॑शकपालं॒
निर॑वपदाशू॒नां व्री॒ही॒णाम्।
ततो॒ वै तस्मै॒ श्रद्दे॒वा अद॑धत।
स॒वि॒ताऽभ॑वत्।
श्रद्ध॒ वा अ॑स्मै मनु॒ष्या॑ दधते।

स॒वि॒ता स॑मा॒नाना॑ँ भवति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
स॒वि॒त्रे स्वाहा॒ हस्ता॑य।
स्वाहा॑ दद॒ते स्वाहा॑ पृण॒ते।
स्वाहा॑ँ प्र॒यच्छ॑ते॒ स्वाहा॑ँ प्रतिगृभ्ण॒ते स्वाहेति॑॥ ११॥

((sa̱vi̱tā vā a̍kāmayata ।
śranme̍ de̱vā dadhi̍rann ।
sa̱vi̱tā syā̱miti̍ ।
sa e̱tam̐ sa̍vi̱tre hasta̍ya puro̱ḍā̍śam̱
dvādaśakapālam̱ nira̍vapadāśū̱nām̱ vri̍hi̱ṇām ।
tato̱ vai tasmai̱ śradde̱vā ada̍dhata ।
sa̱vi̱tā'bha̍vat ।
śraddha̱ vā a̍smai manu̱ṣya̍ dadhate ।
sa̱vi̱tā sa̍mā̱nānā̍m̐ bhavati ।
ya e̱tena̍ ha̱viṣā̱ yaja̍te ।
ya u̍ cainade̱vam̱ veda̍ ।
so'tra̍ juhoti ।
sa̱vi̱tre svāhā̱ hasta̍ya ।
svāhā̍ dada̱te svāhā̍ pṛṇa̱te ।
svāhā̍ँ pra̱yacchate̱ svāhā̍ँ pratigṛbhṇa̱te svāheti̍ ॥ 11 ॥))

**[[3-1-4-12]]**

त्वष्टा॒ वा अ॑कामयत।
चि॒त्रं प्र॒जां वि॑न्दे॒येति॑।
स ए॒तं त्वष्ट्रे॑ चि॒त्राये॑ पुरो॒डाश॑मष्टाक॑पालं॒ निर॑वपत्।
तत॒ो वै स चि॒त्रं प्र॒जाम॑विन्दत।
चि॒त्रꣳ ह॒ वै प्र॒जां वि॑न्दते।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
त्वष्ट्रे॒ स्वाहा॑ चि॒त्राये॒ स्वाहा॑ँ।
चैत्रा॑य॒ स्वाहा॑ँ प्र॒जाये॒ स्वाहेति॑॥ १२॥

((tvaṣṭā̱ vā a̍kāmayata ।
ci̱tram̱ pra̱jā̱m vi̍nde̱yeti̍ ।
sa e̱tam̱ tvaṣṭre̍ ci̱trāyai̍ puro̱ḍā̍śa̍ma̱ṣṭāka̍pālam̱
nira̍vapat ।
tato̱ vai sa ci̱tram̱ pra̱jāma̍vindata ।
ci̱tram̐ ha̱ vai pra̱jā̱m vi̍ndate ।
ya e̱tena̍ ha̱viṣā̱ yaja̍te ।
ya u̍ cainade̱vam̱ veda̍ ।
so'tra̍ juhoti ।
tvaṣṭre̱ svāhā̍ ci̱trāyai̱ svāhā̍ँ ।
caitrā̍ya̱ svāhā̍ँ pra̱jāyai̱ svāheti̍ ॥ 12 ॥))

**[[3-1-4-13]]**

वा॒युर्वा अ॑कामयत।
का॒म॒चार॑मे॒षु लो॒केष्व॒भिज॑येय॒मिति॑।
स ए॒तद्वा॒यवे॒ निष्ट्या॑यै गृष्ट्यै॑ दु॒ग्धं पयो॒ निर॑वपत्।
तत॒ो वै स का॑म॒चार॑मे॒षु लो॒केष्व॒भ्य॑जयत्।
का॒म॒चारꣳ॑ ह॒ वा ए॒षु लो॒केष्व॒भिज॑यति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
वा॒यवे॒ स्वाहा॒ निष्ट्या॑यै॒ स्वाहा॑ँ।
का॒म॒चारा॑य॒ स्वाहा॒ऽभिजि॑त्यै॒ स्वाहेति॑॥ १३॥

((vā̱yurvā a̍kāmayata ।
kā̱ma̱cāra̍me̱ṣu lo̱keṣva̱bhija̍yeya̱miti̍ ।
sa e̱tadvā̱yave̱ niṣṭyā̍yai gṛṣṭyai̍ du̱gdham̱ payo̱
nira̍vapat ।
tato̱ vai sa kā̍ma̱cāra̍me̱ṣu lo̱keṣva̱bhya̍jayat ।
kā̱ma̱cāram̐ ha̱ vā e̱ṣu lo̱keṣva̱bhija̍yati ।
ya e̱tena̍ ha̱viṣā̱ yaja̍te ।
ya u̍ cainade̱vam̱ veda̍ ।
so'tra̍ juhoti ।
vā̱yave̱ svāhā̱ niṣ̱ṭyā̍yai̱ svāhā̍ँ ।
kā̱ma̱cārā̍ya̱ svāhā̱'bhiji̍tyai̱ svāheti̍ ॥ 13 ॥))

**[[3-1-4-14]]**

इ॒न्द्रा॒ग्नी वा अ॑कामयेताम्।
श्रैष्ठ्य॑ँ दे॒वाना॑म॒भिज॑येवेति॑।
ता॒वे॒तमि॑न्द्रा॒ग्निभ्यां॒ विशा॑खाभ्यां॒ पुरो॒डाश॒मेका॑दशकपालं॒
निर॑वपताम्।
तत॒ो वै तौ श्रैष्ठ्य॑ँ दे॒वाना॑म॒भ्य॑जयताम्।
श्रैष्ठ्यꣳ॑ ह॒ वै स॑मा॒नाना॑म॒भिज॑यति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
इ॒न्द्रा॒ग्निभ्या॒ꣳ स्वाहा॒ विशा॑खाभ्या॒ꣳ स्वाहा॑ँ।
श्रैष्ठ्या॑य॒ स्वाहा॒ऽभिजि॑त्यै॒ स्वाहेति॑॥ १४॥

((i̱ndrā̱gnī vā a̍kāmayetām ।
śraiṣṭhyam̐ de̱vānā̍ma̱bhija̍ye̱veti̍ ।
tāve̱tami̍ndrā̱gnibhyā̱m̱ viśā̍khābhyā̱m̱
puro̱ḍāśa̱mekā̍daśakapālam̱ nira̍vapatām ।
tato̱ vai tau śraiṣṭhyam̐ de̱vānā̍ma̱bhya̍jayatām ।
śraiṣṭhyam̐ ha̱ vai sa̍mā̱nānā̍ma̱bhija̍yati ।

ya e̱tena̍ ha̱vi̱ṣā̱ yaja̍te |
ya u̍ caina̱de̱vaṃ̱ veda̍ |
so'tra̍ juhoti |
i̱ndrā̱gnibhyā̱m̐ svāhā̱ viśā̍khābhyā̱m̐ svāhā̎ |
śraiṣṭhyā̍ya̱ svāhā̱'bhiji̍tyai̱ svāheti̍ || 14 ||))

**[[3-1-4-15]]**

अथै॒तत्पौ᳚र्णमा॒स्या आज्यं॒ निर्व॑पति।
कामो॒ वै पौ᳚र्णमा॒सी।
काम॒ आज्य᳚म्।
कामे॑नै॒व काम॒ꣳ॒ सम॑र्धयति।
क्षि॒प्रमे॑न॒ꣳ॒ स काम॒ उप॑नमति।
येन॒ कामे॑न॒ यज॑ते।
सोऽत्र॑ जुहोति।
पौ॒र्ण॒मा॒स्यै स्वाहा॒ कामा॑य॒ स्वाहाऽग॑त्यै॒ स्वाहेति॑॥ १५॥

((athai̱tatpaū̎rṇa̱mā̱syā ājya̱ṃ nirva̍pati |
kāmo̱ vai paū̎rnamā̱sī |
kāma̱ ājyȁm |
kāme̍nai̱va kāma̱m̐ sama̍rdhayati |
kṣi̱prame̍na̱m̐ sa kāma̱ upa̍namati |
yena̱ kāmena̱ yaja̍te |
so'tra̍ juhoti |
pa̱uṟṇa̱mā̱syai svāhā̱ kāmā̍ya̱ svāhā'ga̍tyai̱ svāheti̍ || 15 ||))

**[[3-1-5-1]]**

मि॒त्रो वा अ॑कामयत।
मि॒त्र॒धेय॑मे॒षु लो॒के॒ष्व॒भिज॑येय॒मिति॑।
स ए॒तं मि॒त्राया॑नूरा॒धेभ्य॑श्च॒रुं निर॑वपत्।
ततो॒ वै स मि॑त्र॒धेय॑मे॒षु लो॒के॒ष्व॒भ्य॑जयत्।
मि॒त्र॒धेय॒ꣳ॒ ह॒ वा ए॒षु लो॒के॒ष्व॒भिज॑यति।
य ए॒तेन॑ ह॒वि॒षा॒ यज॑ते।
य उ॑ चैन॒दे॒वं वेद॑।
सोऽत्र॑ जुहोति।
मि॒त्राय॒ स्वाहा॑ऽनूरा॒धेभ्यः॒ स्वाहा᳚।
मि॒त्र॒धेया॑य॒ स्वाहा॒ऽभिजि॑त्यै॒ स्वाहेति॑॥ १॥

((mi̱tro vā a̍kāmayata |
mi̱tra̱dheya̍me̱ṣu lo̱ke̱ṣva̱bhija̍yeya̱miti̍ |
sa e̱taṃ mi̱trāyā̍nūrā̱dhebhya̍śca̱ruṃ nira̍vapat |
tato̱ vai sa mi̍tra̱dheya̍me̱ṣu lo̱ke̱ṣva̱bhya̍jayat |
mi̱tra̱dheya̱m̐ ha̱ vā e̱ṣu lo̱ke̱ṣva̱bhija̍yati |
ya e̱tena̍ ha̱vi̱ṣā̱ yaja̍te |
ya u̍ caina̱de̱vaṃ̱ veda̍ |
so'tra̍ juhoti |
mi̱trāya̱ svāhā̍'nūrā̱dhebhya̱ḥ svāhā̎ |
mi̱tra̱dheyā̍ya̱ svāhā̱'bhiji̍tyai̱ svāheti̍ || 1 ||))

**[[3-1-5-2]]**

इन्द्रो॒ वा अ॑कामयत।
ज्यैष्ठ्यं॑ दे॒वाना॑म॒भिज॑येय॒मिति॑।
स ए॒तमिन्द्रा॑य ज्ये॒ष्ठायै॑ पु॒रो॒डा॒श॒मेका॑दशकपाल॒ं
निर॑वपन्म॒हाव्री॑हीणाम्।
ततो॒ वै स ज्यैष्ठ्यं॑ दे॒वाना॑म॒भ्य॑जयत्।
ज्यैष्ठ्य॒ꣳ॒ ह॒ वै स॑मा॒नाना॑म॒भिज॑यति।
य ए॒तेन॑ ह॒वि॒षा॒ यज॑ते।
य उ॑ चैन॒दे॒वं वेद॑।
सोऽत्र॑ जुहोति।
इन्द्रा॑य॒ स्वाहा᳚ ज्ये॒ष्ठायै॒ स्वाहा᳚।
ज्यैष्ठ्या॑य॒ स्वाहा॒ऽभिजि॑त्यै॒ स्वाहेति॑॥ २॥

((indro̱ vā a̍kāmayata |
jyaiṣṭhyaṃ̍ de̱vānā̍ma̱bhija̍yeya̱miti̍ |
sa e̱tamindrā̍ya jye̱ṣṭhāyai̍
puro̱ḍāśa̱mekā̍daśakapāla̱ṃ
nira̍vapanma̱hāvrī̍hīṇām |
tato̱ vai sa jyaiṣṭhyaṃ̍ de̱vānā̍ma̱bhya̍jayat|
jyaiṣṭhya̱m̐ ha̱ vai sa̍mā̱nānā̍ma̱bhija̍yati |
ya e̱tena̍ ha̱vi̱ṣā̱ yaja̍te |
ya u̍ caina̱de̱vaṃ̱ veda̍ |
so'tra̍ juhoti |
indrā̍ya̱ svāhā̎ jye̱ṣṭhāyai̱ svāhā̎ |
jyaiṣṭhyā̍ya̱ svāhā̱'bhiji̍tyai̱ svāheti̍ || 2 ||))

**[[3-1-5-3]]**

प्र॒जाप॑ति॒र्वा अ॑कामयत।
मूलं॑ प्र॒जां वि॑न्दे॒येति॑।
स ए॒तं प्र॒जाप॑तये॒ मूला॑य च॒रुं निर॑वपत्।
ततो॒ वै स मूलं॑ प्र॒जाम॑विन्दत।
मूल॒ꣳ॒ ह॒ वै प्र॒जां वि॑न्दते।
य ए॒तेन॑ ह॒वि॒षा॒ यज॑ते।
य उ॑ चैन॒दे॒वं वेद॑।
सोऽत्र॑ जुहोति।
प्र॒जाप॑तये॒ स्वाहा॒ मूला॑य॒ स्वाहा᳚।
प्र॒जायै॒ स्वाहेति॑॥ ३॥

((pra̱jāpa̍ti̱rvā a̍kāmayata |
mūlaṃ̍ pra̱jāṃ vi̍nde̱yeti̍ |
sa e̱taṃ pra̱jāpa̍taye̱ mūlā̍ya ca̱ruṃ nira̍vapat |
tato̱ vai sa mūlaṃ̍ pra̱jāma̍vindata |

mūlam̐ ha̱ vai pra̱jām̱ vi̍ndate ।
ya e̱tena̍ ha̱viṣā̱ yaja̍te ।
ya u̍ caina̱de̱vaṃ veda̍ ।
so'tra̍ juhoti ।
pra̱jāpa̍taye̱ svāhā̱ mūlā̍ya̱ svāhā̎ ।
pra̱jāyai̱ svāheti̍ ॥ 3 ॥))

**[[3-1-5-4]]**

आपो॒ वा अ॑कामयन्त।
स॒मु॒द्रं काम॑म॒भिज॑ये॒मेति॑।
ता ए॒तम॒द्भ्यो॑ऽषा॒ढाभ्य॑श्च॒रुं निर॑वपन्न्।
ततो॒ वै ताः स॑मु॒द्रं काम॑म॒भ्य॑जयन्न्।
स॒मु॒द्रꣳ ह॒ वै काम॑म॒भिज॑यति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
अ॒द्भ्यः स्वाहा॑ऽषा॒ढाभ्यः॒ स्वाहा᳚।
स॒मु॒द्राय॒ स्वाहा॒ कामा॑य॒ स्वाहा᳚।
अ॒भिजि॑त्यै॒ स्वाहेति॑॥ ४॥

((āpo̱ vā a̍kāmayanta ।
sa̱mu̱draṃ kāma̍ma̱bhija̍ye̱meti̍ ।
tā e̱tama̱dbhyo̍'ṣā̱ḍhābhya̍ścaru̱ṃ nira̍vapann ।
tato̱ vai tāḥ sa̍mu̱draṃ kāma̍ma̱bhya̍jayann ।
sa̱mu̱dram̐ ha̱ vai kāma̍ma̱bhija̍yati ।
ya e̱tena̍ ha̱viṣā̱ yaja̍te ।
ya u̍ caina̱de̱vaṃ veda̍ ।
so'tra̍ juhoti ।
a̱dbhyaḥ svāhā̍'ṣā̱ḍhābhya̱ḥ svāhā̎ ।
sa̱mu̱drāya̱ svāhā̱ kāmā̍ya̱ svāhā̎ ।
a̱bhiji̍tyai̱ svāheti̍ ॥ 4 ॥))

**[[3-1-5-5]]**

विश्वे॒ वै दे॒वा अ॑कामयन्त।
अ॒न॒प॒ज॒य्यं ज॑ये॒मेति॑।
त ए॒तं विश्वे᳚भ्यो दे॒वेभ्यो॑ऽषा॒ढाभ्य॑श्च॒रुं निर॑वपन्न्।
ततो॒ वै तेऽनपज॒य्यम॑जयन्।
अ॒न॒प॒ज॒य्यꣳ ह॒ वै ज॑यति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
विश्वे᳚भ्यो दे॒वेभ्यः॒ स्वाहा॑ऽषा॒ढाभ्यः॒ स्वाहा᳚।
अ॒न॒प॒ज॒य्याय॒ स्वाहा॒ जित्यै॒ स्वाहेति॑॥ ५॥

((viśve̱ vai de̱vā a̍kāmayanta ।
a̱na̱pa̱ja̱yyaṃ ja̍ye̱meti̍ ।
ta e̱taṃ viśve̎bhyo de̱vebhyo̍'ṣā̱ḍhābhya̍ścaru̱ṃ nira̍vapann ।
tato̱ vai te̍'napaja̱yyama̍jayan ।
a̱na̱pa̱ja̱yyam̐ ha̱ vai ja̍yati ।
ya e̱tena̍ ha̱viṣā̱ yaja̍te ।
ya u̍ caina̱de̱vaṃ veda̍ ।
so'tra̍ juhoti ।
viśve̎bhyo de̱vebhya̱ḥ svāhā̍'ṣā̱ḍhābhya̱ḥ svāhā̎ ।
a̱na̱pa̱ja̱yyāya̱ svāhā̱ jityai̱ svāheti̍ ॥ 5 ॥))

**[[3-1-5-6]]**

ब्रह्म॒ वा अ॑कामयत।
ब्र॒ह्म॒लो॒कम॒भिज॑येय॒मिति॑।
तदे॒तं ब्रह्म॑णेऽभि॒जिते॑ च॒रुं निर॑वपत्।
ततो॒ वै तद्ब्र॑ह्मलो॒कम॒भ्य॑जयत्।
ब्र॒ह्म॒लो॒कꣳ ह॒ वा अ॒भिज॑यति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
ब्रह्म॑णे॒ स्वाहा॑ऽभि॒जिते॒ स्वाहा᳚।
ब्र॒ह्म॒लो॒काय॒ स्वाहा॒ऽभिजि॑त्यै॒ स्वाहेति॑॥ ६॥

((brahma̱ vā a̍kāmayata ।
bra̱hma̱lo̱kama̱bhija̍yeya̱miti̍ ।
tade̱taṃ brahma̍ṇe̱'bhijite̍ ca̱ruṃ nira̍vapat ।
tato̱ vai tadbra̍hmalo̱kama̱bhya̍jayat ।
bra̱hma̱lo̱kam̐ ha̱ vā a̱bhija̍yati ।
ya e̱tena̍ ha̱viṣā̱ yaja̍te ।
ya u̍ caina̱de̱vaṃ veda̍ ।
so'tra̍ juhoti ।
brahma̍ṇe̱ svāhā̍'bhijite̱ svāhā̎ ।
bra̱hma̱lo̱kāya̱ svāhā̱'bhiji̍tyai̱ svāheti̍ ॥ 6 ॥))

**[[3-1-5-7]]**

विष्णु॒र्वा अ॑कामयत।
पुण्य॒ꣳ॒ श्लोक॑ꣳ शृण्वीय।
न मा॑ पापी कीर्ति॒राग॑च्छेदिति॑।
स ए॒तं विष्ण॑वे श्रो॒णायै॑ पुरो॒डाश॑ त्रिकपा॒लं निर॑वपत्।
ततो॒ वै स पुण्य॒ꣳ॒ श्लोक॑मशृणुत।
नैनं॑ पापी की॒र्तिराग॑च्छत्।
पुण्य॑ꣳ ह॒ वै श्लोक॑ꣳ शृणुते।
नैनं॑ पापी की॒र्तिराग॑च्छति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।

य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
विष्ण॑वे॒ स्वाहा᳚ श्रो॒णायै॑ स्वाहा᳚।
श्लोका॑य॒ स्वाहा᳚ श्रु॒ताय॒ स्वाहेति॑॥ ७॥

((viṣṇ̱urvā áْkāmayata ।
puṇyam̐̍ ślokam̐̍ śṛṇvīya ।
na má pā̱pī kī̱rtirāgácche̱diti̍ ।
sa e̱taṃ viṣṇáve śro̱ṇāyai puro̱ḍāśaṃ trikapā̱lam
nirávapat ।
tato̱ vai sa puṇyam̐̍ ślokámaśṛ̱ṇuta ।
nainaṃ pā̱pī kī̱rtirāgácchat ।
puṇyam̐̍ ha̱ vai ślokam̐̍ śṛ̱ṇute ।
nainaṃ pā̱pī kī̱rtirāgácchati ।
ya e̱tená ha̱viṣā̱ yajáte ।
ya ú cainade̱vaṃ vedá ।
so'trá juhoti ।
viṣṇáve̱ svāhā̎ śro̱ṇāyai̱ svāhā̎ ।
ślokáya̱ svāhā̎ śru̱tāya̱ svāheti̍ ॥ 7 ॥))

**[[3-1-5-8]]**

वस॑वो॒ वा अ॑कामयन्त।
अग्र॑ं दे॒वता॑नां॒ परी॑या॒मेति॑।
त ए॒तं वसु॑भ्यः श्रवि॑ष्ठाभ्यः पुरो॒डाश॑म॒ष्टाक॑पालं॒
निर॑वपन्न्।
तते॒ वै तेऽग्र॑ं दे॒वता॑नां॒ पर्या॑यन्न्।
अग्र॑ꣳ ह॒ वै स॑मा॒ना॒नां॒ पर्ये॑ति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
वसु॑भ्यः॒ स्वाहा॑ श्रवि॑ष्ठाभ्य॒ः स्वाहा᳚।
अग्रा॑य॒ स्वाहा॑ परी॑त्यै॒ स्वाहेति॑॥ ८॥

((vasávo̱ vā ákāmayanta ।
agraṃ de̱vatánā̱m parī̍yā̱meti̍ ।
ta e̱taṃ vasúbhya̱ḥ śravíṣṭhābhyaḥ
puro̱ḍāśámaṣṭākápālam nirávapann ।
tato̱ vai te'graṃ de̱vatánā̱m paryáyann ।
agrám̐ ha̱ vai sámā̱nānā̱m paryéti ।
ya e̱tená ha̱viṣā̱ yajáte ।
ya ú cainade̱vaṃ vedá ।
so'trá juhoti ।
vasúbhya̱ḥ svāhā̱ śravíṣṭhābhya̱ḥ svāhā̎ ।
agráya̱ svāhā̱ parī̎tyai̱ svāheti̍ ॥ 8 ॥))

**[[3-1-5-9]]**

इन्द्रो॒ वा अ॑कामयत।
दृ॒ढोऽशि॑थिलः स्या॒मिति॑।
स ए॒तं वरु॑णाय श॒तभि॑षजे भेष॒जेभ्य॑ः पुरो॒डाश॑ं
दश॑कपालं॒ निर॑वपत्कृ॒ष्णाना᳚ं व्रीही॒णाम्।
तते॒ वै स दृ॒ढोऽशि॑थिलोऽभवत्।
दृ॒ढो ह॒ वा अशि॑थिलो भवति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
वरु॑णाय॒ स्वाहा॑ श॒तभि॑षजे॒ स्वाहा᳚।
भे॒ष॒जेभ्य॑ः स्वाहेति॑॥ ९॥

((indro̱ vā ákāmayata ।
dṛ̱ḍho'śíthilaḥ syā̱miti̍ ।
sa e̱taṃ varúṇāya śa̱tabhíṣaje bheṣa̱jebhyáḥ
puro̱ḍāśam̱ daśákapālam̱ nirávapatkṛ̱ṣṇānām̐̎
vrīhī̱ṇām ।
tato̱ vai sa dṛ̱ḍho'śíthilo'bhavat ।
dṛ̱ḍho ha̱ vā aśíthilo bhavati ।
ya e̱tená ha̱viṣā̱ yajáte ।
ya ú cainade̱vaṃ vedá ।
so'trá juhoti ।
varúṇāya̱ svāhá śa̱tabhíṣaje̱ svāhā̎ ।
bhe̱ṣa̱jebhya̱ḥ svāheti̍ ॥ 9 ॥))

**[[3-1-5-10]]**

अ॒जो वा एक॑पादकामयत।
ते॒ज॒स्वी ब्र॑ह्मवर्च॒सी स्या॒मिति॑।
स ए॒तम॒जायैक॑पदे प्रोष्ठप॒देभ्य॑श्च॒रुं निर॑वपत्।
तते॒ वै स ते॑ज॒स्वी ब्र॑ह्मवर्च॒स्य॑भवत्।
ते॒ज॒स्वी ह॒ वै ब्र॑ह्मवर्च॒सी भ॑वति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
अ॒जायैक॑पदे॒ स्वाहा᳚ प्रोष्ठप॒देभ्य॒ः स्वाहा᳚।
तेज॑से॒ स्वाहा᳚ ब्रह्मवर्च॒साय॒ स्वाहेति॑॥ १०॥

((a̱jo vā ekápādakāmayata ।
te̱ja̱svī bráhmavarca̱sī syā̱miti̍ ।
sa e̱tama̱jāyaikápade proṣṭhapa̱debhyáścaru̱ṃ
nirávapat ।
tato̱ vai sa téja̱svī bráhmavarca̱syábhavat ।
te̱ja̱svī ha̱ vai bráhmavarca̱sī bhávati ।
ya e̱tená ha̱viṣā̱ yajáte ।
ya ú cainade̱vaṃ vedá ।
so'trá juhoti ।
a̱jāyaikápade̱ svāhā̎ proṣṭhapa̱debhya̱ḥ svāhā̎ ।
tejáse̱ svāhā̎ brahmavarca̱sāya̱ svāheti̍ ॥ 10 ॥))

**[[3-1-5-11]]**

अहि॒र्वै बु॒ध्नियो॑ऽकामयत।
इ॒मां प्र॑ति॒ष्ठां वि॑न्दे॒येति॑।
स ए॒तमह॑ये बु॒ध्निया॑य प्रोष्ठप॒देभ्यः॑ पुरो॒डाशं॑ भूमि॑कपा॒लं
निर॑वपत्।
तता॒ वै स इ॒मां प्र॑ति॒ष्ठाम॑विन्दत।
इ॒माꣳ ह॒ वै प्र॑ति॒ष्ठां वि॑न्दते।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
अह॑ये बु॒ध्निया॑य॒ स्वाहा᳚ प्रोष्ठप॒देभ्य॒ः स्वाहा᳚।
प्र॒ति॒ष्ठायै॒ स्वाहेति॑॥ ११॥

((ahi̱rvai bu̱dhniyo̍'kāmayata ।
i̱mām̱ pra̍ti̱ṣṭhām̱ vi̍nde̱yeti̍ ।
sa e̱tamaha̍ye bu̱dhniyā̍ya proṣṭhapa̱debhya̍ḥ
puro̱ḍāśam̱ bhūmi̍kapālam̱ nira̍vapat ।
tato̱ vai sa i̱mām̱ pra̍ti̱ṣṭhāma̍vindata ।
i̱mām̐ ha̱ vai pra̍ti̱ṣṭhām̱ vi̍ndate ।
ya e̱tena̍ ha̱viṣā̱ yaja̍te ।
ya u̍ caināde̱vam̱ veda̍ ।
so'tra̍ juhoti ।
aha̍ye bu̱dhniyā̍ya̱ svāhā̎ proṣṭhapa̱debhya̱ḥ svāhā̎ ।
pra̱ti̱ṣṭhāyai̱ svāheti̍ ॥ 11 ॥))

**[[3-1-5-12]]**

पू॒षा वा अ॑कामयत।
प॒शु॒मान्त्स्या॒मिति॑।
स ए॒तं पू॒ष्णे रे॒वत्यै॑ च॒रुं निर॑वपत्।
तता॒ वै स प॑शु॒मान॑भवत्।
प॒शु॒मान्ह॒ वै भ॑वति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
पू॒ष्णे स्वाहा॑ रे॒वत्यै॒ स्वाहा᳚।
प॒शुभ्य॒ः स्वाहेति॑॥ १२॥

((pū̱ṣā vā a̍kāmayata ।
pa̱śu̱māntsyā̱miti̍ ।
sa e̱tam̱ pū̱ṣṇe re̱vatyai̍ ca̱rum̱ nira̍vapat ।
tato̱ vai sa pa̍śu̱māna̍bhavat ।
pa̱śu̱mānha̱ vai bha̍vati ।
ya e̱tena̍ ha̱viṣā̱ yaja̍te ।
ya u̍ caināde̱vam̱ veda̍ ।
so'tra̍ juhoti ।
pū̱ṣṇe svāhā̍ re̱vatyai̱ svāhā̎ ।
pa̱śubhya̱ḥ svāheti̍ ॥ 12 ॥))

**[[3-1-5-13]]**

अ॒श्विनौ॒ वा अ॑कामयेताम्।
श्रो॒त्र॒स्विना॒वब॑धिरौ स्या॒वेति॑।
ता॒वे॒तम॒श्विभ्या॑मश्व॒युग्भ्यां᳚ पुरो॒डाशं᳚ द्विकपा॒लं
निर॑वपताम्।
तता॒ वै तौ श्रो᳚त्र॒स्विना॒वब॑धिरावभवताम्।
श्रो॒त्र॒स्वी ह॒ वा अब॑धिरो भवति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
अ॒श्विभ्या॒ꣳ स्वाहा᳚ऽश्व॒युग्भ्या॒ꣳ स्वाहा᳚।
श्रो॒त्राय॒ स्वाहा॒ श्रु॒त्यै॒ स्वाहेति॑॥ १३॥

((a̱śvinau̱ vā a̍kāmayetām ।
śro̱tra̱svinā̱vaba̍dhirau syā̱veti̍ ।
tā̱ve̱tama̱śvibhyā̍maśva̱yugbhyā̱m̐ puro̱ḍāśa̱m
dvikapā̱lam̱ nira̍vapatām ।
tato̱ vai tau śro̎tra̱svinā̱vaba̍dhirāvabhavatām ।
śro̱tra̱svī ha̱ vā aba̍dhiro bhavati ।
ya e̱tena̍ ha̱viṣā̱ yaja̍te ।
ya u̍ caināde̱vam̱ veda̍ ।
so'tra̍ juhoti ।
a̱śvibhyā̱m̐ svāhā̎'śva̱yugbhyā̱m̐ svāhā̎ ।
śrotrā̍ya̱ svāhā̱ śrutyai̱ svāheti̍ ॥ 13 ॥))

**[[3-1-5-14]]**

य॒मो वा अ॑कामयत।
पि॒तृ॒णाꣳ रा॒ज्यम॒भिज॑येय॒मिति॑।
स ए॒तं य॒माया॑प॒भर॑णीभ्यश्च॒रुं निर॑वपत्।
तता॒ वै स पि॑तृ॒णाꣳ रा॒ज्यम॒भ्य॑जयत्।
स॒मा॒नाना॑ꣳ ह॒ वै रा॒ज्यम॒भिज॑यति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
य॒माय॒ स्वाहा॑ऽप॒भर॑णीभ्य॒ः स्वाहा᳚।
रा॒ज्याय॒ स्वाहा॒ऽभिजि॑त्यै॒ स्वाहेति॑॥ १४॥

((ya̱mo vā a̍kāmayata ।
pi̱tṟ̄ṇām̐ rā̱jyama̱bhija̍yeya̱miti̍ ।

sa e̱taṃ ya̱māyā́pa̱bharā́ṇībhyaśca̱ruṃ nirávapat।
tato̱ vai sa pitṝ̱ṇām̐ rā̱jyamabhyájayat।
sa̱mā̱nānā́m̐ ha̱ vai rā̱jyamabhijáyati ।
ya e̱tená ha̱viṣā̱ yajáte ।
ya ú cainade̱vaṃ vedá ।
so'trá juhoti ।
ya̱māya̱ svāhā́'pa̱bharā́ṇībhya̱ḥ svāhā̎ ।
rā̱jyāya̱ svāhā̱'bhijítyai̱ svāhetí ॥ 14 ॥))

**[[3-1-5-15]]**

अथै॒तद॑मावा॒स्या॑या॒ आज्यं॒ निर्व॑पति।

कामो॒ वा अ॑मावा॒स्या॑।

काम॒ आज्य॑म्।

कामे॑नै॒व काम॒ꣳ॒ सम॑र्धयति।

क्षि॒प्रमे॑न॒ꣳ॒ स काम॒ उप॑नमति।

येन॒ कामे॑न॒ यज॑ते।

सोऽत्र॑ जुहोति।

अ॒मा॒वा॒स्या॑यै॒ स्वाहा॒ कामा॑य॒ स्वाहाऽग॑त्यै॒ स्वाहेति॑॥ १५॥

((athai̱tadámāvā̱syáyā̱ ājyaṃ̱ nirvápati ।
kāmo̱ vā ámāvā̱syā̎ ।
kāma̱ ājyā̎m ।
kāménai̱va kāma̱m̱̐ samárdhayati ।
kṣi̱praménaṃ̱m̐ sa kāma̱ upánamati ।
yena̱ kāména̱ yajáte ।
so'trá juhoti ।
a̱mā̱vā̱syáyai̱ svāhā̱ kāmáya̱ svāhā'gátyai̱ svāhetí ॥ 15 ॥))

**[[3-1-6-1]]**

च॒न्द्रमा॒ वा अ॑कामयत।

अ॒हो॒रा॒त्राn॑र्धमा॒सान्मासा॑नृ॒तून्त्सं॑वत्स॒रमा॒प्त्वा।

च॒न्द्रम॑सः सायु॑ज्यꣳ सलो॒कता॑माप्नुया॒मिति॑।

स ए॒तं च॒न्द्रम॑से प्रती॒दृश्या॑यै पुरो॒डाशं॒ पञ्च॑दशकपालं॒ निर॑वपत्।

ततो॒ वै सो॑ऽहोरा॒त्रान॑र्धमा॒सान्मासा॑नृ॒तून्त्सं॑वत्स॒रमा॒प्त्वा।

च॒न्द्रम॑सः सायु॑ज्यꣳ सलो॒कता॑माप्नोत्।

अ॒हो॒रा॒त्रान्ह॒ वा अ॑र्धमा॒सान्मासा॑नृ॒तून्त्सं॑वत्स॒रमा॒प्त्वा।

च॒न्द्रम॑सः सायु॑ज्यꣳ सलो॒कता॑माप्नोति।

य ए॒तेन॑ ह॒विषा॒ यज॑ते।

य उ॑ चैनदे॒वं वेद॑।

सोऽत्र॑ जुहोति।

च॒न्द्रम॑से॒ स्वाहा॑ प्रती॒दृश्या॑यै॒ स्वाहा॑।

अ॒हो॒रा॒त्रेभ्यः॒ स्वाहा॑ऽर्धमा॒सेभ्यः॒ स्वाहा॑।

मासे॑भ्यः॒ स्वाहा॒र्तुभ्यः॒ स्वाहा॑।

सं॒व॒त्स॒राय॒ स्वाहेति॑॥ १॥

((ca̱ndramā̱ vā ákāmayata ।
a̱ho̱rā̱trānárdhamā̱sānmāsánṛ̱tūntsaṃ̱vatsa̱ramā̱ptvā ।
ca̱ndramása̱ḥ sāyújyam̐ salo̱katámāpnuyā̱mití ।
sa e̱taṃ ca̱ndramáse pratī̱dṛśyáyai puro̱ḍāśa̱ṃ pañcádaśakapāla̱ṃ nirávapat ।
tato̱ vai só'horā̱trānárdhamā̱sānmāsánṛ̱tūntsaṃ̱vatsa̱ramā̱ptvā ।
ca̱ndramása̱ḥ sāyújyam̐ salo̱katámāpnot ।
a̱ho̱rā̱trānha̱ vā árdhamā̱sānmāsánṛ̱tūntsaṃ̱vatsa̱ramā̱ptvā ।
ca̱ndramása̱ḥ sāyújyam̐ salo̱katámāpnoti ।
ya e̱tená ha̱viṣā̱ yajáte ।
ya ú cainade̱vaṃ vedá ।
so'trá juhoti ।
ca̱ndramáse̱ svāhā̎ pratī̱dṛśyáyai̱ svāhā̎ ।
a̱ho̱rā̱trebhya̱ḥ svāhā̎'rdhamā̱sebhya̱ḥ svāhā̎ ।
māsēbhya̱ḥ svāhā̱rtubhya̱ḥ svāhā̎ ।
sa̱ṃva̱tsa̱rāya̱ svāhetí ॥ 1 ॥))

**[[3-1-6-2]]**

अ॒हो॒रा॒त्रे वा अ॑कामयेताम्।

अत्य॑होरा॒त्रे मु॑च्येवहि।

न ना॑वहोरा॒त्रे आ॑प्नुयाता॒मिति॑।

ते ए॒तम॑होरा॒त्राभ्यां॑ च॒रुं निर॑वपताम्।

द्व॒याना॑ व्रीही॒णाम्।

शु॒क्लाना॑ च कृ॒ष्णाना॑ च।

स॒वा॒त्योर्दु॒ग्धे।

श्वे॒तायै॑ च कृ॒ष्णायै॑ च।

ततो॒ वै ते अत्य॑होरा॒त्रे अ॑मुच्येते।

नैने॑ अहोरा॒त्रे आ॑प्नुताम्।

अति॑ ह॒ वा अ॑होरा॒त्रे मु॑च्यते।

नैन॑महोरा॒त्रे आ॑प्नुतः।

य ए॒तेन॑ ह॒विषा॒ यज॑ते।

य उ॑ चैनदे॒वं वेद॑।

सोऽत्र॑ जुहोति।

अह्ने॒ स्वाहा॒ रात्रि॑यै॒ स्वाहा॑।

अति॑मुक्त्यै॒ स्वाहेति॑॥ २॥

((a̱ho̱rā̱tre vā ákāmayetām ।

atyáhorā̠tre múcyevahi I
na nā̍vahorā̠tre ā̍pnuyā̠tā̠miti̍ I
te e̠tamáhorā̠trābhyā̍m̐ ca̠ruṃ nirávapatām I
dva̠yānā̍m̐ vrīhī̠ṇām I
śu̠klānā̍m̐ ca kṛ̠ṣṇānā̍m̐ ca I
sa̠vā̠tyordu̠gdhe I
śve̠tāyai̍ ca kṛ̠ṣṇāyai̍ ca I
tato̠ vai te atyáhorā̠tre ámucyete I
nainé ahorā̠tre ā̍pnutāmI
ati̍ ha̠ vā áhorā̠tre múcyate I
nainámahorā̠tre ā̍pnutaḥ I
ya e̠tená ha̠viṣā̠ yajáte I
ya ú cainade̠vaṃ vedá I
so'trá juhoti I
ahne̠ svāhā̠ rātri̍yai̠ svāhā̍ I
ati̍muktyai̠ svāheti̍ II 2 II))

**[[3-1-6-3]]**

उ॒षा वा अ॑कामयत।
प्रि॒याऽऽदि॒त्यस्य॑ सु॒भगा॑ स्या॒मिति॑।
सैतमु॒षसे॑ च॒रुं निर॑वपत्।
तत॒ो वै सा प्रि॒याऽऽदि॒त्यस्य॑ सु॒भगा॑ऽभवत्।
प्रि॒यो ह॒ वै स॑मा॒नानाꣳ॑ सु॒भगो॑ भवति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
उ॒षसे॒ स्वाहा॒ व्यु॑ष्ट्यै॒ स्वाहा॑।
व्यू॒षुष्यै॒ स्वाहा॑ व्यु॒च्छन्त्यै॒ स्वाहा॑।
व्यु॑ष्टायै॒ स्वाहेति॑॥ ३॥

((u̠ṣā vā ákāmayata I
pri̠yā''di̠tyasyá su̠bhagā̍ syā̠miti̍ I
saitamu̠ṣasé ca̠ruṃ nirávapat I
tato̠ vai sā pri̠yā''di̠tyasyá su̠bhagā́'bhavat I
pri̠yo ha̠ vai sámā̠nānā̍m̐ su̠bhagó bhavati I
ya e̠tená ha̠viṣā̠ yajáte I
ya ú cainade̠vaṃ vedá I
so'trá juhoti I
u̠ṣase̠ svāhā̠ vyúṣṭyai̠ svāhā̍ I
vyū̠ṣu̠ṣyai̠ svāhā̍ vyu̠cchantyai̠ svāhā̍ I
vyúṣṭāyai̠ svāheti̍ II 3 II))

**[[3-1-6-4]]**

अथै॒तस्मै॒ नक्ष॑त्त्राय च॒रुं निर्व॑पति।
यथा॒ त्वं दे॒वाना॒मसि॑।
ए॒वम॒हं म॑नु॒ष्या॑णां भूया॒समिति॑।
यथा॑ ह॒ वा ए॒तद्दे॒वाना॑म्।
ए॒वꣳ ह॒ वा ए॒ष म॑नु॒ष्या॑णां भवति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
नक्ष॑त्त्राय स्वाहो॑देष्य॒ते स्वाहा॑।
उ॒द्य॒ते स्वाहोदि॑ताय॒ स्वाहा॑।
हर॑से॒ स्वाहा॒ भर॑से॒ स्वाहा॑।
भ्राज॑से॒ स्वाहा॒ तेज॑से॒ स्वाहा॑।
तप॑से॒ स्वाहा॑ ब्रह्मवर्च॒साय॒ स्वाहेति॑॥ ४॥

((athai̠tasmai̠ nakṣáttrāya ca̠ruṃ nirvápati I
yathā̠ tvaṃ de̠vānā̠masi̍ I
e̠vama̠haṃ mánu̠ṣyā́ṇāṃ bhūyā̠sa̠miti̍ I
yathá ha̠ vā e̠tadde̠vānā̍m I
e̠vam̐ ha̠ vā e̠ṣa mánu̠ṣyā́ṇāṃ bhavati I
ya e̠tená ha̠viṣā̠ yajáte I
ya ú cainade̠vaṃ vedá I
so'trá juhoti I
nakṣáttrāya̠ svāhódeṣya̠te svāhā̍ I
u̠dya̠te svāhodi̍tāya̠ svāhā̍ I
harás e̠ svāhā̠ bharáse̠ svāhā̍ I
bhrājáse̠ svāhā̠ tejáse̠ svāhā̍ I
tapáse̠ svāhā̍ brahmavarca̠sāya̠ svāheti̍ II 4 II))

**[[3-1-6-5]]**

सूर्यो॒ वा अ॑कामयत।
नक्ष॑त्त्राणां प्रति॒ष्ठा स्या॒मिति॑।
स ए॒तꣳ सूर्या॑य॒ नक्ष॑त्त्रेभ्यश्च॒रुं निर॑वपत्।
तत॒ो वै स नक्ष॑त्त्राणां प्रति॒ष्ठाऽभ॑वत्।
प्र॒ति॒ष्ठा ह॒ वै स॑मा॒नाना॑ं भवति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
सूर्या॑य॒ स्वाहा॒ नक्ष॑त्त्रेभ्यः॒ स्वाहा॑।
प्र॒ति॒ष्ठायै॒ स्वाहेति॑॥ ५॥

((sūryo̠ vā ákāmayata I
nakṣáttrā̠ṇā̠ṃ prati̠ṣṭhā syā̠miti̍ I
sa e̠tam̐ sūryā́ya̠ nakṣáttrebhyaśca̠ruṃ nirávapat I
tato̠ vai sa nakṣáttrā̠ṇā̠ṃ prati̠ṣṭhā'bhávat I
pra̠ti̠ṣṭhā ha̠ vai sámā̠nānā̍m̐ bhavati I
ya e̠tená ha̠viṣā̠ yajáte I
ya ú cainade̠vaṃ vedá I
so'trá juhoti I
sūryā́ya̠ svāhā̠ nakṣáttrebhya̠ḥ svāhā̍ I
pra̠ti̠ṣṭhāyai̠ svāheti̍ II 5 II))

**[[3-1-6-6]]**

अथै॒तमदि॑त्यै च॒रुं निर्व॑पति।
इ॒यं वा अदि॑तिः।
अ॒स्यामे॒व प्रति॑तिष्ठति।
सो॑ऽत्र जु॒होति।
अदि॑त्यै॒ स्वाहा᳚ प्रति॒ष्ठायै॒ स्वाहेति॑॥ ६॥

((athai̠tamadi̍tyai ca̠ruṃ nirva̍pati |
i̠yaṃ vā adi̍tiḥ |
a̠syāme̠va prati̍tiṣṭhati |
so'tra̍ juhoti |
adityai̠ svāhā᳚ prati̠ṣṭhāyai̠ svāheti̍ || 6 ||))

**[[3-1-6-7]]**
अथै॒तं विष्ण॑वे च॒रुं निर्व॑पति।
य॒ज्ञो वै विष्णुः॑।
य॒ज्ञ ए॒वान्त॒तः प्रति॑तिष्ठति।
सो॑ऽत्र जु॒होति।
विष्ण॑वे॒ स्वाहा॑ य॒ज्ञाय॒ स्वाहा᳚।
प्र॒ति॒ष्ठायै॒ स्वाहेति॑॥ ७॥
अ॒ग्निर्न॑ ऋ॒ध्यास्म॒ नवो॑नवो॒ऽग्निर्मि॒त्रश्च॒न्द्रमाः॑ ष॒ट्॥ ६॥
अ॒ग्निर्न॒स्तन्नो॑ वा॒युरहि॒र्बु॒ध्नियं ऋ॒क्षा वा इ॒यमथै॒तत्पौ॑मा॒स्या
अ॒जो वा एक॑पात्सूर्य॒स्त्रिषत्ष्टि॥ ६३॥
अ॒ग्निः पञ्च॑दश प्र॒जाप॑ति॒ष्षोड॑श॒ सोम॒ एका॑दश रु॒द्रो
दश॒र्क्षैका॑द॒श बृ॒ह॒स्पति॒र्दश॑ देवासु॒रा नव॑ पि॒तर॒
एका॑दशार्य॒मा भगो॒ दश॑दश सवि॒ता चतु॑र्दश त्वष्टा॑
वा॒युरि॑न्द्रा॒ग्नी दश॑द॒शाथै॒तत्पौर्ण॑मा॒स्या अ॒ष्टौ पञ्च॑दश।
मि॒त्र इन्द्रः॑ प्र॒जाप॑ति॒र्दश॑द॒शाप॒ एका॑द॒श॒ विश्वे॒ ब्रह्म॒
दश॑दश॒  विष्णु॒स्त्रयो॑दश॒ वस॑व॒ इन्द्रो॒ऽजो॒ऽहि॒र्वै बु॒ध्निय॑ः
पूषाऽश्विनौ॑ य॒मो दश॑द॒शाथै॒तद॑मावा॒स्या॑या अ॒ष्टौ
पञ्च॑दश॥ च॒न्द्रमाः॑ पञ्च॑दशाहोरा॒त्रे स॒प्तद॑शो॒षा
एका॑द॒शाथै॒तस्मै॒ नक्ष॑त्त्राय॒ त्रयो॑दश॒ सूर्यो॒ दशाथै॒तमदि॑त्यै॒
पञ्चाथै॒तं विष्ण॑वे॒ ष॒ट्त्स॒प्त॥
स॒वि॒ताऽऽशू॒नां व्री॑हि॒णामिन्द्रो॑ म॒हाव्री॑हीणामिन्द्रः॑
कृष्णानां॑ व्रीही॒णाम॑होरा॒त्रे द्व॒यानां॑ व्रीहि॒याणाम्॥
पि।तर॒ष्षट्क॑पाल॑ꣳ सवि॒ता
द्वाद॑शकपालममिन्द्रा॒ग्नीएका॑दशकपाल॒मिन्द्र॒
एका॑दशकपाल॒मिन्द्रो॒ दश॑कपालं॒
विष्णु॒स्त्रिक्स्पा॒लमहि॒र्भूमि॑कपालम॒श्विनौ॑ द्विकपा॒लं
च॒न्द्रमाः॒ पञ्च॑दशकपालम॒ग्निस्त्वष्टा॒
वस॑वो॒ऽष्टाक॑पालम॒न्यत्र॑ च॒रुम्॥
रु॒द्रो॑ऽर्य॒मा पू॒षाप॑शु॒मान्त्स्याआआꣳ सोमो॒ रु॑द्रो बृ॒ह॒सप्तिः॒
पय॑सि वा॒युः पय॒ः सोमो॑ वा॒युरि॑न्द्रा॒ग्नी मि॒त्र इन्द्र॒ आपो॒
ब्रह्म॒ य॒मो॑ऽभिजि॑त्यै॒ त्वष्टा॑ प्र॒जाप॑तिः प्र॒जायै॑
पौर्ण॑मा॒स्या॑मावा॒स्याष्/या॒ आग॑त्यै॒ विश्वे॒ जित्या॑ अ॒श्विनौ॑
श्रुत्यै॑॥ ब्रह्मतदे॒तं वीष्णुः॑स ए॒तं वा॒युः स॒तदा॒पस्ताः॥
पि॒तरो॒ विश्वे॒ वस॑वोऽकामयन्त॒ ए॒तं निर॑वपताम्॥
अ॒हो॒रा॒त्रे वा अ॑कामयेता॒मिति॒ ते ए॒तंनिर॑वपताआम्॥
अ॒न्यत्रा॑कामयतमिति स ए॒तं निर॑वपत्॥ इ॒न्द्र॒ऽआग्नी
श्रे॒ष्ठ्यमिन्द्रो॒ ज्यै॒ष्ठ्यमिन्द्रो॑ दृढः॥ अ॒हिः सूर्यो॑ऽदि॑त्यै॒
विष्णप्रति॒ष्ठायै॑। सोमो॑ य॒मः स॑मा॒नाना᳚म्।
अ॒ग्निर्नो॑ रीरिषद॒न्यत्र॑ रीरिषः॥

((athai̠taṃ viṣṇa̍ve ca̠ruṃ nirva̍pati |
ya̠jño vai viṣṇu̍ḥ |
ya̠jña e̠vānta̠taḥ prati̍tiṣṭhati |
so'tra̍ juhoti |
viṣṇa̍ve̠ svāhā̍ yajñāya̠ svāhā᳚ |
pra̠ti̠ṣṭhāyai̠ svāheti̍ || 7 ||
a̠gnirna̍ ṛ̠dhyāsma̠ navo̍navo̠'gnirmi̠traśca̠ndramā̍ḥ ṣa̠ṭ || 6 ||
a̠gnirna̠stanno̍ vā̠yurahi̠rbu̠dhniya̍ ṛ̠kṣā vā i̠yamathai̠tatpaū̍mā̠syā a̠jo vā ekā̍pā̠tsūrya̠stri̠ṣā̠tṣṭi̠ || 63 ||
a̠gniḥ pañca̍daśa pra̠jāpā̍ti̠ṣṣoḍa̍śa̠ soma̠ ekā̍daśa ru̠dro daśa̠rkṣaikā̍daśa̠ bṛ̠ha̠spati̠rdaśa̍ devāsu̠rā navā̍ pi̠tara̠ ekā̍daśārya̠mā bhago̠ daśa̍daśa savi̠tā catu̍rdaśa tvaṣṭā̍ vā̠yurindrā̠gnī daśa̍da̠śāthai̠tatpaū̍rṇamā̠syā a̠ṣṭau pañca̍daśa |
mi̠tra indra̍ḥ pra̠jāpa̍ti̠rdaśa̍da̠śāpa̠ ekā̍daśa̠ viśve̠ brahma̠ daśa̍daśa̠  viṣṇu̠strayo̍daśa̠ vasā̍va̠ indro̠'jo'hi̠rvai bu̠dhniyā̍ḥ pū̠ṣā'śvinau̍ ya̠mo daśa̍da̠śāthai̠tada̍māvā̠syā̍yā a̠ṣṭau pañca̍daśa ||
ca̠ndramā̠ḥ pañca̍daśāhorā̠tre sa̠ptada̍śo̠ṣā ekā̍da̠śāthai̠tasmai̠ nakṣa̍ttrāya̠ trayo̍daśa̠ sūryo̠ daśāthai̠tamadi̍[tyai̠ pañcāthai̠taṃ viṣṇa̍ve̠ ṣa̠ṭtsa̠pta ||
sa̠vi̠tā''śū̠nāṃ vrī̍hi̠ṇāmindro̍ ma̠hāvrī̍hī̠ṇāmindra̍ḥ kṛ̠ṣṇānā̍ṃ vrīhī̠ṇāma̍horā̠tre dva̠yānā̍ṃ vrīhi̠yāṇām ||
 pil_tara̠ṣṣaṭkapāla̍ṃ savi̠tā dvādaekā̍daśakapā̠lamindro̠ daśa̍kapālaṃvi̠ṣṇu̠strikspā̠lamahi̠rbhūmi̍kapālama̠śvinau̍ dvikapā̠laṃ ca̠ndramā̠ḥ pañca̍daśakapālama̠gnistvaṣṭā̠ vasā̍vo̠'ṣṭākā̍pālama̠nyatra̍ ca̠rum ||
ru̠dro̍'rya̠mā pū̠ṣāpa̍śu̠māntsyāā̍āṃ somo̠ rru̠dro bṛ̠hasapti̠ḥ payā̍si vā̠yuḥ paya̠ḥ somo̍ vā̠yurimi̠tra indra̠ āpo̠ brahma̠ ya̠mo̍'bhiji̍tyai̠ tvaṣṭā̍ pra̠jāpā̍tiḥ pra̠jāyai̍ paurṇamā̠syāāmāvā̠syāṣ/yā̠ āgā̍tyai̠ viśve̠

jityȁ a̱śvinau̱ śrutyaı̍̈' ǁ brahma̱tade̱taṃ vīṣṇuḥsa
e̱taṃ vā̱yuḥ sae̱tadāpa̱stāḥ ǁ pi̱taro̱ viśve̱
vasȧvo'kāmayanta̱ e̱taṃ nirȧvapatām ǁ a̱ho̱rā̱tre vā
ȧkāmayetā̱miti̱ te e̱taṃnirȧvapatāām ǁ
a̱nyatrȁkāmayata̱miti̱ sa e̱taṃ nirȧvapat ǁ
i̱nd[!R]ā̱gnī śraiṣṭha̱ymindro̱ jyaiṣṭha̱ymindrȯ dṛḍhaḥ
ǁ ahi̱ḥ sūryo'diviṣṇaprati̱ṣṭhāyaı̍ ǀ somȯ ya̱maḥ
sȧmā̱nānā̈m ǀ a̱gnirnȯrīriṣada̱nyatrȧ rīriṣaḥ ǁ))

# Taittirīya-Brāhmaṇa
# Book 3, Chapter 2

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[3-2-1-1]]**

तृ॒तीय॑स्यामि॒तो दि॒वि सोम॑ आसीत्।
तं गा॑य॒त्र्याऽह॑रत्।
तस्य॑ प॒र्णम॑च्छिद्यत।
तत्प॒र्णो᳚ऽभवत्।
तत्प॒र्णस्य॑ पर्ण॒त्वम्।
ब्रह्म॒ वै प॒र्णः।
यत्प॑र्णशा॒खया॑ व॒त्सान॑पाक॒रोति॑।
ब्रह्म॑णै॒वैना॑न॒पाक॑रोति।
गा॒य॒त्रो वै प॒र्णः।
गा॒य॒त्राः प॒शव॑ः॥ १॥

((tṛ̱tīya̍syāmi̱to di̱vi soma̍ āsīt |
taṃ gā̍ya̱tryā'ha̍rat |
tasya̍ pa̱rṇama̍cchidyata |
tatpa̱rṇo̍'bhavat |
tatpa̱rṇasya̍ parṇa̱tvam |
brahma̱ vai pa̱rṇaḥ |
yatpa̍rṇaśā̱khayā̍ va̱tsāna̍pāka̱roti |
brahma̍ṇai̱vainā̍na̱pāka̍roti |
gā̱ya̱tro vai pa̱rṇaḥ |
gā̱ya̱trāḥ pa̱śava̍ḥ || 1 ||))

**[[3-2-1-2]]**

तस्मा॒त्त्रीणि॑ त्रीणि॑ प॒र्णस्य॑ पला॒शानि॑।
त्रि॒पदा॑ गाय॒त्री।
यत्प॑र्णशा॒खया॑ गाः प्रा॒र्पय॑ति।
स्वयै॒वैना॑ दे॒वत॑या॒ प्रार्प॑यति।
यं का॒मये॑ताप॒शुः स्या॒दिति॑।
अ॒प॒र्णां तस्मै॒ शुष्का᳚ग्रा॒माह॑रेत्।
अ॒प॒शुरे॒व भ॑वति।
यं का॒मये॑त पशु॒मान्त्स्या॒दिति॑।
ब॒हु॒प॒र्णां तस्मै॑ बहुशा॒खामाह॑रेत्।
प॒शु॒मन्त॑मे॒वैनं॑ करोति॥ २॥

((tasmā̱ttrīṇi̍ trīṇi̍ pa̱rṇasya̍ palā̱śāni̍ |
tri̱padā̍ gāya̱trī |
yatpa̍rṇaśā̱khayā̱ gāḥ prā̱rpaya̍ti |
svayai̱vainā̍ de̱vata̍yā̱ prārpa̍yati |
yaṃ kā̱maye̍tāpa̱śuḥ syā̱diti̍ |
a̱pa̱rṇāṃ tasmai̱ śuṣkā̎grā̱māha̍ret |
a̱pa̱śure̱va bha̍vati |
yaṃ kā̱maye̍ta paśu̱māntsyā̱diti̍ |
ba̱hu̱pa̱rṇāṃ tasmai̍ bahuśā̱khāmāha̍ret|
pa̱śu̱manta̍me̱vainaṃ̍ karoti || 2 ||))

**[[3-2-1-3]]**

यत्प्राची॑मा॒हरे᳚त्।
दे॒व॒लो॒कम॒भिज॑येत्।
यदुदी॑चीं मनु॒ष्यलो॒कम्।
प्राची॒मुदी॑ची॒माह॑रति।
उ॒भयो᳚र्लो॒कयो॑र॒भिजि॑त्यै।
इ॒षे त्वो॒र्जे त्वेत्या॑ह।
इष॑मे॒वोर्जं॒ यज॑माने दधाति।
वा॒यव॑ः स्थेत्या॑ह।
वा॒युर्वा अ॒न्तरि॑क्ष॒स्याध्य॑क्षाः।
अ॒न्त॒रि॒क्ष॒दे॒व॒त्या᳚ः खलु॒ वै प॒शव॑ः॥ ३॥

((yatprācī̍mā̱hare̎t |
de̱va̱lo̱kama̱bhija̍yet |
yadudī̍cīṃ manu̱ṣyalo̱kam |
prācī̱mudī̍cī̱māha̍rati |
u̱bhayo̎rlo̱kayo̍ra̱bhiji̍tyai |
i̱ṣe tvo̱rje tvetyā̍ha |
iṣa̍me̱vorja̱ṃ yaja̍māne dadhāti |
vā̱yava̍ḥ sthetyā̍ha |
vā̱yurvā a̱ntari̍kṣa̱syādhya̍kṣāḥ |
a̱nta̱ri̱kṣa̱de̱va̱tyā̎ḥ khalu̱ vai pa̱śava̍ḥ || 3 ||))

**[[3-2-1-4]]**

वा॒यव॑ ए॒वैना॒न्परि॑ददाति।
प्र वा ए॒ना॒नेत॒दाक॑रोति।
यदाह॑।
वा॒यव॑ः स्थेत्यु॑पा॒यव॑ः स्थेत्या॑ह।
यज॑माना॒यैव प॒शूनुप॑ह्वयते।
दे॒वो व॑ः सवि॒ता प्रार्प॑य॒त्वित्या॑ह॒ प्रसू᳚त्यै।
श्रेष्ठ॑तमाय॒ कर्म॑ण॒ इत्या॑ह।
य॒ज्ञो हि श्रेष्ठ॑तम॒ं कर्म॑।
तस्मा॑दे॒वमा॑ह।
आप्या॑यध्वमघ्निया देवभा॒गमित्या॑ह॥ ४॥

((vāyavȧ e̱vainā̱nparȧdadāti ।
pra vā ėnāne̱tadākȧroti ।
yadāhȧ ।
vā̱yava̱ḥ sthetyu̇pā̱yava̱ḥ sthetyǡha ।
yajȧmānāyai̱va pa̱śūnupȧhvayate ।
de̱vo vȧḥ savi̱tā prārpȧya̱tvityǡha̱ prasṻtyai ।
śre̱ṣṭhȧtamāya̱ karmȧṇa̱ ityǡha ।
ya̱jño hi śre̱ṣṭhȧtama̱ṃ karmȧ ।
tasmǡde̱vamǡha ।
āpyǡyadhvamaghniyā devabhā̱gamityǡha ॥ 4 ॥))

**[[3-2-1-5]]**

व॒त्सेभ्य॑श्च वा ए॒ताः पु॒रा म॑नु॒ष्ये᳚भ्यश्चाप्या॑यन्त।

दे॒वेभ्य॑ ए॒वैना॒ इन्द्रा॒याप्या॑ययति।

ऊर्ज॑स्वती॒ः पय॑स्वती॒रित्या॑ह।

ऊर्ज॒ꣳ॒ हि पय॑ः सं॒भर॑न्ति।

प्र॒जाव॑तीरनमी॒वा अ॑य॒क्ष्मा इत्या॑ह॒ प्रजा᳚त्यै।

मा व॑स्स्ते॒न ई॑शत॒ माऽघश॑ꣳस॒ इत्या॑ह॒ गुप्त्यै᳚।

रु॒द्रस्य॑ हे॒तिः परि॑ वो वृ॒णक्त्वित्या॑ह।

रु॒द्राद्दे॒वैना᳚स्त्रायते।

ध्रु॒वा अ॒स्मिन्गोप॑तौ स्यात ब॒ह्वीरित्या॑ह।

ध्रु॒वा ए॒वास्मि॑न्ब॒ह्वीः क॑रोति॥ ५॥

((va̱tsebhyȧśca̱ vā e̱tāḥ pu̱rā
mȧnu̱ṣyē̈bhya̱ścāpyǡyanta ।
de̱vebhyȧ e̱vainā̱ indrā̱yāpyǡyati ।
ūrjȧsvatī̱ḥ payȧsvatī̱rityǡha ।
ūrja̱m̐ hi payȧḥ sa̱mbharȧnti ।
pra̱jāvȧtīranamī̱vā ȧya̱kṣmā ityǡha̱ prajā̈tyai ।
mā vȧsste̱na īṡata̱ mā'ghaśam̐sa̱ ityǡha̱ guptyai̋ ।
ru̱drasyȧ he̱tiḥ pari̇ vo vṛ̱ṇa̱ktvityǡha ।
ru̱drāde̱vainā̈strāyate ।
dhru̱vā a̱smingopȧtau syāta ba̱hvīrityǡha ।
dhru̱vā e̱vāsmi̇nba̱hvīḥ kȧroti ॥ 5 ॥))

**[[3-2-1-6]]**

यज॑मानस्य प॒शून्पा॒हीत्या॑ह।

प॒शुनां॒ गोपी॒थाय॑।

तस्मा᳚त्सा॒यं प॒शव॒ उप॑स॒मावर्त॑न्ते।

अन॑धः सादयति।

गर्भा॑णां॒ धृत्या॒ अप्र॑पादाय।

तस्मा॒द्गर्भा᳚ः प्रजानामप्र॑पादुकाः।

उ॒परी॑व॒ नि द॑धाति।

उ॒परी॑व॒ हि सु॒वर्गो॑ लो॒कः।

सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै॥ ६॥

प॒शव॑ करोति प॒शवो॑ दे॒वभा॒गमित्या॑ह॒ करो॑ति॒ नव॑ च॥ १॥

((yajȧmānasya pa̱śūnpā̱hītyǡha ।
pa̱śu̱nā̱m go̱pī̱thāyȧ ।
tasmā̈tsā̱yam pa̱śava̱ upȧsa̱māvȧrtante ।
anȧdhaḥ sādayati ।
garbhǡṇā̱m dhṛtyā̱ aprȧpādāya ।
tasmā̱dgarbhā̈ḥ pra̱jānā̱maprȧpādukāḥ ।
u̱parī̇va̱ nidȧdhāti ।
u̱parī̇va̱ hi su̇va̱rgo lo̱kaḥ ।
su̱va̱rgasyȧ lo̱kasya̱ samȧṣṭyai ॥ 6 ॥
pa̱śavȧ karoti pa̱śavȯ devabhā̱gamityǡha karoti̱
navȧ ca ॥ 1 ॥))

**[[3-2-2-1]]**

दे॒वस्य॑ त्वा सवि॒तुः प्र॑सव॒ इत्यश्व॑पर्शु॒मादत्ते॒ प्रसू᳚त्यै।

अ॒श्विनो᳚र्बा॒हुभ्या॒मित्या॑ह।

अ॒श्विनौ॒ हि दे॒वाना॑मध्व॒र्यू आस्ता᳚म्।

पू॒ष्णो हस्ता᳚भ्या॒मित्या॑ह॒ यत्यै᳚।

यो वा ओष॑धीः पर्व॒शो वेद॑।

नैना॒ः स हि॑नस्ति।

प्र॒जाप॑ति॒र्वा ओष॑धीः पर्व॒शो वेद॑।

स ए॑ना॒ न हि॑नस्ति।

अ॒श्व॒प॒र्श्वा ब॒र्हिर॑च्छैति।

प्रा॒जा॒प॒त्यो वा अश्व॑ः सयो॒नि॒त्वाय॑॥ १॥

((de̱vasyȧ tvā savi̱tuḥ prȧsava̱ ityȧśvapa̱rśumādȧtte̱
prasṻtyai ।
a̱śvinőrbā̱hubhyā̱mityǡha ।
a̱śvinau̱ hi de̱vānā̈madhva̱ryū āstā̈m ।
pū̱ṣṇo hastā̈bhyāmityǡha̱ yatyai̋ ।
yo vā oṣȧdhī̱ḥ parva̱śo vedȧ ।
nainā̱ḥ sa hi̇nasti ।
pra̱jāpȧti̱rvā oṣȧdhī̱ḥ parva̱śo vedȧ ।
sa ėnā̱ na hi̇nasti ।
a̱śva̱pa̱rśvā ba̱rhiracchai̇ti ।
prā̱jā̱pa̱tyo vā aśvȧḥ sayoni̱tvāyȧ ॥ 1 ॥))

**[[3-2-2-2]]**

ओष॑धीना॒महि॑ꣳसायै।

य॒ज्ञस्य॑ घोष॒दसीत्या॑ह।

यज॑मान ए॒व र॒यिं द॑धाति।

प्रत्यु॑ष्ट॒ꣳ॒ रक्षः॒ प्रत्यु॑ष्टा॒ अरा॑तय॒ इत्या॑ह।

रक्ष॑सा॒मप॑हत्यै।

प्रेय॒मग॑द्धि॒षणा॑ ब॒र्हिर॑च्छेत्या॑ह।

वि॒द्या वै धि॒षणा᳚।
वि॒द्ययै॒वैन॒दच्छै᳚ति।
मनु॑ना कृ॒ता स्व॒धया॒ वित॒ष्टेत्या॑ह।
मा॒न॒वी हि पर्शुः॑ स्व॒धा कृ॑ता॥ २॥

((oṣa̍dhīnā̱mahiṁ̐sāyai ।
ya̱jñasya̍ gho̱ṣada̱sītya̍ha ।
yaja̍māna e̱va ra̱yiṃ da̍dhāti ।
pratyu̍ṣṭa̱ṁ̐ rakṣa̱ḥ pratyu̍ṣṭā̱ arā̍taya̱ itya̍ha ।
rakṣa̍sā̱mapa̍hatyai ।
preyama̍gāddhi̱ṣaṇa̍ ba̱rhiracchetya̍ha ।
vi̱dyā vai dhi̱ṣaṇa̍ ।
vi̱dyayai̱vaina̱dacchai̍ti ।
manu̍nā kṛ̱tā sva̱dhayā̱ vita̱ṣṭetya̍ha ।
mā̱na̱vī hi parśu̍ḥ sva̱dhā kṛ̍tā ॥ 2 ॥))

**[[3-2-2-3]]**

त आव॑हन्ति क॒वयः॑ पु॒रस्ता॒दित्या॑ह।
शु॒श्रु॒वाꣳसो॒ वै क॒वयः॑।
य॒ज्ञः पु॒रस्ता᳚त्।
मु॒ख॒त ए॒व य॒ज्ञमार॑भते।
अथो॒ यदे॒तदु॒क्त्वा य॒तः कु॒तश्चा॒हर॑ति।
तत्प्राच्या॑ ए॒व दि॒शो भ॑वति।
दे॒वेभ्यो॒ जुष्ट॑मि॒ह ब॒र्हिरा॒सद॒ इत्या॑ह।
ब॒र्हिषः॑ समृ॑द्ध्यै।
कर्म॒णोऽन॑पराधाय।
दे॒वाना᳚ं परिषू॒तम॒सीत्या॑ह॥ ३॥

((ta āva̍hanti ka̱vaya̍ḥ pu̱rastā̱ditya̍ha ।
śu̱śru̱vāṁ̐so̱ vai ka̱vaya̍ḥ ।
ya̱jñaḥ pu̱rastā̍t ।
mu̱kha̱ta e̱va ya̱jñamārā̍bhate ।
atho̱ yade̱tadu̱ktvā ya̱taḥ kutā̍ścā̱harā̍ti ।
tatprācya̍ e̱va di̱śo bha̍vati ।
de̱vebhyo̱ juṣṭa̍mi̱ha ba̱rhirā̱sada̱ itya̍ha ।
ba̱rhiṣa̱ḥ samṛ̍ddhyai ।
karma̱ṇo'na̍parādhāya ।
de̱vānā̱ṁ̐ pariṣū̱tama̱sītya̍ha ॥ 3 ॥))

**[[3-2-2-4]]**

यद्वा इ॒दं किंच॑।
तद्दे॒वाना᳚ं परिषू॒तम्।
अथो॒ यथा॒ वस्य॑से प्रति॒प्रोच्या॒हे॒दं क॑रि॒ष्यामीति॑।
ए॒वमे॒व तद॑ध्व॒र्युर्दे॒वेभ्यः॑ प्रति॒प्रोच्य॑ ब॒र्हिर्दा॑ति।
आ॒त्मनोऽहिꣳ॑सायै।

((yadvā i̱daṃ kiṃca̍ ।
tadde̱vānā̱ṁ̐ pariṣū̱tam ।
atho̱ yathā̱ vasya̍se prati̱procyāhe̱daṃ ka̍ri̱ṣyāmīti̍ ।
e̱vame̱va tada̍dhva̱ryurde̱vebhya̍ḥ prati̱procya̍ ba̱rhirdā̍ti ।
ā̱tmano'hiṁ̐sāyai ।
yāva̍taḥ sta̱mbānpa̍ridi̱śet ।
yatte̱ṣā̍mucchi̱ṁ̐ṣyāt ।
ati̱ tadya̱jñasya̍ recayet ।
eka̱ṁ̐ sta̱mbaṃ pari̍diśet ।
ta̱ṁ̐ sarva̱ṃ dāyāt ॥ 4 ॥))

याव॑तः स्त॒म्बान्प॑रिदि॒शेत्।
यत्ते॒षा॑मुच्छि॒ꣳ॒ष्यात्।
अति॒ तद्य॒ज्ञस्य॑ रेचयेत्।
एक॒ꣳ॒ स्त॒म्बं परि॑दिशेत्।
तꣳ सर्वं॑ दा॒यात्॥ ४॥

**[[3-2-2-5]]**

य॒ज्ञस्याना॑तिरेकाय।
व॒र्ष॒वृ॒द्धम॒सीत्या॑ह।
व॒र्ष॒वृ॒द्धा॒ वा ओष॑धयः।
दे॒व ब॒र्हि॒रित्या॑ह।
दे॒वेभ्य॑ ए॒वैन॑त्करोति।
मा त्वा॒ऽन्वङ्मा ति॒र्यगित्या॒हाहिꣳ॑सायै।
पर्व॑तेराध्या॒समित्या॒हर्द्ध्यै᳚।
आ॒च्छे॒त्ता ते॒ मारि॑षमित्या॑ह।
नास्या॒त्मनो॑ मीयते।
य ए॒वं वेद॑॥ ५॥

((ya̱jñasyāna̍tirekāya ।
va̱rṣavṛ̍ddhama̱sītya̍ha ।
va̱rṣavṛ̍ddhā̱ vā oṣa̍dhayaḥ ।
deva̍ barhi̱rityā̍ha ।
de̱vebhya̍ e̱vainā̍tkaroti ।
mā tvā̱'nva̍nmā ti̱ryagityā̱hāhiṁ̐sāyai ।
parva̍terādhyāsa̱mityā̱harddhyai̍ ।
ā̱cche̱ttā te̱ māri̍ṣa̱mitya̍ha ।
nāsyā̱tmano̍ mīyate ।
ya e̱vaṃ veda̍ ॥ 5 ॥))

**[[3-2-2-6]]**

दे॒व ब॒र्हिः श॒तव॑ल्शं॒ वि रो॑हे॒त्या॑ह।
प्र॒जा वै ब॒र्हिः।
प्र॒जाना᳚ं प्र॒जन॑नाय।
स॒हस्र॑वल्शा॒ वि व॒यꣳ रु॑हे॒मेत्या॑ह।

आशिषमेवैतामाशास्ते।
पृथिव्याः संपृचः पाहीत्याह प्रतिष्ठित्यै।
अयुङ्गाऽयुङ्गान्मुष्टीन्लुनोति।
मिथुनत्वाय प्रजात्यै।
सुसंभृता त्वा संभरामीत्याह।
ब्रह्मणैवैनत्संभरति॥ ६॥

((deva barhiḥ śatavalśam virohetyāha |
prajā vai barhiḥ |
prajānām prajananāya |
sahasravalśā vi vayam ruhemetyāha |
āśiṣamevaitāmāśāste |
pṛthivyāḥ sampṛcaḥ pāhītyāha pratiṣṭhityai |
ayuṅgā'yuṅgānmuṣṭīnlunoti |
mithunatvāya prajātyai |
susambhṛtā tvā sambharāmītyāha |
brahmaṇaivainatsambharati || 6 ||))

**[[3-2-2-7]]**

अदित्यै रास्नाऽसीत्याह।
इयं वा अदितिः।
अस्या एवैनद्रास्नां करोति।
इन्द्राण्यै संनहनमित्याह।
इन्द्राणी वा अग्रे देवतानाꣳ समनह्यत।
साऽऽर्ध्नोत्।
ऋद्ध्यै सन्नह्यति।
प्रजा वै बर्हिः।
प्रजानामपरावापाय।
तस्मात्स्नावसंतताः प्रजा जायन्ते॥ ७॥

((adityai rāsnā'sītyāha |
iyam vā aditiḥ |
asyā evainadrāsnām karoti |
indrāṇyai samnahanamityāha |
indrāṇī vā agre devatānām samanahyata |
sā''rdhnōt |
ṛddhyai sannahyati |
prajā vai barhiḥ |
prajānāmaparāvāpāya |
tasmātsnāvasamtatāḥ prajā jāyante || 7 ||))

**[[3-2-2-8]]**

पूषा ते ग्रन्थिं ग्रथ्नात्वित्याह।
पुष्टिमेव यजमाने दधाति।
स ते माऽऽस्थादित्याहाहिꣳसायै।
पश्चात्प्राञ्चमुप गूहति।
पश्चाद्वै प्राचीनꣳ रेतो धीयते।
पश्चादेवास्मै प्राचीनꣳ रेतो दधाति।
इन्द्रस्य त्वा बाहुभ्यामुद्यच्छ इत्याह।
इन्द्रियमेव यजमाने दधाति।
बृहस्पतेर्मूर्ध्ना हरामीत्याह।
ब्रह्म वै देवानां बृहस्पतिः॥ ८॥

((pūṣā te granthim grathnātvityāha |
puṣṭimeva yajamāne dadhāti |
sa te mā''sthādityāhāhimsāyai |
paścātprāñcamupa gūhati |
paścādvai prācīnam reto dhīyate |
paścādevāsmai prācīnam reto dadhāti |
indrasya tvā bāhubhyāmudyaccha ityāha |
indriyameva yajamāne dadhāti |
bṛhaspatermūrdhnā harāmītyāha |
brahma vai devānām bṛhaspatiḥ || 8 ||))

**[[3-2-2-9]]**

ब्रह्मणैवैनद्धरति।
उर्वन्तरिक्षमन्विहीत्याह गत्यै।
देवंगममसीत्याह।
देवानेवैनद्गमयति।
अनधः सादयति।
गर्भाणां धृत्या अप्रपादाय।
तस्माद्गर्भाः प्रजानामप्रपादुकाः।
उपरीव निदधाति।
उपरीव हि सुवर्गो लोकः।
सुवर्गस्य लोकस्य समष्ट्यै॥ ९॥
सयोनित्वाय स्वधाकृताऽसीत्याह दायोद्वेद भरति जायन्ते
बृहस्पतिः समष्ट्यै॥ २॥

((brahmaṇaivainaddharati |
urvantarikṣamanvihītyāha gatyai |
devamgamamasītyāha |
devānevainadgamayati |
anadhaḥ sādayati |
garbhāṇām dhṛtyā aprapādāya |
tasmādgarbhāḥ prajānāmaprapādukāḥ |
upariva nidadhāti |
upariva hi suvargo lokaḥ |
suvargasya lokasya samaṣṭyai || 9 ||
sayonitvāya svadhākṛtā'sītyāha dāyodveda bharati
jāyante bṛhaspatiḥ samaṣṭyai || 2 ||))

**[[3-2-3-1]]**

पू॒र्वे॒द्युरि॒ध्माब॒र्हिः क॑रोति।
य॒ज्ञमे॒वार॒भ्य॑ गृही॒त्वोप॑वसति।
प्र॒जाप॑तिर्य॒ज्ञम॑सृजत।
तस्यो॒खे अ॑स्रꣳसेताम्।
य॒ज्ञो वै प्र॒जाप॑तिः।
यत्सा᳚न्नाय्यो॒खे भव॑तः।
य॒ज्ञस्यै॒व तदु॒खे उप॑दधा॒त्यप्र॑स्रꣳसाय।
शुन्ध॑ध्वं॒ दैव्या॑य॒ कर्म॑णे देवय॒ज्याया॒ इत्या॑ह।
दे॒व॒य॒ज्याया॑ ए॒वैना॑नि शुन्धति।
मा॒त॒रिश्व॑नो घ॒र्मो॑ऽसीत्या॑ह॥ १॥

((pūrve̱dyuri̱dhmāba̱rhiḥ ka̍roti ।
ya̱jñame̱vāra̱bhya̍ gṛhī̱tvopa̍vasati ।
pra̱jāpa̍tirya̱jñama̍sṛjata ।
tasyo̱khe a̍sraṁsetām ।
ya̱jño vai pra̱jāpa̍tiḥ ।
yatsā̎nnāyyo̱khe bhava̍taḥ ।
ya̱jñasyai̱va tadu̱khe upa̍dadhā̱tyapra̍sraṁsāya ।
śundha̍dhvaṁ̱ daivyā̍ya̱ karma̍ṇe devaya̱jyāyā̱ ityā̍ha ।
de̱va̱ya̱jyāyā̍ e̱vainā̍ni śundhati ।
mā̱ta̱riśva̍no gha̱rmo̍'sītyā̍ha ॥ 1 ॥))

**[[3-2-3-2]]**

अ॒न्तरि॑क्षं॒ वै मा॑त॒रिश्व॑नो घ॒र्मः।
ए॒षां लो॒काना॒ं विधृ॑त्यै।
द्यौर॑सि पृथि॒व्य॑सीत्या॑ह।
दि॒वश्च॒ ह्ये॑षा पृ॑थि॒व्याश्च॒ संभृ॑ता।
यदु॒खा।
तस्मा॑दे॒वमा॑ह।
वि॒श्वधा॑या असि पर॒मेण॒ धाम्नेत्या॑ह।
वृ॒ष्टि॒र्वै वि॒श्वधा॑याः।
वृष्टि॑मे॒वाव॑रुन्धे।
दृꣳह॑स्व॒ मा ह्वा॒रित्या॑ह॒ धृत्यै᳚॥ २॥

((a̱ntari̍kṣaṁ̱ vai mā̍ta̱riśva̍no gha̱rmaḥ ।
e̱ṣāṁ̱ lo̱kānā̱ṁ vidhṛ̍tyai ।
dyaura̍si pṛthi̱vya̍sītyā̍ha ।
di̱vaśca̱ hye̍ṣā pṛ̍thi̱vyāśca̱ saṁbhṛ̍tā ।
yadu̱khā ।
tasmā̍de̱vamā̍ha ।
vi̱śvadhā̍yā asi para̱meṇa̱ dhāmnetyā̍ha ।
vṛ̱ṣṭi̱rvai vi̱śvadhā̍yāḥ ।
vṛ̱ṣṭi̱me̱vāvā̍rundhe ।
dṛṁha̍sva̱ mā hvā̱rityā̍ha̱ dhṛtyai̎ ॥ 2 ॥))

**[[3-2-3-3]]**

वसू॑नां प॒वित्र॑म॒सीत्या॑ह।
प्रा॒णा वै वस॑वः।
तेषा॒ं वा ए॒तद्भा॒ग॒धेय᳚म्।
यत्प॒वित्र᳚म्।
तेभ्य॑ ए॒वैन॑त्करोति।
श॒तधा॑रꣳ स॒हस्र॑धा॒रमित्या॑ह।
प्रा॒णेष्वे॒वायु॒र्द॑धाति सर्व॒त्वाय॑।
त्रि॒वृत्प॑लाशशा॒खाया᳚ द॒र्भम॑यं भवति।
त्रि॒वृद्वै प्रा॒णः।
त्रि॒वृत॑मे॒व प्रा॒णं मध्य॒तो यज॑माने दधाति॥ ३॥

((vasū̍nāṁ pa̱vitra̍ma̱sītyā̍ha ।
prā̱ṇā vai vasa̍vaḥ ।
teṣā̱ṁ vā e̱tadbhā̱ga̱dheya̎m ।
yatpa̱vitra̎m ।
tebhya̍ e̱vaina̍tkaroti ।
śa̱tadhā̍raṁ sa̱hasra̍dhā̱ramityā̍ha ।
prā̱ṇeṣve̱vāyu̍rdadhāti sarva̱tvāya̍ ।
tri̱vṛtpa̍lāśaśā̱khāyā̎ṁ darbha̱maya̍ṁ bhavati ।
tri̱vṛdvai prā̱ṇaḥ ।
tri̱vṛta̍me̱va prā̱ṇaṁ ma̍dhya̱to yaja̍māne dadhāti ॥ 3 ॥))

**[[3-2-3-4]]**

सौ॒म्यः प॒र्णः सयो॑नि॒त्वाय॑।
सा॒क्षात्प॒वित्र॑ं द॒र्भाः।
प्रा॒ख्सा॒यम॑धि॒निद॑धाति।
तत्प्रा॑णापा॒नयो॑ रू॒पम्।
ति॒र्यक्प्रा॒तः।
तद्द॒र्शस्य॑ रू॒पम्।
दा॒र्श्यꣳ॑ ह्ये॒तदहः॑।
अन्नं॒ वै च॒न्द्रमाः᳚।
अन्न॑ं प्रा॒णाः।
उ॒भय॑मे॒वोपै॑त्यजा॑मित्वाय॥ ४॥

((sau̱myaḥ pa̱rṇaḥ sa̍yoni̱tvāya̍ ।
sā̱kṣātpa̱vitra̍ṁ da̱rbhāḥ ।
prākhsā̱yamadhi̱nida̍dhāti ।
tatprā̍ṇāpā̱nayo̍ rū̱pam ।
ti̱ryakprā̱taḥ ।
taddarśa̍sya rū̱pam ।
dā̱rśyaṁ̍ hye̍tadaha̍ḥ ।

a̠nnaṃ vai ca̠ndramā̎ḥ ।
annaṃ prā̠ṇāḥ ।
u̠bhaya̍me̠vopa̠ityaja̍mitvāya ॥ 4 ॥))

**[[3-2-3-5]]**

त॒स्मा॑द॒यꣳ स॒र्वत॑ः पवते।
हु॒तः स्तो॒को हु॒तो द्र॒प्स इत्या॑ह॒ प्रति॑ष्ठित्यै।
ह॒विषो॑ऽस्कन्दाय।
न हि हु॒तꣳ स्वाहा॑कृत॒ꣳ स्कन्द॑ति।
दि॒वि नाको॒ नामा॒ग्निः।
तस्य॑ वि॒प्रुषो॑ भाग॒धेय॑म्।
अ॒ग्नये॑ बृह॒ते नाका॒येत्या॑ह।
नाक॑मे॒वाग्निं भा॑ग॒धेये॑न॒ सम॑र्धयति।
स्वाहा॒ द्यावा॑पृथि॒वीभ्या॒मित्या॑ह।
द्यावा॑पृथि॒व्योरे॒वैन॒त्प्रति॑ष्ठापयति॥ ५॥

((tasma̍da̠yaṃ sa̠rvata̍ḥ pavate ।
hu̠taḥ sto̠ko hu̠to dra̠psa itya̍ha̠ prati̍ṣṭhityai ।
ha̠viṣo̍'skanda̍ya ।
na hi hu̠taṃ svāhā̍kṛta̠ṃ skanda̍ti ।
di̠vi nāko̠ nāmā̠gniḥ ।
tasya̍ vi̠pruṣo̍ bhāga̠dheya̍m ।
a̠gnaye̍ bṛha̠te nākā̠yetyā̍ha ।
nāka̍me̠vāgniṃ bhā̍ga̠dheye̍na̠ sama̍rdhayati ।
svāhā̠ dyāvā̍pṛthi̠vībhyā̠mityā̍ha ।
dyāvā̍pṛthi̠vyore̠vaina̠tprati̍ṣṭhāpayati ॥ 5 ॥))

**[[3-2-3-6]]**

प॒वित्र॑व॒त्यान॑यति।
अ॒पां चै॒वौष॑धीनां च॒ रस॒ꣳ सꣳसृ॑जति।
अथो॒ ओष॑धीष्वे॒व प॒शून्प्रति॑ष्ठापयति।
अ॒न्वा॒रभ्य॒ वाचं॑ यच्छति।
य॒ज्ञस्य॒ धृत्यै॑।
धा॒रय॑न्नास्ते।
धा॒रय॑न्त इ॒व हि दु॒हन्ति॑।
काम॑धुक्ष इ॒त्या॒हा तृ॒तीय॑स्यै।
त्रय॑ इ॒मे लो॒काः।
इ॒माने॒व लो॒कान्यज॑मानो दुहे॥ ६॥

((pa̠vitra̍va̠tyāna̍yati ।
a̠pāṃ ca̠ivauṣa̍dhīnāṃ ca̠ rasa̠ṃ saṃsṛ̍jati ।
atho̠ oṣa̍dhīṣve̠va pa̠śūnprati̍ṣṭhāpayati ।
a̠nvā̠rabhya̠ vāca̍ṃ yacchati ।
ya̠jñasya̠ dhṛtyai̎ ।
dhā̠raya̍nnāste ।
dhā̠raya̍nta iva̠ hi du̠hanti̍ ।
kāma̍dhukṣa̠ ityā̠hā tṛ̠tīya̍syai ।
traya̍ i̠me lo̠kāḥ ।
i̠māne̠va lo̠kānyaja̍māno duhe ॥ 6 ॥))

**[[3-2-3-7]]**

अ॒मूमि॑ति॒ नाम॑ गृह्णाति।
भ॒द्रमे॒वासा॒ं कर्मा॒विष्क॑रोति।
सा वि॒श्वायु॒ः सा वि॒श्वव्य॑चा॒ः सा वि॒श्वक॒र्मेत्या॑ह।
इ॒यं वै वि॒श्वायु॑ः।
अ॒न्तरि॑क्षं वि॒श्वव्य॑चाः।
अ॒सौ वि॒श्वक॑र्मा।
इ॒माने॒वैताभि॑र्लो॒कान्य॑थापू॒र्वं दु॑हे।
अथो॒ यथा॑ प्रदा॒त्रे पुण्य॑मा॒शास्ते॑।
ए॒वमे॒वैना॑ ए॒तदुप॑स्तौति।
तस्मा॒त्प्राद॒ादित्यु॒न्नीय॒ वन्द॑माना उपस्तु॒वन्त॑ः
प॒शून्दु॑हन्ति॥ ७॥

((a̠mūmiti̠ nāma̍ gṛhṇāti ।
bha̠drame̠vāsā̠ṃ karmā̠viṣka̍roti ।
sā vi̠śvāyu̠ḥ sā vi̠śvavya̍cā̠ḥ sā vi̠śvaka̠rmetyā̍ha ।
i̠yaṃ vai vi̠śvāyu̍ḥ ।
a̠ntari̍kṣaṃ vi̠śvavya̍cāḥ ।
a̠sau vi̠śvaka̍rmā ।
i̠māne̠vaitābhi̍rlo̠kānya̍thāpū̠rvaṃ du̍he ।
atho̠ yathā̎ pradā̠tre puṇya̍mā̠śāste̎ ।
e̠vame̠vainā̍ e̠tadupa̍stauti ।
tasmā̠tprādā̠dityu̠nnīya̠ vanda̍mānā upastu̠vanta̍ḥ
pa̠śūndu̍hanti ॥ 7 ॥))

**[[3-2-3-8]]**

ब॒हु दु॒ग्धीन्द्रा॑य दे॒वेभ्यो॑ ह॒विरि॑ति॒ वाचं॒ विसृ॑जते।
य॒थादे॒वतमे॑व प्रसौ॑ति।
दैव्य॑स्य च मानु॒षस्य॑ च॒ व्यावृ॑त्त्यै।
त्रिरा॑ह।
त्रिष॑त्या॒ हि दे॒वाः।
अवा॑चंयमोऽन॑न्वार॒भ्योत्त॑राः।
अप॑रिमितम॒वाव॑रुन्धे।
न दा॑रुपात्रेण॑ दुह्यात्।
अ॒ग्निव॒द्वै दा॑रुपात्रम्।
यद्दा॑रुपा॒त्रेण॑ दु॒ह्यात्॥ ८॥

((ba̠hu du̠gdhīndrā̍ya de̠vebhyo̍ ha̠viriti̠ vāca̠ṃ
visṛ̍jate ।

yathādevatameva prasauti ।
daivyasya ca mānuṣasya ca vyāvṛttyai ।
trirāha ।
triṣatyā hi devāḥ ।
avācamyamo'nanvārabhyottarāḥ ।
aparimitamevāvarundhe ।
na dārupātreṇa duhyāt ।
agnivadvai dārupātram ।
yaddārupātreṇa duhyāt ॥ 8 ॥))

**[[3-2-3-9]]**

यातयाँम्ना ह॒विषा यजेत।
अथो॒ खल्वा॑हुः।
पु॒रो॒डा॒श॒मु॒खानि॒ वै ह॒वीꣳषि।
नेत इ॒तः पु॒रो॒डाशꣳ ह॒विषो॒ यामो॒ऽस्तीति॑।
का॒मम॑व दा॒रुपा॒त्रेण दुह्यात्।
शू॒द्र ए॒व न दुह्यात्।
अस॑तो॒ वा ए॒ष संभू॑तः।
यच्छू॒द्रः।
अह॑वि॒रेव तदित्या॑हुः।
यच्छू॒द्रो दोग्धीति॑॥ ९॥

((yātayām̐nā haviṣā yajeta ।
atho khalvāhuḥ ।
purodāśamukhāni vai havīm̐ṣi ।
neta itaḥ purodāśam̐ haviṣo yāmo'stīti ।
kāmameva dārupātreṇa duhyāt ।
śūdra eva na duhyāt ।
asato vā eṣa sambhūtaḥ ।
yacchūdraḥ ।
ahavireva tadityāhuḥ ।
yacchūdro dogdhīti ॥ 9 ॥))

**[[3-2-3-10]]**

अ॒ग्नि॒हो॒त्रमे॒व न दुह्याच्छू॒द्रः।
तद्धि नोत्पु॒नन्ति॑।
य॒दा खलु॒ वै प॒वित्र॑म॒त्येति॑।
अथ॒ तद्ध॒विरिति॑।
संपृ॑च्यध्वमृतावरी॒रित्या॑ह।
अ॒पां चै॒वौष॑धीनां च॒ रस॒ꣳ सꣳसृ॑जति।
तस्मा॑द॒पां चौष॑धीनां च॒ रस॒मुप॑जीवामः।
म॒न्द्रा धन॑स्य सा॒तय॒ इत्या॑ह।
पुष्टि॑मे॒व यज॑माने दधाति।
सोमे॑न॒ त्वाऽऽत॑न॒च्मीन्द्रा॑य॒ दधीत्या॑ह॥ १०॥

((agnihotrameva na duhyācchūdraḥ ।
taddhi notpunanti ।
yadā khalu vai pavitramatyeti ।
atha taddhaviriti ।
sampṛcyadhvamṛtāvarīrityāha ।
apām caivauṣadhīnām ca rasam̐ sam̐sṛjati ।
tasmādapām cauṣadhīnām ca rasamupajīvāmaḥ ।
mandrā dhanasya sātaya ityāha ।
puṣṭimeva yajamāne dadhāti ।
somena tvā''tanacmīndrāya dadhītyāha ॥ 10 ॥))

**[[3-2-3-11]]**

सोम॑मे॒वैन॑त्करोति।
यो वै सोम॑ं भक्षयि॒त्वा।
सं॒व॒त्स॒रꣳ सोम॒ं न पिब॑ति।
पु॒नर्भ॒क्ष्योँऽस्य सोमपी॒थो भ॑वति।
सोम॒ः खलु॒ वै सा॑न्ना॒य्यम्।
य ए॒वं वि॒द्वान्त्साँन्ना॒य्यं पिब॑ति।
अ॒पु॒नर्भ॒क्ष्योँऽस्य सोमपी॒थो भ॑वति।
न मृ॒न्मये॒नापि॑दध्यात्।
यन्मृ॒न्मये॑नापिद॒ध्यात्।
पि॒तृ॒दे॒व॒त्यꣳ स्यात्॥ ११॥

((somamevainatkaroti ।
yo vai somam̐ bhakṣayitvā ।
saṃvatsaram̐ somaṃ na pibati ।
punarbhakṣyõ'sya somapītho bhavati ।
somaḥ khalu vai sān'nāyyam ।
ya evaṃ vidvāntsām̐nāyyaṃ pibati ।
apunarbhakṣyõ'sya somapītho bhavati ।
na mṛnmayenāpidadhyāt ।
yanmṛnmayenāpidadhyāt ।
pitṛdevatyam̐ syāt ॥ 11 ॥))

**[[3-2-3-12]]**

अ॒य॒स्पा॒त्रेण वा दारुपा॒त्रेण॒ वाऽपि॑दधाति।
तद्धि सदे॑वम्।
उ॒द॒न्व॒द्भ॑वति।
आपो॒ वै र॑क्षो॒घ्नीः।
रक्ष॑सा॒मप॑हत्यै।
अद॑स्तमसि॒ विष्ण॑वे॒ त्वेत्या॑ह।
य॒ज्ञो वै विष्णुः।
य॒ज्ञायै॒वैन॒दद॑स्तं करोति।
विष्णो॑ ह॒व्यꣳ र॑क्ष॒स्वेत्या॑ह॒ गुप्त्यै॑।
अन॑धः सादयति।

गर्भाणां धृत्या अप्रपादाय।
तस्माद्गर्भाः प्रजानामप्रपादुकाः।
उपरीव निदधाति।
उपरीव हि सुवर्गो लोकः।
सुवर्गस्य लोकस्य समष्ट्यै॥ १२॥
असीत्याह धृत्यै यजमाने दधात्यजामित्वाय स्थापयति दुहे दुहन्ति दुह्याद्दोग्घिति दधीत्याह स्याथ्सादयति पञ्च च॥ ३॥

((ayaspātreṇa vā dārupātreṇa vā'pidadhāti I
taddhi sadevam I
udanvadbhavati I
āpo vai rakṣoghnīḥ I
rakṣasāmapahatyai I
adastamasi viṣṇave tvetyāha I
yajño vai viṣṇuḥ I
yajñāyaivainadadastaṃ karoti I
viṣṇo havyaṃ rakṣasvetyāha guptyai I
anadhaḥ sādayati I
garbhāṇāṃ dhṛtyā aprapādāya I
tasmādgarbhāḥ prajānāmaprapādukāḥ I
uparīva nidadhāti I
uparīva hi suvargo lokaḥ I
suvargasya lokasya samaṣṭyai II 12 II
asītyāha dhṛtyai yajamāne dadhātyajāmitvāya sthāpayati duhe duhanti duhyāddogghiīti dadhītyāha syāthsādayati pañca ca II 3 II))

**[[3-2-4-1]]**

कर्मणे वां देवेभ्यः शकेयमित्याह शक्त्यै।
यज्ञस्य वै संततिमनु प्रजाः पशवो यजमानस्य संतायन्ते।
यज्ञस्य विच्छित्तिमनु प्रजाः पशवो यजमानस्य विच्छिद्यन्ते।
यज्ञस्य संततिरसि यज्ञस्य त्वा संतत्यै स्तृणामि संतत्यै त्वा यज्ञस्येत्याहवनीयात्संतनोति।
यजमानस्य प्रजायै पशूनाꣳ संतत्यै।
अपः प्रणयति।
श्रद्धा वा आपः।
श्रद्धामेवारभ्य प्रणीय प्रचरति।
अपः प्रणयति।
यज्ञो वा आपः॥ १॥

((karmaṇe vāṃ devebhyaḥ śakeyamityāha śaktyai I
yajñasya vai saṃtatimanu prajāḥ paśavo yajamānasya saṃtāyante I
yajñasya vicchittimanu prajāḥ paśavo yajamānasya vicchidyante I
yajñasya saṃtatirasi yajñasya tvā saṃtatyai stṛṇāmi saṃtatyai tvā yajñasyetyāhavanīyātsaṃtanoti I
yajamānasya prajāyai paśūnām̐ saṃtatyai I
apaḥ praṇayati I
śraddhā vā āpaḥ I
śraddhāmevārabhya praṇīya pracarati I
apaḥ praṇayati I
yajño vā āpaḥ II 1 II))

**[[3-2-4-2]]**

यज्ञमेवारभ्य प्रणीय प्रचरति।
अपः प्रणयति।
वज्रो वा आपः।
वज्रमेव भ्रातृव्येभ्यः प्रहृत्य प्रणीय प्रचरति।
अपः प्रणयति।
आपो वै रक्षोघ्नीः।
रक्षसामपहत्यै।
अपः प्रणयति।
आपो वै देवानां प्रियं धाम।
देवानामेव प्रियं धाम प्रणीय प्रचरति॥ २॥

((yajñamevārabhya praṇīya pracarati I
apaḥ praṇayati I
vajro vā āpaḥ I
vajrameva bhrātṛvyebhyaḥ prahṛtya praṇīya pracarati I
apaḥ praṇayati I
āpo vai rakṣoghnīḥ I
rakṣasāmapahatyai I
apaḥ praṇayati I
āpo vai devānām̐ priyaṃ dhāma I
devānāmeva priyaṃ dhāma praṇīya pracarati II 2 II))

**[[3-2-4-3]]**

अपः प्रणयति।
आपो वै सर्वा देवताः।
देवता एवारभ्य प्रणीय प्रचरति।
वेषाय त्वेत्याह।
वेषाय ह्येनदादत्ते।
प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातय इत्याह।
रक्षसामपहत्यै।
धूरसीत्याह।
एष वै धुर्योऽग्निः।

तं यदनु॑पस्पृ॒श्याती॒यात्॥ ३॥

((a̱paḥ praṇáyati ।
āpo̱ vai sarvá de̱vatā̎ḥ ।
de̱vatá e̱vārabhyá pra̱ṇīya̱ pracárati ।
veṣáya̱ tvetyáha ।
veṣáya̱ hyénadāda̱tte ।
pratyúṣṭa̱m̐ rakṣa̱ḥ pratyúṣṭā̱ arátaya̱ ityáha ।
rakṣásā̱mapáhatyai ।
dhūra̱sītyáha ।
e̱ṣa vai dhuryo̱'gniḥ ।
taṃ yadanúpaspṛśyātī̱yāt ॥ 3 ॥))

**[[3-2-4-4]]**

अ॒ध्व॒र्युं च॒ यज॑मानं च॒ प्रद॑हेत्।
उ॒प॒स्पृ॒श्यात्ये॑ति।
अ॒ध्व॒र्योश्च॒ यज॑मानस्य॒ चाप्र॑दाहाय।
धूर्व॑न्तं॒ यो᳚ऽस्मान्धूर्व॑ति॒ तं धू᳚र्व॒यं व॒यं धूर्वा॑म॒ इत्या॑ह।
द्वौ वाव पु॒रु॑षौ।
यं चै॒व धूर्व॑ति।
यस्चै॑नं॒ धूर्व॑ति।
तावु॒भौ शु॒चाऽर्प॑यति।
त्वं दे॒वाना॑मसि॒ सस्नि॑तमं॒ पप्रि॑तमं॒ जुष्ट॑तमं॒ वह्नि॑तमं
दे॒व॒हूत॑मम॒मित्या॑ह।
य॒था॒ य॒जु॒रे॒वैतत्॥ ४॥

((a̱dhva̱ryuṃ ca̱ yajámānaṃ ca̱ pradáhet ।
u̱pa̱spṛśyātyéti ।
a̱dhva̱ryośca̱ yajámānasya̱ cāprádāhāya ।
dhūrva̱ntaṃ yö'smāndhūrváti̱ taṃ dhū̎rva̱yaṃ
va̱yaṃ dhūrváma̱ ityáha ।
dvau vāva purúṣau ।
ya̱ṃ ca̱iva dhūrváti ।
yascaína̱ṃ dhūrváti ।
tāvu̱bhau śu̱cā'rpáyati ।
tvaṃ de̱vānámasi̱ sasnítamaṃ̱ paprítamaṃ̱
juṣṭátamaṃ̱ vahnítamaṃ deva̱hūtáma̱mityáha ।
ya̱thā̱ ya̱jure̱vaitat ॥ 4 ॥))

**[[3-2-4-5]]**

अह्नु॑तमसि ह॒वि॒र्धान॒मित्या॒हाना᳚र्त्यै।
दृꣳह॑स्व मा ह्वा॒रित्या॑ह॒ धृत्यै᳚।
मि॒त्रस्य॑ त्वा॒ चक्षु॑षा॒ प्रेक्ष॒ इत्या॑ह मि॒त्रत्वाय॑।
मा भेर्मा॑ संवि॑क्था॒ मा त्वा॑ हिꣳसिष॒मित्या॒हाहिꣳ॑सायै।
यद्वै किंच॒ वातो॒ नाभि॒वाति॑।
तत्सर्वं॑ वरुणदे॒वत्यं᳚म्।
उ॒रु॒वा॒ता॒येत्या॑ह।
अवा॑रुणमे॒वैन॑त्करोति।
दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒व इत्या॑ह॒ प्रसू᳚त्यै।
अ॒श्विनो᳚र्बा॒हुभ्या॒मित्या॑ह॥ ५॥

((ahnútamasi havi̱rdhāna̱mityā̱hānā̎rtyai ।
dṛm̐hásva̱ mā hvā̱rityáha̱ dhṛtyai̎ ।
mi̱trasyá tvā̱ cakṣúṣā̱ prekṣa̱ ityáha mitra̱tvāyá ।
mā bhermā saṃvíkthā̱ mā tvá
him̐siṣa̱mityā̱hāhim̐sāyai ।
yadvai kiṃca̱ vāto̱ nābhi̱vātí ।
tatsarvaṃ́ varuṇadeva̱tyä̱m ।
u̱ruvātā̱yetyáha ।
avárunam̱evainátkaroti ।
de̱vasyá tvā savi̱tuḥ prásava ityáha̱ prasū̎tyai ।
a̱śvinör̥bā̱hubhyā̱mityáha ॥ 5 ॥))

**[[3-2-4-6]]**

अ॒श्विनौ॒ हि दे॒वाना॑मध्व॒र्यू आस्ता᳚म्।
पू॒ष्णो हस्ता᳚भ्या॒मित्या॑ह॒ यत्यै᳚।
अ॒ग्नये॒ जुष्टं॒ निर्व॑पामीत्या॑ह।
अ॒ग्नय॑ ए॒वैनां॒ जुष्टं॒ निर्व॑पति।
त्रि॒र्यजु॑षा।
त्र॒य इ॒मे लो॒काः।
ए॒षां लो॒काना॒माप्त्यै᳚।
तू॒ष्णीं च॑तु॒र्थम्।
अप॑रिमितमे॒वाव॑रुन्धे।
स ए॒वमे॒वानु॑पूर्वꣳ ह॒वीꣳषि॒ निर्व॑पति॥ ६॥

((a̱śvinau̱ hi de̱vānámadhva̱ryū āstā̎m ।
pū̱ṣṇo hastā̎bhyā̱mityáha̱ yatyai̎ ।
a̱gnaye̱ juṣṭa̱ṃ nirvápā̱mītyáha ।
a̱gnayá e̱vainā̱ṃ juṣṭa̱ṃ nirvápati ।
triryajúṣā ।
trayá i̱me lo̱kāḥ ।
e̱ṣāṃ lo̱kānā̱māptyai̎ ।
tū̱ṣṇīṃ cátu̱rtham ।
aparimitame̱vāvárundhe ।
sa e̱vame̱vānúpūrvam̐ ha̱vīm̐ṣi̱ nirvápati ॥ 6 ॥))

**[[3-2-4-7]]**

इ॒दं दे॒वाना॑मि॒दमु॑नः स॒हेत्या॑ह॒ व्यावृ॑त्त्यै।
स्फा॒त्यै त्वा॒ नारा᳚त्या॒ इत्या॑ह॒ गुप्त्यै᳚।
तम॑सीव॒ वा ए॒षो᳚ऽन्तश्च॑रति।
यः प॒री॒ण॒हि।
सु॒व॒र॒भिवि॑ख्ये॒षं वै᳚श्वान॒रं ज्योति॒रित्या॑ह।

सुव॑रे॒वाभि विप॑श्यति वैश्वान॒रं ज्योति॑ः।
द्यावा॑पृथि॒वी ह॒विषि॑ गृही॒त उद॑वेपेताम्।
दृꣳह॑न्तां॒ दु॒र्या॒ द्यावा॑पृथि॒व्योरित्या॑ह।
गृ॒हाणां॒ द्यावा॑पृथि॒व्योर्धृत्यै᳚।
उ॒र्व॑न्तरि॑क्ष॒मन्वि॒हीत्या॑ह॒ गत्यै᳚।
अदि॑त्यास्त्वो॒पस्थे॑ सादया॒मीत्या॑ह।
इ॒यं वा अदि॑तिः।
अ॒स्या ए॒वैन॑दु॒पस्थे॑ सादयति।
अग्ने॑ ह॒व्यꣳ रक्ष॒स्वेत्या॑ह॒ गुप्त्यै᳚॥ ७॥
य॒ज्ञो वा आपो॒ धाम॑ प्र॒णीय॒
प्रच॑रत्यती॒यादे॒तद्बा॒हुभ्या॒मित्या॑ह ह॒वीꣳषि॒ निर्व॑पति॒ गत्यै॑
च॒त्वारि॑ च॥ ४॥

((i̱daṃ de̱vānā̍mi̱damu̍naḥ sa̱hetyā̍ha̱ vyāvṛ̍ttyai ।
sphā̱tyai tvā̱ nārā̎tyā̱ ityā̍ha̱ guptyai̎ ।
tama̍sīva̱ vā e̱ṣo̎'ntaśca̍rati ।
yaḥ parī̱ṇahi̍ ।
suva̍ra̱bhivikhye̍ṣaṃ vaiśvāna̱raṃ jyoti̱rityā̍ha ।
suva̍re̱vābhi vipa̍śyati vaiśvāna̱raṃ jyoti̍ḥ ।
dyāvā̍pṛthi̱vī ha̱viṣi̍ gṛhī̱ta uda̍vepetām ।
dṛ̍m̐ha̍ntā̱ṃ durya̱ dyāvā̍pṛthi̱vyorityā̍ha ।
gṛ̱hāṇā̱ṃ dyāvā̍pṛthi̱vyordhṛtyai̎ ।
u̱rva̍ntari̍kṣa̱manvi̱hītyā̍ha̱ gatyai̎ ।
adi̍tyāstvo̱pasthe̍ sādayā̱mītyā̍ha ।
i̱yaṃ vā adi̍tiḥ ।
a̱syā e̱vaina̍du̱pasthe̍ sādayati ।
agne̍ ha̱vyam̐ rakṣa̱svetyā̍ha̱ guptyai̎ ॥ 7 ॥
ya̱jño vā āpo̱ dhāma̍ pra̱ṇīya̱
praca̍ratyatī̱yāde̱tadbā̱hubhyā̱mityā̍ha ha̱vīm̐ṣi̱
nirva̍pati̱ gatyai̍ ca̱tvāri̍ ca ॥ 4 ॥))

**[[3-2-5-1]]**

इन्द्रो॑ वृ॒त्रम॑हन्न्।
सो॑ऽपः।
अ॒भ्य॑म्रियत।
तासा॒ं यन्मेध्य॑ं य॒ज्ञिय॒ꣳ सदे॑व॒मासी॑त्।
तदपोद॑क्रामत्।
ते द॒र्भा अ॑भवन्न्।
यद्द॒र्भैर॒प उ॑त्पु॒नाति॑।
या ए॒व मेध्या॑ य॒ज्ञिया॒ः सदे॑वा॒ आप॑ः।
ताभि॑रे॒वैना॒ उत्पु॑नाति।
द्वाभ्या॒मुत्पु॑नाति॥ १॥

((indro̍ vṛ̱tramā̍hann ।
so̍'paḥ ।
a̱bhya̍mriyata ।
tāsā̱ṃ yanmedhya̍ṃ ya̱jñiya̱m̐ sade̍va̱māsī̎t ।
tadapoda̍krāmat ।
te da̱rbhā a̍bhavann ।
yadda̱rbhaira̱pa u̍tpu̱nāti̍ ।
yā e̱va medhyā̍ ya̱jñiyā̱ḥ sade̍vā̱ āpa̍ḥ ।
tābhi̍re̱vainā̱ utpu̍nāti ।
dvābhyā̱mutpu̍nāti ॥ 1 ॥))

**[[3-2-5-2]]**

द्वि॒पाद्यज॑मानः प्रति॑ष्ठित्यै।
दे॒वो व॑ः सवि॒तोत्पु॑ना॒त्वित्या॑ह।
स॒वि॒तृप्र॑सूत ए॒वैना॒ उत्पु॑नाति।
अच्छि॑द्रेण प॒वित्रे॒णेत्या॑ह।
अ॒सौ वा आ॑दि॒त्योऽच्छि॑द्रं प॒वित्र॑म्।
ते॒नै॒वैना॒ उत्पु॑नाति।
वसो॒ः सूर्य॑स्य र॒श्मिभि॒रित्या॑ह।
प्रा॒णा वा आप॑ः।
प्रा॒णा वस॑वः।
प्रा॒णा र॒श्मय॑ः॥ २॥

((dvi̱pādyaja̍mānaḥ prati̍ṣṭhityai ।
de̱vo va̍ḥ savi̱totpu̍nā̱tvityā̍ha ।
sa̱vi̱tṛpra̍sūta e̱vainā̱ utpu̍nāti ।
acchi̍dreṇa pa̱vitre̱ṇetyā̍ha ।
a̱sau vā ā̍di̱tyo'cchi̍draṃ pa̱vitra̍m ।
tena̱i̱vainā̱ utpu̍nāti ।
vaso̱ḥ sūrya̍sya ra̱śmibhi̱rityā̍ha ।
prā̱ṇā vā āpa̍ḥ ।
prā̱ṇā vasa̍vaḥ ।
prā̱ṇā ra̱śmaya̍ḥ ॥ 2 ॥))

**[[3-2-5-3]]**

प्रा॒णैरे॒व प्रा॒णान्त्संपृ॑णक्ति।
सा॒वि॒त्रि॒यर्चा॑।
स॒वि॒तृप्र॑सूतं मे॒ कर्मा॑स॒दिति॑।
स॒वि॒तृप्र॑सूतमे॒वास्य॒ कर्म॑ भवति।
प॒च्छो गा॑यत्रि॒या त्रि॑ष्षमृद्ध॒त्वाय॑।
आपो॑ दे॒वीरग्रे॑पुवो अग्रे गुव॒ इत्या॑ह।
रू॒पमे॒वासा॑मे॒तन्म॑हि॒मान॑ं व्याच॑ष्टे।
अग्र॑ इ॒मं य॒ज्ञं न॑यताग्रे॑ य॒ज्ञप॑ति॒मित्या॑ह।
अग्रे॑ ए॒व य॒ज्ञं न॑यन्ति।
अग्रे॑ य॒ज्ञप॑तिम्॥ ३॥

((prā̱ṇaire̱va prā̱ṇāntsampṛ̍ṇakti ।
sā̱vi̱trī̱yarcā ।
sa̱vi̱tṛpra̍sūtam me̱ karmā̎sa̱diti̍ ।
sa̱vi̱tṛpra̍sūtame̱vāsya̱ karma̍ bhavati ।
pa̱ccho gā̎yatri̱yā tri̍ṣṣamṛddha̱tvāya̍ ।
āpo̍ devīragrepuvo agre guva̱ ityā̎ha ।
rū̱pame̱vāsā̎me̱tanmā̍hi̱mānam̱ vyāca̍ṣṭe ।
agra̍ i̱mam̱ ya̱jñam̱ na̍ya̱tāgre̍ ya̱jñapa̍ti̱mityā̎ha ।
agre̍ e̱va ya̱jñam̱ na̍yanti ।
agre̍ ya̱jñapa̍tim ॥ 3 ॥))

**[[3-2-5-4]]**

यु॒ष्मानिन्द्रो॑ऽवृणीत वृ॒त्रतू॑र्ये यू॒यमिन्द्र॑मवृणीध्वं वृ॒त्रतू॑र्य॒ इत्या॑ह।
वृ॒त्रꣳ ह॑ ह॒नि॒ष्यन्निन्द्र॒ आपो॑ वव्रे।
आपो॒ हेन्द्रं॑ वव्रिरे।
सं॒ज्ञामे॒वासा॑मे॒तत्सामा॑नं॒ व्याच॑ष्टे।
प्रोक्षि॑ताः स्थेत्या॑ह।
तेनाप॒ः प्रोक्षि॑ताः।
अ॒ग्नये॑ वो॒ जुष्टं॑ प्रोक्षा॒म्यग्नीषोमा॒भ्या॒मित्या॑ह।
य॒था॒दे॒व॒तमे॒वैना॒न्प्रोक्ष॑ति।
त्रिः प्रोक्ष॑ति।
त्र्या॑वृ॒द्धि य॒ज्ञः॥ ४॥

((yu̱ṣmānindro̍'vṛṇīta vṛ̱tra̱tūrye̍
yū̱yamindra̍mavṛṇīdhvam̱ vṛ̱tra̱tūrya̱ ityā̎ha ।
vṛ̱tram̐ ha̍ hani̱ṣyannindra̱ āpo̍ vavre ।
āpo̱ hendram̍ vavrire ।
sa̱mjñāme̱vāsā̎me̱tatsāmā̎nam̱ vyāca̍ṣṭe ।
prokṣi̍tāḥ sthetyā̎ha ।
tenāpa̱ḥ prokṣi̍tāḥ ।
a̱gnaye̍ vo̱ juṣṭam̱ prokṣā̎myagnīṣomā̎bhyā̱mityā̎ha ।
ya̱thā̱de̱va̱tame̱vainā̱nprokṣa̍ti ।
triḥ prokṣa̍ti ।
tryā̎vṛ̱ddhi ya̱jñaḥ ॥ 4 ॥))

**[[3-2-5-5]]**

अथो॒ रक्ष॑सा॒मप॑हत्यै।
शुन्ध॑ध्वं दैव्या॑य॒ कर्म॑णे देवय॒ज्याया॒ इत्या॑ह।
दे॒व॒य॒ज्याया॑ ए॒वैना॑नि शुन्धति।
त्रिः प्रोक्ष॑ति।
त्र्या॑वृ॒द्धि य॒ज्ञः।
अथो॑ मे॒ध्य॒त्वाय॑।
अव॑धूत॒ꣳ रक्षो॒ऽव॑धूता॒ अरा॑तय॒ इत्या॑ह।
रक्ष॑सा॒मप॑हत्यै।
अदि॑त्या॒स्त्वग॒सीत्या॑ह।
इ॒यं वा अदि॑तिः॥ ५॥

((atho̱ rakṣa̍sā̱mapa̍hatyai ।
śundha̍dhvam̱ daivyā̎ya̱ karma̍ṇe devaya̱jyāyā̱
ityā̎ha ।
de̱va̱ya̱jyāyā̎ e̱vainā̍ni śundhati ।
triḥ prokṣa̍ti ।
tryā̎vṛ̱ddhi ya̱jñaḥ ।
atho̍ medhya̱tvāya̍ ।
ava̍dhūta̱m̐ rakṣo̱'va̍dhūtā̱ arā̎taya̱ ityā̎ha ।
rakṣa̍sā̱mapa̍hatyai ।
adi̍tyā̱stvaga̱sītyā̎ha ।
i̱yam̱ vā adi̍tiḥ ॥ 5 ॥))

**[[3-2-5-6]]**

अ॒स्या ए॒वैन॒त्त्वचं॑ करोति।
प्रति॑ त्वा पृ॒थि॒वी वे॒त्त्वित्या॑ह॒ प्रति॑ष्ठित्यै।
पु॒रस्ता॒त्प्रती॒चीन॑ग्रीव॒मुत्त॑रलो॒मोप॑स्तृणाति मेध्य॒त्वाय॑।
तस्मा॒त्पु॒रस्ता॒त्प्र॒त्यञ्चः॑ प॒शवो॒ मेध॒मुप॑तिष्ठन्ते।
तस्मा॒त्प्र॒जा मृ॒गं ग्राहु॑काः।
य॒ज्ञो दे॒वेभ्यो॒ निला॑यत।
कृ॒ष्णो॑ रू॒पं कृ॒त्वा।
यत्कृ॒ष्णाजि॒ने ह॒विर॑ध्यव॒हन्ति॑।
य॒ज्ञादे॒व तद्य॒ज्ञं प्रयु॑ङ्क्ते।
ह॒विषो॒ऽस्कन्दा॑य॥ ६॥

((a̱syā e̱vaina̱ttvaca̍m karoti ।
prati̍ tvā pṛthi̱vī ve̱ttvityā̎ha̱ prati̍ṣṭhityai ।
pu̱rastā̎tpratī̱cīna̍grīva̱muttā̍ralo̱mopa̍stṛṇāti
medhya̱tvāya̍ ।
tasmā̎tpu̱rastā̎tpra̱tyañca̍ḥ pa̱śāvo̱
medha̱mupa̍tiṣṭhante ।
tasmā̎tpra̱jā mṛ̱gam̱ grāhu̍kāḥ ।
ya̱jño de̱vebhyo̱ nilā̍yata ।
kṛ̱ṣṇo̍ rūpam̱ kṛ̱tvā ।
yatkṛ̍ṣṇāji̱ne ha̱virā̍dhyava̱hanti̍ ।
ya̱jñāde̱va tadya̱jñam̱ prayu̍ṅkte ।
ha̱viṣo̱'skā̍ndāya ॥ 6 ॥))

**[[3-2-5-7]]**

अ॒धि॒षव॑णमसि वानस्प॒त्यमित्या॑ह।
अ॒धि॒षव॑णमे॒वैन॑त्करोति।
प्रति॒ त्वाऽदि॑त्या॒स्त्वग्वे॒त्त्वित्या॑ह सय॒त्वाय॑।
अ॒ग्नेस्त॒नूर॒सीत्या॑ह।
अ॒ग्नेर्वा ए॒षा त॒नूः।
यदोष॑धयः।

वाचो विसर्जनमित्याह।
यदा हि प्रजा ओषधीनामश्नन्ति।
अथ वाचं विसृजन्ते।
देववीतये त्वा गृह्णामीत्याह॥ ७॥

((adhiṣavaṇamasi vānaspatyamityāha |
adhiṣavaṇamevainatkaroti |
prati tvā'dityāstvagvetvityāha sayatvāya |
agnestanūrasītyāha |
agnervā eṣā tanūḥ |
yadoṣadhayaḥ |
vāco visarjanamityāha |
yadā hi prajā oṣadhīnāmaśnanti |
atha vācam visṛjante |
devavītaye tvā gṛhṇāmītyāha || 7 ||))

**[[3-2-5-8]]**

देवताभिरेवैनत्समर्धयति।
अद्रिरसि वानस्पत्य इत्याह।
ग्रावाणमेवैनत्करोति।
स इदं देवेभ्यो हव्यꣳ सुशमि शमिष्वेत्याह शान्त्यै।
हविष्कृदेहीत्याह।
य एव देवानाꣳ हविष्कृतः।
तान्ह्वयति।
त्रिर्ह्वयति।
त्रिषत्या हि देवाः।
इषमा वदोर्जमा वदेत्याह॥ ८॥

((devatābhirevainatsamardhayati |
adrirasi vānaspatya ityāha |
grāvāṇamevainatkaroti |
sa idam devebhyo havyam̐ suśami śamiṣvetyāha śāntyai |
haviṣkṛdehītyāha |
ya eva devānām̐ haviṣkṛtaḥ |
tānhvayati |
trirhvayati |
triṣatyā hi devāḥ |
iṣamā vadorjamā vadetyāha || 8 ||))

**[[3-2-5-9]]**

इषमेवोर्जं यजमाने दधाति।
द्युमद्वदत वयꣳ संघातं जेष्मेत्याह भ्रातृव्याभिभूत्यै।
मनोः श्रद्धा देवस्य यजमानस्यासुरघ्नी वाक्।
यज्ञायुधेषु प्रविष्टाऽऽसीत्।
तेऽसुरा यावन्तो यज्ञायुधानामुद्वदतामुपाशृण्वन्न्।
ते पराभवन्न्।
तस्मात्स्वानां मध्येऽवसाय यजेत।
यावन्तोऽस्य भ्रातृव्या यज्ञायुधानामुद्वदतामुपशृण्वन्ति।
ते पराभवन्ति।
उच्चैः समाहन्तवा आह विजित्यै॥ ९॥

((iṣāmevorjam yajamāne dadhāti |
dyumadvadata vayam̐ saṁghātaṁ jeṣmetyāha
bhrātṛvyābhibhūtyai |
manoḥ śraddhā devasya yajamānasyāsuraghnī vāk |
yajñāyudheṣu praviṣṭā''sīt |
te'surā yāvanto
yajñāyudhānāmudvadatāmupāśṛṇvann |
te parābhavann |
tasmātsvānām madhye'vasāya yajeta |
yāvanto'sya bhrātṛvyā
yajñāyudhānāmudvadatāmupaśṛṇvanti |
te parābhavanti |
uccaiḥ samāhantavā āha vijityai || 9 ||))

**[[3-2-5-10]]**

वृङ्क्त एषामिन्द्रियं वीर्यम्।
श्रेष्ठ एषां भवति।
वर्षवृद्धमसि प्रति वा वर्षवृद्धं वेत्त्वित्याह।
वर्षवृद्धा वा ओषधयः।
वर्षवृद्धा इषीकाः समृद्ध्यै।
यज्ञꣳ रक्षाꣳस्यनुप्राविशन्न्।
तान्यस्ना पशुभ्यो निरवादयन्त।
तुषैरोषधीभ्यः।
परापूतꣳ रक्षः परापूता अरातय इत्याह।
रक्षसामपहत्यै॥ १०॥

((vṛṅkta eṣāmindriyam vīryam |
śreṣṭha eṣām bhavati |
varṣavṛddhamasi prati vā varṣavṛddham vettvityāha
|
varṣavṛddhā vā oṣadhayaḥ |
varṣavṛddhā iṣīkāḥ samṛddhyai |
yajñam̐ rakṣām̐syanuprāviśann |
tānyasnā paśubhyo niravādayanta |
tuṣairoṣadhībhyaḥ |
parāpūtam̐ rakṣaḥ parāpūtā arātaya ityāha |
rakṣasāmapahatyai || 10 ||))

**[[3-2-5-11]]**

रक्षसां भागोऽसीत्याह।
तुषैरेव रक्षाꣳसि निरवदयते।

अ॒प उ॒प॑स्पृशति मेध्य॒त्वाय॑।
वा॒युर्वो॒ वि॒वि॑न॒क्त्वित्या॑ह।
प॒वित्रं॒ वै वा॒युः।
पु॒नात्ये॒वैना॑न्।
अ॒न्तरि॑क्षादि॒व वा ए॒ते प्रस्क॑न्दन्ति।
ये शूर्पा᳚त्।
दे॒वो वः॑ सवि॒ता हिर॑ण्यपाणिः॒ प्रति॑गृह्णा॒त्वित्या॑ह॒
प्रति॑ष्ठित्यै।
ह॒विषो॑ऽस्क॑न्दाय।
त्रि॒ष्फ॒ली क॑र्त॒वा आ॑ह।
त्र्या॑वृद्धि य॒ज्ञः।
अथो॑ मेध्य॒त्वाय॑॥ ११॥
द्वाभ्या॑मु॒त्पु॑नाति र॒श्मयो॑ न॒यन्त्य॒ग्रे᳚ य॒ज्ञप॑तिं
य॒ज्ञोऽदि॑ति॒रस्क॑न्दाय गृह्णामीत्या॑ह वे॒देत्या॑ह॒ वि॒जित्या॒
अप॑हत्या॒ अस्क॑न्दाय॒ त्रीणि॑ च॥ ५॥

((rakṣásāṃ bhāgó'sītyáha ।
tuṣaire̱va rakṣā́ṃsi ni̱ravádayate ।
a̱pa upáspṛśati medhya̱tvāyá ।
vāyurvo̱ vivina̱ktvityáha ।
pa̱vitra̱ṃ vai vā̱yuḥ ।
pu̱nātye̱vainā́n ।
a̱ntarikṣādiva̱ vā e̱te praskándanti ।
ye śūrpā̱̍t ।
de̱vo váḥ savi̱tā hiráṇyapāṇi̱ḥ pratigṛhṇa̱tvityáha̱
pratiṣṭhityai ।
ha̱viṣo'skándāya ।
triṣpha̱lī kárta̱vā áha ।
tryávṛ̱ddhi ya̱jñaḥ ।
athó medhya̱tvāyá ॥ 11 ॥
dvābhyā̱mutpúnāti ra̱śmayó naya̱ntyagré
ya̱jñapátiṃ ya̱jño'diti̱raskándāya gṛhṇā̱mītyáha
ve̱detyáha̱ viji̱tyā̱ apáhatyā̱ askándāya̱ trīṇi ca ॥ 5 ॥))

**[[3-2-6-1]]**

अव॑धूत॒ꣳ॒ रक्षोऽव॑धूता॒ अरा॑तय॒ इत्या॑ह।
रक्ष॑सा॒मप॑हत्यै।
अदि॑त्या॒स्त्वग॒सीत्या॑ह।
इ॒यं वा अदि॑तिः।
अ॒स्या ए॒वैन॒त्त्वचं॑ करोति।
प्रति॑ त्वा पृ॒थि॒वी वे॒त्त्वित्या॑ह॒ प्रति॑ष्ठित्यै।
पु॒रस्ता᳚त्प्रती॒चीन॑ग्रीव॒मुत्त॑रलो॒मोप॑स्तृणाति मेध्य॒त्वाय॑।
तस्मा᳚त्पु॒रस्ता᳚त्प्र॒त्यञ्चः॑ प॒शवो॒ मेध॒मुप॑तिष्ठन्ते।
तस्मा᳚त्प्र॒जा मृ॒गं ग्राहु॑काः।
य॒ज्ञो दे॒वेभ्यो॒ निला॑यत॥ १॥

((avádhūta̱ṃ rakṣo'vádhūtā̱ arátaya̱ ityáha ।
rakṣásā̱mapáhatyai ।
adityā̱stvaga̱sītyáha ।
i̱yaṃ vā aditiḥ ।
a̱syā e̱vaina̱ttvacaṃ́ karoti ।
prati tvā pṛ̱thi̱vī ve̱ttvityáha̱ pratiṣṭhityai ।
pu̱rastā̱̍tpra̱tīcīnágrīva̱muttáralo̱mopástṛ̱ṇāti medhya̱tvāyá ।
tasmā̱̍tpu̱rastā̱̍tpra̱tyañcáḥ pa̱śavo̱ medha̱mupátiṣṭhante ।
tasmā̱̍tpra̱jā mṛ̱gaṃ grāhúkāḥ ।
ya̱jño de̱vebhyo̱ nilá̱yata ॥ 1 ॥))

**[[3-2-6-2]]**

कृ॒ष्णो॑ रू॒पं कृ॒त्वा।
यत्कृ॑ष्णाजि॒ने ह॒विर॑धिपि॒नष्टि॑।
य॒ज्ञादे॒व तद्य॒ज्ञं प्रयु॑ङ्क्ते।
ह॒विषो॑ऽस्क॑न्दाय।
द्यावा॑पृथि॒वी स॒हास्ता᳚म्।
ते श॑म्यामा॒त्रमेक॒मह॒र्व्यैता॒ꣳ॒ शम्यामा॒त्रमेक॒मह॑ः।
दि॒वः स्कम्भ॒निर॑सि प्रति॒ त्वाऽदि॑त्या॒स्त्वग्वे॒त्त्वित्या॑ह।
द्यावा॑पृथि॒व्योर्वीत्यै᳚।
धि॒षणा॑ऽसि पर्व॒त्या प्रति॑ त्वा दि॒वः स्कम्भ॒ निर्वे᳚त्त्वित्त्या॑ह।
द्यावा॑पृथि॒व्योर्विधृ॑त्यै॥ २॥

((kṛ̱ṣṇó rū̱paṃ kṛ̱tvā ।
yatkṛ́ṣṇāji̱ne ha̱virádhipi̱naṣṭi ।
ya̱jñāde̱va tadya̱jñaṃ prayúṅkte ।
ha̱viṣo'skándāya ।
dyāvápṛthi̱vī sa̱hāstā̱̍m ।
te śámyāmā̱tramekamaharvyaitā̱ṃ
śamyāmā̱tramekamaháḥ ।
di̱vaḥ skámbha̱nirási prati̱ tvā'dityā̱stvagve̱tvityáha
।
dyāvápṛthi̱vyorvītyaí ।
dhi̱ṣaṇá'si parva̱tyā prati tvā di̱vaḥ skámbha̱
nirve̱tvittyáha ।
dyāvápṛthi̱vyorvidhṛ́tyai ॥ 2 ॥))

**[[3-2-6-3]]**

धि॒षणा॑ऽसि पार्व॒तेयी प्रति॑ त्वा पर्व॒तिर्वे᳚त्त्वित्या॑ह।
द्यावा॑पृथि॒व्योर्धृत्यै᳚।
दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒व इत्या॑ह॒ प्रसू᳚त्यै।
अ॒श्विनो᳚र्बा॒हुभ्या॑मित्या॑ह।
अ॒श्विनौ॒ हि दे॒वाना॑मध्व॒र्यू आस्ता᳚म्।

पूष्णो हस्ताभ्यामित्याह यत्यै।
अधिवपामीत्याह।
यथादेवतमेवैनानधिवपति।
धान्यमसि धिनुहि देवानित्याह।
एतस्य यजुषो वीर्येण॥ ३॥

((dhiṣaṇā'si pārvateyī prati tvā parvatirvettvityāha ।
dyāvāpṛthivyordhṛtyai ।
devasya tvā savituḥ prasava ityāha prasūtyai ।
aśvinorbāhubhyāmityāha ।
aśvinau hi devānāmadhvaryū āstām ।
pūṣṇo hastābhyāmityāha yatyai ।
adhivapāmītyāha ।
yathādevatamevaināndhivapati ।
dhānyamasi dhinuhi devānityāha ।
etasya yajuṣo vīryeṇa ॥ 3 ॥))

**[[3-2-6-4]]**

यावदेका देवता कामयते यावदेका।
तावदाहुतिः प्रथते।
न हि तदस्ति।
यत्तावदेव स्यात्।
यावज्जुहोति।
प्राणाय त्वाऽपानायत्वेत्याह।
प्राणानेव यजमाने दधाति।
दीर्घामनु प्रसितिमायुषे धामित्याह।
आयुरेवास्मिन्दधाति।
अन्तरिक्षादिव वा एतानि प्रस्कन्दन्ति।
यानि दृषदः।
देवो वः सविता हिरण्यपानिः प्रतिगृह्णात्वित्याह
प्रतिष्ठित्यै।
हविषोऽस्कन्दाय।
असंवपन्ती पिꣳषाणूनि कुरुतादित्याह मेध्यत्वाय॥ ४॥
निलायत विधृत्यै वीर्येण स्कन्दन्ति चत्वारि च॥ ६॥

((yāvadekā devatā kāmayate yāvadekā ।
tāvadāhutiḥ prathate ।
na hi tadasti ।
yattāvadeva syāt ।
yāvajjuhoti ।
prāṇāya tvā'pānāyatvetyāha ।
prāṇāneva yajamāne dadhāti ।
dīrghāmanu prasitimāyuṣe dhāmityāha ।
āyurevāsmindadhāti ।
antarikṣādiva vā etāni praskandanti ।
yāni dṛṣadaḥ ।
devo vaḥ savitā hiraṇyapāṇiḥ pratigṛhṇātvityāha
pratiṣṭhityai ।
haviṣo'skandāya ।
asaṃvapantī piṃṣāṇūni kurutādityāha
medhyatvāya ॥ 4 ॥
nilāyata vidhṛtyai vīryeṇa skandanti catvāri ca ॥ 6 ॥))

**[[3-2-7-1]]**

धृष्टिरसि ब्रह्म यच्छेत्याह धृत्यै।
अपाग्नेऽग्नि मा मादं जहि निष्क्रव्यादꣳ सेधा देवयजं
वहेत्याह।
य एवामात्क्रव्यात्।
तमपहत्य।
मेध्येऽग्नौ कपालमुपदधाति।
निर्दग्धꣳ रक्षो निर्दग्धा अरातय इत्याह।
रक्षाꣳस्येव निर्दहति।
अग्निवत्युपदधाति।
अस्मिन्नेव लोके ज्योतिर्धत्ते।
अङ्गारमधि वर्तयति॥ १॥

((dhṛṣṭirasi brahma yacchetyāha dhṛtyai ।
apāgne'gni mā mādaṃ jahi niṣkravyādaṃ sedhā
devayajaṃ vahetyāha ।
ya evāmātkravyāt ।
tamapahatya ।
medhye'gnau kapālamupadadhāti ।
nirdagdhaṃ rakṣo nirdagdhā arātaya ityāha ।
rakṣāṃsyeva nirdahati ।
agnivatyupadadhāti ।
asminneva loke jyotirdhatte ।
aṅgāramadhi vartayati ॥ 1 ॥))

**[[3-2-7-2]]**

अन्तरिक्ष एव ज्योतिर्धत्ते।
आदित्यमेवामुष्मिँल्लोके ज्योतिर्धत्ते।
ज्योतिष्मन्तोऽस्मा इमे लोका भवन्ति।
य एवं वेद।
ध्रुवमसि पृथिवीं दृꣳहेत्याह।
पृथिवीमेवैतेन दृꣳहति।
धर्त्रमस्यन्तरिक्षं दृꣳहेत्याह।
अन्तरिक्षमेवैतेन दृꣳहति।
धरुणमसि दिवं दृꣳहेत्याह।
दिवमेवैतेन दृꣳहति॥ २॥

((a̱ntari̍kṣa e̱va jyoti̍rdhatte |
ā̱di̱tyame̱vāmuṣmi̍m̐llo̱ke jyoti̍rdhatte |
jyoti̍ṣmanto'smā i̱me lo̱kā bha̍vanti |
ya e̱vaṃ veda̍ |
dhru̱vama̍si pṛthi̱vīṃ dṛ̱m̐̎hetyā̍ha |
pṛ̱thi̱vīme̱vaitena̍ dṛm̐̎hati |
dha̱rtrama̍syanta̱ri̍kṣaṃ dṛ̱m̐̎hetyā̍ha |
a̱ntari̍kṣame̱vaitena̍ dṛm̐̎hati |
dha̱ruṇa̍masi̱ diva̍ṃ dṛ̱m̐̎hetyā̍ha |
diva̍me̱vaitena̍ dṛm̐̎hati || 2 ||))

**[[3-2-7-3]]**

धर्मा॑ऽसि॒ दिशो॑ दृ॒ꣳहेत्या॑ह।
दिश॑ ए॒वैतेन॑ दृꣳहति।
इ॒माने॒वैतैर्लो॒कान्दृꣳ॑हति।
दृꣳह॑न्तेऽस्मा इ॒मे लो॒काः प्र॒जया॑ प॒शुभि॑ः।
य ए॒वं वेद॑।
त्रीण्यग्रे॑ क॒पाला॒न्युप॑दधाति।
त्रय॑ इ॒मे लो॒काः।
ए॒षां लो॒काना॒माप्त्यै॑।
ए॒कमग्रे॑ क॒पाल॒मुप॑दधाति।
ए॒कं वा अग्रे॑ क॒पाल॒ं पुरु॑षस्य स॒ंभव॑ति॥ ३॥

((dharma̍'si̱ diśo̍ dṛ̱m̐̎hetyā̍ha |
diśa̍ e̱vaitena̍ dṛm̐̎hati |
i̱māne̱vaitairlo̱kāndṛm̐̎hati |
dṛm̐̎ha̍nte'smā i̱me lo̱kāḥ pra̱jayā̍ pa̱śubhi̍ḥ |
ya e̱vaṃ veda̍ |
trīṇyagre̍ ka̱pālā̱nyupa̍dadhāti |
traya̍ i̱me lo̱kāḥ |
e̱ṣāṃ lo̱kānā̱māptyai̎ |
eka̱magre̍ ka̱pāla̱mupa̍dadhāti |
eka̱ṃ vā agre̍ ka̱pāla̱ṃ puru̍ṣasya sa̱mbhava̍ti || 3 ||))

**[[3-2-7-4]]**

अथ॒ द्वे।
अथ॒ त्रीणि॑।
अथ॑ च॒त्वारि॑।
अथा॒ष्टौ।
तस्मा॑द॒ष्टाक॑पाल॒ं पुरु॑षस्य॒ शिर॑ः।
यदे॒वं क॒पाला॒न्युप॒दधा॑ति।
य॒ज्ञो वै प्र॒जाप॑तिः।
य॒ज्ञमे॒व प्र॒जाप॑ति॒ꣳ सꣳ॑स्करोति।
आ॒त्मान॑मे॒व तत्सꣳ॑स्करोति।
तꣳ सꣳ॑स्कृतमा॒त्मान॑म्॥ ४॥

((atha̱ dve |
atha̱ trīṇi̍ |
atha̍ ca̱tvāri̍ |
athā̱ṣṭau |
tasmā̍da̱ṣṭāka̍pālaṃ puru̍ṣasya̱ śira̍ḥ |
yade̱vaṃ ka̱pālā̎nyupa̱dadhā̍ti |
ya̱jño vai pra̱jāpa̍tiḥ |
ya̱jñame̱va pra̱jāpa̍ti̱m̐̎ sam̐̎|
ā̱tmāna̍me̱va tatsam̐̎skā̍roti |
tam̐ sam̐̎skṛ̍tamā̱tmānā̎m || 4 ||))

**[[3-2-7-5]]**

अ॒मुष्मि॑ँल्लो॒केऽनु॒ परै॑ति।
यद॒ष्टावु॑प॒दधा॑ति।
गा॒य॒त्रि॒या तत्संमि॑तम्।
यन्नव॑।
त्रि॒वृ॒ता॒ तत्।
यद्दश॑।
वि॒राजा॒ तत्।
यदेका॑दश।
त्रि॒ष्टुभा॒ तत्।
यद्द्वाद॑श॥ ५॥

((a̱muṣmi̍m̐llo̱ke'nu̱ parai̍ti |
yada̱ṣṭāvu̍pa̱dadhā̍ti |
gā̱ya̱tri̱yā tatsammi̍tam |
yannava̍ |
tri̱vṛ̱tā̱ tat |
yaddaśa̍ |
vi̱rājā̱ tat |
yadekā̍daśa |
tri̱ṣṭubhā̱ tat |
yaddvādā̍śa || 5 ||))

**[[3-2-7-6]]**

जग॑त्या॒ तत्।
छन्द॑ःसंमिता॒नि स उ॑प॒दध॑त्क॒पाला॑नि।
इ॒माँल्लो॒काना॑नुपू॒र्वं दिशो॒ विधृ॑त्यै दृꣳहति।
अथायु॑ः प्रा॒णान्प्र॒जां प॒शून्यज॑माने दधाति।
स॒जा॒ताना॑स्मा अ॒भितो॑ ब॒हुलान्क॑रोति।
चित॑ः स्थेत्या॑ह।
य॒था य॒जुरे॒वैतत्।
भृगू॑णा॒मङ्गि॑रसा॒ं तप॑सा तप्यध्व॒मित्या॑ह।

दे॒वता॑नामे॒वैना॑नि॒ तप॑सा तपति।
तानि॒ तत॒ः सꣳस्थि॑ते।
यानि॑ घ॒र्मे क॒पाला॑न्युपचि॒न्वन्ति॑ वे॒धस॒ इति॒ चतु॑ष्पदय॒र्चा
विमु॑ञ्चति।
चतु॑ष्पादः प॒शव॑ः।
प॒शुष्वे॒वोपरि॑ष्टा॒त्प्रति॑तिष्ठति॥ ६॥
व॒र्तय॑ति॒ दिव॑मे॒वैतेन॑ दृꣳहति स॒म्भव॑ति॒ तꣳ
सꣳस्कृ॑तमा॒त्मान॒ं द्वाद॑श॒ सꣳस्थि॑ते॒ त्रीणि॑ च॥ ७॥

((jaga̍tyā̱ tat |
chanda̍ḥsaṃmitāni̱ sa u̍pa̱dadha̍tka̱pāla̍ni |
i̱mām̐llo̱kāna̍nupūrva̱ṃ diśo̱ vidhṛ̍tyai dṛm̐hati |
athāyu̍ḥ prā̱ṇānpra̱jāṃ paśūnyaja̍māne dadhāti |
sa̱jātāna̍smā a̱bhito̍ bahu̱lānka̍roti |
cita̱ḥ sthetya̍ha |
ya̱thā̱ ya̱jure̱vaitat |
bhṛgū̍ṇā̱maṅgi̍rasā̱ṃ tapa̍sā tapyadhva̱mitya̍ha |
de̱vata̍nāme̱vaina̍ni̱ tapa̍sā tapati |
tāni̱ tata̱ḥ sam̐sthi̍te |
yāni̍ gha̱rme ka̱pāla̍nyupaci̱nvanti̍ ve̱dhasa̱ iti̱
catu̍ṣpadaya̱rcā vimu̍ñcati |
catu̍ṣpādaḥ pa̱śava̍ḥ |
pa̱śuṣve̱vopari̍ṣṭā̱tprati̍tiṣṭhati || 6 ||
va̱rtaya̍ti̱ diva̍me̱vaitena̍ dṛm̐hati sa̱mbhava̍ti̱ tam̐
sam̐skṛ̍tamā̱tmāna̱ṃ dvāda̍śa̱ sam̐sthi̍te̱ trīṇi̍ ca || 7 ||))

**[[3-2-8-1]]**

दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒व इत्या॑ह॒ प्रसू॑त्यै।
अ॒श्विनो॑र्बा॒हुभ्या॒मित्या॑ह।
अ॒श्विनौ॒ हि दे॒वाना॑मध्व॒र्यू आस्ता॑म्।
पू॒ष्णो हस्ता॑भ्या॒मित्या॑ह॒ यत्यै॑।
संव॑पा॒मीत्या॑ह।
य॒था॒दे॒व॒तमे॒वैना॑नि॒ संव॑पति।
समापो॑ अ॒द्भिर॑ग्मत॒ समोष॑धयो॒ रसे॒नेत्या॑ह।
आपो॒ वा ओष॑धीर्जिन्वन्ति।
ओष॑धयो॒ऽपो जि॑न्वन्ति।
अ॒न्या वा ए॒तासा॑म॒न्या जि॑न्वन्ति॥ १॥

((de̱vasya̍ tvā savi̱tuḥ pra̍sa̱va itya̍ha̱ prasū̍tyai |
a̱śvino̍rbā̱hubhyā̱mitya̍ha |
a̱śvinau̱ hi de̱vānā̍madhva̱ryū āstā̍m |
pū̱ṣṇo hastā̍bhyā̱mityā̍ha̱ yatyai̍ |
saṃva̍pā̱mītyā̍ha |
ya̱thā̱de̱va̱tame̱vainā̍ni̱ saṃva̍pati |
samāpo̍ a̱dbhira̍gmata̱ samoṣa̍dhayo̱ rase̱netyā̍ha |
āpo̱ vā oṣa̍dhīrjinvanti |
oṣa̍dhayo̱'po ji̍nvanti |
a̱nyā vā e̱tāsā̍ma̱nyā ji̍nvanti || 1 ||))

**[[3-2-8-2]]**

तस्मा॑दे॒वमा॑ह।
सꣳ रे॒वती॒र्जग॑तीभि॒र्मधु॑मती॒र्मधु॑मतीभिः
सृज्यध्व॒मित्या॑ह।
आपो॒ वै रे॒वती॑ः।
प॒शवो॒ जग॑तीः।
ओष॑धयो॒ मधु॑मतीः।
आप॒ ओष॑धीः प॒शून्।
ताने॒वास्मा॑ ए॒क॒धा स॒ꣳसृज्य॑।
मधु॑मतः करोति।
अ॒द्भ्यः परि॒ प्रजा॑ताः स्थ॒ सम॒द्भिः पृच्यध्व॒मिति॑
प॒र्या॒प्ला॑वयति।
यथा॒ सुवृ॑ष्ट इ॒माम॑नु वि॒सृत्य॑॥ २॥

((tasmā̍de̱vamā̍ha |
sam̐ re̱vatī̱rjaga̍tībhi̱rmadhu̍matī̱rmadhu̍matībhiḥ
sṛjyadhva̱mityā̍ha |
āpo̱ vai re̱vatī̍ḥ |
pa̱śavo̱ jaga̍tīḥ |
oṣa̍dhayo̱ madhu̍matīḥ |
āpa̱ oṣa̍dhīḥ pa̱śūn |
tāne̱vāsmā̍ eka̱dhā sa̱m̐sṛjya̍ |
madhu̍mataḥ karoti |
a̱dbhyaḥ pari̱ prajā̍tāḥ stha̱ sama̱dbhiḥ
pṛ̍cyadhva̱miti̍ pa̱ryāplā̍vayati |
yathā̱ suvṛ̍ṣṭa i̱māma̍nu vi̱sṛtya̍ || 2 ||))

**[[3-2-8-3]]**

आप॒ ओष॑धीर्म॒हय॑न्ति।
ता॒दृगे॒व तत्।
जन॑यत्यै त्वा॒ संयौ॒मीत्या॑ह।
प्र॒जा ए॒वैतेन॑ दाधार।
अ॒ग्नये॑ त्वाऽग्नीषोमा॑भ्या॒मित्या॑ह॒ व्यावृ॑त्त्यै।
म॒खस्य॒ शिरो॒ऽसीत्या॑ह।
य॒ज्ञो वै म॒खः।
तस्यै॒तच्छिर॑ः।
यत्पु॑रोडाशः।
तस्मा॑दे॒वमा॑ह॥ ३॥

((āpa̱ oṣa̍dhīrma̱haya̍nti |

tā̱dr̥g̱e̱va tat |
janáyatyai tvā̱ sa̱mya̱umītyáha |
pra̱jā e̱vaitená dādhāra |
a̱gnaye̎ tvā̱'gnīṣomā̎bhyā̱mityáha̱ vyāvŕ̥ttyai |
ma̱khasya̱ śiro̱'sītyáha |
ya̱jño vai ma̱khaḥ |
tasyai̱tacchiráḥ |
yatpúro̱ḍā̱śáḥ |
tasmáde̱vamáha || 3 ||))

**[[3-2-8-4]]**

घ॒र्मो॑सि वि॒श्वायु॒रित्या॑ह।

विश्व॑मे॒वायु॒र्यज॑माने दधाति।

उ॒रु प्र॑थस्वो॒रु ते॑ य॒ज्ञप॑तिः प्रथता॒मित्या॑ह।

यज॑मानमे॒व प्र॒जया॑ प॒शुभि॑ः प्रथयति।

त्वचं॑ गृह्णी॒ष्वेत्या॑ह।

सर्व॑मे॒वैन॒ꣳ सत॑नुं करोति।

अथा॒प आ॒नीय॒ परि॑मार्ष्टि।

मा॒ꣳ॒स ए॒व तत्त्वचं॑ दधाति।

तस्मा॒त्त्वचा मा॒ꣳ॒सं छ॒न्नम्।

घ॒र्मो वा ए॒षोऽशा॒न्तः॥ ४॥

((gha̱rmósi vi̱śvāyu̱rityáha |
viśváme̱vāyu̱ryajámāne dadhāti |
u̱ru práthasvo̱ru té ya̱jñapátiḥ prathatā̱mityáha |
yajámānameva pra̱jayá pa̱śubhíḥ prathayati |
tvacaṁ́ gr̥hṇī̱ṣvetyáha |
sarváme̱vaina̱m̐ satánuṁ karoti |
athā̱pa ā̱nīya̱ parímārṣṭi |
mā̱m̱̐sa e̱va tattvacaṁ́ dadhāti |
tasmā̎ttva̱cā mā̱m̱̐saṁ cha̱nnam |
gha̱rmo vā e̱ṣo'śā̎ntaḥ || 4 ||))

**[[3-2-8-5]]**

अ॒र्ध॒मा॒से॑ऽर्धमासे॒ प्रवृ॑ज्यते।

यत्पु॑रो॒डाशः॑।

स ई॒श्व॒रो यज॑मान॒ꣳ॒ शु॒चाऽप्र॒दहः॑।

पर्य॑ग्नि करोति।

प॒शुमे॒वैन॑मकः।

शान्त्या॒ अप्र॑दाहाय।

त्रिः पर्य॑ग्नि करोति।

व्या॑वृद्धि य॒ज्ञः।

अथो॒ रक्ष॑सा॒मप॑हत्यै।

अ॒न्तरि॑त॒ꣳ॒ रक्षो॒ऽन्तरि॑ता॒ अरा॑तय॒ इत्या॑ह॥ ५॥

((a̱rdha̱mā̱se̎'rdhamāse̱ pravŕ̥jyate |
yatpúro̱ḍāśáḥ |
sa ī̎śva̱ro yajámānam̐ śu̱cā'pra̱dahaḥ́ |
paryágni karoti |
pa̱śume̱vainámakaḥ |
śāntyā̱ aprádāhāya |
triḥ paryágni karoti |
vyávr̥̱ddhi ya̱jñaḥ |
atho̱ rakṣásā̱mapáhatyai |
a̱ntaríta̱m̐ rakṣo̱'ntarítā̱ arátaya̱ ityáha || 5 ||))

**[[3-2-8-6]]**

रक्ष॑सामन्तर्हि॑त्य।

पु॒रो॒डाश॒ं वा अधि॑श्रित॒ꣳ॒ रक्षा॒ꣳ॒स्यजिघा॒ꣳ॒सन्न्।

दि॒वि नाको॒ नामा॒ग्नी रक्षो॒हा।

स ए॒वास्मा॒द्रक्षा॒ꣳ॒स्यपा॑हन्न्।

दे॒वस्त्वा॑ सवि॒ता श्रप॑य॒त्वित्या॑ह।

स॒वि॒तृप्र॑सूत ए॒वैन॒ꣳ॒ श्रपयति।

वर्षि॑ष्ठे॒ अधि॒नाक॒ इत्या॑ह।

रक्ष॑सा॒मप॑हत्यै।

अ॒ग्निस्ते॑ त॒नुवं॒ माऽति॑ धा॒गित्या॑हा॒नति॑दाहाय।

अग्ने॑ ह॒व्यꣳ॒ रक्ष॑स्वेत्या॑ह॒ गुप्त्यै॥ ६॥

((rakṣásāma̱ntarhítya |
pu̱ro̱ḍāśa̱ṁ vā adhíśrita̱m̐ rakṣām̐syajighām̐sann |
di̱vi nāko̱ nāmā̱gnī rákṣo̱hā |
sa e̱vāsmā̱drakṣā̱m̱̐syapáhann |
de̱vastvá savi̱tā śrápaya̱tvityáha |
sa̱vi̱tr̥prásūta e̱vainam̐̎ śrapayati |
varṣíṣṭhe̱ adhi̱nāka̱ ityáha |
rakṣásā̱mapáhatyai |
a̱gnisté ta̱nuva̱ṁ mā'tí dhā̱gityā̱hānátidāhāya |
agné ha̱vyam̐ rákṣa̱svetyáha̱ guptyai̎ || 6 ||))

**[[3-2-8-7]]**

अवि॑दहन्त श्रपयते॒ति॒ वाचं॒ विसृ॑जते।

य॒ज्ञमे॒व ह॒वीꣳ॑ष्यभि॒व्याहृ॒त्य प्रत॑नुते।

पु॒रो॒रुच॒मवि॑दाहा॒य श्रृत्यै॑ करोति।

म॒स्तिष्को॒ वै पु॑रो॒डाशः॑।

तं यन्नाभि॑वा॒सये॑त्।

आ॒विर्म॒स्तिष्कः॑ स्यात्।

अ॒भिवा॑सयति।

तस्मा॒द्गुहा॑ म॒स्तिष्कः॑।

भस्म॑ना॒ऽभिवा॑सयति।

तस्मा॒न्मा॒ꣳ॒सेना॒स्थि॒ छ॒न्नम्॥ ७॥

((avidahanta śrapayateti vācam visṛjate ।
yajñameva havīṃṣyabhivyāhṛtya pratanute ।
purorucamavidāhāya śṛtyai karoti ।
mastiṣko vai puroḍāśaḥ ।
taṃ yannābhivāsayet ।
āvirmastiṣkaḥ syāt ।
abhivāsayati ।
tasmādguhā mastiṣkaḥ ।
bhasmanā'bhivāsayati ।
tasmānmāṃsenāsthi channam ॥ 7 ॥))

**[[3-2-8-8]]**

वेदेनाभि वासयति।
तस्मात्केशैः शिरश्छन्नम्।
अखलतिभावुको भवति।
य एवं वेद।
पशोर्वै प्रतिमा पुरोडाशः।
स नायजुष्कमभिवास्यः।
वृथेव स्यात्।
ईश्वरा यजमानस्य पशवः प्रमेतोः।
सं ब्रह्मणा पृच्यस्वेत्याह।
प्राणा वै ब्रह्म॥ ८॥

((vedenābhi vāsayati ।
tasmātkeśaiḥ śiraśchannam ।
akhalatibhāvuko bhavati ।
ya evaṃ veda ।
paśorvai pratimā puroḍāśaḥ ।
sa nāyajuṣkamabhivāsyaḥ ।
vṛtheva syāt ।
īśvarā yajamānasya paśavaḥ prametoḥ ।
saṃ brahmaṇā pṛcyasvetyāha ।
prāṇā vai brahma ॥ 8 ॥))

**[[3-2-8-9]]**

प्राणाः पशवः।
प्राणैरेव पशून्त्सं पृणक्ति।
न प्रमायुका भवन्ति।
यजमानो वै पुरोडाशः।
प्रजा पशवः पुरीषम्।
यदेवमभि वासयति।
यजमानमेव प्रजया पशुभिः समर्धयति।
देवा वै हविर्भूत्वाऽब्रुवन्न्।
कस्मिन्निदं म्रक्ष्यामह इति।
सोऽग्निरब्रवीत्॥ ९॥

((prāṇāḥ paśavaḥ ।
prāṇaireva paśūntsaṃ pṛṇakti ।
na pramāyukā bhavanti ।
yajamāno vai puroḍāśaḥ ।
prajā paśavaḥ purīṣam ।
yadevamabhi vāsayati ।
yajamānameva prajayā paśubhiḥ samardhayati ।
devā vai havirbhūtvā'bruvann ।
kasminnidaṃ mrakṣyāmaha iti ।
so'gnirabravīt ॥ 9 ॥))

**[[3-2-8-10]]**

मयि तनूः संनिधध्वम्।
अहं वस्तं जनयिष्यामि।
यस्मिन्म्रक्ष्यध्व इति।
ते देवा अग्नौ तनूः संन्यदधत।
तस्मादाहुः।
अग्निः सर्वा देवता इति।
सोऽङ्गारेणापः।
अभ्यपातयत्।
तत एकतोऽजायत।
स द्वितीयमभ्यपातयत्॥ १०॥

((mayi tanūḥ saṃnidhadhvam ।
ahaṃ vastaṃ janayiṣyāmi ।
yasminmrakṣyadhva iti ।
te devā agnau tanūḥ saṃnyadadhata ।
tasmādāhuḥ ।
agniḥ sarvā devatā iti ।
so'ṅgāreṇāpaḥ ।
abhyapātayat ।
tata ekato'jāyata ।
sa dvitīyamabhyapātayat ॥ 10 ॥))

**[[3-2-8-11]]**

ततो द्वितोऽजायत।
स तृतीयमभ्यपातयत्।
ततस्त्रितोऽजायत।
यदद्भ्योऽजायन्त।
तदाप्यानामाप्यत्वम्।
यदात्मभ्योऽजायन्त।
तदात्म्यानामात्म्यत्वम्।
ते देवा आप्येष्वमृजत।

आप्या अमृजत सूर्याभ्युदिते।
सूर्याभ्युदितः सूर्याभिनिम्रुक्ते॥ ११॥

((tatŏ dvitŏ'jāyata ।
sa tṛtīyamabhyapātayat ।
tatastritŏ'jāyata ।
yadadbhyo'jayanta ।
tadāpyānāmāpyatvam ।
yadātmabhyo'jayanta ।
tadātmyānāmātmyatvam ।
te devā āpyeṣvamṛjata ।
āpyā amṛjata sūryābhyudite ।
sūryābhyuditaḥ sūryābhinimrukte ॥ 11 ॥))

**[[3-2-8-12]]**

सूर्याभिनिम्रुक्तः कुनखिनि।
कुनखी श्यावदति।
श्यावदन्नग्रदिधिषौ।
अग्रदिधिषुः परिवित्ते।
परिवित्तो वीरहणि।
वीरहा ब्रह्महणि।
तद्ब्रह्महणं नात्यच्यवत।
अन्तर्वेदि निनयत्यवरुध्यै।
उल्मुकेनाभि गृह्णाति श्रृतत्वाय।
श्रृतकामा इव हि देवाः॥ १२॥
अन्या जिन्वन्त्यनुविसृत्यैवमाहाशान्त आह गुप्त्यै छन्नं ब्रह्माब्रवीद्द्वितीयमभ्यपातयत्सूर्याभिनिम्रुक्ते देवाः॥ ८॥

((sūryābhinimruktaḥ kunakhini ।
kunakhī śyāvadati ।
śyāvadannagradidhiṣau ।
agradidhiṣuḥ parivitte ।
parivitto vīrahaṇi ।
vīrahā brahmahaṇi ।
tadbrahmahaṇaṃ nātyacyavata ।
antarvedi ninayatyavarudhyai ।
ulmukenābhi gṛhṇāti śṛtatvāya ।
śṛtakāmā iva hi devāḥ ॥ 12 ॥
anyā jinvantyanuvisṛtyaivamāhāśānta āha guptyai channaṃ brahmābravīdvitīyamabhyapātayatsūryābhinimrukte devāḥ ॥ 8 ॥))

**[[3-2-9-1]]**

देवस्य त्वा सवितुः प्रसव इति स्फ्यमादत्ते प्रसूत्यै।
अश्विनोर्बाहुभ्यामित्याह।
अश्विनौ हि देवानामध्वर्यू आस्ताम्।
पूष्णो हस्ताभ्यामित्याह यत्यै।
आददे इन्द्रस्य बाहुरसि दक्षिण इत्याह।
इन्द्रियमेव यजमाने दधाति।
सहस्रभृष्टिः शततेजा इत्याह।
रूपमेवास्यैतन्महिमानं व्याचष्टे।
वायुरसि तिग्मतेजा इत्याह।
तेजो वै वायुः॥ १॥

((devasya tvā savituḥ prasava iti sphyamādatte prasūtyai ।
aśvinorbāhubhyāmityāha ।
aśvinau hi devānāmadhvaryū āstām ।
pūṣṇo hastābhyāmityāha yatyai ।
ādada indrasya bāhurasi dakṣiṇa ityāha ।
indriyameva yajamāne dadhāti ।
sahasrabhṛṣṭiḥ śatatejā ityāha ।
rūpamevāsyaitanmahimānaṃ vyācaṣṭe ।
vāyurasi tigmatejā ityāha ।
tejo vai vāyuḥ ॥ 1 ॥))

**[[3-2-9-2]]**

तेज एवास्मिन्दधाति।
विषाद्वै नामासुर आसीत्।
सोऽबिभेत्।
यज्ञेन मा देवा अभिभविष्यन्तीति।
स पृथिवीमभ्यवमीत्।
साऽमेध्याऽभवत्।
अथो यदिन्द्रो वृत्रमहन्न्।
तस्य लोहितं पृथिवीमनु व्यधावत्।
साऽमेध्याऽभवत्।
पृथिवि देवयजनीत्याह॥ २॥

((teja evāsmindadhāti ।
viṣādvai nāmāsura āsīt ।
so'bibhet ।
yajñena mā devā abhibhaviṣyantīti ।
sa pṛthivīmabhyavamīt ।
sā'medhyā'bhavat ।
atho yadindro vṛtramahann ।
tasya lohitaṃ pṛthivīmanu vyadhāvat ।
sā'medhyā'bhavat ।
pṛthivi devayajanītyāha ॥ 2 ॥))

**[[3-2-9-3]]**

मेध्यामेवैनां देवयजनीं करोति।
ओषध्यास्ते मूलं मा हिꣳसिषमित्याह।

ओष॑धीना॒महि॑ꣳसायै।
व्र॒जं गच्छ॑ गो॒स्थान॒मित्या॑ह।
छन्दा॑ꣳसि॒ वै व्र॒जो गो॒स्थानः॑।
छन्दा॑ꣳस्ये॒वास्मै᳚ व्र॒जं गो॒स्थानं॑ करोति।
वर्षं॑तु॒ ते॒ द्यौरित्या॑ह।
वृ॒ष्टिर्वै᳚ द्यौः।
वृ॒ष्टिमे॒वाव॑रुन्धे।
ब॒धान दे॑व सवितः पर॒मस्यां᳚ परा॒वतीत्या॑ह॥ ३॥

((medhyā̍me̱vainā̍m̐ deva̱yaja̍nīm karoti ।
oṣa̍dhyāste̱ mūlam̱ mā him̐sisa̱mitya̍ha ।
oṣa̍dhīnā̱mahim̐sāyai ।
vra̱jam ga̍ccha go̱sthāna̱mitya̍ha ।
chandām̐si̱ vai vra̱jo go̱sthāna̍ḥ ।
chandām̐sye̱vāsmai̎ vra̱jam go̱sthāna̍m karoti ।
varṣa̍tu te̱ dyauritya̍ha ।
vṛ̱ṣṭi̱rvai dyauḥ ।
vṛ̱ṣṭi̍me̱vāva̍rundhe ।
ba̱dhā̱na de̍va savitaḥ para̱masyā̍m̐ parā̱vatītya̍ha ॥ 3 ॥))

**[[3-2-9-4]]**

द्वौ वाव पुरु॑षौ।
यं चै॒व द्वेष्टि॑।
यश्चै॑नं॒ द्वेष्टि॑।
तावु॒भौ ब॑ध्नाति पर॒मस्यां᳚ परा॒वति॑ श॒तेन॒ पाशैः᳚।
यो᳚ऽस्मान्द्वेष्टि॒ यं च॑ व॒यं द्वि॒ष्मस्तमतो॒ मा
मौ॒गित्या॒हानि॑म्रुक्त्यै।
अ॒र॒रु॒र्वै नामा॑सुर आ॑सीत्।
स पृ॑थि॒व्यामु॒प॑म्लुप्तोऽशयत्।
तं दे॒वा अप॑हतो॒ऽररुः॑ पृथि॒व्या इति॑ पृथि॒व्या अपा᳚घ्नन्न्।
भ्रातृ॑व्यो॒ वा अ॒ररुः॑।
अप॑हतो॒ऽररुः॑ पृथि॒व्या इ॒ति॒ यदाह॑॥ ४॥

((dvau vāva puru̍ṣau ।
yam̱ cai̱va dveṣṭi̍ ।
yaśca̍inam̱ dveṣṭi̍ ।
tāvu̱bhau ba̍dhnāti para̱masyā̍m̐ parā̱vati̍ śa̱tena̱ pāśai̎ḥ ।
yo̎'smāndveṣṭi̱ yam ca̍ va̱yam dvi̱ṣmastamato̱ mā
mau̱gityā̱hāni̍mruktyai ।
a̱raru̱rvai nāma̍su̱ra a̍sīt ।
sa pṛ̱thi̱vyāmupa̍mlupto'śayat ।
tam̱ de̱vā apa̍hato̱'raru̍ḥ pṛthi̱vyā iti̍ pṛthi̱vyā
apā̎ghnann ।
bhrātṛ̍vyo̱ vā a̱raru̍ḥ ।
apa̍hato̱'raru̍ḥ pṛthi̱vyā iti̱ yadāha̍ ॥ 4 ॥))

**[[3-2-9-5]]**

भ्रातृ॑व्यमे॒व पृ॑थि॒व्या अप॑हन्ति।
तेऽ॑मन्यन्त।
दि॒वं वा अ॒यमि॒तः प॑तिष्य॒तीति॑।
तम॒ररु॑स्ते॒ दि॒वं मा स्का॒निति॑ दि॒वः पर्य॑बाधन्त।
भ्रातृ॑व्यो॒ वा अ॒ररुः॑।
अ॒ररु॑स्ते॒ दि॒वं मा स्का॒निति॒ यदाह॑।
भ्रातृ॑व्यमे॒व दि॒वः परि॑बाधते।
स्त॒म्ब॒य॒जुर्ह॑रति।
पृ॒थि॒व्या ए॒व भ्रातृ॑व्य॒मप॑हन्ति।
द्वि॒तीय॑ꣳ हरति॥ ५॥

((bhrātṛ̍vyame̱va pṛ̍thi̱vyā apa̍hanti ।
te̍'manyanta ।
divam̱ vā a̱yami̱taḥ pa̍tiṣya̱tīti̍ ।
tama̱raru̍ste̱ divam̱ mā skā̱niti̍ di̱vaḥ parya̍bādhanta
।
bhrātṛ̍vyo̱ vā a̱raru̍ḥ ।
a̱raru̍ste̱ divam̱ mā skā̱niti̱ yadāha̍ ।
bhrātṛ̍vyame̱va di̱vaḥ pari̍bādhate ।
sta̱mba̱ya̱jurha̍rati ।
pṛ̱thi̱vyā e̱va bhrātṛ̍vya̱mapa̍hanti ।
dvi̱tīya̍m̐ harati ॥ 5 ॥))

**[[3-2-9-6]]**

अ॒न्तरि॑क्षादे॒वैन॒मप॑हन्ति।
तृ॒तीय॑ꣳ हरति।
दि॒व ए॒वैन॒मप॑हन्ति।
तू॒ष्णीं च॑तु॒र्थꣳ ह॑रति।
अप॑रिमितादे॒वैन॒मप॑हन्ति।
असु॑राणां॒ वा इ॒यमग्र॑ आसीत्।
याव॒दासी॑नः परा॒पश्य॑ति।
ताव॑द्दे॒वाना॑म्।
ते दे॒वा अ॑ब्रुवन्।
अस्त्वे॒व नो॒ स्यामपीति॑॥ ६॥

((a̱ntari̍kṣāde̱vaina̱mapa̍hanti ।
tṛ̱tīya̍m̐ harati ।
di̱va e̱vaina̱mapa̍hanti ।
tū̱ṣṇīm ca̍tu̱rtham̐ ha̍rati ।
apa̍rimitāde̱vaina̱mapa̍hanti ।
asu̍rāṇām̱ vā i̱yamagra̍ āsīt ।
yāva̱dāsī̍naḥ parā̱paśya̍ti ।

tāva̍dde̱vānā̎m ।
te de̱vā a̍bruvan ।
astve̱va no̱ syāmapīti̍ ॥ 6 ॥))

**[[3-2-9-7]]**

क्यं नो दास्य॒थेति॑।
याव॑त्स्व॒यं परि॑गृह्णी॒थेति॑।
ते वस॑व॒स्त्वेति॑ दक्षिण॒तः पर्य॑गृह्णन्न्।
रु॒द्रास्त्वेति॑ प॒श्चात्।
आ॒दि॒त्यास्त्वेत्यु॑त्तर॒तः।
ते᳚ऽग्निना॒ प्राञ्चो॑ऽजयन्न्।
वसु॑भिर्दक्षि॒णा।
रु॒द्रैः प्र॒त्यञ्च॑ः।
आ॒दि॒त्यैरु॒द॑ञ्चः।
यस्यै॒वं वि॒दुषो॒ वेदि॑ं परि॑गृह्णन्ति॑॥ ७॥

((kyaṃ no dāsya̱theti̍ ।
yāva̍tsva̱yaṃ pa̍rigṛhṇī̱theti̍ ।
te vasa̍va̱stveti̍ dakṣiṇa̱taḥ parya̍gṛhṇann ।
ru̱drāstveti̍ pa̱ścāt ।
ā̱di̱tyāstvetyu̍ttara̱taḥ ।
te̎'gninā̱ prāñco̍'jayann ।
vasu̍bhirdakṣi̱ṇā ।
ru̱draiḥ pra̱tyañca̍ḥ ।
ā̱di̱tyairuda̍ñcaḥ ।
yasyai̱vaṃ vi̱du̱ṣo̱ vedi̍ṃ parigṛ̱hṇanti̍ ॥ 7 ॥))

**[[3-2-9-8]]**

भव॑त्या॒त्मना᳚।
परा᳚ऽस्य॒ भ्रातृ॑व्यो भवति।
दे॒वस्य॑ सवि॒तुः स॒व इत्या॑ह॒ प्रसू᳚त्यै।
कर्म॑ कृण्वन्ति वे॒धस॒ इत्या॑ह।
इ॒षि॒त᳚ꣳ हि कर्म॑ क्रि॒यते᳚।
पृ॒थि॒व्यै मेध्य॑ं चामे॒ध्यं च॒ व्युद॑क्रामताम्।
प्रा॒चीन॑मुदी॒चीन॑ं मेध्य᳚म्।
प्र॒ती॒चीन॑ं दक्षि॒णा मे॒ध्यम्।
प्राची॒मुदी॑चीं प्रव॒णां क॑रोति।
मेध्या॑मे॒वैना᳚ं दे॒वयज॑नीं करोति॥ ८॥

((bhava̍tyā̱tmanā̎ ।
parā̎'sya̱ bhrātṛ̍vyo bhavati ।
de̱vasya̍ savi̱tuḥ sa̱va ityā̍ha̱ prasū̎tyai ।
karma̍ kṛṇvanti ve̱dhasa̱ ityā̍ha ।
i̱ṣi̱ta̎ṃ hi karma̍ kri̱yate̎ ।
pṛ̱thi̱vyai medhyaṃ̍ cāme̱dhyaṃ ca̱ vyuda̍krāmatām ।
prā̱cīna̍mudī̱cīna̱ṃ medhyā̎m ।
pra̱tī̱cīna̍ṃ dakṣi̱ṇā me̱dhyam ।
prācī̱mudī̍cīṃ prava̱ṇāṃ ka̍roti ।
medhyā̍me̱vainā̎ṃ deva̱yaja̍nīṃ karoti ॥ 8 ॥))

**[[3-2-9-9]]**

प्राञ्चौ॑ वेद्य॒ꣳ॒सावु॒न्न॑यति।
आ॒ह॒वनि॒य॑स्य॒ परि॑गृहीत्यै।
प्र॒तिची॒ श्रोणी᳚।
गार्ह॑पत्यस्य॒ परि॑गृहीत्यै।
अथो॑ मिथु॒नत्वाय॑।
उद्ध॑न्ति।
यद्दे॒वास्या॑ अमे॒ध्यम्।
तदप॑हन्ति।
उद्ध॑न्ति।
तस्मा॒दोष॑धय॒ः परा॑भवन्ति॥ ९॥

((prāñcau̍ vedya̱ṃ̎sāvunna̍yati ।
ā̱ha̱va̱niya̍sya̱ pari̍gṛhītyai ।
pra̱ticī̱ śroṇī̎ ।
gārha̍patyasya̱ pari̍gṛhītyai ।
atho̍ mithuna̱tvāya̍ ।
uddha̍nti ।
yade̱vāsyā̍ ame̱dhyam ।
tadapa̍hanti ।
uddha̍nti ।
tasmā̱doṣa̍dhaya̱ḥ parā̍bhavanti ॥ 9 ॥))

**[[3-2-9-10]]**

मूल॑ं छिनत्ति।
भ्रातृ॑व्यस्यै॒व मूल॑ं छिनत्ति।
मूलं॒ वा अ॑ति॒ति॒ष्ठ॒द्र॒क्षाꣳ॒॑स्यनूत्पि॑पते।
यद्धस्ते॑न छि॒न्द्यात्।
कु॒न॒खिनी᳚ः प्र॒जाः स्यु॑ः।
स्फ्येन॑ छिनत्ति।
वज्रो॒ वै स्फ्यः।
वज्रे॑णै॒व य॒ज्ञाद्र॒क्षाꣳ॒॑स्यप॑हन्ति।
पि॒तृ॒दे॒व॒त्याऽति॑खाता।
इय॑तीं खनति॥ १०॥

((mūla̍ṃ chinatti ।
bhrātṛ̍vyasyai̱va mūla̍ṃ chinatti ।
mūla̱ṃ vā a̍ti̱ti̱ṣṭha̱drakṣā̱ṃ̎syanūtpi̍pate ।
yaddhaste̍na chi̱ndyāt ।

ku̱ṇa̱khinī̍ḥ pra̱jāḥ syu̍ḥ |
sphyena̍ chinatti |
vajro̱ vai sphyaḥ |
vajre̍ṇa̱iva ya̱jñādrakṣā̱gͫsyapa̍hanti |
pi̱tṛde̱va̱tyā'ti̍khātā |
iya̍tīṃ khanati || 10 ||))

**[[3-2-9-11]]**

प्र॒जाप॑तिना यज्ञमु॒खेन॒ संमि॑ताम्।
वेदि॑र्दे॒वेभ्यो॒ निला॑यत।
तां च॑तुरङ्गु॒लेऽन्ववि॑न्दन्न्।
तस्मा॑च्चतुरङ्गु॒लं खेया॑।
च॒तु॒र॒ङ्गु॒लं ख॑नति।
च॒तु॒र॒ङ्गु॒ले ह्योष॑धयः प्रति॒ति॒ष्ठ॑न्ति।
आप्र॑ति॒ष्ठायै॑ खनति।
यज॑मानमे॒व प्र॑ति॒ष्ठां ग॑मयति।
द॒क्षि॒ण॒तो वर्षी॑यसीं करोति।
दे॒व॒यज॑नस्यै॒व रू॒पम॑कः॥ ११॥

((pra̱jāpa̍tinā yajña̱mu̱khena̱ saṃmi̍tām |
vedi̍rde̱vebhyo̱ nilā̍yata |
tāṃ ca̍turaṅgu̱le'nvavi̍ndann |
tasmā̍ccaturaṅgu̱laṃ kheyā̍ |
ca̱tu̱ra̱ṅgu̱laṃ kha̍nati |
ca̱tu̱ra̱ṅgu̱le hyoṣa̍dhayaḥ prati̱ti̱ṣṭha̍nti |
āpra̍ti̱ṣṭhāyai̍ khanati |
yaja̍māname̱va pra̍ti̱ṣṭhāṃ ga̍mayati |
da̱kṣi̱ṇa̱to varṣī̍yasīṃ karoti |
de̱va̱yaja̍nasyai̱va rū̱pama̍kaḥ || 11 ||))

**[[3-2-9-12]]**

पुरी॑षवतीं करोति।
प्र॒जा वै प॒शव॑ः पुरी॑षम्।
प्र॒जयै॒वैनं॑ प॒शुभि॑ः पुरी॑षवन्तं करोति।
उत्त॑रं परि॒ग्रा॒हं परि॑गृह्णाति।
ए॒ताव॑ती॒ वै पृ॑थि॒वी।
याव॑ती॒ वेदि॑ः।
तस्या॑ ए॒ताव॑त ए॒व भ्रातृ॑व्यं नि॒र्भज्य॑।
आ॒त्मन॒ उत्त॑रं परि॒ग्रा॒हं परि॑गृह्णाति।
ऋ॒तम॑स्यृ॒तस॒द॑नमस्यृ॒तश्री॒र॒सीत्या॑ह।
य॒था॒य॒जु॒रे॒वैत॒त्॥ १२॥

((puri̍ṣavatīṃ karoti |
pra̱jā vai pa̱śava̱ḥ puri̍ṣam |
pra̱jayai̱vainaṃ̍ pa̱śubhi̱ḥ puri̍ṣavantaṃ karoti |
uttā̍raṃ pari̱grā̱haṃ pari̍gṛhṇāti |
e̱tāva̍tī vai pṛ̍thi̱vī |
yāva̍tī̱ vedi̍ḥ |
tasya̍ e̱tāva̍ta e̱va bhrātṛ̍vyaṃ ni̱rbhajya̍ |
ā̱tmana̱ uttā̍raṃ pari̱grā̱haṃ pari̍gṛhṇāti |
ṛ̱tama̍syṛ̱ta̱sada̍namasyṛ̱ta̱śrīra̱sītyā̍ha |
ya̱thā̱ya̱jure̱vaita̱t || 12 ||))

**[[3-2-9-13]]**

क्रू॒रमि॑व॒ वा ए॒तत्क॑रोति।
यद्वेदिं॑ क॒रोति॑।
धा अ॑सि स्व॒धा अ॒सीति॑ योयुप्यते॒ शान्त्यै॑।
उ॒र्वी चा॑सि॒ वस्वी॑ चा॒सीत्या॑ह।
उ॒र्वीमे॒वैनां॒ वस्वीं॑ करोति।
पु॒रा क्रू॒रस्य॑ वि॒सृपो॑ विरफ्शि॒न्नित्या॑ह मेध्य॒त्वाय॑।
उ॒दा॒दाय॑ पृथि॒वीं जी॒रदा॑नु॒र्यामैर॑यञ्च॒न्द्रम॑सि
स्व॒धाभि॒रित्या॑ह।
यदे॒वास्या॑ अमे॒ध्यम्।
तद॑पहत्य॑।
मेध्या॑ँ दे॒वयज॑नीं कृ॒त्वा॥ १३॥

((krū̱rami̍va̱ vā e̱tatka̍roti |
yadvedi̍ṃ ka̱roti̍ |
dhā a̍si sva̱dhā a̱sīti̍ yoyupyate̱ śāntyai̍ |
u̱rvī cāsi̱ vasvi̍ cā̱sītyā̍ha |
u̱rvīme̱vainā̱ṃ vasvī̍ṃ karoti |
pu̱rā krū̱rasya̍ vi̱sṛpo̍ viraphśi̱nnityā̍ha medhya̱tvāya̍ |
u̱dā̱dāya̍ pṛthi̱vīṃ jī̱radā̍nu̱ryāmairā̍yañca̱ndrama̍si
sva̱dhābhi̱rityā̍ha |
yade̱vāsya̍ ame̱dhyam |
tada̍pa̱hatya̍ |
medhyā̍m̐ deva̱yaja̍nīṃ kṛ̱tvā || 13 ||))

**[[3-2-9-14]]**

यद॒दश्च॒न्द्रम॑सि॒ मेध्य॑म्।
तद॒स्यामेर॑यति।
तां धीरा॑सो अनु॒दृश्य॑ यजन्त॒ इत्या॒हानु॑ख्यात्यै।
प्रोक्ष॑णी॒रासा॑दय।
इ॒ध्माब॒र्हिरुप॑सादय।
स्रु॒वं च॒ स्रुच॑श्च॒ संमृ॑ड्ढि।
पत्नी॒ꣳ संन॑ह्य।
आज्ये॑नो॒देहीत्या॑हानुपूर्व॒तायै॑।
प्रोक्ष॑णी॒रासा॑दयति।

आपो॒ वै र॑क्षो॒घ्नीः॥ १४॥

((yadadaścandramasi medhyam ।
tadasyāmerayati ।
tām dhīrāso anudṛśya yajanta ityāhānukhyātyai ।
prokṣaṇīrāsādaya ।
idhmābarhirupasādaya ।
sruvam ca srucaśca sammṛḍhḍhi ।
patnīm samnahya ।
ājyenodehītyāhānupūrvatāyai ।
prokṣaṇīrāsādayati ।
āpo vai rakṣoghnīḥ ॥ 14 ॥))

**[[3-2-9-15]]**

रक्ष॑सा॒मप॑हत्यै।
स्फ्यस्य॒ वर्त्म॒न्त्सादयति।
य॒ज्ञस्य॒ संत॑त्यै।
उ॒वाच॒ हासि॑तो दै॑व॒लः।
ए॒ताव॑ती॒र्वा अ॒मुष्मिँ॑ल्लो॒क आप॑ आसन्न्।
याव॑ती॒ः प्रोक्ष॑णी॒रिति॑।
तस्मा॑द्ब॒ह्वीरा॒साद्या॑ः।
स्फ्यमु॒दस्य॑न्न्।
यं द्वि॒ष्यात्तं ध्या॑येत्।
शु॒चैवैन॒मर्पयति॥ १५॥
वै वा॒युरा॑ह परा॒वतीत्या॑हाह॑ द्वि॒तीय॑ꣳ ह॒रतीति॑ परिगृ॒ह्णन्ति॑
दे॒वयज॑नीं करोति भवन्ति खनत्यकरे॒तत्कृ॒त्वा
र॑क्षो॒घ्नीरर्पयति॥ ९॥

((rakṣasāmapahatyai ।
sphyasya vartmāntsādayati ।
yajñasya samtatyai ।
uvāca hāsito daivalaḥ ।
etāvatīrvā amuṣmimlloka āpa āsann ।
yāvatīḥ prokṣaṇīriti ।
tasmādbahvīrāsādyāḥ ।
sphyamudasyann ।
yam dviṣyāttam dhyāyet ।
śucaivainamarpayati ॥ 15 ॥
vai vāyuraha parāvatītyāhāha dvitīyam haratīti
parigṛhṇanti devayajanīm karoti bhavanti
khanatyakaretatkṛtvā rakṣoghnīrarpayati ॥ 9 ॥))

**[[3-2-10-1]]**

वज्रो॒ वै स्फ्यः।
यद॒न्वञ्चं॑ धा॒रये॑त्।
वज्रे॑ऽध्व॒र्युः क्ष॑ण्वीत।
पु॒रस्ता॑त्ति॒र्यञ्चं॑ धारयति।
वज्रो॒ वै स्फ्यः।
वज्रे॑णै॒व य॒ज्ञस्य॑ दक्षि॒ण॒तो रक्षा॒ꣳस्यप॑हन्ति।
अ॒ग्निभ्यां॒ प्राच॑श्च प्र॒तीच॑श्च।
स्फ्येनोदी॑चश्चाध॒राच॑श्च।
स्फ्येन॒ वा ए॒ष वज्रे॑ण॒ास्यै पा॒प्मानं॒ भ्रातृ॑व्यमप॒हत्य॑।
उ॒त्क॒रेऽधि॒ प्रवृ॑श्चति॥ १॥

((vajro vai sphyaḥ ।
yadanvañcam dhārayet ।
vajre'dhvaryuḥ kṣaṇvīta ।
purastāttiryañcam dhārayati ।
vajro vai sphyaḥ ।
vajreṇaiva yajñasya dakṣiṇato rakṣām̐syapahanti ।
agnibhyām prācaśca pratīcaśca ।
sphyenodīcaścādharācaśca ।
sphyena vā eṣa vajreṇāsyai pāpmānam
bhrātṛvyamapahatya ।
utkare'dhi pravṛścati ॥ 1 ॥))

**[[3-2-10-2]]**

यथो॑प॒धाय॑ वृ॒श्चन्त्ये॒वम्।
हस्ता॒वव॑नेनिक्ते।
आ॒त्मान॑मे॒व प॑वयते।
स्फ्यं प्रक्षा॑लयति मे॒ध्य॒त्वाय॑।
अथो॑ पा॒प्मन॑ ए॒व भ्रातृ॑व्यस्य न्य॒ङ्गं छि॑नत्ति।
इ॒ध्माब॒र्हिरु॒प॑सादयति॒ युक्त्यै॑।
य॒ज्ञस्य॑ मिथुन॒त्वाय॑।
अथो॑ पु॒रो॒रुच॑मे॒वैतां द॑धाति।
उत्त॑रस्य॒ कर्म॑णोऽनु॒ख्यात्यै।
न पु॒रस्ता॑त्प्र॒त्यगु॒प॑सादयेत्॥ २॥

((yathopadhāya vṛścantyevam ।
hastāvavanenikte ।
ātmānameva pavayate ।
sphyam prakṣālayati medhyatvāya ।
atho pāpmana eva bhrātṛvyasya nyaṅgam chinatti ।
idhmābarhirupasādayati yuktyai ।
yajñasya mithunatvāya ।
atho purorucamevaitām dadhāti ।
uttarasya karmaṇo'nukhyātyai ।
na purastātpratyagupasādayet ॥ 2 ॥))

**[[3-2-10-3]]**

यत्पु॒रस्ता॑त्प्र॒त्यगु॒प॑सा॒दये॑त्।
अ॒न्यत्रा॑ऽऽहुति॒प॒थादि॒ध्मं प्रति॑पादयेत्।
प्र॒जा वै ब॒र्हिः।

अपराध्नुयाद्बर्हिषां प्रजानां प्रजननम्।
पश्चात्प्रागुपसादयति।
आहुतिपथेनेध्मं प्रतिपादयति।
संप्रत्येव बर्हिषां प्रजानां प्रजननमुपैति।
दक्षिणमिध्मम्।
उत्तरं बर्हिः।
आत्मा वा इध्मः।
प्रजा बर्हिः।
प्रजा ह्यात्मन उत्तरतरा तीर्थे।
ततो मेधमुपनीय।
यथादेवतमेवैनत्प्रतिष्ठापयति।
प्रतितिष्ठति प्रजया पशुभिर्यजमानः॥ ३॥
वृश्चति सादयेदिध्मः पञ्च च॥ १०॥
तृतीयस्यां देवस्याँश्वपर्शुं यो वै पूर्वेद्युः कर्मणे वामिन्द्रो
वृत्रमहन्त्सोऽपोवधूतं धृष्टिर्देवस्येत्याह संवपामि देवस्य
स्फयमाददे वज्रो वै स्फयो दश॥ १०॥
तृतीयस्यां यज्ञस्यानतिरेकाय पवित्रवत्यध्वर्युं
चाधिषवणमस्यन्तरिक्ष एव रक्षसामन्तर्हित्यै द्वौ वाव
पुरुषौ यददश्चन्द्रमसि मेध्यं पञ्चाशीतिः॥ ८५॥

((yatpurastātpratyagupasādayet |
anyatrā''hutipathādidhmaṃ pratipādayet |
prajā vai barhiḥ |
aparādhnuyādbarhiṣā̃ prajānām̐ prajananam |
paścātprāgupasādayati |
āhutipathenedhmaṃ pratipādayati |
saṃpratyeva barhiṣā̃ prajānām̐ prajananamupaiti |
dakṣiṇamidhmam |
uttaraṃ barhiḥ |
ātmā vā idhmaḥ |
prajā barhiḥ |
prajā hyātmana uttaratarā tīrthe |
tato medhamupanīya |
yathādevatamevainatpratiṣṭhāpayati |
pratitiṣṭhati prajayā paśubhiryajamānaḥ || 3 ||
vṛścati sādayedidhmaḥ pañca ca || 10 ||
tṛtīyasyāṃ devasyāśvaparśuṃ yo vai pūrvedyuḥ
karmaṇe vāmindro vṛtramahantso'povadhūtaṃ
dhṛṣṭirdevasyetyāha saṃvapāmi devasya
sphayamādade vajro vai sphayo daśa || 10 ||
tṛtīyasyāṃ yajñasyānatirekāya
pavitravatyadhvaryuṃ cādhiṣavaṇamasyantarikṣa
eva rakṣasāmantarhityai dvau vāva puruṣau
yadadaścandramasi medhyaṃ pañcāśītiḥ || 85 ||))

# Taittirīya-Brāhmaṇa

# Book 3, Chapter 3

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[3-3-1-1]]**

प्रत्यु॑ष्ट॒ꣳ॒ रक्षः॒ प्रत्यु॑ष्टा॒ अरा॑तय॒ इत्या॑ह।
रक्ष॑सा॒मप॑हत्यै।
अ॒ग्नेर्व॒स्तेजि॑ष्ठेन॒ तेज॑सा॒ निष्ट॑पा॒मीत्या॑ह मेध्य॒त्वाय॑।
स्रुच॒ः संमा᳚र्ष्टि।
स्रु॒वमग्रे᳚।
पुमा॒ꣳ॒सम॒वाभ्य॒ः सꣳ॒श्य॑ति मिथुन॒त्वाय॑।
अथ॑ जु॒हूम्।
अथो॑प॒भृता᳚म्।
अथ॑ ध्रु॒वाम्।
अ॒सौ वै जु॒हूः॥ १॥

((pratyúṣṭa̱m̐ rakṣa̱ḥ pratyúṣṭā̱ arátaya̱ ityáha ।
rakṣásā̱mapáhatyai ।
a̱gnerva̱stejíṣṭhena̱ tejásā̱ niṣṭápā̱mītyáha medhya̱tvāyá ।
sruca̱ḥ saṃmā̎rṣṭi ।
sru̱vamagrē̎ ।
pumā̱m̐same̱vābhya̱ḥ sa̱m̐śyáti mithuna̱tvāyá ।
athá ju̱hūm।
athópa̱bhṛtā̎m ।
athá dhru̱vām ।
a̱sau vai ju̱hūḥ ॥ 1 ॥))

**[[3-3-1-2]]**

अ॒न्तरि॑क्षमुप॒भृत्।
पृ॒थि॒वी ध्रु॒वा।
इ॒मे वै लो॒काः स्रुच॑ः।
वृष्टि॑ः सं॒मार्ज॑नानि।
वृष्टि॒र्वा इ॒माँल्लो॒काननु॑पू॒र्वं क॑ल्पयति।
ते तत॑ः क्लृ॒प्ताः समे॑धन्ते।
समे॑धन्तेऽस्मा इ॒मे लो॒काः प्र॒जया॑ प॒शुभि॑ः।
य ए॒वं वेद॑।
यदि॑ का॒मये॑त॒ वर्षु॑कः प॒र्जन्य॑ः स्या॒दिति॑।
अ॒ग्र॒तः सं॒मृ॒ज्यात्॥ २॥

((a̱ntarikṣamupa̱bhṛt ।
pṛ̱thi̱vī dhru̱vā ।
i̱me vai lo̱kāḥ srucáḥ ।
vṛṣṭiḥ sa̱mmārjánāni ।
vṛṣṭirvā i̱mām̐llo̱kānánupū̱rvaṃ kálpayati ।
te tatáḥ kḷ̱ptāḥ samédhante ।
samédhante'smā i̱me lo̱kāḥ pra̱jayā́ pa̱śubhiḥ ।
ya e̱vaṃ vedá ।
yadi kā̱mayéta̱ varṣúkaḥ pa̱rjanyáḥ syā̱diti ।
a̱gra̱taḥ sa̱mmṛ̱jyāt ॥ 2 ॥))

**[[3-3-1-3]]**

वृष्टि॑मे॒व नि॒यच्छ॑ति।
अ॒र्वाची॑ना᳚ग्रा॒ हि वृष्टि॑ः।
यदि॑ का॒मये॒ताव॑र्षुकः स्या॒दिति॑।
मू॒ल॒तः सं॒मृ॒ज्यात्।
वृष्टि॑मे॒वोद्य॑च्छति।
तदु॒ वा आ॑हुः।
अ॒ग्र॒त ए॒वोपरि॑ष्टा॒त्सं॒मृ॒ज्यात्।
मू॒ल॒तो॑ऽधस्ता᳚त्।
तद॑नुपू॒र्वं क॑ल्पते।
वर्षु॑को भव॒तीति॑॥ ३॥

((vṛṣṭime̱va niyácchati ।
a̱rvācīnā̎grā̱ hi vṛṣṭiḥ ।
yadi kā̱maye̱tāvárṣukaḥ syā̱diti ।
mū̱la̱taḥ sa̱mmṛ̱jyāt ।
vṛṣṭime̱vodyácchati ।
tadu̱ vā áhuḥ ।
a̱gra̱ta e̱vopariṣṭā̱tsa̱mmṛ̱jyāt।
mū̱la̱tó'dhastā̎t।
tadánupū̱rvaṃ kálpate ।
varṣúko bhava̱tīti ॥ 3 ॥))

**[[3-3-1-4]]**

प्राची᳚मभ्याका॒रम्।
अ॒ग्नेर॑न्तर॒तः।
ए॒वमि॑व॒ ह्यन्न॑मद्यते᳚।
अथो॑ अ॒ग्राद्वा ओष॑धीना॒मूर्जं᳚ प्र॒जा उप॑जीवन्ति।
ऊर्जं॑ ए॒वान्नाद्य॒स्याव॑रुध्यै।
अ॒धस्ता᳚त्प्र॒तीची॑म्।
द॒ण्डमु॑त्तम॒तः।
मूले॑न॒ मूलं॑ प्रति॑ष्ठित्यै।
तस्मा॑दर॒त्नौ प्राञ्च्युपरि॑ष्टा॒ल्लोमा॑नि।

प्र॒त्यञ्च्य॒धस्ता᳚त्॥ ४॥

((prāci̍mabhya̱kārām |
agrai̍ranta̱ra̱taḥ |
e̱vami̍va̱ hyanna̍ma̱dyatē |
atho̱ agrā̱dvā o̍ṣa̱dhīnā̱mūrja̍ṃ pra̱jā upa̍jīvanti |
ūrja e̱vānnādya̱syāva̍rudhyai |
a̱dhastā̎tpra̱tīcī̎m |
da̱ṇḍamu̍ttama̱taḥ |
mūle̍na̱ mūla̍m prati̍ṣṭhityai |
tasmā̍dara̱tnau prāñcyu̱pari̍ṣṭā̱llomā̍ni |
pra̱tyañcya̱dhastā̎t || 4 ||))

**[[3-3-1-5]]**

स्रु॒ग्घ्ये॑षा।

प्रा॒णो वै स्रु॒वः।

जु॒हूर्द॑क्षि॒णो ह॑स्तः।

उ॒प॒भृत्स॒व्यः।

आ॒त्मा ध्रु॒वा।

अन्न॒ꣳ॒ सं॑मार्ज॑नानि।

मु॒ख॒तो वै प्रा॒णो॑ऽपा॒नो भू॒त्वा।

आ॒त्मान॒मन्नं॒ प्र॒विश्य॑।

बा॒ह्य॒तस्त॒नुव॒ꣳ॒ शुभयति।

तस्मा᳚त्स्रु॒वमे॒वाग्रे॒ सम्मा᳚र्ष्टि।

मु॒ख॒तो हि प्रा॒णो॑ऽपा॒नो भू॒त्वा।

आ॒त्मान॒मन्न॑मावि॒शति॑।

तौ प्रा॑णापा॒णौ।

अव्य॑र्धुकः प्राणापा॒नाभ्या᳚ं भवति।

य ए॒वं वेद॑॥ ५॥

जु॒हूर्मृ॑ज्याद्भ॒वतीति॑ प्र॒त्यङ्ङ्य॒धस्त॒न्मार्ष्टि॒ पञ्च॑ च॥ १॥

((srugghye̍ṣā |
prā̱ṇo vai sru̱vaḥ |
ju̱hūrdakṣi̍ṇo̱ hasta̍ḥ |
u̱pa̱bhṛtsa̱vyaḥ |
ā̱tmā dhru̱vā |
anna̍m̐ sa̱mmārja̍nāni |
mu̱kha̱to vai prā̱ṇo̍'pā̱no bhū̱tvā |
ā̱tmāna̱manna̍ṃ pra̱viśya̍ |
bā̱hya̱tasta̱nuva̍m̐ śubhayati |
tasmā̎tsru̱vame̱vāgre̱ sa̱mmā̎rṣṭi |
mu̱kha̱to hi prā̱ṇo̍'pā̱no bhū̱tvā |
ā̱tmāna̱manna̍māvi̱śati̍ |
tau prā̍ṇāpā̱ṇau |
avya̍rdhukaḥ prāṇāpā̱nābhyā̎ṃ bhavati |
ya e̱vaṃ veda̍ || 5 ||
ju̱hūrmṛ̍jyāadbhava̱tīti̍ pra̱tyaṅcaya̱dhasta̱nmārṣṭi̱ pañca̍ ca || 1 ||))

**[[3-3-2-1]]**

दि॒वः शि॒ल्प॒मव॑ततम्।

पृ॒थि॒व्याः क॒कुभि॑ श्रि॒तम्।

तेन॑ व॒यꣳ स॒हस्र॑वल्शेन।

स॒पत्नं॑ नाशयामसि॒ स्वाहेति॑।

स्रुक्स॒म्मार्ज॑नान्य॒ग्नौ प्रह॑रति।

आपो॒ वै द॒र्भाः।

रू॒पमे॒वैषा॒मे॒तन्म॑हि॒मानं॒ व्याच॑ष्टे।

अ॒नु॒ष्टुभ॒र्चा।

आनु॑ष्टुभः प्र॒जाप॑तिः।

प्रा॒जा॒प॒त्यो वे॒दः।

वे॒दस्या॒ग्रꣳ॑ स्रुख्स॒म्मार्ज॑नानि॥ १॥

((di̱vaḥ śilpa̱mava̍tatam |
pṛ̱thi̱vyāḥ ka̱kubhi̍ śri̱tam |
tena̍ va̱yam̐ sa̱hasra̍valśena |
sa̱patna̍ṃ nāśayāmasi̱ svāheti̍ |
sruksa̱mmārja̍nānya̱gnau praha̍rati |
āpo̱ vai da̱rbhāḥ |
rū̱pame̱vaiṣā̍me̱tanma̍hi̱mānaṃ̱ vyāca̍ṣṭe |
a̱nu̱ṣṭubha̱rcā |
ānu̍ṣṭubhaḥ pra̱jāpa̍tiḥ |
prā̱jā̱pa̱tyo ve̱daḥ |
ve̱dasyāgra̎m̐ srukhsa̱mmārja̍nāni || 1 ||))

**[[3-3-2-2]]**

स्वेनै॒वैना॑नि॒ छन्द॑सा।

स्वया॑ दे॒वत॑या॒ सम॑र्धयति।

अथो॒ ऋग्वाव योषा᳚।

द॒र्भो वृषा᳚।

तन्मि॑थु॒नम्।

मि॒थु॒नमे॒वास्य॒ तद्य॒ज्ञे क॑रोति प्र॒जन॑नाय।

प्रजा॑यते प्र॒जया॑ प॒शुभि॒र्यज॑मानः।

तान्येके॒ वृथै॒वापा᳚स्यन्ति।

तत्तथा॒ न का॒र्य᳚म्।

आर॑ब्धस्य य॒ज्ञिय॑स्य॒ कर्म॑णः सः वि॑दो॒हः॥ २॥

((svenai̱vainā̍ni̱ chanda̍sā |
svayā̍ de̱vata̍yā̱ samā̍rdhayati |
atho̱ ṛ̱gvāva yo̱ṣā̎ |
da̱rbho vṛ̱ṣā̎ |
tanmi̍thu̱nam |
mi̱thu̱name̱vāsya̱ tadya̱jñe ka̍roti pra̱jana̍nāya |

prajā́yate pra̱jayā̍ pa̱śubhi̱ryajá̍mānaḥ |
tānyeke̱ vṛthai̱vāpā̍syanti |
tattathā̱ na kā̱ryā̍m |
ārábdhasya ya̱jñiyá̍sya̱ karmá̍ṇa̱ḥ saḥ vi̱do̱haḥ || 2 ||))

**[[3-3-2-3]]**

य॒द्येना॑नि प॒शवो॑ऽभि॒तिष्ठे॑युः।
न तत्प॒शुभ्य॒ः कम्।
अ॒द्भिर्मा॑र्जयि॒त्वोत्क॒रे न्य॑स्येत्।
यद्वै य॒ज्ञिय॑स्य॒ कर्म॑णो॒ऽन्यत्राहु॑तीभ्यः सं॒तिष्ठ॑ते।
उ॒त्क॒रो वाव तस्य॑ प्रति॒ष्ठा।
ए॒ताꣳ हि तस्मै॑ प्रति॒ष्ठां दे॒वाः स॒मभ॑रन्।
यद॒द्भिर्मा॒र्जय॑ति।
तेन॑ शा॒न्तम्।
यदु॑त्क॒रे न्य॒स्यति॑।
प्र॒ति॒ष्ठामे॒वैना॑नि॒ तद्ग॑मयति॥ ३॥

((yadyénāni pa̱śavó'bhi̱tiṣṭhéyuḥ |
na tatpa̱śubhya̱ḥ kam |
a̱dbhirmā́rjayi̱tvotka̱re nyásyet |
yadvai ya̱jñiyá̍sya̱ karmá̍ṇo̱'nyatrāhú̍tībhyaḥ sa̱mtiṣṭhá̍te |
u̱tka̱ro vāva tasyá̍ prati̱ṣṭhā |
e̱tāꣳ hi tasmai̍ prati̱ṣṭhāṃ de̱vāḥ sa̱mabhá̍ran |
yada̱dbhirmā̱rjayá̍ti |
tená̍ śā̱ntam |
yadú̍tka̱re nya̱syati̍ |
pra̱ti̱ṣṭhāme̱vainā́ni̱ tadgá̍mayati || 3 ||))

**[[3-3-2-4]]**

प्रति॑तिष्ठति प्र॒जया॑ प॒शुभि॒र्यज॑मानः।
अथो॑ स्त॒म्बस्य॒ वा ए॒तद्रू॒पम्।
यत्स्रु॑ख्सं॒मार्ज॑नानि।
स्त॒म्ब॒शो वा ओष॑धयः।
तासा॑ं जरत्क॒क्षे प॒शवो॒ न र॑मन्ते।
अ॒प्रियो॒ ह्ये॑षां जरत्क॒क्षः।
याव॑दप्रियो ह॒ वै ज॑रत्क॒क्षः प॑शू॒नाम्।
ताव॑दप्रियः प॒शू॒नां भ॑वति।
यस्यै॒तान्य॒न्यत्रा॒ग्नेर्द॒धा॑ति।
न॒व॒दा॒व्या॑सु॒ वा ओष॑धीषु प॒शवो॑ रमन्ते॥ ४॥

((prati̍tiṣṭhati pra̱jayā̍ pa̱śubhi̱ryajá̍mānaḥ |
athō̍ sta̱mbasya̱ vā e̱tadrū̱pam |
yatsrú̍khsa̱mmārjá̍nāni |
sta̱mba̱śo vā oṣá̍dhayaḥ |
tāsā́ṃ jaratka̱kṣe pa̱śavo̱ na rá̍mante |
apri̱yo̱ hyé̍ṣāṃ jaratka̱kṣaḥ |
yāvá̍dapriyo ha̱ vai já̍ratka̱kṣaḥ pá̍śū̱nām |
tāvá̍dapriyaḥ paśū̱nāṃ bhá̍vati |
yasyai̱tānya̱nyatrā̱gnerdadhá̍ti |
na̱va̱dā̱vyá̍su̱ vā oṣá̍dhīṣu pa̱śavó̍ ramante || 4 ||))

**[[3-3-2-5]]**

न॒व॒दा॒वो ह्ये॑षां प्रि॒यः।
याव॑त्प्रियो ह॒ वै न॑वदा॒वः प॑शू॒नाम्।
ताव॑त्प्रियः प॒शू॒नां भ॑वति।
यस्यै॒तान्य॒ग्नौ प्र॒हर॑न्ति।
तस्मा॑दे॒तान्य॒ग्नावे॒व प्रह॑रेत्।
य॒त॒रस्मि॑न्त्सं॒मृ॒ज्यात्।
प॒शू॒नां धृत्यै॑।
यो भू॒ताना॒मधि॑पतिः।
रु॒द्रस्त॑न्ति॒च॒रो वृषा॑।
प॒शू॒नस्माकं॒ मा हि॑ꣳसीः।
ए॒तद॑स्तु हु॒तं तव॒ स्वाहेत्य॒ग्निसं॒मार्ज॑नान्य॒ग्नौ प्रह॑रति।
ए॒षा वा ए॒तेषां॒ योनि॑ः।
ए॒षा प्र॑ति॒ष्ठा।
स्वामे॒वैना॑नि॒ योनि॑म्।
स्वां प्र॑ति॒ष्ठां ग॑मयति।
प्रति॑तिष्ठति प्र॒जया॑ प॒शुभि॒र्यज॑मानः॥ ५॥
वे॒दस्याग्रꣳ॑ स्रुख्सं॒मार्ज॑नानि विदो॒हो ग॑मयति प॒शवो॑ रमन्ते हिꣳसीष्षट्च॑॥ २॥

((na̱va̱dā̱vo hyé̍ṣāṃ pri̱yaḥ |
yāvá̍tpriyo ha̱ vai ná̍vadā̱vaḥ pá̍śū̱nām |
tāvá̍tpriyaḥ paśū̱nāṃ bhá̍vati |
yasyai̱tānya̱gnau pra̱hará̍nti |
tasmā́de̱tānya̱gnāve̱va prahá̍ret |
ya̱ta̱rasmi̍ntsa̱mmṛ̱jyāt |
pa̱śū̱nāṃ dhṛtyai̍ |
yo bhū̱tānā̱madhí̍patiḥ |
ru̱drastá̍ntica̱ro vṛ̱ṣā̍ |
paśū̱na̱smāka̱ṃ mā hiꣳ̍sīḥ |
e̱tadá̍stu hu̱taṃ tava̱ svāhetyá̍gnisa̱mmārjá̍nānya̱gnau prahá̍rati |
e̱ṣā vā e̱teṣā̱ṃ yoni̍ḥ |
e̱ṣā prá̍ti̱ṣṭhā |
svāme̱vainā́ni̱ yoni̍m |
svā̱ṃ prá̍ti̱ṣṭhāṃ gá̍mayati |
prati̍tiṣṭhati pra̱jayā̍ pa̱śubhi̱ryajá̍mānaḥ || 5 ||
ve̱dasyāgraꣳ̍ srukhsa̱mmārjá̍nāni vido̱ho gá̍mayati pa̱śavó̍ ramante himꣳ̍sīṣṣa̱ṭacá̍ || 2 ||))

**[[3-3-3-1]]**

अय॑ज्ञो॒ वा ए॒षः।
यो॑ऽप॒त्नीकः॑।
न प्र॒जाः प्रजा॑येरन्।
पत्न्यन्वा᳚स्ते।
य॒ज्ञमे॒वाकः॑।
प्र॒जानां᳚ प्र॒जन॑नाय।
यत्तिष्ठ॑न्ती सं॒नह्ये॑त।
प्रि॒यं ज्ञा॒तिꣳ रु॑न्ध्यात्।
आसी॑ना॒ सं॒न॑ह्यते।
आसी॑ना॒ ह्ये॑षा वी॒र्यं᳚ क॒रोति॑॥ १॥

((aya̍jño̱ vā e̱ṣaḥ |
yo̍'pa̱tnīka̍ḥ |
na pra̱jāḥ prajā̍yeran |
patnyanvā̎ste |
ya̱jñame̱vāka̍ḥ |
pra̱jānā̎ṃ pra̱jana̍nāya |
yattiṣṭha̍ntī sa̱ṃnahye̍ta |
pri̱yaṃ jñā̱tim̐ ru̍ndhyāt |
āsī̍nā̱ sa̱ṃna̍hyate |
āsī̍nā̱ hye̍ṣā vī̱ryaṃ̎ ka̱roti̍ || 1 ||))

**[[3-3-3-2]]**

यत्प॒श्चात्प्राच्य॒न्वासी॑त।
अ॒नया॑ स॒मदं॑ दधीत।
दे॒वानां॒ पत्नि॑या स॒मदं॑ दधीत।
देशा᳚द्दक्षि॒णत उदी॒च्यन्वा᳚स्ते।
आ॒त्मनो॑ गोपी॒थाय॑।
आ॒शासा॑ना सौमन॒समित्या॑ह।
मेध्या॑मे॒वैनां॒ केव॑लीं कृत्वा।
आ॒शिषा॒ सम॑र्धयति।
अ॒ग्नेरनु॑व्रता भू॒त्वा सं॒न॑ह्ये सुकृ॒ताय॒ कमित्या॑ह।
ए॒तद्वै पत्नि॑यै व्रतोप॒नय॑नम्॥ २॥

((yatpa̱ścātprācya̱nvāsī̍ta |
a̱nayā̍ sa̱mada̍ṃ dadhīta |
de̱vānā̱ṃ patni̍yā sa̱mada̍ṃ dadhīta |
deśā̎ddakṣi̱ṇata udī̱cyanvā̎ste |
ā̱tmano̍ gopī̱thāya̍ |
ā̱śāsā̍nā saumana̱samityā̍ha |
medhyā̍me̱vainā̱ṃ keva̍līṃ kṛ̱tvā |
ā̱śi̱ṣā̱ sama̍rdhayati |
a̱gneranu̍vratā bhū̱tvā sa̱ṃna̍hye sukṛ̱tāya̱ kamityā̍ha |
e̱tadvai patni̍yai vratopa̱naya̍nam || 2 ||))

**[[3-3-3-3]]**

तेनै॒वैनां᳚ व्र॒तमुप॑नयति।
तस्मा॑दाहुः।
यश्चै॒वं वेद॒ यश्च॒ न।
योक्त्र॑मे॒व यु॑ते।
यम॒न्वास्ते᳚।
तस्या॒मुष्मि॑ँल्लो॒के भ॑व॒तीति॒ योक्त्रे॑ण।
यद्योक्त्र᳚म्।
स योग॑ः।
यदास्ते᳚।
स क्षेम॑ः॥ ३॥

((tenai̱vainā̎ṃ vra̱tamupa̍nayati |
tasmā̍dāhuḥ |
yaścai̱vaṃ veda̱ yaśca̱ na |
yoktra̍me̱va yu̍te |
yama̱nvāste̎ |
tasyā̱muṣmi̍m̐llo̱ke bha̍va̱tīti̱ yoktre̍ṇa |
yadyoktra̎m |
sa yoga̍ḥ |
yadāste̎ |
sa kṣema̍ḥ || 3 ||))

**[[3-3-3-4]]**

यो॒ग॒क्षे॒मस्य॒ क्लृप्त्यै᳚।
यु॒क्तं क्रि॑याता आ॒शीःकामे॑ युज्याता॒ इति॑।
आ॒शिषः॒ समृ॑द्ध्यै।
ग्र॒न्थिं ग्र॑थ्नाति।
आ॒शिष॑ ए॒वास्यां॒ परि॑गृह्णाति।
पु॒मान्वै ग्र॒न्थिः।
स्त्री पत्नी᳚।
तन्मि॑थु॒नम्।
मि॒थुनमे॒वास्य॒ तद्य॒ज्ञे क॑रोति प्र॒जन॑नाय।
प्रजा॑यते प्र॒जया॑ प॒शुभि॒र्यज॑मानः॥ ४॥

((yo̱ga̱kṣe̱masya̱ kḷptyai̎ |
yu̱ktaṃ kri̍yātā ā̱śīḥkāme̍ yujyātā̱ iti̍ |
ā̱śiṣa̱ḥ samṛ̍ddhyai |
gra̱nthiṃ gra̍thnāti |
ā̱śiṣa̍ e̱vāsyā̱ṃ pari̍gṛhṇāti |
pu̱mānvai gra̱nthiḥ |
strī patnī̎ |
tanmi̍thu̱nam |

mi̱thu̱name̱vāsya̱ tadyajñe ka̍roti pra̱jana̍nāya ।
prajā̍yate pra̱jayā̍ pa̱śubhi̱ryaja̍mānaḥ ॥ 4 ॥))

**[[3-3-3-5]]**

अथो॒ अ॒र्धो वा ए॒ष आ॒त्मनः॑।

यत्पत्नी॓।

य॒ज्ञस्य॒ धृत्या॒ अशि॑थिलंभावाय।

सु॒प्र॒जस॑स्त्वा व॒यꣳ सु॒पत्नी॒रुप॑सेदि॒मेत्या॑ह।

य॒ज्ञमे॒व तन्मि॑थु॒नी क॑रोति।

ऊ॒नेऽति॑रिक्तं धीयाता॒ इति॒ प्रजा॓त्यै।

म॒ही॒नां पयो॒ऽस्योष॑धीना॒ꣳ रस॒ इत्या॑ह।

रू॒पमे॒वास्यै॒तन्म॑हि॒मानं॒ व्याच॑ष्टे।

तस्य॒ तेऽक्षी॑यमाणस्य॒ निर्व॑पामि देवय॒ज्याया॒ इत्या॑ह।

आ॒शिषमे॒वैतामाशा॓स्ते॥ ५॥

क॒रोति॑ व्र॒तोप॒नय॑नं॒ क्षेमो॒ यज॑मानः शास्ते॥ ३॥

((atho̍ a̱rdho vā e̱ṣa ā̱tmana̍ḥ ।
yatpatnī̎ ।
ya̱jñasya̱ dhṛtyā̱ aśi̍thilaṃbhāvāya ।
su̱pra̱jasa̍stvā va̱yam̐ su̱patnī̱rupa̍sedi̱metyā̍ha ।
ya̱jñame̱va tanmi̍thu̱nī ka̍roti ।
ū̱ne'ti̍riktaṃ dhīyātā̱ iti̱ prajā̎tyai ।
ma̱hī̱nāṃ payo̱'syoṣa̍dhīnā̱m̐ rasa̱ ityā̍ha ।
rū̱pame̱vāsyai̱tanma̍hi̱mānaṃ̱ vyāca̍ṣṭe ।
tasya̱ te'kṣi̍yamāṇasya̱ nirva̍pāmi devaya̱jyāyā̱ ityā̍ha ।
ā̱śiṣa̍me̱vaitāmāśā̎ste ॥ 5 ॥
ka̱roti̍ vratopa̱naya̍naṃ̱ kṣemo̱ yaja̍mānaḥ śāste ॥ 3 ॥))

**[[3-3-4-1]]**

घृ॒तं च॒ वै मधु॑ च प्र॒जाप॑तिरासीत्।

यतो॒ मध्वा॑सीत्।

तत॑ः प्र॒जा अ॑सृजत।

तस्मा॒न्मधु॑षि प्र॒जन॑नमिवास्ति।

तस्मा॒न्मधु॑षा॒ न प्रच॑रन्ति।

या॒तया॑म॒ हि।

आज्ये॑न॒ प्रच॑रन्ति।

य॒ज्ञो वा आज्य॓म्।

य॒ज्ञेनै॒व य॒ज्ञं प्रच॑र॒न्त्यया॑तयामत्वाय।

पत्न्यवे॓क्षते॥ १॥

((ghṛ̱taṃ ca̱ vai madhu̍ ca pra̱jāpa̍tirāsīt ।
yato̱ madhvā̍sīt ।
tata̍ḥ pra̱jā a̍sṛjata ।
tasmā̱nmadhu̍ṣi pra̱jana̍namivāsti ।
tasmā̱nmadhu̍ṣā̱ na praca̍ranti ।
yā̱tayā̍ma̱ hi ।
ājye̍na̱ praca̍ranti ।
ya̱jño vā ājyā̎m ।
ya̱jñenai̱va ya̱jñaṃ praca̍ra̱ntyayā̍tayāmatvāya ।
patnyave̎kṣate ॥ 1 ॥))

**[[3-3-4-2]]**

मि॒थु॒नत्वाय॒ प्रजा॓त्यै।

यद्वै पत्नी॑ य॒ज्ञस्य॑ क॒रोति॑।

मि॒थु॒नं तत्।

अथो॒ पत्नि॑या ए॒वैष य॒ज्ञस्या॓न्वार॒म्भोऽन॑वच्छित्त्यै।

अ॒मे॒ध्यं वा ए॒तत्क॑रोति।

यत्पत्न्य॒वेक्ष॑ते।

गार्ह॑पत्येऽधि॑श्रयति मेध्य॒त्वाय॑।

आ॒ह॒व॒नीय॑म॒भ्युद्द्र॑वति।

य॒ज्ञस्य॒ सन्त॑त्यै।

तेजो॑ऽसि॒ तेजो॒ऽनु॒ प्रेहीत्या॑ह॥ २॥

((mi̱thu̱na̱tvāya̱ prajā̎tyai ।
yadvai patni̍ ya̱jñasya̍ ka̱roti̍ ।
mi̱thu̱naṃ tat।
atho̱ patni̍yā e̱vaiṣa
ya̱jñasyā̎nvāra̱mbho'na̍vacchittyai ।
a̱medhyaṃ vā e̱tatka̍roti ।
yatpatnya̱vekṣa̍te ।
gārha̍patye'dhi̍śrayati medhya̱tvāya̍ ।
ā̱ha̱va̱nīya̍ma̱bhyuddra̍vati ।
ya̱jñasya̱ santa̍tyai ।
tejo̍'si̱ tejo'nu̱ prehītyā̍ha ॥ 2 ॥))

**[[3-3-4-3]]**

तेजो॒ वा अ॒ग्निः।

तेज॒ आज्य॓म्।

तेज॑सै॒व तेज॒ः सम॑र्धयति।

अ॒ग्निस्ते॒ तेजो॒ मा विनै॒दित्या॒हाहि॑ꣳसायै।

स्फ्यस्य॒ वर्त्म॓न्त्सादयति।

य॒ज्ञस्य॒ सन्त॑त्यै।

अ॒ग्नेर्जि॒ह्वाऽसि॑ सु॒भूर्दे॒वाना॒मित्या॑ह।

य॒थाय॒जुरे॒वैतत्।

धाम्ने॑ धाम्ने दे॒वेभ्यो॒ यजु॑षे यजुषे भ॒वेत्या॑ह।

आ॒शिषमे॒वैतामाशा॓स्ते॥ ३॥

((tejo̱ vā a̱gniḥ |
teja̱ ājya̎m |
tejá̍saiva teja̱ḥ samá̍rdhayati |
a̱gniste̱ tejo̱ mā vinai̱dityā̱hāhim̐sāyai |
sphyasya̱ vartmā̎ntsādayati |
ya̱jñasya̱ santá̍tyai |
a̱gnerji̱hvā'sí̍ su̱bhūrde̱vānā̱mityā̍ha |
ya̱thā̱ya̱jure̱vaitat|
dhāmné̍ dhāmne de̱vebhyo̱ yajú̍ṣe yajuṣe
bha̱vetyā̍ha |
ā̱śiṣa̍me̱vaitāmāśā̎ste || 3 ||))

**[[3-3-4-4]]**

तद्वा अत॑ः प॒वित्रा॑भ्याम॒वोत्पु॑नाति।
यज॑मानो॒ वा आज्य॑म्।
प्रा॒णा॒पा॒नौ प॒वित्रे॑।
यज॑मान ए॒व प्रा॑णापा॒नौ द॑धाति।
पु॒न॒रा॒हा॒र॑म्।
ए॒वमि॑व॒ हि प्रा॑णापा॒नौ स॒ंचर॑तः।
शु॒क्रम॑सि॒ ज्योति॑रसि॒ तेजो॒ऽसीत्या॑ह।
रू॒पमे॒वास्यै॒तन्म॑हि॒मानं॒ व्याच॑ष्टे।
त्रिर्य॑जु॒षा।
त्रय॑ इ॒मे लो॒काः॥ ४॥

((tadvā atá̍ḥ pa̱vitrā̎bhyāme̱votpú̍nāti |
yajá̍māno̱ vā ājya̎m |
prā̱ṇā̱pā̱nau pa̱vitre̎ |
yajá̍māna e̱va prá̍ṇāpā̱nau dá̍dhāti |
pu̱na̱rā̱hā̱ra̎m |
e̱vamí̍va̱ hi prá̍ṇāpā̱nau sa̱mcará̍taḥ |
śu̱kramá̍si̱ jyotí̍rasi̱ tejo̱'sītyā̍ha |
rū̱pame̱vāsyai̱tanmá̍hi̱mānam̱ vyācá̍ṣṭe |
triryajú̍ṣā |
trayá̍ i̱me lo̱kāḥ || 4 ||))

**[[3-3-4-5]]**

ए॒षां लो॒काना॒माप्त्यै॑।
त्रिः।
त्र्या॑वृ॒द्धि य॒ज्ञः।
अथो॑ मेध्य॒त्वाय॑।
अथाज्य॑वतीभ्याम॒पः।
रू॒पमे॒वासा॑मे॒तद्वर्ण॑ं दधाति।
अपि॒ वा उ॒ताहुः॑।
यथा॑ ह॒ वै योषा॑ सु॒वर्ण॒ꣳ॒ हिर॑ण्यं पेश॒लं बिभ्र॑ती
रू॒पाण्यास्ते॑।
ए॒वमे॒ता ए॒तर्हीति॑।
आपो॒ वै सर्वा॑ दे॒वताः॑॥ ५॥

((e̱ṣām lo̱kānā̱māptyai̎ |
triḥ |
tryā̍vṛ̱ddhi ya̱jñaḥ |
athó̍ medhya̱tvāyá̍ |
athājyá̍vatībhyāma̱paḥ |
rū̱pame̱vāsá̍me̱tadvarṇa̱m̐ dadhāti |
api̱ vā u̱tāhú̍ḥ |
yathá̍ ha̱ vai yoṣá̍ su̱varṇa̱m̐ hirá̍ṇyam peśa̱lam
bibhrá̍tī rū̱pāṇyāste̎ |
e̱vametā̱ e̱tarhīti̍ |
āpo̱ vai sarvá̍ de̱vatā̎ḥ || 5 ||))

**[[3-3-4-6]]**

ए॒षा हि विश्वे॑षां दे॒वाना॑ं त॒नूः।
यदाज्य॑म्।
तत्रो॒भयो॑र्मीमा॒ꣳ॒सा।
जा॒मिः स्यात्।
यद्यजु॒षाऽऽज्यं॑ यजु॑षा॒ऽप उ॑त्पुनी॒यात्।
छन्द॑सा॒ऽप उत्पु॑ना॒त्यजा॑मित्वाय।
अथो॑ मिथुन॒त्वाय॑।
सा॒वि॒त्रि॒यर्चा॑।
स॒वि॒तृप्र॑सूतं मे॒ कर्मा॑स॒दिति॑।
स॒वि॒तृप्र॑सूतमे॒वास्य॒ कर्म॑ भवति।
प॒च्छो गाय॑त्रिया त्रिः॑षमृद्धत्वाय॑।
अ॒द्भिरे॒वौष॑धीः संन॑यति।
ओष॑धीभिः प॒शून्।
प॒शुभि॒र्यज॑मानम्।
शु॒क्रं त्वा॑ शु॒क्राया॑ं ज्योति॑स्त्वा॒
ज्योति॑ष्य॒र्चिस्त्वा॒ऽर्चिषीत्या॑ह सर्व॒त्वाय॑।
पर्या॑प्त्या॒ अन॑न्तरायाय॥ ६॥
ई॒क्ष॒त आ॒ह॒ शा॒स्ते॒ लो॒का दे॒वता॑ भवति॒ षट्च॑॥ ४॥

((e̱ṣā hi viśvé̍ṣām de̱vānā̎m ta̱nūḥ |
yadājya̎m|
tatro̱bhayo̎rmīmā̱m̐sā |
jā̱miḥ syāt |
yadyaju̱ṣā''jya̱m yajú̍ṣā̱'pa útpunī̱yāt |
chandá̍sā̱'pa utpú̍nā̱tyajá̍mitvāya |
athó̍ mithuna̱tvāyá̍ |
sā̱vi̱tri̱yarcā |
sa̱vi̱tṛprá̍sūtam me̱ karmā̍sa̱diti̍ |
sa̱vi̱tṛprá̍sūtame̱vāsya̱ karmá̍ bhavati |

pa̱ccho gā̍yatri̱yā tri̍ḥsamṛddha̱tvāya̍ ।
a̱dbhire̱vauṣa̍dhī̱ḥ saṃna̍yati ।
oṣa̍dhībhiḥ pa̱śūn ।
paśubhi̱ryaja̍mānam ।
śu̱kraṃ tvā̍ śu̱krāyā̱ṃ jyoti̍stvā̱
jyoti̍ṣya̱rcistvā̱'rciṣītyā̍ha sarva̱tvāya̍ ।
paryā̎ptyā̱ ana̍ntarāyāya ॥ 6 ॥
ī̱kṣa̱ta̱ ā̱ha̱ śā̱ste̱ lo̱kā de̱vatā̍ bhavati̱ ṣa̱ṭca̍ ॥ 4 ॥))

**[[3-3-5-1]]**

दे॒वा॒सु॒राः संय॑त्ता आसन्।
स ए॒तमिन्द्र॒ आज्य॑स्यावका॒शम॑पश्यत्।
तेनावै॑क्षत।
ततो॑ दे॒वा अभ॑वन्।
पराऽसु॑राः।
य ए॒वं वि॒द्वानाज्य॑म॒वेक्ष॑ते।
भव॑त्या॒त्मना̎।
परा̎ऽस्य॒ भ्रातृ॑व्यो भवति।
ब्र॒ह्म॒वा॒दिनो॑ वदन्ति।
यदा॒ज्येना॒न्यानि॑ ह॒वीꣳष्य॑भिघा॒रय॑ति॥ १॥

((de̱vā̱su̱rāḥ sa̱ṃya̍ttā āsan।
sa e̱tamindra̱ ājya̍syāvakā̱śama̍paśyat ।
tenāvai̍kṣata ।
tato̍ de̱vā abha̍van ।
parā'su̍rāḥ ।
ya e̱vaṃ vi̱dvānājya̍ma̱vekṣa̍te ।
bhava̍tyā̱tmanā̎ ।
parā̎'sya̱ bhrātṛ̍vyo bhavati ।
bra̱hma̱vā̱dino̍ vadanti ।
yadājye̍nā̱nyāni̍ ha̱vīꣳṣya̍bhighā̱raya̍ti ॥ 1 ॥))

**[[3-3-5-2]]**

अथ॒ केनाज्य॒मिति॑।
स॒त्येनेति॑ ब्रूयात्।
चक्षु॑र्वै स॒त्यम्।
स॒त्येनै॒वैन॑द॒भिघा॑रयति।
ई॒श्वरो॑ वा ए॒षो॑ऽन्धो भवि॑तोः।
यश्चक्षु॒षाऽऽज्य॑म॒वेक्ष॑ते।
नि॒मील्यावे॑क्षेत।
दा॒धारा॒त्मन्चक्षु॑ः।
अ॒भ्याज्यं॑ घारयति।
आज्यं॑ गृह्णाति॥ २॥

((atha̱ kenājya̱miti̍ ।
sa̱tyeneti̍ brūyāt ।
cakṣu̱rvai sa̱tyam ।
sa̱tyenai̱vainā̍da̱bhighā̍rayati ।
ī̱śva̱ro vā e̱ṣo̍'ndho bhavi̍toḥ ।
yaścakṣu̱ṣā''jya̍ma̱vekṣa̍te ।
ni̱mīlyāve̍kṣeta ।
dā̱dhārā̱tmancakṣu̍ḥ ।
a̱bhyājya̍ṃ ghārayati ।
ājya̍ṃ gṛhṇāti ॥ 2 ॥))

**[[3-3-5-3]]**

छन्दा॑ꣳसि॒ वा आज्य॑म्।
छन्दा॑ꣳस्ये॒व प्री॑णाति।
च॒तु॒र्जु॒ह्वां गृ॑ह्णाति।
चतु॑ष्पादः प॒शव॑ः।
प॒शूने॒वाव॑रुन्धे।
अ॒ष्टावु॑पभृ॒ति॑।
अ॒ष्टाक्ष॑रा गाय॒त्री।
गा॒य॒त्रः प्रा॒णः।
प्रा॒णमे॒व प॒शुषु॑ दधाति।
च॒तु॒र्ध्रु॒वाया̎म्॥ ३॥

((chandā̍ꣳsi̱ vā ājya̍m ।
chandā̍ꣳsye̱va prī̍ṇāti ।
ca̱turju̱hvāṃ gṛ̍hṇāti ।
catu̍ṣpādaḥ pa̱śava̍ḥ ।
pa̱śūne̱vāva̍rundhe ।
a̱ṣṭāvu̍pa̱bhṛti̍ ।
a̱ṣṭākṣa̍rā gāya̱trī ।
gā̱ya̱traḥ prā̱ṇaḥ ।
prā̱ṇame̱va pa̱śuṣu̍ dadhāti ।
ca̱turdhru̱vāyā̎m ॥ 3 ॥))

**[[3-3-5-4]]**

चतु॑ष्पादः प॒शव॑ः।
प॒शुष्वे॒वोप॑रि॒ष्टात्प्रति॑तिष्ठति।
य॒ज॒मा॒न॒दे॒व॒त्या॑ वै जु॒हूः।
भ्रातृ॑व्यदे॒व॒त्यो॑प॒भृत्।
च॒तु॒र्जु॒ह्वां गृ॒ह्णन्भूयो॑ गृह्णीयात्।
अ॒ष्टावु॑पभृ॒ति॑ गृ॒ह्णन्कनी॑यः।
यज॑माना॒यै॒व भ्रातृ॑व्य॒मुप॑स्तिं करोति।
गौर्वै स्रुच॑ः।
च॒तु॒र्जु॒ह्वां गृ॑ह्णाति।
तस्मा॒च्चतु॑ष्पदी॥ ४॥

((catu̍ṣpādaḥ pa̱śava̍ḥ |
pa̱śuṣve̱vopari̍ṣṭā̱tprati̍tiṣṭhati |
ya̱jamā̱na̱de̱va̱tyā̍ vai ju̱hūḥ |
bhrā̱tṛ̱vya̱de̱va̱tyo̍pa̱bhṛt |
ca̱turju̱hvāṃ gṛ̱hṇanbhūyo̍ gṛ̱hṇīyāt |
a̱ṣṭāvu̍pa̱bhṛ̱ti gṛ̱hṇanka̱nī̍yaḥ |
yaja̍mānāya̱iva bhrātṛ̍vya̱mupa̍stiṃ karoti |
gaurvai sruca̍ḥ |
ca̱turju̱hvāṃ gṛ̍hṇāti |
tasmā̱ccatu̍ṣpadī || 4 ||))

**[[3-3-5-5]]**

अ॒ष्टावु॑प॒भृति॑।
तस्मा॑द॒ष्टाश॑फा।
च॒तुर्ध्रु॒वाया᳚म्।
तस्मा॒च्चतु॑स्स्तना।
गामे॒व तत्स॑ꣳस्क॑रोति।
साऽस्मै॒ स॑ꣳस्कृ॒ते॒ष॒मूर्जं॑ दुहे।
यज्जु॒ह्वां गृ॒ह्णाति॑।
प्र॒या॒जेभ्य॒स्तत्।
यदु॑प॒भृति॑।
प्र॒या॒जा॒नू॒या॒जेभ्य॒स्तत्।
सर्व॑स्मै॒ वा ए॒तद्य॒ज्ञाय॑ गृह्यते।
यद्ध्रु॒वाया॒माज्य॑म्॥ ५॥
अ॒भि॒घा॒रय॑ति गृह्णाति ध्रु॒वायां॑ च॒तुष्प॑दि
प्र॒याजानू॒याजेभ्य॒स्तद्द्वे च॑॥ ५॥

((a̱ṣṭāvu̍pa̱bhṛti̍ |
tasmā̍da̱ṣṭāśa̍phā |
ca̱turdhru̱vāyā̎m |
tasmā̱ccatu̍sstanā |
gāme̱va tatsa̍m̐ska̍roti |
sā'smai̱ sa̍m̐skṛ̱te̱ṣa̱mūrja̍m duhe |
yajju̱hvāṃ gṛ̱hṇāti̍ |
pra̱yā̱jebhya̱stat |
yadu̍pa̱bhṛti̍ |
pra̱yā̱jā̱nū̱yā̱jebhya̱stat |
sarva̍smai̱ vā e̱tadya̱jñāya̍ gṛhyate |
yaddhru̱vāyā̱mājya̍m || 5 ||
a̱bhi̱ghā̱raya̍ti gṛhṇāti dhru̱vāyā̱ṃ catu̍ṣpadi
prayājānūyā̱jebhya̱staddve ca̍ || 5 ||))

**[[3-3-6-1]]**

आपो॑ दे॒वीर॒ग्रे॒पु॒वो॒ अग्रे॒ गु॒व इत्या॑ह।
रू॒पमे॒वासा॑मे॒तन्म॑हि॒मानं॑ व्याच॑ष्टे।
अग्र॑ इ॒मं य॒ज्ञं न॑यता॒ग्रे॑ य॒ज्ञप॑ति॒मित्या॑ह।
अग्र॑ ए॒व य॒ज्ञं न॑यन्ति।
अग्रे॑ य॒ज्ञप॑तिम्।
यु॒ष्मानिन्द्रो॑ऽवृणीत वृत्र॒तूर्ये॑ यू॒यमिन्द्र॑मवृणीध्वं वृत्र॒तूर्य॑ इत्या॑ह।
वृ॒त्रꣳ ह॑ ह॒नि॒ष्यन्निन्द्र॒ आपो॑ वव्रे।
आपो॒ हेन्द्रं॑ वव्रिरे।
सं॒ज्ञामे॒वासा॑मे॒तत्सामा॑नं व्याच॑ष्टे।
प्रोक्षि॑ताः स्थेत्या॑ह॥ १॥

((āpo̍ devīragrepuvo agre guva̱ ityā̍ha |
rū̱pame̱vāsā̍me̱tanma̍hi̱mānaṃ vyāca̍ṣṭe |
agra̍ i̱maṃ ya̱jñaṃ na̍ya̱tāgre̍ ya̱jñapa̍ti̱mityā̍ha |
agra̍ e̱va ya̱jñaṃ na̍yanti |
agre̍ ya̱jñapa̍tim |
yu̱ṣmānindro̍'vṛṇīta vṛtra̱tūrye̍
yū̱yamindra̍mavṛṇīdhvaṃ vṛtra̱tūrya̱ ityā̍ha |
vṛ̱tram̐ ha̍ hani̱ṣyannindra̱ āpo̍ vavre |
āpo̱ hendra̍ṃ vavrire |
sa̱ṃjñāme̱vāsā̍me̱tatsāmā̍na̱ṃ vyāca̍ṣṭe |
prokṣi̍tā̱ḥ sthetyā̍ha || 1 ||))

**[[3-3-6-2]]**

तेना॒पः प्रोक्षि॑ताः।
अ॒ग्निर्दे॒वेभ्यो॒ निला॑यत।
कृ॒ष्णो॑ रू॒पं कृ॒त्वा।
स व॒न॒स्पती॒न्प्रावि॑शत्।
कृष्णो॑ऽस्याखरे॒ष्ठो॑ऽग्नये॑ त्वा॒ स्वाहेत्या॑ह।
अ॒ग्नय॑ ए॒वैनं॑ जु॒ष्टं॑ करोति।
अथो॑ अ॒ग्नेरे॒व मेध॒मव॑रुन्धे।
वेदि॑रसि ब॒र्हिषे॑ त्वा॒ स्वहेत्या॑ह।
प्र॒जा वै ब॒र्हिः।
पृ॒थि॒वी वेदि॑ः॥ २॥

((tenāpa̱ḥ prokṣi̍tāḥ |
a̱gnirde̱vebhyo̱ nilā̍yata |
kṛ̱ṣṇo̍ rū̱paṃ kṛ̱tvā |
sa vana̱spatī̱nprāvi̍śat |
kṛ̱ṣṇo̎'syākhare̱ṣṭho̎'gnaye̎ tvā̱ svāhetyā̍ha |
a̱gnaya̍ e̱vainaṃ̱ ju̱ṣṭa̍ṃ karoti |
atho̍ a̱gnere̱va medha̱mava̍rundhe |
vedi̍rasi ba̱rhiṣe̎ tvā̱ svahetyā̍ha |
pra̱jā vai ba̱rhiḥ |
pṛ̱thi̱vī vedi̍ḥ || 2 ||))

**[[3-3-6-3]]**

प्र॒जा ए॒व पृ॑थि॒व्यां प्रति॑ष्ठापयति।
ब॒र्हिर॑सि स्रु॒ग्भ्यस्त्वा॒ स्वाहेत्या॑ह।

प्र॒जा वै ब॒र्हिः।
यज॑मानः स्रु॒च॑ः।
यज॑मानमे॒व प्र॒जासु॒ प्रति॑ष्ठापयति।
दि॒वे त्वा॒ऽन्तरि॑क्षाय त्वा पृथि॒व्यै त्वेति॑ ब॒र्हिरा॒साद्य॒
प्रोक्ष॑ति।
ए॒भ्य ए॒वैना॑ँल्लो॒केभ्य॒ः प्रोक्ष॑ति।
अथ॒ तत॑ः स॒ह स्रु॒चा पु॒रस्ता᳚त्प्र॒त्यञ्च॑ं ग्र॒न्थिं प्रत्यु॑क्षति।
प्र॒जा वै ब॒र्हिः।
यथा॒ सूत्यै॑ का॒ल आप॑ः पु॒रस्ता॒द्यन्ति॑॥ ३॥

((pra̱jā e̱va pṛ̍thi̱vyāṃ prati̍ṣṭhā̱payati ।
ba̱rhira̍si sru̱gbhyastvā̱ svāhetyā̍ha ।
pra̱jā vai ba̱rhiḥ ।
yaja̍mānaḥ sruca̍ḥ ।
yaja̍mānam̱eva pra̱jāsu̱ prati̍ṣṭhāpayati ।
di̱ve tvā̱'ntari̍kṣāya tvā pṛthi̱vyai tveti̍ ba̱rhirā̱sādya̱
prokṣa̍ti ।
e̱bhya e̱vainam̐llo̱kebhya̱ḥ prokṣa̍ti ।
atha̱ tata̍ḥ sa̱ha sru̱cā pu̱rastā̎tpratyañcaṃ gra̱nthiṃ
pratyu̍kṣati ।
pra̱jā vai ba̱rhiḥ ।
yathā̱ sūtyai̍ kā̱la āpa̍ḥ pu̱rastā̱dyanti̍ ॥ 3 ॥))

**[[3-3-6-4]]**

ता॒दृगे॒व तत्।
स्व॒धा पि॒तृभ्य॒ इत्या॑ह।
स्व॒धा॒का॒रो हि पि॑तृ॒णाम्।
ऊर्ग्भ॑व ब॒र्हि॒षद्भ्य॒ इति॒ दक्षि॑णायै॒ श्रोणे॒रोत्त॑रस्यै॒ निन॑यति॒
संत॑त्यै।
मासा॒ वै पि॒तरो॑ ब॒र्हि॒षद॑ः।
मासा॑ने॒व प्री॑णाति।
मासा॒ वा ओष॑धी॒र्व॒र्धय॑न्ति।
मासा॑ः पचन्ति॒ सम॑ृद्ध्यै।
अन॑तिस्कन्दन्ह प॒र्जन्यो॑ वर्षति।
य॒त्रैतदे॒वं क्रि॒यते᳚॥ ४॥

((tā̱dṛge̱va tat।
sva̱dhā pi̱tṛbhya̱ ityā̍ha ।
sva̱dhā̱kā̱ro hi pi̍tṛ̱ṇām ।
ūrgbhā̍va barhi̱ṣadbhya̱ iti̱ dakṣi̍ṇāyai̱
śro̱ṇe̱rottā̍rasyai̱ ninā̍yati̱ saṃtā̍tyai ।
māsā̱ vai pi̱taro̍ barhi̱ṣada̍ḥ ।
māsā̍ne̱va prī̍ṇāti ।
māsā̱ vā oṣa̍dhīrva̱rdhayā̍nti ।
māsā̍ḥ pacanti̱ samṛ̍ddhyai ।
anā̍tiskandanha pa̱rjanyo̍ varṣati ।
ya̱traitade̱vaṃ kri̱yate̎ ॥ 4 ॥))

**[[3-3-6-5]]**

ऊर्जा॑ पृ॒थि॒वीं ग॑च्छ॒तेत्या॑ह।
पृ॒थि॒व्याम॒ेवोर्जं॑ दधाति।
तस्मा᳚त्पृथि॒व्या ऊ॒र्जा भु॑ञ्जते।
ग्र॒न्थिं वि॒स्र॒ꣳसयति।
प्रज॑नयत्ये॒व तत्।
ऊ॒र्ध्वं प्रा॒ञ्चमु॒द्गू॒ढं प्र॒त्यञ्च॒माय॑च्छति।
तस्मा॑त्प्रा॒चीन॒ꣳ रेतो॑ धीयते।
प्र॒तीची᳚ः प्र॒जा जा॑यन्ते।
विष्णो॒ः स्तू॒पो॒ऽसीत्या॑ह।
य॒ज्ञो वै विष्णु॑ः॥ ५॥

((ūrjā pṛ̍thi̱vīṃ ga̍ccha̱tetyā̍ha ।
pṛthi̱vyām̱evorja̍ṃ dadhāti ।
tasmā̎tpṛthi̱vyā ū̱rjā bhu̍ñjate ।
gra̱nthiṃ visraṁ̍sayati ।
praja̍nayatye̱va tat ।
ū̱rdhvaṃ prāñca̱mudgū̍ḍhaṃ pra̱tyañca̱māya̍cchati ।
tasmā̍tprā̱cīnaṁ̱ reto̍ dhīyate ।
pra̱tīcī̎ḥ pra̱jā jā̍yante ।
viṣṇo̱ḥ stūpo̱'sītyā̍ha ।
ya̱jño vai viṣṇu̍ḥ ॥ 5 ॥))

**[[3-3-6-6]]**

य॒ज्ञस्य॒ धृत्यै᳚।
पु॒रस्ता᳚त्प्रस्त॒रं गृ॑ह्णाति।
मु॒ख्य॑मे॒वैनं॑ करोति।
इय॑न्तं गृह्णाति।
प्र॒जाप॑तिना यज्ञमु॒खेन॒ संमि॑तम्।
इय॑न्तं गृह्णाति।
य॒ज्ञ॒प॒रु॒षा संमि॑तम्।
इय॑न्तं गृह्णाति।
ए॒तावद्वै पुरु॑षे वी॒र्य᳚म्।
वी॒र्य᳚संमितम्॥ ६॥

((ya̱jñasya̱ dhṛtyai̎ ।
pu̱rastā̎tprasta̱raṃ gṛ̍hṇāti ।
mukhya̍me̱vainaṃ̍ karoti ।
iya̍ntaṃ gṛhṇāti ।
pra̱jāpa̍tinā yajñamu̱khena̱ sammi̍tam ।
iya̍ntaṃ gṛhṇāti ।
ya̱jña̱pa̱ru̱ṣā̱ sammi̍tam ।

iyȧntaṃ gṛhṇāti ।
e̱tāva̱dvai puru̍ṣe vī̱ryȧm ।
vī̱ryȧsaṃmitam ॥ 6 ॥))

**[[3-3-6-7]]**

अप॑रिमितं गृह्णाति।
अप॑रिमित॒स्याव॑रुद्ध्यै।
तस्मि॑न्प॒वित्रे॒ अपि॑सृजति।
यज॑मानो॒ वै प्र॑स्त॒रः।
प्रा॒णा॒पा॒नौ प॒वित्रे॑।
यज॑मान ए॒व प्रा॑णापा॒नौ द॑धाति।
ऊर्णा॑म्रदसं त्वा स्तृणा॒मीत्या॑ह।
य॒था॒य॒जुरे॒वैतत्।
स्वा॒स॒स्थं दे॒वेभ्य॒ इत्या॑ह।
दे॒वेभ्य॑ ए॒वैन॑त्स्वास॒स्थं क॑रोति॥ ७॥

((apȧrimitaṃ gṛhṇāti ।
apȧrimita̱syāvȧruddhyai ।
tasmi̍npa̱vitre̱ api̍sṛjati ।
yajȧmāno̱ vai prȧsta̱raḥ ।
prā̱ṇā̱pā̱nau pa̱vitre̍ ।
yajȧmāna e̱va prȧṇāpā̱nau dȧdhāti ।
ūrṇȧmradasaṃ tvā stṛṇā̱mītyȧha ।
ya̱thā̱ya̱jure̱vaitat ।
svā̱sa̱sthaṃ de̱vebhya̱ ityȧha ।
de̱vebhyȧ e̱vainȧtsvāsa̱sthaṃ kȧroti ॥ 7 ॥))

**[[3-3-6-8]]**

ब॒र्हिः स्तृ॑णाति।
प्र॒जा वै ब॒र्हिः।
पृ॒थि॒वी वे॒दिः।
प्र॒जा ए॒व पृ॑थि॒व्यां प्रति॑ष्ठापयति।
अन॑तिदृश्नꣳ स्तृणाति।
प्र॒जयै॒वैनं॑ प॒शुभि॒रन॑तिदृश्नं करोति।
धा॒रय॑न्प्रस्त॒रं परि॒धीन्परि॑दधाति।
यज॑मानो॒ वै प्र॑स्त॒रः।
यज॑मान ए॒व तत्स्व॒यं परि॒धीन्परि॑दधाति।
ग॒न्ध॒र्वो॑ऽसि वि॒श्वाव॑सु॒रित्या॑ह॥ ८॥

((ba̱rhiḥ stṛ̍ṇāti ।
pra̱jā vai ba̱rhiḥ ।
pṛ̱thi̱vī ve̱diḥ ।
pra̱jā e̱va pṛ̍thi̱vyāṃ prati̍ṣṭhāpayati ।
anȧtidṛśnam̐ stṛṇāti ।
pra̱jaya̱ivainaṃ̍ pa̱śubhi̱ranȧtidṛśnaṃ karoti ।
dhā̱raya̍nprasta̱raṃ pa̍ri̱dhīnpari̍dadhāti ।
yajȧmāno̱ vai prȧsta̱raḥ ।
yajȧmāna e̱va tatsva̱yaṃ pa̍ri̱dhīnpari̍dadhāti ।
ga̱ndha̱rvȯ'si vi̱śvāvȧsu̱rityȧha ॥ 8 ॥))

**[[3-3-6-9]]**

विश्व॑मे॒वायु॒र्यज॑माने दधाति।
इन्द्र॑स्य बा॒हुर॑सि॒ दक्षि॑ण॒ इत्या॑ह।
इ॒न्द्रि॒यमे॒व यज॑माने दधाति।
मि॒त्रावरु॑णौ त्वोत्तर॒तः परि॑धत्ता॒मित्या॑ह।
प्रा॒णा॒पा॒नौ मि॒त्रावरु॑णौ।
प्रा॒णा॒पा॒नावे॒वास्मि॑न्दधाति।
सूर्य॑स्त्वा पु॒रस्ता॑त्पा॒त्वित्या॑ह।
रक्ष॑सामप॑हत्यै।
कस्या॑श्चिद॒भिश॑स्त्या॒ इत्या॑ह।
अप॑रिमिताद॒वैनं॑ पाति॥ ९॥

((viśvȧme̱vāyu̱ryajȧmāne dadhāti ।
indrȧsya bā̱hurȧsi̱ dakṣi̍ṇa̱ ityȧha ।
i̱ndri̱yame̱va yajȧmāne dadhāti ।
mi̱trāvarȯṇau tvottara̱taḥ pari̍dhattā̱mityȧha ।
prā̱ṇā̱pā̱nau mi̱trāvarȯṇau ।
prā̱ṇā̱pā̱nāve̱vāsmi̍ndadhāti ।
sūryȧstvā pu̱rastȧtpā̱tvityȧha ।
rakṣȧsā̱mapȧhatyai ।
kasyȧścida̱bhiśȧstyā̱ ityȧha ।
apȧrimitāde̱vainaṃ̍ pāti ॥ 9 ॥))

**[[3-3-6-10]]**

वी॒ति॒हो॑त्रं त्वा कव॒ इत्या॑ह।
अ॒ग्निमे॒व हो॒त्रेण॒ सम॑र्धयति।
द्यु॒मन्त॒ꣳ समि॑धीमहीत्या॑ह॒ समि॑द्ध्यै।
अग्ने॑ बृहन्त॑मध्व॒र इत्या॑ह॒ वृद्ध्यै॑।
वि॒शो य॒न्त्रे स्थ॒ इत्या॑ह।
वि॒शां यत्यै॑।
उ॒दी॒ची॒ना॑ग्रे निद॑धाति प्रति॑ष्ठित्यै।
वसू॑नाꣳ रु॒द्राणा॑मादि॒त्याना॒ꣳ सद॑सि सी॒दे॒त्या॑ह।
दे॒वता॑नामे॒व सद॑ने प्रस्त॒रꣳ सा॑दयति।
जु॒हूर॑सि घृ॒ताची॒ नाम्नेत्या॑ह॥ १०॥

((vī̱tihȯtraṃ tvā kava̱ ityȧha ।
a̱gnime̱va ho̱treṇa̱ samȧrdhayati ।
dyu̱manta̱m̐ sami̍dhīma̱hītyȧha̱ sami̍ddhyai ।
agnė bṛhantȧmadhva̱ra ityȧha̱ vṛddhyai̍ ।
vi̱śo ya̱ntre stha̱ ityȧha ।

viśāṃ yatyai |
udīcīnāgre nidadhāti pratiṣṭhityai |
vasūnāṃ rudrāṇāmādityānāṃ sadasi sīdetyāha |
devatānāmeva sadane prastaraṃ sādayati |
juhūrasi ghṛtācī nāmnetyāha || 10 ||))

**[[3-3-6-11]]**

असौ वै जुहूः।
अन्तरिक्षमुपभृत्।
पृथिवी ध्रुवा।
तासामेतदेव प्रियं नाम।
यद्घृताचीति।
यद्घृताचीत्याह।
प्रियेणैवैना नाम्ना सादयति।
एता असदन्त्सुकृतस्य लोक इत्याह।
सत्यं वै सुकृतस्य लोकः।
सत्य एवैनाः सुकृतस्य लोके सादयति।
ता विष्णो पाहीत्याह।
यज्ञो वै विष्णुः।
यज्ञस्य धृत्यै।
पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञनियमित्याह।
यज्ञाय यजमानायात्मने।
तेभ्य एवाशिषमाशास्तेऽनार्त्यै॥ ११॥
स्थेत्याह पृथिवी वेदिर्यन्ति क्रियते विष्णिवीर्यसंमितं करोत्याह पाति नाम्नेत्याह लोके सादयति षट्च॥ ६॥

((asau vai juhūḥ |
antarikṣamupabhṛt |
pṛthivī dhruvā |
tāsāmetadeva priyaṃ nāma |
yadghṛtācīti |
yadghṛtācītyāha |
priyeṇaivainā nāmnā sādayati |
etā asadantsukṛtasya loka ityāha |
satyaṃ vai sukṛtasya lokaḥ |
satya evaināḥ sukṛtasya loke sādayati |
tā viṣṇo pāhītyāha |
yajño vai viṣṇuḥ |
yajñasya dhṛtyai |
pāhi yajñaṃ pāhi yajñapatiṃ pāhi māṃ yajñaniyamityāha |
yajñāya yajamānāyātmane |
tebhya evāśiṣamāśāste'nārtyai || 11 ||
sthetyāha pṛthivī vediryanti kriyate viṣṇivīryasaṃmitaṃ karotyāha pāti nāmnetyāha loke sādayati ṣaṭca || 6 ||))

**[[3-3-7-1]]**

अग्निना वै होत्रा।
देवा असुरानभ्यभवन्।
अग्नये समिध्यमानायानुब्रूहीत्याह भ्रातृव्याभिभूत्यै।
एकविꣳशतिमिध्मदारूणि भवन्ति।
एकविꣳशो वै पुरुषः।
पुरुषस्याप्त्यै।
पञ्चदशेध्मदारूण्यभ्यादधाति।
पञ्चदश वा अर्धमासस्य रात्रयः।
अर्धमासशः संवत्सर आप्यते।
त्रीन्परिधीन्परिदधाति॥ १॥

((agninā vai hotrā |
devā asurānabhyabhavan |
agnaye samiddhyamānāyānubrūhītyāha bhrātṛvyābhibhūtyai |
ekaviṃśatimidhmadārūṇi bhavanti |
ekaviṃśo vai puruṣaḥ |
puruṣasyāptyai |
pañcadaśedhmadārūṇyabhyādadhāti |
pañcadaśa vā ardhamāsasya rātrayaḥ |
ardhamāsaśaḥ saṃvatsara āpyate |
trīnparidhīnparidadhāti || 1 ||))

**[[3-3-7-2]]**

ऊर्ध्वे समिधावादधाति।
अनूयाजेभ्यः समिधमतिशिनष्टि।
षट्सम्पद्यन्ते।
षड्वा ऋतवः।
ऋतूनेव प्रीणाति।
वेदेनोपवाजयति।
प्राजापत्यो वै वेदः।
प्राजापत्यः प्राणः।
यजमान आहवनीयः।
यजमान एव प्राणं दधाति॥ २॥

((ūrdhve samidhāvādadhāti |
anūyājebhyaḥ samidhamatiśinaṣṭi |
ṣaṭsampadyante |
ṣaḍvā ṛtavaḥ |
ṛtūneva prīṇāti |
vedenopavājayati |
prājāpatyo vai vedaḥ |
prājāpatyaḥ prāṇaḥ |
yajamāna āhavanīyaḥ |

yaja̍māna e̱va prā̱ṇam̱ da̍dhāti || 2 ||))

**[[3-3-7-3]]**

त्रिरु॒प॑वाजयति।
त्र॒यो॒ वै प्रा॒णाः।
प्रा॒णाने॒वास्मि॑न्दधाति।
वे॒देनो॑प॒यत्य॑ स्रु॒वेण॑ प्राजाप॒त्यमा॑घा॒रमाघा॑रयति।
य॒ज्ञो वै प्र॒जाप॑तिः।
य॒ज्ञमे॒व प्र॒जाप॑तिं मुख॒त आर॑भते।
अथो᳚ प्र॒जाप॑ति॒ः सर्वा᳚ दे॒वता᳚ः।
सर्वा᳚ ए॒व दे॒वता᳚ः प्रीणाति।
अ॒ग्निम॑ग्नी॒त्त्रिस्त्रि॒ः संमृ॒ड्ढीत्या॑ह।
त्र्या॑वृ॒द्धि य॒ज्ञः॥ ३॥

((trirupa̍vājayati |
traya̱ vai prā̱ṇāḥ |
prā̱ṇāne̱vāsmi̍ndadhāti |
ve̱denópa̱yatya̍ sru̱veṇa̍
prājāpa̱tyamā̍ghā̱ramāghā̍rayati |
ya̱jño vai pra̱jāpa̍tiḥ |
ya̱jñame̱va pra̱jāpa̍tim̱ mukha̱ta āra̍bhate |
athő pra̱jāpa̍ti̱ḥ sarva̍ de̱vatā̎ḥ |
sarva̍ e̱va de̱vatā̎ḥ prīṇāti |
a̱gnima̍gnī̱ttristri̱ḥ sam̱mṛ̱dhḍhītyā̍ha |
tryā̍vṛ̱ddhi ya̱jñaḥ || 3 ||))

**[[3-3-7-4]]**

अथो॒ रक्ष॑सा॒मप॑हत्यै।
प॒रि॒धीन्त्संमा᳚र्ष्टि।
पु॒नात्ये॒वैना॑न्।
त्रिस्त्रि॒ः संमा᳚र्ष्टि।
त्र्या॑वृ॒द्धि य॒ज्ञः।
अथो॑ मेध्य॒त्वाय॑।
अथो॑ ए॒ते वै दे॑वा॒श्वाः।
दे॒वा॒श्वाने॒व तत्संमा᳚र्ष्टि।
सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै।
आसी॑नो॒ऽन्यमा॑घा॒रमाघा॑रयति॥ ४॥

((atho̱ rakṣa̍sā̱mapa̍hatyai |
pa̱ri̱dhīntsam̱mā̎rṣṭi̱ |
pu̱nātye̱vainā̍n |
tristri̱ḥ sam̱mā̎rṣṭi̱ |
tryā̍vṛ̱ddhi ya̱jñaḥ |
athȯ medhya̱tvāyȧ |
athȯ e̱te vai de̍vā̱śvāḥ |
de̱vā̱śvāne̱va tatsam̱mā̎rṣṭi̱ |
su̱va̱rgasya̍ lo̱kasya̱ samȧṣṭyai |
āsī̍no̱'nyamā̍ghā̱ramāghā̍rayati || 4 ||))

**[[3-3-7-5]]**

तिष्ठ॑न्न॒न्यम्।
यथाऽनो॑ वा॒ रथं॑ वा यु॒ञ्ज्यात्।
ए॒वमे॒व तद॑ध्व॒र्युर्य॒ज्ञं यु॑नक्ति।
सु॒व॒र्गस्य॑ लो॒कस्या॒भ्यू᳚ढ्यै।
वह॑न्त्येनं ग्रा॒म्याः प॒शव॑ः।
य ए॒वं वेद॑।
भुव॑नमसि॒ विप्र॑थ॒स्वेत्या॑ह।
य॒ज्ञो वै भुव॑नम्।
य॒ज्ञ ए॒व यज॑मानं प्र॒जया॑ प॒शुभि॑ः प्रथयति।
अग्ने॒ यष्ट॑रि॒दं नम॒ इत्या॑ह॥ ५॥

((tiṣṭha̍nna̱nyam |
yathā'no̍ vā̱ ratham̍ vā yu̱ñjyāt |
e̱vame̱va tada̍dhva̱ryurya̱jñam̱ yu̍nakti |
su̱va̱rgasya̍ lo̱kasyā̱bhyū̎ḍhyai |
vaha̍ntyenam̱ grā̱myāḥ pa̱śava̍ḥ |
ya e̱vam̱ veda̍ |
bhuva̍namasi̱ vipra̍tha̱svetyā̍ha |
ya̱jño vai bhuva̍nam |
ya̱jña e̱va yaja̍mānam̱ pra̱jayā̍ pa̱śubhi̍ḥ prathayati |
agne̱ yaṣṭa̍ri̱dam̱ nama̱ ityā̍ha || 5 ||))

**[[3-3-7-6]]**

अ॒ग्निर्वै दे॒वाना॒ं यष्टा᳚।
य ए॒व दे॒वाना॒ं यष्टा᳚।
तस्मा॑ ए॒व नम॑स्करोति।
जु॒ह्वेह्य॒ग्निस्त्वा᳚ ह्वयति देवय॒ज्याया॒ उप॑भृ॒देहि॑ दे॒वस्त्वा॑
स॒विता ह्व॑यति देवय॒ज्याया॒ इत्या॑ह।
आ॒ग्नेयी वै जु॒हूः।
सा॒वि॒त्र्यु॑पभृत्।
ताभ्या॑मे॒वैने॒ प्रसू॑त॒ आद॑त्ते।
अग्ना॑विष्णू मा वा॒मव॑क्रमिष॒मित्या॑ह।
अ॒ग्निः पु॒रस्ता᳚त्।
विष्णु॒र्य॒ज्ञः प॒श्चात्॥ ६॥

((a̱gnirvai de̱vānā̱m̱ yaṣṭā̎ |
ya e̱va de̱vānā̱m̱ yaṣṭā̎ |
tasmā̍ e̱va namȧskaroti |
juhvehya̱gnistvā̎ hvayati devaya̱jyāyā̱ upa̍bhṛ̱dehi̍

devastva̍ savi̱tā hva̍yati devaya̱jyāyā̱ ityā̍ha |
ā̱gne̱yī vai ju̱hūḥ |
sā̱vi̱tryu̍pa̱bhṛt |
tābhyā̍me̱vaine̱ prasū̍ta̱ āda̍tte |
agnā̍viṣṇū̱ mā vā̱mava̍kramiṣa̱mityā̍ha |
a̱gniḥ pu̱rastā̎t |
viṣṇu̍rya̱jñaḥ pa̱ścāt || 6 ||))

**[[3-3-7-7]]**

ताभ्या॑मे॒व प्रति॑प्रोच्या॒त्याक्रा॑मति।
विजि॑हाथां॒ मा मा॒ संता॒प्त॒मित्या॒हाहि॑ꣳसायै।
लो॒कं मे॑ लोककृतौ कृणुत॒मित्या॑ह।
आ॒शिष॑मे॒वैतामाशा॑स्ते।
विष्णो॒ः स्थान॑म॒सीत्या॑ह।
य॒ज्ञो वै विष्णु॑ः।
ए॒तत्खलु॒ वै दे॒वाना॒मप॑राजितमा॒यत॑नम्।
यद्य॒ज्ञः।
दे॒वाना॑मे॒वाप॑राजित आ॒यत॑ने तिष्ठति।
इ॒त इन्द्रो॑ अकृ॒णोद्वी॒र्या॑णीत्या॑ह॥ ७॥

((tābhyā̍me̱va pra̍ti̱procyā̱tyākrā̍mati |
viji̍hāthā̱ṃ mā mā̱ saṃtā̱pta̱mityā̱hāhi̍ṃsāyai |
lo̱kaṃ me̍ lokakṛtau kṛṇuta̱mityā̍ha |
ā̱śiṣa̍me̱vaitāmāśā̍ste |
viṣṇo̱ḥ sthāna̍ma̱sītyā̍ha |
ya̱jño vai viṣṇu̍ḥ |
e̱tatkhalu̱ vai de̱vānā̱mapa̍rājitamā̱yata̍nam |
yadya̱jñaḥ |
de̱vānā̍me̱vāpa̍rājita ā̱yata̍ne tiṣṭhati |
i̱ta indro̍ akṛ̱ṇodvī̱ryā̍ṇītyā̍ha || 7 ||))

**[[3-3-7-8]]**

इ॒न्द्रि॒यमे॒व यज॑माने दधाति।
स॒मा॒रभ्यो॒र्ध्वो अ॑ध्व॒रो दि॑वि॒स्पृश॒मित्या॑ह॒ वृध्यै॑।
आ॒घा॒रमा॑घा॒र्यमा॑ण॒मनु॑ स॒मा॒रभ्य॑।
ए॒तस्मि॒न्का॒ले दे॒वाः सु॑व॒र्गं लो॒कमा॑यन्।
सा॒क्षाद्दे॒व यज॑मानः सुव॒र्गं लो॒कमे॑ति।
अथो॒ समृ॑द्धेनै॒व य॒ज्ञेन॒ यज॑मानः सुव॒र्गं लो॒कमे॑ति।
अह्रु॑तो य॒ज्ञो य॒ज्ञप॑ते॒रित्या॒हाना॑र्त्यै।
इन्द्रा॑वा॒न्त्स्वाहेत्या॑ह।
इ॒न्द्रि॒यमे॒व यज॑माने दधाति।
बृ॒हद्भा इत्या॑ह॥ ८॥

((i̱ndri̱yame̱va yaja̍māne dadhāti |
sa̱mā̱rabhyo̱rdhvo a̍dhva̱ro di̍vi̱spṛśa̱mityā̍ha̱ vṛddhyai̎ |
ā̱ghā̱ramā̍ghā̱ryamā̍ṇa̱manu̍ sa̱mā̱rabhya̍ |
e̱tasmi̍nkā̱le de̱vāḥ su̍va̱rgaṃ lo̱kamā̍yan |
sā̱kṣāde̱va yaja̍mānaḥ suva̱rgaṃ lo̱kame̍ti |
atho̱ sami̍ddhenai̱va ya̱jñena̱ yaja̍mānaḥ suva̱rgaṃ lo̱kame̍ti |
ahru̍to ya̱jño ya̱jñapa̍te̱rityā̱hānā̍rtyai |
indrā̍vā̱ntsvāhetyā̍ha |
i̱ndri̱yame̱va yaja̍māne dadhāti |
bṛ̱hadbhā ityā̍ha || 8 ||))

**[[3-3-7-9]]**

सु॒व॒र्गो वै लो॒को बृ॒हद्भाः।
सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै।
य॒ज॒मा॒न॒दे॒व॒त्या॑ वै जु॒हूः।
भ्रा॒तृ॒व्य॒दे॒व॒त्यो॑प॒भृत्।
प्रा॒ण आ॑घा॒रः।
यत्सꣳ॑स्प॒र्शये॑त्।
भ्रातृ॑व्येऽस्य प्रा॒णं द॑ध्यात्।
अस॒ꣳ॑स्प॒र्शय॑न्न॒त्याक्रा॑मति।
यज॑मान॒ ए॒व प्रा॒णं द॑धाति।
पा॒हि मा॑ऽग्ने॒ दुश्च॑रिता॒दामा॒ सुच॑रिते भ॒जेत्या॑ह॥ ९॥

((su̱va̱rgo vai lo̱ko bṛ̱hadbhāḥ |
su̱va̱rgasya̍ lo̱kasya̱ sama̍ṣṭyai |
ya̱ja̱mā̱na̱de̱va̱tyā̍ vai ju̱hūḥ |
bhrā̱tṛ̱vya̱de̱va̱tyo̍pa̱bhṛt |
prā̱ṇa ā̍ghā̱raḥ |
yatsa̍ṃspa̱rśaye̎t |
bhrātṛ̍vye'sya prā̱ṇaṃ da̍dhyāt |
asa̍ṃspa̱rśayanna̱tyākrā̍mati |
yaja̍māna e̱va prā̱ṇaṃ da̍dhāti |
pā̱hi mā̍'gne̱ duśca̍ritā̱dāmā̱ sucā̍rite bha̱jetyā̍ha || 9 ||))

**[[3-3-7-10]]**

अ॒ग्निर्वाव॑ प॒वित्र॑म्।
वृ॒जि॒नमनृ॑तं दु॒श्च॑रितम्।
ऋ॒जु॒कर्मꣳ॑ स॒त्यꣳ॑ सु॒च॑रितम्।
अ॒ग्निरे॒वैनं॑ वृ॒जि॒नाम॒नृ॒ताद्दु॒श्च॑रितात्पाति।
ऋ॒जु॒क॒र्मे स॒त्ये सु॒च॑रिते भजति।
तस्मा॑दे॒वमाशा॑स्ते।
आ॒त्मनो॑ गोपी॒थाय॑।
शिरो॒ वा ए॒तद्य॒ज्ञस्य॑।
यदा॑घा॒रः।

आ॒त्मा ध्रु॒वा॥ १०॥

((a̱gnirvāva pa̱vitrā̍m̐ I
vṛ̱ji̱namanṛ̍tam̱ duśca̍ritam I
ṛ̱ju̱ka̱rmam̐ sa̱tyam̐ suca̍ritam I
a̱gnire̱vainam̍ vṛ̱ji̱nāmanṛ̍tā̱dduśca̍ritātpāti I
ṛ̱ju̱ka̱rme sa̱tye suca̍rite bhajati I
tasmā̍de̱vamāśā̎ste I
ā̱tmano̍ gopī̱thāya̍ I
śiro̱ vā e̱tadya̱jñasya̍ I
yadā̍ghā̱raḥ I
ā̱tmā dhru̱vā II 10 II))

**[[3-3-7-11]]**

आ॒घा॒रमा॒घार्य॑ ध्रु॒वा᳚ꣳ सम॑नक्ति।
आ॒त्मन्ने॒व य॒ज्ञस्य॒ शिर॑ः प्रति॑दधाति।
द्विः सम॑नक्ति।
द्वौ हि प्रा॑णापा॒नौ।
तदा॑हुः।
त्रिरे॒व सम॑ञ्ज्यात्।
त्रिधा॑तु॒ हि शिर॒ इति॑।
शिर॑ इवै॒तद्य॒ज्ञस्य॑।
अथो॒ त्रयो॒ वै प्रा॒णाः।
प्रा॒णाने॒वास्मि॑न्दधाति।
म॒खस्य॒ शिरो॑ऽसि॒ सं ज्योति॑षा॒ ज्योति॑रङ्क्ता॒मित्या॑ह।
ज्योति॑रे॒वास्मा॑ उ॒परि॑ष्टाद्दधाति।
सु॒व॒र्गस्य॑ लो॒कस्यानु॑ख्यात्यै॥ ११॥
परि॑दधाति प्रा॒णं द॑धाति॒ हि य॒ज्ञो घा॑रयति॒ नम॒ इत्या॑ह
प॒श्चाद्वी॒र्या॑णीत्या॑ह॒ भा इत्या॑ह भ॒जेत्या॑ह
ध्रु॒वैवास्मि॑न्दधाति॒ त्रीणि॑ च॥ ७॥

((ā̱ghā̱ramā̱ghārya̍ dhru̱vām̐ sama̍nakti I
ā̱tmanne̱va ya̱jñasya̱ śira̍ḥ prati̍dadhāti I
dviḥ sama̍nakti I
dvau hi prā̍ṇāpā̱nau I
tadā̍huḥ I
trire̱va sama̍ñjyāt I
tridhā̍tu̱ hi śira̱ iti̍ I
śira̍ ivai̱tadya̱jñasya̍ I
atho̱ trayo̱ vai prā̱ṇāḥ I
prā̱ṇāne̱vāsmi̍ndadhāti I
ma̱khasya̱ śiro̍'si̱ saṃ jyoti̍ṣā̱ jyoti̍raṅktā̱mityā̍ha I
jyoti̍re̱vāsmā̍ u̱pari̍ṣṭāddadhāti I
su̱va̱rgasya̍ lo̱kasyānu̍khyātyai II 11 II
pari̍dadhāti prā̱ṇam̱ da̍dhāti̱ hi ya̱jño ghā̍rayati̱ nama̱ ityā̍ha pa̱ścādvī̱ryā̍ṇītyā̍ha̱ bhā ityā̍ha bha̱jetyā̍ha dhru̱vaivāsmi̍ndadhāti̱ trīṇi̍ ca II 7 II))

**[[3-3-8-1]]**

धि॒ष्णि॑या॒ वा ए॒ते न्यु॑प्यन्ते।
यद्ब्र॒ह्मा।
यद्धोता᳚।
यद॑ध्व॒र्युः।
यद॒ग्नीत्।
यद्यज॑मानः।
तान्यद॑न्तरे॒यात्।
यज॑मानस्य प्रा॒णान्त्संक॑र्षेत्।
प्र॒मायु॑कः स्यात्।
पु॒रो॒डा॒शम॑प॒गृह्य॒ संच॑रत्यध्व॒र्युः॥ १॥

((dhiṣṇi̍yā̱ vā e̱te nyu̍pyante I
yadbra̱hmā I
yaddhotā̎ I
yada̍dhva̱ryuḥ I
yada̱gnītI
yadyaja̍mānaḥ I
tānyada̍ntare̱yāt I
yaja̍mānasya prā̱ṇāntsaṃka̍rṣet I
pra̱māyu̍kaḥ syāt I
pu̱ro̱ḍā̱śama̍pa̱gṛhya̱ saṃca̍ratyadhva̱ryuḥ II 1 II))

**[[3-3-8-2]]**

यज॑मानायै॒व तल्लो॒कꣳ शि॑ꣳषति।
नास्य॑ प्रा॒णान्त्संक॑र्षति।
न प्र॒मायु॑को भवति।
पु॒रस्ता᳚त्प्र॒त्यङ्ङासी॑नः।
इडा॑या॒ इडा॒माद॑धाति।
ह॒स्त्या᳚ꣳ होत्रे᳚।
प॒शवो॒ वा इडा᳚।
प॒शवः॒ पुरु॑षः।
प॒शुष्वे॒व प॒शून्प्रति॑ष्ठापयति।
इडा॑यै॒ वा ए॒षा प्रजा॑तिः॥ २॥

((yaja̍mānāyai̱va tallo̱kam̐ śi̍m̐ṣati I
nāsya̍ prā̱ṇāntsaṃka̍rṣati I
na pra̱māyu̍ko bhavati I
pu̱rastā̎tpra̱tyaṅṅāsī̍naḥ I
iḍā̍yā̱ iḍā̱mādā̍dhāti I
ha̱styā̱m̐ hotre̎ I
pa̱śavo̱ vā iḍā̎ I
pa̱śava̱ḥ puru̍ṣaḥ I
pa̱śuṣve̱va pa̱śūnprati̍ṣṭhāpayati I
iḍā̍yai̱ vā e̱ṣā prajā̍tiḥ II 2 II))

[[3-3-8-3]]

तां प्रजा॑तिं॒ यज॑मा॒नोऽनु॑ प्रजा॑यते।
द्विर॑ङ्गु॒ला॑वनक्ति॒ पर्व॑णोः।
द्वि॒पाद्यज॑मानः॒ प्रति॑ष्ठित्यै।
स॒कृदु॒प॑स्तृणाति।
द्विरा॑दधाति।
स॒कृद॒भिघा॑रयति।
च॒तुः संप॑द्यते।
च॒त्वारि॒ वै प॒शोः प्र॑ति॒ष्ठाना॑नि।
याव॑ाने॒व प॒शुः।
तमुप॑ह्वयते॥ ३॥

((tāṃ prajātiṃ yajámāno'nu prajāyate ।
dviraṅgulāvanakti parvaṇoḥ ।
dvipādyajámānaḥ pratiṣṭhityai ।
sakṛdupástṛṇāti ।
dvirādádhāti ।
sakṛdabhighārayati ।
catuḥ sampádyate ।
catvāri vai paśoḥ prátiṣṭhānāni ।
yāváneva paśuḥ ।
tamupáhvayate ॥ 3 ॥))

[[3-3-8-4]]

मु॒ख॑मिव॒ प्रत्युप॑ह्वयेत।
सं॒मु॒खाने॒व प॒शूनुप॑ह्वयते।
प॒शवो॒ वा इडा॑।
तस्मा॒त्साऽन्वा॒रभ्या॑।
अ॒ध्व॒र्युणा॑ च॒ यज॑मानेन च।
उप॑हूतः पशु॒मान॑सा॒नीत्या॑ह।
उप॒ ह्येनौ॒ ह्वय॑ते॒ होता॑।
इडा॑यै दे॒वता॑नामुपह॒वे।
उप॑हूतः पशु॒मान्भ॑वति।
य ए॒वं वेद॑॥ ४॥

((mukhámiva pratyupáhvayeta ।
sammukhāneva paśūnupáhvayate ।
paśavo vā iḍā ।
tasmātsā'nvārabhyā ।
adhvaryuṇā ca yajámānena ca ।
upáhūtaḥ paśumānásānītyāha ।
upa hyénau hvayáte hotā ।
iḍāyai devatānāmupahave ।
upáhūtaḥ paśumānbhávati ।
ya evaṃ vedá ॥ 4 ॥))

[[3-3-8-5]]

यां वै ह॒स्त्या॒मिडा॑मा॒दधा॑ति।
वा॒चः सा भा॑ग॒धेय॑म्।
यामु॑प॒ह्वय॑ते।
प्रा॒णाना॒ꣳ सा।
वाचं॑ चै॒व प्रा॒णाꣳश्चाव॑रुन्धे।
अथ॒ वा ए॒तर्ह्युप॑हूताया॒मिडा॑याम्।
पु॒रो॒डाश॑स्यै॒व ब॒र्हि॒षदो॑ मीमा॒ꣳसा।
यज॑मानं दे॒वा अ॑ब्रुवन्।
ह॒विर्नो॑ नि॒र्वपेति॑।
नाहम॑भा॒गो निर्व॑प्स्या॒मीत्य॑ब्रवीत्॥ ५॥

((yāṃ vai hastyāmiḍāmādadhāti ।
vācaḥ sā bhāgadheyām ।
yāmúpahvayáte ।
prāṇānāṃ sā ।
vācaṃ caiva prāṇāṃścāvárundhe ।
atha vā etarhyupáhūtāyāmiḍāyām ।
puroḍāśásyaiva bárhiṣadó mīmāṃsā ।
yajámānaṃ devā ábruvan ।
havirno nirvapetí ।
nāhamábhāgo nirvápsyāmītyábravīt ॥ 5 ॥))

[[3-3-8-6]]

न मया॑ऽभागयाऽनु॑ वक्ष्य॒थेति॒ वाग॑ब्रवीत्।
नाहम॑भा॒गा पु॑रोऽनुवा॒क्या॑ भविष्या॒मीति॑ पुरोऽनुवा॒क्या॑।
नाहम॑भा॒गा या॒ज्या॑ भविष्या॒मीति॑ या॒ज्या॑।
न मया॑ भा॒गेन॒ वष॑ट्करिष्य॒थेति॑ वषट्का॒रः।
यद्य॑जमानभा॒गं नि॒धाय॑ पु॒रो॒डाश॑ं ब॒र्हि॒षदं॑ क॒रोति॑।
ता॒नेव तद्भा॒गिनः॑ करोति।
च॒तु॒र्धा क॑रोति।
चत॑स्रो॒ दिशः॑।
दि॒क्ष्वे॑व प्रति॑तिष्ठति।
ब॒र्हि॒षदं॑ करोति॥ ६॥

((na mayā'bhāgayā'nú vakṣyatheti vāgábravīt ।
nāhamábhāgā púro'nuvākyā bhaviṣyāmītí puro'nuvākyā ।
nāhamábhāgā yājyā bhaviṣyāmītí yājyā ।
na mayā bhāgena vaṣáṭkariṣyatheti vaṣaṭkāraḥ ।
yadyájamānabhāgaṃ nidhāyá puroḍāśaṃ barhiṣadaṃ karotí ।
tāneva tadbhāginávḥ karoti ।

caturdhā karoti |
catasro diśaḥ |
dikṣveva pratitiṣṭhati |
barhiṣadaṃ karoti || 6 ||))

**[[3-3-8-7]]**

यजमानो वै पुरोडाशः।
प्रजा बर्हिः।
यजमानमेव प्रजासु प्रतिष्ठापयति।
तस्मादस्थ्नाऽन्याः प्रजाः प्रतितिष्ठन्ति।
मा॒ꣳसेना॒न्याः।
अथो खल्वाहुः।
दक्षिणा वा एता हविर्यज्ञस्याँन्तर्वेद्यवरुध्यन्ते।
यत्पुरोडाशं बर्हिषदं करोतीति।
चतुर्धा करोति।
चत्वारो ह्येते हविर्यज्ञस्यर्त्विजः॥ ७॥

((yajamāno vai puroḍāśaḥ |
prajā barhiḥ |
yajamānameva prajāsu pratiṣṭhāpayati |
tasmādasthnā'nyāḥ prajāḥ pratitiṣṭhanti |
māṃsenānyāḥ |
atho khalvāhuḥ |
dakṣiṇā vā etā haviryajñasyāntarvedyavarudhyante |
yatpuroḍāśaṃ barhiṣadaṃ karotīti |
caturdhā karoti |
catvāro hyete haviryajñasyartvijaḥ || 7 ||))

**[[3-3-8-8]]**

ब्रह्मा होताँऽध्वर्युरग्नीत्।
तमभिमृशेत्।
इदं ब्रह्मणः।
इदꣳ होतुः।
इदमध्वर्योः।
इदमग्नीध इति।
यथैवादः सौम्येँऽध्वरे।
आदेशमृत्विग्भ्यो दक्षिणा नीयन्तेँ।
तादृगेव तत्।
अग्नीधेँ प्रथमाया दधाति॥ ८॥

((brahmā hotā'dhvaryuragnīt |
tamabhimṛśet |
idaṃ brahmaṇaḥ |
idaṃ hotuḥ |
idamadhvaryoḥ |
idamagnīdha iti |
yathaivādaḥ saumye'dhvare |
ādeśamṛtvigbhyo dakṣiṇā nīyante |
tādṛgeva tat |
agnīdhe prathamāyā dadhāti || 8 ||))

**[[3-3-8-9]]**

अग्निमुखा ह्यृद्धिः।
अग्निमुखामेवर्द्धिं यजमान ऋध्नोति।
सकृदुपस्तीर्य द्विरादधत्।
उपस्तीर्य द्विरभिघारयति।
षट् संपद्यन्ते।
षड्वा ऋतवः।
ऋतूनेव प्रीणाति।
वेदेन ब्रह्मणेँ ब्रह्मभागं परिहरति।
प्राजापत्यो वै वेदः।
प्राजापत्यो ब्रह्मा॥ ९॥

((agnimukhā hyṛddhiḥ |
agnimukhāmeverddhiṃ yajamāna ṛdhnoti |
sakṛdupastīrya dvirādadhat |
upastīrya dvirabhighārayati |
ṣaṭ saṃpadyante |
ṣaḍvā ṛtavaḥ |
ṛtūneva prīṇāti |
vedena brahmaṇe brahmabhāgaṃ pariharati |
prājāpatyo vai vedaḥ |
prājāpatyo brahmā || 9 ||))

**[[3-3-8-10]]**

सविता यज्ञस्य प्रसूँत्यै।
अथ काममन्येन।
ततो होत्रेँ।
मध्यं वा एतद्यज्ञस्य।
यद्धोताँ।
मध्यत एव यज्ञं प्रीणाति।
अथाँध्वर्यवेँ।
प्रतिष्ठा वा एषा यज्ञस्य।
यदध्वर्युः।
तस्माँद्धविर्यज्ञस्यैतामेवावृतमनु॥ १०॥

((savitā yajñasya prasūtyai |
atha kāmamanyena |
tato hotre |

madhyam̱ vā e̱tadya̱jña̱sya̍ ।
yaddho̱tā̎ ।
ma̱dhya̱ta e̱va ya̱jñam̱ prī̍ṇāti ।
athā̱̎dhva̱ryave̎ ।
pra̱ti̱ṣṭhā vā e̱ṣā ya̱jña̱sya̍ ।
yada̍dhva̱ryuḥ ।
tasmā̎ddhaviryajñasyai̱tāme̱vāvṛ̱ta̱manu̍ ॥ 10 ॥))

**[[3-3-8-11]]**

अ̱न्या दक्षि॑णा नीयन्ते।
य̱ज्ञस्य̱ प्रति॑ष्ठित्यै।
अ̱ग्निम॑ग्नीत्स̱कृत्स॑कृ̱त्संमृ̱द्धीत्या॑ह।
परा॑ङिव̱ ह्ये॑तर्हि॑ य̱ज्ञः।
इ̱षि̱ता दैव्या̱होता॑र̱ इत्या॑ह।
इ̱षि̱तꣳ हि कर्म॑ क्रि̱यते̎।
भ̱द्र̱वाच्या॑य̱ प्रेषि॑तो̱ मानु॑षः सूक्तवा̱काय॑ सू̱क्ता
ब्रू̱हीत्या॑ह।
आ̱शिष॑मे̱वैतामाशा̎स्ते।
स्व̱गा दैव्या̱होतृ॒भ्य̱ इत्या॑ह।
य̱ज्ञमे̱व तत्स्व̱गा क॑रोति।
स्व̱स्तिर्मानु॑षेभ्य̱ इत्या॑ह।
आ̱शिष॑मे̱वैतामाशा̎स्ते।
शं̱योर्ब्रू̱हीत्या॑ह।
शं̱युमे̱व बा॑र्हस्प̱त्यं भा॑ग̱धेये॑न̱ सम॑र्धयति॥ ११॥
च̱र̱त्य̱ध्व̱र्युः प्र̱जा॑तिर्ह्वयते वेदा॑ब्रवीद्ब॒र्हि॒षद॑ं करोत्यृ̱त्विजो॑
दधाति ब्र̱ह्माऽनु॑करोति च̱त्वारि॑ च॥ ८॥

((a̱nyā dakṣi̍ṇā nīyante ।
ya̱jñasya̱ prati̍ṣṭhityai ।
a̱gnima̍gnītsa̱kṛtsa̍kṛ̱tsam̱mṛ̱dhḍhītyā̍ha ।
parā̍ṅiva̱ hye̍tarhi̍ ya̱jñaḥ ।
i̱ṣi̱tā daivyā̱hotā̍ra̱ ityā̍ha ।
i̱ṣi̱tam̐ hi karma̍ kri̱yate̎ ।
bha̱dra̱vācyā̍ya̱ pre̱ṣi̍to̱ mānu̍ṣaḥ sūktavā̱kāya̍ sū̱ktā
brū̱hītyā̍ha ।
ā̱śiṣa̍me̱vaitāmāśā̎ste ।
sva̱gā daivyā̱hotṛ̍bhya̱ ityā̍ha ।
ya̱jñame̱va tatsva̱gā ka̍roti ।
sva̱stirmānu̍ṣebhya̱ ityā̍ha ।
ā̱śiṣa̍me̱vaitāmāśā̎ste ।
śa̱m̱yorbrū̱hītyā̍ha ।
śa̱m̱yume̱va bā̍rhaspa̱tyam̱ bhā̍ga̱dheye̍na̱
sama̍rdhayati ॥ 11 ॥
ca̱ra̱tya̱dhva̱ryuḥ pra̱jā̍tirhvayate̱
vedā̍bravīdbarhi̱ṣadam̱ karotyṛ̱tvijo̍ dadhāti
bra̱hmā'nu̍karoti ca̱tvāri̍ ca ॥ 8 ॥))

**[[3-3-9-1]]**

अथ̱ स्रुचा॑वनु̱ष्टुग्भ्या̱ं वाज॑वतीभ्या̱ं व्यू॑हति।
प्र̱ति̱ष्ठा वा अ॑नु̱ष्टुक्।
अन्न̱ं वाजः̱ प्रति॑ष्ठित्यै।
अ̱न्नाद्य̱स्याव॑रुध्यै।
प्राची̱ँ जु̱हूमू॑हति।
जा̱ताने̱व भ्रातृ॑व्या̱न्प्रणु॑दते।
प्र̱तीची॑मुप̱भृत̎म्।
ज̱नि̱ष्यमा॑णाने̱व प्रति॑नुदते।
स विषू॑च ए̱वापोह्य॑ स̱पत्ना̱न्यज॑मानः।
अ̱स्मिँल्लो̱के प्रति॑तिष्ठति॥ १॥

((atha̱ srucā̍vanu̱ṣṭugbhyā̱m vājā̍vatībhyā̱m vyū̍hati
।
pra̱ti̱ṣṭhā vā a̍nu̱ṣṭuk ।
anna̱m vāja̱ḥ prati̍ṣṭhityai ।
a̱nnādya̱syāvā̍rudhyai ।
prācī̱m̐ ju̱hūmū̍hati ।
jā̱tāne̱va bhrātṛ̍vyā̱npraṇu̍date ।
pra̱tīcī̍mupa̱bhṛtā̎m ।
ja̱ni̱ṣyamā̍ṇāne̱va prati̍nudate ।
sa viṣū̍ca e̱vāpohya̍ sa̱patnā̱nyajā̍mānaḥ ।
a̱smim̐llo̱ke prati̍tiṣṭhati ॥ 1 ॥))

**[[3-3-9-2]]**

द्वाभ्या̎म्।
द्विप्र॑तिष्ठो̱ हि।
वसु॑भ्यस्त्वा रु̱द्रेभ्य॑स्त्वाऽऽदि̱त्येभ्य̱स्त्वेत्या॑ह।
य̱थाय̱जुरे̱वैतत्।
स्रु̱क्षु प्र॑स्त̱रम॑नक्ति।
इ̱मे वै लो̱काः स्रु̱चः॑।
यज॑मानः प्रस्त̱रः।
यज॑मानमे̱व तेज॑साऽनक्ति।
त्रे̱धाऽन॑क्ति।
त्रय॑ इ̱मे लो̱काः॥ २॥

((dvābhyā̎m ।
dvipra̍tiṣṭho̱ hi ।
vasu̍bhyastvā ru̱drebhyā̍stvā''di̱tyebhya̱stvetyā̍ha ।
ya̱thā̱ya̱jure̱vaitat।
sru̱kṣu prā̍sta̱ramā̍nakti ।
i̱me vai lo̱kāḥ sruca̍ḥ ।
yajā̍mānaḥ prasta̱raḥ ।
yajā̍mānam̱eva tejā̍sā'nakti ।
tre̱dhā'nā̍kti ।
trayā̍ i̱me lo̱kāḥ ॥ 2 ॥))

**[[3-3-9-3]]**

ए॒भ्य ए॒वैनं॑ लो॒केभ्यो॑ऽनक्ति।
अ॒भि॒पू॒र्वम॑नक्ति।
अ॒भि॒पू॒र्वमे॒व यज॑माना॒ं तेज॑साऽनक्ति।
अ॒क्तꣳ रिहा॑णा॒ इत्या॑ह।
तेजो॒ वा आज्य᳚म्।
यज॑मानः प्रस्त॒रः।
यज॑मानमे॒व तेज॑साऽनक्ति।
वि॒यन्तु॒ वय॒ इत्या॑ह।
वय॑ ए॒वैनं॑ कृ॒त्वा।
सु॒व॒र्गं लो॒कं ग॑मयति॥

((e̱bhya e̱vainam̐ lo̱kebhyo̍'nakti |
a̱bhi̱pū̱rvama̍nakti |
a̱bhi̱pū̱rvame̱va yaja̍mānam̱ teja̍sā'nakti |
a̱ktam̐ rihā̍ṇā̱ ityā̍ha |
tejo̱ vā ājya᳚m |
yaja̍mānaḥ prasta̱raḥ |
yaja̍mānameva teja̍sā'nakti |
vi̱yantu̱ vaya̱ ityā̍ha |
vaya̍ e̱vainam̐ kṛ̱tvā |
su̱va̱rgam̱ lo̱kam̱ ga̍mayati ||))

**[[3-3-9-4]]**

प्र॒जां योनिं॒ मा निर्मृ॑क्ष॒मित्या॑ह।
प्र॒जायै॑ गोपी॒थाय॑।
आप्याय॑न्ता॒माप॒ ओष॑धय॒ इत्या॑ह।
आप॑ ए॒वौष॑धी॒राप्याय॑यति म॒रुतां॒ पृष॑तय॒ः स्थेत्या॑ह।
म॒रुतो॒ वै वृष्ट्या॑ ईशते।
वृष्टि॑मे॒वाव॑रुन्धे।
दिवं॑ गच्छ॒ ततो॑ नो॒ वृष्टि॑मे॒रयेत्या॑ह।
वृष्टि॒र्वै द्यौः।
वृष्टि॑मे॒वाव॑रुन्धे॥ ४॥

((pra̱jām̱ yonim̱ mā nirmṛ̍kṣa̱mityā̍ha |
pra̱jāyai̍ gopī̱thāya̍ |
āpyā̍yantā̱māpa̱ oṣa̍dhaya̱ ityā̍ha |
āpa̍ e̱vauṣa̍dhī̱rāpyā̍yayati ma̱rutā̱m pṛṣa̍taya̱ḥ sthetyā̍ha |
ma̱ruto̱ vai vṛṣṭyā̍ īśate |
vṛṣṭi̍me̱vāva̍rundhe |
diva̍m gaccha̱ tato̍ no̱ vṛṣṭi̍me̱rayetyā̍ha |
vṛṣṭi̱rvai dyauḥ |
vṛṣṭi̍me̱vāva̍rundhe || 4 ||))

**[[3-3-9-5]]**

याव॒द्वा अ॑ध्व॒र्युः प्र॑स्त॒रं प्र॒हर॑ति।
ताव॑द॒स्यायु॑र्मीयते।
आ॒यु॒ष्पा अ॑ग्ने॒ऽस्यायु॑र्मे पा॒हीत्या॑ह।
आयु॑रे॒वाऽऽत्मन्ध॑त्ते।
याव॒द्वा अ॑ध्व॒र्युः प्र॑स्त॒रं प्र॒हर॑ति।
ताव॑दस्य॒ चक्षु॑र्मीयते।
च॒क्षु॒ष्पा अ॑ग्नेऽसि॒ चक्षु॑र्मे पा॒हीत्या॑ह।
चक्षु॑रे॒वात्मन्ध॑त्ते।
ध्रु॒वाऽसीत्या॑ह॒ प्रति॑ष्ठित्यै।
यं प॑रि॒धिं प॒र्यध॑त्था॒ इत्या॑ह॥ ५॥

((yāva̱dvā a̍dhva̱ryuḥ pra̍sta̱ram pra̱hara̍ti |
tāva̍da̱syāyu̍rmīyate |
ā̱yu̱ṣpā a̍gne̱'syāyu̍rme pā̱hītyā̍ha |
āyu̍re̱vā''tmandha̍tte |
yāva̱dvā a̍dhva̱ryuḥ pra̍sta̱ram pra̱hara̍ti |
tāva̍dasya̱ cakṣu̍rmīyate |
ca̱kṣu̱ṣpā a̍gne'si̱ cakṣu̍rme pā̱hītyā̍ha |
cakṣu̍re̱vātmandha̍tte |
dhru̱vā'sītyā̍ha̱ prati̍ṣṭhityai |
yam̱ pa̍ri̱dhim̱ pa̱ryadha̍tthā̱ ityā̍ha || 5 ||))

**[[3-3-9-6]]**

य॒था॒य॒जुरे॒वैतत्।
अग्ने॑ देवप॒णिभि॒र्वी॒र्यमा॑ण॒ इत्या॑ह।
अ॒ग्नय॑ ए॒वैनं॒ जुष्टं॑ करोति।
तं त॑ ए॒तमनु॒जोषं॑ भरा॒मीत्या॑ह।
स॒जा॒ता॒ने॒वास्मा॒ अनु॑कान्करोति।
नेदे॒ष त्वद॑पचे॒तया॑ ता॒ इत्या॒हानु॑ख्यात्यै।
य॒ज्ञस्य॒ पाथ॒ उप॒समि॑त॒मित्या॑ह।
भू॒मान॑मे॒वोपै॑ति।
प॒रि॒धीन्प्रह॑रति।
य॒ज्ञस्य॒ समि॑ष्ट्यै॥ ६॥

((ya̱thā̱ya̱jure̱vaitat |
agne̍ devapa̱ṇibhi̍rvī̱ryamā̍ṇa̱ ityā̍ha |
a̱gnaya̍ e̱vainam̱ juṣṭam̐ karoti |
tam̱ ta̍ e̱tamanu̱joṣam̐ bharā̱mītyā̍ha |
sa̱jā̱tāne̱vāsmā̱ anu̍kānkaroti |
nede̱ṣa tvada̍pace̱tayā̍ tā̱ ityā̱hānu̍khyātyai |
ya̱jñasya̱ pātha̱ upa̱sami̍ta̱mityā̍ha |
bhū̱mānā̍me̱vopai̍ti |
pa̱ri̱dhīnprahā̍rati |
ya̱jñasya̱ sami̍ṣṭyai || 6 ||))

**[[3-3-9-7]]**

स्रुचौ॒ संप्रस्रा॑वयति।
यदे॒व तत्र॑ क्रू॒रम्।
तत्तेन॑ शमयति।
जु॒ह्वामु॑प॒भृत᳚म्।
य॒ज॒मा॒न॒दे॒व॒त्या॑ वै जु॒हूः।
भ्रा॒तृ॒व्य॒दे॒व॒त्यो॑प॒भृत्।
यज॑माना॒यै॒व भ्रातृ॑व्य॒मुप॑स्तिं करोति।
स॒ꣳस्रा॒वभा॑गाः स्थेत्या॑ह।
वस॑वो॒ वै रु॒द्रा आ॑दि॒त्याः स॒ꣳस्रा॒वभा॑गाः।
तेषां॒ तद्भा॑ग॒धेय᳚म्॥ ७॥

((srucau̱ saṃprasrávayati ।
yade̱va tatrá krū̱ram ।
tattená śamayati ।
ju̱hvāmúpa̱bhṛtā̈m ।
ya̱ja̱mā̱na̱de̱va̱tyá vai ju̱hūḥ ।
bhrā̱tṛ̱vya̱de̱va̱tyópa̱bhṛt ।
yajámānāya̱iva bhrātṛ́vya̱mupástiṃ karoti ।
sa̱m̐̈srā̱vabhágā̱ḥ sthetyáha ।
vasávo̱ vai ru̱drā ádi̱tyāḥ sam̐̈srā̱vabhágā̱ḥ ।
teṣā̱ṃ tadbhága̱dheyā̈m ॥ 7 ॥))

**[[3-3-9-8]]**

ताने॒व तेन॑ प्रीणाति।
वै॒श्व॒दे॒व्यर्चा।
ए॒ते हि विश्वे॑ दे॒वाः।
त्रि॒ष्टुग्भ॑वति।
इ॒न्द्रि॒यं वै त्रि॒ष्टुक्।
इ॒न्द्रि॒यमे॒व यज॑माने दधाति।
अ॒ग्नेर्वा॒मप॑न्नगृहस्य॒ सद॑सि सादया॒मीत्या॑ह।
इ॒यं वा अ॒ग्निरप॑न्नगृहः।
अ॒स्या ए॒वैने॒ सद॑ने सादयति।
सु॒म्नाय॑ सुम्निनी सु॒म्ने मा॑ धत्त॒मित्या॑ह॥ ८॥

((tāne̱va tená prīṇāti ।
vaiśva̱de̱vyarcā ।
e̱te hi viśvé de̱vāḥ ।
tri̱ṣṭugbhávati ।
i̱ndri̱yaṃ vai tri̱ṣṭuk ।
i̱ndri̱yame̱va yajámāne dadhāti ।
a̱gnervā̱mapánnagṛhasya̱ sadási sādayā̱mītyáha ।
i̱yaṃ vā a̱gnirapánnagṛhaḥ ।
a̱syā e̱vaine̱ sadáne sādayati ।
su̱mnāyá sumninī su̱mne mā́ dhatta̱mityáha ॥ 8 ॥))

**[[3-3-9-9]]**

प्र॒जा वै प॒शव॑ः सु॒म्नम्।
प्र॒जामे॒व प॒शूना॒त्मन्ध॑त्ते।
धु॒रि धु॒र्यौ॑ पात॒मित्या॑ह।
जा॒या॒प॒त्योर्गो॑पी॒थाय॑।
अग्ने॑ऽदब्धायोऽशीततनो॒ इत्या॑ह।
य॒था॒य॒जुरे॒वैतत्।
पा॒हि मा॒ऽद्य दि॒वः पा॒हि प्रसि॑त्यै पा॒हि दुरि॑ष्ट्यै पा॒हि
दु॑रद्म॒न्यै पा॒हि दुश्च॑रि॒ता॒दित्या॑ह।
आ॒शिष॒मे॒वैतामाशा᳚स्ते।
अवि॑षं नः पि॒तुं कृ॑णु सुषदा॒ योनि॒ꣳ᳚
स्वाहेती॑ध्मसं॒वृ॒श्चनान्यन्वाहार्य॒पच॑नेऽभ्या॒धाय॑
फलीकरण॒हो॒मं जु॑होति।
अति॑रिक्तानि॒ वा इ॑ध्मसं॒वृ॒श्चनानि॥ ९॥

((pra̱jā vai pa̱śava̱ḥ su̱mnam ।
pra̱jāme̱va pa̱śūnā̱tmandhátte ।
dhu̱ri dhu̱ryaú pāta̱mityáha ।
jā̱yā̱pa̱tyorgópī̱thāyá ।
agné'dabdhāyo'śītatano̱ ityáha ।
ya̱thā̱ya̱jure̱vaitat ।
pā̱hi mā̱'dya di̱vaḥ pā̱hi prasítyai pā̱hi duríṣṭyai pā̱hi
dúradma̱nyai pā̱hi duścári̱tā̱dityáha ।
ā̱śiṣáme̱vaitāmāśā̈ste ।
avíṣaṃ naḥ pi̱tuṃ kṛ́ṇu su̱ṣadā̱ yoni̱m̐̈
svāhetídhmasa̱ṃvṛ̱ścánānyanvāhārya̱pacáne'bhyā̱d
hāyá phalīkaraṇa̱ho̱maṃ júhoti ।
atíriktāni̱ vā ídhmasa̱ṃvṛ̱ścanāni ॥ 9 ॥))

**[[3-3-9-10]]**

अति॑रिक्ताः फ॒लीक॑रणाः।
अति॑रिक्त॒माज्यो॒च्छेष॒णम्।
अति॑रिक्त ए॒वाति॑रिक्तं दधाति।
अथो॒ अति॑रिक्तेनै॒वाति॑रिक्त॒माप्त्वाऽव॑रुन्धे।
वेदि॑र्दे॒वेभ्यो॒ निला॑यत।
तां वे॒देनान्व॑विन्दन्।
वे॒देन॒ वेदिं॑ विविदुः पृथि॒वीम्।
सा प॑प्रथे पृथि॒वी पार्थि॑वानि।
गर्भं॑ बिभर्ति॒ भुव॑नेष्व॒न्तः।
ततो॑ य॒ज्ञो जा॑यते वि॒श्वदा॑नि॒रिति॑ पु॒रस्ता᳚त्स्तम्बय॒जुषो॑

वे॒देन॒ वेदि॒ꣳ॒ संमा॑र्ष्ट्यनु॑वित्त्यै ॥ १० ॥

((ati̍riktāḥ phalī̱karȧṇāḥ ।
ati̍riktamājyocche̱ṣa̱ṇam ।
ati̍rikta e̱vāti̍riktaṃ dadhāti ।
atho̱ ati̍riktenai̱vāti̍riktamāptvā'vȧrundhe ।
vedi̍rde̱vebhyo̱ nilȧyata ।
tāṃ ve̱denānvȧvindan ।
ve̱dena̱ vedi̍ṃ vividuḥ pr̥̱thi̱vīm ।
sā pȧprathe pr̥̱thi̱vī pārthi̍vāni ।
garbha̍ṃ bibharti̱ bhuvȧne̱ṣva̱ntaḥ ।
tatȯ ya̱jño jȧyate viśva̱dāni̱riti̍
pu̱rastā̎tstambaya̱juṣȯ ve̱dena̱ vedi̱m̐
sa̱mmā̱rṣ̱ṭyanuvittyai ॥ 10 ॥))

**[[3-3-9-11]]**

अथो॒ यद्वे॒दश्च॒ वेदि॑श्च॒ भव॑तः ।
मि॒थु॒न॒त्वाय॒ प्रजा॑त्यै ।
प्र॒जाप॑ते॒र्वा ए॒तानि॒ श्मश्रू॑णि ।
यद्वे॒दः ।
पत्नि॑या उ॒पस्थ॒ आस्य॑ति ।
मि॒थु॒नमे॒व क॑रोति ।
वि॒न्दते॑ प्र॒जाम् ।
वे॒दꣳ होता॑ऽऽह॒व॒नीया॑त्स्तृ॒णन्ने॑ति ।
य॒ज्ञमे॒व तत्संत॑नो॒त्योत्त॑रस्मादर्धमा॒सात् ।
तꣳ संत॑त॒मुत्त॑रेऽर्धमा॒स आल॑भते ॥ ११ ॥

((atho̱ yadve̱daśca̱ vedi̍śca̱ bhavȧtaḥ ।
mi̱thu̱na̱tvāya̱ prajā̎tyai ।
pra̱jāpȧte̱rvā e̱tāni̱ śmaśrū̍ṇi ।
yadve̱daḥ ।
patni̍yā u̱pastha̱ āsyȧti ।
mi̱thu̱name̱va kȧroti ।
vi̱ndate̎ pra̱jām ।
ve̱dam̐ hotā''hȧva̱nīyā̎tstr̥̱ṇannėti ।
ya̱jñame̱va tatsa̱ṃtȧno̱tyottȧrasmādardhamā̱sāt ।
tam̐ sa̱ṃtȧta̱muttȧre'rdhamā̱sa ālȧbhate ॥ 11 ॥))

**[[3-3-9-12]]**

तं का॒ले का॑ल॒ आग॑ते यजते ।
ब्र॒ह्म॒वा॒दिनो॑ वदन्ति ।
स त्वा अ॑ध्व॒र्युः स्या॑त् ।
यो यतो॑ य॒ज्ञं प्र॑यु॒ङ्क्ते ।
तदे॑नं प्रति॒ष्ठाप॒यतीति॑ ।
वाता॒द्वा अ॑ध्व॒र्यु॒र्य॒ज्ञं प्रयु॒ङ्क्ते ।
देवा॑ गातुविदो॑ गा॒तुं वि॒त्त्वा गा॒तुमि॒तेत्या॑ह ।

यत॑ ए॒व य॒ज्ञं प्र॑यु॒ङ्क्ते ।
तदे॑नं प्रति॒ष्ठापयति ।
प्रति॑तिष्ठति प्र॒जया॑ प॒शु॒भि॒र्यज॑मानः ॥ १२ ॥
ति॒ष्ठि॒तीमे लो॒का ग॑मयति॒ द्यौर्वृ॒ष्टि॑मे॒वाव॑रुन्धे प॒र्य॒ध॑त्था॒
इत्या॑ह॒ समि॑ष्ट्यै भाग॒धेयं॑ धत्त॒मित्या॑ह॒ वा
इ॑ध्मसं॒वृश्च॑ना॒न्य॒नु॑वित्त्यै लभते॒ यज॑मानः ॥ ९ ॥

((taṃ kā̱le kȧla̱ āgȧte yajate ।
bra̱hma̱vā̱dinȯ vadanti ।
sa tvā ȧdhva̱ryuḥ syā̎t ।
yo yatȯ ya̱jñaṃ prȧyu̱ṅkte ।
tadėnaṃ prati̱ṣṭhā̱paya̱tīti̍ ।
vātā̱dvā ȧdhva̱ryurya̱jñaṃ prayu̍ṅkte ।
devȧ gātuvido gā̱tuṃ vi̱ttvā gā̱tumi̱tetyȧha ।
yatȧ e̱va ya̱jñaṃ prȧyu̱ṅkte ।
tadėnaṃ prati̱ṣṭhāpayati ।
prati̍tiṣṭhati pra̱jayȧ pa̱śubhi̱ryajȧmānaḥ ॥ 12 ॥
ti̱ṣṭhi̱tīme lo̱kā gȧmayati̱ dyaurvr̥̱ṣṭi̍me̱vāvȧrundhe
pa̱ryadhȧtthā̱ ityȧha̱ sami̍ṣṭyai bhāga̱dheyaṃ̍
dhatta̱mityȧha̱ vā i̍dhmasa̱ṃvr̥ścȧnā̱nyanuvittyai
labhate̱ yajȧmānaḥ ॥ 9 ॥))

**[[3-3-10-1]]**

यो वा अय॑थादेवतं य॒ज्ञमु॒पच॑र॑ति ।
आ दे॒वता॑भ्यो वृश्च्यते ।
पापी॑यान्भवति ।
योऽय॑थादे॒वतम् ।
न दे॒वता॑भ्य॒ आवृ॑श्च्यते ।
वसी॑यान्भवति ।
वा॒रु॒णो वै पाशः॑ ।
इ॒मं वि॒ष्या॑मि॒ वरु॑णस्य॒ पाश॒मित्या॑ह ।
व॒रु॒णपा॒शादे॒वैना॑न्मुञ्चति ।
स॒वि॒तृप्र॑सूतो यथादे॒वतम् ॥ १ ॥

((yo vā ayȧthādevataṃ ya̱jñamu̍pa̱carȧti ।
ā de̱vatā̎bhyo vr̥ścyate ।
pāpi̍yānbhavati ।
yo'yȧthādeva̱tam ।
na de̱vatā̎bhya̱ āvr̥̍ścyate ।
vasi̍yānbhavati ।
vā̱ru̱ṇo vai pāśȧḥ ।
i̱maṃ vi̱ṣyȧmi̱ varu̍ṇasya̱ pāśa̱mityȧha ।
va̱ru̱ṇa̱pā̱śāde̱vainā̎m̐ muñcati ।
sa̱vi̱tr̥prȧsūto yathādeva̱tam ॥ 1 ॥))

**[[3-3-10-2]]**

न दे॒वता॑भ्य॒ आवृ॑श्च्यते ।

वसी॑यान्भवति।
धा॒तुश्च॑ योनौ॑ सुकृ॒तस्य॑ लो॒क इत्या॑ह।
अ॒ग्निर्वै धा॒ता।
पुण्यं॒ कर्म॑ सुकृ॒तस्य॑ लो॒कः।
अ॒ग्निरे॒वैना᳚ं धा॒ता।
पुण्ये॒ कर्म॑णि सुकृ॒तस्य॑ लो॒के द॑धाति।
स्यो॒नं मे॑ स॒ह पत्या॑ करो॒मीत्या॑ह।
आ॒त्मन॑श्च॒ यज॑मानस्य॒ चाना᳚र्त्यै सं॒त्वाय॑।
समायु॑षा॒ सं प्र॒जयेत्या॑ह॥ २॥

((na de̱vatā̍bhya̱ āvṛ̍ścyate ।
vasī̍yānbhavati ।
dhā̱tuśca̱ yonau̍ sukṛ̱tasya̍ lo̱ka ityā̍ha ।
a̱gnirvai dhā̱tā ।
puṇya̱ṃ karma̍ sukṛ̱tasya̍ lo̱kaḥ ।
a̱gnire̱vainā̍ṃ dhā̱tā ।
puṇye̱ karma̍ṇi sukṛ̱tasya̍ lo̱ke da̍dhāti ।
syo̱naṃ me̍ sa̱ha patyā̍ karo̱mītyā̍ha ।
ātmana̍śca̱ yaja̍mānasya̱ cānā̍rtyai sa̱ṃtvāya̍ ।
samāyu̍ṣā̱ saṃ pra̱jayetyā̍ha ॥ 2 ॥))

**[[3-3-10-3]]**

आ॒शिष॑मे॒वैतामाशा᳚स्ते पूर्णपा॒त्रे।
अ॒न्त॒तो॑ऽनु॒ष्टुभा᳚।
चतु॑ष्पद्वा ए॒तच्छन्द॑ः प्रति॑ष्ठितं॒ पत्नि॑यै पूर्णपा॒त्रे भ॑वति।
अ॒स्मिँ᳚ल्लो॒के प्रति॑तिष्ठा॒नीति॑।
अ॒स्मिन्ने॒व लो॒के प्रति॑तिष्ठति।
अथो॒ वाग्वा अ॑नु॒ष्टुक्।
वाङ्मि॑थु॒नम्।
आपो॒ रेत॑ः प्र॒जन॑नम्।
ए॒तस्मा॒द्वै मि॑थु॒नाद्वि॒द्योत॑मानस्स्त॒नय॑न्वर्षति।
रेत॑ः सि॒ञ्चन्॥ ३॥

((ā̱śiṣa̍me̱vaitāmāśā̍ste pūrṇa̱pātre ।
a̱nta̱to̍'nu̱ṣṭubhā̍ ।
catu̍ṣpa̱dvā e̱tacchanda̱ḥ prati̍ṣṭhita̱ṃ patni̍yai pūrṇa̱pātre bha̍vati ।
a̱smiṁ̍llo̱ke prati̍tiṣṭhā̱nīti̍ ।
a̱sminne̱va lo̱ke prati̍tiṣṭhati ।
atho̱ vāgvā a̍nu̱ṣṭuk ।
vāṅmi̍thu̱nam ।
āpo̱ reta̍ḥ pra̱jana̍nam ।
e̱tasmā̱dvai mi̍thu̱nādvi̱dyota̍mānassta̱naya̍nvarṣati
।
reta̍ḥ si̱ñcan ॥ 3 ॥))

**[[3-3-10-4]]**

प्र॒जाः प्र॑ज॒नय॑न्।
यद्वै य॒ज्ञस्य॒ ब्रह्म॑णा यु॒ज्यते᳚।
ब्रह्म॑णा॒ वै तस्य॑ विमो॒कः।
अ॒द्भिः शान्ति॑ः।
विमु॑क्तं॒ वा ए॒तर्हि॒ योक्त्रं॒ ब्रह्म॑णा।
आ॒दायै॑न॒त्पत्नी॑ स॒हाप उप॑गृह्णीते॒ शान्त्यै᳚।
अ॒ञ्ज॒लौ पू᳚र्णपात्रमान॑यति।
रेत॑ ए॒वास्या᳚ं प्र॒जां द॑धाति।
प्र॒जया᳚ हि म॑नु॒ष्य॑ः पूर्ण॑ः।
मुख॒ं विमृ॑ष्टे।
अ॒व॒भृ॒थस्यै॒व रू॒पं कृ॒त्वोत्ति॑ष्ठति॥ ४॥
स॒वि॒तृप्र॑सूतो यथादे॒व॒तं प्र॒जयेत्या॑ह सि॒ञ्चन्मृ॑ष्ट॒ एक॑ं च॥ १०॥

((pra̱jāḥ pra̍ja̱naya̍n ।
yadvai ya̱jñasya̱ brahma̍ṇā yu̱jyate̍ ।
brahma̍ṇā̱ vai tasya̍ vimo̱kaḥ ।
a̱dbhiḥ śānti̍ḥ ।
vimu̍kta̱ṃ vā e̱tarhi̱ yoktra̱ṃ brahma̍ṇā ।
ā̱dāyai̍na̱tpatnī̍ sa̱hāpa upa̍gṛhṇīte̱ śāntyai̍ ।
a̱ñja̱lau pū̍rṇapā̱tramāna̍yati ।
reta̍ e̱vāsyā̍ṃ pra̱jāṃ da̍dhāti ।
pra̱jayā̱ hi ma̍nu̱ṣya̍ḥ pū̱rṇaḥ ।
mukha̱ṃ vimṛ̍ṣṭe ।
a̱va̱bhṛ̱thasyai̱va rū̱paṃ kṛ̱tvotti̍ṣṭhati ॥ 4 ॥
sa̱vi̱tṛpra̍sūto yathāde̱va̱taṃ pra̱jayetyā̍ha
si̱ñcanmṛ̍ṣṭa̱ eka̍ṃ ca ॥ 10 ॥))

**[[3-3-11-1]]**

प॒रि॒वे॒षो वा ए॒ष व॒न॒स्पती॑नाम्।
यदु॑पवे॒षः।
य ए॒वं वेद॑।
वि॒न्दते॑ परिवे॒ष्टार᳚म्।
तमु॒त्क॒रे।
यं दे॒वा म॑नु॒ष्ये॑षु।
उ॒प॒वे॒षम॑धारयन्।
ये अ॒स्मद॑प॒चेत॑सः।
ता॒न॒स्मभ्य॑मि॒हाकु॑रु।
उ॒प॒वे॒षोप॑विड्ढि नः॥ १॥

((pa̱ri̱ve̱ṣo vā e̱ṣa va̱na̱spatī̍nām ।
yadu̍pave̱ṣaḥ ।

ya e̱vaṃ vedá ।
vi̱ndate̍ parive̱ṣṭārām̐ ।
tamútka̱re ।
yaṃ de̱vā mánu̱ṣye̍ṣu ।
u̱pa̱ve̱ṣamádhārayan।
ye a̱smadapácetasaḥ ।
tāna̱smabhyámi̱hākúru ।
upáve̱ṣopávi̱ddhi naḥ ॥ 1 ॥))

**[[3-3-11-2]]**

प्र॒जां पु॒ष्टिम॒थो॒ धन॑म्।

द्वि॒पदो॑ न॒श्चतु॑ष्पदः।

ध्रु॒वान॒नप॑गान्कुर्वि॒ति॑ पु॒रस्ता॑त्प्र॒त्यञ्च॒मुप॑गूहति।

तस्मा॑त्पु॒रस्ता॑त्प्र॒त्यञ्चः॑ शू॒द्रा अव॑स्यन्ति।

स्थ॒वि॒मत उप॑गूहति।

अप्र॑तिवादिन ए॒वैना॑न्कुरुते।

धृ॒ष्टि॒र्वा उप॑वे॒षः।

शु॒चर्तो॑ वज्रो॒ ब्रह्म॑णा॒ सꣳशि॑तः।

योप॑वे॒षे शुक्।

साऽमुमृ॑च्छतु॒ यं द्वि॒ष्म इति॑॥ २॥

((pra̱jāṃ pu̱ṣṭi̱matho̱ dhanám̐ ।
dvi̱padó na̱ścatúṣpadaḥ ।
dhru̱vānanápagānku̱rviti̍
pu̱rastā̍tpra̱tyañca̱mupágūhati ।
tasmā̍tpu̱rastā̍tpra̱tyañcaḥ śū̱drā avásyanti ।
stha̱vi̱mata upágūhati ।
aprátivādina e̱vainā̍nkurute ।
dhṛ̱ṣṭi̱rvā úpave̱ṣaḥ ।
śu̱carto vajro̱ brahmáṇā̱ sam̐śítaḥ ।
yopáve̱ṣe śuk ।
sā'mumṛ́cchatu̱ yaṃ dvi̱ṣma iti̍ ॥ 2 ॥))

**[[3-3-11-3]]**

अथा॑स्मै नाम॒गृह्य॒ प्रह॑रति।

निर॒मुं नु॑द॒ ओक॑सः।

स॒पत्नो॒ यः पृ॑त॒न्यति॑।

नि॒र्बा॒ध्ये॑न ह॒विषा॑।

इन्द्र॑ ए॒णं परा॑शरीत्।

इ॒हि ति॒स्रः प॑रा॒वतः॑।

इ॒हि पञ्च॒जना॒ꣳ अति॑।

इ॒हि ति॒स्रोऽति॑ रोच॒नायाव॑त्।

सूर्यो॒ अस॑द्दि॒वि।

प॒र॒मां त्वा॑ परा॒वत॑म्॥ ३॥

((athā̍smai nāma̱gṛhya̱ prahárati ।
nira̱muṃ núda̱ okásaḥ ।
sa̱patno̱ yaḥ pṛ́ta̱nyati̍ ।
ni̱rbā̱dhyéna ha̱viṣā̍ ।
indrá e̱ṇaṃ parā́śarīt ।
i̱hi ti̱sraḥ párā̱vataḥ ।
i̱hi pañca̱janā̱m̐ ati̍ ।
i̱hi ti̱sro'ti̍ roca̱nāyāvát ।
sūryo̱ asáddi̱vi ।
pa̱ra̱māṃ tvā́ parā̱vatám ॥ 3 ॥))

**[[3-3-11-4]]**

इन्द्रो॑ नयतु वृ॒त्र॒हा।

य॒तो॒ न पु॒नरा॒य॑सि।

श॒श्व॒तीभ्यः॑ स॒मा॑भ्य॒ इति॑।

त्रि॒वृद्वा ए॒ष वज्रो॒ ब्रह्म॑णा॒ सꣳशि॑तः।

शु॒चैवैन॑ं वि॒द्ध्वा।

ए॒भ्यो लो॒केभ्यो॑ नि॒र्णुद्य॑।

वज्रे॑ण ब्रह्म॑णा स्तृणुते।

ह॒तो॑ऽसावव॑धिष्मा॒मुमित्या॑ह॒ स्तृत्यै॑।

यं द्वि॒ष्यात्तं ध्या॑येत्।

शु॒चैवैन॑मर्पयति॥ ४॥

नो॒द्वि॒ष्म इति॑ परा॒वत॑मर्पयति॥ ११॥

प्रत्यु॑ष्टं दि॒वः शिल्प॒मय॑ज्ञो घृ॒तं च॑ देवासु॒रास्स ए॒तमिन्द्र॒ आपो॑ देवि॒र॒ग्निना॒ धीष्णि॑या॒ अथ॒ स्रुचौ॒ यो वा अय॑थादेवतं परि॒वेषो वा एका॑दश॥ ११॥

प्रत्यु॑ष्टमय॑ज्ञ ए॒षा हि विश्वे॑षां दे॒वाना॑मू॒र्जा पृ॑थि॒वीमथो॒ रक्ष॑सां तां प्र॒जाति॑ं द्वा॒भ्यां तं का॒लेका॑ले नव॑सप्ततिः॥

७९॥

प्रत्यु॑ष्टꣳ शु॒चैवैन॑मर्पयति॥

((indró nayatu vṛtra̱hā ।
yato̱ na puna̱rāyási ।
śa̱śva̱tībhya̱ḥ samā̍bhya iti̍ ।
tri̱vṛdvā e̱ṣa vajro̱ brahmáṇā̱ sam̐śítaḥ ।
śu̱caivainaṃ vi̱ddhvā ।
e̱bhyo lo̱kebhyó ni̱rṇudyá ।
vajréṇa brahmáṇā stṛṇute ।
ha̱tó'sāvavádhiṣmā̱mumityā́ha̱ stṛtyai̍ ।
yaṃ dvi̱ṣyāttaṃ dhyā́yet।
śu̱caivainámarpayati ॥ 4 ॥
no̱dvi̱ṣma iti̍ parā̱vatámarpayati ॥ 11 ॥
pratyúṣṭaṃ di̱vaḥ śilpa̱mayájño ghṛ̱taṃ cá
devāsu̱rāssa e̱tamindra̱ āpó devira̱gninā̱ dhīṣṇi̱yā̱
atha̱ srucau̱ yo vā ayáthādevataṃ parive̱ṣo vā
ekā́daśa ॥ 11 ॥
pratyúṣṭa̱mayájña e̱ṣā hi viśve̍ṣāṃ de̱vānámū̱rjā

pṛ̍thi̠vīmatho̠ rakṣa̍sām̠ tāṃ prajā̎tim̠ dvābhyām̠ taṃ
kā̠lekā̎le̠ nava̍saptatiḥ ll 79 ll
pratyu̍ṣṭam̐ śu̠caivaina̍marpayati ll))

# Taittirīya-Brāhmaṇa
# Book 3, Chapter 4

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[3-4-1-1]]**

ब्रह्म॑णे ब्राह्म॒णमाल॑भते।

क्ष॒त्त्राय॑ राज॒न्य᳚म्।

म॒रुद्भ्यो॒ वैश्य᳚म्।

तप॑से शू॒द्रम्।

तम॑से॒ तस्क॑रम्।

नार॑काय वीर॒हण᳚म्।

पा॒प्मने᳚ क्ली॒बम्।

आ॒क्र॒याया॑यो॒गूम्।

कामा॑य पुँ॒श्च॒लूम्।

अति॑क्रुष्टाय माग॒धम्॥ १॥ ॥ १॥

((brahma̍ṇe brāhma̱ṇamāla̍bhate |
kṣa̱ttrāya̍ rāja̱nya̎m |
ma̱rudbhyo̱ vaiśya̎m |
tapa̍se śū̱dram |
tama̍se̱ taska̍ram |
nāra̍kāya vīra̱haṇa̎m |
pā̱pmane̎ klī̱bam |
ā̱kra̱yāyā̍yo̱gūm |
kāmā̍ya puṁ̱̐śca̱lūm |
ati̍kruṣṭāya māga̱dham || 1 || || 1 ||))

**[[3-4-2-1]]**

गी॒ताय॑ सू॒तम्।

नृ॒त्ताय॑ शैलू॒षम्।

धर्मा॑य सभा॒चरम्।

न॒र्माय॑ रे॒भम्।

नरि॑ष्ठायै भीम॒लम्।

हसा॑य॒ कारि᳚म्।

आ॒न॒न्दाय॑ स्त्रीष॒खम्।

प्र॒मुदे॑ कुमारीपु॒त्रम्।

मे॒धायै॑ रथका॒रम्।

धैर्या॑य॒ तक्षा॑णम्॥ १॥ ॥ २॥

((gī̱tāya̍ sū̱tam |
nṛ̱ttāya̍ śailū̱ṣam |
dharmā̍ya sabhā̱caram |
na̱rmāya̍ re̱bham |
nari̍ṣṭhāyai bhīma̱lam |
hasā̍ya̱ kāri̎m |
ā̱na̱ndāya̍ strīṣa̱kham |
pra̱mude̍ kumārīpu̱tram |
me̱dhāyai̍ rathakā̱ram |
dhairyā̍ya̱ takṣā̍ṇam || 1 || || 2 ||))

**[[3-4-3-1]]**

श्रमा॑य कौला॒लम्।

मा॒यायै॑ कार्मा॒रम्।

रू॒पाय॑ मणिका॒रम्।

शु॒भे॑ व॒पम्।

श॒र॒व्या॑या इषुका॒रम्।

हे॒त्यै धन्व॑का॒रम्।

कर्म॑णे ज्याका॒रम्।

दि॒ष्टाय॑ रज्जुस॒र्गम्।

मृ॒त्यवे॑ मृग॒युम्।

अन्त॑काय श्व॒नित᳚म्॥ १॥ ॥ ३॥

((śramā̍ya kaulā̱lam |
mā̱yāyai̍ kārmā̱ram |
rū̱pāya̍ maṇikā̱ram |
śubhe̍ va̱pam |
śa̱ra̱vyā̍yā iṣukā̱ram |
he̱tyai dha̍nvakā̱ram |
karma̍ṇe jyākā̱ram |
di̱ṣṭāya̍ rajjusa̱rgam |
mṛ̱tyave̍ mṛga̱yum |
anta̍kāya śva̱nita̎m || 1 || || 3 ||))

**[[3-4-4-1]]**

स॒न्धये॑ जा॒रम्।

गे॒हायो॑पप॒तिम्।

निर्ऋ॑त्यै परिवि॒त्तम्।

आर्त्यै᳚ परिविविदा॒नम्।

अरा᳚ध्यै दिधिषू॒पति᳚म्।

प॒वित्रा॑य भि॒षज᳚म्।

प्र॒ज्ञाना॑य नक्षत्रद॒र्शम्।

निष्कृ॑त्यै पेशस्का॒रीम्।

बला॑योप॒दाम्।

व॒र्णाया॑नू॒रुध᳚म्॥ १॥ ॥ ४॥

((sa̱ndhaye̍ jā̱ram |
ge̱hāyo̍papa̱tim |
nirr̥̍tyai parivi̱ttam |
ārtyai̍ parivivi̱dā̱nam |
arā̍dhyai didhiṣū̱pati᳚m |
pa̱vitrā̍ya bhi̱ṣajā᳚m |
pra̱jñānā̍ya nakṣatrada̱rśam |
niṣkr̥̍tyai peśaskā̱rīm |
balā̍yopa̱dām |
varṇā̍yānū̱rudhā᳚m || 1 || || 4 ||))

**[[3-4-5-1]]**

न॒दीभ्य॑ः पौञ्जि॒ष्टम्।
ऋ॒क्षीका᳚भ्यो॒ नैषा॑दम्।
पु॒रु॒ष॒व्या॒घ्राय॑ दु॒र्मद᳚म्।
प्र॒यु॒द्भ्य उन्म॑त्तम्।
ग॒न्ध॒र्वा॒प्स॒राभ्यो॒ व्रात्य᳚म्।
स॒र्प॒दे॒व॒ज॒नेभ्योऽप्र॑तिपदम्।
अवे᳚भ्यः कि॒तवम्।
इ॒र्यता॑या॒ अकि॑तवम्।
पि॒शा॒चेभ्यो॑ बिदलका॒रम्।
या॒तु॒धाने᳚भ्यः कण्टकका॒रम्॥ ५॥ ॥ ५॥

((na̱dībhya̍ḥ pauñji̱ṣṭam |
r̥̱kṣīkā᳚bhyo̱ naiṣā̍dam |
pu̱ru̱ṣa̱vyā̱ghrāya̍ du̱rmadā᳚m |
pra̱yudbhya̱ unma̍ttam |
ga̱ndha̱rvā̱phsa̱rābhyo̱ vrātyā᳚m |
sa̱rpa̱de̱va̱ja̱nebhyo'pra̍tipadam |
ave᳚bhyaḥ kita̱vam |
i̱ryatā̍yā̱ aki̍tavam |
pi̱śā̱cebhyo̍ bidalakā̱ram |
yā̱tu̱dhāne᳚bhyaḥ kaṇṭakakā̱ram || 5 || || 5 ||))

**[[3-4-6-1]]**

उ॒थ्सा॒देभ्य॑ः कु॒ब्जम्।
प्र॒मुदे॑ वाम॒नम्।
द्वा॒भ्यः स्रा॒मम्।
स्वप्ना॑या॒न्धम्।
अध॑र्माय बधि॒रम्।
सं॒ज्ञाना॑य स्मरका॒रीम्।
प्र॒का॒मो॒द्या॑योप॒सद᳚म्।
आ॒शि॒क्षायै᳚ प्र॒श्निन᳚म्।
उ॒प॒शि॒क्षाया॑ अभिप्र॒श्निन᳚म्।
म॒र्यादा॑यै प्रश्नविवा॒कम्॥ ६॥ ॥ ६॥

((u̱thsā̱debhya̍ḥ ku̱bjam |
pra̱mude̍ vāma̱nam |
dvā̱bhyaḥ srā̱mam |
svapnā̍yā̱ndham |
adha̍rmāya badhi̱ram |
sa̱ṃjñānā̍ya smarakā̱rīm |
pra̱kā̱modyā̍yopa̱sadā᳚m |
ā̱śi̱kṣāyai᳚ pra̱śninā᳚m |
u̱pa̱śi̱kṣāyā̍ abhipra̱śninā᳚m |
ma̱ryādā̍yai praśnavivā̱kam || 6 || || 6 ||))

**[[3-4-7-1]]**

ऋ॒त्यै᳚ स्ते॒नहृ॑दयम्।
वैर॑हत्याय॒ पिशु॑नम्।
विवि॑त्त्यै क्ष॒त्तार᳚म्।
औप॑द्रष्टाय संग्रही॒तार᳚म्।
बला॑यानु॒चरम्।
भू॒म्ने प॑रिष्क॒न्दम्।
प्रि॒याय॑ प्रियवा॒दिन᳚म्।
अरि॑ष्ट्या अश्वसा॒दम्।
मेधा॑य वासःपल्पू॒लीम्।
प्र॒का॒माय॑ रजयि॒त्रीम्॥ १॥ ॥ ७॥

((r̥̱tyai᳚ ste̱nahr̥̍dayam |
vairā̍hatyāya̱ piśu̍nam |
vivi̍ttyai kṣa̱ttārā᳚m |
aupa̍draṣṭāya saṃgrahī̱tārā᳚m |
balā̍yānuca̱ram |
bhū̱mne pa̍riṣka̱ndam |
pri̱yāya̍ priyavā̱dinā᳚m |
ari̍ṣṭyā aśvasā̱dam |
medhā̍ya vāsaḥpalpū̱līm |
pra̱kā̱māya̍ rajayi̱trīm || 1 || || 7 ||))

**[[3-4-8-1]]**

भायै॑ दार्वाहा॒रम्।
प्र॒भाया॑ आग्ने॒न्धम्।
नाक॑स्य पृ॒ष्ठाया॑भिषे॒क्तार᳚म्।
ब्र॒ध्नस्य॑ वि॒ष्टपा॑य पात्रनिर्णे॒गम्।
दे॒व॒लो॒काय॑ पेशि॒तार᳚म्।
म॒नु॒ष्य॒लो॒काय॑ प्रकरि॒तार᳚म्।
सर्वे᳚भ्यो लो॒केभ्य॑ उपसे॒क्तार᳚म्।
अव॑र्त्यै व॒धायो॑पमन्थि॒तार᳚म्।

सु॒व॒र्गाय॑ लो॒काय॑ भाग॒दुघ᳚म्।
वर्षि॑ष्ठाय॒ नाका॑य परिवे॒ष्टार᳚म्॥ १॥ ॥ ८॥

((bhāyai̍ dārvāha̱ram |
pra̱bhāyā̍ āgne̱ndham |
nāka̍sya pṛṣṭhāyā̍bhiṣe̱ktārā̎m |
bra̱dhnasya̍ vi̱ṣṭapā̍ya pātranirṇe̱gam |
de̱va̱lo̱kāya̍ peśi̱tārā̎m |
ma̱nu̱ṣya̱lo̱kāya̍ prakari̱tārā̎m |
sarve̎bhyo lo̱kebhya̍ upase̱ktārā̎m |
ava̍rtyai va̱dhāyo̍pamanthi̱tārā̎m |
su̱va̱rgāya̍ lo̱kāya̍ bhāga̱dughā̎m |
varṣi̍ṣṭhāya̱ nākā̍ya parive̱ṣṭārā̎m || 1 || || 8 ||))

**[[3-4-9-1]]**
अर्मे᳚भ्यो ह॒स्ति॒पम्।
ज॒वाया᳚श्व॒पम्।
पुष्ट्यै॑ गोपा॒लम्।
तेज॑सेऽजपा॒लम्।
वी॒र्या॑यावि॒पा॒लम्।
इरा॑यै की॒नाश᳚म्।
की॒ला॒ला॑य सुराका॒रम्।
भ॒द्राय॑ गृ॒ह॒पम्।
श्रेय॑से वि॒त्त॒धम्।
अध्य॑क्षायानुक्ष॒त्तार᳚म्॥ १॥ ॥ ९॥

((arme̎bhyo hasti̱pam |
ja̱vāyā̎śva̱pam |
puṣṭyai̍ gopā̱lam |
teja̍se'japā̱lam |
vī̱ryā̍yāvipā̱lam |
irā̍yai kī̱nāśā̎m |
kī̱lā̱lā̍ya surākā̱ram |
bha̱drāya̍ gṛ̱ha̱pam |
śreya̍se vitta̱dham |
adhya̍kṣāyānukṣa̱ttārā̎m || 1 || || 9 ||))

**[[3-4-10-1]]**
म॒न्यवे॑ऽयस्ता॒पम्।
क्रोधा॑य नि॒स॒रम्।
शोका॑याभि॒स॒रम्।
उ॒त्कू॒ल॒वि॒कू॒लाभ्या᳚ं त्रि॒स्थिन᳚म्।
योगा॑य यो॒क्तार᳚म्।
क्षेमा॑य वि॒मो॒क्तार᳚म्।
वपु॑षे मानस्कृ॒तम्।
शीला॑याञ्जनीका॒रम्।
निर्ऋ॑त्यै कोशका॒रीम्।
य॒मायासू॒म्॥ १॥ ॥ १०॥

((ma̱nyave̍'yastā̱pam |
krodhā̍ya nisa̱ram |
śokā̍yābhisa̱ram |
u̱tkū̱la̱vi̱kū̱lābhyā̎ṃ tri̱sthinā̎m |
yogā̍ya yo̱ktārā̎m |
kṣemā̍ya vimo̱ktārā̎m |
vapu̍ṣe mānaskṛ̱tam |
śīlā̍yāñjanīkā̱ram |
nirṛ̍tyai kośakā̱rīm |
ya̱māyā̱sūm || 1 || || 10 ||))

**[[3-4-11-1]]**
य॒म्यै॑ यम॒सूम्।
अथ॑र्व॒भ्योऽव॑तोकाम्।
सं॒व॒थ्स॒राय॑ पर्या॒रिणी᳚म्।
प॒रि॒व॒थ्स॒रा॒याविजा॑ताम्।
इ॒दा॒व॒थ्स॒राया॑प॒स्कद्वरी॑म्।
इ॒द्व॒त्स॒रा॒याती॒त्वरी॑म्।
व॒थ्स॒रा॒य॒ विज॑र्जराम्।
सं॒व॒थ्स॒रा॒य॒ पलि॑क्नीम्।
वना॑य व॒न॒पम्।
अ॒न्यतो॑ऽरण्याय दा॒व॒पम्॥ १॥ ॥ ११॥

((ya̱myai̍ yama̱sūm |
atha̍rva̱bhyo'va̍tokām |
sa̱ṃva̱thsa̱rāya̍ paryā̱riṇī̎m |
pa̱ri̱va̱thsa̱rāyāvi̍jātām |
i̱dā̱va̱thsa̱rāyā̍pa̱skadva̍rīm |
i̱dva̱tsa̱rāyā̱tītva̍rīm |
va̱thsa̱rāya̱ vija̍rjarām |
sa̱ṃva̱thsa̱rāya̱ pali̍knīm |
vanā̍ya vana̱pam |
a̱nyato̍'ra̱ṇyāya dāva̱pam || 1 || || 11 ||))

**[[3-4-12-1]]**
सरो᳚भ्यो धै॒व॒रम्।
वेश॑न्ताभ्यो॒ दाश᳚म्।
उ॒प॒स्था॒व॑रीभ्यो॒ बैन्द᳚म्।
न॒ड्व॒लाभ्य॑ः शौष्क॒लम्।
पा॒र्या॑य कैव॒र्तम्।
अ॒वा॒र्या॑य मार्गा॒रम्।

ती॒र्थेभ्य॑ आ॒न्दम्।
विष॑मेभ्यो मैना॒लम्।
स्वने॑भ्यः प॒र्णक॑म्।
गुहा॑भ्यः किरा॑तम्।
सानु॑भ्यो॒ जम्भ॑कम्।
पर्व॑तेभ्यः॒ किंपू॑रुषम्॥ १॥ ॥ १२॥

((sarőbhyo dhaivaram |
veśántābhyo dāśa̋m |
upasthāvárībhyo baindám |
nadvalābhyáḥ śauṣkalam |
pāryáya kaivartam |
avāryáya mārgāram |
tīrthebhyá āndam |
viṣámebhyo maināḷam |
svanébhyaḥ parṇákam |
guhá̋bhyaḥ kirátam |
sānúbhyo jambhákam |
parvátebhyaḥ kiṃpűruṣam || 1 || || 12 ||))

**[[3-4-13-1]]**
प्र॒ति॒श्रुत्का॑या ऋतु॒लम्।
घोषा॑य भ॒षम्।
अन्ता॑य बहुवा॒दिन॑म्।
अ॒न॒न्ता॒य मू॒क॑म्।
मह॑से वीणावा॒दम्।
क्रोशा॑य तूणव॒ध्मम्।
आ॒क्र॒न्दाय॑ दुन्दुभ्याघा॒तम्।
अ॒व॒र॒स्प॒राय॑ शङ्ख॒ध्मम्।
ऋ॒भुभ्यो॑ऽजिनसन्धा॒यम्।
सा॒ध्येभ्य॑श्चर्म॒म्णम्॥ १॥ ॥ १३॥

((pratiśrutkáyā ṛtulam |
ghoṣáya bhaṣam |
antáya bahuvādiná̋m |
anantāya mūkám |
mahá̋se vīṇāvādam |
krośáya tūṇavadhmam |
ākrandāyá dundubhyāghātam |
avaraspárāyá śaṅkhadhmam |
ṛbhubhyó'jinasandhāyam |
sādhyebhyáścarmamṇam || 1 || || 13 ||))

**[[3-4-14-1]]**
बी॒भ॒त्सायै॑ पौल्क॒सम्।
भूत्यै॑ जाग॒रणम्।
अभू॑त्यै स्व॒प॒नम्।
तु॒लायै॑ वाणि॒जम्।
वर्णा॑य हिरण्यका॒रम्।
विश्वे॑भ्यो दे॒वेभ्यः॑ सिध्म॒लम्।
प॒श्चा॒द्दो॒षाय॑ ग्ला॒वम्।
ऋत्यै॑ जनवा॒दिन॑म्।
व्यृ॑द्ध्या अपग॒ल्भम्।
स॒ꣳ॒श॒राय॑ प्र॒च्छिद॑म्॥ १॥ ॥ १४॥

((bībhathsāyai paulkasam |
bhūtyai jāgaraṇam |
abhűtyai svapanam |
tulāyai vāṇijam |
varṇáya hiraṇyakāram |
viśvébhyo devebhyáḥ sidhmalam |
paścāddoṣāyá glāvam |
ṛtyai janavādiná̋m |
vyṛ́ddhyā apagalbham |
saṃ̋śarāyá pracchidá̋m || 1 || || 14 ||))

**[[3-4-15-1]]**
हसा॑य पुꣳ॒॒श्चलू॑माल॑भते।
वी॒णा॒वा॒दं ग॒णक॑ं गी॒ताय॑।
याद॑से शाबु॒ल्याम्।
न॒र्माय॑ भद्र॒वती॑म्।
तू॒ष्ण॒व॒ध्मं ग्राम॒ण्यं॑ पाणिसंघा॒तं नृ॒त्ताय॑।
मोदा॑यानुक्रो॒शक॑म्।
आ॒न॒न्दाय॑ त॒ल॒वम्॥ १॥ ॥ १५॥

((hasáya puṃ̋ścalūmālábhate |
vīṇāvādaṃ gaṇákaṃ gītāyá |
yādáse śābulyām |
narmāyá bhadravatīm |
tūṣṇavadhmaṃ grámaṇyaṃ́ pāṇisaṃghātaṃ nṛttāyá |
modáyānukrośákam |
ānandāyá talavam || 1 || || 15 ||))

**[[3-4-16-1]]**
अ॒क्ष॒रा॒जाय॑ कित॒वम्।
कृ॒ताय॑ सभा॒विन॑म्।
त्रेता॑या आदिनवद॒र्शम्।
द्वा॒प॒राय॑ बहिः॒सद॑म्।
कल॑ये सभास्था॒णुम्।

दु॒ष्कृ॒ताय॑ च॒रका॑चार्यम्।
अ॒ध्व॑ने ब्रह्मचा॒रिण॑म्।
पि॒शा॒चेभ्यः॑ सैल॒गम्।
पि॒पा॒सायै॑ गोव्य॒च्छम्।
निर्ऋ॑त्यै गोघा॒तम्।
क्षु॒धे गो॑विक॒र्तम्।
क्षु॒त्तृ॒ष्णाभ्यां॒ तम्।
यो गां वि॒कृन्त॑न्तं मा॒ꣳसं भिक्ष॑माण उप॒तिष्ठ॑ते॥ १॥ ॥ १६॥

((a̱kṣa̱rā̱jāya̍ kita̱vam ।
kṛ̱tāya̍ sabhā̱vinā̎m ।
tretā̍yā ādinavada̱rśam ।
dvā̱pa̱rāya̍ bahiḥ̱sadā̎m ।
kalā̍ye sabhāsthā̱ṇum ।
du̱ṣkṛ̱tāya̍ ca̱rakā̍cāryam ।
adhvā̍ne brahmaca̱riṇā̎m ।
pi̱śā̱cebhya̍ḥ saila̱gam ।
pi̱pā̱sāyai̍ govya̱ccham ।
nirṛ̍tyai goghā̱tam ।
kṣu̱dhe go̍vika̱rtam ।
kṣu̱ttṛ̱ṣṇābhyā̱m tam ।
yo gāṃ vi̱kṛnta̍ntaṃ mā̱m̐saṃ bhikṣa̍māṇa upa̱tiṣṭha̍te ॥ 1 ॥ ॥ 16 ॥))

**[[3-4-17-1]]**

भूम्यै॑ पीठस॒र्पिण॒मालभ॑ते।
अ॒ग्नयेऽꣳस॒लम्।
वा॒यवे॑ चाण्डा॒लम्।
अ॒न्तरि॑क्षाय वꣳशन॒र्तिन॑म्।
दि॒वे ख॑ल॒तिम्।
सूर्या॑य हर्य॒क्षम्।
च॒न्द्रम॑से मिर्मि॒रम्।
नक्ष॑त्रेभ्यः कि॒लास॑म्।
अह्ने॑ शु॒क्लं पि॑ङ्ग॒लम्।
रात्रि॑यै कृ॒ष्णं पि॑ङ्गा॒क्षम्॥ १॥ ॥ १७॥

((bhūmyai̍ pīṭhasa̱rpiṇa̱mālā̍bhate ।
a̱gnaye'm̐sa̱lam ।
vā̱yave̍ cāṇḍā̱lam ।
a̱ntari̍kṣāya vam̐śana̱rtinā̎m ।
di̱ve khā̍la̱tim ।
sūryā̍ya harya̱kṣam ।
ca̱ndramā̍se mirmi̱ram ।
nakṣā̍trebhyaḥ ki̱lāsā̎m ।
ahne̍ śu̱klaṃ pi̍ṅga̱lam ।
rātri̍yai kṛ̱ṣṇaṃ pi̍ṅgā̱kṣam ॥ 1 ॥ ॥ 17 ॥))

**[[3-4-18-1]]**

वा॒चे पुरु॑ष॒मालभ॑ते।
प्रा॒णम॑पा॒नं व्या॒नमु॑दा॒नꣳ स॑मा॒नं ता॒न्वाय॒वे॑।
सूर्या॑य॒ चक्षु॒राल॑भते।
मन॑श्च॒न्द्रम॑से।
दि॒ग्भ्यः श्रोत्र॑म्।
प्र॒जाप॑तये॒ पुरु॑षम्॥ १॥ ॥ १८॥

((vā̱ce puru̍ṣa̱mālā̍bhate ।
prā̱ṇamā̍pā̱naṃ vyā̱namu̍dā̱nam̐ sa̍mā̱naṃ
tā̱nvā̱yave̎ ।
sūryā̍ya̱ cakṣu̱rālā̍bhate ।
manā̍ścandramā̍se ।
di̱gbhyaḥ śrotrā̎m ।
pra̱jāpa̍taye̱ puru̍ṣam ॥ 1 ॥ ॥ 18 ॥))

**[[3-4-19-1]]**

अ॒थै॒तान॒रू॑पेभ्य॒ आल॑भते।
अति॑ह्रस्व॒मति॑दीर्घम्।
अति॑कृ॒शमत्य॑ꣳसलम्।
अति॑शुक्ल॒मति॑कृष्णम्।
अति॑श्लक्ष्ण॒मति॑लोमशम्।
अति॑किरि॒टमति॑दन्तुरम्।
अति॑मिर्मिर॒मति॑मेमिषम्।
आ॒शायै॑ जा॒मिम्।
प्र॒तीक्षायै॑ कुमा॒रीम्॥ १॥ ॥ १९॥

((atha̱itānaru̍pebhya̱ ālā̍bhate ।
ati̍hrasva̱mati̍dīrgham ।
ati̍kṛśa̱matyam̐salam ।
ati̍śukla̱matikṛṣṇam ।
ati̍ślakṣṇa̱matilomaśam ।
ati̍kiriṭa̱mati̍danturam ।
ati̍mirmira̱matimemiṣam ।
ā̱śāyai̍ jā̱mim ।
pra̱tīkṣāyai̍ kumā̱rīm ॥ 1 ॥ ॥ 19 ॥))

# Taittirīya-Brāhmaṇa
# Book 3, Chapter 5

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[3-5-1-1]]**

स॒त्यं प्रप॑द्ये।

ऋ॒तं प्रप॑द्ये।

अ॒मृतं॒ प्रप॑द्ये।

प्र॒जाप॑तेः प्रि॒यां त॒नुव॒मना᳚र्तां॒ प्रप॑द्ये।

इ॒दम॒हं प॑ञ्चद॒शेन॒ वज्रे॑ण।

द्वि॒षन्तं॒ भ्रातृ॒व्य॒मव॑क्रामामि।

यो᳚ऽस्मान्द्वेष्टि॑।

यं च॑ व॒यं द्वि॒ष्मः।

भूर्भुवः॒ सुवः॑।

हिम्॥ १॥

स॒त्यं दश॑॥ १॥

((sa̱tyaṃ prapádye ।
ṛ̱taṃ prapádye ।
a̱mṛtaṃ̱ prapádye ।
pra̱jāpáteḥ pri̱yāṃ ta̱nuva̱manā̋rtāṃ̱ prapádye ।
i̱dama̱haṃ páñcada̱śena̱ vajréṇa ।
dvi̱ṣantaṃ̱ bhrātṛ̱vya̱mavákrāmāmi ।
yő'smāndveṣṭí ।
yaṃ cá va̱yaṃ dvi̱ṣmaḥ ।
bhūrbhuva̱ḥ suváḥ ।
him ॥ 1 ॥
sa̱tyaṃ daśá ॥ 1 ॥))

**[[3-5-2-1]]**

प्र वो॒ वाजा॑ अ॒भिद्य॑वः।

ह॒विष्म॑न्तो घृ॒ताच्या᳚।

दे॒वाञ्जि॑गाति सुम्न॒युः।

अग्न॒ आया॑हि वी॒तये᳚।

गृ॒णा॒नो ह॒व्यदा॑तये।

निहोता॑ सत्सि ब॒र्हिषि॑।

तं त्वा॑ स॒मिद्भि॑रङ्गिरः।

घृ॒तेन॑ वर्धयामसि।

बृ॒हच्छो॑चा यविष्ठ्य।

स नः॑ पृ॒थु श्र॒वाय्य᳚म्॥ १॥

((pra vo̱ vājā́ a̱bhidyávaḥ ।
ha̱viṣmánto ghṛ̱tācyā̋ ।
de̱vāñjígāti sumna̱yuḥ ।
agna̱ āyáhi vī̱taye̋ ।
gṛ̱ṇā̱no ha̱vyadátaye ।
nihotá satsi ba̱rhiṣí ।
taṃ tvá sa̱midbhíraṅgiraḥ ।
ghṛ̱tena vardhayāmasi ।
bṛ̱hacchócā yaviṣṭhya ।
sa náḥ pṛ̱thu śra̱vāyyam̐ ॥ 1 ॥))

**[[3-5-2-2]]**

अच्छा॑ देव विवाससि।

बृ॒हद॑ग्ने सु॒वीर्य᳚म्।

ई॒डेन्यो॑ नम॒स्य॑स्ति॒रः।

तमा॑ꣳसि दर्श॒तः।

सम॒ग्निरि॑ध्यते॒ वृषा᳚।

वृषो॑ अ॒ग्निः समि॑ध्यते।

अश्वो॒ न दे॑व॒वाह॑नः।

तꣳ ह॒विष्म॑न्त ईडते।

वृष॑णं त्वा व॒यं वृषन्॑।

वृषा॑णः॒ समि॑धीमहि॥ २॥

((acchá deva vivāsasi ।
bṛ̱hadágne su̱vīrya̋m ।
ī̱denyó nama̱syásti̱raḥ ।
tamā́ṃsi darśa̱taḥ ।
sama̱gniríddhyate̱ vṛṣā̋ ।
vṛṣó a̱gniḥ samíddhyate ।
aśvo̱ na déva̱vāhánaḥ ।
taṃ́ ha̱viśmánta īḍate ।
vṛṣáṇaṃ tvā va̱yaṃ vṛṣaṅ́ ।
vṛṣā́ṇa̱ḥ samídhīmahi ॥ 2 ॥))

**[[3-5-2-3]]**

अग्ने॑ दी॒द्यतं॑ बृ॒हत्।

अ॒ग्निं दू॒तं वृ॑णीमहे।

होता॑रं वि॒श्ववे॑दसम्।

अ॒स्य य॒ज्ञस्य॑ सु॒क्रतु᳚म्।

स॒मि॒ध्यमा॑नो अध्व॒रे।

अ॒ग्निः पा॑वक ईड्यः॑।

शो॒चिष्के॑शस्तमी॑महे।

समि॑द्धो अग्न आहुत।

दे॒वान्य॑क्षि स्वध्वर।
त्वꣳ हि ह॑व्य॒वाड॒सि॑।
आ॒जु॑होत दुव॒स्यत॑।
अ॒ग्निं प्र॑य॒त्य॑ध्व॒रे।
वृ॒णी॒ध्वꣳ ह॑व्य॒वाह॑नम्।
त्वं वरु॑ण उ॒त मि॒त्रो अ॑ग्ने।
त्वां व॑र्धन्ति म॒तिभि॒र्वसि॑ष्ठाः।
त्वे वसु॑ सुष॒ण॒नानि॑ सन्तु।
यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः॥ ३॥
श्र॒व॒य्य॑मिधीम॒ह्यसि॑ स॒प्त च॑॥ २॥

((agne̱ dīdya̍taṃ bṛ̱hat ।
a̱gniṃ dū̱taṃ vṛ̍ṇīmahe ।
hotā̍raṃ vi̱śvave̍dasam।
a̱sya ya̱jñasya̍ su̱kratū̎m ।
sa̱mi̱ddhyamā̍no adhva̱re ।
a̱gniḥ pā̍va̱ka ī̱ḍya̍ḥ ।
śo̱ci̱ṣke̍śa̱stamī̎mahe ।
sami̍ddho agna āhuta ।
de̱vānya̍kṣi svadhvara ।
tvam̐ hi ha̍vya̱vāḍa̱si̍ ।
ā̱ju̍hota duva̱syata̍ ।
a̱gniṃ pra̍ya̱tya̍dhva̱re ।
vṛ̱ṇī̱dhvam̐ ha̍vya̱vāha̍nam।
tvaṃ varu̍ṇa u̱ta mi̱tro a̍gne ।
tvāṃ va̍rdhanti ma̱tibhi̱rvasi̍ṣṭhāḥ ।
tve vasu̍ su̱ṣa̱ṇa̱nāni̍ santu ।
yū̱yaṃ pā̍ta sva̱stibhi̱ḥ sadā̍ naḥ ॥ 3 ॥
śra̱va̱yya̍midhīma̱hyasi̍ sa̱pta ca̍ ॥ 2 ॥))

**[[3-5-3-1]]**

अग्ने॑ म॒हाꣳ अ॑सि ब्राह्मण भारत।
अ॒सा॒व॒सौॎ।
दे॒वेद्धो॒ मन्वि॑द्धः।
ऋषि॑ष्टुतो॒ विप्रा॑नुमदितः।
क॒वि॒श॒स्तो ब्रह्म॑सꣳशितो घृ॒ताह॑वनः।
प्र॒णीर्य॒ज्ञाना᳚म्।
र॒थीर॑ध्व॒राणा᳚म्।
अ॒तूर्तो॒ होता᳚।
तूर्णि॑र्हव्य॒वाट्।
आस्पात्रं॑ जु॒हूर्दे॒वाना᳚म्॥ १॥

((agne̍ ma̱hām̐ a̍si brāhmaṇa bhārata ।
asā̱vasau̎ ।
de̱veddho̱ manvi̍ddhaḥ ।
ṛṣi̍ṣṭuto̱ viprā̍numaditaḥ ।
ka̱vi̱śa̱sto brahma̍saṁśito ghṛ̱tāha̍vanaḥ ।
pra̱ṇīrya̱jñānā̎m ।
ra̱thīra̍dhva̱rāṇā̎m ।
a̱tūrto̱ hotā̎ ।
tūrṇi̍rhavya̱vāṭ ।
āspātraṃ̍ ju̱hūrde̱vānā̎m ॥ 1 ॥))

**[[3-5-3-2]]**

च॒म॒सो दे॑व॒पान॑ः।
अ॒राꣳ इ॑वाग्ने ने॒मिर्दे॒वाꣳस्त्वं प॑रि॒भूर॑सि।
आव॑ह दे॒वान्यज॑मानाय।
अ॒ग्निम॑ग्न॒ आव॑ह।
सोम॒माव॑ह।
अ॒ग्निमाव॑ह।
प्र॒जाप॑ति॒माव॑ह।
अ॒ग्नीषोमा॒वाव॑ह।
इ॒न्द्रा॒ग्नी आव॑ह।
इ॒न्द्र॒माव॑ह।
म॒हे॒न्द्रमाव॑ह।
दे॒वाꣳ आ᳚ज्य॒पाꣳ आव॑ह।
अ॒ग्निꣳ हो॒त्रायाव॑ह।
स्वं म॑हि॒मान॒माव॑ह।
आ चा᳚ग्ने दे॒वान्व॑ह।
सु॒यजा॑ च यज जातवेदः॥ २॥
दे॒वाना॒मिन्द्र॒माव॑ह॒ षट्च॑॥ ३॥

((ca̱ma̱so de̍va̱pānā̍ḥ ।
a̱rām̐ i̍vāgne ne̱mirde̱vām̐stvaṃ pa̍ri̱bhūra̍si ।
āva̍ha de̱vānyaja̍mānāya ।
a̱gnima̍gna̱ āva̍ha ।
soma̱māva̍ha ।
a̱gnimāva̍ha ।
pra̱jāpa̍ti̱māva̍ha ।
a̱gnīṣo̱mā̱vāva̍ha ।
i̱ndrā̱gnī āva̍ha ।
indra̱māva̍ha ।
ma̱he̱ndramāva̍ha ।
de̱vām̐ ā̎jya̱pām̐ āva̍ha ।
a̱gnim̐ ho̱trāyāva̍ha ।
svaṃ ma̍hi̱māna̱māva̍ha ।
ā cā̎gne de̱vānva̍ha ।
su̱yajā̍ ca yaja jātavedaḥ ॥ 2 ॥
de̱vānā̱mindra̱māva̍ha̱ ṣaṭca̍ ॥ 3 ॥))

**[[3-5-4-1]]**

अ॒ग्निर्होता॑ वे॒त्व॒ग्निः।

हो॒त्रं वे॑त्तु प्रावि॒त्रम्।
स्मो व॒यम्।
सा॒धु ते॑ यजमान दे॒वता॑।
घृ॒तव॑तीमध्वर्यो॒ स्रु॒चमास्य॑स्व।
दे॒वा॒यु॒वं॑ वि॒श्ववा॑राम्।
ईडा॑महै दे॒वाꣳ ई॒डेऽन्या॑न्।
न॒म॒स्यामा॑ नम॒स्या॑न्।
यजा॑म य॒ज्ञिया॑न्॥ १॥
अ॑ग्निर्हो॑ता॒ नव॑॥ ४॥

((a̱gnirhotā̱ vetva̱gniḥ ।
ho̱traṃ ve͡ttu prāvi̱tram ।
smo va̱yam ।
sā̱dhu te̍ yajamāna de̱vatā͡ ।
ghṛ̱tava̍tīmadhvaryo̱ sruca̱māsya̍sva ।
de̱vā̱yuvaṃ̍ vi̱śvava̍rām ।
īḍa̍mahai de̱vāꣳ̍ ī̱ḍe'nyān̍ ।
na̱ma̱syāma̍ nama̱syān̍ ।
yaja̍ma ya̱jñiyān̍ ॥ 1 ॥
a̍gnirhotā̱ nava̍ ॥ 4 ॥))

**[[3-5-5-1]]**
स॒मिधो॑ अग्न आज्य॑स्य वियन्तु।
तनू॒नपा॑दग्न आज्य॑स्य वेतु।
इ॒डो अ॑ग्न आज्य॑स्य वियन्तु।
ब॒र्हिर॑ग्न आज्य॑स्य वेतु।
स्वाहा॒ऽग्निम्।
स्वाहा॒ सोम॑म्।
स्वाहा॒ऽग्निम्।
स्वाहा॑ प्र॒जाप॑तिम्।
स्वाहा॒ग्नीषोमौ॑।
स्वाहे॑न्द्रा॒ग्नी।
स्वाहेन्द्र॑म्।
स्वाहा॑ म॒हेन्द्रम्।
स्वाहा॑ दे॒वाꣳ आ॑ज्य॒पान्।
स्वाहा॒ऽग्निꣳ हो॒त्राज्जु॑षा॒णाः।
अग्न आज्य॑स्य वियन्तु॥ १॥
इ॒न्द्रा॒ग्नी पञ्च॑ च॥ ५॥

((sa̱midho̍ agna̱ ājya̍sya viyantu ।
tanū̱napa̍dagna̱ ājya̍sya vetu ।
i̱ḍo a̍gna̱ ājya̍sya viyantu ।
ba̱rhira̍gna̱ ājya̍sya vetu ।
svāhā̱'gnim ।
svāhā̱ soma͡m ।
svāhā̱'gnim।
svāhā͡ pra̱jāpa̍tim ।
svāhā̱gnīṣomau͡ ।
svāhe͡ndrā̱gnī ।
svāhendra͡m ।
svāhā̍ mahe̱ndram ।
svāhā̍ de̱vāꣳ̍ ā͡jya̱pān ।
svāhā̱'gniꣳ̍ ho̱trājju̍ṣā̱ṇāḥ ।
agna̱ ājya̍sya viyantu ॥ 1 ॥
i̱ndrā̱gnī pañca̍ ca ॥ 5 ॥))

**[[3-5-6-1]]**
अ॒ग्निर्वृ॒त्राणि॑ जङ्घनत्।
द्र॒वि॒ण॒स्युर्वि॑प॒न्यया॑।
समि॑द्धः शु॒क्र आहु॑तः।
जु॒षा॒णो अ॒ग्निराज्य॑स्य वेतु।
त्वꣳ सो॑मासि॒ सत्प॑तिः।
त्वꣳ राजो॒त वृ॒त्रहा।
त्वं भ॒द्रो अ॑सि॒क्रतुः॑।
जु॒षा॒णः सोम॒ आज्य॑स्य ह॒विषो॑ वेतु।
अ॒ग्निः प्र॒त्नेन॒ जन्म॑ना।
शुम्भा॑नस्त॒नुव॒ꣳ स्वाम्।
क॒विर्विप्रे॑ण वावृधे।
जु॒षा॒णो अ॒ग्निराज्य॑स्य वेतु।
सोम॑ गी॒र्भिष्ट्वा॑ व॒यम्।
व॒र्धया॑मो वचो॒विदः॑।
सु॒मृ॒डी॒को न॒ आवि॑श।
जु॒षा॒णः सोम॒ आज्य॑स्य ह॒विषो॑ वेतु॥ १॥
स्वाꣳ षट्च॑॥ ६॥

((a̱gnirvṛ̱trāṇi̍ jaṅghanat ।
dra̱vi̱ṇa̱syurvi̍pa̱nyayā͡ ।
sami̍ddhaḥ śu̱kra āhu̍taḥ ।
ju̱ṣā̱ṇo a̱gnirājya̍sya vetu ।
tvaꣳ̍ so̍māsi̱ satpa̍tiḥ ।
tvaꣳ̍ rājo̱ta vṛ̍tra̱hā ।
tvaṃ bha̱dro a̍si̱kratu̍ḥ ।
ju̱ṣā̱ṇaḥ soma̱ ājya̍sya ha̱viṣo̍ vetu ।
a̱gniḥ pra̱tnena̱ janma̍nā ।
śumbhā̍nasta̱nuva̱ꣳ͡ svām ।
ka̱virvipre̍ṇa vāvṛ̱dhe ।
ju̱ṣā̱ṇo a̱gnirājya̍sya vetu ।
soma̍ gīrbhiṣṭvā͡ va̱yam ।
va̱rdhayā̍mo vaco̱vida̍ḥ ।

su̱mṛ̱ḍīko na̱ āvi̍śa ।
ju̱ṣā̱ṇaḥ soma̱ ājya̍sya ha̱viṣo̍ vetu ॥ 1 ॥
svām̐ ṣa̱ṭca̍ ॥ 6 ॥))

**[[3-5-7-1]]**

अ॒ग्निर्मू॒र्धा दि॒वः क॒कुत्।
पति॑ः पृथि॒व्या अ॒यम्।
अ॒पाꣳ रेता॑ꣳसि जिन्वति।
भुवो॑ य॒ज्ञस्य॒ रज॑सश्च ने॒ता।
यत्रा॑ नि॒युद्भि॒ः सच॑से शि॒वाभि॑ः।
दि॒वि मू॒र्धान॑ं दधिषे सुव॒र्षाम्।
जि॒ह्वाम॑ग्ने चकृषे हव्य॒वाह᳚म्।
प्रजा॑पते॒ न त्वदे॒तान्य॒न्यः।
विश्वा॑ जा॒तानि॒ परि॒ ता ब॑भूव।
यत्का॑मास्ते जुहु॒मस्तन्नो॑ अस्तु॥ १॥

((a̱gnirmū̱rdhā di̱vaḥ ka̱kut ।
pati̍ḥ pṛthi̱vyā a̱yam ।
a̱pām̐ retā̍m̐si jinvati ।
bhuvo̍ ya̱jñasya̱ raja̍saśca ne̱tā ।
yatrā̍ ni̱yudbhi̱ḥ saca̍se śi̱vābhi̍ḥ ।
di̱vi mū̱rdhāna̍ṃ dadhiṣe suva̱rṣām ।
ji̱hvāma̍gne cakṛṣe havya̱vāhā̎m ।
prajā̍pate̱ na tvade̱tānya̱nyaḥ ।
viśvā̍ jā̱tāni̱ pari̱ tā ba̍bhūva ।
yatkā̍māste juhu̱mastanno̍ astu ॥ 1 ॥))

**[[3-5-7-2]]**

व॒यꣳ स्या॑म॒ पत॑यो रयी॒णाम्।
स वे॑द पु॒त्रः पि॒तर॒ꣳ॒ स मा॒तर᳚म्।
स सू॒नुर्भुव॑त्स॒ भुव॑त्पुन॑र्मघः।
स द्यामौर्णो॑द॒न्तरि॑क्ष॒ꣳ॒ स सुव॑ः।
स विश्वा॒ भुवो॑ अभव॒त्स आभ॑वत्।
अ॒ग्नीषो॑मा॒ सवे॑दसा।
सहू॑ती वन॒तं गिर॑ः।
सं दे॑व॒त्रा ब॑भूवथुः।
यु॒वमे॒तानि॑ दि॒वि रो॑च॒नानि॑।
अ॒ग्निश्च॑ सोम॒ सक्र॑तू अधत्तम्॥ २॥

((va̱yam̐ syā̍ma̱ pata̍yo rayī̱ṇām ।
sa ve̍da pu̱traḥ pi̱tara̱m̐ sa mā̱tarā̎m ।
sa sū̱nurbhu̍va̱tsa bhu̍va̱tpuna̍rmaghaḥ ।
sa dyāmaurṇo̍da̱ntari̍kṣa̱m̐ sa suva̍ḥ ।
sa viśvā̱ bhuvo̍ abhava̱tsa ābha̍vat ।
a̱gnī̍ṣo̱mā̱ save̍dasā ।
sahū̍tī vana̱taṃ gira̍ḥ ।
saṃ de̍va̱trā ba̍bhūvathuḥ ।
yu̱vame̱tāni̍ di̱vi ro̍ca̱nāni̍ ।
a̱gniśca̍ soma̱ sakra̍tū adhattam ॥ 2 ॥))

**[[3-5-7-3]]**

यु॒वꣳ सिन्धू॑ꣳर॒भिश॑स्तेरव॒द्यात्।
अ॒ग्नीषो॑मा॒वमु॑ञ्चतं गृभी॒तान्।
इन्द्रा᳚ग्नी रोच॒ना दि॒वः।
परि॒ वाजे॑षु भूषथः।
तद्वा᳚ञ्चेति॒ प्रवी॒र्य᳚म्।
श्नथ॑द्वृ॒त्रमु॒त सनो॑ति॒ वाज᳚म्।
इन्द्रा॒यो अ॒ग्नी सहु॑री सप॒र्यात्।
इ॒र॒ज्यन्ता॑ वस॒व्य॑स्य॒ भूरे᳚ः।
सह॑स्तमा॒ सह॑सा वा॒जयन्ता᳚।
एन्द्र॑ साना॒सिꣳ र॒यिम्॥ ३॥

((yu̱vam̐ sindhū̍m̐ra̱bhiśa̍steravadyāt ।
agnī̱ṣomā̱vamu̍ñcataṃ gṛbhī̱tān ।
indrā̎gnī roca̱nā di̱vaḥ ।
pari̱ vāje̍ṣu bhūṣathaḥ ।
tadvā̎ñceti̱ pravī̱ryā̎m ।
śnatha̍dvṛ̱tramu̱ta sano̍ti̱ vājā̎m ।
indrā̱yo a̱gnī sahu̍rī sapa̱ryāt ।
i̱rajyantā̍ vasa̱vya̍sya̱ bhūre̎ḥ ।
saha̍stamā̱ saha̍sā vāja̱yantā̎ ।
endra̍ sāna̱sim̐ ra̱yim ॥ 3 ॥))

**[[3-5-7-4]]**

स॒जित्वा॑नꣳ सदा॒सह᳚म्।
वर्षि॑ष्ठमू॒तये॑ भर।
प्रस॑साहिषे पुरुहू॒त शत्रू॑न्।
ज्येष्ठ॑स्ते॒ शुष्म॑ इ॒ह रा॒तिर॑स्तु।
इन्द्राभ॑र॒ दक्षि॑णेना॒ वसू॑नि।
पति॒ः सिन्धू॑नामसि रे॒वती॑नाम्।
म॒हाꣳ इन्द्रो॒ य ओज॑सा।
प॒र्जन्यो॑ वृष्टि॒माꣳ इ॑व।
स्तोमै᳚र्व॒त्सस्य॑ वावृधे।
म॒हाꣳ इन्द्रो॑ नृ॒वदाच॑र्षणि॒प्राः॥ ४॥

((sa̱jitvā̍nam̐ sadā̱sahā̎m ।
varṣi̍ṣṭhamū̱taye̍ bhara ।
prasa̍sāhiṣe puruhū̱ta śatrū̍n ।
jyeṣṭha̍ste̱ śuṣma̍ i̱ha rā̱tira̍stu ।
indrābha̍ra̱ dakṣi̍ṇenā̱ vasū̍ni ।

pati̱ḥ sindhū̍nāmasi re̱vatī̍nām ।
ma̱hām̐ indro̱ ya ojа̍sā ।
pa̱rjanyo̍ vṛ̱ṣṭi̱mām̐ i̍va ।
stomai̎rva̱tsasya̍ vāvṛdhe ।
ma̱hām̐ indro̍ nṛ̱vadācа̍rṣaṇi̱prāḥ ॥ 4 ॥))

**[[3-5-7-5]]**

उ॒त द्वि॒बर्हा᳚ अमि॒नः सहो॑भिः ।
अ॒स्म॒द्रि॒यग्वा॑वृधे वी॒र्या॑य ।
उ॒रुः पृ॒थुः सु॒कृ॑तः क॒र्तृभि॑र्भूत् ।
पि॒प्री॒हि दे॒वाꣳ उ॑श॒तो य॑विष्ठ ।
वि॒द्वाꣳ ऋ॒तूꣳर्ऋ॑तुपते यजे॒ह ।
ये दैव्या॑ ऋ॒त्विज॒स्तेभि॑रग्ने ।
त्वꣳ होतॄ॑णाम॒स्या य॑जिष्ठः ।
अ॒ग्निꣴ स्वि॑ष्ट॒कृत॑᳚म् ।
अया॑ड॒ग्निर॒ग्नेः प्रि॒या धामा॑नि ।
अया॒ट्त्सोम॑स्य प्रि॒या धामा॑नि ॥ ५ ॥

((u̱ta dvi̱barhā̍ ami̱naḥ saho̍bhiḥ ।
a̱sma̱driya̍gvāvṛdhe vī̱ryā̍ya ।
u̱ruḥ pṛ̱thuḥ sukṛ̍taḥ ka̱rtṛbhi̍rbhūt।
pi̱prī̱hi de̱vām̐ u̍śa̱to ya̍viṣṭha ।
vi̱dvām̐ ṛ̱tūm̐rṛ̍tupate yaje̱ha ।
ye daivyā̍ ṛ̱tvija̱stebhi̍ragne ।
tvam̐ hotṝ̍ṇāma̱syā ya̍jiṣṭhaḥ ।
a̱gnim̐ svi̍ṣṭa̱kṛtā̎m ।
ayā̍ḍa̱gnira̱gneḥ pri̱yā dhāmā̍ni ।
ayā̱ṭtsoma̍sya pri̱yā dhāmā̍ni ॥ 5 ॥))

**[[3-5-7-6]]**

अया॑ड॒ग्नेः प्रि॒या धामा॑नि ।
अया᳚ट्प्र॒जाप॑तेः प्रि॒या धामा॑नि ।
अया॑ड॒ग्नीषोम॑योः प्रि॒या धामा॑नि ।
अया॑डिन्द्रा॒ग्नियोः प्रि॒या धामा॑नि ।
अया॒डिन्द्र॑स्य प्रि॒या धामा॑नि ।
अया᳚ण्महे॒न्द्रस्य॑ प्रि॒या धामा॑नि ।
अया᳚ड्दे॒वाना॑माज्य॒पाना᳚ं प्रि॒या धामा॑नि ।
यक्ष॑द॒ग्नेर्होतुः॑ प्रि॒या धामा॑नि ।
यक्ष॒त्स्वं म॑हि॒माना᳚म् ।
आय॑जता॒मेज्या॒ इषः॑ ।
कृ॒णोतु॒ सो अ॑ध्व॒रा जा॒तवे॑दाः ।
जु॒षताꣳ॑ ह॒विः ।
अग्ने॒ यद॒द्य वि॒शो अ॑ध्वरस्य होतः ।
पाव॑क शोचे वेष्ट्वꣳ हि यज्वा᳚ ।
ऋ॒ता य॑जासि महि॒ना वियद्भूः ।
ह॒व्या व॑ह यविष्ठया ते॑ अ॒द्य ॥ ६ ॥
अ॒स्त्व॒धत्त॒ꣳ र॒यिं च॑र्षणि॒प्रास्सोमा॑स्य प्रि॒या
धामा॒नीष॒ष्ष॑ट्च ॥ ७ ॥

((ayа̍ḍa̱gneḥ pri̱yā dhāmа̍ni ।
ayā̎ṭpra̱jāpа̍teḥ pri̱yā dhāmа̍ni ।
ayа̍ḍa̱gnīṣomа̍yoḥ pri̱yā dhāmа̍ni ।
ayа̍ḍindrāgni̱yoḥ pri̱yā dhāmа̍ni ।
ayā̱ḍi̱ndrа̍sya pri̱yā dhāmа̍ni ।
ayā̎ṇmahe̱ndrasyа̍ pri̱yā dhāmа̍ni ।
ayā̎ḍde̱vānа̍māmājya̱pānā̎m̐ pri̱yā dhāmа̍ni ।
yakṣа̍da̱gnerhotúḥ pri̱yā dhāmа̍ni ।
yakṣa̱tsvaṃ mа̍hi̱mānā̎m ।
āyа̍jatā̱mejyā̱ iṣа̍ḥ ।
kṛ̱ṇotu̱ so а̍dhva̱rā jā̱tavе̍dāḥ ।
ju̱ṣatām̐ ha̱viḥ ।
agne̱ yada̱dya vi̱śo а̍dhvarasya hotaḥ ।
pāvа̍ka śoce̱ veṣṭvam̐ hi yajvā̎ ।
ṛ̱tā yа̍jāsi mahi̱nā viyadbhūḥ ।
ha̱vyā vа̍ha yavi̱ṣṭha̱yā tе̍ a̱dya ॥ 6 ॥
a̱stva̱dhatta̱m̐ ra̱yiṃ cа̍rṣa̱ṇi̱prāssomа̍sya pri̱yā
dhāmā̱nīṣa̱ṣṣaṭcа̍ ॥ 7 ॥))

**[[3-5-8-1]]**

उप॑हूतꣳ रथन्त॒रꣳ स॒ह पृ॑थि॒व्या ।
उप॑ मा रथन्त॒रꣳ स॒ह पृ॑थि॒व्या ह्व॑यताम् ।
उप॑हूतं वामदे॒व्यꣳ स॒हान्तरि॑क्षेण ।
उप॑ मा वामदे॒व्यꣳ स॒हान्तरि॑क्षेण ह्वयताम् ।
उप॑हूतं बृ॒हत्स॒ह दि॒वा ।
उप॑ मा बृ॒हत्स॒ह दि॒वा ह्व॑यताम् ।
उप॑हूताः स॒प्त होत्रा᳚ः ।
उप॑ मा स॒प्तहोत्रा᳚ ह्वयन्ताम् ।
उप॑हूता धे॒नुः स॒हर्ष॑भा ।
उप॑ मा धे॒नुः स॒हर्ष॑भा ह्वयताम् ॥ १ ॥

((upа̍hūtam̐ rathanta̱ram̐ sa̱ha pṛ̍thi̱vyā ।
upа̍ mā rathanta̱ram̐ sa̱ha pṛ̍thi̱vyā hvа̍yatām ।
upа̍hūtaṃ vāmade̱vyam̐ sa̱hāntarі̍kṣeṇa ।
upа̍ mā vāmade̱vyam̐ sa̱hāntarі̍kṣe̱ṇa hvayatām ।
upа̍hūtaṃ bṛ̱hatsa̱ha di̱vā ।
upа̍ mā bṛ̱hatsa̱ha di̱vā hvа̍yatām ।
upа̍hūtāḥ sa̱pta hotrā̎ḥ ।
upа̍ mā sa̱ptahotrā̎ hvayantām ।
upа̍hūtā dhe̱nuḥ sa̱harṣа̍bhā ।
upа̍ mā dhe̱nuḥ sa̱harṣа̍bhā hvayatām ॥ 1 ॥))

**[[3-5-8-2]]**

उप॑हूतो भ॒क्षः सखा᳚।
उप॑ मा भ॒क्षः सखा᳚ ह्वयताम्।
उप॑हू॒ताँ॒४ हो॑।
इडोप॑हूता।
उप॑हू॒तेडा᳚।
उपो॑ अ॒स्माꣳ इडा᳚ ह्वयताम्।
इडोप॑हूता।
उप॑हू॒तेडा᳚।
मा॒नवी घृ॒तप॑दी मैत्रावरु॒णी।
ब्रह्म॑दे॒वकृ॑त॒मुप॑हूतम्॥ २॥

((upahūto bhakṣaḥ sakhā̎ ǀ
upa mā bhakṣaḥ sakhā̎ hvayatāmǀ
upahūtām̐4 ho ǀ
iḍopahūtā ǀ
upahūteḍā̎ ǀ
upo asmām̐ iḍā̎ hvayatāmǀ
iḍopahūtā ǀ
upahūteḍā̎ ǀ
mānavī ghṛtapadī maitrāvaruṇī ǀ
brahmadevakṛtamupahūtam ǁ 2 ǁ))

**[[3-5-8-3]]**

दैव्या॑ अध्व॒र्यव॒ उप॑हूताः।
उप॑हूता मनु॒ष्या᳚ः।
य इ॒मं य॒ज्ञमवा॑न्।
ये य॒ज्ञप॑तिं॒ वर्धा॑न्।
उप॑हू॒ते द्यावा॑पृथि॒वी।
पू॒र्व॒जे ऋ॒तावा॑री।
दे॒वी दे॒वपु॑त्रे।
उप॑हू॒तो॒ऽयं यज॑मानः।
उत्त॑रस्यां देवय॒ज्याया॒मुप॑हूतः।
भूय॑सि ह॒विष्कर॑ण॒ उप॑हूतः।
दि॒व्ये धाम॒न्नुप॑हूतः।
इ॒दं मे॑ दे॒वा ह॒विर्जु॑षन्ता॒मिति॒ तस्मि॒न्नुप॑हूतः।
विश्व॑मस्य प्रि॒यमुप॑हूतम्।
विश्व॑स्य प्रि॒यस्योप॑हू॒तस्योप॑हूतः॥ ३॥
स॒हर्ष॑भा ह्वयता॒मुप॑हूतꣳ ह॒विष्कर॑ण॒ उप॑हूतश्च॒त्वारि॑ च॥ ८॥

((daivyā̎ adhvaryava upahūtāḥ ǀ
upahūtā manuṣyā̎ḥ ǀ
ya imaṃ yajñamavān ǀ
ye yajñapatiṃ vardhān ǀ
upahūte dyāvāpṛthivī ǀ
pūrvaje ṛtāvarī ǀ
devī devaputre ǀ
upahūto'yaṃ yajamānaḥ ǀ
uttarasyāṃ devayajyāyāmupahūtaḥ ǀ
bhūyasi haviṣkaraṇa upahūtaḥ ǀ
divye dhāmannupahūtaḥ ǀ
idaṃ me devā havirjuṣantāmiti tasminnupahūtaḥ ǀ
viśvamasya priyamupahūtam ǀ
viśvasya priyasyopahūtasyopahūtaḥ ǁ 3 ǁ
saharṣabhā hvayatāmupahūtam̐ haviṣkaraṇa upahūtaścatvāri ca ǁ 8 ǁ))

**[[3-5-9-1]]**

दे॒वं ब॒र्हिः।
व॒सु॒वने॑ वसु॒धेय॑स्य वेतु।
दे॒वो न॒राशꣳसः।
व॒सु॒वने॑ वसु॒धेय॑स्य वेतु।
दे॒वो अ॒ग्निः स्वि॑ष्ट॒कृत्।
सु॒द्रवि॑णा म॒न्द्रः क॒विः।
स॒त्यम॑न्माऽऽय॒जी होता᳚।
होतु॒र्हो॑तु॒राय॑जीयान्।
अग्ने॒ यान्दे॒वानया᳚ट्।
याꣳ अपि॑प्रेः।
ये ते॑ हो॒त्रे अम॑त्सत।
ताꣳ स॑सनु॒षीꣳ होत्रा᳚ं दे॒वंग॒माम्।
दि॒वि दे॒वेषु॑ य॒ज्ञमेर॑ये॒मम्।
स्वि॒ष्ट॒कृच्चाग्ने॒ होताऽभूः᳚।
व॒सु॒वने॑ वसु॒धेय॑स्य नमोवा॒के वीहि॑॥ १॥
अपि॑प्रे॒ पञ्च॑ च॥ ९॥

((devaṃ barhiḥ ǀ
vasuvane vasudheyasya vetu ǀ
devo narāśam̐saḥ ǀ
vasuvane vasudheyasya vetu ǀ
devo agniḥ sviṣṭakṛt ǀ
sudraviṇā mandraḥ kaviḥ ǀ
satyamanmā''yajī hotā̎ ǀ
hoturhoturāyajīyān ǀ
agne yāndevānayā̎ṭ ǀ
yām̐ apipreḥ ǀ
ye te hotre amatsata ǀ
tām̐ sasanuṣīm̐ hotrām̐ devaṃgamām ǀ
divi deveṣu yajñamerayemam ǀ
sviṣṭakṛccāgne hotā'bhū̎ḥ ǀ
vasuvane vasudheyasya namovāke vīhi ǁ 1 ǁ

api̍pre̱ pañca̍ ca || 9 ||))

**[[3-5-10-1]]**

इ॒दं द्या॑वापृथिवी भ॒द्रम॑भूत्।
आर्ध्म॑ सूक्तवा॒कम्।
उ॒त न॑मोवा॒कम्।
ऋ॒ध्यास्म॑ सूक्तो॒च्य॑मग्ने।
त्वꣳ सू॑क्तवा॒ग॑सि।
उप॑श्रितो दि॒वः पृ॑थि॒व्योः।
ओम॑न्वती ते॒ऽस्मिन्य॒ज्ञे य॑जमान॒ द्यावा॑पृथि॒वी स्ता᳚म्।
श॒ङ्गये जी॒रदा॑नू।
अत्र॑स्नू अप्र॑वेदे।
उ॒रुग॑व्यूती अभ॒यं कृ॒तौ᳚॥ १॥

((i̱daṃ dya̍vāpṛthivī bha̱drama̍bhūt |
ārdhma̍ sūktavā̱kam |
u̱ta na̍movā̱kam |
ṛ̱dhyāsma̍ sū̱ktocya̍magne |
tvam̐ sū̍kta̱vāga̍si |
upa̍śrito di̱vaḥ pṛ̍thi̱vyoḥ |
oma̍nvatī te̱'sminya̱jñe ya̍jamāna̱ dyāva̍pṛthi̱vī stā̎m |
śa̱ṅgaye jī̱rada̍nū |
atra̍snū̱ apra̍vede |
u̱ruga̍vyūtī abhaya̱ṃ kṛtau̍ || 1 ||))

**[[3-5-10-2]]**

वृ॒ष्टिद्या॑वारी॒त्या॑पा।
श॒म्भुवौ᳚ मयो॒भुवौ᳚।
ऊर्ज॑स्पती च॒ पय॑स्वती च।
सू॒प॒च॒र॒णा च॑ स्वधिच॒र॒णा च॑।
तयो॑रा॒विदि॑।
अ॒ग्निरि॒दꣳ ह॒विर॑जुषत।
अवी॑वृधत॒ मह॒ज्यायो॑ऽकृत।
सोम॑ इ॒दꣳ ह॒विर॑जुषत।
अवी॑वृधत॒ मह॒ज्यायो॑ऽकृत।
अ॒ग्निरि॒दꣳ ह॒विर॑जुषत॥ २॥

((vṛ̱ṣṭidya̍vārī̱tya̍pā |
śa̱mbhuvau̍ mayo̱bhuvau̍ |
ūrja̍spatī ca̱ paya̍svatī ca |
sū̱pa̱ca̱ra̱ṇā ca̍ svadhica̱ra̱ṇā ca̍ |
tayo̍rā̱vidi̍ |
a̱gniri̱dam̐ ha̱vira̍juṣata |
avi̍vṛdhata̱ maho̱jyāyo̍'kṛta |
soma̍ i̱dam̐ ha̱vira̍juṣata |
avi̍vṛdhata̱ maho̱jyāyo̍'kṛta |
a̱gniri̱dam̐ ha̱vira̍juṣata || 2 ||))

**[[3-5-10-3]]**

अवी॑वृधत॒ मह॒ज्यायो॑ऽकृत।
प्र॒जाप॑तिरि॒दꣳ ह॒विर॑जुषत।
अवी॑वृधत॒ मह॒ज्यायो॑ऽकृत।
अ॒ग्नीषोमा॑वि॒दꣳ ह॒विर॑जुषेताम्।
अवी॑वृधेता॒ं मह॒ज्यायो᳚ऽक्राताम्।
इ॒न्द्रा॒ग्नी इ॒दꣳ ह॒विर॑जुषेताम्।
अवी॑वृधेता॒ं मह॒ज्यायो᳚ऽक्राताम्।
इन्द्र॑ इ॒दꣳ ह॒विर॑जुषत।
अवी॑वृधत॒ मह॒ज्यायो॑ऽकृत।
म॒हे॒न्द्र इ॒दꣳ ह॒विर॑जुषत॥ ३॥

((avi̍vṛdhata̱ maho̱jyāyo̍'kṛta |
pra̱jāpa̍tiri̱dam̐ ha̱vira̍juṣata |
avi̍vṛdhata̱ maho̱jyāyo̍'kṛta |
a̱gnīṣoma̍vi̱dam̐ ha̱vira̍juṣetām |
avi̍vṛdhetā̱m maho̱jyāyo̎'krātām |
i̱ndrā̱gnī i̱dam̐ ha̱vira̍juṣetām |
avi̍vṛdhetā̱m maho̱jyāyo̎'krātām |
indra̍ i̱dam̐ ha̱vira̍juṣata |
avi̍vṛdhata̱ maho̱jyāyo̍'kṛta |
ma̱he̱ndra i̱dam̐ ha̱vira̍juṣata || 3 ||))

**[[3-5-10-4]]**

अवी॑वृधत॒ मह॒ज्यायो॑ऽकृत।
दे॒वा आ᳚ज्य॒पा आज्य॑मजुषन्त।
अवी॑वृधन्त॒ मह॒ज्यायो॑ऽक्रत।
अ॒ग्निर्होत्रे॑णे॒दꣳ ह॒विर॑जुषत।
अवी॑वृधत॒ मह॒ज्यायो᳚ऽकृत।
अ॒स्यामृ॒धद्धोत्रा॑यां दे॒वंग॒माया᳚म्।
आशा᳚स्ते॒ऽयं यज॑मानो॒ऽसौ।
आयु॒राशा᳚स्ते।
सु॒प्र॒जा॒स्त्वमाशा᳚स्ते।
स॒जा॒त॒व॒न॒स्यामाशा᳚स्ते॥ ४॥

((avi̍vṛdhata̱ maho̱jyāyo̍'kṛta |
de̱vā ā̎jya̱pā ājya̍majuṣanta |
avi̍vṛdhanta̱ maho̱jyāyo̍'krata |
a̱gnirho̱tre̱ṇe̱dam̐ ha̱vira̍juṣata |
avi̍vṛdhata̱ maho̱jyāyo̎'kṛta |
a̱syāmṛdha̱ddhotra̍yāṃ devaṃga̱māya̎m |

āśa̍ste̱'yaṃ yaja̍māno̱'sau ।
āyu̱rāśa̍̄ste ।
su̱pra̱jā̱stvamāśa̍̄ste ।
sa̱jā̱ta̱va̱na̱syāmāśa̍̄ste ॥ 4 ॥))

**[[3-5-10-5]]**

उत्त॑रां दे॒वय॒ज्यामाशा॑̄स्ते।
भूयो॑ ह॒विष्कर॑ण॒माशा॑̄स्ते।
दि॒व्यं धामाशा॑̄स्ते।
विश्वं॑ प्रि॒यमाशा॑̄स्ते।
यद॒नेन॑ ह॒विषाऽऽशा॑̄स्ते।
तद॑श्या॒त्तदृ॑ध्यात्।
तद॑स्मै दे॒वा रा॑सन्ताम्।
तद॒ग्निर्दे॒वो दे॒वेभ्यो॒ वन॑ते।
व॒यम॒ग्नेर्मानु॑षाः।
इ॒ष्टं च॑ वी॒तं च॑।
उ॒भे च॑ नो॒ द्यावा॑पृथि॒वी अꣳह॑सः स्पाताम्।
इ॒ह गति॑र्वा॒मस्ये॒दं च॑।
नमो॑ दे॒वेभ्य॑ः ॥ ५॥
अ॒भ॒यं॒कृ॒ता॑वकृ॒ता॒ग्नि॒रि॒दꣳ ह॒विर॑जुषत मह॒ेन्द्र इ॒दꣳ
ह॒विर॑जुषत सजातवन॒स्यामाशा॑̄स्ते वी॒तं च॒ त्रीणि॑ च॥
१०॥

((utta̍rāṃ devaya̱jyāmāśa̍̄ste ।
bhūyo̍ ha̱viṣkara̍ṇa̱māśa̍̄ste ।
di̱vyaṃ dhāmāśa̍̄ste ।
viśvaṃ̍ pri̱yamāśa̍̄ste ।
yada̱nena̍ ha̱viṣā''śa̍̄ste ।
tada̍śyā̱ttadṛ̍ddhyāt ।
tada̍smai de̱vā ra̍̄santām ।
tada̱gnirde̱vo de̱vebhyo̱ vana̍te ।
va̱yama̱gnermānu̍ṣāḥ ।
i̱ṣṭa̱ṃ ca̍ vī̱taṃ ca̍ ।
u̱bhe ca̍ no̱ dyāvā̍pṛthi̱vī aꣳha̍saḥ spātām ।
i̱ha gati̍rvā̱masye̱daṃ ca̍ ।
namo̍ de̱vebhya̍ḥ ॥ 5 ॥
a̱bha̱yaṃ̱kṛ̱tā̍vakṛ̱tā̱gniri̱daꣳ ha̱vira̍juṣata mahe̱ndra
i̱daꣳ ha̱vira̍juṣata sajātavana̱syāmāśa̍̄ste vī̱taṃ ca̱
trīṇi̍ ca ॥ 10 ॥))

**[[3-5-11-1]]**

तच्छं॒ योरावृ॑णीमहे।
गा॒तुं य॒ज्ञाय॑।
गा॒तुं य॒ज्ञप॑तये।
दैवी॑̄ स्व॒स्तिर॑स्तु नः।
स्व॒स्तिर्मानु॑षेभ्यः।
ऊ॒र्ध्वं जि॑गातु भेष॒जम्।
शं नो॑ अस्तु द्वि॒पदे॑̄।
शं चतु॑ष्पदे॥ १॥
तच्छं॒योर॒ष्टौ॥ ११॥

((taccha̱ṃ yorāvṛ̍ṇīmahe ।
gā̱tuṃ ya̱jñāya̍ ।
gā̱tuṃ ya̱jñapa̍taye ।
daivī̍̄ sva̱stira̍stu naḥ ।
sva̱stirmānu̍ṣebhyaḥ ।
ū̱rdhvaṃ ji̍gātu bheṣa̱jam ।
śaṃ no̍ astu dvi̱pade̍̄ ।
śaṃ catu̍ṣpade ॥ 1 ॥
tacchaṃ̱yora̱ṣṭau ॥ 11 ॥))

**[[3-5-12-1]]**

आप्या॑यस्व॒ सं ते॑̄।
इ॒ह त्वष्टा॑रमग्रि॒यं तन्न॑स्तु॒रीप॑म्।
दे॒वाना॑ं पत्नी॑रुश॒ती॑रवन्तु नः।
प्राव॑न्तु नस्तु॒जये॒ वाज॑सातये।
याः पार्थि॑वासो॒ या अ॒पामपि॑ व्र॒ते।
ता नो॑ देवीः सुहवा॒ः शर्म॑ यच्छत।
उ॒तग्ना वि॑यन्तु दे॒वप॑त्नीः।
इ॒न्द्रा॒ण्य॑ग्ना॒य्य॑श्विनी॒ राट्।
आ रोद॑सी वरुणा॒नी शृ॑णोतु।
वि॒यन्तु॑ दे॒वीर्य॑ ऋ॒तुर्जनी॑नाम्।।
अ॒ग्निर्होता॑ गृ॒हप॑तिः स राजा॑।
विश्वा॑ वेद॒ जनि॑मा जा॒तवे॑दाः।
दे॒वाना॑मु॒त यो मर्त्या॑नाम्।
यजि॑ष्ठः स प्रय॑जतामृ॒तावा॑।
व॒यमु॑ त्वा गृहपते॒ जना॑नाम्।
अग्ने॒ अक॑र्म स॒मिधा॑ बृ॒हन्त॑म्।
अ॒स्थू॒रिणो॒ गार्ह॑पत्यानि सन्तु।
ति॒ग्मेन॑ न॒स्तेज॑सा॒ सꣳशि॑शाधि॥ १॥
जनी॑नाम॒ष्टौ च॑॥ १२॥

((āpyā̍yasva̱ saṃ te̍̄ ।
i̱ha tvaṣṭā̍ramagri̱yaṃ tanna̍stu̱rīpa̍m ।
de̱vānā̱ṃ patnī̍ruśa̱tīra̍vantu naḥ ।
prāva̍ntu nastu̱jaye̱ vāja̍sātaye ।
yāḥ pārthi̍vāso̱ yā a̱pāmapi̍ vra̱te ।

tā no̍ devīḥ suhavā̱ḥ śarma̍ yacchata ।
u̱tagnā vi̍yantu de̱vapa̍tnīḥ ।
i̱ndrā̱ṇya̍gnāyya̱śvinī̱ rāṭ ।
ā rodaśī varuṇā̱nī śṛ̍ṇotu ।
vi̱yantu̍ de̱vīrya ṛ̱turjani̍nām ।
a̱gnirhota̍ gṛ̱hapa̍ti̱ḥ sa rājā̎ ।
viśva̍ veda̱ jani̍mā jā̱tave̍dāḥ ।
de̱vānā̍mu̱ta yo martyā̍nām ।
yaji̍ṣṭha̱ḥ sa praya̍jatāmṛ̱tāvā̎ ।
va̱yamu̍ tvā gṛhapate̱ janā̍nām ।
agne̱ aka̍rma sa̱midhā̍ bṛ̱hantā̎m ।
a̱sthū̱riṇo̱ gārha̍patyāni santu ।
ti̱gmena̍ na̱steja̍sā̱ saṁśi̍śādhi ॥ 1 ॥
jani̍nāma̱ṣṭau ca̍ ॥ 12 ॥))

**[[3-5-13-1]]**

उप॑हूतꣳ रथन्त॒रꣳ स॒ह पृ॑थि॒व्या।
उप॑ मा रथन्त॒रꣳ स॒ह पृ॑थि॒व्या ह्व॑यताम्।
उप॑हूतं वामदे॒व्यꣳ स॒हान्तरि॑क्षेण।
उप॑ मा वामदे॒व्यꣳ स॒हान्तरि॑क्षेण ह्वयताम्।
उप॑हूतं बृ॒हत्स॒ह दि॒वा।
उप॑ मा बृ॒हत्स॒ह दि॒वा ह्व॑यताम्।
उप॑हूताः स॒प्तहोत्रा॓ः।
उप॑ मा स॒प्तहोत्रा॓ ह्वयन्ताम्।
उप॑हूता धे॒नुः स॒हर्ष॑भा।
उप॑ मा धे॒नुः स॒हर्ष॑भा ह्वयताम्॥ १॥

((upa̍hūtaṁ rathanta̱raṁ sa̱ha pṛ̍thi̱vyā ।
upa̍ mā rathanta̱raṁ sa̱ha pṛ̍thi̱vyā hva̍yatām ।
upa̍hūtaṃ vāmade̱vyaṁ sa̱hāntari̍kṣe̱ṇa ।
upa̍ mā vāmade̱vyaṁ sa̱hāntari̍kṣe̱ṇa hvayatām ।
upa̍hūtaṃ bṛ̱hatsa̱ha di̱vā ।
upa̍ mā bṛ̱hatsa̱ha di̱vā hva̍yatām।
upa̍hūtā̱ḥ sa̱ptahotrā̎ḥ ।
upa̍ mā sa̱ptahotrā̎ hvayantām।
upa̍hūtā dhe̱nuḥ sa̱harṣa̍bhā ।
upa̍ mā dhe̱nuḥ sa̱harṣa̍bhā hvayatām ॥ 1 ॥))

**[[3-5-13-2]]**

उप॑हूतो भ॒क्षः सखा॓।
उप॑ मा भ॒क्षः सखा॓ ह्वयताम्।
उप॑हू॒ताँ४ हो।
इडोप॑हूता।
उप॑हू॒तेडा॓।
उपो॑ अ॒स्माꣳ इडा॓ ह्वयताम्।
इडोप॑हूता।
उप॑हू॒तेडा॓।
मा॒नवी घृ॒तप॑दी मैत्रावरु॒णी।
ब्रह्म॑ दे॒वकृ॑त॒मुप॑हूतम्॥ २॥

((upa̍hūto bha̱kṣaḥ sakhā̎ ।
upa̍ mā bha̱kṣaḥ sakhā̎ hvayatām ।
upa̍hū̱tā̍ṁ4 ho ।
i̱ḍopa̍hūtā ।
upa̍hū̱te̱ḍā̎ ।
upo̍ a̱smāṁ i̱ḍā̎ hvayatām ।
i̱ḍopa̍hūtā ।
upa̍hū̱te̱ḍā̎ ।
mā̱na̱vī ghṛ̱tapa̍dī maitrāvaru̱ṇī ।
brahma̍ de̱vakṛ̍ta̱mupa̍hūtam ॥ 2 ॥))

**[[3-5-13-3]]**

दैव्या॑ अध्व॒र्यव॒ उप॑हूताः।
उप॑हूता मनु॒ष्या॓ः।
य इ॒मं य॒ज्ञमवा॑न्।
ये य॒ज्ञप॑त्नीं॒ वर्धा॑न्।
उप॑हू॒ते द्यावा॑पृथि॒वी।
पू॒र्व॒जे ऋ॒तावा॑री।
दे॒वी दे॒वपु॑त्रे।
उप॑हू॒तेयं यज॑माना।
इ॒न्द्रा॒णीवा॑विध॒वा।
अदि॑तिरिव सुपु॒त्रा।
उत्त॒रस्यां॑ देवय॒ज्याया॒मुप॑हूता।
भूय॑सि ह॒वि॒ष्कर॑ण॒ उप॑हूता।
दि॒व्ये धाम॒न्नुप॑हूता।
इ॒दं मे॑ दे॒वा ह॒विर्जु॑षन्ता॒मिति॒ तस्मि॒न्नुप॑हूता।
विश्व॑मस्याः प्रि॒यमुप॑हूतम्।
विश्व॑स्य प्रि॒यस्योप॑हू॒तस्योप॑हूता॥ ३॥
स॒हर्ष॑भा ह्वयता॒मुप॑हूतꣳ सुपु॒त्रा षट्च॑॥ १३॥
स॒त्यं प्रवोऽग्ने॑ म॒हान॒ग्निर्होता॑
स॒मिधो॒ऽग्निर्वृ॒त्राण्य॒ग्निर्मू॒र्धोप॑हूतं दे॒वं ब॒र्हिरि॒दं द्यावापृथिवी॒
तच्छं॒योरा प्या॑य॒स्वोप॑हूत॒ं त्रयो॑दश॥ १३॥
स॒त्यं व॒यꣳ स्या॑म वृ॒ष्टिर्द्यावा त्रि॒ꣳशत्॥ ३०॥

((daivyā̍ adhva̱ryava̱ upa̍hūtāḥ ।
upa̍hūtā manu̱ṣyā̎ḥ ।
ya i̱maṃ ya̱jñamavā̍n ।
ye ya̱jñapa̍tnī̱ṃ vardhā̍n ।
upa̍hūte̱ dyāvā̍pṛthi̱vī ।
pū̱rva̱je ṛ̱tāvā̍rī ।

de̱vī de̱vapu̍tre ǀ
upa̍hūte̱yaṃ yaja̍mānā ǀ
i̱ndrā̱ṇīva̍̍vidha̱vā ǀ
adi̍̍tiriva supu̱trā ǀ
utta̍rasyāṃ devaya̱jyāyā̱mupa̍hūtā ǀ
bhūya̍si havi̱ṣkara̍ṇa̱ upa̍hūtā ǀ
di̱vye dhāma̱nnupa̍hūtā ǀ
i̱daṃ me̍ de̱vā ha̱virju̍ṣantā̱miti̱ tasmi̱nnupa̍hūtā ǀ
viśva̍masyāḥ pri̱yamupa̍hūtam ǀ
viśva̍sya pri̱yasyopa̍hūta̱syopa̍hūtā ǁ 3 ǁ
sa̱harṣa̍bhā hvayatā̱mupa̍hūtam̐ supu̱trā ṣaṭca̍ ǁ 13
ǁ
sa̱tyaṃ pravo'gne̍ ma̱hāna̱gnirhotā̍̍
sa̱midho̱'gnirvṛ̱trāṇya̱gnirmū̱rdhopa̍hūtaṃ de̱vaṃ
ba̱rhiri̱daṃ dyā̍̍vāpṛthivī̱ tacchaṃ̱yorā
pyā̍̍ya̱svopa̍hūtaṃ̱ trayo̍daśa ǁ 13 ǁ
sa̱tyaṃ va̱yam̐̍ syā̍̍ma vṛ̱ṣṭidyā̍̍vā tri̱m̱̐śat ǁ 30 ǁ))

# Taittirīya-Brāhmaṇa
# Book 3, Chapter 6

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[3-6-1-1]]**

अ॒ञ्जन्ति॒ त्वाम॑ध्व॒रे दे॑व॒यन्त॑ः।
वन॑स्पते॒ मधु॑ना॒ दैव्ये॑न।
यदू॒र्ध्वस्ति॑ष्ठा॒द्द्रवि॑णे॒ह ध॑त्तात्।
यद्वा॒ क्षयो॑ मा॒तुर॒स्या उ॒पस्थे᳚।
उच्छ्र॑यस्व वनस्पते।
वर्ष्म॑न्पृथि॒व्या अधि॑।
सुमि॑ती मी॒यमा॑नः।
वर्चो॑धा य॒ज्ञवा॑हसे।
समि॑द्धस्य॒ श्रय॑माणः पु॒रस्ता᳚त्।
ब्रह्म॑ वन्वा॒नो अ॒जरꣳ॑ सु॒वीर᳚म्॥ १॥

((a̱ñjanti̱ tvāma̍dhva̱re de̍va̱yanta̍ḥ |
vana̍spate̱ madhu̍nā̱ daivye̍na |
yadū̱rdhvasti̍ṣṭhā̱ddravi̍ṇe̱ha dha̍ttāt |
yadvā̱ kṣayo̍ mā̱tura̱syā u̱pasthe̎ |
ucchra̍yasva vanaspate |
varṣma̍npṛthi̱vyā adhi̍ |
sumi̍tī mī̱yamā̍naḥ |
varco̍dhā ya̱jñavā̍hase |
sami̍ddhasya̱ śraya̍māṇaḥ pu̱rastā̎t |
brahma̍ vanvā̱no a̱jaraṃ̍ su̱vīrā̎m || 1 ||))

**[[3-6-1-2]]**

आ॒रे अ॒स्मदम॑तिं॒ बाध॑मानः।
उच्छ्र॑यस्व मह॒ते सौभ॑गाय।
ऊ॒र्ध्व ऊ॒षुण॑ ऊ॒तये᳚।
तिष्ठा॑ दे॒वो न स॑वि॒ता।
ऊ॒र्ध्वो वाज॑स्य॒ सनि॑ता॒ यद॒ञ्जिभि॑ः।
वा॒घद्भि॑र्वि॒ह्वया॑महे।
ऊ॒र्ध्वो न॑ः पा॒ह्यꣳह॑सो॒ नि के॒तुना᳚।
विश्व॒ꣳ॒ सम॒त्त्रिणं॑ दह।
कृ॒धी न॑ ऊ॒र्ध्वाञ्च॒ रथा॑य जी॒वसे᳚।
वि॒दा दे॒वेषु॑ नो॒ दुव॑ः॥ २॥

((ā̱re a̱smadama̍ti̱ṃ bādha̍mānaḥ |
ucchra̍yasva maha̱te saubha̍gāya |
ū̱rdhva ū̱ṣuṇa̍ ū̱taye̎ |
tiṣṭhā̍ de̱vo na sa̍vi̱tā |
ū̱rdhvo vāja̍sya̱ sani̍tā̱ yada̱ñjibhi̍ḥ |
vā̱ghadbhi̍rvi̱hvayā̍mahe |
ū̱rdhvo na̍ḥ pā̱hyaṃ̍ha̍so̱ ni ke̱tunā̎ |
viśva̱ṃ̎ sama̱ttriṇa̍ṃ daha |
kṛ̱dhī na̍ ū̱rdhvāñca̱ rathā̍ya jī̱vase̎ |
vi̱dā de̱veṣu̍ no̱ duva̍ḥ || 2 ||))

**[[3-6-1-3]]**

जा॒तो जा॑यते सुदिन॒त्वे अह्ना᳚म्।
स म॒र्य आ वि॒दथे॒ वर्ध॑मानः।
पु॒नन्ति॒ धीरा॑ अ॒पसो॑ मनी॒षा।
दे॒व॒या विप्र॒ उदि॑यर्ति॒ वाच᳚म्।
युवा॑ सु॒वासा॒ः परि॑वीत॒ आगा᳚त्।
स उ॒ श्रेया᳚न्भवति॒ जाय॑मानः।
तं धीरा॑सः क॒वय॒ उन्न॑यन्ति।
स्वा॒धियो॒ मन॑सा दे॒वयन्त॑ः।
पृ॒थु॒पाजा॒ अम॑र्त्यः।
घृ॒तनि॑र्णि॒क्स्वा॑हुतः॥ ३॥

((jā̱to jā̎yate sudina̱tve ahnā̎m |
sa ma̱rya ā vi̱dathe̱ vardha̍mānaḥ |
pu̱nanti̱ dhīrā̍ a̱paso̍ manī̱ṣā |
de̱va̱yā vipra̱ udi̍yarti̱ vāca̎m |
yuvā̍ su̱vāsā̱ḥ pari̍vīta̱ āgā̎t |
sa u̱ śreyā̎nbhavati̱ jāya̍mānaḥ |
taṃ dhīrā̍saḥ ka̱vaya̱ unna̍yanti |
svā̱dhiyo̱ mana̍sā deva̱yanta̍ḥ |
pṛ̱thu̱pājā̱ ama̍rtyaḥ |
ghṛ̱tani̍rṇi̱ksvā̎hutaḥ || 3 ||))

**[[3-6-1-4]]**

अ॒ग्निर्य॒ज्ञस्य॑ हव्य॒वाट्।
तꣳ स॒बाधो॑ य॒तस्रु॑चः।
इ॒त्था धि॒या य॒ज्ञव॑न्तः।
आच॑क्रुर॒ग्निमू॒तये᳚।
त्वं व॑रुण उ॒त मि॒त्रो अ॑ग्ने।
त्वां व॑र्धन्ति म॒तिभि॒र्वसि॑ष्ठाः।
त्वे वसु॑ सुषण॒नानि॑ सन्तु।
यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः॥ ४॥
सु॒वीर॒ं दु॒वः॒ स्वा॑हुतो॒। आष्टौ च॑॥ १॥

((a̱gnirya̱jñasya̍ havya̱vāṭ |

taṁ sa̱bādho̍ yata̱sru̍caḥ ।
i̱tthā dhi̱yā ya̱jñava̍ntaḥ ।
ā́ca̍kruru̱gnimū̱taye̎ ।
tvaṃ varu̍ṇa u̱ta mi̱tro a̍gne ।
tvāṃ va̍rdhanti ma̱tibhi̱rvasi̍ṣṭhāḥ ।
tve vasu̍ suṣaṇa̱nāni̍ santu ।
yū̱yaṃ pā̍ta sva̱stibhi̱ḥ sadā̍ naḥ ॥ 4 ॥
su̱vīra̱ṃ duva̱ḥ svā̍huto̱.ā̱ṣṭau ca̍ ॥ 1 ॥))

**[[3-6-2-1]]**

होता॑ यक्षद॒ग्निꣳ स॒मिधा॑ सुष॒मिधा॒ समि॑द्धं॒ नाभा॑ पृथि॒व्याः
सं॒गथे॑ वा॒मस्य॑।
वर्ष्मँ॑न्दि॒व इ॒डस्प॒दे वे॒त्वाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्षत्तनू॒नपा॑त॒मदि॑ते॒र्गर्भं॒ भुव॑नस्य गो॒पाम्।
मध्वा॒ऽद्य दे॒वो दे॒वेभ्यो॑ दे॒वया॒नाँ॒न्पथो॒ अ॑नक्तु वे॒त्वाज्य॑स्य॒
होत॒र्यज॑।
होता॑ यक्षन्न॒राशꣳसं॒ नृश॒स्त्रं नॄꣳः॒ प्रणे॑त्रम्।
गोभि॑र्व॒पावा॒न्त्स्याद्वी॒रैः शक्ती॑वा॒न्रथैः॑ प्रथ॒मया॒वा॒
हिर॑ण्यैश्च॒न्द्री
वे॒त्वाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्षद॒ग्निमि॒ड ई॑डि॒तो दे॒वो दे॒वाꣳ आव॑क्षद्दू॒तो
ह॒व्यवा॒डमू॑रः।
उपे॒मं य॒ज्ञमु॒पेमां॒ दे॒वो दे॒वहू॑तिमवतु वे॒त्वाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्षद्ब॒र्हिः सु॒ष्टरी॒मोर्ण॑म्रदा॒ अ॒स्मिन्य॒ज्ञे वि च॒ प्र च॑
प्रथताꣳ स्वा॒स॒स्थं दे॒वेभ्यः॑।
एमे॑नद॒द्य वस॑वो रु॒द्रा आ॑दि॒त्याः सद॑न्तु प्रि॒यमिन्द्र॑स्यास्तु॒
वे॒त्वाज्य॑स्य॒ होत॒र्यज॑॥ १॥

((hotā̍ yakṣada̱gnim̐ sa̱midhā̍ suṣa̱midhā̱ sami̍ddha̱ṃ nābhā̍ pṛ̱thi̱vyāḥ sa̱ṃga̱the vā̱masya̍ ।
varṣma̍ndi̱va i̱ḍaspa̱de vetvājya̍sya̱ hota̱ryaja̍ ।
hotā̍ yakṣattanū̱napā̍ta̱madite̱rgarbha̱ṃ bhuva̍nasya go̱pām ।
madhvā̱'dya de̱vo de̱vebhyo̍ deva̱yānā̱m̐npa̱tho a̍naktu̱ vetvājya̍sya̱ hota̱ryaja̍ ।
hotā̍ yakṣa̱nnarā̱śam̐sa̱ṃ nṛśa̱stra̱ṃ nṝm̐̍ḥ prā̍ṇe̱tram ।
gobhi̍rva̱pāvā̱ntsyādvī̱raiḥ śakti̍vā̱nrathai̱ḥ pratha̱ma̱yāvā̱ hira̍ṇyaiśca̱ndrī
vetvājya̍sya̱ hota̱ryaja̍ ।
hotā̍ yakṣada̱gnimi̱ḍa i̍ḍi̱to de̱vo de̱vām̐ āva̍kṣaddū̱to ha̍vya̱vā̱ḍamū̍raḥ ।
upe̱mam ya̱jñamu̱pe̱mām de̱vo de̱vahū̍timavatu̱ vetvājya̍sya̱ hota̱ryaja̍ ।
hotā̍ yakṣadba̱rhiḥ su̱ṣṭa̱rī̱morṇamradā̱ a̱sminya̱jñe vi ca̱ pra ca̍ prathatām̐ svā̱sa̱sthaṃ de̱vebhya̱ḥ ।
emena̍da̱dya vasa̍vo ru̱drā ā̍di̱tyāḥ sa̍dantu priyamindra̍syāstu̱ vetvājya̍sya̱ hota̱ryaja̍ ॥ 1 ॥))

**[[3-6-2-2]]**

होता॑ यक्ष॒द्दुर॒ ऋ॒ष्वाः
क॑व॒ष्योऽकौ॑षधाव॒नी॒रुदा॑ता॒भि॒र्जिह॑तां॒ वि प॒क्षोभिः॑
श्रयन्ताम्।
सु॒प्राय॒णा अ॒स्मिन्य॒ज्ञे विश्र॑यन्तामृता॒वृधो॑ वि॒यन्त्वाज्य॑स्य॒
होत॒र्यज॑।
होता॑ यक्षदु॒षासा॒नक्ता॑ बृ॒ह॒ती सु॒पेश॑सा॒ नॄꣳः॒पति॑भ्यो॒
योनिं॑ कृण्वा॒ने।
स॒ꣳ॒स्मय॑माने॒ इन्द्रे॑ण दे॒वैरे॒दं ब॒र्हिः सीद॑तां वी॒तामाज्य॑स्य॒
होत॒र्यज॑।
होता॑ यक्ष॒द्दैव्या॒ होता॑रा॒ मन्द्रा पोता॑रा क॒वी प्रचे॑तसा।
स्वि॑ष्टम॒द्यान्यः क॑रदि॒षा स्व॑भिगू॒र्त॒मन्य ऊ॒र्जा सत॑वसे॒मं
य॒ज्ञं दि॒वि दे॒वेषु॑ धत्तां वी॒तामाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्षत्ति॒स्रो दे॒वीर॒पसा॑म॒पस्त॑मा
अच्छि॑द्रम॒द्येदमप॑स्तन्वताम्।
दे॒वेभ्यो॑ दे॒वीर्दे॒वमपो॑ वि॒यन्त्वाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्ष॒त्त्वष्टा॑रमचि॒ष्टुमपा॑कꣳ रेतो॒धां विश्र॑वसं
यशो॒धाम्।
पु॒रु॒रूपमका॑मकर्शनꣳ सु॒पोषः पोषैः॑ स्यात्सु॒वीरो॑
वी॒रैर्वे॒त्वाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्ष॒द्वनस्पति॑मु॒पाव॑स्त्रक्ष॒द्धियो॒ जो॒ष्टारꣳ॑ श॒शम॒न्नरः॑।
स्वदा॒त्स्वधि॑ति॒र्ऋ॒तुथा॒ऽद्य दे॒वो दे॒वेभ्यो॑
ह॒व्याऽवा॒ड्वे॒त्वाज्य॑स्य॒ होत॒र्यज॑।
होता॑ यक्षद॒ग्निꣳ॒ स्वाहाऽऽज्य॑स्य॒ स्वाहा॒ मेद॑सः॒ स्वाहाँ॑
स्तो॒काना॒ꣳ॒ स्वाहा॒ स्वाहा॑कृतीना॒ꣳ॒ स्वाहा॑ ह॒व्यसू॑क्तीनाम्।
स्वाहा॑ दे॒वाꣳ आँ॑ज्यपा॒न्त्स्वाहा॒ऽग्निꣳ हो॒त्राज्जु॑षा॒णा अग्न॒
अज्य॑स्य वि॒यन्तु होत॒र्यज॑॥ २॥
प्रि॒यमिन्द्र॑स्यास्तु॒ वे॒त्वाज्य॑स्य॒ होत॒र्यज॑ सु॒वीरो॑
वी॒रैर्वे॒त्वाज्य॑स्य॒ होत॒र्यज॑ च॒त्वारि॑ च॥ २॥
अ॒ग्निं तनू॒नपा॑तं॒ नरा॒शꣳस॑म॒ग्निमि॒ड ई॑डि॒तो ब॒र्हिर्दुरः॑
उ॒षासा॒नक्ता॒ दैव्या॑ ति॒स्रस्त्वष्टा॑रं॒ वन॒स्पति॑म॒ग्निम्। पञ्च॒
वे॒त्वेको॑ वि॒यन्तु॒ द्विर्वी॒तामेको॑ वि॒यन्तु॒ द्विर्वे॒त्वेको॑ वि॒यन्तु॒
होत॒र्यज॑॥

((hotā̍ yakṣa̱ddura̍ ṛ̱ṣvāḥ

ka̍vaṣyo'ko̍ṣadhāvanī̱rudātā̍bhi̱rjihā̍tāṃ vi
pakṣo̍bhiḥ śrayantām ।
su̱prā̱ya̱ṇā a̱sminya̱jñe viśra̍yantāmṛ̱tā̱vṛdho̍
vi̱yantvājya̍sya̱ hota̱ryaja̍ ।
hotā̎ yakṣa̱du̱ṣāsā̱naktā̎ bṛha̱tī su̱peśa̍sā̱
nṝ̎ṁḥpati̍bhyo̱ yoni̍ṃ kṛṇvā̱ne ।
sa̱ṁ̎smaya̍mānẹ indre̍ṇa de̱vairedaṃ ba̱rhiḥ sī̍datāṃ
vī̱tāmājya̍sya̱ hota̱ryaja̍ ।
hotā̎ yakṣa̱ddaivyā̱ hotā̍rā ma̱ndrā potā̍rā ka̱vī
prace̍tasā ।
svi̍ṣṭama̱dyānyaḥ ka̍radi̱ṣā svā̍bhigūrtama̱nya ū̱rjā
satā̍vase̱maṃ ya̱jñaṃ di̱vi de̱ve̍ṣu dhattā̱ṃ
vī̱tāmājya̍sya̱ hota̱ryaja̍ ।
hotā̎ yakṣatti̱sro de̱vīra̱pasā̍ma̱pastā̍mā̱
acchi̍drama̱dyedamapa̍stanvatām ।
de̱vebhyo̍ de̱vīrde̱vamapo̍ vi̱yantvājya̍sya̱ hota̱ryaja̍ ।
hotā̎ yakṣa̱ttvaṣṭā̍ra̱maci̍ṣṭu̱mapā̎kaṁ̎ reto̱dhāṃ
viśra̍vasaṃ yaśo̱dhām ।
pu̱ru̱rūpa̱makā̎makarśanaṁ̎ su̱poṣa̱ḥ po̱ṣaiḥ
syātsu̱vīro̍ vī̱rairvetvājya̍sya̱ hota̱ryaja̍ ।
hotā̎ yakṣa̱dvana̱spati̍mu̱pāva̍srakṣaddhi̱yo jo̱ṣṭāraṁ̎
śa̱śama̱nnarā̍ḥ ।
svadā̱tsvadhi̍tirṛ̱tu̱thā'dya de̱vo de̱vebhyo̍
ha̱vyā'vā̱dvetvājya̍sya̱ hota̱ryaja̍ ।
hotā̎ yakṣada̱gniṁ̎ svāhā''jya̍sya̱ svāhā̱ medā̍sa̱ḥ
svāhā̎ sto̱kānā̱ṁ̎ svāhā̱ svāhā̍kṛtīnā̱ṁ̎ svāhā̍
ha̱vyasū̎ktīnām ।
svāhā̍ de̱vāṁ̎ ā̎jya̱pāntsvāhā̱'gniṁ̎ ho̱trājju̍ṣā̱ṇā̱
agna̱ ajya̍sya viyantu̱ hota̱ryaja̍ ॥ 2 ॥
pri̱yamindra̍syāstu̱ vetvājya̍sya̱ hota̱ryaja̍ su̱vīro̍
vī̱rairvetvājya̍sya̱ hota̱ryaja̍ ca̱tvāri̍ ca ॥ 2 ॥
a̱gniṃ tanū̱napā̍ta̱ṃ narā̱śaṁ̎sa̍ma̱gnimi̱ḍa i̍ḍi̱to
ba̱rhirdura̍ u̱ṣāsā̱naktā̱ daivyā̍ ti̱srastva̱ṣṭāra̱ṃ
vana̱spati̍ma̱gnim । pañca̱ vetveko̍ vi̱yantu̱
dvirvī̱tāmeko̍ vi̱yantu̱ dvirvetveko̍ viyantu̱ hota̱ryaja̍
॥))

**[[3-6-3-1]]**

समि॑द्धो अ॒द्य मनु॑षो दुरो॒णे।
दे॒वो दे॒वान्य॑जसि जातवेदः।
आ च॒ वह॑ मित्रमहश्चिकि॒त्वान्।
त्वं दू॒तः क॒विर॑सि॒ प्रचे॑ताः।
तनू॑नपात्प॒थ ऋ॒तस्य॒ याना॑न्।
मध्वा॑ सम॒ञ्जन्त्स्व॑दया सुजिह्व।
मन्मा॑नि धी॒भिरु॒त य॒ज्ञमृ॒न्धन्।
दे॒वत्रा च॑ कृणुह्यध्व॒रं नः॑।
नरा॒शꣳस॑स्य महि॒मान॑मेषाम्।
उप॑स्तोषाम यज॒तस्य॑ य॒ज्ञैः॥ १॥

((sami̍ddho a̱dya manu̍ṣo duro̱ṇe ।
de̱vo de̱vānya̍ja̍si jātavedaḥ ।
ā ca̱ vaha̍ mitramahaścikitvān ।
tvaṃ dū̱taḥ ka̱vira̍si̱ prace̍tāḥ ।
tanū̍napātpa̱tha ṛ̱tasya̱ yānā̍n ।
madhvā̍ sama̱ñjantsva̍dayā sujihva ।
manmā̍ni dhī̱bhiru̱ta ya̱jñamṛ̱ndhan ।
de̱vatrā ca̍ kṛṇuhyadhva̱raṃ na̍ḥ ।
narā̱śaṁ̎sa̍sya mahi̱māna̍meṣām।
upa̍stoṣāma yaja̱tasya̍ ya̱jñaiḥ ॥ 1 ॥))

**[[3-6-3-2]]**

ते सु॒क्रत॑वः शुच॑यो धि॒यं॑धाः।
स्वद॑न्तु दे॒वा उ॒भया॑नि ह॒व्या।
आ॒जु॒ह्वा॑न॒ ईड्यो॒ वन्द्य॑श्च।
आया॑ह्यग्ने॒ वसु॑भिः स॒जोषा॑ः।
त्वं दे॒वाना॑मसि यह्व॒ होता॑।
स ए॑नान्यक्षीषि॒तो यजी॑यान्।
प्राचीनं॑ ब॒र्हिः प्र॒दिशा॑ पृथि॒व्याः।
वस्तो॑र॒स्या वृ॒ज्यते॒ अग्रे॒ अह्ना॑म्।
व्यु॑प्रथते वि॒त॒रं वरी॑यः।
दे॒वेभ्यो॒ अदि॑तये स्यो॒नम्॥ २॥

((te su̱kratа̍vaḥ śuca̍yo dhiya̱ṃdhāḥ ।
svada̍ntu de̱vā u̱bhayā̍ni ha̱vyā ।
ā̱juhvā̍na̱ ī̱ḍyo̱ vandya̍śca ।
āyā̎hyagne̱ vasu̍bhiḥ sa̱joṣā̎ḥ ।
tvaṃ de̱vānā̍masi yahva̱ hotā̎ ।
sa e̍nānyakṣī̱ṣito yajī̍yān ।
prācīna̍ṃ ba̱rhiḥ pra̱diśā̍ pṛthi̱vyāḥ ।
vasto̍ra̱syā vṛ̱jyate̱ agre̱ ahnā̎m ।
vyu̍prathate vi̱tara̱ṃ varī̍yaḥ ।
de̱vebhyo̱ adi̍taye syo̱nam ॥ 2 ॥))

**[[3-6-3-3]]**

व्यच॑स्वतीरु॒र्वि॑या विश्र॑यन्ताम्।
पति॑भ्यो॒ न जन॑यः शुम्भ॑मानाः।
देवी॑र्द्वारो बृहतीर्वि॑श्वमिन्वाः।
दे॒वेभ्यो॑ भवथ सुप्राय॒णाः।
आ सु॒ष्वय॑न्ती यज॒ते उपा॑के।
उ॒षासा॒नक्ता॑ सदतां॒ नि योनौ॑।
दि॒व्ये योष॑णे बृह॒ती सु॑रु॒क्मे।
अधि॒ श्रिय॑ꣳ शुक्र॒पिश॒ं दधा॑ने।
दैव्या॒ होता॑रा प्रथ॒मा सु॒वाचा॑।
मिमा॑ना य॒ज्ञं मनु॑षो॒ यज॑ध्यै॥ ३॥

((vyaca̍svatīrurvi̱yā viśra̍yantām।
pati̍bhyo̱ na jana̍yaḥ śumbha̍mānāḥ ।
devī̎rdvāro bṛhatīrviśvaminvāḥ ।
de̱vebhyo̍ bhavatha suprāya̱ṇāḥ ।

ā suṣvaya̍ntī yaja̱te upā̍ke |
u̱ṣāsā̱naktā̍ sadatā̱m ni yonau̎ |
di̱vye yoṣa̍ṇe bṛha̱tī su̍ru̱kme |
adhi̱ śriya̍m̐ śukra̱piśa̱m dadhā̍ne |
daivyā̱ hotā̍rā pratha̱mā su̱vācā̎ |
mimā̍nā ya̱jñam manu̍ṣo̱ yaja̍dhyai || 3 ||))

**[[3-6-3-4]]**

प्र॒चो॒दय॑न्ता वि॒दथे॑षु का॒रू ।
प्रा॒चीन॒ं ज्योति॑ः प्र॒दिशा॑ दि॒शन्ता᳚ ।
आ नो॑ य॒ज्ञं भार॑ती॒ तूय॑मेतु ।
इडा॑ मनु॒ष्वदि॒ह चे॒तय॑न्ती ।
ति॒स्रो दे॒वीर्ब॒र्हिरेद॒ꣳ स्यो॒नम् ।
सर॑स्वती॒ः स्वप॑सः सदन्तु ।
य इ॒मे द्यावा॑पृथि॒वी जनि॑त्री ।
रू॒पैरपि॑ꣳश॒द्भुव॑नानि॒ विश्वा᳚ ।
तम॒द्य हो॑तरिषि॒तो यजी॑यान् ।
दे॒वं त्वष्टा॑रमि॒ह य॑क्षि वि॒द्वान् ॥ ४ ॥

((pra̱co̱daya̍ntā vi̱dathe̍ṣu kā̱rū |
prā̱cīna̱m jyotiḥ pra̱diśā̍ di̱śantā̎ |
ā no̍ ya̱jñam bhāra̍tī̱ tūya̍metu |
iḍā̍ manu̱ṣvadi̱ha ce̱taya̍ntī |
ti̱sro de̱vīrba̱rhireda̱m̐ syo̱nam |
sara̍svatī̱ḥ svapa̍saḥ sadantu |
ya i̱me dyāvā̍pṛthi̱vī jani̍trī |
rū̱pairapi̍m̐śa̱dbhuva̍nāni̱ viśvā̎ |
tama̱dya ho̍tariṣi̱to yajī̍yān |
de̱vam tvaṣṭā̍rami̱ha ya̍kṣi vi̱dvān || 4 ||))

**[[3-6-3-5]]**

उ॒पाव॑सृज॒त्मन्या॑ सम॒ञ्जन् ।
दे॒वानां॒ पाथ ऋ॒तुथा ह॒वीꣳषि॑ ।
व॒न॒स्पति॑ः शमि॒ता दे॒वो अ॒ग्निः ।
स्वद॑न्तु ह॒व्यं मधु॑ना घृ॒तेन॑ ।
स॒द्योजा॒तो व्य॑मिमीत य॒ज्ञम् ।
अ॒ग्निर्दे॒वाना॑मभवत्पुरो॒गाः ।
अ॒स्य होतु॑ः प्र॒दिश्यृ॒तस्य॑ वा॒चि ।
स्वाहा॑कृत॒ꣳ ह॒विर॑दन्तु दे॒वाः ॥ ५ ॥
य॒ज्ञैः स्यो॒नं यज॑ध्यै वि॒द्वान॒ष्टौ च॑ ॥ ३ ॥

((upāva̍sṛja̱ttmanyā̍ sama̱ñjan |
de̱vānā̱m pātha ṛ̱tuthā ha̱vīm̐ṣi̍ |
vana̱spati̍ḥ śami̱tā de̱vo a̱gniḥ |
svada̍ntu ha̱vyam madhu̍nā ghṛ̱tena̍ |
sa̱dyojā̱to vya̍mimīta ya̱jñam |
a̱gnirde̱vānā̍mabhavatpuro̱gāḥ |
a̱sya hotu̍ḥ pra̱diśyṛ̱tasya̍ vā̱ci |
svāhā̍kṛta̱m̐ ha̱vira̍dantu de̱vāḥ || 5 ||
ya̱jñaiḥ syo̱nam yaja̍dhyai vi̱dvāna̱ṣṭau ca̍ || 3 ||))

**[[3-6-4-1]]**

अ॒ग्निर्होता॑ नो अ॒ध्वरे ।
वा॒जी सन्परि॑णीयते ।
दे॒वो दे॒वेषु॑ य॒ज्ञिय॑ः ।
परि॑ त्रिवि॒ष्ट्य॑ध्व॒रम् ।
यात्य॒ग्नी र॒थीरि॑व ।
आ दे॒वेषु॒ प्रयो॒ दध॑त् ।
परि॒ वाज॑पतिः क॒विः ।
अ॒ग्निर्ह॒व्यान्य॑क्रमीत् ।
दध॒द्रत्ना॑नि दा॒शुषे᳚ ॥ १ ॥
अ॒ग्निर्होता॑ नो॒ नव॑ ॥ ४ ॥

((a̱gnirhotā̍ no adhva̱re |
vā̱jī sanpari̍ṇīyate |
de̱vo de̱veṣu̍ ya̱jñiya̍ḥ |
pari̍ trivi̱ṣṭya̍dhva̱ram |
yātya̱gnī ra̱thīri̍va |
ā de̱veṣu̱ prayo̱ dadha̍t |
pari̱ vāja̍patiḥ ka̱viḥ |
a̱gnirha̱vyānya̍kramīt |
dadha̱dratnā̍ni dā̱śuṣe̎ || 1 ||
a̱gnirhotā̍ no̱ nava̍ || 4 ||))

**[[3-6-5-1]]**

अजै॑द॒ग्निः ।
अस॑न॒द्वाजं॒ नि ।
दे॒वो दे॒वेभ्यो॑ ह॒व्याऽवा᳚ट् ।
प्राञ्जो॑भिर्हि॒न्वा॒नः ।
धे॒ना॑भि॒ः कल्प॑मानः ।
य॒ज्ञस्यायु॑ः प्र॒ति॒रन् ।
उ॒प॒प्रेष्य॑ होतः ।
ह॒व्या दे॒वेभ्य॑ः ॥ १ ॥
अजै॑द॒ष्टौ ॥ ५ ॥

((ajai̍da̱gniḥ |
asa̍na̱dvāja̱m ni |
de̱vo de̱vebhyo̍ ha̱vyā'vā̎ṭ |
prāñjo̍bhirhinva̱naḥ |
dhe̱nā̍bhi̱ḥ kalpa̍mānaḥ |
ya̱jñasyāyu̍ḥ prati̱ran |
upa̱preṣya̍ hotaḥ |

havyā devebhyaḥ || 1 ||
ajaidaṣṭau || 5 ||))

**[[3-6-6-1]]**

दैव्याँः शमितार उत मनुष्या आरभध्वम्।
उपनयत मेध्या दुरः।
आशासाना मेधपतिभ्यां मेधँम्।
प्रास्मा अग्निं भरत।
स्तृणीत बर्हिः।
अन्वेनं माता मन्यताम्।
अनु पिता।
अनु भ्राता सगर्भ्यः।
अनु सखा सयूँथ्यः।
उदीचीनाꣳ अस्य पदो निधत्तात्॥ १॥

((daivyā̐ḥ śamitāra uta manuṣyā ārabhadhvam |
upanayata medhyā duraḥ |
āśāsānā medhapatibhyām medhā̐m |
prāsmā agnim bharata |
stṛṇīta barhiḥ |
anvenam mātā manyatām |
anu pitā |
anu bhrātā sagarbhyaḥ |
anu sakhā sayū̐thyaḥ |
udīcīnām̐ asya pado nidhattāt || 1 ||))

**[[3-6-6-2]]**

सूर्यं चक्षुर्गमयतात्।
वातं प्राणमन्ववसृजतात्।
दिशः श्रोत्रँम्।
अन्तरिक्षमसुँम्।
पृथिवीꣳ शरीरम्।
एकधाऽस्य त्वचमाच्छ्यतात्।
पुरा नाभ्या अपिशसो वपामुत्खिदतात्।
अन्तरेवोष्माणं वारयतात्।
श्येनमस्य वक्षः कृणुतात्।
प्रशसा बाहू॥ २॥

((sūryam cakṣurgamayatāt|
vātam prāṇamanvavasṛjatāt |
diśaḥ śrotrā̐m |
antarikṣamasū̐m |
pṛthivīm̐ śarīram |
ekadhā'sya tvacamācchyatāt |
purā nābhyā apiśaso vapāmutkhidatāt |
antarevoṣmāṇam vārayatāt |
śyenamasya vakṣaḥ kṛṇutāt |
praśasā bāhū || 2 ||))

**[[3-6-6-3]]**

शला दोषणीँ।
कश्यपेवाꣳसाँ।
अच्छिद्रे श्रोणीँ।
कवषोरू स्रेकपर्णाऽष्ठीवन्ताँ।
षड्विꣳशतिरस्य वङ्क्रयः।
ता अनुष्ठ्योच्च्यावयतात्।
गात्रं गात्रमस्यानूनं कृणुतात्।
ऊवध्यगोहं पार्थिवं खनतात्।
अस्ना रक्षः सꣳसृजतात्।
वनिष्ठुमस्य मा राविष्ट॥ ३॥

((śalā doṣaṇī̐ |
kaśyapevām̐sā̐ |
acchidre śroṇī̐ |
kavaṣorū srekaparṇā'ṣṭhīvantā̐ |
ṣaḍvim̐śatirasya vaṅkrayaḥ |
tā anuṣṭhyoccyāvayatāt |
gātram gātramasyānūnam kṛṇutāt|
ūvadhyagoham pārthivam khanatāt |
asnā rakṣaḥ sam̐sṛjatāt |
vaniṣṭhumasya mā rāviṣṭa || 3 ||))

**[[3-6-6-4]]**

उरूकं मन्यमानाः।
नेद्वस्तोके तनये।
रविता रवच्छमितारः।
अध्रिगो शमीध्वम्।
सुशमि शमीध्वम्।
शमीध्वमध्रिगो।
अध्रिगुश्चापापश्च।
उभौ देवानाꣳ शमितारौँ।
ताविमं पशुꣳ श्रपयतां प्रविद्वाꣳसौँ।
यथा यथाऽस्य श्रपणं तथा तथा॥ ४॥
धत्ताद्बाहू मा राविष्ट तथातथा॥ ६॥

((urūkam manyamānāḥ |
nedvastoke tanaye |
ravitā ravacchamitāraḥ |
adhrigo śamīdhvam|

suṣamiํ śamīdhvam।
śa̱mīdhvamádhrigo ।
adhri̱gu̱ścāpápaśca ।
u̱bhau de̱vānām̐ śa̱mitārau̐ ।
tāvi̱mam̱ pa̱śum̐ śrápayatām̱ pravi̱dvām̐sau̐ ।
yathá yathā'sya̱ śrapáṇam̱ tathá tathā ॥ 4 ॥
dha̱ttā̱dbā̱hū mā rávi̱ṣṭa̱ tathátathā ॥ 6 ॥))

**[[3-6-7-1]]**

जु॒षस्व॑ स॒प्रथ॑स्तमम्।
वचो॑ दे॒वप्स॑रस्तमम्।
ह॒व्या जुह्वा॑न आ॒सनि॑।
इ॒मं नो॑ य॒ज्ञम॒मृते॑षु धेहि।
इ॒मा ह॒व्या जा॑तवेदो जुषस्व।
स्तो॒काना॑मग्ने॒ मेद॑सो घृ॒तस्य॑।
होत॒: प्राशा॑न प्रथ॒मो नि॒षद्य॑।
घृ॒तव॑न्तः पावक ते।
स्तो॒काः श्चोत॑न्ति॒ मेद॑सः।
स्वध॑र्मं दे॒ववी॑तये॥ १॥

((ju̱ṣasvá sa̱prathástamam ।
vacó de̱vapsárastamam ।
ha̱vyā juhvána ā̱sanií ।
i̱mam̱ nó ya̱jñama̱mṛté̱ṣu dhehi ।
i̱mā ha̱vyā játavedo juṣasva ।
sto̱kānámagne̱ medáso ghṛ̱tasyá ।
hota̱ḥ prāśána pratha̱mo ni̱ṣadyá ।
ghṛ̱tavántaḥ pāvaka te ।
sto̱kāḥ ścótanti̱ medásaḥ ।
svadhármam̱ de̱vavítaye ॥ 1 ॥))

**[[3-6-7-2]]**

श्रेष्ठं॑ नो धेहि॒ वार्य॑म्।
तुभ्य॒ꣳ॒ स्तो॒का घृ॒त॒श्चुत॑ः।
अग्ने॒ विप्रा॑य सन्त्य।
ऋषि॒ः श्रेष्ठ॒ः समि॑ध्यसे।
य॒ज्ञस्य॑ प्रावि॒ता भ॑व।
तुभ्य॒ꣳ॒ श्चोतन्त्यध्रिगो शचीवः।
स्तो॒कासो॑ अग्ने॒ मेद॑सो घृ॒तस्य॑।
क॒वि॒शस्तो॑ बृ॒ह॒ता भा॒नुनाऽऽगा॑ः।
ह॒व्या जु॑षस्व मेधिर।
ओजि॑ष्ठं ते मध्य॒तो मेद॒ उद्भृ॑तम्।
प्र ते॑ व॒यं द॑दामहे।
श्चोत॑न्ति ते वसो स्तो॒का अधि॑त्व॒चि।
प्रति॒ तान्दे॑व॒शो वि॑हि॥ २॥
दे॒ववी॑तय॒ उद्भृ॑त॒ं त्रीणि॑ च॥ ७॥

((śreṣṭham̐ no dhehi̱ vāryám ।
tubhyam̐ sto̱kā ghṛ̱ta̱ścutáḥ ।
agne̱ viprá̱ya santya ।
ṛ̱ṣi̱ḥ śreṣ̱ṭha̱ḥ samídhyase ।
ya̱jñasyá prāvi̱tā bháva ।
tubhyam̐ ścotantyadhrigo śacīvaḥ ।
sto̱kāsó agne̱ medáso ghṛ̱tasyá ।
ka̱vi̱śasto bṛ̱ha̱tā bhā̱nunā''gā̱ḥ ।
ha̱vyā júṣasva medhira ।
ojíṣṭham̱ te madhya̱to meda̱ udbhṛ̱tam ।
pra té va̱yam̱ dádāmahe ।
ścotánti te vaso sto̱kā adhítva̱ci ।
prati̱ tāndévaśo vihi ॥ 2 ॥
de̱vavítaya̱ udbhṛ̱tam̱ trīṇi̱ ca ॥ 7 ॥))

**[[3-6-8-1]]**

आ वृ॑त्रहणा वृत्र॒हभि॑ः शुष्मैः।
इन्द्र॑ यात॒ं नमो॑भिरग्ने अ॒र्वाक्।
युव॒ꣳ॒ राधो॑भि॒रक॑वेभिरिन्द्र।
अग्ने॑ अ॒स्मे भ॑वतमुत्त॒मेभि॑ः।
होता॑ यक्षदिन्द्रा॒ग्नी।
छाग॑स्य व॒पाया॒ मेद॑सः।
जु॒षेता॒ꣳ॒ ह॒विः।
होत॒र्यज॑।
वि॑ ह्यख्य॒न्मन॑सा॒ वस्य॑ इ॒च्छन्।
इन्द्रा॑ग्नी ज्ञा॒स उ॒त वा॑ सजा॒तान्॥ १॥

((ā vṛ̱trahaṇā vṛtra̱habhi̱ḥ śuṣmaiḥ ।
indrá yā̱tam̱ namóbhiragne a̱rvāk ।
yu̱vam̐ rādhóbhi̱rakávebhirindra ।
agné a̱sme bhávatamutta̱mebhiḥ ।
hotá yakṣadindrā̱gnī ।
chāgásya va̱pāyā̱ medásaḥ ।
ju̱ṣetām̐ ha̱viḥ ।
hota̱ryajá ।
ví hyakhya̱nmanásā̱ vasyá i̱cchan ।
indrágnī jñā̱sa u̱ta vá sajā̱tān ॥ 1 ॥))

**[[3-6-8-2]]**

नान्या यु॒वत्प्रम॑तिरस्ति॒ मह्य॑म्।
स वा॑ं धियं॑ वा॒जय॑न्ती॒मतक्षम्।
होता॑ यक्षदिन्द्रा॒ग्नी।
पु॒रो॒डाश॑स्य जु॒षेता॒ꣳ॒ ह॒विः।
होत॒र्यज॑।

त्वामी॑डते अजि॒रं दू॒त्या॑य।
ह॒विष्म॑न्तः॒ सद॒मिन्मानु॑षासः।
यस्य॑ दे॒वैरास॑दो ब॒र्हिर॑ग्ने।
अहा॓न्यस्मै सु॒दिना॑ भवन्तु।
होता॑ यक्ष॒द॒ग्निम्।
पु॒रो॒डाश॑स्य जुषता॒ꣳ ह॒विः।
होत॒र्यज॑॥ २॥
स॒जा॒ताना॒ग्निं द्वे च॑॥ ८॥

((nānyā yu̱vatprama̍tirasti̱ mahya̎m |
sa vām̱ dhiyam̱ vāja̱yanti̍matakṣam |
hota̍ yakṣadindrā̱gnī |
pu̱ro̱ḍāśa̍sya ju̱ṣetām̐ ha̱viḥ |
hota̱ryaja̍ |
tvāmi̍ḍate aji̱ram̱ dū̱tya̍ya |
ha̱viṣma̍nta̱ḥ sada̱minmānu̍ṣāsaḥ |
yasya̍ de̱vairāsa̍do ba̱rhira̍gne |
ahā̎nyasmai su̱dinā̍ bhavantu |
hota̍ yakṣada̱gnim |
pu̱ro̱ḍāśa̍sya ju̱ṣatām̐ ha̱viḥ |
hota̱ryaja̍ || 2 ||
sa̱jā̱tāna̱gnim̱ dve ca̍ || 8 ||))

**[[3-6-9-1]]**
गी॒र्भिर्विप्र॒ः प्रम॑तिमि॒च्छमा॑नः।
ईट्टे॑ र॒यिं य॒शसं॒ पूर्व॒भाज॓म्।
इन्द्रा॓ग्नी वृत्रहणा सुवज्रा।
प्र णो॒ नव्ये॑भिस्तिरतं दे॒ष्णैः।
मा च्छे॓द्म र॒श्मीꣳरिति॒ नाध॑मानाः।
पि॒तृणा॓ꣳ शक्ती॑रनु॒यच्छ॑मानाः।
इ॒न्द्रा॒ग्निभ्यां॒ कं वृष॑णो मदन्ति।
ता ह्यद्री॓ धि॒षणा॑या उ॒पस्थे॓।
अ॒ग्निꣳ सु॑दी॒तिꣳ सु॒दृशं॑ गृ॒णन्तः॑।
न॒म॒स्याम॒स्त्वेड्यं॑ जातवेदः।
त्वां दू॒तम॑र॒तिꣳ ह॑व्य॒वाह॓म्।
दे॒वा अ॑कृण्वन्न॒मृत॑स्य॒ नाभि॓म्॥ १॥
जा॒त॒वे॒दो॒ द्वे च॑॥ ९॥

((gī̱rbhirvipra̱ḥ prama̍timi̱cchamā̍naḥ |
īṭṭe̱ ra̱yim̱ ya̱śasam̱ pūrva̱bhāja̎m |
indrā̎gnī vṛtrahaṇā suvajrā |
pra ṇo̱ navye̍bhistiratam̱ de̱ṣṇaiḥ |
mā cche̎dma ra̱śmīm̐riti̱ nādha̍mānāḥ |
pi̱tṝṇām̐ śakti̍ranu̱yaccha̍mānāḥ |
i̱ndrā̱gnibhyā̱m kam̱ vṛṣa̍ṇo madanti |
tā hyadrī̎ dhi̱ṣaṇā̍yā u̱pasthe̎ |
a̱gnim̐ su̍dī̱tim̐ su̱dṛśam̱ gṛ̱ṇanta̍ḥ |
na̱ma̱syāma̱stve̱ḍyam̱ jātavedaḥ |
tvām̱ dū̱tama̍ra̱tim̐ ha̍vya̱vāha̎m |
de̱vā a̍kṛṇvanna̱mṛta̍sya̱ nābhi̎m || 1 ||
jā̱ta̱ve̱do̱ dve ca̍ || 9 ||))

**[[3-6-10-1]]**
त्वꣳ ह्य॑ग्ने प्रथ॒मो म॒नोता॓।
अ॒स्या धि॒यो अभ॑वो द॒स्म होता॓।
त्वꣳ सीं॓ वृषन्नकृणोर्दु॒ष्टरी॑तु।
सहो॒ विश्व॑स्मै॒ सह॑से॒ सह॑ध्यै।
अधा॒ होता॒ न्य॑सीदो॒ यजी॑यान्।
इ॒डस्प॒द इ॒षय॒न्नीड्यः॒ सन्।
तं त्वा॒ नरः॑ प्रथ॒मं दे॑व॒यन्तः॑।
म॒हो रा॒ये चि॒तय॑न्तो॒ अनु॑ग्मन्।
वृ॒तेव॒ यन्तं॑ ब॒हुभि॑र्वस॒व्यै॓ः।
त्वे र॒यिं जा॑गृ॒वाꣳसो॒ अनु॑ग्मन्॥ १॥

((tvam̐ hya̍gne pratha̱mo ma̱notā̎ |
a̱syā dhi̱yo abha̍vo dasma̱ hotā̎ |
tvam̐ sīm̐ vṛ̱ṣannakṛ̱ṇordu̱ṣṭarī̍tu |
saho̱ viśva̍smai̱ saha̍se̱ saha̍dhyai |
adhā̱ hotā̱ nya̍sīdo̱ yajī̍yān |
i̱ḍaspa̱da i̱ṣaya̱nnī̱ḍyaḥ san |
tam̱ tvā̱ nara̍ḥ pratha̱mam̱ de̍va̱yanta̍ḥ |
ma̱ho rā̱ye ci̱taya̍nto̱ anu̍gman |
vṛ̱teva̱ yantam̐ ba̱hubhi̍rvasa̱vyai̎ḥ |
tve ra̱yim̱ jā̍gṛ̱vām̐so̱ anu̍gman || 1 ||))

**[[3-6-10-2]]**
रु॒शन्त॑म॒ग्निं द॑र्श॒तं बृ॒हन्त॓म्।
व॒पाव॑न्तं वि॒श्वहा॑ दीदि॒वाꣳस॓म्।
प॒दं दे॒वस्य॒ नम॑सा वि॒यन्तः॑।
श्र॒व॒स्यवः॒ श्रव॑ आप॒न्नमृ॑क्तम्।
नामा॑नि चिद्दधिरे य॒ज्ञिया॑नि।
भ॒द्राया॓ं ते रणयन्त॒ संदृ॑ष्टौ।
त्वां व॑र्धन्ति क्षि॒तय॑ः पृथि॒व्याम्।
त्वꣳ राय॑ उ॒भया॑सो॒ जना॑नाम्।
त्वं त्रा॒ता त॑रणे॒ चेत्यो॑ भूः।
पि॒ता मा॒ता सद॒मिन्मानु॑षाणाम्॥ २॥

((ruśa̍ntama̱gnim̱ da̍rśa̱tam̱ bṛ̱hanta̎m |
va̱pāva̍ntam̱ vi̱śvahā̍ dīdi̱vām̐sa̎m |
pa̱dam̱ de̱vasya̱ nama̍sā vi̱yanta̍ḥ |

śra̱va̱syava̍ḥ śrava̍ āpa̱nnamṛ̍ktam ।
nāmā̍ni ciddadhire ya̱jñiyā̍ni ।
bha̱drāyā̎m te raṇayanta̱ saṃdṛ̍ṣṭau ।
tvāṃ va̍rdhanti kṣi̱taya̍ḥ pṛthi̱vyām ।
tva̱ṃ̐ rāya̍ u̱bhayā̍so̱ janā̍nām ।
tvaṃ trā̱tā ta̍raṇe̱ cetyo̍ bhūḥ ।
pi̱tā mā̱tā sada̱minmānu̍ṣāṇām ॥ 2 ॥))

**[[3-6-10-3]]**

स प॒र्येण्य॒ः स प्रि॒यो वि॒क्ष्व॑ग्निः।
होता॑ म॒न्द्रो निष॑सादा॒ यजी॑यान्।
तं त्वा॑ व॒यं दम॒ आ दी॑दि॒वाꣳस॑म्।
उप॑ज्ञु॒ बाधो॒ नम॑सा सदेम।
तं त्वा॑ व॒यꣳ सु॒धियो॒ नव्य॑मग्ने।
सु॒म्नाय॒व॑ ईमहे दे॒वयन्त॑ः।
त्वं वि॒शो॑ अनयो॒ दीद्या॑नः।
दि॒वो अ॑ग्ने बृह॒ता रो॑च॒नेन॑।
वि॒शां क॒विं वि॒श्पति॒ꣳ शश्व॑तीनाम्।
नि॒तोश॑नं वृष॒भं च॑र्ष॒णी॒नाम्॥ ३॥

((sa pa̱ryeṇya̱ḥ sa pri̱yo vi̱kṣva̍gniḥ ।
hotā̍ ma̱ndro niṣa̍sādā̱ yajī̍yān ।
taṃ tvā̍ va̱yaṃ dama̱ ā dī̍di̱vāꣳsa̍m ।
upa̍jñu̱ bādho̱ nama̍sā sadema ।
taṃ tvā̍ va̱yaꣳ su̱dhiyo̱ navya̍magne ।
su̱mnā̱yava̍ īmahe deva̱yanta̍ḥ ।
tvaṃ vi̱śo̍ anayo̱ dīdyā̍naḥ ।
di̱vo a̍gne bṛha̱tā ro̍ca̱nena̍ ।
vi̱śāṃ ka̱viṃ vi̱śpati̱ꣳ śaśva̍tīnām ।
ni̱tośa̍naṃ vṛṣa̱bhaṃ ca̍rṣaṇī̱nām ॥ 3 ॥))

**[[3-6-10-4]]**

प्रेती॑षणिमि॒षय॑न्तं पाव॒कम्।
राज॑न्तम॒ग्निं य॑ज॒तꣳ र॑यी॒णाम्।
सो अ॑ग्न ईजे शश॒मे च॒ मर्त॑ः।
यस्त॒ आन॑ट् स॒मिधा॑ ह॒व्यदा॑तिम्।
य आहु॑ति॒ं परि॒वेदा॒ नमो॑भिः।
विश्वेत्स वा॒मा द॑धते॒ त्वोत॑ः।
अ॒स्मा उ॑ ते॒ महि॒ म॒हे वि॑धेम।
नमो॑भिरग्ने स॒मिधो॒त ह॒व्यैः।
वेदी॑ सूनो सहसो गी॒र्भिरु॒क्थैः।
आ ते॑ भ॒द्रायाꣳ॑ सु॒मतौ॑ य॑तेम॥ ४॥

((pretī̍ṣaṇimi̱ṣaya̍ntaṃ pāva̱kam ।
rāja̍ntama̱gniṃ ya̍ja̱taꣳ ra̍yī̱ṇām ।
so a̍gna īje śaśa̱me ca̱ marta̍ḥ ।
yasta̱ āna̍ṭ sa̱midhā̍ ha̱vyadā̍tim ।
ya āhu̍ti̱ṃ pari̱vedā̱ namo̍bhiḥ ।
viśvetsa vā̱mā da̍dhate̱ tvota̍ḥ ।
a̱smā u̍ te̱ mahi ma̱he vi̍dhema ।
namo̍bhiragne sa̱midho̱ta ha̱vyaiḥ ।
vedī̍ sūno sahaso gī̱rbhiru̱kthaiḥ ।
ā te̍ bha̱drāyā̎ṃ suma̱tau ya̍tema ॥ 4 ॥))

**[[3-6-10-5]]**

आ यस्त॒तन्थ॒ रोद॑सी॒ वि भा॒सा।
श्रवो॑भिश्च श्रव॒स्य॑स्तरु॑त्रः।
बृ॒हद्भि॒र्वाजै॒ः स्थवि॑रेभि॒रस्मे।
रे॒वद्भि॑रग्ने वित॒रं विभा॑हि।
नृ॒वद्व॑सो॒ सद॒मिद्धे॒॑ ह्यस्मे।
भूरि॑ तो॒काय॒ तन॑याय प॒श्वः।
पू॒र्वीरि॒षो॑ बृह॒तीरा॒रे अ॑घाः।
अ॒स्मे भ॒द्रा सौ॑श्रव॒सानि॑ सन्तु।
पु॒रू॒ण्य॑ग्ने पुरु॒धा त्वा॒या।
वसू॑नि राजन्व॒सुता॑ते अश्याम्।
पु॒रू॒णि॒ हि त्वे पु॑रुवा॒र॒ सन्ति॑।
अग्ने॒ वसु॑ वि॒धते राज॑नि॒ त्वे॥ ५॥
जा॒गृ॒वाꣳसो॒ अनु॑ग्म॒न्मानु॑षाणां चर्ष॒णी॒नां य॑तेमाश्यां॒ द्वे च॑॥ १०॥

((ā yasta̱tantha̱ roda̍sī̱ vi bhā̱sā ।
śravo̍bhiśca śrava̱syā̍staru̍traḥ ।
bṛ̱hadbhi̱rvājai̱ḥ sthavi̍rebhi̱rasme ।
re̱vadbhi̍ragne vita̱raṃ vibhā̍hi ।
nṛ̱vadva̍so̱ sada̱middhe̎ hyasme ।
bhūri̍ to̱kāya̱ tana̍yāya pa̱śvaḥ ।
pū̱rvīri̱ṣo̍ bṛha̱tīrā̱re a̍ghāḥ ।
a̱sme bha̱drā sau̍śrava̱sāni̍ santu ।
pu̱rū̱ṇya̍gne puru̱dhā tvā̱yā ।
vasū̍ni rājanva̱sutā̍te aśyām ।
pu̱rū̱ṇi̱ hi tve pu̍ruvāra̱ santi̍ ।
agne̱ vasu̍ vidha̱te rāja̍ni̱ tve ॥ 5 ॥
jā̱gṛ̱vāꣳso̱ anu̍gma̱nmānu̍ṣāṇā̱ṃ carṣa̱ṇī̱nāṃ
ya̍temāśyā̱ṃ dve ca̍ ॥ 10 ॥))

**[[3-6-11-1]]**

आभ॑रतꣳ शिक्षतं वज्रबाहू।
अ॒स्माꣳ इ॑न्द्राग्नी अव॒तꣳ शची॑भिः।
इ॒मे नु ते र॒श्मय॒ः सूर्य॑स्य।
येभि॒ः सपि॒त्वं पि॒तरो॑ न॒ आय॑न्।
होता॑ यक्षदिन्द्रा॒ग्नी।

छाग॑स्य ह॒विष॒ आत्ता॑म॒द्य।

म॒ध्य॒तो मेद॒ उद्भृ॑तम्।

पु॒रा द्वेषो॑भ्यः।

पु॒रा पौरु॑षेय्या गृ॒भः।

घस्ता॑न्नू॒नम्॥ १॥

((ābhárataṁ śikṣataṃ vajrabāhū ।
a̱smām̐ índrāgnī avata̱m̐ śacíbhiḥ ।
i̱me nu te ra̱śmaya̱ḥ sūryásya ।
yebhíḥ sapi̱tvaṃ pi̱taró na̱ āyan ।
hotá yakṣadindra̱gnī ।
chāgásya ha̱viṣa̱ āttáma̱dya ।
ma̱dhya̱to meda̱ udbhṛ́tam ।
pu̱rā dveṣóbhyaḥ ।
pu̱rā paurúṣeyyā gṛ̱bhaḥ ।
ghastánnū̱nam ॥ 1 ॥))

**[[3-6-11-2]]**

घा॒से अ॑ज्रा॒णा॒ं यव॑सप्रथमानाम्।

सु॒मत्क्ष॑राणा॒ꣳ श॒तरु॑द्रियाणाम्।

अ॒ग्नि॒ष्वा॒त्ता॒नां॒ पीवो॑पवसवानाम्।

पा॒र्श्व॒तः श्रो॑णि॒तः शि॑ताम॒त उ॑त्साद॒तः।

अ॒ङ्गा॑द॒ङ्गा॒दव॑त्तानाम्।

कर॑त ए॒वेन्द्रा॒ग्नी।

जु॒षेता॒ꣳ ह॒विः।

होत॒र्यज॑।

दे॒वेभ्यो॑ वनस्पते ह॒वीꣳषि॑।

हिर॑ण्यपर्ण प्र॒दिव॑स्ते॒ अर्थ॑म्॥ २॥

((ghā̱se ájrāṇā̱ṃ yavásaprathamānām।
su̱matkṣárāṇā̱m̐ śa̱tarúdriyāṇām ।
a̱gni̱ṣvā̱ttānā̱ṃ pīvópavasavānām ।
pārśva̱taḥ śróṇi̱taḥ śítāma̱ta útsāda̱taḥ ।
aṅgáda̱ṅgā̱daváttānām ।
karáta e̱vendra̱gnī ।
ju̱ṣetām̐ ha̱viḥ ।
hota̱ryajá ।
de̱vebhyó vanaspate ha̱vīm̐ṣí ।
hiráṇyaparṇa pra̱divásṯe arthám ॥ 2 ॥))

**[[3-6-11-3]]**

प्र॒द॒क्षि॒णिद्र॑श॒नया॑ नि॒यूय॑।

ऋ॒तस्य॑ वक्षि प॒थि॒भी॒ रजि॑ष्ठैः।

होता॑ यक्ष॒द्वन॒स्पति॑म॒भि हि।

पि॒ष्टत॑मया॒ रभि॑ष्ठया र॒श॒नया॑ऽऽधित।

यत्रे॑न्द्रा॒ग्नि॒योश्छाग॑स्य ह॒विषः॑ प्रि॒या धामा॑नि।

यत्र॒ व॒न॒स्पतेः॑ प्रि॒या पाथा॑ꣳसि।

यत्र॑ दे॒वाना॑माज्य॒पाना॑ं प्रि॒या धामा॑नि।

यत्रा॒ग्नेर्होतुः॑ प्रि॒या धामा॑नि।

तत्रै॒तं प्र॒स्तु॒त्ये॑वोप॒स्तु॒त्ये॑वोपाव॑स्रक्षत्।

रभी॑याꣳसमिव कृ॒त्वी॥ ३॥

((pra̱da̱kṣi̱ṇidráśa̱nayá ni̱yūyá ।
ṛ̱tasyá vakṣi pa̱thibhī̱ rajíṣṭhaiḥ ।
hotá yakṣa̱dvana̱spatíma̱bhi hi ।
pi̱ṣṭatámayā̱ rabhíṣṭhayā raśa̱nayā''dhíta ।
yatrē̆ndrāgni̱yoścāgásya ha̱viṣáḥ pri̱yā dhāmáni ।
yatra̱ vana̱spatéḥ pri̱yā pāthām̐si ।
yatra̱ de̱vānámājya̱pānām̐ pri̱yā dhāmáni ।
yatrā̱gnerhotúḥ pri̱yā dhāmáni ।
tatrai̱taṃ pra̱stutyévopa̱stutyévo̱pāvásrakṣat ।
rabhíyām̐samiva kṛ̱tvī ॥ 3 ॥))

**[[3-6-11-4]]**

कर॑द्दे॒वं दे॒वो वन॒स्पतिः॑।

जु॒षता॒ꣳ ह॒विः।

होत॒र्यज॑।

पि॒प्री॒हि दे॒वाꣳ उ॑श॒तो य॑विष्ठ।

वि॒द्वाꣳ ऋ॒तूꣳर् ऋ॑तुपते यजे॒ह।

ये दैव्या॑ ऋ॒त्विज॒स्तेभि॑रग्ने।

त्वꣳ होतॄ॒णाम॒स्याय॑जिष्ठः।

होता॑ यक्षद॒ग्निꣳ स्वि॑ष्ट॒कृत॑म्।

अया॑ड॒ग्निरि॑न्द्रा॒ग्नि॒योश्छाग॑स्य ह॒विषः॑ प्रि॒या धामा॑नि।

अया॒ड्वन॒स्पतेः॑ प्रि॒या पाथा॑ꣳसि।

अया॑ड्दे॒वाना॑माज्य॒पाना॑ं प्रि॒या धामा॑नि।

यक्ष॑द॒ग्नेर्होतुः॑ प्रि॒या धामा॑नि।

यक्ष॒त्स्वं म॑हि॒मान॑म्।

आय॑जता॒मेज्या॑ इषः॑।

कृ॒णोतु॒ सो अ॑ध्व॒रा जा॒तवे॑दाः।

जु॒षता॒ꣳ ह॒विः।

होत॒र्यज॑॥ ४॥

नूनमर्थ॑ं कृ॒त्वी पाथा॑ꣳसि स॒प्त च॑॥ ११॥

((karáde̱vaṃ de̱vo vana̱spatiḥ ।
ju̱ṣatām̐ ha̱viḥ ।
hota̱ryajá ।
pi̱prī̱hi de̱vām̐ úśa̱to yáviṣṭha ।

vi̱dvām̐ ṛ̱tūm̐r ṛ̱tupate yaje̱ha ।
ye daivyā̍ ṛ̱tvija̱stebhi̍ragne ।
tvam̐ hotṝ̍ṇāma̱syāyā̍jiṣṭhaḥ ।
hotā̍ yakṣada̱gnim̐ svi̱ṣṭa̱kṛtā̎m ।
ayā̍ḍa̱gniri̍ndrāgni̱yośchāgā̍sya ha̱viṣa̍ḥ pri̱yā dhāmā̍ni ।
ayā̱ḍvana̱spate̎ḥ pri̱yā pāthā̱m̐si ।
ayā̱̎ḍde̱vānā̍mājya̱pānā̱m̐ pri̱yā dhāmā̍ni ।
yakṣa̍da̱gnerhotu̍ḥ pri̱yā dhāmā̍ni ।
yakṣa̱tsvaṃ ma̍hi̱mānā̎m ।
āyā̍jatā̱mejyā̱ iṣa̍ḥ ।
kṛ̱ṇotu̱ so a̍dhva̱rā jā̱tave̍dāḥ ।
ju̱ṣatā̱m̐ ha̱viḥ ।
hota̱ryajā̍ ॥ 4 ॥
nū̱namarthaṃ̱ kṛ̱tvī pāthā̱m̐si sa̱pta ca̍ ॥ 11 ॥))

**[[3-6-12-1]]**

उपो॑ह॒ यद्वि॒दथं॑ वा॒जिनो॒ गूः।
गी॒र्भिर्विप्राः॒ प्रम॑तिमि॒च्छमा॑नाः।
अ॒र्वन्तो॒ न काष्ठां॒ नक्ष॑माणाः।
इ॒न्द्रा॒ग्नी जोहु॑वतो॒ नर॒स्ते।
वन॑सपते रश॒नया॑ऽभि॒धाय॑।
पि॒ष्ट॒तम॑या व॒युना॑नि वि॒द्वान्।
वह॑ दे॒वत्रा दि॑धिषो ह॒वीꣳषि॑।
प्र च॑ दा॒तार॑म॒मृते॑षु वोचः।
अ॒ग्निꣳ स्वि॑ष्ट॒कृत॑म्।
अया॑ड॒ग्निरि॑न्द्राग्नि॒योश्छागा॑स्य ह॒विषः॑ प्रि॒या धामा॑नि॥
१॥

((upo̍ha̱ yadvi̱dathaṃ̍ vā̱jino̱ gūḥ ।
gī̱rbhirviprā̱ḥ prama̍timi̱cchamā̍nāḥ ।
a̱rvanto̱ na kāṣṭhā̱ṃ nakṣa̍māṇāḥ ।
i̱ndrā̱gnī johu̍vato̱ nara̱ste ।
vana̍sapate raśa̱nayā̍'bhi̱dhāya̍ ।
pi̱ṣṭa̱tama̍yā va̱yunā̍ni vi̱dvān ।
vaha̍ deva̱trā di̍dhiṣo ha̱vīm̐ṣi̍ ।
pra ca̍ dā̱tāra̍ma̱mṛte̍ṣu vocaḥ ।
a̱gnim̐ svi̍ṣṭa̱kṛta̍m ।
ayā̍ḍa̱gniri̍ndrāgni̱yośchāgā̍sya ha̱viṣa̍ḥ pri̱yā dhāmā̍ni ॥ 1 ॥))

**[[3-6-12-2]]**

अया॒ड्वन॒स्पते॑ः प्रि॒या पाथा॒ꣳसि।
अया॒̎ड्दे॒वाना॑माज्य॒पाना॒ँ प्रि॒या धामा॑नि।
यक्ष॑द॒ग्नेर्होतुः॑ प्रि॒या धामा॑नि।
यक्ष॒त्स्वं म॑हि॒माना॑म्।
आय॑जता॒मेज्या॒ इषः॑।
कृ॒णोतु॒ सो अ॑ध्व॒रा जा॒तवे॑दाः।
जु॒षता॒ꣳ ह॒विः।
अग्ने॒ यद॒द्य वि॒शो अ॑ध्वरस्य होतः।
पाव॑क शोचे॒ वेष्ट्वꣳ हि यज्वा॑।
ऋ॒ता य॑जासि महि॒ना वि यद्भूः।
ह॒व्या व॑ह यविष्ठ॒ या ते॑ अ॒द्य॥ २॥
धामा॑नि॒ भूरेकं॑ च॥ १२॥

((ayā̱ḍvana̱spate̎ḥ pri̱yā pāthā̱m̐si ।
ayā̱̎ḍde̱vānā̍mājya̱pānā̱m̐ pri̱yā dhāmā̍ni ।
yakṣa̍da̱gnerhotu̍ḥ pri̱yā dhāmā̍ni ।
yakṣa̱tsvaṃ ma̍hi̱mānā̎m ।
āyā̍jatā̱mejyā̱ iṣa̍ḥ ।
kṛ̱ṇotu̱ so a̍dhva̱rā jā̱tave̍dāḥ ।
ju̱ṣatā̱m̐ ha̱viḥ ।
agne̱ yada̱dya vi̱śo a̍dhvarasya hotaḥ ।
pāva̍ka śoce̱ veṣṭvam̐ hi yajvā̎ ।
ṛ̱tā ya̍jāsi mahi̱nā vi yadbhūḥ ।
ha̱vyā va̍ha yaviṣṭha̱ yā te̍ a̱dya ॥ 2 ॥
dhāmā̍ni̱ bhūrekaṃ̍ ca ॥ 12 ॥))

**[[3-6-13-1]]**

दे॒वं ब॒र्हिः सु॒देवं॑ दे॒वैः स्यात्सु॒वीरं॑ वी॒रैर्वस्तो॑र्वृ॒ज्येता॒क्तोः प्रभ्रि॑येता॒त्यन्या॒न्राया ब॒र्हिष्म॑तो मदेम वसु॒वने॑ वसु॒धेय॑स्य वेतु यज॑।
दे॒वीर्द्वारः॑ संघाते वि॒ड्वीर्याम॑ञ्छिथि॒रा ध्रु॒वा दे॒वहू॑तौ व॒त्स ईं॑ मेना॒स्तरु॑ण आमि॑मीयात्कु॒मारो॑ वा॒ नव॑जातो॒ मैना॒ अर्वा॑ रेणु॒कक॑ाटः पृण॒ग्वसु॒वने॑ वसु॒धेय॑स्य वियन्तु॒ यज॑।
दे॒वी उ॒षासा॒नक्ता॑ऽद्यास्मिन्य॒ज्ञे प्र॑यत्य॑ह्वेता॒मपि॑ नूनं दैवी॒र्वि॑शः प्राया॑सिष्टा॒ꣳ सु॒प्रीते॒ सु॒धि॑ते वसु॒वने॑ वसु॒धेय॑स्य वीतां॒ यज॑।
दे॒वी जोष्ट्री॒ वसु॑धिती॒ ययो॑र॒न्याऽघा द्वेषा॑ꣳसि यु॒यव॒दाऽन्या व॑क्ष॒द्वसु॒ वार्या॑णि॒ यज॑मानाय वसु॒वने॑ वसु॒धेय॑स्य वीतां॒ यज॑।
दे॒वी ऊ॒र्जाहु॑ती॒ इष॒मूर्ज॑म॒न्या व॑क्ष॒त्सग्धि॒ꣳ सपी॑तिम॒न्या नवे॑न॒ पूर्वं॑ दय॑माना॒ः स्याम॑ पु॒राणे॑न॒ नवं॑ ता॒मूर्ज॑मू॒र्जाहु॑ती ऊ॒र्जय॑माने अधातां वसु॒वने॑ वसु॒धेय॑स्य वीतां॒ यज॑।
दे॒वा दैव्या॒होता॑रा॒ नेष्टा॑रा॒ पोता॑रा ह॒ताघ॑शꣳसावा॒भर॒द्व॑सू वसु॒वने॑ वसु॒धेय॑स्य वीतां॒ यज॑।
दे॒वीस्ति॒स्रस्ति॒स्रो दे॒वीरिडा॒ सर॑स्वती॒ भार॑ती॒ द्यां भार॑त्यादि॒त्यैर॑स्पृक्ष॒त्सर॑स्वती॒मꣳ रु॒द्रैर्य॒ज्ञमा॑वीदि॒हैवेड॑या॒ वसु॑मत्या स॒धमा॑दं मदेम वसु॒वने॑ वसु॒धेय॑स्य वियन्तु॒

यज॑।
दे॒वो न॑रा॒शꣳस॑स्त्रिशी॒र्षा ष॑ड॒क्षः श॒तमि॑दे॒नꣳ शि॑तिपृ॒ष्ठा आद॑धति स॒हस्र॑मी॒मीं प्र॒वह॑न्ति मि॒त्रावरु॑णेद॒स्य हो॒त्रमर्ह॑तो बृह॒स्पति॑ः स्तो॒त्रम॒श्विना॑ऽऽध्व॑र्यवं वसु॒वने॑ वसु॒धेय॑स्य वेतु॒ यज॑।
दे॒वो व॒नस्पति॒र्व॒र्षप्रा॑वा घृ॒तनि॑र्णि॒ग्द्यामग्रे॒णास्पृ॑क्ष॒दाऽन्तरि॑क्षं॒ मध्ये॑नाप्राः पृ॑थि॒वीमु॒परे॑णादृꣳहीद्वसु॒वने॑ वसु॒धेय॑स्य वेतु॒ यज॑।
दे॒वं ब॒र्हिर्वारि॑तीनां नि॒धे धा॒सि॒ प्रच्यु॑तीना॒मप्रच्यु॑तं निका॒मधर॑णं पुरुस्पा॒र्हं य॒शस्व॑दे॒ना ब॒र्हिषा॒ऽन्या ब॒र्हीꣳष्य॒भिष्या॑म वसु॒वने॑ वसु॒धेय॑स्य वेतु॒ यज॑।
दे॒वो अ॒ग्निः स्वि॑ष्ट॒कृत्सु॒द्रवि॑णा म॒न्द्रः क॒विः स॒त्यम॑न्माऽऽय॒जी होता॒ हो॒तुर्हो॑तु॒राय॑जीया॒नग्ने॒ यान्दे॒वानया॒ड्याꣳ अपि॑प्रेर्ये॒ ते॑ हो॒त्रे अम॑त्सत॒ ताꣳ स॑स॒नुषी॒ꣳ होत्राँ॑ देवंग॒मां दि॒वि दे॒वेषु॒ य॒ज्ञमेर॑येमꣳ स्वि॑ष्ट॒कृच्चाग्ने॒ होता॒ऽभूँ॒र्वसु॒वने॑ वसु॒धेय॑स्य नमोवा॒के वीहि॒ यज॑॥ १॥
यजैकं॑ च॥ १३॥

((de̱vaṃ ba̱rhiḥ su̍de̱vaṃ de̱vaiḥ syātsu̱vīra̍ṃ vī̱rairvastō̍rvṛ̱jyetā̱ktoḥ prabhri̍ye̱tātyanyānrā̱yā ba̱rhiṣma̍to madema vasu̱vane̍ vasu̱dheya̍sya vetu̱ yaja̍ ।
de̱vīrdvā̍raḥ saṃghā̱te vi̱ḍvīryā̱mā̱ñchithi̱rā dhru̱vā de̱vahū̍tau va̱tsa i̍mena̱starū̍ṇa̱ āmi̍mīyātkumā̱ro vā̱ navā̍jāto̱ maina̱ arvā̍ re̱ṇukakā̍ta̱ḥ pṛṇagvasu̱vane̍ vasu̱dheya̍sya viyantu̱ yaja̍ ।
de̱vī u̱ṣāsā̱naktā'dyā̱sminya̱jñe praya̍tyahveta̱mapi̍ nū̱naṃ daivī̱rviśa̍ḥ prāyā̍siṣṭā̱m̐ supri̍te̱ sudhi̍te vasu̱vane̍ vasu̱dheya̍sya vītā̱m yaja̍ ।
de̱vī jo̱ṣṭrī̱ vasu̍dhitī̱ yayo̍ra̱nyā'ghā dveṣā̱m̐si yu̱yava̱dā'nyā vakṣa̱dvasu̱ vārya̍ṇi yaja̍mānāya vasu̱vane̍ vasu̱dheya̍sya vītā̱m yaja̍ ।
de̱vī ūrjāhū̍tī̱ i̱ṣamūrja̍ma̱nyā vakṣa̱tsagdhi̱m̐ sapi̍tima̱nyā nave̍na̱ pūrva̱ṃ daya̍māna̱ḥ syāma̍ purā̱ṇena̱ nava̱ṃ tāmūrja̍mū̱rjāhū̍tī ū̱rjaya̍māne adhātā̱ṃ vasu̱vane̍ vasu̱dheya̍sya vītā̱m yaja̍ ।
de̱vā daivyā̱hotā̍rā̱ ne̱ṣṭārā̱ potā̍rā ha̱tāgha̍śam̐sāvābha̱radva̍sū vasu̱vane̍ vasu̱dheya̍sya vītā̱m yaja̍ ।
de̱vīsti̱srasti̱sro de̱vīri̱ḍā̱ sara̍svatī̱ bhāra̍tī̱ dyāṃ bhāra̍tyādi̱tyairaspṛkṣa̱tsara̍svatī̱mam̐ ru̱drairya̱jñama̍vīdi̱haive̱ḍayā̱ vasu̍matyā sa̱dhamā̱da̱ṃ madema vasu̱vane̍ vasu̱dheya̍sya viyantu̱ yaja̍ ।
de̱vo narā̱śam̐sastriśī̱rṣā ṣa̱ḍa̱kṣa̱ḥ śa̱tamide̱nam̐ śiti̱pṛ̱ṣṭhā āda̍dhati sa̱hasra̍mī̱m̐ pra̱va̍hanti mi̱trāvaru̱ṇeda̍sya ho̱tramarha̍to̱ bṛ̱haspati̍ḥ sto̱trama̱śvinā''dhva̍ryavaṃ vasu̱vane̍ vasu̱dheya̍sya vetu̱ yaja̍ ।
de̱vo vana̱spati̱rva̱rṣaprā̍vā ghṛ̱tani̍rṇi̱gdyāmagre̱ṇāspṛ̍kṣa̱dā'ntari̍kṣa̱ṃ madhye̍nāprā̱ḥ pṛ̱thi̱vīmu̱pare̍ṇādṛm̐hīdvasu̱vane̍ vasu̱dheya̍sya vetu̱ yaja̍ ।
de̱vaṃ ba̱rhirvāri̍tīnāṃ ni̱dhe dhā̍si̱ pracyu̍tīnā̱mapra̍cyutaṃ nikā̱madhara̍ṇaṃ puruspā̱rhaṃ yaśa̍svade̱nā ba̱rhiṣā̱'nyā ba̱rhīm̐ṣya̱bhiṣyā̍ma vasu̱vane̍ vasu̱dheya̍sya vetu̱ yaja̍ ।
de̱vo a̱gniḥ svi̍ṣṭa̱kṛtsu̱dravi̍ṇā ma̱ndraḥ ka̱viḥ sa̱tyama̍nmā''ya̱jī hota̱ hotu̍rhotu̱rāya̍jīyā̱nagne̱ yānde̱vānaya̱ḍyām̐ api̍pre̱rye te̍ ho̱tre ama̍tsata̱ tām̐ sa̍sa̱nuṣī̱m̐ hotrā̱m̐ deva̱ṃga̱mām di̱vi de̱veṣu̍ ya̱jñamera̍ye̱mam̐ svi̍ṣṭa̱kṛccāgne̱ hotā'bhū̱m̐rvasu̱vane̍ vasu̱dheya̍sya namovā̱ke vīhi̱ yaja̍ ॥ 1 ॥
yajaika̍ṃ ca ॥ 13 ॥))

**[[3-6-14-1]]**
दे॒वं ब॒र्हिः।
व॒सु॒वने॑ वसु॒धेय॑स्य वेतु।
दे॒वीर्द्वार॑ः।
व॒सु॒वने॑ वसु॒धेय॑स्य वियन्तु।
दे॒वी उ॒षासा॒नक्ता॑।
व॒सु॒वने॑ वसु॒धेय॑स्य वीताम्।
दे॒वी जोष्ट्री॑।
व॒सु॒वने॑ वसु॒धेय॑स्य वीताम्।
दे॒वी ऊ॒र्जाहु॑ती।
व॒सु॒वने॑ वसु॒धेय॑स्य वीताम्॥ १॥

((de̱vaṃ ba̱rhiḥ ।
va̱su̱vane̍ vasu̱dheya̍sya vetu ।
de̱vīrdvārā̍ḥ ।
va̱su̱vane̍ vasu̱dheya̍sya viyantu ।
de̱vī u̱ṣāsā̱naktā̍ ।
va̱su̱vane̍ vasu̱dheya̍sya vītām ।
de̱vī jo̱ṣṭrī̍ ।
va̱su̱vane̍ vasu̱dheya̍sya vītām ।
de̱vī ūrjāhū̍tī ।
va̱su̱vane̍ vasu̱dheya̍sya vītām ॥ 1 ॥))

**[[3-6-14-2]]**
दे॒वा दैव्या॒ होता॑रा।
व॒सु॒वने॑ वसु॒धेय॑स्य वीताम्।
दे॒वीस्ति॒स्रस्ति॒स्रो दे॒वीः।
व॒सु॒वने॑ वसु॒धेय॑स्य वियन्तु।
दे॒वो न॑रा॒शꣳस॑ः।

व॒सु॒वने॑ वसुधेय॑स्य वेतु।
दे॒वो व॒नस्पति॑ः।
व॒सु॒वने॑ वसुधेय॑स्य वेतु।
दे॒वं ब॒र्हिर्वारि॑तीनाम्।
व॒सु॒वने॑ व॒सुधेय॑स्य वेतु॥ २॥

((de̱vā daivyā̱ hotā̍rā ।
va̱su̱vane̍ vasu̱dheyā̍sya vītām ।
de̱vīsti̱srasti̱sro de̱vīḥ ।
va̱su̱vane̍ vasu̱dheyā̍sya viyantu ।
de̱vo narā̱śaꣳ̍saḥ ।
va̱su̱vane̍ vasu̱dheyā̍sya vetu ।
de̱vo vana̱spati̍ḥ ।
va̱su̱vane̍ vasu̱dheyā̍sya vetu ।
de̱vaṃ ba̱rhirvāri̍tīnām ।
va̱su̱vane̍ va̱sudheyā̍sya vetu ॥ 2 ॥))

**[[3-6-14-3]]**
दे॒वो अ॒ग्निः स्वि॑ष्ट॒कृत्।
सु॒द्रवि॑णा म॒न्द्रः क॒विः।
स॒त्यम॑न्माऽऽय॒जी होता᳚।
होतु॑र्होतु॒राय॑जीयान्।
अ॒ग्नेयान्दे॒वानया᳚ट्।
याꣳ अपि॑प्रेः।
ये ते॑ हो॒त्रे अम॑त्सत।
ताꣳ स॑स॒नुषी॒ꣳ होत्रा᳚ꣳ देवंग॒माम्।
दि॒वि दे॒वेषु॑ य॒ज्ञमेर॑येमम्।
स्वि॒ष्ट॒कृच्चाग्ने॒ होताऽभू᳚ः।
व॒सु॒वने॑ वसुधेय॑स्य नमोवा॒के वीहि॑॥ ३॥
वी॒तां वे॒त्वभू॒रेकं॑ च॥ १४॥

((de̱vo a̱gniḥ svi̍ṣṭa̱kṛt ।
su̱dravi̍ṇā ma̱ndraḥ ka̱viḥ ।
sa̱tyamā̍nmā''ya̱jī hotā᳚ ।
hotu̍rhotu̱rāyā̍jīyān ।
agne̱yānde̱vānayā᳚ṭ ।
yāꣳ api̍preḥ ।
ye te̍ ho̱tre amā̍tsata ।
tāꣳ sā̍sa̱nuṣī̱ꣳ hotrā᳚ꣳ devaṃga̱mām ।
di̱vi de̱veṣu̍ ya̱jñamerā̍ye̱mam ।
svi̱ṣṭa̱kṛccāgne̱ hotā'bhū᳚ḥ ।
va̱su̱vane̍ vasu̱dheyā̍sya namovā̱ke vīhi̍ ॥ 3 ॥
vī̱tā̱ṃ ve̱tvabhū̱rekaṃ̍ ca ॥ 14 ॥
))

**[[3-6-15-1]]**
अ॒ग्निम॒द्य होता॑रमवृणीता॒यं यज॑मानः॒ पच॒न्पक्तीः
पच॑न्पुरो॒डाशं॑ ब॒ध्नन्निन्द्रा॒ग्निभ्या॒ं छाग॒ꣳ सूप॒स्था अ॒द्य दे॒वो
व॒नस्पति॑रभवदिन्द्रा॒ग्निभ्या॒ं छाग॒ेनाघ॑स्तां तं मेद॒स्तः प्रति॑
पच॒ताऽग्र॑भीष्टा॒मवी॑वृधेतां पुरो॒डाशे॑न॒ त्वाम॒द्यर्षे॑
आर्षेयर्षीणां नपादवृणीता॒यं यज॑मानो ब॒हुभ्य॒ आ
सं॒ग॑तेभ्य ए॒ष मे॑ दे॒वेषु॒ वसु॒ वार्याय॑क्ष्यत॒ इति॒ ता या दे॒वा
दे॑व॒दाना॒न्यदु॒स्तान्य॑स्मा॒ आ च॒ शास्वा च॑ गुरस्वेषि॒तश्च॑
होत॒रसि॑ भद्र॒वाच्या॑य॒ प्रेषि॑तो॒ मानु॑षः सूक्तवा॒काय॑ सूक्ता
ब्रू॑हि॥ १॥
अ॒ग्निम॒द्यैकम्॥ १५॥
अ॒ञ्जन्ति॒ होता॑ यक्ष॒त्समि॑द्धो अ॒द्याग्निर॒जै॒द्दैव्या॑
जुषस्वावृ॑त्रहणा गीर्भिस्त्वꣳ᳚ ह्याभ॑रत॒मुपो॑ह॒ यद्दे॒वं ब॒र्हिः
सु॑दे॒वं दे॒वं ब॒र्हिर॒अग्निम॒द्य पञ्च॑दश॥ १५॥
अ॒ञ्जन्त्यु॒पाव॑सृज॒न्नान्या यु॒वत्क॒र॑देवम॒ष्टात्रि॒ꣳ॑शत्॥ ३८॥

((a̱gnima̱dya hotā̍ramavṛṇītā̱yaṃ yajā̍mānaḥ̱
pacā̍npa̱ktīḥ pacā̍npuro̱ḍāśaṃ̍
ba̱dhnannindrā̱gnibhyā̱ṃ chāgaꣳ̍ sūpa̱sthā a̱dya
de̱vo vana̱spati̍rabhavadindrā̱gnibhyā̱ṃ
chāge̱nāghā̍stā̱ṃ taṃ me̍da̱staḥ prati̍
paca̱tā'grā̍bhīṣṭā̱mavi̍vṛdhetāṃ puro̱ḍāśe̍na̱
tvāma̱dyarṣe̍ ārṣeyarṣīṇāṃ napādavṛṇītā̱yaṃ
yajā̍māno ba̱hubhya̱ ā saṃgā̍tebhya e̱ṣa me̍ de̱veṣu̱
vasu̱ vāryāyā̍kṣyata̱ iti̱ tā yā de̱vā
de̍va̱dānā̱nyadu̱stānyā̍smā̱ ā ca̱ śāsvā ca̍
gurasveṣi̱taśca̍ hota̱rasi̍ bhadra̱vācyā̍ya̱ preṣi̍to̱
mānu̍ṣaḥ sūktavā̱kāya̍ sū̱ktā brū̍hi ॥ 1 ॥
a̱gnima̱dyaikam ॥ 15 ॥
a̱ñjanti̱ hotā̍ yakṣa̱tsami̍ddho a̱dyāgniraja̱iddaivyā̍
ju̱ṣasvāvṛ̍trahaṇā̱ gī̱rbhistvaꣳ᳚ hyābhā̍rata̱mupo̍ha̱
yadde̱vaṃ ba̱rhiḥ su̍de̱vaṃ de̱vaṃ
ba̱rhira̱agnima̱dya pañcā̍daśa ॥ 15 ॥
a̱ñjantyu̱pāvā̍sṛja̱nnānyā
yu̱vatkarā̍de̱vama̱ṣṭātriꣳ̍śat ॥ 38 ॥))

# Taittirīya-Brāhmaṇa
# Book 3, Chapter 7

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[3-7-1-1]]**

सर्वा॒न्वा ए॒षो᳚ऽग्नौ कामा॒न्प्रवे॑शयति।
यो᳚ऽग्नीन॑न्वा॒धाय॑ व्र॒तमु॒पैति॑।
स यद॒नि॑ष्ट्वा प्रया॒यात्।
अका॑मप्रीता ए॒नं कामा॒ नानु॒प्रया॑युः।
अ॒ते॒जा अ॑वी॒र्य॑ः स्यात्।
स जु॑हुयात्।
तुभ्यं॒ ता अ॑ङ्गिरस्तम्।
विश्वाः᳚ सु॒क्षि॒तय॒ः पृथ॑क्।
अग्ने॒ कामा॑य येमि॒र इति॑।
कामा॑ने॒वास्मि॑न्दधाति॥ १॥

((sarvā̱nvā e̱ṣö'gnau kāmā̱npravéśayati ।
yö'gnīnánvā̱dhāyá vra̱tamu̱paiti̍ ।
sa yadani̍ṣṭvā prayā̱yāt ।
aká̍maprītā enaṃ̱ kāmā̱ nānu̱prayá̍yuḥ ।
a̱te̱jā ávī̱ryáḥ syāt ।
sa júhuyāt ।
tubhyaṃ̱ tā áṅgirastam ।
viśvā̈ḥ sukṣi̱taya̱ḥ pṛthák ।
agne̱ kāmáya yemira̱ iti̍ ।
kāmáne̱vāsmíndadhāti ॥ 1 ॥))

**[[3-7-1-2]]**

काम॑प्रीता ए॒नं कामा॒ अनु॒प्रया᳚न्ति।
ते॒ज॒स्वी वी॒र्या॑वान्भवति।
संत॑ति॒र्वा ए॒षा य॒ज्ञस्य॑।
यो᳚ऽग्नीन॑न्वा॒धाय॑ व्र॒तमु॒पैति॑।
स यदु॒द्वाय॑ति।
विच्छि॑त्तिरे॒वास्य॒ सा।
तं प्राञ्च॑मु॒द्धृत्य॑।
मन॒सोप॑तिष्ठेत।
मनो॒ वै प्र॒जाप॑तिः।
प्रा॒जा॒प॒त्यो य॒ज्ञः॥ २॥

((kāmáprītā enaṃ̱ kāmā̱ anu̱prayā̈nti ।
te̱ja̱svī vī̱ryávānbhavati ।
saṃtáti̱rvā e̱ṣā ya̱jñasyá ।
yö'gnīnánvā̱dhāyá vra̱tamu̱paiti̍ ।
sa yadu̱dvāyáti ।
vicchíttire̱vāsya̱ sā ।
taṃ prāñcámu̱ddhṛtyá ।
mana̱sopátiṣṭheta ।
mano̱ vai pra̱jāpátiḥ ।
prā̱jā̱pa̱tyo ya̱jñaḥ ॥ 2 ॥))

**[[3-7-1-3]]**

मन॑सैव य॒ज्ञꣳ संत॑नोति।
भूरित्या॑ह।
भू॒तो वै प्र॒जाप॑तिः।
भूति॑मे॒वोपै॑ति।
वि वा ए॒ष इ॑न्द्रि॒येण॑ वी॒र्ये॑णर्द्ध्यते।
यस्याहि॑ताग्नेर॒ग्निर॑प॒क्षाय॑ति।
याव॒च्छम्य॑या प्र॒विध्ये᳚त्।
यदि॒ ताव॑दप॒क्षाये᳚त्।
तꣳ संभ॑रेत्।
इ॒दं त एकं॒ पर उ॑त॒ एक᳚म्॥ ३॥

((manásai̱va ya̱jñaṁ saṃtánoti ।
bhūrityáha ।
bhū̱to vai pra̱jāpátiḥ ।
bhūtíme̱vopaíti ।
vi vā e̱ṣa índri̱yeṇá vī̱ryé̱ṇarddhyate ।
yasyāhítāgnera̱gnirápa̱kṣāyáti ।
yāva̱cchamyáyā pra̱vidhyë̈t ।
yadi̱ tāvádapa̱kṣāyë̈t ।
taṁ saṃbháret ।
i̱daṃ ta ekaṃ̍ pa̱ra úta̱ ekä̈m ॥ 3 ॥))

**[[3-7-1-4]]**

तृ॒तीये॑न॒ ज्योति॑षा॒ संवि॑शस्व।
सं॒वेश॑नस्त॒नुवै॒ चारु॑रेधि।
प्रि॒ये दे॒वानां᳚ पर॒मे ज॒नित्र॒ इति॑।
ब्रह्म॑णैवैन॒ꣳ संभ॑रति।
सैव त॒तः प्राय॑श्चित्तिः।
यदि॑ परस्त॒राम॑पक्षाये᳚त्।
अ॒नु प्र॒याया॑वस्येत्।
सो ए॒व त॒तः प्राय॑श्चित्तिः।
ओष॑धीर्वा ए॒तस्य॑ प॒शून्पयः॑ प्रवि॑शति।
यस्य॑ ह॒विषे॑ व॒त्सा अ॒पाकृ॑ता॒ धय॑न्ति॥ ४॥

((tṛ̱tīye̍na̱ jyoti̍ṣā̱ saṃvi̍śasva |
sa̱ṃveśa̍nasta̱nuvai̱ cāru̍redhi |
pri̱ye de̱vānā̱ṃ̐ pa̱ra̱me ja̱nitra̱ iti̍ |
brahma̍ṇai̱vaina̱ṃ̐ saṃbha̍rati |
saiva tata̱ḥ prāya̍ścittiḥ |
yadi̍ parasta̱rāmā̍pa̱kṣāyē̍t |
a̱nu̱ pra̱yāyāvā̍syet |
so e̱va tata̱ḥ prāya̍ścittiḥ |
oṣa̍dhī̱rvā e̱tasya̍ pa̱śūnpaya̱ḥ pravi̍śati |
yasya̍ ha̱viṣe̍ va̱tsā a̱pākṛ̍tā̱ dhaya̍nti || 4 ||))

**[[3-7-1-5]]**

तान्यद्दु॒ह्यात्।
या॒तया॑म्ना ह॒विषा॑ यजेत।
यन्न दु॒ह्यात्।
य॒ज्ञ॒प॒रुर॒न्तरि॑यात्।
वा॒य॒व्या॑ँ यवा॒गूं निर्व॑पेत्।
वा॒युर्वै पय॑सः प्रदापयि॒ता।
स ए॒वास्मै॒ पय॒ः प्रदा॑पयति।
पयो॒ वा ओष॑धयः।
पयः॒ पय॑ः।
पय॑सैवास्मै॒ पयोऽव॑रुन्धे॥ ५॥

((tānyaddu̱hyāt |
yā̱tayā̍mnā ha̱viṣā̍ yajeta |
yanna du̱hyāt |
yajña̱paru̱rantari̍yāt |
vā̱ya̱vyā̍ṃ̐ yavā̱gūṃ nirva̍pet |
vā̱yurvai paya̍saḥ pradāpayi̱tā |
sa e̱vāsmai̱ paya̱ḥ pradā̍payati |
payo̱ vā oṣa̍dhayaḥ |
paya̱ḥ paya̍ḥ |
paya̍sai̱vāsmai̱ payo'va̍rundhe || 5 ||))

**[[3-7-1-6]]**

अथोत्त॑रस्मै ह॒विषे॑ व॒त्साना॒पाकु॑र्यात्।
सैव तत॒ः प्राय॑श्चित्तिः।
अ॒न्य॒त॒रान्वा ए॒ष दे॒वान्भा॑ग॒धेये॑न॒ व्य॑र्धयति।
ये यज॑मानस्य सा॒यं गृ॒हमा॒गच्छ॑न्ति।
यस्य॑ सा॒यं दु॒ग्धꣳ ह॒विरार्ति॑मा॒र्च्छति॑।
इन्द्रा॑य व्री॒हीन्नि॒रुव्योप॑वसेत्।
पयो॒ वा ओष॑धयः।
पय॑ ए॒वारभ्य॑ गृ॒ही॒त्वोप॑वसति।
यत्प्रा॒तः स्यात्।
तच्छृ॒तं कु॑र्यात्॥ ६॥

((athottа̍rasmai ha̱viṣe̍ va̱tsāna̱pāku̍ryāt |
saiva tata̱ḥ prāya̍ścittiḥ |
a̱nya̱ta̱rānvā e̱ṣa de̱vānbhā̍ga̱dheye̍na̱ vya̍rdhayati |
ye yaja̍mānasya sā̱yaṃ gṛ̱hamā̱gaccha̍nti |
yasya̍ sā̱yaṃ du̱gdha̱ṃ̐ ha̱virārti̍mā̱rchati̍ |
indra̍ya vrī̱hīnni̱ruvyopa̍vaset |
payo̱ vā oṣa̍dhayaḥ |
paya̍ e̱vārabhya̍ gṛ̱hī̱tvopa̍vasati |
yatprā̱taḥ syāt |
tacchṛ̱taṃ ku̍ryāt || 6 ||))

**[[3-7-1-7]]**

अथेत॑र ऐ॒न्द्रः पु॑रो॒डा॒श॑ः स्यात्।
इ॒न्द्रि॒ये ए॒वास्मै॑ स॒मीची॑ दधाति।
पयो॒ वा ओष॑धयः।
पय॒ः पय॑ः।
पय॑सैवास्मै॒ पयोऽव॑रुन्धे।
अथोत्त॑रस्मै ह॒विषे॑ व॒त्साना॒पाकु॑र्यात्।
सैव तत॒ः प्राय॑श्चित्तिः।
उ॒भया॒न्वा ए॒ष दे॒वान्भा॑ग॒धेये॑न॒ व्य॑र्धयति।
ये यज॑मानस्य सा॒यं च॑ प्रा॒तश्च॑ गृ॒हमा॒गच्छ॑न्ति।
यस्यो॒भयꣳ॑ ह॒विरार्ति॑मा॒र्च्छति॑॥ ७॥

((athetа̍ra ai̱ndraḥ pu̍ro̱ḍāśa̍ḥ syāt|
i̱ndri̱ye e̱vāsmai̍ sa̱mīci̍ dadhāti |
payo̱ vā oṣa̍dhayaḥ |
paya̱ḥ paya̍ḥ |
paya̍sai̱vāsmai̱ payo'va̍rundhe |
athotta̍rasmai ha̱viṣe̍ va̱tsāna̱pāku̍ryāt |
saiva tata̱ḥ prāya̍ścittiḥ |
u̱bhayā̱nvā e̱ṣa de̱vānbhā̍ga̱dheye̍na̱ vya̍rdhayati |
ye yaja̍mānasya sā̱yaṃ ca̍ prā̱taśca̍
gṛ̱hamā̱gaccha̍nti |
yasyo̱bhaya̱ṃ̐ ha̱virārti̍mā̱rchati̍ || 7 ||))

**[[3-7-1-8]]**

ऐ॒न्द्रं पञ्च॑शरावमो॒द॒नं निर्व॑पेत्।
अ॒ग्निं दे॒वता॑नां प्रथ॒मं य॑जेत्।
अ॒ग्निमु॑खा ए॒व दे॒वता॑ः प्रीणाति।
अ॒ग्निं वा अ॒न्व॒न्या दे॒वता॑ः।
इन्द्र॒मन्व॒न्याः।
ता ए॒वोभयी॑ः प्रीणाति।
पयो॒ वा ओष॑धयः।
पय॒ः पय॑ः।

पर्य॑सै॒वास्मै॒ पयोऽव॑रुन्धे।
अथोत्त॑रस्मै ह॒विषे॑ व॒त्सान॒पाकु॑र्या॑त्॥ ८॥

((ai̱ndraṃ pañca̍śarāvamoda̱naṃ nirva̍pet ।
a̱gniṃ de̱vata̍̄nāṃ pratha̱maṃ ya̍jet ।
a̱gnimu̍khā e̱va de̱vata̍̄ḥ prī̱ṇāti ।
a̱gniṃ vā anva̱nyā de̱vata̍̄ḥ ।
indra̱manva̱nyāḥ ।
tā e̱vobhayī̍̄ḥ prī̱ṇāti ।
payo̱ vā oṣa̍dhayaḥ ।
paya̱ḥ paya̍ḥ ।
paya̍sai̱vāsmai̱ payo'va̍rundhe ।
athotta̍rasmai ha̱viṣe̍ va̱tsāna̱pāku̍ryāt ॥ 8 ॥))

**[[3-7-1-9]]**

सैव त॒तः प्राय॑श्चित्तिः।
अ॒र्धो वा ए॒तस्य॑ य॒ज्ञस्य॑ मीयते।
यस्य॒ व्रत्येऽह॒न्पत्न्य॑नालम्भु॒का भव॑ति।
ताम॑प॒रुध्य॑ यजेत।
सर्वे॑णै॒व य॒ज्ञेन॑ यजते।
तामि॒ष्ट्वोप॑ह्वयेत।
अमूहम॑स्मि।
सा त्वम्।
द्यौर॒हम्।
पृ॒थि॒वी त्वम्।
सामा॒हम्।
ऋ॒क्त्वम्।
तावेहि॒ संभ॑वाव।
स॒ह रेतो॑ दधावहै।
पु॒ꣳसे पु॒त्राय॒ वेत्त॑वै।
रा॒यस्पोषा॑य सुप्रजा॒स्त्वाय॑ सु॒वीर्या॒येति॑।
अ॒र्ध ए॒वैना॒मुप॑ह्वयते।
सैव त॒तः प्राय॑श्चित्तिः॥ ९॥
द॒धाति॒ य॒ज्ञ उ॑त॒ ए॒कं॒ धय॑न्ति रुन्धे
कुर्यादा॒र्छत्य॒पाकु॑र्यात्पृ॒थि॒वी त्वम॒ष्टौ च॑॥ १॥
सर्वा॒न्वि॒ वै यदि॑ परस्त॒रामोष॑धीरन्यत॒रानु॒भयनि॒र्धो वै॥

((saiva tata̱ḥ prāya̍ścitti̱ḥ ।
a̱rdho vā e̱tasya̍ ya̱jñasya̍ mīyate ।
yasya̱ vratye'ha̱npatnya̍nālambhu̱kā bhava̍ti ।
tāma̍pa̱rudhya̍ yajeta ।
sarve̍ṇa̱iva ya̱jñena̍ yajate ।
tāmi̱ṣṭvopa̍hvayeta ।
amū̱hama̍smi ।
sā tvam ।
dyaura̱ham ।
pṛ̱thi̱vī tvam ।
sāmā̱ham ।
ṛ̱ktvam ।
tāvehi̱ saṃbha̍vāva ।
sa̱ha reto̍ dadhāvahai ।
pu̱m̐se pu̱trāya̱ vetta̍vai ।
rā̱yaspoṣa̍ya suprajā̱stvāya̍ su̱vīryā̱yeti̍ ।
a̱rdha e̱vainā̱mupa̍hvayate ।
saiva tata̱ḥ prāya̍ścittiḥ ॥ 9 ॥
da̱dhāti̱ ya̱jña u̍ta̱ eka̱ṃ dhaya̍nti rundhe
kuryāda̱rchatya̱pāku̍ryātpṛthi̱vī tvama̱ṣṭau ca̍ ॥ 1 ॥
sarvā̱nvi̱ vai yadi̍
parasta̱rāmoṣa̍dhīranyata̱rānu̱bhayani̱rdho vai ॥))

**[[3-7-2-1]]**

यद्विष्ष॑ण्णेन जु॒हुयात्।
अप्र॑जा अप॒शुर्य॑जमानः स्यात्।
यद॒ना॑यतने नि॒नये॑त्।
अ॒ना॒य॒त॒नः स्या॑त्।
प्रा॒जा॒प॒त्यय॒र्चा व॑ल्मीकव॒पाया॒मव॑नयेत्।
प्रा॒जा॒पत्यो वै व॒ल्मीक॑ः।
य॒ज्ञः प्र॒जाप॑तिः।
प्र॒जाप॑तावे॒व य॒ज्ञं प्रति॑ष्ठापयति।
भूरित्या॑ह।
भू॒तो वै प्र॒जाप॑तिः॥ १॥

((yadviṣṣa̍ṇṇena juhu̱yāt ।
apra̍jā apa̱śuryaja̍mānaḥ syāt ।
yadanā̍yatane ni̱nayē̍t ।
a̱nā̱ya̱ta̱naḥ syā̍̄t ।
prā̱jā̱pa̱tyaya̱rcā va̍lmīkava̱pāyā̱mava̍nayet ।
prā̱jā̱pa̱tyo vai va̱lmīka̍ḥ ।
ya̱jñaḥ pra̱jāpa̍tiḥ ।
pra̱jāpa̍tāve̱va ya̱jñaṃ prati̍ṣṭhāpayati ।
bhūritya̍ha ।
bhū̱to vai pra̱jāpa̍tiḥ ॥ 1 ॥))

**[[3-7-2-2]]**

भूति॑मे॒वपै॑ति।
तत्कृ॒त्वा।
अ॒न्यां दु॒ग्ध्वा पुन॑र्हो॒त॒व्य॑म्।
सैव त॒तः प्राय॑श्चित्तिः।
यत्की॒टाव॑पन्नेन जु॒हुयात्।
अप्र॑जा अप॒शुर्य॑जमानः स्यात्।
यद॒ना॑यतने नि॒नये॑त्।

अ॒ना॒य॒त॒नः स्या᳚त्।
म॒ध्य॒मेन॑ प॒र्णेन॑ द्यावापृथि॒व्य॑य॒र्चाऽन्तः॑परि॒धि निन॑येत्।
द्याव॑पृथि॒व्योरे॒वैन॒त्प्रति॑ष्ठापयति॥ २॥

((bhūti̍me̱vaopai̍ti |
tatkr̥̱tvā |
a̱nyāṃ du̱gdhvā puna̍rhota̱vya̍̈m |
saiva ta̱ta̱ḥ prāya̍ścittiḥ |
yatkī̱ṭāva̍pannena juhu̱yāt |
apra̍jā apa̱śuryaja̍mānaḥ syāt |
yadanā̍yatane ni̱nayë̍t |
a̱nāya̱ta̱naḥ syä̍t |
ma̱dhya̱mena̍ pa̱rṇena̍
dyāvāpr̥thi̱vya̍ya̱rcā'ntaḥ̍pari̱dhi nina̍yet |
dyāvā̍pr̥thi̱vyore̱vaina̱tprati̍ṣṭhāpayati || 2 ||))

**[[3-7-2-3]]**

तत्कृ॒त्वा।
अ॒न्यां दु॒ग्ध्वा पुन॑र्होत॒व्य᳚म्।
सैव त॒तः प्राय॑श्चित्तिः।
यद॑व॒वृष्टेन जुहुयात्।
अप॑रूपमस्या॒त्मञ्जा॑येत।
कि॒लासो॑ वा॒ स्याद॑र्श॒सो वा᳚।
यत्प्रत्ये॒यात्।
य॒ज्ञं विच्छि॑न्द्यात्।
स जु॑हुयात्।
मि॒त्रो जना᳚न्कल्पयति प्रजा॒नन्॥ ३॥

((tatkr̥̱tvā |
a̱nyāṃ du̱gdhvā puna̍rhota̱vya̍̈m |
saiva ta̱ta̱ḥ prāya̍ścittiḥ |
yadava̍vr̥̱ṣṭena juhu̱yāt |
apa̍rūpamasya̱tmañja̍yeta |
ki̱lāso̍ vā̱ syāda̍rśa̱so vä̍ |
yatpratye̱yāt |
ya̱jñaṃ vicchi̍ndyāt |
sa ju̍huyāt |
mi̱tro janä̍nkalpayati prajā̱nan || 3 ||))

**[[3-7-2-4]]**

मि॒त्रो दा॑धार पृथि॒वीमु॒त द्याम्।
मि॒त्रः कृ॒ष्टीरनि॑मिषा॒ऽभिच॑ष्टे।
स॒त्याय॑ ह॒व्यं घृ॒तव॑ज्जुहो॒तेति॑।
मि॒त्रेणै॒वैन॑त्कल्पयति।
तत्कृ॒त्वा।
अ॒न्यां दु॒ग्ध्वा पुन॑र्होत॒व्य᳚म्।
सैव त॒तः प्राय॑श्चित्तिः।
यत्पूर्व॑स्यामाहु॑त्याꣳ हु॒ताया॒मुत्त॒राऽऽहु॑तिः स्कन्दे᳚त्।
द्वि॒पाद्भि॑ः प॒शुभि॒र्यज॑माना॒ो व्यृ॑द्ध्येत।
यदुत्त॑रया॒ऽभिजु॑हु॒यात्॥ ४॥

((mi̱tro da̍dhāra pr̥thi̱vīmu̱ta dyām |
mi̱traḥ kr̥̱ṣṭīrani̍miṣā̱'bhica̍ṣṭe |
sa̱tyāya̍ ha̱vyaṃ ghr̥̱tava̍jjuho̱teti̍ |
mi̱treṇai̱vaina̍tkalpayati |
tatkr̥̱tvā |
a̱nyāṃ du̱gdhvā puna̍rhota̱vya̍̈m |
saiva ta̱ta̱ḥ prāya̍ścittiḥ |
yatpūrva̍syāmāhu̍tyāꣳ hu̱tāyā̱mutta̱rā''hu̍ti̱ḥ skandë̍t |
dvi̱pādbhi̍ḥ pa̱śubhi̱ryaja̍māno̱ vyr̥̍ddhyeta |
yadutta̍rayā̱'bhiju̍hu̱yāt || 4 ||))

**[[3-7-2-5]]**

चतु॒ष्पाद्भि॑ः प॒शुभि॒र्यज॑माना॒ो व्यृ॑द्ध्येत।
य॒त्र वेत्थ॑ वनस्पते दे॒वाना॒ं गुह्या॒ नामा॑नि।
तत्र॑ ह॒व्यानि॑ गाम॒येति॑ वानस्प॒त्यय॒र्चा स॒मिध॑मा॒धाय॑।
तू॒ष्णीमे॒व पुन॑र्जुहुयात्।
वन॒स्पति॑नै॒व य॒ज्ञस्यार्ता॒ं चाना᳚र्ता॒ं चाहु॑ती॒ विदा॑धार।
तत्कृ॒त्वा।
अ॒न्यां दु॒ग्ध्वा पुन॑र्होत॒व्य᳚म्।
सैव त॒तः प्राय॑श्चित्तिः।
यत्पु॒रा प्र॑या॒जेभ्यः॒ प्राङ्गा॑र॒ः स्कन्दे᳚त्।
अ॒ध्वर्यवे॑ च॒ यज॑माना॒य चाकꣳ॑ स्यात्॥ ५॥

((catu̍ṣpādbhiḥ pa̱śubhi̱ryaja̍māno̱ vyr̥̍ddhyeta |
yatra̱ vettha̍ vanaspate de̱vānā̱ṃ guhyā̱ nāmā̍ni |
tatra̍ ha̱vyāni̍ gāma̱yeti̍ vānaspa̱tyaya̱rcā
sa̱midha̍mā̱dhāya̍ |
tū̱ṣṇīme̱va puna̍rjuhuyāt|
vana̱spati̍nai̱va yajñasyārtā̱ṃ cānä̍rtā̱ṃ cāhu̍tī̱
vidā̍dhāra |
tatkr̥̱tvā |
a̱nyāṃ du̱gdhvā puna̍rhota̱vya̍̈m |
saiva ta̱ta̱ḥ prāya̍ścittiḥ |
yatpu̱rā pra̍yā̱jebhya̱ḥ prāṅa̍ṅgā̍ra̱ḥ skandë̍t |
a̱dhva̱ryave̍ ca̱ yaja̍mānāya̱ cākaꣳ̍ syāt || 5 ||))

**[[3-7-2-6]]**

यद्द॑क्षि॒णा।
ब्र॒ह्मणे॑ च॒ यज॑माना॒य चाकꣳ॑ स्यात्।
यत्प्र॒त्यक्।
होत्रे॑ च॒ पत्नि॑यै च॒ यज॑माना॒य चाकꣳ॑ स्यात्।

यदुदङ्।
अग्नीधे च पशुभ्यश्च यजमानाय चाकꣳ स्यात्।
यदभिजुहुयात्।
रुद्रोऽस्य पशूनघातुकः स्यात्।
यन्नाभिजुहुयात्।
अशान्तः प्रह्रियेत॥ ६॥

((yaddakṣiṇā |
brahmaṇe ca yajamānāya cākam̐ syāt |
yatpratyak |
hotre ca patniyai ca yajamānāya cākam̐ syāt |
yadudaṅ |
agnīdhe ca paśubhyaśca yajamānāya cākam̐ syāt |
yadabhijuhuyāt |
rudro'sya paśūnghātukaḥ syāt |
yannābhijuhuyāt |
aśāntaḥ prahriyeta || 6 ||))

**[[3-7-2-7]]**

स्रुवस्य बुध्नेनाभिनिदध्यात्।
मा तमो मा यज्ञस्तमन्मा यजमानस्तमत्।
नमस्ते अस्त्वायते।
नमो रुद्र परायते।
नमो यत्र निषीदसि।
अमुं मा हिꣳसीरमुं मा हिꣳसीरिति येन स्कन्देत्।
तं प्रहरेत्।
सहस्रश्रृङ्गो वृषभो जातवेदाः।
स्तोमपृष्ठो घृतवान्त्सुप्रतीकः।
मा नो हासीन्मेत्थितो नेत्त्वा जहाम।
गोपोषं नो वीरपोषं च यच्छेति।
ब्रह्मणैवैनं प्रहरति।
सैव ततः प्रायश्चित्तिः॥ ७॥
वै प्रजापतिः स्थापयति प्रजानन्नभि जुहुयात्स्याद्ध्रियेत जहाम त्रीणि च॥ २॥
यद्विष्षण्णेन प्राजापत्यया यत्कीटा मध्यमेन यदववृष्टेन यत्पूर्वस्यां यत्पुरा प्रयाजेभ्यः प्राङ्गारो यद्दक्षिणा यत्प्रत्यग्यदुदङ्॥

((sruvasya budhnenābhinidadhyāt |
mā tamo mā yajñastamanmā yajamānastamat |
namaste astvāyate |
namo rudra parāyate |
namo yatra niṣīdasi |
amuṃ mā him̐sīramuṃ mā him̐sīriti yena skandet |
taṃ praharet |
sahasraśṛṅgo vṛṣabho jātavedāḥ |
stomapṛṣṭho ghṛtavāntsupratīkaḥ |
mā no hāsīnmetthito nettvā jahāma |
gopoṣaṃ no vīrapoṣaṃ ca yaccheti |
brahmaṇaivainaṃ praharati |
saiva tataḥ prāyaścittiḥ || 7 ||
vai prajāpatiḥ sthāpayati prajānannabhi juhuyātsyāddhriyeta jahāma trīṇi ca || 2 ||
yadviṣṣaṇṇena prājāpatyayā yatkīṭā madhyamena yadavavṛṣṭena yatpūrvasyāṃ yatpurā prayājebhyaḥ prāṅaṅgāro yaddakṣiṇā yatpratyagyadudaṅ ||))

**[[3-7-3-1]]**

वि वा एष इन्द्रियेण वीर्येणर्ध्यते।
यस्याहिताग्नेरग्निर्मथ्यमानो न जायते।
यत्रान्यं पश्येत्।
तत आहृत्य होतव्यम्।
अग्नावेवास्याग्निहोत्रꣳ हुतं भवति।
यद्यन्यं न विन्देत्।
अजायाꣳ होतव्यम्।
आग्नेयी वा एषा।
यदजा।
अग्नावेवास्याग्निहोत्रꣳ हुतं भवति॥ १॥

((vi vā eṣa indriyeṇa vīryeṇarddhyate |
yasyāhitāgneragnirmathyamāno na jāyate |
yatrānyaṃ paśyet |
tata āhṛtya hotavyām |
agnāvevāsyāgnihotram̐ hutaṃ bhavati |
yadyanyaṃ na vindet |
ajāyām̐ hotavyām |
āgneyī vā eṣā |
yadajā |
agnāvevāsyāgnihotram̐ hutaṃ bhavati || 1 ||))

**[[3-7-3-2]]**

अजस्य तु नाश्नीयात्।
यदजस्याश्नीयात्।
यामेवाग्नावाहुतिं जुहुयात्।
तामद्यात्।
तस्मादजस्य नाश्यम्।
यद्यजां न विन्देत्।
ब्राह्मणस्य दक्षिणे हस्ते होतव्यम्।
एष वा अग्निर्वैश्वानरः।

यद्ब्रा᳚ह्म॒णः।
अ॒ग्नावे॒वास्या᳚ग्निहो॒त्रꣳ हु॒तं भ॑वति॥ २॥

((a̱jasya̱ tu nāśnī̍yāt |
yada̱jasyā̍śnīyāt |
yāme̱vāgnāvāhu̍tiṃ juhu̱yāt |
tāma̍dyāt |
tasmā̍da̱jasya̱ nāśyā̎m |
yadya̱jāṃ na vi̱ndet |
brā̱hmaṇa̱sya̱ dakṣi̍ṇe̱ haste̍ hota̱vyā̎m |
e̱ṣa vā a̱gnirvai̍śvāna̱raḥ |
yadbrā̎hmaṇa̱ḥ |
a̱gnāve̱vāsyā̎gnihotraꣳ hu̱taṃ bha̍vati || 2 ||))

**[[3-7-3-3]]**

ब्रा॒ह्म॒णं तु व॑स॒त्यै॑ नाप॑रुन्ध्यात्।
यद्ब्रा᳚ह्म॒णं व॑स॒त्या अ॑परु॒न्ध्यात्।
यस्मि॑न्ने॒वाग्नावाहु॑तिं जु॒हु॒यात्।
तं भा॑ग॒धेये॑न॒ व्यर्ध॑येत्।
तस्मा᳚द्ब्राह्म॒णो व॑स॒त्यै॑ नाप॒रुध्यः॑।
यदि॑ ब्राह्म॒णं न वि॒न्देत्।
द॒र्भस्त॒म्बे होत॒व्य᳚म्।
अ॒ग्नि॒वान्वै द॑र्भस्त॒म्बः।
अ॒ग्नावे॒वास्या᳚ग्निहो॒त्रꣳ हु॒तं भ॑वति।
द॒र्भाꣳस्तु नाध्या॑सीत॥

((brā̱hmaṇa̱ṃ tu va̍sa̱tyai̍ nāpa̍rundhyāt |
yadbrā̎hmaṇa̱ṃ va̍sa̱tyāi a̍paru̱ndhyāt |
yasmi̍nne̱vāgnāvāhu̍tiṃ juhu̱yāt |
taṃ bhā̍ga̱dheye̍na̱ vya̍rdhayet |
tasmā̎dbrāhma̱ṇo va̍sa̱tyai̍ nāpa̱rudhya̍ḥ |
yadi̍ brāhma̱ṇaṃ na vi̱ndet |
da̱rbhasta̱mbe ho̍ta̱vyā̎m |
a̱gni̱vānvai da̍rbhasta̱mbaḥ |
a̱gnāve̱vāsyā̎gnihotraꣳ hu̱taṃ bha̍vati |
da̱rbhāꣳstu nādhyā̍sīta ||))

**[[3-7-3-4]]**

य॒द्दर्भा॒न॒ध्यासी॑त।
यामे॒वाग्नावाहु॑तिं जु॒हु॒यात्।
ताम॒ध्या॑सीत।
तस्मा᳚द्द॒र्भा नाध्या॑सित॒व्याः᳚।
यदि॑ द॒र्भान्न वि॒न्देत्।
अ॒प्सु होत॒व्य᳚म्।
आपो॒ वै सर्वा॑ दे॒वताः᳚।
दे॒वता॑स्वे॒वास्या᳚ग्निहो॒त्रꣳ हु॒तं भ॑वति।
आप॒स्तु न परि॑चक्षीत।
यदाप॑ः परि॒चक्षी॑त॥ ४॥

((ya̱ddarbhāna̱dhyāsī̍ta |
yāme̱vāgnāvāhu̍tiṃ juhu̱yāt |
tāmadhyā̍sīta |
tasmā̎ddarbhā nādhyā̍sita̱vyā̎ḥ |
yadi̍ da̱rbhānna vi̱ndet |
a̱psu ho̍ta̱vyā̎m |
āpo̱ vai sarvā̍ de̱vatā̎ḥ |
de̱vatā̍sve̱vāsyā̎gniho̱traꣳ hu̱taṃ bha̍vati |
āpa̱stu na pari̍cakṣīta |
yadāpa̍ḥ pari̱cakṣī̍ta || 4 ||))

**[[3-7-3-5]]**

यामे॒वाप्स्वाहु॑तिं जु॒हु॒यात्।
तां परि॑चक्षीत।
तस्मा॒दापो॒ न परि॒चक्ष्याः᳚।
मेध्या॑ च॒ वा ए॒तस्या॒मेध्या च॑ त॒नुवौ॒ सꣳसृज्येते।
यस्याहि॑ताग्नेर॒न्यैर॒ग्निभि॑र॒ग्नय॑ः सꣳसृ॒ज्यन्ते᳚।
अ॒ग्नये॒ विवि॑चये पु॒रो॒डाश॑म॒ष्टाक॑पालं॒ निर्व॑पेत्।
मेध्या᳚ञ्चैवास्या॒मेध्यां च॑ त॒नुवौ॒ व्याव॑र्तयति।
अ॒ग्नये᳚ व्र॒तप॑तये पु॒रो॒डाश॑म॒ष्टाक॑पालं॒ निर्व॑पेत्।
अ॒ग्निमे॒व व्र॒तप॑ति॒ꣳ॒ स्वेन॑ भाग॒धेये॒नोप॑धावति।
स ए॒वैनं॑ व्र॒तमाल॑म्भयति॥ ५॥

((yāme̱vāpsvāhu̍tiṃ juhu̱yāt |
tāṃ pari̍cakṣīta |
tasmā̱dāpo̱ na pa̍ri̱cakṣyā̎ḥ |
medhyā̍ ca̱ vā e̱tasyā̍me̱dhyā ca̍ ta̱nuvau̱ saꣳsṛ̱jyete |
yasyāhi̍tāgnera̱nyaira̱gnibhi̍ra̱gnaya̍ḥ saꣳsṛ̱jyante̎ |
a̱gnaye̱ vivi̍caye puro̱ḍāśa̍ma̱ṣṭāka̍pāla̱ṃ nirva̍pet |
medhyā̎ṃ caivāsyā̍me̱dhyāṃ ca̍ ta̱nuvau̱ vyāva̍rtayati |
a̱gnaye̎ vra̱tapa̍taye puro̱ḍāśa̍ma̱ṣṭāka̍pāla̱ṃ nirva̍pet |
a̱gnime̱va vra̱tapa̍ti̱ꣳ̱ svena̍ bhāga̱dheye̱nopa̍dhāvati |
sa e̱vaina̍ṃ vra̱tamālā̍mbhayati || 5 ||))

**[[3-7-3-6]]**

गर्भ॒ꣳ॒ स्रव॑न्तमग॒दम॑कः।
अ॒ग्निरिन्द्र॒स्त्वष्टा॒ बृह॒स्पति॑ः।
पृ॒थि॒व्यामव॑चुश्चोतै॒तत्।
नाभिप्राप्नो॑ति॒ निर्ऋ॑तिं परा॒चैः।

रेतो॒ वा ए॒तद्वाजि॑न॒माहि॑ताग्नेः।
यद॑ग्निहो॒त्रम्।
तद्यत्स्रवे᳚त्।
रेतो᳚ऽस्य॒ वाजि॑नꣳ स्रवेत्।
गर्भꣳ॒ स्रव॑न्तमग॒दम॑क॒रित्या॑ह।
रेत॑ ए॒वास्मि॒न्वाजि॑नं दधाति॥ ६॥

((garbha̱m̐ sravántamaga̱damákaḥ ।
a̱gnirindra̱stvaṣṭā̱ bṛha̱spati̍ḥ ।
pṛ̱thi̱vyāmavácuścota̱itat ।
nābhiprāpnóti̱ nirr̍tim para̱caiḥ ।
reto̱ vā e̱tadvāji̍na̱māhi̍tāgneḥ ।
yadágnihotram ।
tadyatsravět ।
retŏ'sya̱ vāji̍nam̐ sravet ।
garbha̱m̐ sravántamaga̱damákarityáha ।
retá e̱vāsmi̱nvāji̍naṃ dadhāti ॥ 6 ॥))

**[[3-7-3-7]]**

अ॒ग्निरित्या॑ह।
अ॒ग्निर्वै रे॑तो॒धाः।
रेत॑ ए॒व तद्द॑धाति।
इन्द्र॒ इत्या॑ह।
इ॒न्द्रि॒यमे॒वास्मि॑न्दधाति।
त्वष्टेत्या॑ह।
त्वष्टा॒ वै प॑शू॒नां मि॑थु॒नाना॑ꣳ रूप॒कृत्।
रू॒पमे॒व प॒शुषु॑ दधाति।
बृ॒ह॒स्पति॒रित्या॑ह।
ब्रह्म॒ वै दे॒वानां॒ बृ॒ह॒स्पति॑ः।
ब्रह्म॑णै॒वास्मै᳚ प्र॒जाः प्रज॑नयति।
पृ॒थि॒व्याम॑व॒चुश्चो॒तै॒तदित्या॑ह।
अ॒स्यामे॒वैन॒त्प्रति॑ष्ठापयति।
नाभि प्राप्नो॑ति॒ निर्ऋ॑तिं परा॒चैरित्या॑ह।
र॒क्षसा॒मप॑हत्यै॥ ७॥
अ॒जाऽग्नावे॒वास्या॑ग्निहो॒त्रꣳ हु॒तं भ॑वति भवत्यासीत परि॒चक्षी॑त लम्भयति दधाति दे॒वानां॒ बृ॒ह॒स्पति॒ः पञ्च॑ च॥ ३॥
वि वै य॒द्यन्यम॒जाया᳚ं ब्राह्म॒णस्य॑ द॒र्भस्त॒म्बे॑ऽप्सु होत॒व्या᳚म्॥

((a̱gnirityáha ।
a̱gnirvai réto̱dhāḥ ।
retá e̱va taddádhāti ।
indra̱ ityáha ।
i̱ndri̱yame̱vāsmi̍ndadhāti ।
tvaṣṭetyáha ।
tvaṣṭā̱ vai páśūnām mi̍thu̱nānām̐ rūpa̱kṛt ।
rūpame̱va pa̱śuṣú dadhāti ।
bṛ̱ha̱spati̱rityáha ।
brahma̱ vai de̱vānā̱m bṛ̱ha̱spati̍ḥ ।
brahmáṇa̱ivāsmai̎ pra̱jāḥ prajánayati ।
pṛ̱thi̱vyāmavácuścota̱itadityáha ।
a̱syāme̱vaina̱tprati̍ṣṭhāpayati ।
nābhi prāpnóti̱ nirr̍tim parā̱cairityáha ।
rakṣása̱mapáhatyai ॥ 7 ॥
a̱jā'gnāve̱vāsyágniho̱tram̐ hu̱taṃ bhávati bhavatyāsīta pari̱cakṣi̍ta lambhayati dadhāti de̱vānā̱m bṛ̱ha̱spati̱ḥ pañcá ca ॥ 3 ॥
vi vai yadya̱nyama̱jāyā̱m̐ brāhma̱ṇasyá darbhasta̱mbé'phsu hóta̱vyā̎m ॥))

**[[3-7-4-1]]**

याः पु॒रस्ता᳚त्प्र॒स्रव॑न्ति।
उ॒परि॑ष्टात्स॒र्वत॑श्च याः।
ताभी᳚ र॒श्मिप॑वित्राभिः।
श्र॒द्धां य॒ज्ञमार॑भे।
देवा॑ गातुविदः।
गा॒तुं य॒ज्ञाय॑ विन्दत।
मन॑स॒स्पति॑ना दे॒वेन॑।
वाता᳚द्य॒ज्ञः प्रयु॑ज्यताम्।
तृ॒तीय॑स्यै दि॒वः।
गा॒य॒त्रि॒या सोम॒ आभृ॑तः॥

((yā̱ḥ pu̱rastā̎tpra̱sravánti ।
u̱pari̍ṣṭātsa̱rvatáśca̱ yāḥ ।
tābhi̍ ra̱śmipávitrābhiḥ ।
śra̱ddhām ya̱jñamārábhe ।
devá gātuvidaḥ ।
gā̱tum ya̱jñāyá vindata ।
manása̱spati̍nā de̱vená ।
vātā̎dya̱jñaḥ prayújyatām।
tṛ̱tīyásyai di̱vaḥ ।
gā̱ya̱tri̱yā soma̱ ābhr̍taḥ ॥))

**[[3-7-4-2]]**

सो॒मपी॒था॒य सं॒न॑यितुम्।
व॒क॑लमन्त॒रमाद॑दे।
आपो॑ देवीः शु॒द्धाः स्थ॑।
इ॒मा पात्रा॑णि शुन्धत।
उ॒पा॒त॒ङ्क्या॑य दे॒वाना᳚म्।

प॒र्ण॒व॒ल्कमु॒त शु॑न्धत।
पयो॑ गृ॒हेषु॒ पयो॑ अघ्नि॒यासु॑।
पयो॑ व॒त्सेषु॒ पय॑ इन्द्रा॑य ह॒विषे॑ ध्रियस्व।
गा॒य॒त्री प॑र्ण॒व॒ल्केन॑।
पय॒ः सोम॑ं करोत्वि॒मम्॥ २॥

((so̱ma̱pītha̱ya sa̱mna̍yituml
vakā̍la̱mantā̍ra̱mādā̍de ।
āpo̍ devī̱ḥ śu̱ddhāḥ̱ sthā̍ ।
i̱mā pātrā̍ṇi śundhata ।
u̱pā̱ta̱ṅkyā̍ya de̱vānā̎m ।
pa̱rṇa̱va̱lkamu̱ta śu̍ndhata ।
payo̍ gṛ̱heṣu̱ payo̍ aghni̱yāsu̍ ।
payo̍ va̱tseṣu̱ paya̱ indrā̍ya ha̱viṣe̎ dhriyasva ।
gā̱ya̱trī pa̍rṇava̱lkenā̍ ।
paya̱ḥ soma̱ṃ karotvi̱mam ॥ 2 ॥))

**[[3-7-4-3]]**

अ॒ग्निं गृ॑ह्णामि सु॒रथ॒ं यो म॑यो॒भूः।
य उ॒द्यन्त॑मा॒रोह॑ति॒ सूर्य॑मह्ने॑।
आ॒दि॒त्यं ज्योति॑षा॒ं ज्योति॑रुत्त॒मम्।
श्वो य॒ज्ञाय॑ रमता॑ं दे॒वता॑भ्यः।
वसू॑न्रु॒द्राना॑दि॒त्यान्।
इन्द्रे॑ण स॒ह दे॒वता॑ः।
ताः पू॒र्वः परि॑गृह्णामि।
स्व आ॒यत॑ने मनी॒षया॑।
इ॒मामू॒र्जं॑ पञ्चद॒शीं ये प्रवि॑ष्टाः।
तान्दे॒वान्परि॑गृह्णामि॒ पूर्वः॑॥ ३॥

((a̱gniṃ gṛ̍hṇāmi su̱ratha̱ṃ yo ma̍yo̱bhūḥ ।
ya u̱dyantā̍mā̱rohā̍ti̱ sūrya̱mahne̎ ।
ā̱di̱tyaṃ jyoti̍ṣā̱ṃ jyoti̍rutta̱mam ।
śvo ya̱jñāyā̍ ramatā̱ṃ de̱vatā̎bhyaḥ ।
vasū̎nru̱drānā̍di̱tyān ।
indre̍ṇa sa̱ha de̱vatā̎ḥ ।
tāḥ pūrva̱ḥ pari̍gṛhṇāmi ।
sva ā̱yatā̍ne manī̱ṣayā̎ ।
i̱māmūrja̱ṃ pañcada̱śī̱ṃ ye pravi̍ṣṭāḥ ।
tānde̱vānpari̍gṛhṇāmi̱ pūrvā̍ḥ ॥ 3 ॥))

**[[3-7-4-4]]**

अ॒ग्निर्ह॒व्य॒वा॒ड्डि॒ह ताना॑वहतु।
पौ॒र्ण॒मा॒सꣳ ह॒विरि॒दमे॑षा॒ं मयि॑।
आ॒मा॒वा॒स्यꣳ॑ ह॒विरि॒दमे॑षा॒ं मयि॑।
अ॒न्त॒राऽग्नी प॒शव॑ः।
दे॒व॒स॒ꣳ॒स॒द॒मा॒ग॑मन्।
तान्पू॒र्वः परि॑गृह्णामि।
स्व आ॒यत॑ने मनी॒षया॑।
इ॒ह प्र॒जा वि॒श्वरू॑पा रमन्ताम्।
अ॒ग्निं गृ॒हप॑तिम॒भिसं॒वसा॑नाः।
ताः पू॒र्वः परि॑गृह्णामि॥ ४॥

((a̱gnirha̍vya̱vā̱ḍi̱ha tānāvā̍hatu ।
pa̱urṇa̱mā̱sa̱ṃ̎ ha̱viri̱dame̍ṣā̱ṃ mayi̍ ।
ā̱mā̱vā̱sya̱ṃ̎ ha̱viri̱dame̍ṣā̱ṃ mayi̍ ।
a̱nta̱rā'gnī pa̱śavā̍ḥ ।
de̱va̱sa̱ṃ̎sa̱da̱māgā̍man ।
tānpūrva̱ḥ pari̍gṛhṇāmi ।
sva ā̱yatā̍ne manī̱ṣayā̎ ।
i̱ha pra̱jā vi̱śvarū̍pā ramantām ।
a̱gniṃ gṛ̱hapā̍tima̱bhisa̱ṃvasā̍nāḥ ।
tāḥ pūrva̱ḥ pari̍gṛhṇāmi ॥ 4 ॥))

**[[3-7-4-5]]**

स्व आ॒यत॑ने मनी॒षया॑।
इ॒ह प॒शवो॑ वि॒श्वरू॑पा रमन्ताम्।
अ॒ग्निं गृ॒हप॑तिम॒भिसं॒वसा॑नाः।
तान्पू॒र्वः परि॑गृह्णामि।
स्व आ॒यत॑ने मनी॒षया॑।
अ॒यं पि॑तॄ॒णाम॒ग्निः।
अवा॑ड्ढ॒व्या पि॒तृभ्य॒ आ।
तं पू॒र्वः परि॑गृह्णामि।
अवि॑षं नः पि॒तुं क॑रत्।
अज॑स्रं॒ त्वाꣳ स॑भापा॒लाः॥ ५॥

((sva ā̱yatā̍ne manī̱ṣayā̎ ।
i̱ha pa̱śavo̍ vi̱śvarū̍pā ramantāml
a̱gniṃ gṛ̱hapā̍tima̱bhisa̱ṃvasā̍nāḥ ।
tānpūrva̱ḥ pari̍gṛhṇāmi ।
sva ā̱yatā̍ne manī̱ṣayā̎ ।
a̱yaṃ pi̍tṝ̱ṇāma̱gniḥ ।
avā̎ḍḍha̱vyā pi̱tṛbhya̱ ā ।
ta̱ṃ pūrva̱ḥ pari̍gṛhṇāmi ।
avi̍ṣaṃ naḥ pi̱tuṃ kā̍rat ।
ajā̍sra̱ṃ tvā̱ṃ̎ sā̍bhāpā̱lāḥ ॥ 5 ॥))

**[[3-7-4-6]]**

वि॒ज॒य॒भा॒ग॒ꣳ॒ समि॑न्धताम्।
अग्ने॑ दी॒दाय॑ मे सभ्य।
विजि॑त्यै श॒रद॑ः श॒तम्।

अन्न॑मावस॒थीय᳚म्।
अ॒भिह॑राणि श॒रद॑ः श॒तम्।
आ॒व॒स॒थे श्रिय॒ं मन्त्र᳚म्।
अहि॑र्बु॒ध्नियो॒ निय॑च्छतु।
इ॒दम॒हम॒ग्निज्ये᳚ष्ठेभ्यः।
वसु॑भ्यो य॒ज्ञं प्रब्र॑वीमि।
इ॒दम॒हमिन्द्र॑ज्येष्ठेभ्यः॥ ६॥

((vi̱ja̱yabhā̍̍ga̱ṃ̐ sami̍ndhatām |
agne̍ dī̱dāya̍ me sabhya |
viji̍tyai śa̱rada̍ḥ śa̱tam |
anna̍māvasa̱thīyā̎m |
a̱bhiha̍rāṇi śa̱rada̍ḥ śa̱tam |
ā̱va̱sa̱the śriya̱ṃ mantrā̎m |
ahi̍rbu̱dhniyo̱ niya̍cchatu |
i̱dama̱hama̱gnijye̎ṣṭhebhyaḥ |
vasu̍bhyo ya̱jñaṃ prabra̍vīmi |
i̱dama̱hamindra̍jyeṣṭhebhyaḥ || 6 ||))

**[[3-7-4-7]]**

रु॒द्रेभ्यो॑ य॒ज्ञं प्रब्र॑वीमि।
इ॒दम॒हं वरु॑णज्येष्ठेभ्यः।
आ॒दि॒त्येभ्यो॑ य॒ज्ञं प्रब्र॑वीमि।
पय॑स्वती॒रोष॑धयः।
पय॑स्वद्वी॒रुधा॒ं पय॑ः।
अ॒पां पय॑सो॒ यत्पय॑ः।
तेन॒ मामि॑न्द्र॒ सꣳसृ॑ज।
अग्ने᳚ व्रतपते व्र॒तं च॑रिष्यामि।
तच्छ॑केय॒ं तन्मे॑ राध्यताम्।
वायो᳚ व्रतपत॒ आदि॑त्य व्रतपते॥ ७॥

((ru̱drebhyo̍ ya̱jñaṃ prabra̍vīmi |
i̱dama̱haṃ varu̍ṇajyeṣṭhebhyaḥ |
ā̱di̱tyebhyo̍ ya̱jñaṃ prabra̍vīmi |
paya̍svatī̱roṣa̍dhayaḥ |
paya̍svadvī̱rudhā̱ṃ paya̍ḥ |
a̱pāṃ paya̍so̱ yatpaya̍ḥ |
tena̱ māmi̍ndra̱ saṃ̐sṛ̍ja |
agne̎ vratapate vra̱taṃ ca̍riṣyāmi |
taccha̍keya̱ṃ tanme̍ rādhyatām |
vāyo̎ vratapata̱ ādi̍tya vratapate || 7 ||))

**[[3-7-4-8]]**

व्र॒ताना᳚ं व्रतपते व्र॒तं च॑रिष्यामि।
तच्छ॑केय॒ं तन्मे॑ राध्यताम्।
इ॒मां प्रा॒ची॒मुदी॑चीम्।
इ॒ष॒मूर्ज॑म॒भि सꣳस्कृ॑ताम्।
ब॒हु॒प॒र्णाम॑शु॒ष्काग्राम्।
हरा॑मि पशु॒पाम॒हम्।
यत्कृष्णो॑ रू॒पं कृ॒त्वा।
प्रावि॑श॒स्त्वं वन॒स्पती॑न्।
तत॒स्त्वामे॑कविꣳशति॒धा।
संभ॑रामि सु॒संभृ॑ता᳚॥ ८॥

((vra̱tānā̎ṃ vratapate vra̱taṃ ca̍riṣyāmi |
taccha̍keya̱ṃ tanme̍ rādhyatām |
i̱māṃ prācī̱mudi̍cīm |
iṣa̱mūrja̍ma̱bhi saṃ̐skṛ̍tām |
ba̱hu̱pa̱rṇāmaśu̍ṣkāgrām|
harā̍mi paśu̱pāma̱ham |
yatkṛṣṇo̍ rū̱paṃ kṛ̱tvā |
prāvi̍śa̱stvaṃ vana̱spatī̍n |
tata̱stvāme̍kaviṃ̐śati̱dhā |
saṃbha̍rāmi susa̱ṃbhṛtā̎ || 8 ||))

**[[3-7-4-9]]**

त्रीन्प॑रि॒धीꣳस्ति॒स्रः स॒मिध॑ः।
य॒ज्ञायु॑रनुसंच॒रान्।
उ॒प॒वे॒षं मे॒क्षण॑ं धृष्टि᳚म्।
संभ॑रामि सु॒संभृ॑ता᳚।
या जा॒ता ओष॑धयः।
दे॒वेभ्य॑स्त्रियु॒गं पु॒रा।
तासा॒ं पर्व॑ राध्यासम्।
प॒रि॒स्त॒रमा॒हर॑न्।
अ॒पां मेध्य॑ं य॒ज्ञिय᳚म्।
सदे॑वꣳ शि॒वम॑स्तु मे॥ ९॥

((trīnpa̍ri̱dhīṃ̐sti̱sraḥ sa̱midha̍ḥ |
ya̱jñāyu̍ranusaṃca̱rān |
u̱pa̱ve̱ṣaṃ mekṣa̍ṇa̱ṃ dhṛṣṭī̎m |
saṃbha̍rāmi susa̱ṃbhṛtā̎ |
yā jā̱tā oṣa̍dhayaḥ |
de̱vebhya̍striyu̱gaṃ pu̱rā |
tāsā̱ṃ parva̍ rādhyāsam |
pa̱ri̱sta̱ramā̱hara̍n |
a̱pāṃ medhya̍ṃ ya̱jñiyā̎m |
sade̍vaṃ̐ śi̱vama̍stu me || 9 ||))

**[[3-7-4-10]]**

आ॒च्छे॒त्ता वो॒ मा रि॑षम्।

जीवा॑नि श॒रद॑ः श॒तम्।
अप॑रिमितानां॒ परि॑मिताः।
संन॑ह्ये सुकृ॒ताय॒ कम्।
एनो॒ मा निगां॑ कत॒मच्च॒नाहम्।
पुन॑रु॒त्थाय॑ बहु॒ला भव॑न्तु।
स॒कृदा॒च्छि॒न्नं ब॒र्हिरूर्णा॑मृदु।
स्यो॒नं पि॒तृभ्य॑स्त्वा भराम्य॒हम्।
अ॒स्मिन्त्सी॑दन्तु मे पि॒तर॑ः सो॒म्याः।
पि॒ता॒म॒हाः प्रपि॑तामहाश्चानु॒गैः स॒ह॥ १०॥

((a̱cche̱ttā vo̱ mā ri̍ṣam |
jīva̍ni śa̱radạ̍ḥ śa̱tam |
apa̍rimitānā̱m pari̍mitāḥ |
saṃna̍hye sukṛ̱tāya̱ kam |
eno̱ mā nigā̍m̐ kata̱macca̱nāham |
puna̍ru̱tthāya̍ bahu̱lā bha̍vantu |
sa̱kṛ̱dā̱cchi̱nnaṃ ba̱rhirūrṇa̍mṛdu |
syo̱naṃ pi̱tṛbhya̍stvā bharāmya̱ham |
a̱smintsī̍dantu me pi̱tara̍ḥ so̱myāḥ |
pi̱tā̱ma̱hāḥ prapi̍tāmahāścānu̱gaiḥ sa̱ha || 10 ||))

**[[3-7-4-11]]**

त्रि॒वृत्प॑ला॒शे द॒र्भः।
इया॑न्प्रादे॒शसं॑मितः।
य॒ज्ञे प॒वित्रं॒ पोतृ॑तमम्।
पयो॑ ह॒व्यं क॑रोतु मे।
इ॒मौ प्रा॑णापा॒नौ।
य॒ज्ञस्याङ्गा॑नि सर्व॒शः।
आ॒प्या॒यय॑न्तौ॒ संच॑रताम्।
प॒वित्रे॑ ह॒व्यशोध॑ने।
प॒वित्रे॑ स्थो वैष्ण॒वी।
वा॒युर्वां॒ मन॑सा पुनातु॥ ११॥

((tri̱vṛtpa̍lā̱śe da̱rbhaḥ |
iya̍nprāde̱śasa̍mmitaḥ |
ya̱jñe pa̱vitra̱m potṛ̍tamam |
payo̍ ha̱vyaṃ ka̍rotu me |
i̱mau prā̍ṇāpā̱nau |
ya̱jñasyāṅgā̍ni sarva̱śaḥ |
ā̱pyā̱yaya̍ntau̱ saṃca̍ratām |
pa̱vitre̍ havya̱śodha̍ne |
pa̱vitre̍ stho vaiṣṇa̱vī |
vā̱yurvā̱m mana̍sā punātu || 11 ||))

**[[3-7-4-12]]**

अ॒यं प्रा॒णश्चा॑पा॒नश्च॑।
यज॑मान॒मपि॑गच्छताम्।
य॒ज्ञे ह्यभू॑ता॒ं पोता॑रौ।
प॒वित्रे॑ ह॒व्यशोध॑ने।
त्वया॒ वेदिं॑ विवि॒दुः पृ॒थि॒वीम्।
त्वया॑ य॒ज्ञो जाय॑ते विश्व॒दानि॑ः।
अच्छि॑द्रं य॒ज्ञमन्वे॑षि वि॒द्वान्।
त्वया॒ होता॒ संत॑नोत्यर्धमा॒सान्।
त्र॒य॒स्त्रि॒ꣳशो॑ऽसि॒ तन्तू॑नाम्।
प॒वित्रे॑ण स॒हागहि॥ १२॥

((a̱yaṃ prā̱ṇaścā̍pā̱naśca̍ |
yaja̍mānā̱mapi̍gacchatām|
ya̱jñe hyabhū̍tā̱m potā̍rau |
pa̱vitre̍ havya̱śodha̍ne |
tvayā̱ vedi̍m vivi̱duḥ pṛ̱thi̱vīm |
tvayā̍ ya̱jño jā̍yate viśva̱dāni̍ḥ |
acchi̍dram ya̱jñamanve̍ṣi vi̱dvān |
tvayā̱ hotā̱ saṃta̍notyardhamā̱sān |
tra̱ya̱stri̱m̐śo̍'si̱ tantū̍nām |
pa̱vitre̍ṇa sa̱hāgahi || 12 ||))

**[[3-7-4-13]]**

शि॒वेयꣳ रज्जु॑रभि॒धानी॑।
अ॒घ्नि॒यामुप॑सेवताम्।
अप्र॑स्रꣳसाय य॒ज्ञस्य॑।
उ॒खे उप॑दधाम्य॒हम्।
प॒शु॒भि॒ः संनी॑तं बिभृताम्।
इन्द्रा॑य शृ॒तं दधि॑।
उ॒प॒वे॒षो॑ऽसि य॒ज्ञाय॑।
त्वां परि॑वे॒षम॑धारयन्।
इन्द्रा॑य ह॒विः कृ॒ण्वन्त॑ः।
शि॒वः श॒ग्मो भ॑वासि नः॥ १३॥

((śi̱veyam̐ rajju̍rabhi̱dhānī̍ |
a̱ghni̱yāmupa̍sevatām |
apra̍sram̐sāya ya̱jñasya̍ |
u̱khe upa̍dadhāmya̱ham |
pa̱śu̱bhi̱ḥ saṃnī̍taṃ bibhṛtām |
indrā̍ya śṛ̱taṃ dadhi̍ |
u̱pa̱ve̱ṣo̍'si ya̱jñāya̍ |
tvām pa̍rive̱ṣama̍dhārayan|
indrā̍ya ha̱viḥ kṛ̱ṇvanta̍ḥ |
śi̱vaḥ śa̱gmo bha̍vāsi naḥ || 13 ||))

**[[3-7-4-14]]**

अमृ॑न्मयं दे॒वपा॒त्रम्।
य॒ज्ञस्यायु॑षि॒ प्रयु॑ज्यताम्।
ति॒रः॒प॒वि॒त्रमति॑ नीताः।
आपो॑ धारय॒ माऽति॑गुः।
दे॒वेन॑ सवि॒त्रोत्पू॑ताः।
वसो॒ः सूर्य॑स्य र॒श्मिभि॑ः।
गां दोह॑पवि॒त्रे रज्जु॑म्।
सर्वा॒ पात्रा॑णि शुन्धत।
ए॒ता आच॑रन्ति॒ मधु॑म॒द्दुहा॑नाः।
प्र॒जाव॑तीर्य॒शसो॑ वि॒श्वरू॑पाः॥ १४॥

((amṛ̍nmayaṃ devapā̱tram ।
ya̱jñasyāyu̍ṣi̱ prayu̍jyatām ।
ti̱ra̱ḥpa̱vi̱tramati̍ nītāḥ ।
āpo̍ dhāraya̱ mā'ti̍guḥ ।
de̱vena̍ savi̱trotpū̍tāḥ ।
vaso̱ḥ sūrya̍sya ra̱śmibhi̍ḥ ।
gāṃ do̍hapavi̱tre rajju̍m ।
sarvā̱ pātrā̍ṇi śundhata ।
e̱tā āca̍ranti̱ madhu̍ma̱dduhā̍nāḥ ।
pra̱jāva̍tīrya̱śaso̍ vi̱śvarū̍pāḥ ॥ 14 ॥))

**[[3-7-4-15]]**

ब॒ह्वीर्भव॑न्तीरुप॒जाय॑मानाः।
इ॒ह व॒ इन्द्रो॑ रमयतु गावः।
पू॒षा स्थ॑।
अ॒यक्ष्मा व॑ः प्र॒जया॒ सꣳसृ॑जामि।
रा॒यस्पोषे॑ण बहु॒ला भव॑न्तीः।
ऊर्ज॑ं पय॒ः पिन्व॑माना घृ॒तं च॑।
जी॒वो जीव॑न्तीरुप॑ वः सदेयम्।
द्यौश्चे॒मं य॒ज्ञं पृ॑थि॒वी च॒ संदु॑हाताम्।
धा॒ता सोमे॑न स॒ह वाते॑न वा॒युः।
यज॑मानाय॒ द्रवि॑णं दधातु॥ १५॥

((ba̱hvīrbhava̍ntīrupa̱jāya̍mānāḥ ।
i̱ha va̱ indro̍ ramayatu gāvaḥ ।
pū̱ṣā stha̍ ।
a̱yakṣmā va̍ḥ pra̱jayā̱ saṃ̍sṛ̱jāmi ।
rā̱yaspo̱ṣe̍ṇa bahu̱lā bhava̍ntīḥ ।
ūrja̱ṃ paya̱ḥ pinva̍mānā ghṛ̱taṃ ca̍ ।
jī̱vo jīva̍ntīrupa̍ vaḥ sadeyam।
dyauśce̱maṃ ya̱jñaṃ pṛ̍thi̱vī ca̱ saṃdu̍hātām ।
dhā̱tā some̍na sa̱ha vāte̍na vā̱yuḥ ।
yaja̍mānāya̱ dravi̍ṇaṃ dadhātu ॥ 15 ॥))

**[[3-7-4-16]]**

उत्सं॑ दुहन्ति क॒लशं॒ चतु॑र्बिलम्।
इडां॑ दे॒वीं मधु॑मतीꣳ सुव॒र्विदं॑म्।
तदि॑न्द्रा॒ग्नी जि॑न्वतꣳ सू॒नृता॑वत्।
तद्यज॑मानममृ॒तत्वे द॑धातु।
काम॑धुक्ष॒ः प्र णो॑ ब्रूहि।
इन्द्रा॑य ह॒विरि॑न्द्रि॒यम्।
अ॒मूं यस्यां॑ दे॒वाना॑म्।
मनु॒ष्या॑णा॒ं पयो॑ हि॒तम्।
ब॒हु दु॒ग्धीन्द्रा॑य दे॒वेभ्य॑ः।
ह॒व्यमाप्या॑यता॒ं पुन॑ः॥ १६॥

((utsaṃ̍ duhanti ka̱laśa̱ṃ catu̍rbilam ।
i̱ḍāṃ̍ de̱vīṃ madhu̍matīṃ̍ suva̱rvidaṃ̍ ।
tadi̍ndrā̱gnī ji̍nvataṃ̍ sū̱nṛtā̍vat ।
tadyaja̍mānamamṛ̱ta̱tve da̍dhātu ।
kāma̍dhukṣa̱ḥ pra ṇo̍ brūhi ।
indrā̍ya ha̱virindri̱yam ।
a̱mūṃ yasyāṃ̍ de̱vānā̍m ।
manu̱ṣyā̍ṇā̱ṃ payo̍ hi̱tam ।
ba̱hu du̱gdhīndrā̍ya de̱vebhya̍ḥ ।
ha̱vyamāpyā̍yatā̱ṃ puna̍ḥ ॥ 16 ॥))

**[[3-7-4-17]]**

व॒त्सेभ्यो॑ मनु॒ष्ये॑भ्यः।
पु॒नर्दो॒हाय॑ कल्पताम्।
य॒ज्ञस्य॑ संत॑तिरसि।
य॒ज्ञस्य॑ त्वा॒ संत॑ति॒मनु॒ संत॑नोमि।
अ॒द॑स्तमसि॒ विष्ण॑वे त्वा।
य॒ज्ञायापि॑दधाम्य॒हम्।
अ॒द्भिरिरि॑क्तेन॒ पात्रे॑ण।
याः पू॒ताः परि॒शेर॑ते।
अ॒यं पय॒ः सोमं॑ कृ॒त्वा।
स्वां योनि॒मपि॑गच्छतु॥ १७॥

((va̱tsebhyo̍ manu̱ṣye̍bhyaḥ ।
pu̱nardo̱hāya̍ kalpatām ।
ya̱jñasya̱ saṃta̍tirasi ।
ya̱jñasya̍ tvā̱ saṃta̍ti̱manu̱ saṃta̍nomi ।
ada̍stamasi̱ viṣṇa̍ve tvā ।
ya̱jñāyāpi̍dadhāmya̱ham ।
a̱dbhirari̍ktena̱ pātre̍ṇa ।
yāḥ pū̱tāḥ pari̍śera̍te ।
a̱yaṃ paya̱ḥ somaṃ̍ kṛ̱tvā ।

svāṃ yoni̠mapi̍gacchatu ‖ 17 ‖))

**[[3-7-4-18]]**

प॒र्ण॒व॒ल्कः प॒वित्र᳚म्।
सौ॒म्यः सो॒मा॒द्धि निर्मि॑तः।
इ॒मौ प॒र्णं च॑ द॒र्भं च॑।
दे॒वाना᳚ँ ह॒व्य॒शोध॑नौ।
प्रा॒त॒र्वे॒षाय॑ गोपाय।
विष्णो॑ ह॒व्यँ᳚ हि रक्ष॑सि।
उ॒भाव॒ग्नी उप॑स्तृ॒ण॒ते।
दे॒व॒ता॒ उप॑वसन्तु मे।
अ॒हं ग्रा॒म्यानुप॑वसामि।
म॒ह्यं॒ गोप॑तये प॒शून्॥ १८॥
आभृ॑त इ॒मं गृ॒ह्णा॒मि॒ पूर्व॒स्ताः पूर्वः॒ परि॑गृह्णामि सभापा॒ला
इन्द्र॑ज्येष्ठेभ्य॒ आदि॑त्य व्रतपते सु॒सं॒भृ॒ता॑ मे स॒ह पु॑नातु गहि
नो वि॒श्वरू॑पा दधातु॒ पुन॑र्गच्छतु प॒शून्॥ ४॥
याः पु॒रस्ता᳚दि॒मामू॒र्जमि॑ह प्र॒जा इ॒ह प॒शवो॒ऽयं
पि॑तृ॒णाम॒ग्निः॥

((pa̠rṇa̠va̠lkaḥ pa̠vitra̎m ।
sau̠myaḥ somā̠ddhi nirmi̍taḥ ।
i̠mau pa̠rṇaṃ ca̍ da̠rbhaṃ ca̍ ।
de̠vānā̎ṃ havya̠śodha̍nau ।
prāta̠rve̠ṣāya̍ gopāya ।
viṣṇo̍ ha̠vya̎ṃ hi rakṣa̍si ।
u̠bhāva̠gnī u̍pastṛ̠ṇa̠te ।
de̠vatā̠ upa̍vasantu me ।
a̠haṃ grā̠myānupa̍vasāmi ।
mahya̠ṃ gopa̍taye pa̠śūn ‖ 18 ‖
ābhṛ̍ta i̠maṃ gṛ̍hṇāmi̠ pūrva̠stāḥ pūrva̠ḥ
pari̍gṛhṇāmi sabhāpā̠lā indra̍jyeṣṭhebhya̠ ādi̍tya
vratapate susa̠ṃbhṛ̍tā me sa̠ha pu̍nātu gahi no
vi̠śvarū̍pā dadhātu̠ puna̍rgacchatu pa̠śūn ‖ 4 ‖
yāḥ pu̠rastā̍di̠māmūrja̍miha pra̠jā i̠ha pa̠śavo̠'yaṃ
pi̍tṛ̠ṇāma̠gniḥ ‖))

**[[3-7-5-1]]**

देवा॑ दे॒वेषु परा᳚क्रमध्वम्।
प्रथ॑मा द्वि॒तीये॑षु।
द्वि॒ती॑यास्तृ॒तीये॑षु।
त्रिरे॑कादशा इ॒ह मा॑ऽवत।
इ॒दँ᳚ शके॑यं॒ यदि॒दं क॒रोमि॑।
आ॒त्मा क॑रोत्वा॒त्मने᳚।
इ॒दं क॑रिष्ये भे॒षजम्।
इ॒दं मे॑ विश्वभेषजा।
अश्वि॑ना॒ प्राव॑तं यु॒वम्।
इ॒द॒म॒हँ᳚ सेना॑या अ॒भीत्व॑र्यै॥ १॥

((devā̎ de̠ve̠ṣu̠ parā̎kramadhvam ।
prathá̍mā dvi̠tīye̍ṣu ।
dviti̍yāstṛ̠tīye̍ṣu ।
trire̍kādaśā i̠ha mā̍'vata ।
i̠da̎ṃ śakeya̠ṃ yadi̠daṃ ka̠romi̍ ।
ā̠tmā ka̍rotvā̠tmane̎ ।
i̠daṃ ka̍riṣye bheṣa̠jam ।
i̠daṃ me̍ viśvabheṣajā ।
aśvi̍nā̠ prāva̍taṃ yu̠vam ।
i̠dama̠ha̎ṃ senā̍yā a̠bhītva̍ryai ‖ 1 ‖))

**[[3-7-5-2]]**

मु॒खम॒पो॑हामि।
सूर्य॑ ज्योति॒र्विभा॑हि।
म॒ह॒त इ॑न्द्रि॒याय॑।
आप्या॑यतां घृ॒तयो॑निः।
अ॒ग्निर्ह॒व्याऽनु॑मन्यताम्।
खम॑ङ्क्ष्व॒ त्वच॑मङ्क्ष्व।
सु॒रूपं॒ त्वा॑ वसु॒विद᳚म्।
प॒शूनां तेज॑सा।
अ॒ग्नये॑ जु॒ष्टम॒भिघा॑रयामि।
स्यो॒नं ते॒ सद॑नं करोमि॥ २॥

((mukha̠mapo̍hāmi ।
sūrya̍ jyoti̠rvibhā̍hi ।
ma̠ha̠ta i̍ndri̠yāya̍ ।
āpyā̍yatāṃ ghṛ̠tayo̍niḥ ।
a̠gnirha̠vyā'nu̍manyatām ।
khama̍ṅkṣva̠ tvaca̍maṅkṣva ।
su̠rūpa̠ṃ tvā̍ vasu̠vida̎m ।
pa̠śūnā̠ṃ teja̍sā ।
a̠gnaye̠ ju̠ṣṭama̠bhighā̍rayāmi ।
syo̠naṃ te̠ sada̍naṃ karomi ‖ 2 ‖))

**[[3-7-5-3]]**

घृ॒तस्य॒ धार॑या सु॒शेवं᳚ कल्पयामि।
तस्मि᳚न्त्सीदा॒मृते॒ प्रति॑तिष्ठ।
व्री॒ही॒णां मे॑ध सुमन॒स्यमा॑नः।
आ॒र्द्रः प्र॒थस्नु॒र्भुव॑नस्य गो॒पाः।
शृ॒त उ॒त्स्ना॑ति ज॒नि॒ता म॒तीनाम्।
यस्त॑ आ॒त्मा प॒शुषु॒ प्रवि॑ष्टः।

देवानाँ विष्ठामनु यो वितस्थे।
आत्मन्वान्त्सोम घृतवान्हि भूत्वा।
देवान्गच्छ सुवर्विन्द यजमानाय मह्यँम्।
इरा भूतिः पृथिव्यै रसो मोत्क्रमीत्॥ ३॥

((ghṛtasya dhārayā suśevaṃ kalpayāmi ।
tasmiṃntsīdāmṛte pratitiṣṭha ।
vrīhīṇāṃ medha sumanasyamānaḥ ।
ārdraḥ prathasnurbhuvanasya gopāḥ ।
śṛta utsnāti janitā matīnām ।
yasta ātmā paśuṣu praviṣṭaḥ ।
devānāṃ viṣṭhāmanu yo vitasthe ।
ātmanvāntsoma ghṛtavānhi bhūtvā ।
devāngaccha suvarvinda yajamānāya mahyam ।
irā bhūtiḥ pṛthivyai raso motkramīt ॥ 3 ॥))

**[[3-7-5-4]]**

देवाः पितरः पितरो देवाः।
योऽहमस्मि स सन्यजे।
यस्याँस्मि न तमन्तरेमि।
स्वं म इष्टँ स्वं दत्तम्।
स्वं पूर्तँ स्वँ श्रान्तम्।
स्वँ हुतम्।
तस्य मेऽग्निरुपद्रष्टा।
वायुरुपश्रोता।
आदित्योऽनुख्याता।
द्यौः पिता॥ ४॥

((devāḥ pitaraḥ pitaro devāḥ ।
yo'hamasmi sa sanyaje ।
yasyāsmi na tamantaremi ।
svaṃ ma iṣṭaṃ svaṃ dattam ।
svaṃ pūrtaṃ svaṃ śrāntam ।
svaṃ hutam ।
tasya me'gnirupadraṣṭā ।
vāyurupaśrotā ।
ādityo'nukhyātā ।
dyauḥ pitā ॥ 4 ॥))

**[[3-7-5-5]]**

पृथिवी माता।
प्रजापतिर्बन्धुः।
य एवास्मि स सन्यजे।
मा भेर्मा संविक्था मा त्वा हिँसिषम्।
मा ते तेजोऽपक्रमीत्।
भरतमुद्धरेमनुषिञ्च।
अवदानानि ते प्रत्यवदास्यामि।
नमस्ते अस्तु मा मा हिँसीः।
यदवदानानि तेऽवद्यन्।
विलोमाकार्षमात्मनः॥ ५॥

((pṛthivī mātā ।
prajāpatirbandhuḥ ।
ya evāsmi sa sanyaje ।
mā bhermā saṃvikthā mā tvā hiṃsiṣam ।
mā te tejo'pakramīt ।
bharatamuddharemanuṣiñca ।
avadānāni te pratyavadāsyāmi ।
namaste astu mā mā hiṃsīḥ ।
yadavadānāni te'vadyan ।
vilomākārṣamātmanaḥ ॥ 5 ॥))

**[[3-7-5-6]]**

आज्येन प्रत्यनज्म्येनत्।
तत्त आप्यायतां पुनः।
अज्यायो यवमात्रात्।
आव्याधात्कृत्यतामिदम्।
मा रूरुपाम यज्ञस्य।
शुद्धँ स्विष्टमिदँ हविः।
मनुना दृष्टां घृतपदीम्।
मित्रावरुणसमीरिताम्।
दक्षिणार्धादसंभिन्दन्।
अवद्याम्येकतोमुखाम्॥ ६॥

((ājyena pratyanajmyenat ।
tatta āpyāyatāṃ punaḥ ।
ajyāyo yavamātrāt ।
āvyādhātkṛtyatāmidam ।
mā rūrupāma yajñasya ।
śuddhaṃ sviṣṭamidaṃ haviḥ ।
manunā dṛṣṭāṃ ghṛtapadīm ।
mitrāvaruṇasamīritām ।
dakṣiṇārdhādasaṃbhindan ।
avadyāmyekatomukhām ॥ 6 ॥))

**[[3-7-5-7]]**

इडे भागं जुषस्व नः।
जिन्व गा जिन्वार्वतः।
तस्याँस्ते भक्षिवाणः स्याम।
सर्वात्मानः सर्वगणाः।

ब्रध्न॒ पिन्व॑स्व।
दद॑तो मे॒ मा क्षा॑यि।
कु॒र्व॒तो मे॒ मोप॑दसत्।
दि॒शां क्लृप्ति॑रसि।
दिशो॑ मे कल्पन्ताम्।
कल्प॑न्तां मे॒ दिशः॑॥ ७॥

((iḍè bhā̱gaṃ jùṣasva naḥ ।
jinva̱ gā jinvārvàtaḥ ।
tasyā̈ste bhakṣi̱vāṇàḥ syāma ।
sa̱rvātmā̀naḥ sa̱rvagaṇàḥ ।
bradhna̱ pinvàsva ।
dadàto me̱ mā kṣā̀yi ।
ku̱rva̱to me̱ mopàdasat ।
di̱śāṃ kḷptìrasi ।
diśò me kalpantām ।
kalpàntāṃ me̱ diśàḥ ॥ 7 ॥))

**[[3-7-5-8]]**
दैवी᳚श्च॒ मानु॑षीश्च।
अ॒हो॒रात्रे मे॑ कल्पेताम्।
अ॒र्ध॒मा॒सा मे॑ कल्पन्ताम्।
मासा॑ मे कल्पन्ताम्।
ऋ॒तवो॑ मे कल्पन्ताम्।
सं॒व॒त्स॒रो मे॑ कल्पताम्।
क्लृप्ति॑रसि॒ कल्प॑तां मे।
आशा॑नां त्वाऽऽशापा॒लेभ्यः॑।
च॒तुर्भ्यो॑ अ॒मृते᳚भ्यः।
इ॒दं भू॒तस्याध्य॑क्षेभ्यः॥ ८॥

((daivī̈śca̱ mānùṣīśca ।
a̱ho̱rātre mè kalpetām ।
a̱rdha̱mā̱sā mè kalpantām ।
māsā̀ me kalpantām ।
ṛ̱tavò me kalpantām ।
sa̱ṃva̱tsa̱ro mè kalpatām ।
kḷptìrasi̱ kalpàtāṃ me ।
āśā̀nāṃ tvā''śāpā̱lebhyàḥ ।
ca̱turbhyò a̱mṛtë̀bhyaḥ ।
i̱daṃ bhū̱tasyādhyàkṣebhyaḥ ॥ 8 ॥))

**[[3-7-5-9]]**
वि॒धेम॑ ह॒विषा॑ व॒यम्।
भज॑तां भा॒गी भा॒गम्।
माऽभा॒गोऽभ॑क्त।
निर॑भा॒गं भ॑जामः।
अ॒पस्पि॑न्व।
ओष॑धीर्जिन्व।
द्वि॒पात्पा॑हि।
चतु॑ष्पादव।
दि॒वो वृ॒ष्टिमेर॑य।
ब्रा॒ह्म॒णाना॑मि॒दꣳ ह॒विः॥ ९॥

((vi̱dhemà ha̱viṣā̀ va̱yam ।
bhajàtāṃ bhā̱gī bhā̱gam ।
mā'bhā̱go'bhàkta ।
niràbhā̱gaṃ bhàjāmaḥ ।
a̱paspìnva ।
oṣàdhīrjinva ।
dvi̱pātpàhi ।
catùṣpādava ।
di̱vo vṛ̱ṣṭi̱meràya ।
brā̱hma̱ṇānā̀mi̱dam̐ ha̱viḥ ॥ 9 ॥))

**[[3-7-5-10]]**
सो॒म्यानाꣳ॑ सोमपी॒थिना᳚म्।
निर्भ॑क्तो ब्रा᳚ह्मणः।
नेहाब्रा᳚ह्मणस्यास्ति।
सम॑ङ्क्तां ब॒र्हिर्ह॒विषा᳚ घृ॒तेन॑।
समा᳚दि॒त्यैर्वसु॑भिः सं म॒रुद्भिः॑।
समिन्द्रे॑ण॒ विश्वे॑भिर्दे॒वेभि॑रङ्क्ताम्।
दि॒व्यं नभो॑ गच्छतु॒ यत्स्वाहा᳚।
इ॒न्द्रा॒णीवा॑विध॒वा भू॑यासम्।
अदि॑तिरिव सुपु॒त्रा।
अ॒स्थू॒रि त्वा॑ गार्ह॑पत्य॥ १०॥

((so̱myānām̐ somapī̱thinā̈m ।
nirbha̱kto brā̈hmaṇaḥ ।
nehābrā̈hmaṇasyāsti ।
samàṅktāṃ ba̱rhirha̱viṣā̈ ghṛ̱tenà ।
samā̀di̱tyairvasùbhi̱ḥ saṃ ma̱rudbhìḥ ।
samindrèṇa̱ viśvèbhirde̱vebhìraṅktām ।
di̱vyaṃ nabhò gacchatu̱ yatsvāhā̈ ।
i̱ndrā̱ṇīvàvidha̱vā bhùyāsam ।
adìtiriva supu̱trā ।
a̱sthū̱ri tvā̀ gārhapatya ॥ 10 ॥))

**[[3-7-5-11]]**
उ॒प॒निष॑दे सु॒प्र॒जा॒स्त्वाय॑।
सं पत्नी॒ पत्या॑ सु॒कृ॒तेन॑ गच्छताम्।

यज्ञस्य युक्तौ धुर्याविभूताम्।
संजानानौ विजहतामरातीः।
दिवि ज्योतिरजरमारभेताम्।
दश ते तनुवो यज्ञ यज्ञियाः।
ताः प्रीणातु यजमानो घृतेन।
नारिष्ठयोः प्रशिषमीडमानः।
देवानां दैव्येऽपि यजमानोऽमृतोऽभूत्।
यं वां देवा अकल्पयन्॥ ११॥

((upaniṣade suprajāstvāya ।
sam patnī patyā sukṛtena gacchatām ।
yajñasya yuktau dhuryāvabhūtām ।
saṃjānānau vijahatāmarātīḥ ।
divi jyotirajaramārabhetām ।
daśa te tanuvo yajña yajñiyāḥ ।
tāḥ prīṇātu yajamāno ghṛtena ।
nāriṣṭhayoḥ praśiṣamīḍamānaḥ ।
devānāṃ daivye'pi yajamāno'mṛto'bhūt ।
yaṃ vāṃ devā akalpayan ॥ 11 ॥))

**[[3-7-5-12]]**

ऊर्जो भागꣳ शतक्रतू।
एतद्वां तेन प्रीणानि।
तेन तृप्यतमꣳहहौ।
अहं देवानाꣳ सुकृतामस्मि लोके।
ममेदमिष्टं न मिथुर्भवाति।
अहं नारिष्ठावनुयजामि विद्वान्।
यदाभ्यामिन्द्रो अदधाद्भागधेयम्।
अदारसृद्भवत देव सोम।
अस्मिन्यज्ञे मरुतो मृडता नः।
मा नो विददभि भामो अशस्तिः॥ १२॥

((ūrjo bhāgam̐ śatakratū ।
etadvāṃ tena prīṇāni ।
tena tṛpyatamam̐hahau ।
ahaṃ devānām̐ sukṛtāmasmi loke ।
mamedamiṣṭaṃ na mithurbhavāti ।
ahaṃ nāriṣṭhāvanuyajāmi vidvān ।
yadābhyāmindro adadhādbhāgadheyam ।
adārasṛdbhavata deva soma ।
asminyajñe maruto mṛḍatā naḥ ।
mā no vidadabhi bhāmo aśastiḥ ॥ 12 ॥))

**[[3-7-5-13]]**

मा नो विदद्वृजना द्वेष्या या।
ऋषभं वाजिनं वयम्।
पूर्णमासं यजामहे।
स नो दोहताꣳ सुवीर्यम्।
रायस्पोषꣳ सहस्रिणम्।
प्राणाय सुराधसे।
पूर्णमासाय स्वाहा।
अमावास्या सुभगा सुशेवा।
धेनुरिव भूय आप्यायमाना।
सा नो दोहताꣳ सुवीर्यम्।
रायस्पोषꣳ सहस्रिणम्।
अपानाय सुराधसे।
अमावास्यायै स्वाहा।
अभिस्तृणीहि परिधेहि वेदिम्।
जामिं मा हिꣳसीरमुया शयाना।
होतृषदना हरिताः सुवर्णाः।
निष्का इमे यजमानस्य ब्रध्ने॥ १३॥
अभीत्वर्यै करोमि क्रमीत्पिताऽऽत्मन एकतोमुखां मे
दिशोऽध्यक्षेभ्यो हविर्गार्हपत्याकल्पयन्नशस्तिः सा नो
दोहताꣳ सुवीर्यꣳ सप्त च॥ ५॥

((mā no vidadvṛjanā dveṣyā yā ।
ṛṣabhaṃ vājinaṃ vayam ।
pūrṇamāsaṃ yajāmahe ।
sa no dohatām̐ suvīryam ।
rāyaspoṣam̐ sahasriṇam ।
prāṇāya surādhase ।
pūrṇamāsāya svāhā ।
amāvāsyā subhagā suśevā ।
dhenuriva bhūya āpyāyamānā ।
sā no dohatām̐ suvīryam ।
rāyaspoṣam̐ sahasriṇam ।
apānāya surādhase ।
amāvāsyāyai svāhā ।
abhistṛṇīhi paridhehi vedim ।
jāmiṃ mā him̐sīramuyā śayānā ।
hotṛṣadanā haritāḥ suvarṇāḥ ।
niṣkā ime yajamānasya bradhne ॥ 13 ॥
abhītvaryai karomi kramītpitā''tmana ekatomukhāṃ me diśo'dhyakṣebhyo havirgārhapatyākalpayannaśastiḥ sā no dohatām̐ suvīryam̐ sapta ca ॥ 5 ॥))

**[[3-7-6-1]]**

परिस्तृणीत परिधत्ताग्निम्।
परिहितोऽग्निर्यजमानं भुनक्तु।

अ॒पाꣳ रस॒ ओष॑धीनाꣳ सु॒वर्णा᳚ः।
नि॒ष्का इ॒मे यज॑मानस्य सन्तु काम॒दुघा᳚ः।
अ॒मुत्रा॒मुष्मि॑ꣳल्लो॒के।
भूप॑ते॒ भुव॑नपते।
म॒ह॒तो भू॒तस्य॑ पते।
ब्र॒ह्माणं॑ त्वा वृणीमहे।
अ॒हं भूप॑तिर॒हं भुव॑नपतिः।
अ॒हं म॑ह॒तो भू॒तस्य॒ पतिः॑॥ १॥

((pari̍stṛṇīta̱ pari̍dhattā̱gnim ।
pari̍hito̱'gniryaja̍mānam bhunaktu ।
a̱pāꣳ rasa̱ oṣa̍dhīnāꣳ su̱varṇā̍ḥ ।
niṣkā i̱me yaja̍mānasya santu kāma̱dughā̍ḥ ।
a̱mutrā̱muṣmi̍ṁllo̱ke ।
bhūpa̍te̱ bhuva̍napate ।
ma̱ha̱to bhū̱tasya̍ pate ।
bra̱hmāṇa̍ṃ tvā vṛṇīmahe ।
a̱haṃ bhūpa̍tira̱haṃ bhuva̍napatiḥ ।
a̱haṃ ma̍ha̱to bhū̱tasya̱ pati̍ḥ ॥ 1 ॥))

**[[3-7-6-2]]**

दे॒वेन॑ सवि॒त्रा प्रसू॑त॒ आर्त्वि॑ज्यं करिष्यामि।
देव॑सवितरे॒तं त्वा॑ वृणते।
बृ॒ह॒स्पतिं॒ दैव्यं॑ ब्र॒ह्माणा᳚म्।
तद॒हं मन॑से॒ प्रब्र॑वीमि।
मनो॑ गायत्रि॒यै।
गा॒य॒त्री त्रि॒ष्टुभे᳚।
त्रि॒ष्टुब्जग॑त्यै।
जग॑त्यनु॒ष्टुभे᳚।
अ॒नु॒ष्टुक्प॒ङ्क्त्यै।
प॒ङ्क्तिः प्र॒जाप॑तये॥ २॥

((de̱vena̍ savi̱trā prasū̍ta̱ ārtvi̍jyaṃ kariṣyāmi ।
deva̍savitare̱taṃ tvā̍ vṛṇate ।
bṛ̱ha̱spati̱ṃ daivya̍ṃ bra̱hmāṇā̍m ।
tada̱haṃ mana̍se̱ prabra̍vīmi ।
mano̍ gāyatri̱yai ।
gā̱ya̱trī tri̱ṣṭubhe̍ ।
tri̱ṣṭubjaga̍tyai ।
jaga̍tyanu̱ṣṭubhe̍ ।
a̱nu̱ṣṭuk pa̱ṅktyai ।
pa̱ṅktiḥ pra̱jāpa̍taye ॥ 2 ॥))

**[[3-7-6-3]]**

प्र॒जाप॑ति॒र्विश्वे᳚भ्यो दे॒वेभ्यः॑।
विश्वे॑ दे॒वा बृ॒ह॒स्पत॑ये।
बृ॒ह॒स्पति॒र्ब्रह्म॑णे।
ब्रह्म॒ भूर्भुव॒ः सुव॑ः।
बृ॒ह॒स्पति॑र्दे॒वानां᳚ ब्र॒ह्मा।
अ॒हं म॑नु॒ष्या॑णाम्।
बृह॑स्पते य॒ज्ञं गो॑पाय।
इ॒दं तस्मै॑ ह॒र्म्यं क॑रोमि।
यो वो॑ दे॒वाश्चर॑ति ब्रह्म॒चर्या᳚म्।
मे॒धा॒वी दि॒क्षु मन॑सा तप॒स्वी॥ ३॥

((pra̱jāpa̍ti̱rviśve̍bhyo de̱vebhya̍ḥ ।
viśve̍ de̱vā bṛ̱ha̱spata̍ye ।
bṛ̱ha̱spati̱rbrahma̍ṇe ।
brahma̱ bhūrbhuva̱ḥ suva̍ḥ ।
bṛ̱ha̱spati̍rde̱vānā̍ṃ bra̱hmā ।
a̱haṃ ma̍nu̱ṣyā̍ṇām ।
bṛha̍spate ya̱jñaṃ go̍pāya ।
i̱daṃ tasmai̍ ha̱rmyaṃ ka̍romi ।
yo vo̍ de̱vāścara̍ti brahma̱caryā̍m ।
me̱dhā̱vī di̱kṣu mana̍sā tapa̱svī ॥ 3 ॥))

**[[3-7-6-4]]**

अ॒न्त॒र्दू॒तश्चर॑ति॒ मानु॑षीषु।
चतु॑ःशिखण्डा युव॒तिः सु॒पेशा᳚ः।
घृ॒तप्र॑तीका भुव॑नस्य॒ मध्ये᳚।
म॒र्मृ॒ज्यमा॑ना मह॒ते सौभ॑गाय।
मह्यं॑ धुक्ष्व॒ यज॑माना॒य कामा॑न्।
भूमि॑र्भू॒त्वा म॑हि॒मानं॑ पुपोष।
ततो॑ दे॒वी वर्ध॑यते॒ पयाꣳ॑सि।
य॒ज्ञिया॑ य॒ज्ञं वि च॒ यन्ति॒ शं च॑।
ओष॑धीराप॑ इ॒ह शक्व॑रीश्च।
यो मा॑ हृ॒दा मन॑सा॒ यश्च॑ वा॒चा॥ ४॥

((a̱ntardū̱taścara̍ti̱ mānu̍ṣīṣu ।
catu̍ḥśikhaṇḍā yuva̱tiḥ su̱peśā̍ḥ ।
ghṛ̱tapra̍tīkā̱ bhuva̍nasya̱ madhye̍ ।
ma̱rmṛ̱jyamā̍nā maha̱te saubha̍gāya ।
mahya̍ṃ dhukṣva̱ yaja̍mānāya̱ kāmā̍n ।
bhūmi̍rbhū̱tvā ma̍hi̱māna̍ṃ pupoṣa ।
tato̍ de̱vī varda̍hayate̱ payāꣳ̍si ।
ya̱jñiyā̍ ya̱jñaṃ vi ca̱ yanti̱ śaṃ ca̍ ।
oṣa̍dhīrāpa̍ i̱ha śakva̍rīśca ।
yo mā̍ hṛ̱dā mana̍sā̱ yaśca̍ vā̱cā ॥ 4 ॥))

**[[3-7-6-5]]**

यो ब्रह्मणा कर्मणा द्वेष्टि देवाः।
यः श्रुतेन हृदयेनेष्णता च।
तस्यैन्द्र वज्रेण शिरश्छिनद्मि।
ऊर्णाम्रदु प्रथमानꣳ स्योनम्।
देवेभ्यो जुष्टꣳ सदनाय बर्हिः।
सुवर्गे लोके यजमानꣳ हि धेहि।
मां नाकस्य पृष्ठे परमे व्योमन्।
चतुःशिखण्डा युवतिः सुपेशाः।
घृतप्रतीका वयुनानि वस्ते।
सा स्तीर्यमाणा महते सौभगाय॥ ५॥

((yo brahmaṇā karmaṇā dveṣṭi devāḥ |
yaḥ śrutena hṛdayeneṣṇatā ca |
tasyendra vajreṇa śiraśchinadmi |
ūrṇāmṛdu prathamānam̐ syonam |
devebhyo juṣṭam̐ sadanāya barhiḥ |
suvarge loke yajamānam̐ hi dhehi |
māṃ nākasya pṛṣṭhe parame vyoman |
catuḥśikhaṇḍā yuvatiḥ supeśāḥ |
ghṛtapratīkā vayunāni vaste |
sā stīryamāṇā mahate saubhagāya || 5 ||))

**[[3-7-6-6]]**

सा मे धुक्ष्व यजमानाय कामान्।
शिवा च मे शग्मा चैधि।
स्योना च मे सुषदा चैधि।
ऊर्जस्वती च मे पयस्वती चैधि।
इषमूर्जं मे पिन्वस्व।
ब्रह्मतेजो मे पिन्वस्व।
क्षत्रमोजो मे पिन्वस्व।
विशं पुष्टिं मे पिन्वस्व।
आयुरन्नाद्यं मे पिन्वस्व।
प्रजां पशून्मे पिन्वस्व॥ ६॥

((sā me dhukṣva yajamānāya kāmān |
śivā ca me śagmā caidhi |
syonā ca me suṣadā caidhi |
ūrjasvatī ca me payasvatī caidhi |
iṣamūrjaṃ me pinvasva |
brahmatejo me pinvasva |
kṣatramojo me pinvasva |
viśaṃ puṣṭiṃ me pinvasva |
āyurannādyaṃ me pinvasva |
prajāṃ paśūnme pinvasva || 6 ||))

**[[3-7-6-7]]**

अस्मिन्यज्ञ उप भूय इन्नु मे।
अविक्षोभाय परिधीन्दधामि।
धर्ता धरुणो धरीयान्।
अग्निर्द्वेषाꣳसि निरितो नुदातै।
विच्छिनद्मि विधृतीभ्याꣳ सपत्नान्।
जातान्भ्रातृव्यान्ये च जनिष्यमाणाः।
विशो यन्त्राभ्यां विधमाम्येनान्।
अहꣳ स्वानामुत्तमोऽसानि देवाः।
विशो यन्त्रे नुदमाने अरातिम्।
विश्वं पाप्मानममतिं दुर्मरायुम्॥ ७॥

((asminyajña upa bhūya innu me |
avikṣobhāya paridhīndadhāmi |
dhartā dharuṇo dharīyān |
agnirdveṣām̐si nirito nudātai |
vicchinadmi vidhṛtībhyām̐ sapatnān |
jātānbhrātṛvyānye ca janiṣyamāṇāḥ |
viśo yantrābhyāṃ vidhamāmyenān |
aham̐ svānāmuttamo'sāni devāḥ |
viśo yantre nudamāne arātim |
viśvaṃ pāpmānamamatiṃ durmarāyum || 7 ||))

**[[3-7-6-8]]**

सीदन्ती देवी सुकृतस्य लोके।
धृती स्थो विधृती स्वधृती।
प्राणान्मयि धारयतम्।
प्रजां मयि धारयतम्।
पशून्मयि धारयतम्।
अयं प्रस्तर उभयस्य धर्ता।
धर्ता प्रयाजानामुतानूयाजानाम्।
स दाधार समिधो विश्वरूपाः।
तस्मिन्त्स्रुचो अध्यासादयामि।
आरोह पथो जुहु देवयानान्॥ ८॥

((sīdantī devī sukṛtasya loke |
dhṛtī stho vidhṛtī svadhṛtī |
prāṇānmayi dhārayatam |
prajāṃ mayi dhārayatam |
paśūnmayi dhārayatam |
ayaṃ prastara ubhayasya dhartā |
dhartā prayājānāmutānūyājānām |
sa dādhāra samidho viśvarūpāḥ |
tasmintsruco adhyāsādayāmi |
āroha patho juhu devayānān || 8 ||))

**[[3-7-6-9]]**

यत्रर्ष॑यः प्रथम॒जा ये पु॑रा॒णाः।
हिर॑ण्यपक्षाऽजि॒रा सम्भृ॑ताङ्गा।
वहा॑सि मा सु॒कृता॒ं यत्र॑ लो॒काः।
अवा॒हं बा॑ध उप॒भृता॑ स॒पत्ना॑न्।
जा॒ता॒न्भ्रातृ॑व्या॒न्ये च॑ जनि॒ष्यमा॑णाः।
दोहै॑ य॒ज्ञꣳ सु॒दुघा॑मिव धे॒नुम्।
अ॒हमुत्त॑रो भूयासम्।
अध॑रे॒ मत्स॒पत्ना᳚ः।
यो मा॑ वा॒चा मन॑सा दुर्म॒रा॒युः।
हृ॒दाऽरा॑ती॒याद॑भि॒दास॑दग्ने॥ ९॥

((yatrarṣa̍yaḥ prathama̱jā ye pu̍rā̱ṇāḥ |
hira̍ṇyapakṣā'ji̱rā sambhṛ̍tāṅgā |
vahā̍si mā su̱kṛtā̱m yatra̍ lo̱kāḥ |
avā̱ham bā̍dha upa̱bhṛtā̍ sa̱patnā̍n |
jā̱tānbhrātṛ̍vyā̱nye ca̍ jani̱ṣyamā̍ṇāḥ |
dohai̍ ya̱jñam̐ su̱dughā̍miva dhe̱num |
a̱hamutta̍ro bhūyāsam |
adha̍re̱ matsa̱patnā̎ḥ |
yo mā̍ vā̱cā manа̍sā durmarā̱yuḥ |
hṛ̱dā'rā̍tī̱yāda̍bhi̱dāsa̍dagne || 9 ||))

**[[3-7-6-10]]**

इ॒दम॑स्य चि॒त्तमध॑रं ध्रु॒वाया᳚ः।
अ॒हमुत्त॑रो भूयासम्।
अध॑रे॒ मत्स॒पत्ना᳚ः।
ऋ॒ष॒भो॑ऽसि शाक्व॒रः।
घृ॒ताची॑नाꣳ सू॒नुः।
प्रि॒येण॒ नाम्ना᳚ प्रि॒ये सद॑सि सीद।
स्यो॒नो मे॑ सीद सु॒षद॑ः पृथि॒व्याम्।
प्रथ॑यि प्र॒जया॑ प॒शुभि॑ः सुव॒र्गे लो॒के।
दि॒वि सी॑द पृथि॒व्याम॒न्तरि॑क्षे।
अ॒हमुत्त॑रो भूयासम्॥ १०॥

((i̱dama̍sya ci̱ttamadha̍ram dhru̱vāyā̎ḥ |
a̱hamutta̍ro bhūyāsam |
adha̍re̱ matsa̱patnā̎ḥ |
ṛ̱ṣa̱bho̍'si śākva̱raḥ |
ghṛ̱tāci̍nām̐ sū̱nuḥ |
pri̱yeṇa̱ nāmnā̎ pri̱ye sada̍si sīda |
syo̱no me̍ sīda su̱ṣada̍ḥ pṛthi̱vyām |
pratha̍yi pra̱jayā̍ pa̱śubhi̍ḥ suva̱rge lo̱ke |
di̱vi sī̍da pṛthi̱vyāma̱ntari̍kṣe |
a̱hamutta̍ro bhūyāsam || 10 ||))

**[[3-7-6-11]]**

अध॑रे॒ मत्स॒पत्ना᳚ः।
इ॒यꣳ स्था॒ली घृ॒तस्य॑ पू॒र्णा।
अच्छि॑न्नपयाः श॒तधा॑र॒ उत्स॑ः।
मा॒रु॒तेन॒ शर्म॑णा॒ दैव्ये॑न।
य॒ज्ञो॑ऽसि स॒र्वत॑ः श्रि॒तः।
स॒र्वतो॒ मां भू॒तं भ॑वि॒ष्यच्छ्र॑यताम्।
श॒तं मे॑ सन्त्वा॒शिष॑ः।
स॒हस्रं॑ मे सन्तु सू॒नृता᳚ः।
इरा॑वतीः प॒शुमती᳚ः।
प्र॒जाप॑तिरसि स॒र्वत॑ः श्रि॒तः॥ ११॥

((adha̍re̱ matsa̱patnā̎ḥ |
i̱yam̐ sthā̱lī ghṛ̱tasya̍ pū̱rṇā |
acchi̍nnapayāḥ śa̱tadhā̍ra̱ utsa̍ḥ |
mā̱ru̱tena̱ śarma̍ṇā̱ daivye̍na |
ya̱jño̍'si sa̱rvata̍ḥ śri̱taḥ |
sa̱rvato̱ mām bhū̱tam bha̍vi̱ṣyacchra̍yatām |
śa̱tam me̍ santvā̱śiṣa̍ḥ |
sa̱hasra̍m me santu sū̱nṛtā̎ḥ |
irā̍vatīḥ pa̱śumatī̎ḥ |
pra̱jāpa̍tirasi sa̱rvata̍ḥ śri̱taḥ || 11 ||))

**[[3-7-6-12]]**

स॒र्वतो॒ मां भू॒तं भ॑वि॒ष्यच्छ्र॑यताम्।
श॒तं मे॑ सन्त्वा॒शिष॑ः।
स॒हस्रं॑ मे सन्तु सू॒नृता᳚ः।
इरा॑वतीः प॒शुमती᳚ः।
इ॒दमि॑न्द्रि॒यम॒मृतं॑ वी॒र्य᳚म्।
अ॒नेनेन्द्रा॑य प॒शवो॑ऽचिकित्सन्।
तेन॑ दे॒वा अ॒व॒तोप॒ माम्।
इ॒हे॒षमू॒र्जं य॒शः सह॒ ओज॑ः सनेयम्।
शृ॒तं मयि॑ श्रयताम्।
यत्पृ॑थि॒वीमच॑र॒त्तत्प्रवि॑ष्टम्॥ १२॥

((sa̱rvato̱ mām bhū̱tam bha̍vi̱ṣyacchra̍yatām |
śa̱tam me̍ santvā̱śiṣa̍ḥ |
sa̱hasra̍m me santu sū̱nṛtā̎ḥ |
irā̍vatīḥ pa̱śumatī̎ḥ |
i̱dami̍ndri̱yama̱mṛta̍m vī̱ryā̎m |
a̱nenendrā̍ya pa̱śavo̍'cikitsan |
tena̍ de̱vā ava̱topa̱ mām |
i̱he̱ṣamū̱rjam̱ ya̱śaḥ saha̱ ojā̍ḥ saneyam |

śṛtaṃ mayi śrayatām ।
yatpṛthivīmacarattatpraviṣṭam ॥ 12 ॥))

**[[3-7-6-13]]**

येनासिञ्चद्बलमिन्द्रँ प्रजापतिः।
इदं तच्छुक्रं मधु वाजिनीवत्।
येनोपरिष्टादधिनोन्महेन्द्रम्।
दधि मां धिनोतु।
अयं वेदः पृथिवीमन्वविन्दत्।
गुहा सतीं गहने गह्वरेषु।
स विन्दतु यजमानाय लोकम्।
अच्छिद्रं यज्ञं भूरिकर्मा करोतु।
अयं यज्ञः समसदद्धविष्मान्।
ऋचा साम्ना यजुषा देवताभिः॥ १३॥

((yenāsiñcadbalamindrē prajāpatiḥ ।
idaṃ tacchukraṃ madhu vājinivat ।
yenopariṣṭādadhinonmahendram ।
dadhi māṃ dhinotu ।
ayaṃ vedaḥ pṛthivīmanvavindat ।
guhā satīṃ gahane gahvareṣu ।
sa vindatu yajamānāya lokam ।
acchidraṃ yajñaṃ bhūrikarmā karotu ।
ayaṃ yajñaḥ samasadaddhaviṣmān ।
ṛcā sāmnā yajuṣā devatābhiḥ ॥ 13 ॥))

**[[3-7-6-14]]**

तेन लोकान्त्सूर्यवतो जयेम।
इन्द्रस्य सख्यममृतत्वमश्याम्।
यो नः कनीय इह कामयातै।
अस्मिन्यज्ञे यजमानाय मह्यम्।
अप तमिन्द्राग्नी भुवनान्नुदेताम्।
अहं प्रजां वीरवतीं विदेय।
अग्ने वाजजित्।
वाजं त्वा सरिष्यन्तम्।
वाजं जेष्यन्तम्।
वाजिनं वाजजितम्॥ १४॥

((tena lokāntsūryavato jayema ।
indrasya sakhyamamṛtatvamaśyām ।
yo naḥ kanīya iha kāmayātai ।
asminyajñe yajamānāya mahyām ।
apa tamindrāgnī bhuvanānnudetām ।
ahaṃ prajāṃ vīravatīṃ videya ।
agne vājajit ।
vājaṃ tvā sariṣyantām ।
vājaṃ jeṣyantām ।
vājinaṃ vājajitām ॥ 14 ॥))

**[[3-7-6-15]]**

वाजजित्यायै संमार्ज्मि।
अग्निमन्नादमन्नाद्याय।
उपहूतो द्यौः पिता।
उप मां द्यौः पिता ह्वयताम्।
अग्निराग्नीध्रात्।
आयुषे वर्चसे।
जीवात्वै पुण्याय।
उपहूता पृथिवी माता।
उप मां माता पृथिवी ह्वयताम्।
अग्निराग्नीध्रात्॥ १५॥

((vājajityāyai sammārjmi ।
agnimannādamannādyāya ।
upahūto dyauḥ pitā ।
upa māṃ dyauḥ pitā hvayatām ।
agnirāgnīddhrāt ।
āyuṣe varcase ।
jīvātvai puṇyāya ।
upahūtā pṛthivī mātā ।
upa māṃ mātā pṛthivī hvayatām ।
agnirāgnīddhrāt ॥ 15 ॥))

**[[3-7-6-16]]**

आयुषे वर्चसे।
जीवात्वै पुण्याय।
मनो ज्योतिर्जुषतामाज्यम्।
विच्छिन्नं यज्ञꣳ समिमं दधातु।
बृहस्पतिस्तनुतामिमं नः।
विश्वे देवा इह मादयन्ताम्।
यं ते अग्न आवृश्चामि।
अहं वा क्षिपितश्चरन्।
प्रजां च तस्य मूलं च।
नीचैर्देवा निवृश्चत॥ १६॥

((āyuṣe varcase ।
jīvātvai puṇyāya ।
mano jyotirjuṣatāmājyam ।
vicchinnaṃ yajñaṁ samimaṃ dadhātu ।
bṛhaspatistanutāmimaṃ naḥ ।
viśve devā iha mādayantām ।

yaṃ tė agna āvṛ̥ścāmi̍ |
a̱haṃ vā̎ kṣipi̱taścara̍n |
pra̱jāṃ ca̱ tasya̱ mūla̍ṃ ca |
nī̱cairde̍vā̱ nivṛ̍̍ścata || 16 ||))

**[[3-7-6-17]]**

अग्ने॒ यो नो॑ऽभि॒दास॑ति।
स॒मा॒नो यश्च॒ निष्ट्य॑ः।
इ॒ध्मस्ये॑व प्र॒क्षाय॑तः।
मा तस्योच्छे॑षि॒ किंच॒न।
यो मां द्वेष्टि॑ जातवेदः।
यं चा॒हं द्वेष्मि॒ यश्च॒ माम्।
सर्वा॒ꣳस्तान॑ग्ने॒ संद॑ह।
याꣳश्चा॒हं द्वेष्मि॒ ये च॒ माम्।
अग्ने॑ वाजजित्।
वाज॑ं त्वा ससृ॒वाꣳस॑म्॥ १७॥

((agne̱ yo no̍'bhi̱dāsa̍ti |
sa̱mā̱no yaśca̱ niṣṭya̍ḥ |
i̱dhmasye̍va pra̱kṣāya̍taḥ |
mā tasyocche̍ṣi̱ kiṃca̱na |
yo māṃ dveṣṭi̍ jātavedaḥ |
yaṃ cā̱haṃ dveṣmi̱ yaśca̱ mām |
sarvā̱ꣳstāna̍gne̱ saṃda̍ha |
yāꣳścā̱haṃ dveṣmi̱ ye ca̱ mām |
agne̍ vājajit|
vāja̍ṃ tvā sasṛ̱vāꣳsa̍m || 17 ||))

**[[3-7-6-18]]**

वाजं जिगि॒वाꣳस॑म्।
वा॒जिन॑ं वा॒ज॒जित॑म्।
वा॒ज॒जित्या॑यै॒ संमा॑र्ज्मि।
अ॒ग्निम॑न्ना॒दम॒न्नाद्या॑य।
वेदि॑र्ब॒र्हिः शृ॒तꣳ ह॒विः।
इ॒ध्मः प॑रि॒धय॑ः स्रुच॑ः।
आज्य॑ं य॒ज्ञ ऋचो॒ यजु॑ः।
या॒ज्या॑श्च वषट्का॒राः।
सं मे॒ संन॑तयो नमन्ताम्।
इ॒ध्म॒सं॒नह॑ने हु॒ते॥ १८॥

((vājaṃ jigi̱vāꣳsa̍m |
vā̱jina̍ṃ vā̱ja̱jita̍m |
vā̱ja̱jityā̍yai̱ saṃmā̍rjmi |
a̱gnima̍nnā̱dama̱nnādyā̍ya |
vedi̍rba̱rhiḥ śṛ̱taꣳ ha̱viḥ |
i̱dhmaḥ pa̍ri̱dhaya̍ḥ sruca̍ḥ |
ājya̍ṃ ya̱jña ṛco̱ yaju̍ḥ |
yā̱jyā̎śca vaṣaṭkā̱rāḥ |
saṃ me̱ saṃna̍tayo namantām |
i̱dhma̱saṃ̱naha̍ne hu̱te || 18 ||))

**[[3-7-6-19]]**

दि॒वः खीलो॑ऽव॑ततः।
पृ॒थि॒व्या अध्युत्थि॑तः।
तेना॑ स॒हस्र॑काण्डेन।
द्वि॒षन्तꣳ॑ शोचयामसि।
द्वि॒षन्मे॑ ब॒हु शोच॑तु।
ओष॑धे॒ मो अ॒हꣳ शुचम्।
य॒ज्ञ॒ नम॑स्ते यज्ञ।
नमो॒ नम॑श्च ते यज्ञ।
शि॒वेन॑ मे॒ संति॑ष्ठस्व।
स्यो॒नेन॑ मे॒ संति॑ष्ठस्व॥ १९॥

((di̱vaḥ khīlo'va̍tataḥ |
pṛ̱thi̱vyā adhyutthi̍taḥ |
tenā̍ sa̱hasra̍kāṇḍena |
dvi̱ṣantaꣳ̍ śocayāmasi |
dvi̱ṣanme̍ ba̱hu śo̍catu |
oṣa̍dhe̱ mo a̱haꣳ śu̍cam |
ya̱jña̱ nama̍ste yajña |
namo̱ nama̍śca te yajña |
śi̱vena̍ me̱ saṃti̍ṣṭhasva |
syo̱nena̍ me̱ saṃti̍ṣṭhasva || 19 ||))

**[[3-7-6-20]]**

सु॒भू॒तेन॑ मे॒ संति॑ष्ठस्व।
ब्र॒ह्म॒व॒र्च॒सेन॑ मे॒ संति॑ष्ठस्व।
य॒ज्ञस्य॒र्द्धिम॒नु संति॑ष्ठस्व।
उप॑ ते य॒ज्ञ नम॑ः।
उप॑ ते॒ नम॑ः।
उप॑ ते॒ नम॑ः।
त्रिष्फ॒ली क्रि॒यमा॑णानाम्।
यो न्य॒ङ्गो अ॑वशि॒ष्यते॑।
रक्ष॑सां भाग॒धेय॑म्।
आप॒स्तत्प्र॑वहतादि॒तः॥ २०॥

((su̱bhū̱tena̍ me̱ saṃti̍ṣṭhasva |
bra̱hma̱va̱rca̱sena̍ me̱ saṃti̍ṣṭhasva |
ya̱jñasyarddhi̱manu̱ saṃti̍ṣṭhasva |
upa̍ te ya̱jña̱ nama̍ḥ |

upá te̱ namáḥ ।
upá te̱ namáḥ ।
triṣpha̱lī kri̱yamā̍ṇānām ।
yo nya̱ṅgo áva̱śiṣyáte ।
rakṣásāṃ bhāga̱dheyā̎m ।
āpa̱statpravá̍hatādi̱taḥ ॥ 20 ॥))

**[[3-7-6-21]]**

उ॒लूख॑ले॒ मुस॑ले॒ यच्च॒ शूर्पे᳚।
आ॒शि॒श्ले॒ष॑ दृ॒षदि॒ यत्क॒पाले᳚।
अ॒व॒प्रु॒षो॑ वि॒प्रुषः॒ सं॒यजा॑मि।
विश्वे॑ दे॒वा ह॒विरि॒दं जु॑षन्ताम्।
य॒ज्ञे या वि॒प्रुषः॒ सन्ति॑ ब॒ह्वीः।
अ॒ग्नौ ताः सर्वाः॒ स्वि॑ष्टाः॒ सुहु॑ता जुहोमि।
उ॒द्यन्न॒द्य मि॑त्रमहः।
स॒पत्ना᳚न्मे अनीनशः।
दि॒वैना॑न्वि॒द्युता॑ जहि।
नि॒म्रोच॒न्नध॑रान्कृधि॥ २१॥

((u̱lūkhále̱ musále̱ yacca̱ śūrpē̎ ।
ā̱śi̱śle̱ṣá dṛ̱ṣadi̱ yatka̱pālē̎ ।
a̱va̱pru̱ṣó vi̱pruṣa̱ḥ sa̱myájāmi ।
viśvé de̱vā ha̱viri̱daṃ júṣantām ।
ya̱jñe yā vi̱pruṣa̱ḥ santi̍ ba̱hvīḥ ।
a̱gnau tāḥ sarvā̱ḥ svíṣṭā̱ḥ suhútā juhomi ।
u̱dyanna̱dya mítramahaḥ ।
sa̱patnā̎nme anīnaśaḥ ।
divaínānvi̱dyutā́ jahi ।
ni̱mroca̱nnadhárānkṛdhi ॥ 21 ॥))

**[[3-7-6-22]]**

उ॒द्यन्न॒द्य वि नो॑ भज।
पि॒ता पु॒त्रेभ्यो॒ यथा᳚।
दी॒र्घा॒यु॒त्वस्य॑ हेशिषे।
तस्य॑ नो देहि सूर्य।
उ॒द्यन्न॒द्य मि॑त्रमहः।
आ॒रोह॒न्नुत्त॑रां॒ दिवा᳚म्।
हृ॒द्रो॒गं मम॑ सूर्य।
ह॒रि॒माणं॑ च नाशय।
शु॒केषु॑ मे हरि॒माणा᳚म्।
रो॒प॒णाका॑सु दध्मसि॥ २२॥

((u̱dyanna̱dya vi nó bhaja ।
pi̱tā pu̱trebhyo̱ yathā̎ ।
dī̱rghā̱yu̱tvasyá heśiṣe ।
tasyá no dehi sūrya ।
u̱dyanna̱dya mítramahaḥ ।
ā̱roha̱nnuttárā̱ṃ divā̎m ।
hṛ̱dro̱gaṃ mamá sūrya ।
ha̱ri̱māṇaṃ́ ca nāśaya ।
śu̱kéṣu me hari̱māṇā̎m ।
ro̱pa̱ṇākā́su dadhmasi ॥ 22 ॥))

**[[3-7-6-23]]**

अथो॑ हारि॒द्र॒वेषु॑ मे।
ह॒रि॒माणं॒ निद॑ध्मसि।
उद॑गादु॒यमा॑दि॒त्यः।
विश्वे॑न॒ सह॑सा स॒ह।
द्वि॒षन्तं॒ मम॑ र॒न्धय॑न्।
मो अ॒हं द्वि॑ष॒तो र॑धम्।
यो नः॒ शपा॒दश॑पतः।
यश्च॑ नः॒ शप॑तः॒ शपा᳚त्।
उ॒षाश्च॒ तस्मै॑ नि॒म्रुक्च॑।
सर्वं॑ पा॒पꣳ समू॑हताम्॥ २३॥

((athó hāridra̱veṣú me ।
ha̱ri̱māṇa̱ṃ nidádhmasi ।
udágāda̱yamā́di̱tyaḥ ।
viśvéna̱ sahásā sa̱ha ।
dvi̱ṣanta̱ṃ mamá ra̱ndhayaṅ ।
mo a̱haṃ dvíṣa̱to rádham ।
yo na̱ḥ śapā̱daśápataḥ ।
yaścá na̱ḥ śapáta̱ḥ śapā̎t ।
u̱ṣāśca̱ tasmaí ni̱mrukcá ।
sarvaṃ́ pā̱pam̐ samúhatām ॥ 23 ॥))

**[[3-7-6-24]]**

यो नः॑ स॒पत्नो॒ यो रणः॑।
मर्तो᳚ऽभि॒दास॑ति देवाः।
इ॒ध्मस्ये॑व प्र॒क्षाय॑तः।
मा तस्योच्छे॑षि॒ किञ्चन।
अव॑सृष्टः॒ परा॑पत।
श॒रो ब्रह्म॑सꣳशितः।
गच्छा॒मित्रा॒न्प्रवि॑श।
मैषां॒ कंच॒नोच्छि॑षः॥ २४॥
पति॑ः प्र॒जाप॑तये त॒पस्वी वा॒चा सौभ॑गाय प॒शून्मे॑ पिन्वस्व दुरम्रायुं दे॒वयाना॑नग्ने॒ऽन्तरि॑क्षे॒ऽहमु॒त्तरो भूयासं प्र॒जाप॑तिरसि स॒र्वतः॑ श्रतः प्रवि॑ष्टं दे॒वता॑भिर्वा॒ज॒जिते॑ पृ॒थि॒वी ह्व॑यतामु॒ग्निरा॒ग्नींद्रा॒द्वि॒इश्वत ससृ॒वाꣳसꣳ हु॒ते

स्योनेन॑ मे॒ सं॑ति॒ष्ठस्वे॒तः कृ॑धि दध्मस्यूहताम॒ष्टौ च॑॥ ६॥

((yo naḥ sa̱patno̱ yo raṇaḥ ।
marto'bhi̱dāsati devāḥ ।
i̱dhmasyeva pra̱kṣāyataḥ ।
mā tasyocchesi̱ kiñca̱na ।
avasṛ̱ṣṭa̱ḥ parāpata ।
śa̱ro brahmasaṃśitaḥ ।
gacchā̱mitrā̱npraviśa ।
maiṣā̱ṃ kaṃca̱nocchiṣaḥ ॥ 24 ॥
patiḥ pra̱jāpataye tapa̱svī vā̱cā saubhagāya
pa̱śūnme pinvasva duramrā̱yuṃ
devayānānagne̱'ntarikṣe̱'hamuttaro bhūyāsaṃ
pra̱jāpatirasi sa̱rvataḥ śrataḥ praviṣṭaṃ
de̱vatābhirvāja̱jitaṃ pṛthi̱vī
hvayatāma̱gnirāgniddhrādvr^iścata sasṛ̱vāṃsaṃ
hu̱te syo̱nena me̱ saṃti̱ṣṭhasve̱taḥ kṛdhi
dadhmasyūhatāma̱ṣṭau ca ॥ 6 ॥))

**[[3-7-7-1]]**

सक्षे॒दं प॑श्य।

विध॑र्तरि॒दं प॑श्य।

नाके॒दं प॑श्य।

र॒मति॑ः पनि॑ष्ठा।

ऋ॒तं वर्षि॑ष्ठम्।

अ॒मृता॒ यान्या॒हुः।

सूर्यो॒ वरि॑ष्ठो अ॒क्षभि॒र्विभा॑ति।

अनु॒ द्यावा॑पृथि॒वी दे॒वपु॑त्रे।

दीक्षाऽसि॒ तप॑सो॒ योनि॑ः।

तपो॑ऽसि॒ ब्रह्म॑णो॒ योनि॑ः॥ १॥

((sakṣe̱daṃ paśya ।
vidhartari̱daṃ paśya ।
nāke̱daṃ paśya ।
ra̱mati̱ḥ paniṣṭhā ।
ṛ̱taṃ varṣiṣṭham।
a̱mṛtā̱ yānyā̱huḥ ।
sūryo̱ variṣṭho a̱kṣabhi̱rvibhāti ।
anu̱ dyāvāpṛthi̱vī de̱vaputre ।
dīkṣā'si̱ tapaso̱ yoniḥ ।
tapo'si̱ brahmaṇo̱ yoniḥ ॥ 1 ॥))

**[[3-7-7-2]]**

ब्रह्मा॑सि क्ष॒त्रस्य॒ योनि॑ः।

क्ष॒त्रम॑स्यृ॒तस्य॒ योनि॑ः।

ऋ॒तम॑सि॒ भूरार॑भे श्र॒द्धां मन॑सा।

दी॒क्षां तप॑सा।

विश्व॑स्य॒ भुव॑न॒स्याधि॑पत्नीम्।

सर्वे॒ कामा॒ यज॑मानस्य सन्तु।

वात॑ं प्रा॒णं मन॑सा॒ऽन्वार॑भामहे।

प्र॒जाप॑तिं॒ यो भुव॑नस्य गो॒पाः।

स नो॑ मृ॒त्योस्त्रा॑यतां॒ पात्वꣳह॑सः॥ २॥

((brahmasi kṣa̱trasya̱ yoniḥ ।
kṣa̱tramasyṛ̱tasya̱ yoniḥ ।
ṛ̱tamasi̱ bhūrārabhe śra̱ddhāṃ manasā ।
dī̱kṣāṃ tapasā ।
viśvasya̱ bhuvana̱syādhipatnīm ।
sarve̱ kāmā̱ yajamānasya santu ।
vātaṃ prā̱ṇaṃ manasā̱'nvārabhāmahe ।
pra̱jāpati̱ṃ yo bhuvanasya go̱pāḥ ।
sa no mṛ̱tyostrayatā̱ṃ pātvaṃhasaḥ ॥ 2 ॥))

**[[3-7-7-3]]**

ज्योग्जी॒वा ज॒राम॑शीमहि।

इन्द्र॑ शाक्वर गाय॒त्रीं प्रप॑द्ये।

तां ते॑ युनज्मि।

इन्द्र॑ शाक्वर त्रि॒ष्टुभ॒ं प्रप॑द्ये।

तां ते॑ युनज्मि।

इन्द्र॑ शाक्वर॒ जग॑तीं॒ प्रप॑द्ये।

तां ते॑ युनज्मि।

इन्द्र॑ शाक्वरानु॒ष्टुभ॒ं प्रप॑द्ये।

तां ते॑ युनज्मि।

इन्द्र॑ शाक्वर प॒ङ्क्तिं प्रप॑द्ये॥ ३॥

((jyogjī̱vā ja̱rāmaśīmahi ।
indra śākvara gāya̱trīṃ prapadye ।
tāṃ te yunajmi ।
indra śākvara tri̱ṣṭubhaṃ̱ prapadye ।
tāṃ te yunajmi ।
indra śākvara̱ jagatī̱ṃ prapadye ।
tāṃ te yunajmi ।
indra śākvarānu̱ṣṭubhaṃ̱ prapadye ।
tāṃ te yunajmi ।
indra śākvara pa̱ṅktiṃ prapadye ॥ 3 ॥))

**[[3-7-7-4]]**

तां ते॑ युनज्मि।

आऽहं दी॒क्षाम॑रुहमृ॒तस्य॒ पत्नी॑म्।

गा॒यत्रे॒ण छन्द॑सा॒ ब्रह्म॑णा च।

ऋ॒तꣳ स॒त्येऽधायि।

स॒त्यमृ॒तेऽधायि।

ऋ॒तं च॑ मे स॒त्यं चा॑भूताम्।

ज्योति॑रभूव॒ꣳ सुव॑रगमम्।
सु॒व॒र्गं लो॒कं नाक॑स्य पृ॒ष्ठम्।
ब्र॒ध्नस्य॑ वि॒ष्टप॑मगमम्।
पृ॒थि॒वी दी॒क्षा॥ ४॥

((tāṃ te̍ yunajmi ।
ā'haṃ dī̱kṣāmā̍ruhamṛ̱tasya̱ patnī̎m ।
gā̱ya̱treṇa̱ chanda̍sā̱ brahma̍ṇā ca ।
ṛ̱tam̐ sa̱tye̍'dhāyi ।
sa̱tyamṛ̱te̍'dhāyi ।
ṛ̱taṃ ca̍ me sa̱tyaṃ ca̍bhūtām ।
jyoti̍rabhūva̱m̐ suva̍ragamam ।
su̱va̱rgaṃ lo̱kaṃ nāka̍sya pṛ̱ṣṭham ।
bra̱dhnasya̍ vi̱ṣṭapa̍magamam ।
pṛ̱thi̱vī dī̱kṣā ॥ 4 ॥))

**[[3-7-7-5]]**
त॒याऽग्निर्दी॒क्षया॑ दीक्षि॒तः।
य॒याऽग्निर्दी॒क्षया॑ दीक्षि॒तः।
तया॑ त्वा दी॒क्षया॑ दीक्षयामि।
अ॒न्तरि॑क्षं दी॒क्षा।
तया॑ वा॒युर्दी॒क्षया॑ दीक्षि॒तः।
यया॑ वा॒युर्दी॒क्षया॑ दीक्षि॒तः।
तया॑ त्वा दी॒क्षया॑ दीक्षया॑मि।
द्यौर्दी॒क्षा।
तया॑ऽऽदि॒त्यो दी॒क्षया॑ दीक्षि॒तः।
यया॑ऽऽदि॒त्यो दी॒क्षया॑ दीक्षि॒तः॥ ५॥

((tayā̱'gnirdī̱kṣaya̍ dīkṣi̱taḥ ।
yayā̱'gnirdī̱kṣaya̍ dīkṣi̱taḥ ।
taya̎ tvā dī̱kṣaya̍ dīkṣayāmi ।
a̱ntari̍kṣaṃ dī̱kṣā ।
taya̍ vā̱yurdī̱kṣaya̍ dīkṣi̱taḥ ।
yaya̍ vā̱yurdī̱kṣaya̍ dīkṣi̱taḥ ।
taya̎ tvā dī̱kṣaya̍ dīkṣayā̍mi ।
dyaurdī̱kṣā ।
taya̍''di̱tyo dī̱kṣaya̍ dīkṣi̱taḥ ।
yaya̍''di̱tyo dī̱kṣaya̍ dīkṣi̱taḥ ॥ 5 ॥))

**[[3-7-7-6]]**
तया॑ त्वा दी॒क्षया॑ दीक्षयामि।
दिशो॑ दी॒क्षा।
तया॑ च॒न्द्रमा॑ दी॒क्षया॑ दीक्षि॒तः।
यया॑ च॒न्द्रमा॑ दी॒क्षया॑ दीक्षि॒तः।
तया॑ त्वा दी॒क्षया॑ दीक्षयामि।
आपो॑ दी॒क्षा।
त॒या॒ वरु॑णो॒ राजा॑ दी॒क्षया॑ दीक्षि॒तः।
य॒या॒ वरु॑णो॒ राजा॑ दी॒क्षया॑ दीक्षि॒तः।
तया॑ त्वा दी॒क्षया॑ दीक्षयामि।
ओष॑धयो दी॒क्षा॥ ६॥

((taya̎ tvā dī̱kṣaya̍ dīkṣayāmi ।
diśo̍ dī̱kṣā ।
taya̍ ca̱ndrama̍ dī̱kṣaya̍ dīkṣi̱taḥ ।
yaya̍ ca̱ndrama̍ dī̱kṣaya̍ dīkṣi̱taḥ ।
taya̎ tvā dī̱kṣaya̍ dīkṣayāmi ।
āpo̍ dī̱kṣā ।
tayā̱ varu̍ṇo̱ rājā̍ dī̱kṣaya̍ dīkṣi̱taḥ ।
yayā̱ varu̍ṇo̱ rājā̍ dī̱kṣaya̍ dīkṣi̱taḥ ।
taya̎ tvā dī̱kṣaya̍ dīkṣayāmi ।
oṣa̍dhayo dī̱kṣā ॥ 6 ॥))

**[[3-7-7-7]]**
त॒या॒ सोमो॒ राजा॑ दी॒क्षया॑ दीक्षि॒तः।
य॒या॒ सोमो॒ राजा॑ दी॒क्षया॑ दीक्षि॒तः।
तया॑ त्वा दी॒क्षया॑ दीक्षयामि।
वाग्दी॒क्षा।
तया॑ प्रा॒णो दी॒क्षया॑ दीक्षि॒तः।
यया॑ प्रा॒णो दी॒क्षया॑ दीक्षि॒तः।
तया॑ त्वा दी॒क्षया॑ दीक्षयामि।
पृ॒थि॒वी त्वा॒ दीक्ष॑माण॒मनु॑ दीक्षताम्।
अ॒न्तरि॑क्षं त्वा॒ दीक्ष॑माण॒मनु॑ दीक्षताम्।
द्यौस्त्वा॒ दीक्ष॑माण॒मनु॑ दीक्षताम्॥ ७॥

((tayā̱ somo̱ rājā̍ dī̱kṣaya̍ dīkṣi̱taḥ ।
yayā̱ somo̱ rājā̍ dī̱kṣaya̍ dīkṣi̱taḥ ।
taya̍ tvā dī̱kṣaya̍ dīkṣayāmi ।
vāgdī̱kṣā ।
taya̎ prā̱ṇo dī̱kṣaya̍ dīkṣi̱taḥ ।
yaya̎ prā̱ṇo dī̱kṣaya̍ dīkṣi̱taḥ ।
taya̍ tvā dī̱kṣaya̍ dīkṣayāmi ।
pṛ̱thi̱vī tvā̱ dīkṣa̍māṇa̱manu̍ dīkṣatām ।
a̱ntari̍kṣaṃ tvā̱ dīkṣa̍māṇa̱manu̍ dīkṣatām ।
dyaustvā̱ dīkṣa̍māṇa̱manu̍ dīkṣatām ॥ 7 ॥))

**[[3-7-7-8]]**
दिश॑स्त्वा॒ दीक्ष॑माण॒मनु॑ दीक्षन्ताम्।
आप॑स्त्वा॒ दीक्ष॑माण॒मनु॑ दीक्षन्ताम्।
ओष॑धयस्त्वा॒ दीक्ष॑माण॒मनु॑ दीक्षन्ताम्।
वाक्त्वा॒ दीक्ष॑माण॒मनु॑ दीक्षताम्।

ऋचस्त्वा दीक्षमाणमनु दीक्षन्ताम्।
सामानि त्वा दीक्षमाणमनु दीक्षन्ताम्।
यजूꣳषि त्वा दीक्षमाणमनु दीक्षन्ताम्।
अहश्च रात्रिश्च।
कृषिश्च वृष्टिश्च।
त्विषिश्चापचितिश्च॥ ८॥

((diśastvā dīkṣamāṇamanu dīkṣantām ।
āpastvā dīkṣamāṇamanu dīkṣantām ।
oṣadhayastvā dīkṣamāṇamanu dīkṣantām ।
vāktvā dīkṣamāṇamanu dīkṣatām ।
ṛcastvā dīkṣamāṇamanu dīkṣantām ।
sāmāni tvā dīkṣamāṇamanu dīkṣantām ।
yajūꣳṣi tvā dīkṣamāṇamanu dīkṣantām ।
ahaśca rātriśca ।
kṛṣiśca vṛṣṭiśca ।
tviṣiścāpacitiśca ॥ 8 ॥))

**[[3-7-7-9]]**

आपश्चौषधयश्च।
ऊर्क्च सूनृता च।
तास्त्वा दीक्षमाणमनु दीक्षन्ताम्।
स्वे दक्षे दक्षपितेह सीद।
देवानाꣳ सुम्नो महते रणाय।
स्वासस्थस्तनुवा संविशस्व।
पितेवैधि सूनव आसुशेवः।
शिवो मा शिवमाविश।
सत्यं म आत्मा।
श्रद्धा मे क्षितिः॥ ९॥

((āpaścauṣadhayaśca ।
ūrkca sūnṛtā ca ।
tāstvā dīkṣamāṇamanu dīkṣantām ।
sve dakṣe dakṣapiteha sīda ।
devānāꣳ sumno mahate raṇāya ।
svāsasthastanuvā saṃviśasva ।
pitevaidhi sūnava āsuśevaḥ ।
śivo mā śivamāviśa ।
satyaṃ ma ātmā ।
śraddhā me kṣitiḥ ॥ 9 ॥))

**[[3-7-7-10]]**

तपो मे प्रतिष्ठा।
सवितृप्रसूता मा दिशो दीक्षयन्तु।
सत्यमस्मि।
अहं त्वदस्मि मदसि त्वमेतत्।
ममासि योनिस्तव योनिरस्मि।
ममैव सन्वह हव्यान्यग्ने।
पुत्रः पित्रे लोककृज्जातवेदः।
आजुह्वानः सुप्रतीकः पुरस्तात्।
अग्ने स्वां योनिमासीद साध्या।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन्॥ १०॥

((tapo me pratiṣṭhā ।
savitṛprasūtā mā diśo dīkṣayantu ।
satyamasmi ।
ahaṃ tvadasmi madasi tvametat ।
mamāsi yonistava yonirasmi ।
mamaiva sanvaha havyānyagne ।
putraḥ pitre lokakṛjjātavedaḥ ।
ājuhvānaḥ supratīkaḥ purastāt ।
agne svāṃ yonimāsīda sādhyā ।
asmintsadhasthe adhyuttarasmin ॥ 10 ॥))

**[[3-7-7-11]]**

विश्वे देवा यजमानश्च सीदत।
एकमिषे विष्णुस्त्वाऽन्वेतु।
द्वे ऊर्जे विष्णुस्त्वाऽन्वेतु।
त्रीणि व्रताय विष्णुस्त्वाऽन्वेतु।
चत्वारि मायो भवाय विष्णुस्त्वाऽन्वेतु।
पञ्च पशुभ्यो विष्णुस्त्वाऽन्वेतु।
षड्रायस्पोषाय विष्णुस्त्वाऽन्वेतु।
सप्त सप्तभ्यो होत्राभ्यो विष्णुस्त्वाऽन्वेतु।
सखायः सप्तपदा अभूम।
सख्यं ते गमेयम्॥ ११॥

((viśve devā yajamānaśca sīdata ।
ekamiṣe viṣṇustvā'nvetu ।
dve ūrje viṣṇustvā'nvetu ।
trīṇi vratāya viṣṇustvā'nvetu ।
catvāri māyo bhavāya viṣṇustvā'nvetu ।
pañca paśubhyo viṣṇustvā'nvetu ।
ṣaḍrāyaspoṣāya viṣṇustvā'nvetu ।
sapta saptabhyo hotrābhyo viṣṇustvā'nvetu ।
sakhāyaḥ saptapadā abhūma ।
sakhyaṃ te gameyam ॥ 11 ॥))

**[[3-7-7-12]]**

सख्यात्ते मा योषम्।
सख्यान्मे मा योष्ठाः।

साऽसि॑ सुब्रह्मण्ये।
तस्या᳚स्ते पृथि॒वी पाद॑ः।
साऽसि॑ सुब्रह्मण्ये।
तस्या᳚स्ते॒ऽन्तरि॑क्षं॒ पाद॑ः।
साऽसि॑ सुब्रह्मण्ये।
तस्या᳚स्ते॒ द्यौः पाद॑ः।
साऽसि॑ सुब्रह्मण्ये।
तस्या᳚स्ते॒ दि॒शः॒ पाद॑ः॥ १२॥

((sa̱khyātte̱ mā yo̍ṣam ǀ
sa̱khyānme̱ mā yo̎ṣṭhāḥ ǀ
sā'si̍ subrahmaṇye ǀ
tasyā̎ste pṛthi̱vī pāda̍ḥ ǀ
sā'si̍ subrahmaṇye ǀ
tasyā̎ste̱'ntari̍kṣa̱ṃ pāda̍ḥ ǀ
sā'si̍ subrahmaṇye ǀ
tasyā̎ste̱ dyauḥ pāda̍ḥ ǀ
sā'si̍ subrahmaṇye ǀ
tasyā̎ste̱ diśa̱ḥ pāda̍ḥ ǁ 12 ǁ))

**[[3-7-7-13]]**

प॒रोर॑जास्ते पञ्च॒मः पाद॑ः।
सा न॒ इषमूर्ज॑ं धुक्ष्व।
तेज॑ इन्द्रि॒यम्।
ब्र॒ह्म॒व॒र्च॒सम॒न्नाद्य᳚म्।
विमि॑मे त्वा॒ पय॑स्वतीम्।
दे॒वाना᳚ं धे॒नुꣳ सु॒दुघा॒मन॑पस्फुरन्तीम्।
इन्द्र॒ः सोम॑ं पिबतु।
क्षेमो॑ अस्तु नः।
इ॒मां नर॑ाः कृणु॒त वेदि॒मेत्य॑।
वसु॑मतीꣳ रु॒द्रव॑तीमादि॒त्यव॑तीम्॥ १३॥

((pa̱rorā̍jāste pañca̱maḥ pāda̍ḥ ǀ
sā na̱ iṣamūrja̍ṃ dhukṣva ǀ
teja̍ indri̱yam ǀ
bra̱hma̱va̱rca̱sama̱nnādyā̎m ǀ
vimi̍me tvā̱ payā̍svatīm ǀ
de̱vānā̎ṃ dhe̱nuꣳ su̱dughā̱manā̍pasphurantīm ǀ
indra̱ḥ soma̍ṃ pibatu ǀ
kṣemo̍ astu naḥ ǀ
i̱māṃ narā̍ḥ kṛṇu̱ta̱ vedi̱metya̍ ǀ
vasu̍matīꣳ ru̱dravā̍tīmādi̱tyavā̍tīm ǁ 13 ǁ))

**[[3-7-7-14]]**

व॒र्ष्म᳚न्दि॒वः।
नाभा᳚ पृथि॒व्याः।
य॒थाऽयं यज॑माना॒ो न रिष्ये᳚त्।
दे॒वस्य॑ सवि॒तुः स॒वे।
चतु॑ःशिखण्डा यु॒व॒तिः सु॒पेशा᳚ः।
घृ॒तप्र॑तीका॒ भुव॑नस्य॒ मध्ये᳚।
तस्या᳚ꣳ सुप॒र्णाव॑धि॒ यौ निवि॑ष्टौ।
तयो᳚र्दे॒वाना॒मधि॑ भाग॒धेय᳚म्।
अप॒ जन्य॑ं भ॒यं नुद॑।
अप च॒क्राणि॑ वर्तय।
गृ॒हꣳ सोम॑स्य गच्छतम्।
न वा उ॑वेत॒न्म्रिय॑से॒ न रि॑ष्यसि।
दे॒वाꣳ इदे॑षि प॒थिभि॑ः सु॒गेभि॑ः।
यत्र॒ यन्ति॑ सु॒कृतो॒ नापि॑ दु॒ष्कृत॑ः।
तत्र॑ त्वा दे॒वः स॑वि॒ता द॑धातु॥ १४॥
ब्रह्म॑णो॒ योनि॒रꣳह॑सः प॒ङ्क्तिं प्रप॑द्ये दीक्षा यया॑ऽऽदि॒त्यो
दी॒क्षया॑ दीक्षि॒तस्तया᳚ त्वा दी॒क्षया॑ दीक्षया॒म्योष॑धयो दी॒क्ष
द्यस्त्वा॒ दीक्ष॑माण॒मनु॑
दीक्षता॒मप॑चिति॒श्चाक्षि॑ति॒रुत्तरस्मिन्गमेय॒ं दि॒शः पाद॑
आदि॒त्यव॑तीं वर्तय॒ पञ्च॑ च॥ ७॥

((varṣmā̍ndi̱vaḥ ǀ
nābhā̎ pṛthi̱vyāḥ ǀ
yathā̱'yaṃ yajā̍māno̱ na riṣye̎t ǀ
de̱vasya̍ savi̱tuḥ sa̱ve ǀ
catu̍ḥśikhaṇḍā yuva̱tiḥ su̱peśā̎ḥ ǀ
ghṛ̱taprā̍tīkā̱ bhuvā̍nasya̱ madhye̎ ǀ
tasyā̎ṃ supa̱rṇāvadhi̱ yau nivi̍ṣṭau ǀ
tayo̎rde̱vānā̱madhi̍ bhāga̱dheyā̎m ǀ
apa̱ janya̍ṃ bha̱yaṃ nu̍da ǀ
apa ca̱krāṇi̍ vartaya ǀ
gṛ̱haṃ̎ somā̍sya gacchatamǀ
na vā u̍veta̱nmri̍yase̱ na ri̍ṣyasi ǀ
de̱vāṃ̎ ide̍ṣi pa̱thibhi̍ḥ su̱gebhi̍ḥ ǀ
yatra̱ yanti̍ su̱kṛto̱ nāpi̍ du̱ṣkṛta̍ḥ ǀ
tatra̍ tvā de̱vaḥ sa̍vi̱tā da̍dhātu ǁ 14 ǁ
brahma̍ṇo̱ yoniraṃ̎hasaḥ pa̱ṅktiṃ prapa̍dye dīkṣā
yayā̎''di̱tyo dī̱kṣayā̎ dīkṣi̱tastayā̎ tvā dī̱kṣayā̍
dīkṣayā̱myoṣā̍dhayo dī̱kṣa dyastvā̱ dīkṣā̍māṇa̱manu̍
dīkṣatā̱mapā̍citi̱ścākṣi̍ti̱ruttarasmingameya̱ṃ diśa̱ḥ
pādā̍ ādi̱tyavā̍tī̱ṃ vartaya̱ pañca̍ ca ǁ 7 ǁ))

**[[3-7-8-1]]**

यद॒स्य पा॒रे रज॑सः।
शु॒क्रं ज्योति॒रजा॑यत।

तन्न॑ः पर्ष॒दति॒ द्विष॑ः।
अग्ने॑ वैश्वानर॒ स्वाहा᳚।
यस्मा᳚द्भी॒षाऽवा॑शिष्ठाः।
ततो॑ नो॒ अभ॑यं कृधि।
प्र॒जाभ्य॒ः सर्वा᳚भ्यो मृड।
नमो॑ रु॒द्राय॑ मी॒ढुषे᳚।
यस्मा᳚द्भी॒षा न्यष॑दः।
ततो॑ नो॒ अभ॑यं कृधि॥ १॥

((yada̱sya pā̱re rajásaḥ |
śu̱kraṃ jyoti̱rajáyata |
tannáḥ parṣ̱adati̱ dviṣáḥ |
agné vaiśvānara̱ svāhā̎ |
yasmā̎dbhī̱ṣā'vá̄śiṣṭhāḥ |
tató no̱ abháyaṃ kṛdhi |
pra̱jābhya̱ḥ sarvā̎bhyo mṛ̱ḍa |
namó ru̱drāyá mī̱ḍhuṣe̎ |
yasmā̎dbhī̱ṣā nyaṣ́adaḥ |
tató no̱ abháyaṃ kṛdhi || 1 ||))

**[[3-7-8-2]]**
प्र॒जाभ्य॒ः सर्वा᳚भ्यो मृड।
नमो॑ रु॒द्राय॑ मी॒ढुषे᳚।
उदु॑स्र तिष्ठ प्रति॑तिष्ठ मा रि॑षः।
मेमं य॒ज्ञं यज॑मानं च रीरिषः।
सु॒व॒र्गे लो॒के यज॑मान॒ꣳ हि धे॒हि।
शं न॑ एधि द्वि॒पदे॒ शं चतु॑ष्पदे।
यस्मा᳚द्भी॒षाऽवे॑पिष्ठाः प॒लायि॑ष्ठाः स॒मज्ञा᳚स्थाः।
ततो॑ नो॒ अभ॑यं कृधि।
प्र॒जाभ्य॒ः सर्वा᳚भ्यो मृड।
नमो॑ रु॒द्राय॑ मी॒ढुषे᳚॥ २॥

((pra̱jābhya̱ḥ sarvā̎bhyo mṛ̱ḍa |
namó ru̱drāyá mī̱ḍhuṣe̎ |
udúsra tiṣṭ̱ha pratítiṣṭ̱ha mā ríṣaḥ |
memaṃ ya̱jñaṃ yajámānaṃ ca rīriṣaḥ |
su̱va̱rge lo̱ke yajámāna̱ṃ̎ hi dhe̱hi |
śaṃ ná edhi dvi̱pade̱ śaṃ catúṣpade |
yasmā̎dbhī̱ṣā'vépiṣṭhāḥ pa̱lāyíṣṭhāḥ sa̱majñā̎sthāḥ |
tató no̱ abháyaṃ kṛdhi |
pra̱jābhya̱ḥ sarvā̎bhyo mṛ̱ḍa |
namó ru̱drāyá mī̱ḍhuṣe̎ || 2 ||))

**[[3-7-8-3]]**
य इ॒दम॑कः।
तस्मै॒ नम॑ः।
तस्मै॒ स्वाहा᳚।
न वा उ॑ वे॒तन्म्रि॑यसे।
आशा॑नां त्वा॒ विश्वा॒ आशा᳚ः।
य॒ज्ञस्य॒ हि स्थ ऋ॒त्वियौ᳚।
इन्द्रा᳚ग्नी॒ चेत॑नस्य च।
हु॒ता॒हु॒तस्य॑ तृप्यतम्।
अहु॑तस्य हु॒तस्य॑ च।
हु॒तस्य॒ चाहु॑तस्य च।
अहु॑तस्य हु॒तस्य॑ च।
इन्द्रा᳚ग्नी अ॒स्य सोम॑स्य।
वी॒तं पि॑बतं जु॒षेथा᳚म्।
मा यज॑मान॒ं तमो॑ विदत्।
म॒र्त्विजो॒ मो इ॒माः प्र॒जाः।
मा यः सोम॑मि॒मं पिबा᳚त्।
सꣳसृ॒ष्टमु॒भय॑ं कृ॒तम्॥ ३॥
कृ॒धि॒ मी॒ढुषेऽहुतस्य च स॒प्त च॑॥ ८॥

((ya i̱damakáḥ |
tasmai̱ namáḥ |
tasmai̱ svāhā̎ |
na vā ú ve̱tanmríyase, |
āśánāṃ tvā̱ viśvā̱ āśā̎ḥ |
yajñasya̱ hi stha ṛ̱tviyau̎ |
indrā̎gnī̱ cetánasya ca |
hu̱tāhu̱tasyá tṛpyatam |
ahútasya hu̱tasyá ca |
hu̱tasya̱ cāhútasya ca |
ahútasya hu̱tasyá ca |
indrā̎gnī a̱sya somásya |
vī̱taṃ píbataṃ ju̱ṣethā̎m |
mā yajámānaṃ̱ tamó vidat |
martvijo̱ mo i̱māḥ pra̱jāḥ |
mā yaḥ somámi̱maṃ pibā̎t |
saṃ̎sṛ̱ṣṭamu̱bhayáṃ kṛ̱tam || 3 ||
kṛ̱dhi̱ mī̱ḍhuṣe'hutasya ca sa̱pta cá || 8 ||))

**[[3-7-9-1]]**
अ॒ना॒गस॑स्त्वा व॒यम्।
इन्द्रे॑ण प्रेषि॑ता॒ उप॑।
वा॒युष्टे॑ अस्त्वꣳश॒म्भूः।
मि॒त्रस्ते॑ अस्त्वꣳश॒म्भूः।
वरु॑णस्ते अस्त्वꣳश॒म्भूः।

अ॒पाँ क्षया॒ ऋ॒तस्य॒ गर्भाः॑।
भुव॑नस्य गो॒पाः श्ये॒ना अति॑थयः।
पर्व॑तानां क॒कुभः॒ प्रयु॒तो न॑पातारः।
व॒ग्नुनेन्द्रꣳ॑ ह्वयत।
घो॒षेणामी॑वाꣳश्चातयत॥ १॥

((a̱nā̱gasa̍stvā va̱yam ।
indre̍ṇa̱ preṣi̍tā̱ upa̍ ।
vā̱yuṣṭe̍ astvam̐śa̱bhūḥ ।
mi̱traste̍ astvam̐śa̱bhūḥ ।
varu̍ṇaste astvam̐śa̱bhūḥ ।
a̱pām̐ kṣayā̱ ṛ̱ta̍sya garbhāḥ ।
bhuva̍nasya go̱pāḥ śye̱nā̍ atithayaḥ ।
parva̍tānām kakubhaḥ pra̱yuto̍ napātāraḥ ।
va̱gnunendram̐̍ hvayata ।
ghoṣe̱ṇāmi̍vām̐ścātayata ॥ 1 ॥))

**[[3-7-9-2]]**

यु॒क्ताः स्थ॒ वह॑त।
दे॒वा ग्रावा॑ण॒ इन्दु॒रिन्द्र॒ इत्यवा॑दिषुः।
ऐन्द्र॑मचुच्यवुः प॒रमस्याः॑ प॒राव॑तः।
आऽस्मात्स॒धस्था॑त्।
ओरोर॒न्तरि॑क्षात्।
आ सु॒भूत॑मसुषवुः।
ब्र॒ह्म॒व॒र्च॒सं म॒ आसु॑षवुः।
स॒म॒रे रक्षा॒ꣳस्यवधिषुः।
अप॑हतं ब्रह्म॒ज्यस्य॑।
वाक्च॑ त्वा॒ मन॑श्च श्रिणीताम्॥ २॥

((yu̱ktāḥ stha̱ vaha̍ta ।
de̱vā grāva̍ṇa̱ indu̱rindra̱ itya̍vādiṣuḥ ।
aindra̍macucyavuḥ para̱masyā̍ḥ parā̱vata̍ḥ ।
ā'smātsa̱dhasthā̍t ।
orora̱ntari̍kṣāt ।
ā su̍bhū̱tama̍suṣavuḥ ।
bra̱hma̱va̱rca̱sam ma̱ āsu̍ṣavuḥ ।
sa̱ma̱re rakṣām̐̍syavadhiṣuḥ ।
apa̍hatam brahma̱jyasya̍ ।
vākca̍ tvā̱ mana̍śca śriṇītām ॥ 2 ॥))

**[[3-7-9-3]]**

प्रा॒णश्च॑ त्वाऽपा॒नश्च॑ श्रीणीताम्।
चक्षु॑श्च त्वा॒ श्रोत्रं॑ च श्रीणीताम्।
दक्ष॑श्च त्वा॒ बलं॑ च श्रीणीताम्।
ओज॑श्च त्वा॒ सह॑श्च श्रीणीताम्।
आयु॑श्च त्वा ज॒रा च॑ श्रीणीताम्।
आ॒त्मा च॑ त्वा त॒नूश्च॑ श्रीणीताम्।
शृ॒तो॑ऽसि शृ॒तं कृ॑तः।
शृ॒ताय॑ त्वा शृ॒तेभ्य॑स्त्वा।
यमिन्द्र॑मा॒हुर्वरु॑णं यमा॒हुः।
यं मि॒त्रमा॒हुर्यमु॑ स॒त्यमा॒हुः॥ ३॥

((prā̱ṇaśca̍ tvā'pā̱naśca̍ śrīṇītām ।
cakṣu̍śca tvā̱ śrotram̍ ca śrīṇītām ।
dakṣa̍śca tvā̱ balam̍ ca śrīṇītām ।
oja̍śca tvā saha̍śca śrīṇītām ।
āyu̍śca tvā ja̱rā ca̍ śrīṇītām ।
ā̱tmā ca̍ tvā ta̱nūśca̍ śrīṇītām ।
śṛ̱to̍'si śṛ̱tam kṛ̍taḥ ।
śṛ̱tāya̍ tvā śṛ̱tebhya̍stvā ।
yamindra̍mā̱hurvaru̍ṇam yamā̱huḥ ।
yam mi̱tramā̱huryamu̍ sa̱tyamā̱huḥ ॥ 3 ॥))

**[[3-7-9-4]]**

यो दे॒वानाँ॑ दे॒वत॑मस्तपो॒जाः।
तस्मै॑ त्वा॒ तेभ्य॑स्त्वा।
मयि॒ त्यदि॑न्द्रि॒यं म॒हत्।
मयि॒ दक्षो॒ मयि॒ क्रतुः॑।
मयि॑ धायि सु॒वीर्यँ॑म्।
त्रिशु॑ग्घ॒र्मो विभा॑तु मे।
आकू॑त्या॒ मन॑सा स॒ह।
वि॒राजा॒ ज्योति॑षा स॒ह।
य॒ज्ञेन॒ पय॑सा स॒ह।
तस्य॒ दोह॑मशीमहि॥ ४॥

((yo de̱vānām̐̍ de̱vata̍mastapo̱jāḥ ।
tasmai̍ tvā̱ tebhya̍stvā ।
mayi̱ tyadi̍ndri̱yam ma̱hat ।
mayi̱ dakṣo̱ mayi̱ kratu̍ḥ ।
mayi̍ dhāyi su̱vīryam̐̍ ।
triśu̍ggha̱rmo vibhā̍tu me ।
ākū̍tyā̱ mana̍sā sa̱ha ।
vi̱rājā̱ jyoti̍ṣā sa̱ha ।
ya̱jñena̱ paya̍sā sa̱ha ।
tasya̱ doha̍maśīmahi ॥ 4 ॥))

**[[3-7-9-5]]**

तस्य॑ सु॒म्नम॑शीमहि।
तस्य॑ भ॒क्षम॑शीमहि।
वाग्जु॑षा॒णा सोम॑स्य तृप्यतु।

मि॒त्रो जना॒न्प्रसमि॑त्र।
यस्मा॒न्न जा॒तः परो॑ अ॒न्यो अस्ति॑।
य आ॑वि॒वेश॒ भुव॑नानि॒ विश्वा᳚।
प्र॒जाप॑तिः प्र॒जया॑ संविदा॒नः।
त्रीणि॒ ज्योतीꣳषि सचते॒ स षो॑ड॒शी।
ए॒ष ब्र॒ह्मा य ऋ॒त्विय॑ः।
इन्द्रो॒ नाम॑ श्रु॒तो ग॒णे॥ ५॥

((tasya̍ su̱mnamā̍śīmahi |
tasya̍ bha̱kṣamā̍śīmahi |
vāgju̍ṣā̱ṇā somā̍sya tṛpyatu |
mi̱tro janā̱nprasami̍tra |
yasmā̱nna jā̱taḥ paro̍ a̱nyo asti̍ |
ya ā̍vi̱veśa̱ bhuva̍nāni̱ viśvā᳚ |
pra̱jāpa̍tiḥ pra̱jaya̍ saṃvidā̱naḥ |
trīṇi̱ jyotīm̐ṣi sacate̱ sa ṣo̍ḍa̱śī |
e̱ṣa bra̱hmā ya ṛ̱tviya̍ḥ |
indro̱ nāma̍ śru̱to ga̱ṇe || 5 ||))

**[[3-7-9-6]]**

प्र ते॑ म॒हे वि॒दथे॑ शꣳसिष॒ꣳ हरी᳚।
य ऋ॒त्विय॒ः प्र ते॑ वन्वे।
व॒नुषो॑ हर्य॒तं मद᳚म्।
इन्द्रो॒ नाम॑ घृ॒तं न यः।
हरि॑भि॒श्चारु॒ सेच॑ते।
श्रु॒तो ग॒ण आ त्वा॑ विशन्तु।
हरि॑वर्पसं॒ गिर॑ः।
इन्द्राधि॑पते॒ऽधि॑पति॒स्त्वं दे॒वाना॑मसि।
अधि॑पतिं॒ माम्।
आयु॑ष्मन्तं॒ वर्च॑स्वन्तं मनु॒ष्ये॑षु कुरु॥ ६॥

((pra te̍ ma̱he vi̱dathe̍ śam̐siṣa̱m̐ harī᳚ |
ya ṛ̱tviya̱ḥ pra te̍ vanve |
va̱nuṣo̍ harya̱taṃ madā᳚m |
indro̱ nāma̍ ghṛ̱taṃ na yaḥ |
hari̍bhi̱ścāru̱ seca̍te |
śru̱to ga̱ṇa ā tvā̍ viśantu |
hari̍varpasa̱ṃ gira̍ḥ |
indrādhi̍pa̱te'dhi̍pati̱stvaṃ de̱vānā̍masi |
adhi̍pati̱ṃ mām |
āyu̍ṣmanta̱ṃ varca̍svantaṃ manu̱ṣye̍ṣu kuru || 6 ||))

**[[3-7-9-7]]**

इन्द्र॑श्च स॒म्राड्वरु॑णश्च॒ राजा᳚।
तौ ते॑ भ॒क्षं चक्र॑तु॒रग्र॑ ए॒तम्।
तयो॒रनु॑ भ॒क्षं भ॑क्षयामि।
वाग्जु॑षा॒णा सोम॑स्य तृप्यतु।
प्र॒जाप॑ति॒र्वि॒श्वक॑र्मा।
तस्य॒ मनो॑ दे॒वं य॒ज्ञेन॑ राध्यासम्।
अ॒र्थे॒ गा अ॒स्य जहि॑तः।
अ॒व॒साना॑पते॒ऽव॒साना॑ं मे विन्द।
नमो॑ रु॒द्राय॑ वास्तो॒ष्पत॑ये।
आय॑ने वि॒द्रव॑णे॥ ७॥

((indra̍śca sa̱mrā̱ḍvaru̍ṇaśca̱ rājā᳚ |
tau te̍ bha̱kṣaṃ ca̍kratu̱ragra̍ e̱tam |
tayo̱ranu̍ bha̱kṣaṃ bha̍kṣayāmi |
vāgju̍ṣā̱ṇā somā̍sya tṛpyatu |
pra̱jāpa̍tirvi̱śvaka̍rmā |
tasya̱ mano̍ de̱vaṃ ya̱jñena̍ rādhyāsam |
a̱rthe̱ gā a̱sya ja̍hitaḥ |
a̱va̱sāna̍pate'va̱sāna̍ṃ me vinda |
namo̍ ru̱drāya̍ vāsto̱ṣpata̍ye |
āya̍ne vi̱drava̍ṇe || 7 ||))

**[[3-7-9-8]]**

उ॒द्याने॒ यत्प॒राय॑णे।
आ॒वर्त॑ने वि॒वर्त॑ने।
यो गो॑पा॒यति॒ तꣳ हु॑वे।
यान्य॑पा॒मित्या॒न्यप्र॑तीत्ता॒न्यस्मि॑।
य॒मस्य॑ ब॒लिना॒ चरा॑मि।
इ॒हैव सन्त॒ः प्रति॒ तद्या॑तयामः।
जी॒वा जी॒वेभ्यो॒ निह॑राम एनत्।
अ॒नृ॒णा अ॒स्मिन्न॑नृ॒णाः पर॑स्मिन्।
तृ॒तीये॑ लो॒के अ॑नृ॒णाः स्या॑म।
ये दे॑व॒याना॑ उ॒त पि॒तृ॒याणा᳚ः॥ ८॥

((u̱dyāne̱ yatpa̱rāya̍ṇe |
ā̱varta̍ne vi̱varta̍ne |
yo go̍pā̱yati̱ tam̐ hu̍ve |
yānya̍pā̱mityā̱nyapra̍tīttā̱nyasmi̍ |
ya̱masya̍ ba̱linā̱ carā̍mi |
i̱haiva santa̱ḥ prati̱ tadyā̍tayāmaḥ |
jī̱vā jī̱vebhyo̱ nihā̍rāma enat |
a̱nṛ̱ṇā a̱sminna̍nṛ̱ṇāḥ parā̍smin |
tṛ̱tīye̍ lo̱ke a̍nṛ̱ṇāḥ syā̍ma |
ye de̍va̱yānā̍ u̱ta pi̱tṛ̱yāṇā᳚ḥ || 8 ||))

**[[3-7-9-9]]**

सर्वा॑न्प॒थो अ॑नृ॒णा आक्षी॑येम।

इ॒दमू॑नुः श्रेयो॑ऽव॒सान॒माग॑न्म।
शि॒वे नो॒ द्यावा॑पृथि॒वी उ॒भे इ॒मे।
गो॒मद्धन॑व॒दश्व॑व॒दूर्ज॑स्वत्।
सु॒वीरा॑ वी॒रैर॑नु॒ संच॑रेम।
अ॒र्कः प॒वित्र॒ꣳ॒ रज॑सो वि॒मानः॑।
पु॒नाति॑ दे॒वानां॒ भुव॑नानि॒ विश्वा᳚।
द्यावा॑पृथि॒वी पय॑सा संवि॑दा॒ने।
घृ॒तं दु॑हाते अ॒मृतं॒ प्रपी॑ने।
प॒वित्र॑म॒र्को रज॑सो वि॒मानः॑।
पु॒नाति॑ दे॒वानां॒ भुव॑नानि॒ विश्वा᳚।
सु॒वर्ज्योति॒र्यशो॑ म॒हत्।
अ॒शी॒महि॑ गा॒धमु॒त प्र॑ति॒ष्ठाम्॥ ९॥
चा॒त॒य॒त श्री॒णी॒ताꣳ॒स॒त्यमा॒हु॒र॑शीमहि ग॒णे कु॑रु वि॒द्रव॑णे
पि॒तृ॒याणा॑ अ॒र्को रज॑सो वि॒माना॒स्त्रीणि॑ च॥ ९॥

((sarvā̐npatho anṛṇā ākṣiyema |
idamūnuḥ śreyo'vasānamāganma |
śive no dyāvāpṛthivī ubhe ime |
gomaddhanavadaśvavadūrjasvat |
suvīrā vīrairanu saṃcarema |
arkaḥ pavitraṃ̐ rajaso vimānaḥ |
punāti devānāṃ bhuvanāni viśvā̐ |
dyāvāpṛthivī payasā saṃvidāne |
ghṛtaṃ duhāte amṛtaṃ prapīne |
pavitramarko rajaso vimānaḥ |
punāti devānāṃ bhuvanāni viśvā̐ |
suvarjyotiryaśo mahat |
aśīmahi gādhamuta pratiṣṭhām || 9 ||
cātayata śrīṇītāṃ̐satyamāhuraśīmahi gaṇe kuru
vidravaṇe pitṛyāṇā arko rajaso vimānāstrīṇi ca || 9 ||))

**[[3-7-10-1]]**

उ॒दस्ता॑प्सीत्सवि॒ता मि॒त्रो अ॑र्य॒मा।
सर्वा॑न॒मित्रा॑नवधीद्यु॒गेन॑।
बृ॒हन्तं॒ माम॑करद्वी॒रव॑न्तम्।
र॒थ॒न्त॒रे श्र॑यस्व॒ स्वाहा॑ पृथि॒व्याम्।
वा॒म॒दे॒व्ये श्र॑यस्व॒ स्वाहा॒ऽन्तरि॑क्षे।
बृ॒ह॒ति श्र॑यस्व॒ स्वाहा॑ दि॒वि।
बृ॒ह॒ता त्वोप॑स्तभ्नोमि।
आ त्वा॑ द॒दे॒ यश॑से वी॒र्या॑य च।
अ॒स्मास्व॑घ्नि॒या यू॒यं द॑धाथेन्द्रि॒यं पयः॑।
यस्ते᳚ द्र॒प्सो यस्त॑ उद॒र्षः॥ १॥

((udastāṃpsītsavitā mitro aryamā |
sarvānamitrānavadhīdyugena |
bṛhantaṃ māmakaradvīravantam |
rathantare śrayasva svāhā pṛthivyām |
vāmadevye śrayasva svāhā'ntarikṣe |
bṛhati śrayasva svāhā divi |
bṛhatā tvopastabhnomi |
ā tvā dade yaśase vīryāya ca |
asmāsvaghniyā yūyaṃ dadhāthendriyaṃ payaḥ |
yastē drapso yasta udarṣaḥ || 1 ||))

**[[3-7-10-2]]**

दै॒व्यः के॒तुर्विश्वं॒ भुव॑नमावि॒वेश॑।
स नः॑ पा॒ह्यरि॑ष्ट्यै॒ स्वाहा᳚।
अनु॑ मा॒ सर्वो॑ य॒ज्ञो॑ऽयमे॑तु।
विश्वे॑ दे॒वा म॒रुतः॑ सामा॒र्कः।
आ॒प्रि॒यश्छन्दा॒ꣳ॑सि नि॒विदो॒ यजू॒ꣳ॑षि।
अ॒स्यै पृ॑थि॒व्यै यद्य॒ज्ञिय॑म्।
प्र॒जाप॑तेर्व॒र्त॒निमनु॑वर्तस्व।
अनु॑ वी॒रैर॑नु॒राध्या॑म॒ गोभिः॑।
अन्वश्वै॑रनु॒ सर्वै॑रु पु॒ष्टैः।
अनु॑ प्र॒जया॑ऽन्वि॒न्द्रि॒येण॑॥ २॥

((daivyaḥ keturviśvaṃ bhuvanamāviveśa |
sa naḥ pāhyariṣṭyai svāhā̐ |
anu mā sarvo yajño'yametu |
viśve devā marutaḥ sāmārkaḥ |
āpriyaśchandāṃ̐si nivido yajūṃ̐ṣi |
asyai pṛthivyai yadyajñiyam |
prajāpatervartanimanuvartasva |
anu vīrairanurādhyāma gobhiḥ |
anvaśvairanu sarvairu puṣṭaiḥ |
anu prajayā'nvindriyeṇa || 2 ||))

**[[3-7-10-3]]**

दे॒वा नो॑ य॒ज्ञमृ॑जु॒धा न॑यन्तु।
प्रति॑ क्ष॒त्त्रे प्रति॑ तिष्ठामि रा॒ष्ट्रे।
प्रत्यश्वे॑षु प्रति॑तिष्ठामि॒ गोषु॑।
प्रति प्र॒जायां॒ प्रति॑तिष्ठामि॒ भव्ये᳚।
विश्व॑म॒न्याऽभि॑वावृ॒धे।
तद॒न्यस्या॑मधि॑श्रि॒तम्।
दि॒वे च॑ वि॒श्वक॑र्मणे।
पृ॒थि॒व्यै चा॑करं॒ नमः॑।
अस्का॒न्द्यौः पृ॑थि॒वीम्।

अ॒स्का॑न्नृष॒भो यु॒वा गाः॥ ३॥

((de̱vā no̍ ya̱jñamṛ̍ju̱dhā na̍yantu ।
prati̍ kṣa̱ttre prati̍ tiṣṭhāmi rā̱ṣṭre ।
pratyaśve̍ṣu̱ prati̍tiṣṭhāmi̱ goṣu̍ ।
prati pra̱jāyā̍m̱ prati̍tiṣṭhāmi̱ bhavye̎ ।
viśva̍ma̱nyā'bhi̍vāvṛ̱dhe ।
tada̱nyasyā̱madhi̍śri̱tam ।
di̱ve ca̍ vi̱śvaka̍rmaṇe ।
pṛ̱thi̱vyai ca̍karam̱ namaḥ ।
askā̱ndyauḥ pṛ̍thi̱vīm ।
aska̍nṛ̱ṣa̱bho yuvā̱ gāḥ ॥ 3 ॥))

**[[3-7-10-4]]**

स्क॒न्नेमा विश्वा॒ भुव॑ना।
स्क॒न्नो य॒ज्ञः प्रज॑नयतु।
अस्का॒नजा॑नि॒ प्राज॑नि।
आस्क॒न्नाज्जा॑यते॒ वृषा᳚।
स्क॒न्नात्प्रजा॑निषीमहि।
ये दे॒वा येषा॑मि॒दं भा॑ग॒धेयं॑ ब॒भूव॑।
येषा᳚ं प्रया॒जा उ॒तानू॑या॒जाः।
इन्द्र॑ज्येष्ठेभ्यो॒ वरु॑णराजभ्यः।
अ॒ग्निहो॑तृभ्यो दे॒वेभ्यः॒ स्वाहा᳚।
उ॒त त्या नो॒ दिवा॑ म॒तिः॥ ४॥

((ska̱nnemā viśvā̱ bhuva̍nā ।
ska̱nno ya̱jñaḥ praja̍nayatu ।
askā̱naja̍ni̱ prāja̍ni ।
āska̱nnājja̍yate̱ vṛṣā̎ ।
ska̱nnātpraja̍niṣīmahi ।
ye de̱vā yeṣā̍mi̱dam bhā̍ga̱dheya̍m ba̱bhūva̍ ।
yeṣā̎m prayā̱jā u̱tānū̍yā̱jāḥ ।
indra̍jyeṣṭhebhyo̱ varu̍ṇarājabhyaḥ ।
a̱gniho̍tṛbhyo de̱vebhya̱ḥ svāhā̎ ।
u̱ta tyā no̱ divā̍ ma̱tiḥ ॥ 4 ॥))

**[[3-7-10-5]]**

अदि॑तिरू॒त्याऽऽग॑मत्।
सा शन्ता॑ची॒ मय॑स्करत्।
अप॒ स्रिधः॑।
उ॒त त्या दैव्या॑ भि॒षजा᳚।
शं न॑स्करतो अ॒श्विना᳚।
यू॒याता॑म॒स्मद्रपः॑।
अप॒ स्रिधः॑।
शम॒ग्निर॒ग्निभि॑स्करत्।
शं न॑स्तपतु॒ सूर्यः॑।
शं वातो॑ वात्वर॒पाः॥ ५॥

((adi̍tirū̱tyā''ga̍mat ।
sā śantā̍cī̱ maya̍skarat ।
apa̱ sridha̍ḥ ।
u̱ta tyā daivyā̍ bhi̱ṣajā̎ ।
śam na̍skarato a̱śvinā̎ ।
yū̱yātā̍ma̱smadrapa̍ḥ ।
apa̱ sridha̍ḥ ।
śama̱gnira̱gnibhi̍skarat ।
śam na̍stapatu̱ sūrya̍ḥ ।
śam vāto̍ vātvara̱pāḥ ॥ 5 ॥))

**[[3-7-10-6]]**

अप॒ स्रिधः॑।
तदि॒त्प॒दं न विचि॑केत वि॒द्वान्।
यन्मृ॒तः पुन॑र॒प्येति॑ जी॒वान्।
त्रि॒वृद्यद्भुव॑नस्य रथ॒वृत्।
जी॒वो गर्भो॒ न मृ॒तः स जी॑वात्।
प्रत्य॑स्मै॒ पिपी॑षते।
वि॒श्वा॑नि वि॒दुषे॑ भर।
अ॒रं॒ग॒माय॒ जग्म॑वे।
अप॑श्चाद्दध्वने॒ नरे᳚।
इन्दु॒रिन्दु॒मवा॑गात्।
इन्दो॒रिन्द्रो॑ऽपात्।
तस्य॑ त इन्द॒विन्द्र॑पीतस्य॒ मधु॑मतः।
उप॑हूत॒स्योप॑हूतो भक्षयामि॥ ६॥
उ॒द॒र्ष इ॑न्द्रि॒येण॒ गा म॒तिर॑र॒पा अ॑गा॒त्त्रीणि॑ च॥ १०॥

((apa̱ sridha̍ḥ ।
taditpa̱dam na vici̍keta vi̱dvān ।
yanmṛ̱taḥ puna̍ra̱pyeti̍ jī̱vān ।
tri̱vṛ̱dyadbhuva̍nasya ratha̱vṛt ।
jī̱vo garbho̱ na mṛ̱taḥ sa jī̍vāt ।
pratya̍smai̱ pipī̍ṣate ।
vi̱śvā̍ni vi̱duṣe̍ bhara ।
a̱ra̱mga̱māya̱ jagma̍ve ।
apa̍ścāddadhvane̱ nare̎ ।
indu̱rindu̱mavā̍gāt ।
indo̱rindro̍'pāt ।
tasya̍ ta inda̱vindra̍pītasya̱ madhu̍mataḥ ।
upa̍hūta̱syopa̍hūto bhakṣayāmi ॥ 6 ॥
u̱da̱rṣa i̍ndri̱yeṇa̱ gā ma̱tira̍ra̱pā a̍gā̱ttrīṇi̍ ca ॥ 10 ॥))

**[[3-7-11-1]]**

ब्रह्म॑ प्रति॒ष्ठा मन॑सो॒ ब्रह्म॑ वा॒चः।

ब्रह्म॑ य॒ज्ञाना॒ꣳ ह॒विषा॒माज्य॑स्य।
अति॑रिक्तं॒ कर्म॑णो॒ यच्च॑ ही॒नम्।
य॒ज्ञः पर्वा॑णि प्रति॒रन्ने॑ति क॒ल्पय॑न्।
स्वाहा॑कृ॒ताऽऽहु॑तिरेतु दे॒वान्।
आश्रा॑वितम॒त्याश्रा॑वितम्।
वष॑ट्कृतम॒त्यनू᳚क्तं च य॒ज्ञे।
अति॑रिक्तं॒ कर्म॑णो॒ यच्च॑ ही॒नम्।
य॒ज्ञः पर्वा॑णि प्रति॒रन्ने॑ति क॒ल्पय॑न्।
स्वाहा॑कृ॒ताऽऽहु॑तिरेतु दे॒वान्॥ १॥

((brahmȧ pratịṣṭhā manȧsọ brahmȧ vạ̄caḥ |
brahmȧ yạjñānāṁ̐ hạviṣạ̄mājyȧsya |
atịriktaṃ̱ karmȧṇọ yaccȧ hị̄nam |
yạjñaḥ parvȧṇi pratịrannėti kạlpayaṅ |
svāhȧkṛ̱tā''hȧtiretu dẹvān |
āśrȧvitamạtyāśrȧvitam |
vaṣȧṭkṛtamạtyanṻktaṃ ca yạjñe |
atịriktaṃ̱ karmȧṇọ yaccȧ hị̄nam |
yạjñaḥ parvȧṇi pratịrannėti kạlpayaṅ |
svāhȧkṛ̱tā''hȧtiretu dẹvān || 1 ||))

**[[3-7-11-2]]**

यद्वो॑ देवा अतिपा॒दया॑नि।
वा॒चाचि॒त्प्रय॑तं देव॒ हेड॑नम्।
अ॒रायो॒ अ॒स्माꣳ अ॒भिदु॑च्छुना॒यतेँ॑।
अ॒न्यत्रा॒स्मन्म॑रुत॒स्तन्निधे॑तन।
त॒तं म॒ आप॒स्तदु॑ ताय॒ते पुन॑ः।
स्वादि॑ष्ठा धीति॒रु॒चथा॑य शस्यते।
अ॒यꣳ स॑मु॒द्र उ॒त वि॒श्वभे॑षजः।
स्वाहा॑कृतस्य॒ सम॑तृप्णुतर्भुवः।
उद्व॒यं तम॑स॒स्परि॑।
उदु॒ त्यं चि॒त्रम्॥ २॥

((yadvȯ devā atipạ̄dayȧni |
vạ̄cācịtprayȧtaṃ devạ hedȧnam |
ạrāyo ạsmāṁ̐ ạbhiducchunạ̄yatē̐ |
ạnyatrạ̄smanmȧrutạstannidhėtana |
tạtaṃ mạ āpạstadu tāyạte punȧḥ |
svādịṣṭhā dhịtirụcathȧya śasyate |
ạyaṁ̐ sȧmụdra ụta vịśvabhėṣajaḥ |
svāhȧkṛtasyạ samȧtṛpṇutarbhuvaḥ |
udvạyaṃ tamȧsạsparị |
udụ tyaṃ cịtram || 2 ||))

**[[3-7-11-3]]**

इ॒मं मे॑ वरुण॒ तत्त्वा॑ यामि।
त्वं नो॑ अ॒ग्ने स त्वं नो॑ अग्ने।
त्वम॑ग्ने अ॒यासि॒ प्रजा॑पते।
इ॒मं जी॒वेभ्य॑ः परि॒धिं द॑धामि।
मैषां॒ नु॑ गा॒दप॑रो॒ अर्ध॑मे॒तम्।
श॒तं जीव॑न्तु श॒रद॑ः पुरू॒चीः।
ति॒रो मृ॒त्युं द॑धतां॒ पर्व॑तेन।
इ॒ष्टेभ्य॑ः स्वाहा॒ वष॒डनि॑ष्टेभ्य॒ः स्वाहा᳚।
भे॒ष॒जं दु॒रि॑ष्ट्यै॒ स्वाहा॒ निष्कृ॑त्यै॒ स्वाहा᳚।
दौरा᳚द्ध्यै॒ स्वाहा॒ दैवी᳚भ्यस्त॒नूभ्य॒ः स्वाहा᳚॥ ३॥

((ịmaṃ mė varuṇạ tattvȧ yāmi |
tvaṃ nȯ agnẹ sa tvaṃ nȯ agne |
tvamȧgne ạyāsị prajȧpate |
ịmaṃ jị̄vebhyȧḥ parịdhiṃ dȧdhāmi |
maiṣạ̄ṃ nȯ gạ̄dapȧrọ ardhȧmẹtam |
śạtaṃ jị̄vantu śạradȧḥ purụ̄cīḥ |
tịro mṛ̱tyuṃ dȧdhatāṃ̱ parvȧtena |
iṣṭebhyaḥ svāhạ̄ vaṣạdanịṣṭebhyạḥ svāhā̈ |
bheṣạjaṃ durịṣṭyai svāhạ̄ niṣkṛ̇tyai svāhā̈ |
daurā̈rddhyaị svāhạ̄ daivī̈bhyastạnūbhyạḥ svāhā̈ || 3 ||))

**[[3-7-11-4]]**

ऋद्ध्यै॒ स्वाहा॒ समृ॑द्ध्यै॒ स्वाहा᳚।
यत॑ इन्द्र॒ भया॑महे।
ततो॑ नो॒ अभ॑यं कृधि।
मघ॑वञ्छ॒ग्धि तव॒ तन्न॑ ऊ॒तये᳚।
वि द्विषो॒ वि मृधो॑ जहि।
स्व॒स्ति॒दा वि॒शस्पति॑ः।
वृ॒त्र॒हा विमृ॒धो॑ व॒शी।
वृषेन्द्र॑ः पु॒र ए॑तु नः।
स्व॒स्ति॒दा अ॑भयंक॒रः।
आ॒भिर्गी॒र्भिर्यद॑तो॒ न ऊ॒नम्॥ ४॥

((ṛddhyaị svāhạ̄ samṛ̇ddhyaị svāhā̈ |
yatȧ indrạ bhayȧmahe |
tatȯ nọ abhȧyaṃ kṛdhi |
maghȧvañchạgdhi tavạ tannȧ ū̱tayē̈ |
vi dviṣọ vi mṛdhȯ jahi |
svạstịdā vịśaspatịḥ |
vṛ̱trạhā vimṛ̇dhȯ vạśī |
vṛṣendrȧḥ pụra ėtu naḥ |
svạstịdā ȧbhayaṃkạraḥ |
ạ̄bhirgị̄rbhiryadatȯ na ụ̄nam || 4 ||))

**[[3-7-11-5]]**

आप्या॑यय हरिवो॒ वर्ध॑मानः।
य॒दा स्तो॒तृभ्यो॒ महि॑ गो॒त्रा रु॒जासि॑।
भू॒यि॒ष्ठ॒भाजो॒ अध॑ ते स्याम।
अना᳚ज्ञातं॒ यदाज्ञा॑तम्।
य॒ज्ञस्य॑ क्रि॒यते॒ मिथु॑।
अग्ने॒ तद॑स्य कल्पय।
त्वꣳ हि वेत्थ॑ यथात॒थम्।
पुरु॑षसंमितो य॒ज्ञः।
य॒ज्ञः पुरु॑षसंमितः।
अग्ने॒ तद॑स्य कल्पय।
त्वꣳ हि वेत्थ॑ यथात॒थम्।
यत्पाक॑त्रा मन॑सा दी॒नद॑क्षा॒ न।
य॒ज्ञस्य॑ म॒न्वते॒ मर्ता॑सः।
अ॒ग्निष्टद्धोता᳚ क्रतु॒विद्वि॑जा॒नन्।
यजि॑ष्ठो दे॒वाꣳ ऋ॑तु॒शो यजा॑ति॥ ५॥
दे॒वाꣳश्चि॒त्रं त॒नूभ्यः॒ स्वाहो॒नं पुरु॑षसंमि॒तोऽग्ने॒ तद॑स्य कल्पय॒ पञ्च॑ च॥ ११॥

((āpyắyaya harivo̱ vardhámānaḥ ।
ya̱dā sto̱tr̥bhyo̱ mahi̍ go̱trā ru̱jāsi̍ ।
bhū̱yi̱ṣṭha̱bhājo̱ adhá te syāma ।
anā̍̍jñātam̱ yadājñắtam ।
ya̱jñasyá kri̱yate̱ mithú ।
agne̱ tadásya kalpaya ।
tvam̐ hi vetthá yathāta̱tham ।
purúṣasam̱mito ya̱jñaḥ ।
ya̱jñaḥ purúṣasam̱mitaḥ ।
agne̱ tadásya kalpaya ।
tvam̐ hi vetthá yathāta̱tham ।
yatpắka̱trā manásā dī̱nadákṣā̱ na ।
ya̱jñasyá ma̱nvate̱ martắsaḥ ।
a̱gniṣṭaddhotā̍̍ kratu̱vidvi̍jā̱nan ।
yaji̍ṣṭho de̱vām̐ r̥̍tu̱śo yájāti ॥ 5 ॥
de̱vām̐ści̱tram ta̱nūbhya̱ḥ svāho̱nam
purúṣasam̱mi̱to'gne̱ tadásya kalpaya̱ pañcá ca ॥ 11 ॥))

**[[3-7-12-1]]**

यद्दे॑वा दे॒वहे॑डनम्।
दे॒वा॑सश्चकृ॒मा व॒यम्।
आदि॑त्या॒स्तस्मा᳚न्मा मुञ्चत।
ऋ॒तस्य॒र्तेन॒ मामु॒त।
देवा॑ जीवनका॒म्या यत्।
वा॒चाऽनृ॑तमू॒दि॒म।
अ॒ग्निर्मा॒ तस्मा॒देन॑सः।
गार्ह॑पत्यः॒ प्रमु॑ञ्चतु।
दु॒रि॒ता यानि॑ चकृ॒म।
क॒रोतु॒ माम॑ने॒नस᳚म्॥ १॥

((yaddévā deva̱heḍánam ।
devắsaścakr̥̱mā va̱yam ।
ādítyā̱stasmā̍̍nmā muñcata ।
r̥̱tasya̱rtena̱ māmu̱ta ।
devắ jīvanakā̱myā yat ।
vā̱cā'nŕ̥tamū̱di̱ma ।
a̱gnirmā̱ tasmā̱denásaḥ ।
gārhápatya̱ḥ pramúñcatu ।
du̱ri̱tā yāni̍ cakr̥̱ma ।
ka̱rotu̱ māmáne̱nasā̍̍m ॥ 1 ॥))

**[[3-7-12-2]]**

ऋ॒तेन॑ द्यावापृथिवी।
ऋ॒तेन॒ त्वꣳ सर॑स्वति।
ऋ॒तान्मा॑ मुञ्च॒ताꣳह॑सः।
यद॒न्यकृ॑तमारि॒म।
स॒जा॒त॒श॒ꣳ॒सादु॒त वा॑ जामिश॒ꣳ॒सात्।
ज्याय॑सः शꣳसा॑दु॒त वा॒ कनी॑यसः।
अना᳚ज्ञातं दे॒वकृ॑तं॒ यदेन॑ः।
तस्मा॒त्त्वम॒स्मान्जा॑तवेदो मुमुग्धि।
यद्वा॒चा यन्मन॑सा।
बा॒हुभ्या॑मू॒रुभ्या॑मष्ठी॒वद्भ्या᳚म्॥ २॥

((r̥̱tená dyāvāpr̥thivī ।
r̥̱tena̱ tvam̐ sárasvati ।
r̥̱tānmắ muñca̱tām̐hásaḥ ।
yada̱nyakŕ̥tamāri̱ma ।
sa̱jā̱ta̱śa̱m̐sādu̱ta vắ jāmiśa̱m̐sāt ।
jyāyásaḥ śam̐sắdu̱ta vā̱ kanī̍yasaḥ ।
anā̍̍jñātam de̱vakŕ̥ta̱m yadenáḥ ।
tasmā̱ttvama̱smānjắtavedo mumugdhi ।
yadvā̱cā yanmanásā ।
bā̱hubhyắmū̱rubhyắmaṣṭhī̱vadbhyā̍̍m ॥ 2 ॥))

**[[3-7-12-3]]**

शि॒श्नैर्यदनृ॑तं चकृ॒मा व॒यम्।
अ॒ग्निर्मा॒ तस्मा॒देन॑सः।
यद्धस्ता᳚भ्यां च॒कर॒ किल्बि॑षाणि।

अ॒क्षाणां᳚ व॒ग्नुमु॑प॒जिघ्न॑मानः।
दू॒रे॒प॒श्या च॑ राष्ट्र॒भृच्च॑।
तान्य॑प्स॒रसा॒वनु॑दत्तामृ॒णानि॑।
अदी᳚व्यन्नृ॒णं यद॒हं च॒कार॑।
यद्वा॑ऽदा᳚स्यन्त्सं॑ज॒गारा॒ जने᳚भ्यः।
अ॒ग्निर्मा॒ तस्मा॒देन॑सः।
यन्मयि॑ मा॒ता गर्भे॑ स॒ति॥ ३॥

((śi̱śnairyadanṛ̍taṃ cakṛ̱mā va̱yam ।
a̱gnirmā̱ tasmā̱denȧsaḥ ।
yaddhastā̍bhyāṃ ca̱kara̱ kilbi̍ṣāṇi ।
a̱kṣāṇā̍ṃ va̱gnumu̍pa̱jighnȧmānaḥ ।
dū̱re̱pa̱śyā cȧ rāṣṭra̱bhṛccȧ ।
tānyȧpsa̱rasā̱vanu̍dattāmṛ̱ṇāni̍ ।
adī̍vyannṛ̱ṇaṃ yada̱haṃ ca̱kārȧ ।
yadvā'dā̍syantsaṃja̱gārā̱ jane̍bhyaḥ ।
a̱gnirmā̱ tasmā̱denȧsaḥ ।
yanmayi̍ mā̱tā garbhȧ sa̱ti ॥ 3 ॥))

**[[3-7-12-4]]**

एन॑श्च॒कार॒ यत्पि॒ता।
अ॒ग्निर्मा॒ तस्मा॒देन॑सः।
यदा॑ पि॒पेष॑ मा॒तरं॑ पि॒तरा᳚म्।
पु॒त्रः प्रमु॑दितो॒ धय॑न्।
अहिं॑सितौ पि॒तरौ॑ मया॒ तत्।
तद॑ग्ने अनृ॒णो भ॑वामि।
यद॒न्तरि॑क्षं पृथि॒वीमु॒त द्याम्।
यन्मा॒तरं॑ पि॒तरं॑ वा जिहिं॒सिम।
अ॒गिर्मा॒ तस्मा॒देन॑सः।
यदा॒शसा॑ नि॒शसा॒ यत्प॑रा॒शसा᳚॥ ४॥

((enȧśca̱kāra̱ yatpi̱tā ।
a̱gnirmā̱ tasmā̱denȧsaḥ ।
yadā̍ pi̱peṣȧ mā̱taraṃ̍ pi̱tarām ।
pu̱traḥ pramu̍dito̱ dhaya̍n ।
ahiṃ̍sitau pi̱tara̱u mayā̱ tat ।
tadȧgne anṛ̱ṇo bhȧvāmi ।
yada̱ntari̍kṣaṃ pṛthi̱vīmu̱ta dyām ।
yanmā̱taraṃ̍ pi̱taraṃ̍ vā jihiṃ̍si̱ma ।
a̱girmā̱ tasmā̱denȧsaḥ ।
yadā̱śasā̍ ni̱śasā̱ yatpȧrā̱śasā̍ ॥ 4 ॥))

**[[3-7-12-5]]**

यदेन॑श्चकृ॒मा नू॒तन॒ं यत्पु॒रा॒णम्।
अ॒ग्निर्मा॒ तस्मा॒देन॑सः।
अति॑क्रामामि दु॒रि॒तं यदेन॑ः।
जहा॑मि रि॒प्रं प॑र॒मे स॒धस्थे᳚।
यत्र॒ यन्ति॑ सु॒कृतो॒ नापि॑ दु॒ष्कृत॑ः।
तमारो॑हामि सु॒कृतां॒ नु लो॒कम्।
त्रि॒ते दे॒वा अ॑मृजतै॒तदेन॑ः।
त्रि॒त ए॒तन्म॑नु॒ष्ये॑षु मामृजे।
ततो॑ मा॒ यदि॒ किंचि॑दान॒शे।
अ॒ग्निर्मा॒ तस्मा॒देन॑सः॥ ५॥

((yadenȧścakṛ̱mā nūtȧnaṃ yatpu̍rā̱ṇam ।
a̱gnirmā̱ tasmā̱denȧsaḥ ।
ati̍krāmāmi duri̱taṃ yadenȧḥ ।
jahȧmi ri̱praṃ pȧra̱me sa̱dhasthe̍ ।
yatra̱ yanti̍ su̱kṛto̱ nāpi̍ du̱ṣkṛtȧḥ ।
tamārȯhāmi su̱kṛtā̱ṃ nu lo̱kam ।
tri̱te de̱vā ȧmṛjata̱i̱tadenȧḥ ।
tri̱ta e̱tanmȧnu̱ṣye̍ṣu māmṛje ।
tatȯ mā̱ yadi̱ kiṃci̍dāna̱śe ।
a̱gnirmā̱ tasmā̱denȧsaḥ ॥ 5 ॥))

**[[3-7-12-6]]**

गार्ह॑पत्यः प्रमु॑ञ्चतु।
दु॒रि॒ता यानि॑ चकृ॒म।
क॒रोतु॒ माम॑ने॒नसा᳚म्।
दि॒वि जा॒ता अ॒प्सु जा॒ताः।
या जा॒ता ओष॑धीभ्यः।
अथो॒ या अ॑ग्निजा आप॑ः।
ता न॑ः शुन्धतु॒ शुन्ध॑नीः।
यदापो॒ नक्तं॑ दु॒रि॒तं चरा॑म।
यद्वा॒ दिवा॒ नू॒तन॒ं यत्पु॑रा॒णम्।
हिर॑ण्यवर्णा॒स्तत॒ उत्पु॑नीत नः।
इ॒मं मे॑ वरुण॒ तत्त्वा॑ यामि।
त्वं नो॑ अ॒ग्ने स त्वं नो॑ अग्ने।
त्वम॑ग्ने अ॒याऽसि॑॥ ६॥
अ॒ने॒नस॑मष्ठिवद्भ्यां॑ स॒ति प॑रा॒शसा॑ऽऽनशेऽ॑ग्निर्मा॒
तस्मा॒देन॑सः पुनीत न॒स्त्रीणि॑ च॥ १२॥
यद्दे॒वा गार्ह॑पत्यो॒ यद्धस्ता᳚भ्यां यन्मयि॑ माता यदा॑पिपेष॒
यद॒न्तरि॑क्षं यदा॒शसाऽतिक्रामामि त्रि॒ते दे॒वा दि॒वि जा॒ता
अ॒प्सु जा॒ता यदाप॑ इ॒मं मे॑ वरुण॒ तत्त्वे यामि॒ त्वं नो॑ अ॒ग्ने
स त्वं नो॑ अग्ने॒ त्वम॑ग्ने अ॒याऽसि॑॥

((gārha̍patya̱ḥ pramu̍ñcatu ǀ
du̱ri̱tā yāni̍ cakṛ̱ma ǀ
ka̱rotu̱ māmane̱nasa̍m ǀ
di̱vi jā̱tā a̱psu jā̱tāḥ ǀ
yā jā̱tā oṣa̍dhībhyaḥ ǀ
atho̱ yā a̍gni̱jā āpa̍ḥ ǀ
tā na̍ḥ śundhatu̱ śundha̍nīḥ ǀ
yadāpo̱ naktaṃ̍ duri̱taṃ cara̍ma ǀ
yadvā̱ divā̱ nūta̍naṃ̱ yatpu̍rā̱ṇam ǀ
hira̍ṇyavarṇā̱stata̱ utpu̍nīta naḥ ǀ
i̱maṃ me̍ varuṇa̱ tattva̍ yāmi ǀ
tvaṃ no̍ agne̱ sa tvaṃ no̍ agne ǀ
tvama̍gne a̱yā'si̍ ǁ 6 ǁ
a̱ne̱nasa̍maṣṭhivadbhyām̐ sa̱ti
pa̍rā̱śasā̍''na̱śe̍'gnirmā̱ tasmā̱denā̍saḥ punīta
na̱strī̱ṇi̱ ca ǁ 12 ǁ
yadde̍vā̱ gārha̍patyo̱ yaddhastā̍bhyā̱ṃ yanmayi̍
mā̱tā yadā̍pipeṣa̱ yada̱ntari̍kṣa̱m
yadā̱śasā'ti̍krāmāmi tri̱te de̱vā di̱vi jā̱tā a̱psu jā̱tā
yadāpa̍ i̱maṃ me̍ varuṇa̱ tattva̍ yāmi̱ tvaṃ no̍ agne̱
sa tvaṃ no̍ agne̱ tvama̍gne a̱yā'si̍ ǁ))

**[[3-7-13-1]]**

यत्ते ग्राव्णा चिच्छिदुः सोम राजन्।
प्रियाण्यङ्गानि स्वधिता परूꣳषि।
तत्संधत्स्वाज्येनोत वर्धयस्व।
अनागसो अधमित्संक्षयेम।
यत्ते ग्रावा बाहुच्युतो अचुच्यवुः।
नरो यत्ते दुदुहुर्दक्षिणेन।
तत्त आप्यायतां तत्ते।
निष्ट्यायतां देव सोम।
यत्ते त्वचं बिभिदुर्यच्च योनिम्।
यदास्थानात्प्रच्युतो वेनसि त्मना॥ १॥

((yatte̱ grāvṇṇā̍ cicchi̱duḥ so̍ma rājan ǀ
pri̱yāṇyaṅgā̍ni̱ svadhi̍tā̱ parū̍m̐ṣi ǀ
tatsaṃdha̱tsvājye̍no̱ta va̍rdhayasva ǀ
a̱nā̱gaso̱ adha̱mitsa̱ṃkṣaye̍ma ǀ
yatte̱ grāvā̍ bā̱hucyu̍to̱ acu̍cyavuḥ ǀ
naro̱ yatte̍ dudu̱hurdakṣi̍ṇena ǀ
tatta̱ āpyā̍yatā̱ṃ tatte̍ ǀ
niṣṭyā̍yatāṃ deva soma ǀ
yatte̱ tvaca̍ṃ bibhi̱duryacca̱ yoni̍m ǀ
yadā̱sthānā̱tpracyu̍to̱ venā̍si̱ tmanā̍ ǁ 1 ǁ))

**[[3-7-13-2]]**

त्वया तत्सोम गुप्तमस्तु नः।
सा नः संधाऽसत्परमे व्योमन्।
अहाच्छरीरं पयसा समेत्य।
अन्योऽन्यो भवति वर्णो अस्य।
तस्मिन्वयमुपहूतास्तव स्मः।
आ नो भज सदसि विश्वरूपे।
नृचक्षाः सोम उत शुश्रुगस्तु।
मा नो विहासीद्गिर आवृणानः।
अनागास्तनुवो वावृधानः।
आ नो रूपं वहतु जायमानः॥ २॥

((tvayā̱ tatso̍ma gu̱ptama̍stu naḥ ǀ
sā na̍ḥ sa̱ṃdhā'sa̍tpara̱me vyo̍man ǀ
ahā̱ccharī̍raṃ paya̍sā sa̱metya̍ ǀ
a̱nyo̍'nyo bhavati̱ varṇo̍ asya ǀ
tasmi̍nva̱yamupa̍hūtā̱stava̍ smaḥ ǀ
ā no̍ bhaja̱ sada̍si vi̱śvarū̍pe ǀ
nṛ̱cakṣā̱ḥ soma̍ u̱ta śu̱śruga̍stu ǀ
mā no̱ vihā̍sī̱dgira̍ āvṛṇā̱naḥ ǀ
anā̍gāsta̱nuvo̍ vāvṛdhā̱naḥ ǀ
ā no̍ rū̱paṃ va̍hatu̱ jāya̍mānaḥ ǁ 2 ǁ))

**[[3-7-13-3]]**

उपक्षरन्ति जुह्वो घृतेन।
प्रियाण्यङ्गानि तव वर्धयन्तीः।
तस्मै ते सोम नम इद्वषट्च।
उप मा राजन्त्सुकृते ह्वयस्व।
संप्राणापानाभ्याꣳ समु चक्षुषा त्वम्।
सꣳ श्रोत्रेण गच्छस्व सोम राजन्।
यत्त आस्थितꣳ शमु तत्ते अस्तु।
जानीतान्नः संगमने पथीनाम्।
एतं जानीतात्परमे व्योमन्।
वृकाः सधस्था विद रूपमस्य॥ ३॥

((upa̍kṣaranti ju̱hvo̍ ghṛ̱tena̍ ǀ
pri̱yāṇyaṅgā̍ni̱ tava̍ va̱rdhaya̍ntīḥ ǀ
tasmai̍ te soma̱ nama̱ idvaṣa̍ṭca ǀ
upa̍ mā rājantsukṛ̱te hva̍yasva ǀ
sampra̍ṇāpā̱nābhyā̱m̐ samu̱ cakṣu̍ṣā̱ tvam ǀ
sam̐ śrotre̍ṇa gacchasva soma rājan ǀ
yatta̱ āsthi̍ta̱m̐ śamu̱ tatte̍ astu ǀ
jā̱nī̱tānna̍ḥ sa̱ṃgama̍ne pathī̱nām ǀ
e̱taṃ jā̍nītātpara̱me vyo̍man ǀ
vṛkā̍ḥ sadhasthā vi̱da rū̱pama̍sya ǁ 3 ǁ))

**[[3-7-13-4]]**

यदा गच्छात्पथिभिर्देवयानैः।
इष्टापूर्ते कृणुतादाविरस्मै।

अरि॑ष्टो राजन्नग॒दः परे॑हि।
नम॑स्ते अस्तु॒ चक्ष॑से रघूय॒ते।
नाक॒मारो॑ह स॒ह यज॑मानेन।
सूर्यं॑ गच्छतात्पर॒मे व्यो॑मन्।
अभू॑द्दे॒वः स॑वि॒ता वन्द्यो॒ नु नः॑।
इ॒दानी॒मह्न॑ उप॒वाच्यो॒ नृभिः॑।
वि यो रत्ना॒ भज॑ति मान॒वेभ्यः॑।
श्रेष्ठं॑ नो॒ अत्र॒ द्रवि॑णं॒ यथा॒ दध॑त्।
उप॑ नो मित्रावरुणावि॒हाव॑तम्।
अ॒न्वादी॑ध्याथामि॒ह नः॑ सखाया।
आ॒दि॒त्याना॒ं प्रसि॑तिर्हे॒तिः।
उ॒ग्रा श॒ताप॑ाष्ठा घ॒ विषा॒ परि॑ णो वृणक्तु।
आप्या॑यस्व॒ सं ते॑॥ ४॥
त्मना॒ जाय॑मानोऽस्य॒ दध॒त्पञ्च॑ च॥ १३॥

((yadā̱ gacchā̈tpa̱thibhi̍rdeva̱yānai̍ḥ |
i̱ṣṭā̱pūrte kṛ̍ṇutāda̱vira̍smai |
ari̍ṣṭo rājannaga̱daḥ pare̍hi |
nama̍ste astu̱ cakṣa̍se raghūya̱te |
nāka̱māro̍ha sa̱ha yaja̍mānena |
sūryaṃ̍ gacchatātpara̱me vyo̍man |
abhṻdde̱vaḥ sa̍vi̱tā vandyo̱ nu na̍ḥ |
i̱dānī̱mahna̍ upa̱vācyo̱ nṛbhi̍ḥ |
vi yo ratnā̱ bhaja̍ti māna̱vebhya̍ḥ |
śreṣṭhaṃ̍ no̱ atra̱ dravi̍ṇaṃ̱ yathā̱ dadha̍t |
upa̍ no mitrāvaruṇāvi̱hāva̍tam |
a̱nvādī̈dhyāthāmi̱ha na̍ḥ sakhāyā |
ā̱di̱tyānā̱ṃ prasi̍tirhe̱tiḥ |
u̱grā śa̱tāpā̈ṣṭhā gha̱ viṣā̱ pari̍ ṇo vṛṇaktu |
āpyā̍yasva̱ saṃ te̍ || 4 ||
tmanā̱ jāya̍māno'sya̱ dadha̱tpañca̍ ca || 13 ||))

**[[3-7-14-1]]**

यद्दि॑दी॒क्षे मन॑सा॒ यच्च॑ वा॒चा।
यद्वा॑ प्रा॒णैश्चक्षु॑षा॒ यच्च॒ श्रोत्रे॑ण।
यद्रेत॑सा मिथु॒नेनाप्या॒त्मना॑।
अ॒द्भ्यो लो॒का द॑धि॒रे तेज॑ इन्द्रि॒यम्।
शु॒क्रा दी॒क्षायै॒ तप॑सो वि॒मोच॑नीः।
आपो॑ विमो॒क्त्रीर्मयि॒ तेज॑ इन्द्रि॒यम्।
यदृ॒चा साम्ना॒ यजु॑षा।
प॒शू॒नां चर्म॑न्ह॒विषा॑ दिदी॒क्षे।
यच्छन्दो॑भिरोष॑धीभि॒र्वन॒स्पतौ॑।
अ॒द्भ्यो लो॒का द॑धि॒रे तेज॑ इन्द्रि॒यम्॥ १॥

((yaddi̍dī̱kṣe mana̍sā̱ yacca̍ vā̱cā |
yadvā̈ prā̱ṇaiścakṣu̍ṣā̱ yacca̱ śrotre̍ṇa |
yadreta̍sā mithu̱nenāpyā̱tmanā̈ |
a̱dbhyo lo̱kā da̍dhi̱re teja̍ indri̱yam |
śu̱krā dī̱kṣāyai̱ tapa̍so vi̱moca̍nīḥ |
āpo̍ vimo̱ktrīrmayi̱ teja̍ indri̱yam |
yadṛ̱cā sāmnā̱ yaju̍ṣā |
pa̱śū̱nāṃ carma̍nhavi̱ṣā̈ didī̱kṣe |
yacchando̍bhi̱roṣa̍dhībhi̱rvana̱spatau̍ |
a̱dbhyo lo̱kā da̍dhire̱ teja̍ indri̱yam || 1 ||))

**[[3-7-14-2]]**

शु॒क्रा दी॒क्षायै॒ तप॑सो वि॒मोच॑नीः।
आपो॑ विमो॒क्त्रीर्मयि॒ तेज॑ इन्द्रि॒यम्।
येन॒ ब्रह्म॒ येन॑ क्ष॒त्रम्।
येनै॑न्द्रा॒ग्नी प्र॒जाप॑तिः सो॒मो वरु॑णो॒ येन॒ राजा॑।
विश्वे॑ दे॒वा ऋष॑यो॒ येन॑ प्रा॒णाः।
अ॒द्भ्यो लो॒का द॑धि॒रे तेज॑ इन्द्रि॒यम्।
शु॒क्रा दी॒क्षायै॒ तप॑सो वि॒मोच॑नीः।
आपो॑ विमो॒क्त्रीर्मयि॒ तेज॑ इन्द्रि॒यम्।
अ॒पां पुष्प॑म॒स्योष॑धीना॒ꣳ रस॑ः।
सोम॑स्य प्रि॒यं धाम॑॥ २॥

((śu̱krā dī̱kṣāya̱i tapa̍so vi̱moca̍nīḥ |
āpo̍ vimo̱ktrīrmayi̱ teja̍ indri̱yam |
yena̱ brahma̱ yena̍ kṣa̱tram |
yenē̈ndrā̱gnī pra̱jāpa̍tiḥ so̱mo varu̍ṇo̱ yena̱ rājā̈ |
viśve̍ de̱vā ṛ̱ṣayo̱ yena̍ prā̱ṇāḥ |
a̱dbhyo lo̱kā da̍dhire̱ teja̍ indri̱yam |
śu̱krā dī̱kṣāya̱i tapa̍so vi̱moca̍nīḥ |
āpo̍ vimo̱ktrīrmayi̱ teja̍ indri̱yam |
a̱pāṃ puṣpa̍ma̱syoṣa̍dhīnā̱m̈ rasa̍ḥ |
soma̍sya pri̱yaṃ dhāma̍ || 2 ||))

**[[3-7-14-3]]**

अ॒ग्नेः प्रि॒यत॑मꣳ ह॒विः स्वाहा॑।
अ॒पां पुष्प॑म॒स्योष॑धीना॒ꣳ रस॑ः।
सोम॑स्य प्रि॒यं धाम॑।
इन्द्र॑स्य प्रि॒यत॑मꣳ ह॒विः स्वाहा॑।
अ॒पां पुष्प॑म॒स्योष॑धीना॒ꣳ रस॑ः।
सोम॑स्य प्रि॒यं धाम॑।
विश्वे॑षां दे॒वानां॑ प्रि॒यत॑मꣳ ह॒विः स्वाहा॑।
व॒यꣳ सो॑म व्र॒ते तव॑।

म॒न॑स्त॒नूषु॒ पिप्र॑तः।
प्र॒जाव॑न्तो अशीमहि॥ ३॥

((a̱gneḥ pri̱yata̍mam̐ ha̱viḥ svāhā̎ ।
a̱pāṃ puṣpa̍ma̱syoṣa̍dhīnā̱m̐ rasa̍ḥ ।
soma̍sya pri̱yaṃ dhāma̍ ।
indra̍sya pri̱yata̍mam̐ ha̱viḥ svāhā̎ ।
a̱pāṃ puṣpa̍ma̱syoṣa̍dhīnā̱m̐ rasa̍ḥ ।
soma̍sya pri̱yaṃ dhāma̍ ।
viśve̍ṣāṃ de̱vānā̱m̐ pri̱yata̍mam̐ ha̱viḥ svāhā̎ ।
va̱yam̐ so̍ma vra̱te tava̍ ।
mana̍sta̱nūṣu̱ pipra̍taḥ ।
pra̱jāva̍nto aśīmahi ॥ 3 ॥))

**[[3-7-14-4]]**

दे॒वेभ्यः॑ पि॒तृभ्य॒ः स्वाहा᳚।
सो॒म्येभ्यः॑ पि॒तृभ्य॒ः स्वाहा᳚।
क॒व्येभ्यः॑ पि॒तृभ्य॒ः स्वाहा᳚।
देवा॑स इ॒ह मा॑दयध्वम्।
सो॒म्या॑स इ॒ह मा॑दयध्वम्।
क॒व्या॑स इ॒ह मा॑दयध्वम्।
अन॑न्तरिताः पि॒तर॑ः सो॒म्याः सो॑मपी॒थात्।
अपै॑तु मृ॒त्युर॒मृत॑ं न॒ आग॑न्।
वै॒व॒स्व॒तो नो॒ अभ॑यं कृणोतु।
प॒र्णं व॒नस्पते॑रिव॥ ४॥

((de̱vebhya̍ḥ pi̱tṛbhya̱ḥ svāhā̎ ।
so̱myebhya̍ḥ pi̱tṛbhya̱ḥ svāhā̎ ।
ka̱vyebhya̍ḥ pi̱tṛbhya̱ḥ svāhā̎ ।
devā̍sa i̱ha mā̍dayadhvam ।
somyā̍sa i̱ha mā̍dayadhvam ।
kavyā̍sa i̱ha mā̍dayadhvam ।
ana̍ntaritāḥ pi̱tara̍ḥ so̱myāḥ so̍mapīthāt ।
apai̍tu mṛ̱tyura̱mṛta̍ṃ na̱ āga̍n ।
vai̱va̱svato no̱ abha̍yaṃ kṛṇotu ।
pa̱rṇaṃ vana̱spate̍riva ॥ 4 ॥))

**[[3-7-14-5]]**

अ॒भि न॑ः शीयता॒ꣳ र॒यिः।
सच॑तां न॒ः शची॒पति॑ः।
पर॑ं मृत्यो॒ अनु॒परे॑हि॒ पन्था᳚म्।
यस्ते॒ स्व इत॑रो दे॒वयाना᳚त्।
चक्षु॑ष्मते शृण्व॒ते ते᳚ ब्रवीमि।
मा न॑ः प्र॒जाꣳ रीरि॑षो॒ मोत वी॒रान्।
इ॒दमू॒ नु श्रेयो॑ऽव॒सान॒माग॑न्म।
यद्गो॒जिद्ध॑न॒जिद॑श्व॒जिद्यत्।
प॒र्णं व॒नस्पते॑रिव।
अ॒भि न॑ः शीयता॒ꣳ र॒यिः।
सच॑तां न॒ः शची॒पति॑ः॥ ५॥
व॒नस्पता॑व॒द्भ्यो लो॒का द॑धिरे॒ तेज॑ इन्द्रि॒यं
धामा॑शीमहीवा॒भि न॑ः शीयता॒ꣳ र॒यिरेक॑ं च॥ १४॥
सर्वा॑न्यद्विष्ष॑ण्णेन॒ वि वै याः पु॒रस्ता᳚द्देवा॑ दे॒वेषु॒ परि॑
स्तृणीत॒ सक्षे॒दं यद॒स्य पा॒रे॑ऽनाग॒स उद॑स्तांप्सी॒द्ब्रह्म॑ प्रति॒ष्ठा
यद्दे॑वा॒ यत्ते॒ ग्राव्ण्णा॒ यद्दि॑दी॒क्षे चतु॑र्दश॥ १४॥
सर्वा॑न्भूति॑मि॒व यामे॒वाप्स्वाहु॑तिं व्र॒ताना॑ं पर्णव॒ल्कः
सो॒म्याना॑म॒स्मिन् य॒ज्ञेऽग्ने॒ यो नो॒ ज्योग्जीवाः प॒रोर॑जाः
प्रते॑म॒हे ब्रह्म॑ प्रति॒ष्ठा गार्ह॑पत्यस्त्रि॒ꣳ॒शदु॑त्तरश॒तम्॥ १३०॥

((a̱bhi na̍ḥ śīyatā̱m̐ ra̱yiḥ ।
saca̍tāṃ na̱ḥ śacī̱pati̍ḥ ।
para̍ṃ mṛtyo̱ anu̱pare̍hi̱ panthā̎m ।
yaste̱ sva ita̍ro deva̱yānā̎t ।
cakṣu̍ṣmate śṛṇva̱te te̎ bravīmi ।
mā na̍ḥ pra̱jām̐ rī̍riṣo̱ mota vī̱rān ।
i̱damū̱ nu śreyo̍'va̱sāna̱māga̍nma ।
yadgo̱jiddha̍na̱jida̍śva̱jidyat ।
pa̱rṇaṃ vana̱spate̍riva ।
a̱bhi na̍ḥ śīyatā̱m̐ ra̱yiḥ ।
saca̍tāṃ na̱ḥ śacī̱pati̍ḥ ॥ 5 ॥
vana̱spatā̍va̱dbhyo lo̱kā da̍dhire̱ teja̍ indri̱yaṃ
dhāmā̍śīmahīvā̱bhi na̍ḥ śīyatā̱m̐ ra̱yireka̍ṃ ca ॥ 14 ॥
sarvā̍nyadviṣṣa̍ṇṇena̱ vi vai yāḥ pu̱rastā̱ddevā̍
de̱veṣu̱ pari̍ stṛṇī̱ta sakṣe̱daṃ yada̱sya pā̱re̍'nā̱gasa̱
udā̍stāṃpsī̱dbrahma̍ prati̱ṣṭhā yadde̍vā̱ yatte̱
grāvṇṇā̱ yaddi̍dī̱kṣe catu̍rdaśa ॥ 14 ॥
sarvā̱nbhūti̍me̱va yāme̱vāpsvāhu̍tiṃ vra̱tānā̍ṃ
parṇava̱lkaḥ so̱myānā̍ma̱smin ya̱jñe'gne̱ yo no̱
jyogjīvāḥ pa̱rora̍jāḥ prate̍ma̱he brahma̍ prati̱ṣṭhā
gārha̍patyastri̱m̐śadu̍ttaraśatam ॥ 130 ॥))

# Taittirīya-Brāhmaṇa
# Book 3, Chapter 8

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[3-8-1-1]]**

सां॒ग्र॒ह॒ण्येष्ट्या॑ यजते।
इ॒मां ज॒नता॒ꣳ संगृ॑ह्णा॒नीति॑।
द्वाद॑शारत्नी र॒श॒ना भ॑वति।
द्वाद॑श॒ मासाः᳚ संव॒त्स॒रः।
सं॒व॒त्स॒रमे॒वाव॑रुन्धे।
मौ॒ञ्जी भ॑वति।
ऊर्ग्वै मु॒ञ्जाः᳚।
ऊर्ज॑मे॒वाव॑रुन्धे।
चि॒त्रा नक्ष॑त्रं भवति।
चि॒त्रं वा ए॒तत्कर्म॑॥ १॥

((sāṃ̱gra̱ha̱ṇyeṣṭyā̍ yajate |
i̱māṃ ja̱natā̱ṃ̱ saṃgṛ̍hṇā̱nīti̍ |
dvāda̍śāratnī ra̱śa̱nā bha̍vati |
dvāda̍śa̱ māsā̎ḥ saṃva̱tsa̱raḥ |
sa̱ṃva̱tsa̱rame̱vāva̍rundhe |
mau̱ñjī bha̍vati |
ūrgvai muñjā̎ḥ |
ūrja̍me̱vāva̍rundhe |
ci̱trā nakṣa̍traṃ bhavati |
ci̱traṃ vā e̱tatkarma̍ || 1 ||))

**[[3-8-1-2]]**

यद॑श्वमे॒धः समृ॑द्ध्यै।
पुण्य॑नाम दे॒वयज॑नम॒ध्यव॑स्यति।
पुण्या॑मे॒व तेन॑ कीर्तिम॒भिज॑यति।
अप॑दातीनृ॒त्विजः॑ स॒माव॑ह॒न्त्या सु॑ब्रह्म॒ण्यायाः᳚।
सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै।
के॒श॒श्म॒श्रु व॑पते।
न॒खानि॒ निकृ॑न्तते।
द॒तो धा॑वते।
स्नाति॑।
अह॑तं॒ वासः॒ परि॑धत्ते।
पा॒प्मनोऽप॑हत्यै।
वाचं॑ य॒त्वोप॑वसति।
सु॒व॒र्गस्य॑ लो॒कस्य॒ गुप्त्यै᳚।
रात्रिं॑ जाग॒रय॑न्त आसते।
सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै॥ २॥
कर्म॑ धत्ते॒ पञ्च॑ च॥ १॥

((yada̍śvame̱dhaḥ samṛ̍ddhyai |
puṇya̍nāma deva̱yaja̍nama̱dhyava̍syati |
puṇyā̍me̱va tena̍ kīrtima̱bhija̍yati |
apa̍dātīnṛ̱tvija̍ḥ sa̱māva̍ha̱ntyā su̍brahma̱ṇyāyā̎ḥ |
su̱va̱rgasya̍ lo̱kasya̱ sama̍ṣṭyai |
ke̱śa̱śma̱śru va̍pate |
na̱khāni̱ nikṛ̍ntate |
da̱to dhā̍vate |
snāti̍ |
aha̍taṃ̱ vāsa̱ḥ pari̍dhatte |
pā̱pmano'pa̍hatyai |
vācaṃ̍ ya̱tvopa̍vasati |
su̱va̱rgasya̍ lo̱kasya̱ guptyai̎ |
rātriṃ̍ jāga̱raya̍nta āsate |
su̱va̱rgasya̍ lo̱kasya̱ sama̍ṣṭyai || 2 ||
karma̍ dhatte̱ pañca̍ ca || 1 ||))

**[[3-8-2-1]]**

च॒तु॑ष्टय्य॒ आपो॑ भवन्ति।
च॒तुः॑शफो॒ वा अश्वः॑ प्राजाप॒त्यः समृ॑द्ध्यै॥
ता दि॒ग्भ्यः स॒माभृ॑ता भवन्ति।
दि॒क्षु वा आपः॑।
अन्नं॒ वा आपः॑।
अ॒द्भ्यो वा अन्नं॑ जायते।
यदे॒वाद्भ्योऽन्नं॒ जाय॑ते।
तदव॑रुन्धे।
तासु॑ ब्रह्मौद॒नं प॑चति।
रेत॑ ए॒व तद्द॑धाति॥ १॥

((catu̍ṣṭayya̱ āpo̍ bhavanti |
catu̍ḥśapho̱ vā aśva̍ḥ prājāpa̱tyaḥ samṛ̍ddhyai ||
tā di̱gbhyaḥ sa̱mābhṛ̍tā bhavanti |
di̱kṣu vā āpa̍ḥ |
anna̱ṃ vā āpa̍ḥ |
a̱dbhyo vā annaṃ̍ jāyate |
yade̱vādbhyo'nna̱ṃ jāya̍te |
tadava̍rundhe |
tāsu̍ brahmauda̱naṃ pa̍cati |
reta̍ e̱va tadda̍dhāti || 1 ||))

**[[3-8-2-2]]**

च॒तुः॑शरावो भवति।

दि॒क्ष्वे॑व प्रति॑तिष्ठति।
उ॒भ॒यतो॑ रु॒क्मौ भ॑वतः।
उ॒भ॒यत॑ ए॒वास्मि॒न्रुचं॑ दधाति।
उद्ध॑रति शृत॒त्वाय॑।
स॒र्पिष्वा॑न्भवति मेध्य॒त्वाय॑।
च॒त्वार॑ आर्षे॒याः प्राश्न॑न्ति।
दि॒शामे॒व ज्योति॑षि जुहोति।
च॒त्वारि॒ हिर॑ण्यानि ददाति।
दि॒शामे॒व ज्योती॒ꣳष्यव॑रुन्धे॥ २॥

((catúḥśarāvo bhavati ।
di̱kṣvéva pratítiṣṭhati ।
u̱bha̱yató ru̱kmau bhávataḥ ।
u̱bha̱yatá e̱vāsmi̱nrucaṃ́ dadhāti ।
uddhárati śṛta̱tvāyá ।
sa̱rpiṣvā̐nbhavati medhya̱tvāyá ।
ca̱tvārá ārṣe̱yāḥ prāśnánti ।
di̱śāme̱va jyotíṣi juhoti ।
ca̱tvāri̱ hiráṇyāni dadāti ।
di̱śāme̱va jyotī̱m̐ṣyavárundhe ॥ 2 ॥))

**[[3-8-2-3]]**

यदाज्य॑मुच्छि॒ष्यते॑।
तस्मि॑न्रश॒नां न्युन॑त्ति।
प्र॒जाप॑ति॒र्वा ओ॑द॒नः।
रेत॒ आज्य॑म्।
यदाज्ये॑ रश॒नां न्यु॒नत्ति॑।
प्र॒जाप॑तिमे॒व रेत॑सा॒ सम॑र्धयति।
द॒र्भ॒मयी॑ रश॒ना भ॑वति।
ब॒हु वा ए॒ष कु॑च॒रो॑ऽमे॒ध्यमुप॑गच्छति।
यदश्वः॑।
प॒वित्रं॑ वै द॒र्भाः॥ ३॥

((yadājyámu̱cchiṣyáte ।
tasmínraśa̱nāṃ nyúnatti ।
pra̱jāpáti̱rvā ódanaḥ ।
reta̱ ājyā̐m ।
yadājyé raśa̱nāṃ nyu̱nattí ।
pra̱jāpátime̱va retása̱ samárdhayati ।
da̱rbha̱mayī́ raśa̱nā bhávati ।
ba̱hu vā e̱ṣa kúca̱ró'me̱dhyamupágacchati ।
yadaśváḥ ।
pa̱vitraṃ́ vai da̱rbhāḥ ॥ 3 ॥))

**[[3-8-2-4]]**

यद्द॑र्भ॒मयी॑ रश॒णा भव॑ति।
पु॒नात्ये॒वैना॑म्।
पू॒तमे॑नं॒ मेध्य॒माल॑भते।
अश्व॑स्य॒ वा आल॑ब्धस्य मह॒मोद॑क्रामत्।
स म॒हर्त्वि॑जः॒ प्रावि॑शत्।
तन्म॒हर्त्वि॑जां मह॒र्त्वि॒क्त्वम्।
यन्म॒हर्त्वि॑जः प्रा॒श्नन्ति॑।
म॒हि॒मान॑मे॒वास्मि॒न्तद्द॑धति।
अश्व॑स्य॒ वा आल॑ब्धस्य॒ रेत॒ उद॑क्रामत्।
तत्सु॒वर्ण॒ꣳ हिर॑ण्यमभवत्।
यत्सु॒वर्ण॒ꣳ हिर॑ण्यं॒ दद॑ाति।
रेत॑ ए॒व तद्द॑धाति।
ओ॒द॒ने दद॑ाति।
रेतो॒ वा ओ॑द॒नः।
रेतो॒ हिर॑ण्यम्।
रेत॑सै॒वास्मि॒न्रेतो॑ दधाति॥ ४॥
द॒धा॒ति॒ रु॒न्धे॒ द॒र्भा अ॑भव॒त्षट्च॑॥ २॥

((yaddárbha̱mayī́ raśa̱ṇā bhaváti ।
pu̱nātye̱vainā̐m ।
pū̱taménaṃ̱ medhya̱mālábhate ।
aśváya̱ vā ālábdhasya maha̱modákrāmat ।
sa ma̱hartvíja̱ḥ prāvíśat ।
tanma̱hartvíjāṃ mahartvi̱ktvam ।
yanma̱hartvíjaḥ prā̱śnantí ।
ma̱hi̱mānáme̱vāsmi̱ntaddádhati ।
aśvásya̱ vā ālábdhasya̱ reta̱ udákrāmat ।
tatsu̱varṇa̱m̐ hiráṇyamabhavat ।
yatsu̱varṇa̱m̐ hiráṇya̱ṃ dadáti ।
retá e̱va taddádhāti ।
o̱da̱ne dádāti ।
reto̱ vā ódanaḥ ।
reto̱ hiráṇyam ।
retásai̱vāsmi̱nretó dadhāti ॥ 4 ॥
da̱dhā̱ti̱ ru̱ndhe̱ da̱rbhā ábhava̱tṣaṭcá ॥ 2 ॥))

**[[3-8-3-1]]**

यो वै ब्रह्म॑णे दे॒वेभ्यः॑ प्र॒जाप॑तये॒ऽप्रति॒प्रोच्या॒श्वं॑ मेध्यं॑ ब॒ध्नाति॑।
आ दे॒वता॑भ्यो वृश्च्यते।
पापी॑यान्भवति।
यः प्र॑ति॒प्रोच्य॑।
न दे॒वता॑भ्य॒ आवृ॑श्च्यते।

वसी॑यान्भवति ॥
यदाह॑ ।
ब्र॒ह्मन्न॑श्वं॒ मेध्यं॑ भन्त्स्यामि दे॒वेभ्यः॑ प्र॒जाप॑तये॒ तेन॑
राध्यास॒मिति॑ ।
ब्र॒ह्म वै ब्र॒ह्मा ।
ब्र॒ह्मण॑ ए॒व दे॒वेभ्यः॑ प्र॒जाप॑तये प्रति॒प्रोच्याश्वं॒ मेध्यं॑
बध्नाति ॥ १ ॥

((yo vai brahmáṇe devebhyáḥ
prajāpátaye'prátiprocyāśvaṃ medhyaṃ badhnāti |
ā devatā̍bhyo vṛścyate |
pāpíyānbhavati |
yaḥ prátiprocyá |
na devatā̍bhya āvṛ́ścyate |
vasíyānbhavati ||
yadāhá |
brahmannaśvaṃ medhyaṃ bhantsyāmi devebhyáḥ
prajāpátaye tená rādhyāsamití |
brahma vai brahmā |
brahmáṇa eva devebhyáḥ prajāpátaye
pratiprocyāśvaṃ medhyaṃ badhnāti || 1 ||))

**[[3-8-3-2]]**

न दे॒वता᳚भ्य॒ आवृ॑श्च्यते ।
वसी॑यान्भवति ।
दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒व इति॑ रश॒नामाद॑त्ते॒ प्रसू᳚त्यै ।
अ॒श्विनो᳚र्बा॒हुभ्या॒मित्या॑ह ।
अ॒श्विनौ॒ हि दे॒वाना॑मध्व॒र्यू आस्ता᳚म् ।
पू॒ष्णो हस्ता᳚भ्या॒मित्या॑ह॒ यत्यै᳚ ।
व्यृ॑द्धं॒ वा ए॒तद्य॒ज्ञस्य॑ ।
यद॑य॒जुष्के॑ण क्रि॒यते᳚ ।
इ॒माम॑गृभ्णन्रश॒नामृ॒तस्येत्यधि॑वदति॒ यजु॑ष्कृत्यै ।
य॒ज्ञस्य॒ समृ॑द्ध्यै ॥ २ ॥

((na devatā̍bhya āvṛ́ścyate |
vasíyānbhavati |
devasyá tvā savituḥ prásava ití raśanāmādátte
prasū̍tyai |
aśvinórbāhubhyāmityáha |
aśvinau hi devānā́madhvaryū āstā̍m |
pūṣṇo hastā̍bhyāmityáha yatyai̍ |
vyṛ́ddhaṃ vā etadyajñasyá |
yadáyajuṣkéṇa kriyate̍ |
imāmágṛbhṇanraśanāmṛtasyetyadhívadati
yajúṣkṛtyai |
yajñasya samṛ́ddhyai || 2 ||))

**[[3-8-3-3]]**

तदा॑हुः ।
द्वाद॑शारत्नी रश॒ना कर्त॒व्या३ त्रयो॑दशार॒त्नी३रिति॑ ।
ऋ॒ष॒भो वा ए॒ष ऋ॑तू॒नाम् ।
यत्सं॑वत्स॒रः ।
तस्य॑ त्रयोद॒शो मासो॑ वि॒ष्टपा᳚म् ।
ऋ॒ष॒भ ए॒ष य॒ज्ञाना᳚म् ।
यद॑श्वमे॒धः ।
यथा॒ वा ऋ॑ष॒भस्य॑ वि॒ष्टपा᳚म् ।
ए॒वमे॒तस्य॑ वि॒ष्टपा᳚म् ।
त्र॒यो॒द॒शम॑र॒त्निꣳ र॑श॒नाया॑मु॒पाद॑धाति ॥ ३ ॥

((tadā́huḥ |
dvādáśāratnī raśanā kártavyā3 trayódaśāratnī3ritii |
ṛṣabho vā eṣa ṛ́tūnām |
yatsaṃ́vatsaraḥ |
tasyá trayodaśo māsó viṣṭapā̍m |
ṛṣabha eṣa yajñānā̍m |
yadáśvamedhaḥ |
yathā vā ṛ́ṣabhasyá viṣṭapā̍m |
evametasyá viṣṭapā̍m |
trayodaśamáratnim̐ ráśanāyā́mupādádhāti || 3 ||))

**[[3-8-3-4]]**

यथ॑र्ष॒भस्य॑ वि॒ष्टपꣳ॑ सꣳ॑स्क॒रोति॑ ।
ता॒दृगे॒व तत् ।
पूर्व॒ आयु॑षि वि॒दथे॑षु क॒व्येत्या॑ह ।
आयु॑रे॒वास्मि॑न्दधाति ।
तया॑ दे॒वाः सु॒तमाब॑भूवु॒रित्या॑ह ।
भूति॑मे॒वोपाव॑र्तते ।
ऋ॒तस्य॒ सामा᳚न्स॒रमा॒रप॒न्तीत्या॑ह ।
स॒त्यं वा ऋ॒तम् ।
स॒त्येनै॒वैन॑मृ॒तेनार॑भते ।
अ॒भि॒धा अ॒सीत्या॑ह ॥ ४ ॥

((yathárṣabhasyá viṣṭapam̐ sam̐skaroti |
tādṛgeva tat |
pūrva āyúṣi vidathéṣu kavyetyáha |
āyúrevāsmíndadhāti |
tayá devāḥ sutamābábhūvurityáha |
bhūtímevopāvártate |
ṛtasya sāmā̍nsaramārapantītyáha |
satyaṃ vā ṛtam|
satyenaivainámṛtenārábhate |
abhidhā asītyáha || 4 ||))

**[[3-8-3-5]]**

तस्मा॑दश्वमेधया॒जी सर्वा॑णि भू॒तान्य॒भिभ॑वति।

भुव॑नम॒सीत्या॑ह।

भू॒मान॑मे॒वोपै॑ति।

य॒न्ताऽसीत्या॑ह।

य॒न्तार॑मे॒वैनं॑ करोति।

ध॒र्ताऽसीत्या॑ह।

ध॒र्तार॑मे॒वैनं॑ करोति।

सो॑ऽग्निं वै॑श्वान॒रमित्या॑ह।

अ॒ग्नावे॒वैनं॑ वैश्वान॒रे जु॑होति।

सप्र॑थस॒मित्या॑ह॥ ५॥

((tasmā́daśvamedhayā̱jī sarvā́ṇi bhū̱tānya̱bhibhávati I
bhuvánama̱sītyā́ha I
bhū̱mānáme̱vopaíti I
ya̱ntā'sītyā́ha I
ya̱ntāráme̱vainaṃ́ karoti I
dha̱rtā'sītyā́ha I
dha̱rtāráme̱vainaṃ́ karoti I
sō̈'gniṃ vaíśvāna̱ramityā́ha I
a̱gnāve̱vainaṃ́ vaiśvāna̱re júhoti I
saprátha sa̱mityā́ha II 5 II))

**[[3-8-3-6]]**

प्र॒जयै॒वैनं॑ प॒शुभिः॑ प्रथयति।

स्वाहा॑कृ॒त इत्या॑ह।

होम॑ ए॒वास्यै॒षः।

पृ॒थि॒व्यामित्या॑ह।

अ॒स्यामे॒वैन॒ं प्रति॑ष्ठापयति।

य॒न्ता राड्य॒न्ताऽसि॒ यम॑नो ध॒र्ताऽसि॑ ध॒रुण॒ इत्या॑ह।

रू॒पमे॒वास्यै॒तन्म॑हि॒मान॒ं व्याच॑ष्टे।

कृ॒ष्यै त्वा॒ क्षेमा॑य त्वा र॒य्यै त्वा॒ पोषा॑य॒ त्वेत्या॑ह।

आ॒शिष॑मे॒वैतामाशा॑स्ते।

स्व॒गा त्वा॑ दे॒वेभ्य॒ इत्या॑ह।

दे॒वेभ्य॑ ए॒वैन॑ꣳ स्व॒गा क॑रोति।

स्वाहा॑ त्वा प्र॒जाप॑तय॒ इत्या॑ह।

प्रा॒जा॒प॒त्यो वा अश्वः॑।

यस्या॑ ए॒व दे॒वता॑या आल॒भ्यते॑।

तयै॒वैन॒ꣳ सम॑र्धयति॥ ६॥

ब॒ध्नाति॒ सम॑ृध्या उ॒पाद॑धात्यसीत्या॑ह॒ सप्र॑थस॒मित्या॑ह दे॒वेभ्य॒ इत्या॑ह॒ पञ्च॑ च॥ ३॥

((pra̱jayai̱vainaṃ pa̱śubhiḥ́ prathayati I
svāhā́kṛta̱ ityā́ha I
homá e̱vāsyai̱ṣaḥ I
pṛ̱thi̱vyāmityā́ha I
a̱syāme̱vainam̱ pratíṣṭhāpayati I
ya̱ntā rā̱dya̱ntā'si̱ yamáno dha̱rtā'sí dha̱ruṇa̱ ityā́ha I
rū̱pame̱vāsyai̱tanmáhi̱mānam̱ vyācáṣṭe I
kṛ̱ṣyai tvā̱ kṣemā́ya tvā ra̱yyai tvā̱ poṣā́ya̱ tvetyā́ha I
ā̱śiṣáme̱vaitāmāśā́ste I
sva̱gā tvā́ de̱vebhya̱ ityā́ha I
de̱vebhyá e̱vainaṃ́ sva̱gā károti I
svāhā́ tvā pra̱jāpátaya̱ ityā́ha I
prā̱jā̱pa̱tyo vā aśváḥ I
yasyā́ e̱va de̱vatā́yā āla̱bhyatē̈ I
taya̱ivainaṃ́ samárdhayati II 6 II
ba̱dhnāti̱ samṛ́ddhyā u̱pādádhātya̱sītyā́ha̱
saprátha sa̱mityā́ha de̱vebhya̱ ityā́ha̱ pañcá ca II 3 II))

**[[3-8-4-1]]**

यः पि॒तुर॑नु॒जायाः॑ पु॒त्रः।

स पु॒रस्ता॑न्नयति।

यो मा॒तुर॑नु॒जायाः॑ पु॒त्रः।

स प॒श्चान्न॑यति।

वि॒ष्वञ्च॑मे॒वास्मा॑त्पा॒प्मानं॒ विव॑ृहतः।

यो अर्व॑न्त॒ं जिघा॑ꣳसति॒ तम॒भ्य॑मीति॒ वरु॑ण॒ इति॒ श्वानं॑ चतुर॒क्षं प्रसौ॑ति।

प॒रो मर्तः॑ प॒रः श्वेति॒ शुन॑श्च॒तुर॒क्षस्य॒ प्रह॑न्ति।

श्वे॒व वै पा॒प्मा भ्रातृ॑व्यः।

पा॒प्मान॑मे॒वास्य॒ भ्रातृ॑व्यꣳ हन्ति।

सै॒ध्रकं मुस॑लं भवति॥ १॥

((yaḥ pi̱turánu̱jāyā́ḥ pu̱traḥ I
sa pu̱rastā́nnayati I
yo mā̱turánu̱jāyā́ḥ pu̱traḥ I
sa pa̱ścānnáyati I
vi̱ṣváñcame̱vāsmā́tpā̱pmānam̱ vivṛ́hataḥ I
yo arvántam̱ jighā́ṃsati̱ tama̱bhyámīti̱ varúṇa̱ iti̱ śvānaṃ́ catura̱kṣam̱ prasaúti I
pa̱ro martáḥ pa̱raḥ śveti̱ śunáścatu̱rakṣasya̱ prahánti I
śveva̱ vai pā̱pmā bhrātṛ́vyaḥ I
pā̱pmānáme̱vāsya̱ bhrātṛ́vyaṃ́ hanti I
sai̱dhra̱kaṃ musálaṃ bhavati II 1 II))

**[[3-8-4-2]]**

कर्म॑ कर्मै॑वास्मै॑ साधयति।

पौꣳ॒श्च॒ले॒यो ह॑न्ति।

पु॒ꣳश्च॒ल्वां वै दे॒वाः शुच॒ं न्य॑दधुः।
शु॒चैवास्य॒ शुच॑ꣳ हन्ति।
पा॒प्मा वा ए॒तमी॑प्स॒तीत्या॑हुः।
यो᳚ऽश्वमे॒धेन॒ यज॑त॒ इति॑।
अश्व॑स्याधस्प॒दमुपा᳚स्यति।
व॒ज्री वा अश्व॑ः प्राजाप॒त्यः।
वज्रे॑णै॒व पा॒प्मानं॒ भ्रातृ॑व्य॒मव॑क्रामति।
द॒क्षि॒णाऽप॑प्लावयति॥ २॥

((karmȧ karma̱ivāsma̠i sādhayati |
pauṁ̱ścaleyo hȧnti |
pu̱ṁ̱ścalvāṃ̱ vai de̱vāḥ śucaṃ̱ nyȧdadhuḥ |
śu̱caivāsya̱ śucaṁ̇ hanti |
pāpmā vā e̱tami̠psa̱tītyȧhuḥ |
yo̎'śvame̱dhena̱ yajȧta̱ iti̠ |
aśvȧsyādhaspa̱damupa̎syati |
va̱jrī vā aśvȧḥ prājāpa̱tyaḥ |
vajrėṇa̱iva pa̱pmānaṃ̱ bhrātṛ̇vya̱mavȧkrāmati |
da̱kṣi̱ṇā'pȧplāvayati || 2 ||))

**[[3-8-4-3]]**
पा॒प्मान॑मे॒वास्मा॒च्छम॑ल॒मप॑प्लावयति।
ऐ॒षी॒क उ॑दू॒हो भ॑वति।
आ॒यु॒र्वा इ॒षीका᳚ः।
आयु॑रे॒वास्मि॑न्दधति।
अ॒मृतं॑ वा इ॒षीका᳚ः।
अ॒मृत॑मे॒वास्मि॑न्दधति।
वे॒त॒स॒शा॒खोप॒संब॑द्धा भवति।
अ॒प्सुयो॑नि॒र्वा अश्व॑ः।
अ॒प्सु॒जो वे॑त॒सः।
स्वादे॒वैनं॒ योने॒र्निर्मि॑मीते।
पु॒रस्ता᳚त्प्र॒त्यञ्च॑म॒भ्युदू॑हति।
पु॒रस्ता॑दे॒वास्मि॑न्प्र॒तीच्य॒मृतं॑ दधाति।
अ॒हं च॒ त्वं च॑ वृत्रह॒न्निति॑ ब्र॒ह्मा यज॑मानस्य॒ हस्तं॑ गृ॒ह्णाति।
ब्र॒ह्म॒क्ष॒त्त्रे ए॒व संद॑धाति।
अ॒भि क्रत्वे᳚न्द्र भू॒रध॒ज्मन्नित्य॑ध्व॒र्युर्यज॑मानं
वा॒च॒य॒त्य॒भिजि॑त्यै॥ ३॥
भ॒व॒ति॒ प्ला॒व॒य॒ति॒ मि॒मी॒ते॒ पञ्च॑ च॥ ४॥

((pa̱pmānȧme̱vāsma̱cchamȧla̱mapȧplāvayati |
ai̱ṣi̱ka ȧdu̱ho bhȧvati |
āyu̱rvā i̱ṣīkā̎ḥ |
āyȧre̱vāsmi̠ndadhati |
a̱mṛtaṃ̱ vā i̱ṣīkā̎ḥ |
a̱mṛtȧme̱vāsmi̠ndadhati |
ve̱ta̱sa̱śa̱khopa̱sa̱mbȧddhā bhavati |
a̱psuyȯni̱rvā aśvȧḥ |
a̱psu̱jo vėta̱saḥ |
svāde̱vainaṃ̱ yone̱rnirmi̠mīte |
pu̱rastā̎tpra̱tyañcȧma̱bhyudu̇hati |
pu̱rastȧde̱vāsmi̠npra̱tīcya̱mṛtaṃ̇ dadhāti |
a̱haṃ ca̱ tvaṃ cȧ vṛtraha̱nniti̠ bra̱hmā yajȧmānasya̱
hastaṃ̇ gṛ̱hṇāti |
bra̱hma̱kṣa̱ttre e̱va saṃdȧdhāti |
a̱bhi kratve̎ndra
bhū̱radha̱jmannityȧdhva̱ryuryajȧmānaṃ
vā̱ca̱ya̱tya̱bhiji̠tyai || 3 ||
bha̱va̱ti̱ plā̱va̱ya̱ti̱ mi̱mī̱te̱ pañcȧ ca || 4 ||))

**[[3-8-5-1]]**
च॒त्वार॑ ऋ॒त्विज॑ः सम॑ुक्षन्ति।
आ॒भ्य ए॒वैनं॑ चत॒सृभ्यो॑ दि॒ग्भ्यो॑ऽभिसमी॑रयन्ति।
श॒तेन॑ राजपु॒त्रैः स॒हाध्व॒र्युः।
पु॒रस्ता᳚त्प्र॒त्यङ्ति॑ष्ठ॒न्प्रोक्ष॑ति।
अ॒नेनाश्वे॑न॒ मेध्ये॑नेष्ट्वा।
अ॒यꣳ राजा॑ वृ॒त्रं व॑ध्या॒दिति॑।
रा॒ज्यं वा अ॑ध्व॒र्युः।
क्ष॒त्त्रꣳ रा॑जपु॒त्रः।
रा॒ज्येनै॒वास्मि॑न्क्ष॒त्त्रं द॑धाति।
श॒तेना॑रा॒जभि॑रु॒ग्रैः स॒ह ब्र॒ह्मा॥ १॥

((ca̱tvārȧ ṛ̱tvija̱ḥ samȯkṣanti |
ā̱bhya e̱vainaṃ̇ cata̱sṛbhyȯ di̱gbhyȯ'bhisami̠rayanti |
śa̱tenȧ rājapu̱traiḥ sa̱hādhva̱ryuḥ |
pu̱rastā̎tpra̱tyȧnti̱ṣṭha̱nprokṣȧti |
a̱nenāśvėna̱ medhyėne̱ṣṭvā |
a̱yaṁ̇ rājȧ vṛ̱traṃ vȧdhyā̱diti̠ |
rā̱jyaṃ vā ȧdhva̱ryuḥ |
kṣa̱ttraṁ̇ rȧjapu̱traḥ |
rā̱jyenai̱vāsmi̠nkṣa̱ttraṃ dȧdhāti |
śa̱tenȧrā̱jabhi̠ru̱graiḥ sa̱ha bra̱hmā || 1 ||))

**[[3-8-5-2]]**
द॒क्षि॒ण॒त उ॒द॒ङ्ति॒ष्ठ॒न्प्रोक्ष॑ति।
अ॒नेनाश्वे॑न॒ मेध्ये॑नेष्ट्वा।
अ॒यꣳ राजा᳚ऽप्रतिधृ॒ष्यो᳚ऽस्त्विति॑।
बलं॑ वै ब्र॒ह्मा।
बल॑मरा॒जोग्रः।
बले॑नै॒वास्मि॒न्बलं॑ दधाति।

शतेन सूतग्रामणिभिः सह होता।
पश्चात्प्राङ्तिष्ठन्प्रोक्षति।
अनेनाश्वेन मेध्येनेष्ट्वा।
अयꣳ राजाऽस्यै विशः॥ २॥

((dakṣiṇata udaṅtiṣṭhanprokṣati |
anenāśvena medhyeneṣṭvā |
ayaṁ rājā'pratidhṛṣyo'stviti |
balaṁ vai brahmā |
balamarājograḥ |
balenaivāsminbalaṁ dadhāti |
śatena sūtagrāmaṇibhiḥ saha hotā |
paścātprāṅtiṣṭhanprokṣati |
anenāśvena medhyeneṣṭvā |
ayaṁ rājā'syai viśaḥ || 2 ||))

**[[3-8-5-3]]**
बहुग्वै बह्वश्वायै बह्वजाविकायै।
बहुव्रीहियवायै बहुमाषतिलायै।
बहुहिरण्यायै बहुहस्तिकायै।
बहुदासपूरुषायै रयिमत्यै पुष्टिमत्यै।
बहुरायस्पोषायै राजाऽस्त्विति।
भूमा वै होता।
भूमा सूतग्रामण्यः।
भूम्नैवास्मिन्भूमानं दधाति।
शतेन क्षत्तसंग्रहीतृभिः सहोद्गाता।
उत्तरतो दक्षिणा तिष्ठन्प्रोक्षति॥ ३॥

((bahugvai bahvaśvāyai bahvajāvikāyai |
bahuvrīhiyavāyai bahumāṣatilāyai |
bahuhiraṇyāyai bahuhastikāyai |
bahudāsapūruṣāyai rayimatyai puṣṭimatyai |
bahurāyaspoṣāyai rājā'stviti |
bhūmā vai hotā |
bhūmā sūtagrāmaṇyaḥ |
bhūmnaivāsminbhūmānaṁ dadhāti |
śatena kṣattasaṃgrahītṛbhiḥ sahodgātā |
uttarato dakṣiṇā tiṣṭhanprokṣati || 3 ||))

**[[3-8-5-4]]**
अनेनाश्वेन मेध्येनेष्ट्वा।
अयꣳ राजा सर्वमायुरेत्विति।
आयुर्वा उद्गाता।
आयुः क्षत्तसंग्रहीतारः।
आयुषैवास्मिन्नायुर्दधाति।
शतꣳ शतं भवन्ति।
शतायुः पुरुषः शतेन्द्रियः।
आयुष्येवेन्द्रिये प्रतितिष्ठति।
चतुःशता भवन्ति।
चतस्रो दिशः।
दिक्ष्वेव प्रतितिष्ठति॥ ४॥
ब्रह्मा विश उक्षिति दिश एकं च॥ ५॥

((anenāśvena medhyeneṣṭvā |
ayaṁ rājā sarvamāyuretviti |
āyurvā udgātā |
āyuḥ kṣattasaṃgrahītāraḥ |
āyuṣaivāsminnāyurdadhāti |
śataṁ śataṃ bhavanti |
śatāyuḥ puruṣaḥ śatendriyaḥ |
āyuṣyevendriye pratitiṣṭhati |
catuḥśatā bhavanti |
catasro diśaḥ |
dikṣveva pratitiṣṭhati || 4 ||
brahmā viśa ukṣiti diśa ekaṁ ca || 5 ||))

**[[3-8-6-1]]**
यथा वै हविषो गृहीतस्य स्कन्दति।
एवं वा एतदश्वस्य स्कन्दति।
यन्निक्तमनालब्धमुत्सृजन्ति।
यत्स्तोक्या अन्वाह।
सर्वहुतमेवैनं करोत्यस्कन्दाय।
अस्कन्नꣳ हि तत्।
यद्धुतस्य स्कन्दति।
सहस्रमन्वाह।
सहस्रसंमितः सुवर्गो लोकः।
सुवर्गस्य लोकस्याभिजित्यै॥ १॥

((yathā vai haviṣo gṛhītasya skandati |
evaṃ vā etadaśvasya skandati |
yanniktamanālabdhamutsṛjanti |
yatstokyā anvāha |
sarvahutamevainaṁ karotyaskandāya |
askannaṁ hi tat|
yaddhutasya skandati |
sahasramanvāha |
sahasrasammitaḥ suvargo lokaḥ |
suvargasya lokasyābhijityai || 1 ||))

**[[3-8-6-2]]**
यत्परिमिता अनुब्रूयात्।

परि॑मित॒मव॑रुन्धीत।
अप॑रिमिता॒ अन्वा॑ह।
अप॑रिमितः सु॒व॒र्गो लो॒कः।
सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै।
स्तोक्या॑ जुहोति।
या ए॒व वर्ष्या॒ आप॑ः।
ता अव॑रुन्धे।
अ॒स्यां जु॑होति।
इ॒यं वा अ॒ग्निर्वै॑श्वान॒रः॥ २॥

((yatpari̍mitā anubrū̱yāt |
pari̍mita̱mavárundhīta |
apárimitā̱ anvā́ha |
apárimitaḥ suva̱rgo lo̱kaḥ |
su̱va̱rgasyá lo̱kasya̱ samáṣṭyai |
stokyá juhoti |
yā e̱va varṣyā̱ āpáḥ |
tā avárundhe |
a̱syāṃ júhoti |
i̱yaṃ vā a̱gnirvai̍śvāna̱raḥ || 2 ||))

**[[3-8-6-3]]**

अ॒स्यामे॒वैना॒ः प्रति॑ष्ठापयति।
उ॒वाच॑ ह प्र॒जाप॑तिः।
स्तोक्या॑सु॒ वा अ॒हमश्व॑मे॒धꣳ सꣳस्था॑पयामि।
ते॒न त॒तः सꣳस्थि॑तेन चरा॒मीति॑।
अ॒ग्नये॒ स्वाहेत्या॑ह।
अ॒ग्नय॑ ए॒वैन॑ं जुहोति।
सोमा॑य॒ स्वाहेत्या॑ह।
सोमा॑यै॒वैन॑ं जुहोति।
स॒वि॒त्रे स्वाहेत्या॑ह।
स॒वि॒त्र ए॒वैन॑ं जुहोति॥ ३॥

((a̱syāme̱vainā̱ḥ prati̍ṣṭhāpayati |
u̱vācá ha pra̱jāpátiḥ |
stokyā́su̱ vā a̱hamáśvame̱dhaṃ saṃsthā́payāmi |
tena̱ tata̱ḥ saṃsthi̍tena carā̱mīti̍ |
a̱gnaye̱ svāhetyā́ha |
a̱gnayá e̱vainaṃ juhoti |
somā́ya̱ svāhetyā́ha |
somā́yai̱vainaṃ juhoti |
sa̱vi̱tre svāhetyā́ha |
sa̱vi̱tra e̱vainaṃ juhoti || 3 ||))

**[[3-8-6-4]]**

सर॑स्वत्यै॒ स्वाहेत्या॑ह।
सर॑स्वत्या ए॒वैन॑ं जुहोति।
पू॒ष्णे स्वाहेत्या॑ह।
पू॒ष्ण ए॒वैन॑ं जुहोति।
बृ॒ह॒स्पत॑ये॒ स्वाहेत्या॑ह।
बृ॒ह॒स्पत॑य ए॒वैन॑ं जुहोति।
अ॒पां मोदा॑य॒ स्वाहेत्या॑ह।
अ॒द्भ्य ए॒वैन॑ं जुहोति।
वा॒यवे॒ स्वाहेत्या॑ह।
वा॒यव॑ ए॒वैन॑ं जुहोति॥ ४॥

((sarásvatyai̱ svāhetyā́ha |
sarásvatyā e̱vainaṃ juhoti |
pū̱ṣṇe svāhetyā́ha |
pū̱ṣṇa e̱vainaṃ juhoti |
bṛha̱spatáye̱ svāhetyā́ha |
bṛha̱spatáya e̱vainaṃ juhoti |
a̱pāṃ modā́ya̱ svāhetyā́ha |
a̱dbhya e̱vainaṃ juhoti |
vā̱yave̱ svāhetyā́ha |
vā̱yavá e̱vainaṃ juhoti || 4 ||))

**[[3-8-6-5]]**

मि॒त्राय॒ स्वाहेत्या॑ह।
मि॒त्राय॑वैन॑ं जुहोति।
वरु॑णाय॒ स्वाहेत्या॑ह।
वरु॑णाय॒वैन॑ं जुहोति॥
ए॒ताभ्य॑ ए॒वैन॑ं दे॒वता॑भ्यो जुहोति।
दश॑ दश सं॒पाद॑ं जुहोति।
दशा॑क्षरा वि॒राट्।
अन्न॑ं वि॒राट्।
वि॒राजै॒वान्नाद्य॒मव॑रुन्धे।
प्र वा ए॒षो॑ऽस्माल्लो॒काच्च्य॑वते।
यः परा॑ची॒राहु॑तीर्जु॒होति॑।
पुन॑ः पुनरभ्याव॒र्तं॑ जुहोति।
अ॒स्मिन्ने॒व लो॒के प्रति॑तिष्ठति।
ए॒ताꣳ ह॒ वाव सो॑ऽश्वमे॒धस्य॒ सꣳस्थि॑तिमुवा॒चास्क॑न्दाय।
अस्क॑न्नꣳ॒ हि तत्।
यद्य॒ज्ञस्य॒ सꣳस्थि॑तस्य॒ स्कन्द॑ति॥ ५॥
अ॒भिजि॑त्यै वैश्वान॒रः स॑वि॒त्र ए॒वैन॑ं जुहोति वा॒यव॑ ए॒वैन॑ं

जु॒होति॒ च्यव॑ते॒ षट्च॑॥ ६॥

((mi̱trāya̱ svāhetya̍ha |
mi̱trāyai̱vainaṃ juhoti |
varu̍ṇāya̱ svāhetya̍ha |
varu̍ṇāyai̱vainaṃ juhoti ||
e̱tābhya̍ e̱vainaṃ de̱vatā̎bhyo juhoti |
daśa̍ daśa sa̱mpāda̍ṃ juhoti |
daśā̎kṣarā vi̱rāṭ |
anna̍ṃ vi̱rāṭ |
vi̱rājai̱vānnādya̱mava̍rundhe |
pra vā e̱ṣo̎'smāllo̱kāccya̍vate |
yaḥ parā̍cīrāhu̍tīrju̱hoti̍ |
puna̍ḥ punarabhyā̱varta̍ṃ juhoti |
a̱sminne̱va lo̱ke prati̍tiṣṭhati |
e̱tā̐ṃ ha̱ vāva so̎'śvame̱dhasya̱
sa̱̐ṃsthi̍timuvā̱cāskandā̍ya |
aska̍nnaṃ̐ hi tat|
yadya̱jñasya̱ sa̱̐ṃsthi̍tasya skanda̍ti || 5 ||
a̱bhiji̍tyai vaiśvāna̱raḥ sa̍vi̱tra e̱vainaṃ juhoti vā̱yava̍
e̱vainaṃ juhoti cyavate̱ ṣaṭca̍ || 6 ||))

**[[3-8-7-1]]**

प्र॒जाप॑तये त्वा॒ जुष्टं॑ प्रोक्षा॒मीति॑ पु॒रस्ता॑त्प्र॒त्यङ्ति॑ष्ठ॒न्प्रोक्ष॑ति।
प्र॒जाप॑ति॒र्वै दे॒वाना॑मन्ना॒दो वी॒र्या॑वान्।
अ॒न्ना॒द्य॑मे॒वास्मि॑न्वी॒र्यं॑ दधाति।
तस्मा॒दश्वः॑ पशू॒नाम॑न्ना॒दो वी॒र्या॑वत्तमः॥
इ॒न्द्रा॒ग्निभ्यां॑ त्वेति॑ दक्षिण॒तः।
इ॒न्द्रा॒ग्नी वै दे॒वाना॒मोजि॑ष्ठौ॒ बलि॑ष्ठौ।
ओज॑ ए॒वास्मि॒न्बलं॑ दधाति।
तस्मा॒दश्वः॑ पशू॒नामोजि॑ष्ठो॒ बलि॑ष्ठः।
वा॒यवे॒ त्वेति॑ प॒श्चात्।
वा॒युर्वै दे॒वाना॑मा॒शुः सा॑रसा॒रित॑मः॥ १॥

((pra̱jāpa̍taye tvā̱ juṣṭa̱ṃ prokṣa̱mīti̍
pura̱stā̎tpratya̱ṅtiṣṭha̱nprokṣa̍ti |
pra̱jāpa̍ti̱rvai de̱vānā̍mannā̱do vī̱ryā̍vān |
a̱nnādya̍me̱vāsmi̱nvīrya̱ṃ dadhāti |
tasmā̱daśva̍ḥ paśū̱nāma̍nnā̱do vī̱ryā̍vattamaḥ ||
i̱ndrā̱gnibhyā̱ṃ tveti̍ dakṣi̱ṇa̱taḥ |
i̱ndrā̱gnī vai de̱vānā̱mojiṣṭhau̱ bali̍ṣṭhau |
oja̍ e̱vāsmi̱nbala̍ṃ dadhāti |
tasmā̱daśva̍ḥ paśū̱nāmoji̍ṣṭho̱ bali̍ṣṭhaḥ |
vā̱yave̱ tveiti̍ pa̱ścāt |
vā̱yurvai de̱vānā̍mā̱śuḥ sa̍rasā̱ritā̍maḥ || 1 ||))

**[[3-8-7-2]]**

ज॒वमे॒वास्मि॑न्दधाति।
तस्मा॒दश्वः॑ पशू॒नामा॒शुः सा॑रसा॒रित॑मः।
वि॒श्वे॑भ्यस्त्वा दे॒वेभ्य॒ इत्यु॑त्तर॒तः।
विश्वे॒ वै दे॒वा दे॒वानां॑ यश॒स्वित॑माः।
यश॑ ए॒वास्मि॑न्दधाति।
तस्मा॒दश्वः॑ पशू॒नां यश॑स्वित॑मः।
दे॒वेभ्य॒स्त्वेत्य॒धस्ता॑त्।
दे॒वा वै दे॒वाना॒मप॑चिततमाः।
अप॑चितिमे॒वास्मि॑न्दधाति।
तस्मा॒दश्वः॑ पशू॒नामप॑चिततमः॥ २॥

((ja̱vame̱vāsmi̍ndadhāti |
tasmā̱daśva̍ḥ paśū̱nāmā̱śuḥ sa̍rasā̱ritā̍maḥ |
viśve̎bhyastvā de̱vebhya̱ ityu̍ttara̱taḥ |
viśve̱ vai de̱vā de̱vānā̍ṃ yaśa̱svitā̍māḥ |
yaśa̍ e̱vāsmi̍ndadhāti |
tasmā̱daśva̍ḥ paśū̱nāṃ ya̍śa̱svitā̍maḥ |
de̱vebhya̱stvetya̱dhastā̎t |
de̱vā vai de̱vānā̱mapa̍citatamāḥ |
apa̍citime̱vāsmi̍ndadhāti |
tasmā̱daśva̍ḥ paśū̱nāmapa̍citatamaḥ || 2 ||))

**[[3-8-7-3]]**

सर्वे॑भ्यस्त्वा दे॒वेभ्य॒ इत्युपरि॑ष्टात्।
सर्वे॒ वै दे॒वास्त्विषि॑मन्तो ह॒रस्वि॑नः।
त्विषि॑मे॒वास्मि॒न्हरो॑ दधाति।
तस्मा॒दश्वः॑ पशू॒नां त्विषि॑मान्ह॒रस्वित॑मः।
दि॒वे त्वाऽन्तरि॑क्षाय त्वा पृथि॒व्यै त्वेत्या॑ह।
ए॒भ्य ए॒वैनं॑ लो॒केभ्यः॒ प्रोक्ष॑ति।
स॒ते त्वाऽस॑ते त्वा॒ऽद्भ्यस्त्वौष॑धीभ्यस्त्वा॒ विश्वे॑भ्यस्त्वा
भू॒तेभ्य॒ इत्या॑ह।
तस्मा॑दश्वमेधया॒जिन॒ꣳ सर्वा॑णि भू॒तान्युप॑जीवन्ति।
ब्र॒ह्मवा॒दिनो॑ वदन्ति।
यत्प्रा॑जाप॒त्योऽश्वः॑।
अथ कस्मा॑देनम॒न्याभ्यो॑ दे॒वता॒भ्योऽपि॒ प्रोक्ष॒तीति॑।
अश्वे॒ वै सर्वा॑ दे॒वता॑ अ॒न्वाय॑त्ताः।
तं यद्विश्वे॑भ्यस्त्वा भू॒तेभ्य॒ इति॑ प्रो॒क्षति॑।
दे॒वता॑ ए॒वास्मि॑न्न॒न्वाया॑तयति।
तस्मा॒दश्वे॒ सर्वा॑ दे॒वता॑ अ॒न्वाय॑त्ताः॥ ३॥
सा॒र॒सा॒रि॒तमोप॑चिततमः प्राजाप॒त्योऽश्वः॒ पञ्च॑ च॥ ७॥

((sarve̎bhyastvā de̱vebhya̱ ityu̱pari̍ṣṭāt |
sarve̱ vai de̱vāstviṣi̍manto hara̱svina̍ḥ |
tviṣi̍me̱vāsmi̱nharo̍ dadhāti |
tasmā̱daśva̍ḥ paśū̱nāṃ tviṣi̍mānhara̱svitā̍maḥ |

di̱ve tvā̱'ntari̍kṣāya tvā pṛthi̱vyai tvetyā̍ha |
e̱bhya e̱vainaṃ̍ lo̱kebhya̱ḥ prokṣa̍ti |
sa̱te tvā'sa̍te tvā̱'dbhyastvauṣa̍dhībhyastvā̱
viśve̎bhyastvā bhū̱tebhya̱ ityā̍ha |
tasmā̍daśvamedhayā̱jina̱ṃ̍ sarvā̍ṇi
bhū̱tānyupa̍jīvanti |
bra̱hma̱vā̱dino̍ vadanti |
yatprā̱jā̱pa̱tyo'śva̍ḥ |
atha̱ kasmā̍denama̱nyābhyo̍ de̱vatā̱bhyo'pi̱
prokṣa̱tīti̍ |
aśve̱ vai sarvā̍ de̱vatā̍ a̱nvāyā̍ttāḥ |
taṃ̱ yadviśve̎bhyastvā bhū̱tebhya̱ iti̍ pro̱kṣati̍ |
de̱vatā̍ e̱vāsmi̍nna̱nvāyā̍tayati |
tasmā̱daśve̱ sarvā̍ de̱vatā̍ a̱nvāyā̍ttāḥ || 3 ||
sā̱ra̱sā̱rita̱mopa̍citatamaḥ prājāpa̱tyo'śva̱ḥ pañca̍ ca
|| 7 ||))

**[[3-8-8-1]]**

यथा॒ वै ह॒विषो॑ गृही॒तस्य॒ स्कन्द॑ति।
ए॒वं वा ए॒तद॑श्वस्य स्कन्दति।
यत्प्रोक्षि॑त॒मना॑लब्धमुत्सृ॒जन्ति॑।
यद॑श्वचरि॒तानि॑ जु॒होति॑।
स॒र्व॒हु॒तमे॒वैनं॑ करो॒त्यस्क॑न्दाय।
अस्क॑न्न॒ꣳ॒ हि तत्।
यद्धु॒तस्य॒ स्कन्द॑ति।
ईं॒का॒रा॒य॒ स्वाहेंकृ॑ता॒य॒ स्वाहेत्या॑ह।
ए॒तानि॒ वा अ॑श्वचरि॒तानि॑।
च॒रि॒तैरे॒वैन॒ꣳ॒ सम॑र्धयति॥ १॥

((yathā̱ vai ha̱viṣo̍ gṛhī̱tasya̱ skanda̍ti |
e̱vaṃ̱ vā e̱tadaśva̍sya skandati |
yatprokṣi̍ta̱manā̍labdhamutsṛ̱janti̍ |
yada̍śvacari̱tāni̍ ju̱hoti̍ |
sa̱rva̱hu̱tame̱vainaṃ̍ karo̱tyaskan̍dāya |
aska̍nna̱ṃ̱ hi tat|
yaddhu̱tasya̱ skanda̍ti |
ī̱ṃkā̱rāya̱ svāheṃkṛ̍tāya̱ svāhetyā̍ha |
e̱tāni̱ vā a̍śvacari̱tāni̍ |
ca̱ri̱taire̱vaina̱ṃ̱ samar̍dhayati || 1 ||))

**[[3-8-8-2]]**

तदा॑हुः।
अना॑हुतयो॒ वा अ॑श्वचरि॒तानि॑।
नैता हो॑त॒व्या॑ इति॑।
अथो॒ खल्वा॑हुः।
हो॒त॒व्या॑ ए॒व।
अत्र॒ वावैवं वि॒द्वानश्व॑मे॒धꣳ॒ सꣳ॒स्था॑पयति।
यद॑श्वचरि॒तानि॑ जु॒होति॑।
तस्मा॒द्धोत॒व्या॑ इति॑।
ब॒हि॒र्धा वा ए॑नमे॒तदा॒यत॑नाद्दधाति।
भ्रातृ॑व्यमस्मै जनयति॥ २॥

((tadā̍huḥ |
anā̍hutayo̱ vā a̍śvacari̱tāni̍ |
naitā ho̍ta̱vyā̍ iti̍ |
atho̱ khalvā̍huḥ |
ho̱ta̱vyā̍ e̱va |
atra̱ vāvaivaṃ̱ vi̱dvānā̍śvame̱dhaṃ̱ saṃ̱sthā̍payati |
yadā̍śvacari̱tāni̍ ju̱hoti̍ |
tasmā̎ddhota̱vyā̍ iti̍ |
ba̱hi̱rdhā vā e̍name̱tadā̱yata̍nāddadhāti |
bhrātṛ̍vyamasmai janayati || 2 ||))

**[[3-8-8-3]]**

यस्या॑नायत॒ने॒ऽन्यत्रा॒ग्नेरा॑हु॑तीर्जु॒होति॑।
सा॒वि॒त्रि॒या इ॒ष्ट्याः॑ पु॒रस्ता॒त्स्वि॒ष्ट॒कृतः॑।
आ॒ह॒व॒नीये॒ऽश्वचरि॒तानि॑ जुहोति।
आ॒यत॑न ए॒वास्याहु॑तीर्जु॒होति।
नास्मै॒ भ्रातृ॑व्यं जनयति।
तदा॑हुः।
य॒ज्ञ॒मु॒खे य॑ज्ञमुखे होत॒व्याः॑।
य॒ज्ञस्य॒ क्लृप्त्यै॑।
सु॒व॒र्गस्य॑ लो॒कस्यानु॑ख्यात्या॒ इति॑।
अथो॒ खल्वा॑हुः।

((yasyā̍nāyata̱ne̎'nyatrā̱gnerāhu̍tīrju̱hoti̍ |
sā̱vi̱tri̱yā i̱ṣṭyā̍ḥ pu̱rastā̎tsvi̱ṣṭa̱kṛtā̍ḥ |
ā̱ha̱va̱nīye̎'śvacari̱tāni̍ juhoti |
ā̱yata̍na e̱vāsyāhu̍tīrjuhoti |
nāsmai̱ bhrātṛ̍vyaṃ janayati |
tadā̍huḥ |
ya̱jña̱mu̱khe ya̍jñamukhe hota̱vyā̎ḥ |
ya̱jñasya̱ klṛptyai̍ |
su̱va̱rgasya̍ lo̱kasyānu̍khyātyā̱ iti̍ |
atho̱ khalvā̍huḥ |))

**[[3-8-8-4]]**

यद्य॑ज्ञमु॒खे य॑ज्ञमुखे जु॒हु॒यात्।
प॒शु॒भि॒र्यज॑मानं॒ व्य॑र्धयेत्।
अव॑ सु॒व॒र्गा॒ल्लो॒का॒त्प॑द्येत।
पापी॑यान्त्स्या॒दिति॑।
स॒कृ॒दे॒व हो॑त॒व्याः॑।
न यज॑मानं प॒शु॒भि॒र्व्य॑र्धयति।

अ॒भि सु॑व॒र्गं लो॒कं ज॑यति।
न पापी॑यान्भवति।
अ॒ष्टाच॑त्वारिꣳशतमश्वरू॒पाणि॑ जुहोति।
अ॒ष्टाच॑त्वारिꣳशदक्षरा॒ जग॑ती।
जाग॒तोऽश्वः॑ प्राजाप॒त्यः समृ॑द्ध्यै।
एक॒मति॑रिक्तं जुहोति।
तस्मा॒देकः॑ प्र॒जास्व॑र्धुकः॑॥ ४॥
अ॒र्ध॒य॒ति॒ ज॒न॒य॒ति॒ खल्वा॑हु॒र्जग॑ती॒ त्रीणि॑ च॥ ८॥

((yadyá̍jñamu̱khe yá̍jñamukhe juhu̱yāt ।
pa̱śubhi̱ryajá̍mānam vyá̍rdhayet ।
avá̍ suva̱rgāllo̱kātpá̍dyeta ।
pāpí̍yāntsyā̱dití̍ ।
sa̱kṛde̱va hó̍ta̱vyā̎ḥ ।
na yajá̍mānaṃ pa̱śubhi̱rvyá̍rdhayati ।
a̱bhi sú̍va̱rgaṃ lo̱kaṃ já̍yati ।
na pāpí̍yānbhavati ।
a̱ṣṭācá̍tvārimँ̐śatamaśvarū̱pāṇí̍ juhoti ।
a̱ṣṭācá̍tvārimँ̐śadakṣarā̱ jagá̍tī ।
jāga̱to'śvá̍ḥ prājāpa̱tyaḥ samí̍ddhyai ।
eka̱matí̍riktaṃ juhoti ।
tasmā̱deká̍ḥ pra̱jāsvardhú̍kaḥ ॥ 4 ॥
a̱rdha̱ya̱ti̱ ja̱na̱ya̱ti̱ khalvá̍hu̱rjagá̍tī̱ trīṇí̍ ca ॥ 8 ॥))

**[[3-8-9-1]]**

वि॒भूर्मा॒त्रा प्र॒भूः पि॒त्रेत्या॑ह।
इ॒यं वै मा॒ता।
अ॒सौ पि॒ता।
आ॒भ्यामे॒वैनं॒ परि॑ददाति।
अश्वो॑ऽसि॒ हयो॒ऽसीत्या॑ह।
शास्त्ये॒वैन॑मे॒तत्।
तस्मा॒᳚च्छि॒ष्टाः प्र॒जा जा॑यन्ते।
अत्यो॒ऽसीत्या॑ह।
तस्मा॒दश्वः॑ सर्वा॒᳚न्प॒शूनत्ये॑ऽति।
तस्मा॒दश्वः॑ सर्वे॑षां प॒शू॒नाꣳ श्रैष्ठ्यं॑ गच्छति॥ १॥

((vi̱bhūrmā̱trā pra̱bhūḥ pi̱tretyá̍ha ।
i̱yaṃ vai mā̱tā ।
a̱sau pi̱tā ।
ā̱bhyāme̱vainaṃ̱ parí̍dadāti ।
aśvó̍'si̱ hayo̱'sītyá̍ha ।
śāstye̱vainá̍me̱tat ।
tasmā̎cchi̱ṣṭāḥ pra̱jā já̍yante ।
atyo̱'sītyá̍ha ।
tasmā̱daśva̱ḥ sarvā̎npa̱śūnatyé̍'ti ।
tasmā̱daśva̱ḥ sarvé̍ṣāṃ pa̱śū̱nāmँ̐ śraiṣṭhyaṃ̍
gacchati ॥ 1 ॥))

**[[3-8-9-2]]**

प्र य॒शः श्रैष्ठ्य॑माप्नोति।
य ए॒वं वेद॑।
नरो॒ऽस्यर्वा॑ऽसि॒ सप्ति॑रसि वा॒ज्य॑सीत्या॑ह।
रू॒पमे॒वास्यै॒तन्म॑हि॒मानं॒ व्याच॑ष्टे।
ययु॒र्नामा॒ऽसीत्या॑ह।
ए॒तद्वा अश्व॑स्य प्रि॒यं ना॑म॒धेयं᳚म्।
प्रि॒येणै॒वैनं॒ नाम॒धेये॑ना॒भिव॑दति।
तस्मा॒दप्या॑मि॒त्रौ सं॒गत्य॑।
नाम्ना॒ चेद्ध्वये॑ते।
मि॒त्रमे॒व भ॑वतः॥ २॥

((pra yaśa̱ḥ śraiṣṭhyá̍māpnoti ।
ya e̱vaṃ vedá̍ ।
naro̱'syarvá̍'si̱ saptí̍rasi vā̱jyá̍sītyá̍ha ।
rū̱pame̱vāsyai̱tanmá̍hi̱mānaṃ̱ vyācá̍ṣṭe ।
yayu̱rnāmā̱'sītyá̍ha ।
e̱tadvā aśvá̍sya pri̱yaṃ ná̍ma̱dheyā̎m ।
pri̱yeṇai̱vainaṃ̱ nāma̱dheyé̍nā̱bhivá̍dati ।
tasmā̱dapyá̍mi̱trau sa̱ṃgatyá̍ ।
nāmnā̱ ceddhvayé̍te ।
mi̱trame̱va bhá̍vataḥ ॥ 2 ॥))

**[[3-8-9-3]]**

आ॒दि॒त्याना॒ं पत्वाऽन्वि॒हीत्या॑ह।
आ॒दि॒त्याने॒वैनं॒ गमयति।
अ॒ग्नये॒ स्वाहा॒ स्वाहे᳚न्द्रा॒ग्निभ्या॒मिति॑ पूर्व॑हो॒माञ्जु॑होति।
पूर्व॑ ए॒व द्वि॒षन्तं॒ भ्रातृ॑व्य॒मति॑क्रामति।
भूर॑सि भु॒वे त्वा॒ भव्या॑य त्वा भवि॒ष्य॒ते त्वेत्यु॒त्सृ॑जति
सर्व॑त्वाय।
देवा॑ आशापाला ए॒तं दे॒वेभ्योऽश्वं॒ मेधा॑य॒ प्रोक्षि॑तं
गोपाय॒तेत्या॑ह।
श॒तं वै तल्प्या॑ राजपु॒त्रा दे॒वा आ॑शापा॒लाः।
तेभ्य॑ ए॒वैनं॒ परि॑ददाति।
ई॒श्व॒रो वा अश्वः॒ प्रमु॑क्तः॒ परां᳚ परा॒वतं॒ गन्तोः᳚।
इ॒ह धृति॒ः स्वाहे॒ह विधृ॑ति॒ः स्वाहे॒ह रन्ति॒ः स्वाहे॒ह रम॑ति॒ः
स्वाहेति॑ च॒तृषु॒ प॒त्सु॒ जु॑होति॥ ३॥

((ā̱di̱tyānā̱ṃ patvā'nvi̱hītyá̍ha ।
ā̱di̱tyāne̱vainaṃ̱ gamayati ।
a̱gnaye̱ svāhā̱ svāhē̎ndrā̱gnibhyā̱mití̍
pūrvaho̱māñjú̍hoti ।

pūrva̍ e̱va dvi̱ṣantam̱ bhrātṛ̍vyamati̍krāmati ।
bhūrāsi bhu̱ve tvā̱ bhavyā̍ya tvā bhavi̱ṣya̱te
tvetyutsṛ̍jati sarva̱tvāyā̍ ।
devā̍ āśāpālā e̱taṃ de̱vebhyo'śvam̱ medhā̍ya̱
prokṣi̍taṃ gopāya̱tetyā̍ha ।
śa̱taṃ vai talpyā̍ rājapu̱trā de̱vā ā̍śāpā̱lāḥ ।
tebhyā̍ e̱vainam̱ pari̍dadāti ।
īśva̱ro vā aśva̱ḥ pramu̍kta̱ḥ parā̱m̐ parā̱vata̱ṃ
gantō̱ḥ ।
i̱ha dhṛti̱ḥ svāhe̱ha vidhṛ̍ti̱ḥ svāhe̱ha ranti̱ḥ svāhe̱ha
ramati̱ḥ svāheti̍ catṛ̱ṣu pa̱tsu ju̍hoti ॥ 3 ॥))

**[[3-8-9-4]]**

ए॒ता वा अश्व॑स्य॒ बन्ध॑नम्।
ता॒भि॒रे॒वैनं॑ बध्नाति।
तस्मा॒दश्वः॑ प्रमु॑क्तो॒ बन्ध॑न॒माग॑च्छति।
तस्मा॒दश्वः॑ प्रमु॑क्तो॒ बन्ध॑नं॒ न ज॑हाति।
रा॒ष्ट्रं वा अ॑श्वमे॒धः।
रा॒ष्ट्रे खलु॒ वा ए॒ते व्याय॑च्छन्ते।
येऽश्वं॑ मेध्य॒ꣳ रक्ष॑न्ति।
तेषां॒ य उ॒दृचं॒ गच्छ॑न्ति।
रा॒ष्ट्रादे॒व ते रा॒ष्ट्रं ग॑च्छन्ति।
अ॒थ य उ॒दृचं॒ न गच्छ॑न्ति॥
रा॒ष्ट्रादे॒व ते व्यव॑च्छिद्यन्ते।
परा॒ वा ए॒ष सि॑च्यते।
यो॑ऽब॒लो॑ऽश्वमे॒धेन॒ यज॑ते।
यद॒मित्रा॒ अश्वं॑ वि॒न्देर॑न्।
ह॒न्येता॑स्य य॒ज्ञः।
च॒तुः॒श॒ता र॑क्षन्ति।
य॒ज्ञस्याघा॑ताय।
अथा॒न्यमा॒नीय॒ प्रोक्षे॑युः।
सैव त॒तः प्राय॑श्चित्तिः॥ ४॥
ग॒च्छ॒ति॒ भ॒व॒तः प॒त्सु जु॑होति॒ न गच्छ॑न्ति॒ नवं॑ च॥ ९॥

((e̱tā vā aśvā̍sya̱ bandhā̍nam ।
tābhi̍re̱vainam̐ badhnāti ।
tasmā̱daśva̱ḥ pramu̍kto̱ bandhā̍na̱māga̍cchati ।
tasmā̱daśva̱ḥ pramu̍kto̱ bandhā̍na̱ṃ na ja̍hāti ।
rā̱ṣṭram̱ vā a̍śvame̱dhaḥ ।
rā̱ṣṭre khalu̱ vā e̱te vyāya̍cchante ।
ye'śva̱m̱ medhya̱m̐ rakṣa̍nti ।
teṣā̱m̱ ya u̱dṛca̱m̱ gaccha̍nti ।
rā̱ṣṭrāde̱va te rā̱ṣṭram̱ ga̍cchanti ।
a̱tha ya u̱dṛca̱m̱ na gaccha̍nti ॥
rā̱ṣṭrāde̱va te vyava̍cchidyante ।
parā̱ vā e̱ṣa si̍cyate ।
yo̍'ba̱lo̍'śvame̱dhena̱ yaja̍te ।
yada̱mitrā̱ aśva̍m̐ vi̱nderan̍ ।
ha̱nyetā̍sya ya̱jñaḥ ।
ca̱tu̱ḥśa̱tā ra̍kṣanti ।
ya̱jñasyāghā̍tāya ।
athā̱nyamā̱nīya̱ prokṣe̍yuḥ ।
saiva ta̱ta̱ḥ prāya̍ścittiḥ ॥ 4 ॥
ga̱cchati̱ bha̱va̱ta̱ḥ pa̱tsu ju̍hoti̱ na gaccha̍nti̱ navā̍
ca ॥ 9 ॥))

**[[3-8-10-1]]**

प्र॒जाप॑तिरकामयताश्वमे॒धेन॑ यजे॒येति॑।
स तपो॑ऽतप्यत।
तस्य॑ तेपा॒नस्य॑।
स॒प्तात्मनो॑ दे॒वता॒ उद॑क्रामन्।
सा दी॒क्षाऽभ॑वत्।
स ए॒तानि॑ वैश्वदे॒वान्य॑पश्यत्।
तान्य॑जुहोत्।
तैर्वै स दी॒क्षामव॑रुन्ध।
यद्वै॑श्वदे॒वानि॑ जु॒होति॑।
दी॒क्षामे॒व तैर्यज॑मा॒नोऽव॑रुन्धे॥ १॥

((pra̱jāpa̍tirakāmayatāśvame̱dhena̍ yaje̱yeti̍ ।
sa tapo̍'tapyata ।
tasya̍ tepā̱nasya̍ ।
sa̱ptātmano̍ de̱vatā̱ udā̍krāman ।
sā dī̱kṣā'bhā̍vat ।
sa e̱tāni̍ vaiśvade̱vānyā̍paśyat ।
tānyā̍juhot ।
tairvai sa dī̱kṣāmavā̍rundha ।
yadvai̍śvade̱vāni̍ ju̱hoti̍ ।
dīkṣāme̱va tairyajā̍mā̱no'vā̍rundhe ॥ 1 ॥))

**[[3-8-10-2]]**

स॒प्त जु॑होति।
स॒प्त हि ता दे॒वता॑ उ॒दक्रा॑मन्।
अ॒न्व॒हं जु॑होति।
अ॒न्व॒हमे॒व दी॒क्षामव॑रुन्धे।
त्रीणि॑ वैश्वदे॒वानि॑ जुहोति।
च॒त्वार्यौ॑द्ग्रह॒णानि॑।
स॒प्त संप॑द्यन्ते।
स॒प्त वै शी॒र्ष॒ण्याः॑ प्रा॒णाः।
प्रा॒णा दी॒क्षा।
प्रा॒णैरे॒व प्रा॒णान्दी॒क्षामव॑रुन्धे॥ २॥

((sa̱pta ju̍hoti ।
sa̱pta hi tā de̱vatā̍ u̱dakrā̍man ।
a̱nva̱haṃ ju̍hoti ।
a̱nva̱hame̱va dī̱kṣāmavā̍rundhe ।
trīṇi̍ vaiśvade̱vāni̍ juhoti ।
ca̱tvāryau̍dgraha̱ṇāni̍ ।
sa̱pta sam̱pā̍dyante ।
sa̱pta vai śi̍rṣa̱ṇyā̎ḥ prā̱ṇāḥ ।
prā̱ṇā dī̱kṣā ।
prā̱ṇaire̱va prā̱ṇāndī̱kṣāmavā̍rundhe ॥ 2 ॥))

**[[3-8-10-3]]**

एक॑विꣳशतिं वैश्वदे॒वानि॑ जुहोति।
एक॑विꣳशति॒र्वै दे॑वलो॒काः।
द्वाद॑श॒ मासाः॒ पञ्च॒र्तव॑ः।
त्रय॑ इ॒मे लो॒काः।
अ॒सावा॑दि॒त्य ए॑कवि॒ꣳशः।
ए॒ष सु॑व॒र्गो लो॒कः।
तद्दै॒व्यं॑ क्ष॒त्त्रम्।
सा श्रीः।
तद्ब्र॒ध्नस्य॑ वि॒ष्टप॑म्।
तत्स्वारा॒॑ज्यमुच्यते॥ ३॥

((ekā̍viꣳ̍śatiṃ vaiśvade̱vāni̍ juhoti ।
ekā̍viꣳ̍śati̱rvai de̍valo̱kāḥ ।
dvāda̍śa̱ māsā̱ḥ pañca̱rtava̍ḥ ।
traya̍ i̱me lo̱kāḥ ।
a̱sāvā̍di̱tya e̍kavi̱ꣳ̍śaḥ ।
e̱ṣa su̍va̱rgo lo̱kaḥ ।
taddaivya̱ṃ̍ kṣa̱ttram ।
sā śrīḥ ।
tadbra̱dhnasya̍ vi̱ṣṭapa̍m ।
tatsvārā̎jyamucyate ॥ 3 ॥))

**[[3-8-10-4]]**

त्रि॒ꣳ॒शत॑मौद्ग्र॒ह॒णानि॑ जुहोति।
त्रि॒ꣳ॒शद॑क्षरा वि॒राट्।
अन्नं॑ वि॒राट्।
वि॒राजै॒वान्नाद्य॒मव॑रुन्धे।
त्रे॒धा वि॒भज्य॑ दे॒वतां॑ जुहोति।
त्र्या॑वृतो॒ वै दे॒वाः।
त्र्या॑वृत इ॒मे लो॒काः।
ए॒षां लो॒काना॒माप्त्यै॑।
ए॒षां लो॒काना॒ं क्लृप्त्यै॑।
अप॒ वा ए॒तस्मा॑त्प्रा॒णाः क्रा॑मन्ति॥ ४॥

((tri̱ꣳ̍śatā̍maudgraha̱ṇāni̍ juhoti ।
tri̱ꣳ̍śadā̍kṣarā vi̱rāṭ ।
annaṃ̍ vi̱rāṭ ।
vi̱rāja̱ivānnādya̱mavā̍rundhe ।
tre̱dhā vi̱bhajya̍ de̱vatā̱ṃ̍ juhoti ।
tryā̍vṛto̱ vai de̱vāḥ ।
tryā̍vṛta i̱me lo̱kāḥ ।
e̱ṣāṃ lo̱kānā̱māptyai̎ ।
e̱ṣāṃ lo̱kānā̱ṃ kḷptyai̎ ।
apa̱ vā e̱tasmā̎tprā̱ṇāḥ krā̍manti ॥ 4 ॥))

**[[3-8-10-5]]**

यो दी॒क्षाम॑तिरे॒चय॑ति।
स॒प्ताहं॑ प्रच॑रन्ति।
स॒प्त वै शी॑र्ष॒न्या॑ः प्रा॒णाः।
प्रा॒णा दी॒क्षा।
प्रा॒णैरे॒व प्रा॒णान्दी॒क्षामव॑रुन्धे।
पू॒र्णा॒हु॒तिमु॑त्त॒मां जु॑होति।
सर्वं॒ वै पू॒र्णा॒हु॒तिः।
सर्व॑मे॒वाप्नो॑ति।
अथो॑ इ॒यं वै पू॒र्णा॒हु॒तिः।
अ॒स्यामे॒व प्रति॑तिष्ठति॥ ५॥
रु॒न्धे प्रा॒णान्दी॒क्षामव॑रुन्ध उच्यते क्रामन्ति तिष्ठति॥
१०॥

((yo dī̱kṣāmā̍tire̱cayā̍ti ।
sa̱ptā̱haṃ pracā̍ranti ।
sa̱pta vai śi̍rṣa̱ṇyā̎ḥ prā̱ṇaḥ ।
prā̱ṇā dī̱kṣā ।
prā̱ṇaire̱va prā̱ṇāndī̱kṣāmavā̍rundhe ।
pū̱rṇā̱hu̱timu̍tta̱mā̱ṃ ju̍hoti ।
sarva̱ṃ vai pū̎rṇā̱hu̱tiḥ ।
sarvā̍me̱vāpno̍ti ।
atho̍ i̱yaṃ vai pū̎rṇā̱hu̱tiḥ ।
a̱syāme̱va prati̍tiṣṭhati ॥ 5 ॥
ru̱ndhe̱ prā̱ṇāndī̱kṣāmavā̍rundha ucyate krāmanti tiṣṭhati ॥ 10 ॥))

**[[3-8-11-1]]**

प्र॒जाप॑तिरश्वमे॒धम॑सृजत।
तꣳ सृ॒ष्टं न किं॒चनोद॑यच्छत्।
तं वै॑श्वदे॒वान्येवोद॑यच्छन्।
यद्वै॑श्वदे॒वानि॑ जु॒होति॑।
य॒ज्ञस्योद्य॑त्यै।
स्वाहा॒ऽऽधिमाधीता॒य स्वाहा॑।

स्वाहाऽऽधीतं मन॑से स्वाहा॑।
स्वाहा मनः॑ प्रजाप॑तये स्वाहा॑।
काय स्वाहा कस्मै स्वाहा॑ कतमस्मै स्वाहेति॑ प्राजापत्ये मुख्ये॑ भवतः।
प्रजाप॑तिमुखाभिरेवैनं॑ देवता॑भिरुद्य॑च्छते॥ १॥

((prajāpatiraśvamedhamasṛjata |
tam̐ sṛṣṭaṃ na kiṃcanodayacchat |
taṃ vaiśvadevānyevodayacchan |
yadvaiśvadevāni juhoti |
yajñasyodyatyai |
svāhā''dhimādhitāya svāhā |
svāhā''dhitaṃ manase svāhā |
svāhā manaḥ prajāpataye svāhā |
kāya svāhā kasmai svāhā katamasmai svāheti prājāpatye mukhye bhavataḥ |
prajāpatimukhābhirevainaṃ devatābhirudyacchate || 1 ||))

**[[3-8-11-2]]**

अदि॑त्यै स्वाहाऽदि॑त्यै मह्यै॑ स्वाहाऽदि॑त्यै सुमृडीकायै स्वाहेत्या॑ह।
इयं वा अदि॑तिः।
अस्या एवैनं॑ प्रतिष्ठायोद्य॑च्छते।
सर॑स्वत्यै स्वाहा सर॑स्वत्यै बृहत्यै॑ स्वाहा सर॑स्वत्यै पावकायै स्वाहेत्या॑ह।
वाग्वै सर॑स्वती।
वाचैवैनमुद्य॑च्छते॥
पूष्णे स्वाहा॑ पूष्णे प्र॑पथ्या॑य स्वाहा॑ पूष्णे नरन्धि॑षाय स्वहेत्या॑ह।
पशवो वै पूषा।
पशुभि॑रेवैनमुद्य॑च्छते।
त्वष्ट्रे स्वाहा त्वष्ट्रे॑ तुरीपा॑य स्वाहा त्वष्ट्रे॑ पुरुरूपा॑य स्वाहेत्या॑ह।
त्वष्टा वै प॑शूनां मि॑थुनानाꣳ॑ रूपकृत्।
रूपमेव पशुषु॑ दधाति।
अथो॑ रूपैरेवैनमुद्य॑च्छते।
विष्ण॑वे स्वाहा विष्ण॑वे निखुर्य॑पाय स्वाहा विष्ण॑वे निभूयपाय स्वाहेत्या॑ह।
यज्ञो वै विष्णुः॑।
यज्ञायैवैनमुद्य॑च्छते।
पूर्णाहुतिमु॑त्तमां जु॑होति।
प्रत्यु॑त्तब्ध्यै सयत्वाय॑॥ २॥
यच्छते पुरुरूपा॑य स्वाहेत्या॑हाष्टौ च॑॥ ११॥

((adityai svāhā'dityai mahyai svāhā'dityai sumṛdīkāyai svāhetyāha |
iyaṃ vā aditiḥ |
asyā evainaṃ pratiṣṭhāyodyacchate |
sarasvatyai svāhā sarasvatyai bṛhatyai svāhā sarasvatyai pāvakāyai svāhetyāha |
vāgvai sarasvatī |
vācaivainamudyacchate ||
pūṣṇe svāhā pūṣṇe prapathyāya svāhā pūṣṇe narandhiṣāya svahetyāha |
paśavo vai pūṣā |
paśubhirevainamudyacchate |
tvaṣṭre svāhā tvaṣṭre turīpāya svāhā tvaṣṭre pururūpāya svāhetyāha |
tvaṣṭā vai paśūnāṃ mithunānām̐ rūpakṛt |
rūpameva paśuṣu dadhāti |
atho rūpairevainamudyacchate |
viṣṇave svāhā viṣṇave nikhuryapāya svāhā viṣṇave nibhūyapāya svāhetyāha |
yajño vai viṣṇuḥ |
yajñāyaivainamudyacchate |
pūrṇāhutimuttamāṃ juhoti |
pratyuttabdhyai sayatvāya || 2 ||
yacchate pururūpāya svāhetyāhāṣṭau ca || 11 ||))

**[[3-8-12-1]]**

सावित्रमष्टाक॑पालं प्रातर्निर्व॑पति।
अष्टाक्ष॑रा गायत्री।
गायत्रं प्रा॑तःसवनम्।
प्रातःसवनादेवैनं॑ गायत्रियाश्छन्द॑सोऽधि निर्मि॑मीते।
अथो॑ प्रातःसवनमेव तेना॑प्नोति।
गायत्रीं छन्दः॑॥
सवित्रे प्र॑सवित्र एका॑दशकपालं मध्यन्दि॑ने।
एका॑दशाक्षरा त्रिष्टुप्।
त्रैष्टु॑भं माध्य॑न्दिनꣳ॑ सव॑नम्।
माध्य॑न्दिनादेवैनꣳ॑ सव॑नात्त्रिष्टुभश्छन्द॑सोऽधि निर्मि॑मीते॥ १॥

((sāvitramaṣṭākapālaṃ prātarnirvapati |
aṣṭākṣarā gāyatrī |
gāyatraṃ prātaḥsavanam |
prātaḥsavanādevainaṃ gāyatriyāśchandaso'dhi nirmimīte |
atho prātaḥsavanameva tenāpnoti |
gāyatrīṃ chandaḥ ||
savitre prasavitra ekādaśakapālaṃ madhyandine |

ekādaśākṣarā triṣṭúp ।
traiṣṭúbhaṃ mādhyándinaṃ̐ savánam ।
mādhyándinādevainaṃ̐
savánāttriṣṭubhaśchandaso'dhi nirmimīte ॥ 1 ॥))

**[[3-8-12-2]]**

अथो माध्यंन्दिनमेव सवनं तेनाँप्नोति।
त्रिष्टुभं छन्दः।
सवित्र आंसवित्रे द्वादंशकपालमपराह्णे।
द्वादंशाक्षरा जगंती।
जागंतं तृतीयसवनम्।
तृतीयसवनादेवैनं जगंत्याश्छन्दसोऽधि निर्मिमीते।
अथो तृतीयसवनमेव तेनाँप्नोति।
जगंतीं छन्दः।
ईश्वरो वा अश्वः प्रमुक्तः परां परावतं गन्तोः।
इह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमंतिः स्वाहेति
चतंस्र आहुंतीर्जुहोति।
चतंस्रो दिशंः।
दिग्भिरेवैनं परिगृह्णाति।
आश्वंत्थो व्रजो भंवति।
प्रजापंतिर्देवेभ्यो निलांयत।
अश्वो रूपं कृत्वा।
सोऽश्वत्थे संवत्सरमंतिष्ठत्।
तदंश्वत्थस्याँश्वत्थत्वम्।
यदाश्वंत्थो व्रजो भवंति।
स्व एवैनं योनौ प्रतिष्ठापयति॥ २॥
त्रिष्टुभश्छन्दसोऽधि निर्मिमीते जुहोति नवं च॥ १२॥

((atho mādhyándinameva savánaṃ tenā̐pnoti ।
triṣṭubhaṃ chandáḥ ।
savitra ā́savitre dvādáśakapālamaparāhṇe ।
dvādáśākṣarā jagátī ।
jāgátaṃ tṛtīyasavanam ।
tṛtīyasavanādevainaṃ jagátyāśchandaso'dhi nirmimīte ।
athó tṛtīyasavanameva tenā̐pnoti ।
jagátīṃ chandáḥ ।
īśvaro vā aśvaḥ pramúktaḥ parā̐ṃ parāvataṃ gantōḥ ।
iha dhṛtiḥ svāheha vidhṛ́tiḥ svāheha rantiḥ svāheha ramátiḥ svāheti
catásra āhútīrjuhoti ।
catásro diśáḥ ।
digbhirevainaṃ parigṛhṇāti ।
āśvattho vrajo bhávati ।
prajāpátirdevebhyo nilā́yata ।
aśvó rūpaṃ kṛtvā ।
sō'śvatthe saṁvatsaramátiṣṭhat।
tadáśvatthasyā̐śvatthatvam ।
yadāśváttho vrajo bhaváti ।
sva evainaṃ yonau pratiṣṭhāpayati ॥ 2 ॥
triṣṭubhaśchandaso'dhi nirmimīte juhoti navá ca ॥ 12 ॥))

**[[3-8-13-1]]**

आ ब्रह्मंन्ब्राह्मणो ब्रह्मवर्चसी जायतामित्यांह।
ब्राह्मण एव ब्रह्मवर्चसं दंधाति।
तस्माँत्पुरा ब्राँह्मणो ब्रह्मवर्चस्यंजायत।
आऽस्मिन्राष्ट्रे राजन्यं इषव्यः शूरों महारथो जायतामित्यांह।
राजन्यं एव शौर्यं मंहिमानं दधाति।
तस्माँत्पुरा राजन्यं इषव्यः शूरों महारथोंऽजायत।
दोग्ध्रीं धेनुरित्यांह।
धेन्वामेव पयों दधाति।
तस्माँत्पुरा दोग्ध्रीं धेनुरंजायत।
वोढाऽनड्वानित्यांह॥ १॥

((ā brahmánbrāhmaṇo bráhmavarcasī jā́yatāmityā́ha ।
brāhmaṇa eva bráhmavarcasaṃ dádhāti ।
tasmā̐tpurā brā̐hmaṇo bráhmavarcasyájāyata ।
ā'sminrāṣṭre rā́janyá iṣavyáḥ śūró mahāratho jā́yatāmityā́ha ।
rājanyá eva śauryaṃ máhimānaṃ dadhāti ।
tasmā̐tpurā rā́janyá iṣavyáḥ śūró mahārathó'jāyata ।
dogdhrī́ dhenurityā́ha ।
dhenvāmeva payó dadhāti ।
tasmā̐tpurā dogdhrī́ dhenurájāyata ।
voḍhā́'naḍvānityā́ha ॥ 1 ॥))

**[[3-8-13-2]]**

अनडुह्येव वीर्यं दधाति।
तस्माँत्पुरा वोढाऽनड्वानंजायत॥
आशुः सप्तिरित्यांह।
अश्व एव जवं दंधाति।
तस्माँत्पुराऽऽशुरश्वोंऽजायत॥
पुरंधिर्योषेत्यांह।
योषित्येव रूपं दंधाति।
तस्मात्स्त्री युंवतिः प्रिया भावुंका।

जि॒ष्णू र॑थे॒ष्ठा इत्या॑ह।
आ ह॒ वै तत्र॑ जि॒ष्णू र॑थे॒ष्ठा जा॑यते॥ २॥

((a̱na̱ḍuhyeva vīrya̍ṃ dadhāti ।
tasmā̎tpu̱rā vo̱ḍhā̍'na̱ḍvāna̍jāyata ॥
ā̱śuḥ sapti̱rityā̍ha ।
aśva̍ e̱va ja̱vaṃ da̍dhāti ।
tasmā̎tpu̱rā''śuraśvo̍'jāyata ॥
pura̍ṃdhi̱ryo̱ṣetyā̍ha ।
yo̱ṣitye̱va rūpaṃ da̍dhāti ।
tasmā̱tstrī yu̍va̱tiḥ pri̱yā bhāvu̍kā ।
ji̱ṣṇū ra̍the̱ṣṭhā ityā̍ha ।
ā ha̱ vai tatra̍ ji̱ṣṇū ra̍the̱ṣṭhā jā̍yate ॥ 2 ॥))

**[[3-8-13-3]]**

यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते।
स॒भेयो॒ युवेत्या॑ह।
यो वै पू॒र्ववय॒सी।
स स॒भेयो॒ युवा॑।
तस्मा॒द्युवा॒ पुमा॑न्प्रि॒यो भावु॑कः।
आऽस्य यज॑मानस्य वी॒रो जा॑यता॒मित्या॑ह।
आ ह॒ वै तत्र॒ यज॑मानस्य वी॒रो जा॑यते।
यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते।
नि॒कामे नि॑कामे नः प॒र्जन्यो॑ वर्ष॒त्वित्या॑ह।
नि॒कामे नि॑कामे ह॒ वै तत्र॑ प॒र्जन्यो॑ वर्षति।
यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते।
फ॒लिन्यो॑ न॒ ओष॑धयः पच्यन्ता॒मित्या॑ह।
फ॒लिन्यो॑ ह॒ वै तत्रौष॑धयः पच्यन्ते।
यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते।
यो॒ग॒क्षे॒मो न॑ः कल्पता॒मित्या॑ह।
कल्प॑ते ह॒ वै तत्र॑ प्र॒जाभ्यो॑ योगक्षे॒मः।
यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते॥ ३॥
अ॒न॒ड्वानित्या॑ह जायते वर्षति स॒प्त च॑॥ १३॥

((yatrai̱tena̍ ya̱jñena̱ yaja̍nte ।
sa̱bheyo̱ yuvetyā̍ha ।
yo vai pū̎rvavaya̱sī ।
sa sa̱bheyo̱ yuvā̎ ।
tasmā̱dyuvā̱ pumā̎npri̱yo bhāvu̍kaḥ ।
ā'sya yaja̍mānasya vī̱ro jā̍yatā̱mityā̍ha ।
ā ha vai tatra̱ yaja̍mānasya vī̱ro jā̍yate ।
yatrai̱tena̍ ya̱jñena̱ yaja̍nte ।
ni̱kā̱me ni̍kāme naḥ pa̱rjanyo̍ varṣa̱tvityā̍ha ।
ni̱kā̱me ni̍kāme ha̱ vai tatra̍ pa̱rjanyo̍ varṣati ।
yatrai̱tena̍ ya̱jñena̱ yaja̍nte ।
pha̱linyo̍ na̱ oṣa̍dhayaḥ pacyantā̱mityā̍ha ।
pha̱linyo̍ ha̱ vai tatrauṣa̍dhayaḥ pacyante ।
yatrai̱tena̍ ya̱jñena̱ yaja̍nte ।
yo̱ga̱kṣe̱mo na̍ḥ kalpatā̱mityā̍ha ।
kalpa̍te ha̱ vai tatra̍ pra̱jābhyo̍ yogakṣe̱maḥ ।
yatrai̱tena̍ ya̱jñena̱ yaja̍nte ॥ 3 ॥
a̱na̱ḍvānityā̍ha jāyate varṣati sa̱pta ca̍ ॥ 13 ॥))

**[[3-8-14-1]]**

प्र॒जाप॑तिर्दे॒वेभ्यो॑ य॒ज्ञान्व्यादि॑शत्।
स आ॒त्मन्न॑श्वमे॒धम॑धत्त।
तं दे॒वा अ॑ब्रुवन्।
ए॒ष वाव य॒ज्ञः।
यद॑श्वमे॒धः।
अप्ये॒व नोऽत्रा॒स्त्विति॑।
तेभ्य॑ ए॒तान॑न्नहो॒मान्प्राय॑च्छत्।
ताना॑जुहोत्।
तैर्वै स दे॒वाना॑प्रीणात्।
यद॑न्नहो॒माञ्जु॒होति॑॥ १॥

((pra̱jāpa̍tirde̱vebhyo̍ ya̱jñānvyādi̍śat ।
sa ā̱tmanna̍śvame̱dhama̍dhatta ।
taṃ de̱vā a̍bruvan ।
e̱ṣa vāva ya̱jñaḥ ।
yada̍śvame̱dhaḥ ।
apye̱va no'trā̱stviti̍ ।
tebhya̍ e̱tāna̍nnaho̱mānprāya̍cchat ।
tāna̍juhot ।
tairvai sa de̱vāna̍prīṇāt ।
yada̍nnaho̱māñju̱hoti̍ ॥ 1 ॥))

**[[3-8-14-2]]**

दे॒वाने॒व तैर्यज॑मानः प्रीणाति।
आज्ये॑न जुहोति।
अ॒ग्नेर्वा ए॒तद्रू॒पम्।
यदाज्य॑म्।
यदाज्ये॑न जु॒होति॑।
अ॒ग्निमे॒व तत्प्री॑णाति।
मधु॑ना जुहोति।
म॒ह॒त्यै वा ए॒तद्दे॒वता॑यै रू॒पम्।
यन्मधु॑।
यन्मधु॑ना जु॒होति॑॥ २॥

((de̱vāne̱va tairyaja̍mānaḥ prīṇāti ।
ājye̍na juhoti ।

a̱gnervā e̱tadrū̱pam ।
yadājya̍m ।
yadājye̍na ju̱hoti̍ ।
a̱gnime̱va tatprī̍ṇāti ।
madhu̍nā juhoti ।
ma̱ha̱tyai vā e̱tadde̱vata̍yai rūpam ।
yanmadhu̍ ।
yanmadhu̍nā ju̱hoti̍ ॥ 2 ॥))

**[[3-8-14-3]]**

म॒ह॒तीमे॒व त॒द्देवता॑ँ प्रीणाति।
त॒ण्डु॒लैर्जु॑होति।
वसू॑ना॒ं वा ए॒तद्रू॒पम्।
यत्त॑ण्डु॒लाः।
यत्त॑ण्डु॒लैर्जु॒होति॑।
वसू॑ने॒व तत्प्री॑णाति।
पृथु॑कैर्जु॒होति॑।
रु॒द्राणा॒ं वा ए॒तद्रू॒पम्।
यत्पृथु॑काः।
यत्पृथु॑कैर्जु॒होति॑॥ ३॥

((ma̱ha̱tīme̱va tadde̱vatā̱m̐ prīṇāti ।
ta̱ṇḍu̱lairju̍hoti ।
vasū̍nā̱ṃ vā e̱tadrū̱pam ।
yatta̍ṇḍu̱lāḥ ।
yatta̍ṇḍu̱lairju̱hoti̍ ।
vasū̍ne̱va tatprī̍ṇāti ।
pṛthu̍kairju̱hoti̍ ।
ru̱drāṇā̱ṃ vā e̱tadrū̱pam ।
yatpṛthu̍kāḥ ।
yatpṛthu̍kairju̱hoti̍ ॥ 3 ॥))

**[[3-8-14-4]]**

रु॒द्राने॒व तत्प्री॑णाति।
ला॒जैर्जु॑होति।
आ॒दि॒त्याना॒ं वा ए॒तद्रू॒पम्।
यल्ला॒जाः।
यल्ला॒जैर्जु॒होति॑।
आ॒दि॒त्याने॒व तत्प्री॑णाति।
क॒रम्बै॑र्जु॒होति।
विश्वे॑षा॒ं वा ए॒तद्दे॒वाना॑ꣳ रू॒पम्।
यत्क॒रम्बा॑ः।
यत्क॒रम्बै॑र्जु॒होति॑॥ ४॥

((ru̱drāne̱va tatprī̍ṇāti ।
lā̱jairju̍hoti ।
ā̱di̱tyānā̱ṃ vā e̱tadrū̱pam ।
yallā̱jāḥ ।
yallā̱jairju̱hoti̍ ।
ā̱di̱tyāne̱va tatprī̍ṇāti ।
ka̱rambai̍rju̱hoti ।
viśve̍ṣā̱ṃ vā e̱tadde̱vānā̍m̐ rū̱pam ।
yatka̱rambā̍ḥ ।
yatka̱rambai̍rju̱hoti̍ ॥ 4 ॥))

**[[3-8-14-5]]**

विश्वा॑ने॒व त॒द्देवान्प्री॑णाति।
धा॒नाभि॑र्जु॒होति।
नक्ष॑त्राणा॒ं वा ए॒तद्रू॒पम्।
यद्धा॒नाः।
यद्धा॒नाभि॑र्जु॒होति॑।
नक्ष॑त्राण्ये॒व तत्प्री॑णाति।
सक्तु॑भिर्जु॒होति।
प्र॒जाप॑ते॒र्वा ए॒तद्रू॒पम्।
यत्सक्त॑वः।
यत्सक्तु॑भिर्जु॒होति॑॥ ५॥

((viśvā̍ne̱va tadde̱vānprī̍ṇāti ।
dhā̱nābhi̍rjuhoti ।
nakṣa̍trāṇā̱ṃ vā e̱tadrū̱pam ।
yaddhā̱nāḥ ।
yaddhā̱nābhi̍rju̱hoti̍ ।
nakṣa̍trāṇye̱va tatprī̍ṇāti ।
saktu̍bhirjuhoti ।
pra̱jāpa̍te̱rvā e̱tadrū̱pam ।
yatsakta̍vaḥ ।
yatsaktu̍bhirju̱hoti̍ ॥ 5 ॥))

**[[3-8-14-6]]**

प्र॒जाप॑तिमे॒व तत्प्री॑णाति।
म॒सूस्यै॑र्जु॒होति।
सर्वा॑सा॒ं वा ए॒तद्दे॒वता॑नाꣳ रू॒पम्।
यन्म॒सूस्या॑नि।
यन्म॒सूस्यै॑र्जु॒होति॑।
सर्वा॑ ए॒व त॒द्देवता॑ः प्रीणाति।
प्रि॒य॒ङ्गु॒त॒ण्डु॒लैर्जु॑होति।
प्रि॒याङ्गा॑ ह॒ वै नामै॒ते।
ए॒तैर्वै दे॒वा अश्व॒स्याङ्गा॑नि॒ सम॑दधुः।
यत्प्रि॑यङ्गुतण्डु॒लैर्जु॒होति॑।

अश्वस्यैवाङ्गानि संदधाति।
दशान्नानि जुहोति।
दशाक्षरा विराट्।
विराङ्कृत्स्नस्यान्नाद्यस्यावरुध्यै॥ ६॥
जुहोति मधुना जुहोति पृथुकैर्जुहोति करम्बैर्जुहोति
सक्तुभिर्जुहोति प्रियङ्गुतण्डुलैर्जुहोति चत्वारि च॥ १४॥
अन्नहोमानाज्येनाग्नेर्मधुना तण्डुलैः पृथुकैर्लाजैः
करम्बैर्धानाभिः सक्तुभिर्मसूस्यैः प्रियङ्गुतण्डुलैर्दशान्नानि
द्वादश॥

((prajāpatimeva tatprīṇāti |
masūsyairjuhoti |
sarvāsām vā etaddevatānām̐ rūpam |
yanmasūsyāni |
yanmasūsyairjuhoti |
sarvā eva taddevatāḥ prīṇāti |
priyaṅgutaṇḍulairjuhoti |
priyāṅgā ha vai nāmaite |
etairvai devā aśvasyāṅgāni samadadhuḥ |
yatpriyaṅgutaṇḍulairjuhoti |
aśvasyaivāṅgāni saṃdadhāti |
daśānnāni juhoti |
daśākṣarā virāṭ |
virāṭkṛtsnasyānnādyasyāvaruddhyai || 6 ||
juhoti madhunā juhoti pṛthukairjuhoti
karambairjuhoti saktubhirjuhoti
priyaṅgutaṇḍulairjuhoti catvāri ca || 14 ||
annahomānājyenāgnermadhunā taṇḍulaiḥ
pṛthukairlājaiḥ karambairdhānābhiḥ
saktubhirmasūsyaiḥ priyaṅgutaṇḍulairdaśānnāni
dvādaśa ||))

**[[3-8-15-1]]**

प्रजापतिरश्वमेधमसृजत।
तꣳ सृष्टꣳ रक्षाꣳस्यजिघाꣳसन्।
स एतान्प्रजापतिर्नक्तꣳहोमानपश्यत्।
ताञ्जुहोति।
तैर्वै स यज्ञाद्रक्षाꣳस्यपाहन्।
यन्नक्तꣳहोमाञ्जुहोति।
यज्ञादेव तैर्यजमानो रक्षाꣳस्यपहन्ति।
आज्येन जुहोति।
वज्रो वा आज्यम्।
वज्रेणैव यज्ञाद्रक्षाꣳस्यपहन्ति॥ १॥

((prajāpatiraśvamedhamasṛjata |
tam̐ sṛṣṭam̐ rakṣām̐syajighām̐san |
sa etānprajāpatirnaktam̐homānapaśyat |
tānajuhoti |
tairvai sa yajñādrakṣām̐syapāhan |
yannaktam̐homāñjuhoti |
yajñādeva tairyajamāno rakṣām̐syapahanti |
ājyena juhoti |
vajro vā ājyam |
vajreṇaiva yajñādrakṣām̐syapahanti || 1 ||))

**[[3-8-15-2]]**

आज्यस्य प्रतिपदं करोति।
प्राणो वा आज्यम्।
मुखत एवास्य प्राणं दधाति।
अन्नहोमाञ्जुहोति।
शरीरवदेवावरुन्धे।
व्यत्यासं जुहोति।
उभयस्यावरुध्यै।
नक्तं जुहोति।
रक्षसामपहत्यै।
आज्येनान्ततो जुहोति॥ २॥

((ājyasya pratipadaṃ karoti |
prāṇo vā ājyam |
mukhata evāsya prāṇaṃ dadhāti |
annahomāñjuhoti |
śarīravadevāvarundhe |
vyatyāsaṃ juhoti |
ubhayasyāvarudhyai |
naktaṃ juhoti |
rakṣasāmapahatyai |
ājyenāntato juhoti || 2 ||))

**[[3-8-15-3]]**

प्राणो वा आज्यम्।
उभयत एवास्य प्राणं दधाति।
पुरस्ताच्चोपरिष्टाच्च।
एकस्मै स्वाहेत्याह।
अस्मिन्नेव लोके प्रतितिष्ठति।
द्वाभ्याꣳ स्वाहेत्याह।
अमुष्मिन्नेव लोके प्रतितिष्ठति।
उभयोरेव लोकयोः प्रतितिष्ठति।
अस्मिꣳश्चामुष्मिꣳश्च।
शताय स्वाहेत्याह।
शतायुर्वै पुरुषः शतवीर्यः।

आयु॒रे॑व वी॒र्य॑मव॑रुन्धे।
स॒ह॒स्राय॑ स्वाहेत्या॑ह।
आयु॒र्वै स॒हस्र॑म्।
आयु॑रे॒वाव॑रुन्धे।
सर्व॑स्मै स्वाहेत्या॑ह।
अप॑रिमितमे॒वाव॑रुन्धे॥ ३॥
ए॒व य॒ज्ञाद्रक्षा॒ꣳस्यप॑हन्त्यन्त॒तो जु॑होति श॒ताय॒ स्वाहेत्या॑ह
स॒प्त च॑॥ १५॥

((prā̱ṇo vā ājya̎m ।
u̱bha̱yata̍ e̱vāsya̍ prā̱ṇaṃ da̍dhāti ।
pu̱rastā̎ccopa̱ri̍ṣṭā̱cca ।
ekā̍smai̱ svāhetyā̍ha ।
a̱sminne̱va lo̱ke prati̍tiṣṭhati ।
dvābhyā̱m̐ svāhetyā̍ha ।
a̱muṣminne̱va lo̱ke prati̍tiṣṭhati ।
u̱bhayo̍re̱va lo̱kayo̱ḥ prati̍tiṣṭhati ।
a̱smim̐̎ścā̱muṣmim̐̎śca ।
śa̱tāya̱ svāhetyā̍ha ।
śa̱tāyu̱rvai puru̍ṣaḥ śa̱tavī̎ryaḥ ।
āyu̍re̱va vī̱ryā̍mavā̍rundhe ।
sa̱hasrā̍ya̱ svāhetyā̍ha ।
āyu̱rvai sa̱hasrā̎m ।
āyu̍re̱vāvā̍rundhe ।
sarvā̍smai̱ svāhetyā̍ha ।
apā̍rimitame̱vāvā̍rundhe ॥ 3 ॥
e̱va ya̱jñādrakṣā̱m̐syapā̍hantyanta̱to ju̍hoti śa̱tāya̱
svāhetyā̍ha sa̱pta ca̍ ॥ 15 ॥))

**[[3-8-16-1]]**

प्र॒जाप॑तिं॒ वा ए॒ष ईप्स॑तीत्या॑हुः।
यो॑ऽश्वमे॒धेन॒ यज॑त॒ इति॑।
अथो॑ आहुः।
सर्वा॑णि भू॒तानीति॑।
एक॑स्मै॒ स्वाहेत्या॑ह।
प्र॒जाप॑ति॒र्वा एकः॑।
तमे॒वाप्नो॑ति।
एक॑स्मै॒ स्वाहा॒ द्वाभ्या॒ꣳ॒ स्वाहेत्य॑भिपू॒र्वमाहु॑तीर्जुहोति।
अ॒भि॒पू॒र्वमे॒व सु॑व॒र्गं लो॒कमे॑ति।
ए॒को॒त्त॒रं जु॑होति॥ १॥

((pra̱jāpā̍ti̱ṃ vā e̱ṣa ī̎psa̱tītyā̍huḥ ।
yo̎'śvame̱dhena̱ yajā̍ta̱ iti̍ ।
atho̍ āhuḥ ।
sarvā̍ṇi bhū̱tānīti̍ ।
ekā̍smai̱ svāhetyā̍ha ।
pra̱jāpā̍ti̱rvā ekā̍ḥ ।
tame̱vāpno̍ti ।
ekā̍smai̱ svāhā̱ dvābhyā̱m̐
svāhetyā̍bhipū̱rvamāhu̍tīrjuhoti ।
a̱bhi̱pū̱rvame̱va su̍va̱rgaṃ lo̱kame̍ti ।
e̱ko̱tta̱raṃ ju̍hoti ॥ 1 ॥))

**[[3-8-16-2]]**

ए॒क॒वदे॒व सु॑व॒र्गं लो॒कमे॑ति।
सन्त॑तं जुहोति।
सु॒व॒र्गस्य॑ लो॒कस्य॒ संत॑त्यै।
श॒ताय॒ स्वाहेत्या॑ह।
श॒तायु॒र्वै पुरु॑षः श॒तवी॑र्यः।
आयु॒रे॑व वी॒र्य॑मव॑रुन्धे।
स॒ह॒स्राय॑ स्वाहेत्या॑ह।
आयु॒र्वै स॒हस्र॑म्।
आयु॑रे॒वाव॑रुन्धे।
अ॒युता॑य॒ स्वाहा॑ नि॒युता॑य॒ स्वाहा॑ प्र॒युता॑य॒ स्वाहेत्या॑ह॥
२॥

((e̱ka̱vade̱va su̍va̱rgaṃ lo̱kame̍ti ।
santā̍taṃ juhoti ।
su̱va̱rgasya̍ lo̱kasya̱ saṃtā̍tyai ।
śa̱tāya̱ svāhetyā̍ha ।
śa̱tāyu̱rvai puru̍ṣaḥ śa̱tavī̎ryaḥ ।
āyu̍re̱va vī̱ryā̍mavā̍rundhe ।
sa̱hasrā̍ya̱ svāhetyā̍ha ।
āyu̱rvai sa̱hasrā̎m ।
āyu̍re̱vāvā̍rundhe ।
a̱yutā̍ya̱ svāhā̍ ni̱yutā̍ya̱ svāhā̎ pra̱yutā̍ya̱
svāhetyā̍ha ॥ 2 ॥))

**[[3-8-16-3]]**

त्रय॑ इ॒मे लो॒काः।
इ॒माने॒व लो॒कानव॑रुन्धे।
अर्बु॑दाय॒ स्वाहेत्या॑ह।
वाग्वा अर्बु॑दम्।
वाच॑मे॒वाव॑रुन्धे।
न्य॑र्बुदाय॒ स्वाहेत्या॑ह।
यो वै वा॒चो भू॒मा।
तन्न्य॑र्बुदम्।
वा॒च ए॒व भू॒मान॒मव॑रुन्धे।
स॒मु॒द्राय॒ स्वाहेत्या॑ह॥ ३॥

((trayā̍ i̱me lo̱kāḥ ।

i̱mānē̱va lo̱kānava̍rundhe ।
arbu̍dāya̱ svāhetya̍ha ।
vāgvā arbu̍dam ।
vāca̍me̱vāva̍rundhe ।
nya̍rbudāya̱ svāhetya̍ha ।
yo vai vā̱co bhū̱mā ।
tannya̍rbudam ।
vā̱ca e̱va bhū̱māna̱mava̍rundhe ।
sa̱mu̱drāya̱ svāhetya̍ha ॥ 3 ॥))

**[[3-8-16-4]]**

स॒मु॒द्रमे॒वाप्नो॑ति।
मध्या॑य॒ स्वाहेत्या॑ह।
मध्य॑मे॒वाप्नो॑ति।
अन्ता॑य॒ स्वाहेत्या॑ह।
अन्त॑मे॒वाप्नो॑ति।
प॒रा॒र्धाय॒ स्वाहेत्या॑ह।
प॒रा॒र्धमे॒वाप्नो॑ति।
उ॒षसे॒ स्वाहा॒ व्यु॑ष्ट्यै॒ स्वाहेत्या॑ह।
रात्रि॒र्वा उ॒षाः।
अह॒र्व्यु॑ष्टिः।
अ॒हो॒रा॒त्रे ए॒वाव॑रुन्धे।
अथो॑ अहोरा॒त्रयो॑रे॒व प्रति॑तिष्ठति।
ता यदु॒भयी॒र्दिवा॑ वा॒ नक्तं॑ वा जुहु॒यात्।
अ॒हो॒रा॒त्रे मो॑हयेत्।
उ॒षसे॒ स्वाहा॒ व्यु॑ष्ट्यै॒ स्वाहो॑देष्य॒ते स्वाहो॑द्य॒ते स्वाहेत्यनु॑दिते जुहोति।
उदि॑ताय॒ स्वाहा॑ सुव॒र्गाय॒ स्वाहा॑ लो॒काय॒ स्वाहेत्यु॒दि॑ते जुहोति।
अ॒हो॒रा॒त्रयो॒रव्य॑तिमोहाय॥ ४॥
ए॒को॒त्त॒रं जु॑होति प्र॒युता॑य॒ स्वाहेत्या॑ह समु॒द्राय॒ स्वाहेत्या॒हाह॒र्व्यु॑ष्टिः स॒प्त च॑॥ १६॥

((sa̱mu̱drame̱vāpno̍ti ।
madhyā̍ya̱ svāhetyā̍ha ।
madhya̍me̱vāpno̍ti ।
antā̍ya̱ svāhetyā̍ha ।
anta̍me̱vāpno̍ti ।
pa̱rā̱rdhāya̱ svāhetyā̍ha ।
pa̱rā̱rdhame̱vāpno̍ti ।
u̱ṣase̱ svāhā̱ vyu̍ṣṭyai̱ svāhetyā̍ha ।
rātri̱rvā u̱ṣāḥ ।
aha̱rvyu̍ṣṭi̱ḥ ।
a̱ho̱rā̱tre e̱vāva̍rundhe ।
atho̍ ahorā̱trayo̍re̱va prati̍tiṣṭhati ।
tā yadu̱bhayī̱rdivā̍ vā̱ naktaṃ̍ vā juhu̱yāt ।
a̱ho̱rā̱tre mo̍hayet ।
u̱ṣase̱ svāhā̱ vyu̍ṣṭyai̱ svāho̍deṣya̱te svāho̍dya̱te svāhetyanu̍dite juhoti ।
uditāya̱ svāhā̍ suva̱rgāya̱ svāhā̍ lo̱kāya̱ svāhetyudi̍te juhoti ।
a̱ho̱rā̱trayo̱ravya̍timohāya ॥ 4 ॥
e̱ko̱tta̱raṃ ju̍hoti pra̱yutā̍ya̱ svāhetyā̍ha samu̱drāya̱ svāhetyā̱hāha̱rvyu̍ṣṭiḥ sa̱pta ca̍ ॥ 16 ॥))

**[[3-8-17-1]]**

वि॒भूर्मा॒त्रा प्र॒भूः पि॒त्रेत्यश्व॑ना॒मानि॑ जुहोति।
उ॒भयो॑रे॒वैनं॑ लो॒कयो॒र्नाम॒धेयं॑ गमयति।
आय॑नाय॒ स्वाहा॒ प्राय॑णाय॒ स्वाहेत्यु॒द्द्रावाञ्जु॑होति।
सर्व॑मे॒वैन॒मस्क॑न्नꣳ सुव॒र्गं लो॒कं ग॑मयति।
अ॒ग्नये॒ स्वाहा॒ सोमा॑य॒ स्वाहेति॑ पूर्वहो॒माञ्जु॑होति।
पूर्व॑ ए॒व द्वि॒षन्तं॒ भ्रातृ॑व्य॒मति॑क्रामति।
पृ॒थि॒व्यै स्वाहा॒ऽन्तरि॑क्षाय॒ स्वाहेत्या॑ह।
य॒था य॒जुरे॒वैतत्।
अ॒ग्नये॒ स्वाहा॒ सोमा॑य॒ स्वाहेति॑ पूर्वदी॒क्षा जु॑होति।
पूर्व॑ ए॒व द्वि॒षन्तं॒ भ्रातृ॑व्य॒मति॑क्रामति॥ १॥

((vi̱bhūrmā̱trā pra̱bhūḥ pi̱tretya̍śvanā̱māni̍ juhoti ।
u̱bhayo̍re̱vainaṃ̍ lo̱kayo̍rnāma̱dheyaṃ̍ gamayati ।
āya̍nāya̱ svāhā̱ prāya̍ṇāya̱ svāhetyu̍ddrāvāñju̍hoti ।
sarva̍me̱vaina̱maska̍nnaꣳ suva̱rgaṃ lo̱kaṃ ga̍mayati ।
a̱gnaye̱ svāhā̱ somā̍ya̱ svāheti̍ pūrvaho̱māñju̍hoti ।
pūrva̍ e̱va dvi̱ṣantaṃ̱ bhrātṛ̍vya̱mati̍krāmati ।
pṛ̱thi̱vyai svāhā̱'ntari̍kṣāya̱ svāhetyā̍ha ।
ya̱thā̱ ya̱jure̱vaitat ।
a̱gnaye̱ svāhā̱ somā̍ya̱ svāheti̍ pūrvadī̱kṣā ju̍hoti ।
pūrva̍ e̱va dvi̱ṣantaṃ̱ bhrātṛ̍vya̱mati̍krāmati ॥ 1 ॥))

**[[3-8-17-2]]**

पृ॒थि॒व्यै स्वाहा॒ऽन्तरि॑क्षाय॒ स्वाहेत्यैक॑वि॒ꣳ॒शिनीं॑ दी॒क्षां जु॑होति।
एक॑विꣳशति॒र्वै दे॑वलो॒काः।
द्वाद॑श मासाः॒ पञ्च॒र्तवः॑।
त्रय॑ इ॒मे लो॒काः।
अ॒सावा॑दि॒त्य ए॑कवि॒ꣳ॒शः।
ए॒ष सु॑व॒र्गो लो॒कः।
सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै।
भुवो॑ दे॒वानां॒ कर्म॑णेत्यृ॒तुदी॒क्षा जु॑होति।
ऋ॒तूने॒वास्मै॑ कल्पयति।

अ॒ग्नये॒ स्वाहा॑ वा॒यवे॒ स्वाहेति॑ जुहो॒त्यन॑न्तरित्यै॥ २॥

((pṛthi̱vyai svāhā̱'ntari̍kṣāya̱ svāhetye̍kavi̱m̐śinī̱m̐ dī̱kṣām̱ ju̍hoti ।
eka̍vim̐śati̱rvai de̍valo̱kāḥ ।
dvāda̍śa̱ māsā̱ḥ pañca̱rtava̍ḥ ।
traya̍ i̱me lo̱kāḥ ।
a̱sāvā̍di̱tya e̍kavi̱m̐śaḥ ।
e̱ṣa su̍va̱rgo lo̱kaḥ ।
su̱va̱rgasya̍ lo̱kasya̱ samā̍ṣṭyai ।
bhuvo̍ de̱vānā̱m karma̱ṇetyṛ̍tudī̱kṣā ju̍hoti ।
ṛ̱tūne̱vāsmai̍ kalpayati ।
a̱gnaye̱ svāhā̍ vā̱yave̱ svāheti̍ juho̱tyana̍ntarityai ॥ 2 ॥))

**[[3-8-17-3]]**

अ॒र्वाङ्य॒ज्ञः संक्रा॑म॒त्वित्या॒प्तीर्जु॑होति।
सु॒व॒र्गस्य॑ लो॒कस्या॒प्त्यै।
भू॒तं भव्यं॑ भवि॒ष्यदि॑ति॒ पर्या॑प्तीर्जुहोति।
सु॒व॒र्गस्य॑ लो॒कस्य॒ पर्या॑प्त्यै।
आ मे॑ गृ॒हा भ॑व॒न्त्वित्या॒भूर्जु॑होति।
सु॒व॒र्गस्य॑ लो॒कस्या॒भू॑त्यै।
अ॒ग्निना॒ तपोऽन्व॑भव॒दित्य॑नु॒भूर्जु॑होति।
सु॒व॒र्गस्य॑ लो॒कस्यानु॑भूत्यै।
स्वाहा॒ऽऽधिमाधी॑ताय॒ स्वाहे॑ति॒ सम॑स्तानि वैश्वदे॒वानि॑ जु॒होति।
सम॑स्तमे॒व द्वि॒षन्त॒ं भ्रातृ॑व्य॒मति॑क्रामति॥ ३॥

((a̱rvāṅya̱jñaḥ saṃkrā̍ma̱tvityā̱ptī̍rjuhoti ।
su̱va̱rgasya̍ lo̱kasyā̱ptyai̍ ।
bhū̱taṃ bhavya̍ṃ bhavi̱ṣyadi̍ti̱ paryā̍ptīrjuhoti ।
su̱va̱rgasya̍ lo̱kasya̱ paryā̍ptyai ।
ā me̍ gṛ̱hā bha̍va̱ntvityā̱bhūrju̍hoti ।
su̱va̱rgasya̍ lo̱kasyā̱bhū̍tyai ।
a̱gninā̱ tapo'nva̍bhava̱ditya̍nu̱bhūrju̍hoti ।
su̱va̱rgasya̍ lo̱kasyānu̍bhūtyai ।
svāhā̱''dhimādhī̍tāya̱ svāhe̍ti̱ samā̍stāni vaiśvade̱vāni̍ juhoti ।
samā̍stame̱va dvi̱ṣanta̱ṃ bhrātṛ̍vya̱mati̍krāmati ॥ 3 ॥))

**[[3-8-17-4]]**

द॒द्भ्यः स्वाहा॒ हनू॑भ्या॒ꣳ स्वाहे॒त्यङ्ग॑हो॒माञ्जु॑होति।
अङ्गे॑ अङ्गे॒ वै पुरु॑षस्य पा॒प्मोप॑श्लिष्टः।
अङ्गा॑दङ्गादे॒वैनं॑ पा॒प्मन॒स्तेन॑ मुञ्चति।
आ॒ञ्ज्ये॒ताय॒ स्वाहा॑ कृ॒ष्णाय॒ स्वाहा॑ श्वे॒ताय॒ स्वाहे॒त्य॑श्वरू॒पाणि॑ जुहोति।
रू॒पैरे॒वैन॒ꣳ सम॑र्धयति।
ओष॑धीभ्य॒ः स्वाहा॒ मूले॑भ्य॒ः स्वाहे॒त्यो॑षधिहो॒माञ्जु॑होति।
द्व॒य्यो वा ओष॑धयः।
पु॒ष्पे॑भ्यो॒ऽन्याः फल॑ं गृ॒ह्णन्ति॑।
मूले॑भ्यो॒ऽन्याः।
ता ए॒वोभयी॒रव॑रुन्धे॥ ४॥

((da̱dbhyaḥ svāhā̱ hanū̍bhyā̱m̐ svāhe̱tya̍ṅgaho̱māñju̍hoti ।
aṅge̍ aṅge̱ vai puru̍ṣasya pā̱pmopa̍śliṣṭaḥ ।
aṅgā̍daṅgāde̱vainaṃ̍ pā̱pmana̱stena̍ muñcati ।
a̱ñjye̱tāya̱ svāhā̍ kṛ̱ṣṇāya̱ svāhā̍ śve̱tāya̱ svāhetya̍śvarū̱pāṇi̍ juhoti ।
rū̱paire̱vaina̱m̐ samā̍rdhayati ।
o̱ṣa̍dhībhya̱ḥ svāhā̱ mūle̍bhya̱ḥ svāhetyo̍ṣadhiho̱māñju̍hoti ।
dva̱yyo vā o̱ṣa̍dhayaḥ ।
pu̱ṣpe̍bhyo̱'nyāḥ phala̍ṃ gṛ̱hṇanti̍ ।
mūle̍bhyo̱'nyāḥ ।
tā e̱vobhayī̱rava̍rundhe ॥ 4 ॥))

**[[3-8-17-5]]**

व॒न॒सप॑तिभ्य॒ः स्वाहेति॑ वन॒स्पति॑हो॒माञ्जु॑होति।
आ॒र॒ण्यस्या॒न्नाद्य॒स्याव॑रुध्यै।
मे॒षस्त्वा॑ पच॒तैर॑व॒त्वित्य॑पा॒व्यानि जुहोति।
प्रा॒णा वै दे॒वा अ॑पा॒व्याः।
प्रा॒णाने॒वाव॑रुन्धे।
कू॒प्या॑भ्य॒ः स्वाहा॒ऽद्भ्यः स्वाहे॒त्य॒पाꣳ होमा॑ञ्जुहोति।
अ॒प्सु वा आप॑ः।
अन्नं॑ वा आप॑ः।
अ॒द्भ्यो वा अन्नं॑ जायते।
यदे॒वाद्भ्योऽन्न॒ं जाय॑ते।
तदव॑रुन्धे॥ ५॥
पू॒र्वदी॑क्षा जु॑होति॒ पूर्व॑ ए॒व द्वि॒षन्त॒ं भ्रातृ॑व्य॒मति॑क्रा॒मत्यन॑न्तरित्यै क्रामति रुन्धे जाय॑त॒ एकं॑ च॥ १७॥

((va̱na̱sapati̍bhya̱ḥ svāheti̍ vanaspatiho̱māñju̍hoti ।
ā̱ra̱ṇyasya̱nnādya̱syāva̍rudhyai ।
me̱ṣastva̍ paca̱taira̍va̱tvityapā̍vyāni juhoti ।
prā̱ṇā vai de̱vā apā̍vyāḥ ।
prā̱ṇāne̱vāva̍rundhe ।
kūpyā̍bhya̱ḥ svāhā̱'dbhyaḥ svāhetya̱pām̐ homā̍ñjuhoti ।
a̱psu vā āpa̍ḥ ।

annaṃ vā āpáḥ ।
a̱dbhyo vā annaṁ jāyate ।
yade̱vādbhyo'nnaṃ jāyáte ।
tadavárundhe ॥ 5 ॥
pūrva̱dīkṣā júhoti̱ pūrvá e̱va dvi̱ṣantaṃ
bhrātṛ̱vya̱matikrāma̱tyanántarityai krāmati rundhe̱
jāyáta̱ ekaṁ ca ॥ 17 ॥))

**[[3-8-18-1]]**

अम्भा॑ꣳसि जुहोति।
अ॒यं वै लो॒कोऽम्भा॑ꣳसि।
तस्य॒ वस॒वोऽधि॑पतयः।
अ॒ग्निर्ज्योति॑ः।
यदम्भा॑ꣳसि जु॒होति॑।
इ॒मम॒व लो॒कमव॑रुन्धे।
वसू॑ना॒ꣳ सायु॑ज्यं गच्छति।
अ॒ग्निं ज्योति॒रव॑रुन्धे।
नभा॑ꣳसि जुहोति।
अ॒न्तरि॑क्षं॒ वै नभा॑ꣳसि॥ १॥

((ambhām̐si juhoti ।
a̱yaṃ vai lo̱ko'mbhām̐si ।
tasya̱ vasa̱vo'dhípatayaḥ ।
a̱gnirjyotíḥ ।
yadambhām̐si ju̱hotí ।
i̱mame̱va lo̱kamavárundhe ।
vasúnā̱m̐ sāyújyaṃ gacchati ।
a̱gniṃ jyoti̱ravárundhe ।
nabhām̐si juhoti ।
a̱ntarikṣa̱ṃ vai nabhām̐si ॥ 1 ॥))

**[[3-8-18-2]]**

तस्य॑ रु॒द्रा अधि॑पतयः।
वा॒युर्ज्योति॑ः।
यन्नभा॑ꣳसि जु॒होति॑।
अ॒न्तरि॑क्षमे॒वाव॑रुन्धे।
रु॒द्राणा॒ꣳ सायु॑ज्यं गच्छति।
वा॒युं ज्योति॒रव॑रुन्धे।
महा॑ꣳसि जुहोति।
अ॒सौ वै लो॒को महा॑ꣳसि।
तस्या॑दि॒त्या अधि॑पतयः।
सूर्यो॒ ज्योति॑ः॥ २॥

((tasyá ru̱drā adhípatayaḥ ।
vā̱yurjyotíḥ ।
yannabhām̐si ju̱hotí ।
a̱ntarikṣame̱vāvárundhe ।
ru̱drāṇā̱m̐ sāyújyaṃ gacchati ।
vā̱yuṃ jyoti̱ravárundhe ।
mahām̐si juhoti ।
a̱sau vai lo̱ko mahām̐si ।
tasyádi̱tyā adhípatayaḥ ।
sūryo̱ jyotíḥ ॥ 2 ॥))

**[[3-8-18-3]]**

यन्महा॑ꣳसि जु॒होति॑।
अ॒मुमे॒व लो॒कमव॑रुन्धे।
आ॒दि॒त्याना॒ꣳ सायु॑ज्यं गच्छति।
सू॒र्यं॑ ज्योति॒रव॑रुन्धे।
नमो॒ राज्ञे॒ नमो॒ वरु॑णा॒येति॒ य॒व्याणि॒ जुहोति।
अ॒न्नाद्य॒स्याव॑रुध्यै।
मयो॒भूर्वातो॑ अ॒भि वा॑तू॒स्रा इति॑ ग॒व्यानि॑ जुहोति।
प॒शूनामव॑रुध्यै।
प्रा॒णाय॒ स्वाहा॑ व्या॒नाय॒ स्वाहेति॑ संततिहो॒माञ्जु॑होति।
सु॒वर्ग॑स्य॑ लो॒कस्य॒ संत॑त्यै॥ ३॥

((yanmahām̐si ju̱hotí ।
a̱mume̱va lo̱kamavárundhe ।
ā̱di̱tyānā̱m̐ sāyújyaṃ gacchati ।
sūrya̱ṃ jyoti̱ravárundhe ।
namo̱ rājñe̱ namo̱ varúṇā̱yetí ya̱vyāṇí juhoti ।
a̱nnādya̱syāvárudhyai ।
mayo̱bhūrvātó a̱bhi vấtū̱srā ití ga̱vyāní juhoti ।
pa̱śūnāmavárudhyai ।
prā̱ṇāya̱ svāhā̂ vyā̱nāya̱ svāhetí saṃtatiho̱māñjúhoti
।
su̱vargasyá lo̱kasya̱ saṃtátyai ॥ 3 ॥))

**[[3-8-18-4]]**

सि॒ताय॒ स्वाहाऽसि॑ताय॒ स्वाहेति॒ प्रमु॑क्तीर्जु॑होति।
सु॒वर्ग॑स्य॑ लो॒कस्य॒ प्रमु॑क्त्यै।
पृ॒थि॒व्यै स्वाहा॒ऽन्तरि॑क्षाय॒ स्वाहेत्या॑ह।
य॒था य॒जुरे॒वैतत्।
द॒त्वते॒ स्वाहा॑ऽद॒न्तका॑य॒ स्वाहेति॑ शरीरहो॒माञ्जु॑होति।
पि॒तृ॒लो॒कमे॒व तैर्यज॑मानोऽव॑रुन्धे।
कस्त्वा॑ युनक्ति॒ स त्वा॑ यु॒नक्त्विति॑ परि॒धीन्यु॑नक्ति।
इ॒मे वै लो॒काः प॑रि॒धयः॑।
इ॒माने॒वास्मै॑ लो॒कान्यु॑नक्ति।
सु॒वर्ग॑स्य॑ लो॒कस्य॒ सम॑ष्ट्यै॥ ४॥

((sitāya svāhā'sitāya svāheti pramuktīrjuhoti ।
suvargasya lokasya pramuktyai ।
pṛthivyai svāhā'ntarikṣāya svāhetyāha ।
yathā yajurevaitat ।
dattvate svāhā'dantakāya svāheti
śarīrahomāñjuhoti ।
pitṛlokameva tairyajamāno'varundhe ।
kastvā yunakti sa tvā yunaktviti paridhīnyunakti ।
ime vai lokāḥ paridhayaḥ ।
imānevāsmai lokānyunakti ।
suvargasya lokasya samaṣṭyai ॥ 4 ॥))

**[[3-8-18-5]]**

यः प्राणतो य आत्मदा इति महिमानौ जुहोति।
सुवर्गो वै लोको महः।
सुवर्गमेव ताभ्यां लोकं यजमानोऽवरुन्धे।
आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामिति समस्तानि
ब्रह्मवर्चसानि जुहोति।
ब्रह्मवर्चसमेव तैर्यजमानोऽवरुन्धे।
जज्ञि बीजमिति जुहोत्यनन्तरित्यै।
अग्नये समनमत्पृथिव्यै समनमदिति सन्नतिहोमाञ्जुहोति।
सुवर्गस्य लोकस्य संनत्यै।
भूताय स्वाहा भविष्यते स्वाहेति भूताभव्यौ होमौ
जुहोति।
अयं वै लोको भूतम्॥ ५॥

((yaḥ prāṇato ya ātmadā iti mahimānau juhoti ।
suvargo vai loko mahaḥ ।
suvargameva tābhyāṃ lokaṃ yajamāno'varundhe ।
ā brahmanbrāhmaṇo brahmavarcasī jāyatāmiti
samastāni brahmavarcasāni juhoti ।
brahmavarcasameva tairyajamāno'varundhe ।
jajñi bījamiti juhotyanantarityai ।
agnaye samanamatpṛthivyai samanamaditi
sannatihomāñjuhoti ।
suvargasya lokasya saṃnatyai ।
bhūtāya svāhā bhaviṣyate svāheti bhūtābhavyau
homau juhoti ।
ayaṃ vai loko bhūtam ॥ 5 ॥))

**[[3-8-18-6]]**

असौ भविष्यत्।
अनयोरेव लोकयोः प्रतितिष्ठति।
सर्वस्याप्त्यै।
सर्वस्यावरुद्ध्यै।
यदक्रन्दः प्रथमं जायमान इत्यश्वस्तोमीयं जुहोति।
सर्वस्याप्त्यै।
सर्वस्य जित्यै।
सर्वमेव तेनाप्नोति।
सर्वं जयति।
योऽश्वमेधेन यजते॥ ६॥

((asau bhaviṣyat ।
anayoreva lokayoḥ pratitiṣṭhati ।
sarvasyāptyai ।
sarvasyāvaruddhyai ।
yadakrandaḥ prathamaṃ jāyamāna
ityaśvastomīyaṃ juhoti ।
sarvasyāptyai ।
sarvasya jityai ।
sarvameva tenāpnoti ।
sarvaṃ jayati ।
yo'śvamedhena yajate ॥ 6 ॥))

**[[3-8-18-7]]**

य उ चैनमेवं वेद।
यज्ञꣳ रक्षाꣳस्यजिघाꣳसन्।
स एतान्प्रजापतिर्नक्तꣳहोमानपश्यत्।
तानजुहोत्।
तैर्वै स यज्ञाद्रक्षाꣳस्यपाहन्।
यन्नक्तꣳहोमाञ्जुहोति।
यज्ञादेव तैर्यजमानो रक्षाꣳस्यपहन्ति।
उषसे स्वाहा व्युष्ट्यै स्वाहेत्यन्ततो जुहोति।
सुवर्गस्य लोकस्य समष्ट्यै॥ ७॥
वै नभाꣳसि सूर्यो ज्योतिः संतत्यै समष्ट्यै भूतं यजते नव
च॥ १८॥

((ya u cainamevaṃ veda ।
yajñaṃ rakṣāṃsyajighāṃsan ।
sa etānprajāpatirnaktaṃhomānapaśyat ।
tānajuhot ।
tairvai sa yajñādrakṣāṃsyapāhan ।
yannaktaṃhomāñjuhoti ।
yajñādeva tairyajamāno rakṣāṃsyapahanti ।
uṣase svāhā vyuṣṭyai svāhetyantato juhoti ।
suvargasya lokasya samaṣṭyai ॥ 7 ॥
vai nabhāṃsi sūryo jyotiḥ saṃtatyai samaṣṭyai
bhūtaṃ yajate nava ca ॥ 18 ॥))

**[[3-8-19-1]]**

एकयूपो वैकादशिनी वा।
अन्येषां यज्ञानां यूपा भवन्ति।
एकविꣳशिन्यश्वमेधस्य।

सु॒व॒र्गस्य॑ लो॒कस्या॒भिजि॑त्यै।
बैल्वो॑ वा॑ खादि॒रो वा॑ पाला॒शो वा᳚।
अ॒न्येषा᳚ं यज्ञक्रतू॒नां यूपा॑ भवन्ति।
राज्जुं॑दाल॒ एक॑विꣳशत्यरत्निरश्वमे॒धस्य॑।
सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै।
नान्येषा᳚ं प॒शू॒नां ते॑ज॒न्या अ॑व॒द्यन्ति॑।
अव॑द्य॒न्त्यश्व॑स्य॥ १॥

((e̱ka̱yū̱po vai̍kāda̱śini̍ vā |
a̱nyeṣā̎m̐ ya̱jñānā̱ṃ yūpa̍ bhavanti |
e̱ka̱vi̱m̐śinya̍śvame̱dhasya̍ |
su̱va̱rgasya̍ lo̱kasyā̱bhiji̍tyai |
bai̱lvo va̍ khādi̱ro va̍ pālā̱śo vā̎ |
a̱nyeṣā̎m̐ yajñakratū̱nāṃ yūpa̍ bhavanti |
rājju̍dāla̱ eka̍vim̐śatyaratniraśvame̱dhasya̍ |
su̱va̱rgasya̍ lo̱kasya̱ sama̍ṣṭyai |
nānyeṣā̎m̐ paśū̱nāṃ te̍ja̱nyā a̍va̱dyanti̍ |
ava̍dya̱ntyaśva̍sya || 1 ||))

**[[3-8-19-2]]**

पा॒प्मा वै ते॑ज॒नी।
पा॒प्मनोऽप॑हत्यै।
प्ल॒क्ष॒शा॒खाया॑म॒न्येषा᳚ं पशूनाम॑व॒द्यन्ति॑।
वे॒त॒स॒शा॒खाया॒मश्व॑स्य।
अ॒प्सुयो॑नि॒र्वा अश्वः॑।
अ॒प्सु॒जो वे॑त॒सः।
स्व ए॒वास्य॒ योना॒वव॑द्यति।
यूपे॑षु ग्रा॒म्यान्प॒शून्नि॑यु॒ञ्जन्ति॑।
आ॒रो॒के॒ष्वा॑र॒ण्यान्धा॑रयन्ति।
प॒शू॒नां व्यावृ॑त्त्यै।
आ ग्रा॒म्यान्प॒शूल्ँल॑भन्ते।
प्रार॒ण्यान्त्सृ॑जन्ति।
पा॒प्मनोऽप॑हत्यै॥ २॥
अश्व॑स्य॒ व्यावृ॑त्त्यै॒ त्रीणि॑ च॥ १९॥

((pāpmā vai te̍ja̱nī |
pā̱pmano'pa̍hatyai |
pla̱kṣa̱śā̱khāya̍ma̱nyeṣā̎m̐ paśū̱nāma̍va̱dyanti̍ |
ve̱ta̱sa̱śā̱khāyā̱maśva̍sya |
a̱psuyo̍ni̱rvā aśva̍ḥ |
a̱psu̱jo ve̍ta̱saḥ |
sva e̱vāsya̱ yonā̱vava̍dyati |
yūpe̍ṣu grā̱myānpa̱śūnni̍yu̱ñjanti̍ |
ā̱ro̱ke̱ṣva̍ra̱ṇyāndhā̍rayanti |
pa̱śū̱nāṃ vyāvṛ̍ttyai |
ā grā̱myānpa̱śūllam̐bha̍nte |
prāra̱ṇyāntsṛ̍janti |
pā̱pmano'pa̍hatyai || 2 ||
aśva̍sya̱ vyāvṛ̍ttyai̱ trīṇi̍ ca || 19 ||))

**[[3-8-20-1]]**

राज्जुं॑दालमग्नि॒ष्ठं मि॑नोति।
भ्रू॒ण॒ह॒त्याया॒ अप॑हत्यै।
पौतु॑द्रवाव॒भितो॑ भवतः।
पु॒ण्य॑स्य ग॒न्धस्याव॑रुध्यै।
भ्रू॒ण॒ह॒त्यामे॒वास्मा॑द॒पह॒त्य॑।
पुण्ये॑न ग॒न्धेनो॑भयत॒ः परि॑गृह्णाति।
षड्बै॒ल्वा भ॑वन्ति।
ब्र॒ह्म॒व॒र्च॒सस्याव॑रुद्ध्यै।
षट्खा᳚दि॒राः।
ते॒ज॒सोऽव॑रुध्यै॥ १॥

((rājju̍dālamagni̱ṣṭhaṃ mi̍noti |
bhrū̱ṇa̱ha̱tyāyā̱ apa̍hatyai |
pautu̍dravāva̱bhito̍ bhavataḥ |
puṇya̍sya ga̱ndhasyāva̍rudhyai |
bhrū̱ṇa̱ha̱tyāme̱vāsma̍dapa̱hatya̍ |
puṇye̍na ga̱ndheno̍bha̱yata̱ḥ pari̍gṛhṇāti |
ṣa̱ḍbai̱lvā bha̍vanti |
bra̱hma̱va̱rca̱sasyāva̍ruddhyai |
ṣa̱ṭkhā̎di̱rāḥ |
teja̱so'va̍rudhyai || 1 ||))

**[[3-8-20-2]]**

षट्पा॑ला॒शाः।
सो॒म॒पी॒थस्याव॑रुध्यै।
एक॑विꣳशतिः॒ संप॑द्यन्ते।
एक॑विꣳशति॒र्वै दे॑वलो॒काः।
द्वाद॑श॒ मासाः॒ पञ्च॒र्तव॑ः।
त्रय॑ इ॒मे लो॒काः।
अ॒सावा॑दि॒त्य ए॑कवि॒ꣳशः।
ए॒ष सु॑व॒र्गो लो॒कः।
सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै।
श॒तं प॒शवो॑ भवन्ति॥ २॥

((ṣa̱ṭpā̍lā̱śāḥ |
so̱ma̱pī̱thasyāva̍rudhyai |
eka̍vim̐śati̱ḥ sampa̍dyante |
eka̍vim̐śati̱rvai de̍valo̱kāḥ |
dvāda̍śa̱ māsā̱ḥ pañca̱rtava̍ḥ |

trayá i̱me lo̱kāḥ ।
a̱sāvā̍di̱tya e̍kavi̱ṁ̍śaḥ ।
e̱ṣa su̍va̱rgo lo̱kaḥ ।
su̱va̱rgasya̍ lo̱kasya̱ samá̍ṣṭyai ।
śa̱taṃ pa̱śavo̍ bhavanti ॥ 2 ॥))

**[[3-8-20-3]]**

श̱तायु̍ः पु॑रु॒षः श̱तेन्द्रि॑यः।
आयु॑ष्ये॒वेन्द्रि॒ये प्रति॑तिष्ठति।
सर्वं॒ वा अ॑श्वमे॒ध्याप्नो॑ति।
अप॑रिमिता भवन्ति।
अप॑रिमित॒स्याव॑रुद्ध्यै।
ब्र॒ह्म॒वा॒दिनो॑ वदन्ति।
कस्मा॑त्स॒त्यात्।
द॒क्षि॒ण॒तो॑ऽन्येषा॑ं पशू॒नाम॑व॒द्यन्ति॑।
उ॒त्त॒र॒तोऽश्व॒स्येति॑।
वा॒रु॒णो वा अश्व॑ः॥ ३॥

((śa̱tāyu̱ḥ puru̍ṣaḥ śa̱tendri̍yaḥ ।
āyu̍ṣye̱vendri̱ye prati̍tiṣṭhati ।
sarva̱ṃ vā a̍śvame̱dhyāpno̍ti ।
apa̍rimitā bhavanti ।
apa̍rimita̱syāva̍ruddhyai ।
bra̱hma̱vā̱dino̍ vadanti ।
kasmā̍tsa̱tyāt ।
da̱kṣi̱ṇa̱to̍'nyeṣā̍ṃ paśū̱nāmáva̱dyanti̍ ।
u̱tta̱ra̱to'śva̱syeti̍ ।
vā̱ru̱ṇo vā aśva̍ḥ ॥ 3 ॥))

**[[3-8-20-4]]**

ए̱षा वै वरु॑णस्य॒ दिक्।
स्वाया॑मे॒वास्य॒ दि॒श्यव॑द्यति।
यदित॑रेषां पशू॒नाम॑व॒द्यति॑।
श॒त॒दे॒व॒त्यं॑ तेनाव॑रुन्धे।
चि॒ते॑ऽग्नावधि॑वैत॒से कटेऽश्वं॑ चिनोति।
अ॒प्सु॒योनि॒र्वा अश्व॑ः।
अ॒प्सु॒जो वे॑त॒सः।
स्व ए॒वैनं॒ योनौ॒ प्रति॑ष्ठापयति।
पु॒रस्ता॑त्प्र॒त्यञ्चं॑ तूप॒रं चि॑नोति।
प॒श्चात्प्रा॒चीनं॑ गोमृ॒गम्॥ ४॥

((e̱ṣā vai varu̍ṇasya̱ dik ।
svāyā̍me̱vāsya̍ di̱śyavá̍dyati ।
yaditá̍reṣāṃ paśū̱nāmáva̱dyati̍ ।
śa̱ta̱de̱va̱tyaṃ tenāvá̍rundhe ।
ci̱te̍'gnāvadhi̍vaita̱se ka̱ṭe'śvaṃ̍ cinoti ।
a̱psu̱yo̍ni̱rvā aśva̍ḥ ।
a̱psu̱jo ve̍ta̱saḥ ।
sva e̱vaina̱ṃ yonau̱ prati̍ṣṭhāpayati ।
pu̱rastā̍tpra̱tyañca̍ṃ tūpa̱raṃ ci̍noti ।
pa̱ścātprā̱cīna̍ṃ gomṛ̱gam ॥ 4 ॥))

**[[3-8-20-5]]**

प्रा॒णा॒पा॒नावे॒वास्मि॑न्त्स॒म्यञ्चौ॑ दधाति।
अश्वं॑ तूप॒रं गो॑मृ॒गमिति॑ स॒र्व॒हु॒त॑ ए॒ताञ्जु॑होति।
ए॒षां लो॒काना॑म॒भिजि॑त्यै।
आ॒त्मना॒ऽभिजु॑होति।
सात्मा॑नमे॒वैन॒ꣳ॒ सत॑नुं करोति।
सात्मा॒ऽमुष्मि॑ꣳल्लो॒के भ॑वति।
य ए॒वं वेद॑।
अथो॒ वसो॑रे॒व धारा॒ं तेनाव॑रुन्धे।
इ॒लु॒वदा॑य॒ स्वाहा॑ ब॒लि॒वदा॑य॒ स्वाहेत्या॑ह।
सं॒व॒त्स॒रो वा इ॑लु॒वद॑ः।
प॒रि॒व॒त्स॒रो ब॑लि॒वद॑ः।
सं॒व॒त्स॒रादे॒व प॑रिवत्स॒रादायु॒रव॑रुन्धे।
आयु॑रे॒वास्मि॑न्दधाति।
तस्मा॑दश्वमेधया॒जी ज॒रसा॑ वि॒स्रसा॒ऽमुं लो॒कमे॑ति॥ ५॥
तेज॒सोऽव॑रुध्यै भव॒न्त्यश्वो॑ गोमृ॒गमि॑लु॒वद॑श्च॒त्वारि॑ च॥
२०॥

((prā̱ṇā̱pā̱nāve̱vāsmi̍ntsa̱myañcau̍ dadhāti ।
aśva̍ṃ tūpa̱raṃ go̍mṛ̱gamiti̍ sarva̱huta̍ e̱tāñju̍hoti ।
e̱ṣāṃ lo̱kānā̍ma̱bhiji̍tyai ।
ā̱tmanā̱'bhiju̍hoti ।
sātmā̍name̱vaina̱ꣳ̱ satá̍nuṃ karoti ।
sātmā̱'muṣmi̍ꣳlllo̱ke bhá̍vati ।
ya e̱vaṃ vedá ।
atho̱ vaso̍re̱va dhārā̱ṃ tenāvá̍rundhe ।
i̱lu̱vardā̍ya̱ svāhā̍ ba̱li̱vardā̍ya̱ svāhetyā̍ha ।
sa̱ṃva̱tsa̱ro vā i̍luvardá̍ḥ ।
pa̱ri̱va̱tsa̱ro bá̍li̱vardá̍ḥ ।
sa̱ṃva̱tsa̱rāde̱va pá̍rivatsa̱rādāyu̱ravá̍rundhe ।
āyu̍re̱vāsmi̍ndadhāti ।
tasmā̍daśvamedhayā̱jī ja̱rasā̍ vi̱srasā̱'muṃ lo̱kame̍ti
॥ 5 ॥
teja̱so'vá̍rudhyai bhava̱ntyaśvo̍
gomṛ̱gami̍lu̱vardá̍ścatvā̱ri̍ ca ॥ 20 ॥))

**[[3-8-21-1]]**

ए॒क॒वि॒ꣳ॒शो॑ऽग्निर्भ॑वति।
ए॒क॒वि॒ꣳ॒शः स्तोम॑ः।

ए॒क॑विꣳशति॒र्यू॒पाः᳚।
यथा॒ वा अश्वा॑ वर्ष॒भा वा॒ वृषा॑णः सꣳस्फु॒रेर॑न्।
ए॒वमे॒तत्स्तोमा॒ः सꣳस्फु॑रन्ते।
यदै॑कवि॒ꣳशाः।
ते यत्स॑मृ॒च्छेर॑न्।
ह॒न्येता᳚स्य य॒ज्ञः।
द्वा॒द॒श ए॒वाग्निः स्या॒दित्या॑हुः।
द्वा॒द॒शः स्तोम॑ः।

((e̱ka̱vi̱m̐śo̎'gnirbha̍vati ।
e̱ka̱vi̱m̐śaḥ stoma̍ḥ ।
eka̍vim̐śati̱ryūpā̎ḥ ।
yathā̱ vā aśva̍ varṣa̱bhā vā̱ vṛṣa̍ṇaḥ sam̐sphu̱rera̍n ।
e̱vame̱tatstomā̱ḥ sam̐sphu̍rante ।
yade̍kavi̱m̐śāḥ ।
te yatsa̍mṛ̱ccheran̍ ।
ha̱nyetā̎sya ya̱jñaḥ ।
dvā̱da̱śa e̱vāgni̱ḥ syā̱dityā̍huḥ ।
dvā̱da̱śaḥ stoma̍ḥ ।))

**[[3-8-21-2]]**
एका॑दश॒ युपाः᳚।
यद्द्वा॑द॒शो᳚ऽग्निर्भव॑ति।
द्वाद॑श॒ मासाः᳚ संवत्स॒रः।
सं॒व॒त्स॒रेणै॒वास्मा॒ अन्न॒मव॑रुन्धे।
यद्दश॒ यूपा॒ भव॑न्ति।
दशा᳚क्षरा वि॒राट्।
अन्नं॑ वि॒राट्।
वि॒राजै॒वान्नाद्य॒मव॑रुन्धे।
य एका॑द॒शः।
स्तन॑ ए॒वास्यै॒ सः।

((ekā̍daśa̱ yupā̎ḥ ।
yaddvā̍da̱śo̎'gnirbhava̍ti ।
dvāda̍śa̱ māsā̎ḥ sam̱vatsa̱raḥ ।
sam̱va̱tsa̱reṇa̱ivāsmā̱ anna̱mava̍rundhe ।
yaddaśa̱ yūpā̱ bhava̍nti ।
daśā̎kṣarā vi̱rāṭ ।
anna̍m vi̱rāṭ ।
vi̱rāja̱ivānnādya̱mava̍rundhe ।
ya e̍kāda̱śaḥ ।
stana̍ e̱vāsya̱i saḥ ।))

**[[3-8-21-3]]**
दु॒ह ए॒वैनां॒ तेन॑।
तदा॑हुः।
यद्द्वा॑द॒शो᳚ऽग्निः स्याद्द्वाद॒शः स्तोम॒ एका॑द॒श यूपाः᳚।
यथा॒ स्थूरि॑णा या॒यात्।
ता॒दृक्तत्।
ए॒क॒वि॒ꣳश ए॒वाग्निः स्या॒दित्या॑हुः।
ए॒क॒वि॒ꣳशः स्तोम॑ः।
एक॑विꣳशति॒र्यूपाः᳚।
यथा॒ प्रष्टि॑भि॒र्याति॑।
ता॒दृगे॒व तत्॥ ३॥

((du̱ha e̱vaināṃ̱ tena̍ ।
tadā̍huḥ ।
yaddvā̍da̱śo'gniḥ syā̍ddvāda̱śaḥ stoma̱ ekā̍daśa̱ yūpā̎ḥ ।
yathā̱ sthūri̍ṇā yā̱yāt ।
tā̱dṛktat ।
e̱ka̱vi̱m̐śa e̱vāgniḥ syā̱dityā̍huḥ ।
e̱ka̱vi̱m̐śaḥ stoma̍ḥ ।
eka̍vim̐śati̱ryūpā̎ḥ ।
yathā̱ praṣṭi̱bhi̱ryāti̍ ।
tā̱dṛge̱va tat ॥ 3 ॥))

**[[3-8-21-4]]**
यो वा अ॑श्वमे॒धे ति॒स्रः क॒कुभो॒ वेद॑।
क॒कुद्ध॒ राज्ञां᳚ भवति।
ए॒क॒वि॒ꣳशो᳚ऽग्निर्भ॑वति।
ए॒क॒वि॒ꣳशः स्तोम॑ः।
एक॑विꣳशति॒र्यूपाः᳚।
ए॒ता वा अ॑श्वमे॒धे ति॒स्रः क॒कुभ॑ः।
य ए॒वं वेद॑।
क॒कुद्ध॒ राज्ञां᳚ भवति।
यो वा अ॑श्वमे॒धे त्रीणि॑ शी॒र्षाणि॒ वेद॑।
शिरो॑ ह॒ राज्ञां᳚ भवति।
ए॒क॒वि॒ꣳशो᳚ऽग्निर्भ॑वति।
ए॒क॒वि॒ꣳशः स्तोम॑ः।
एक॑विꣳशति॒र्यूपाः᳚।
ए॒तानि॒ वा अ॑श्वमे॒धे त्रीणि॑ शी॒र्षाणि॑।
य ए॒वं वेद॑।
शिरो॑ ह॒ राज्ञां᳚ भवति॥ ४॥
द्वा॒द॒शः स्तोम॒ः स ए॒व तच्छिरो॑ ह॒ राज्ञां᳚ भवति॒ षट्च॑॥

२१॥

((yo vā áśvamedhe tisraḥ kakubho vedá ।
kakuddha rājñāṁ bhavati ।
ekaviṁśo'gnirbhávati ।
ekaviṁśaḥ stomáḥ ।
ekáviṁśatiryūpāḥ ।
etā vā áśvamedhe tisraḥ kakubháḥ ।
ya evaṃ vedá ।
kakuddha rājñāṁ bhavati ।
yo vā áśvamedhe trīṇi śīrṣāṇi vedá ।
śiró ha rājñāṁ bhavati ।
ekaviṁśo'gnirbhávati ।
ekaviṁśaḥ stomáḥ ।
ekáviṁśatiryūpāḥ ।
etāni vā áśvamedhe trīṇi śīrṣāṇi ।
ya evaṃ vedá ।
śiró ha rājñāṁ bhavati ॥ 4 ॥
dvādaśaḥ stomaḥ sa eva tacchiró ha rājñāṁ bhavati
ṣaṭcá ॥ 21 ॥))

**[[3-8-22-1]]**

देवा वा अश्वमेधे पवमाने।
सुवर्गं लोकं न प्राजानन्।
तमश्वः प्राजानात्।
यदश्वमेधेऽश्वेन मेध्येनोदञ्चो बहिष्पवमानꣳ सर्पन्ति।
सुवर्गस्य लोकस्य प्रज्ञात्यै।
न वै मनुष्यः सुवर्गं लोकमञ्जसा वेद।
अश्वो वै सुवर्गं लोकमञ्जसा वेद।
यदुद्गातोद्गायेत्।
यथाऽक्षेत्रज्ञोऽन्येन पथा प्रतिपादयेत्।
तादृक्तत्॥ १॥

((devā vā áśvamedhe pavámāne ।
suvargaṃ lokaṃ na prājánan ।
tamaśvaḥ prājánāt ।
yadáśvamedhe'śvéna medhyenodáñco
bahiṣpavamānaṁ sarpánti ।
suvargasyá lokasya prajñātyai ।
na vai mánuṣyáḥ suvargaṃ lokamañjásā veda ।
aśvo vai súvargaṃ lokamañjásā veda ।
yadúdgātodgāyet ।
yathā'kṣetrajño'nyená pathā prátipādayet ।
tādṛktat ॥ 1 ॥))

**[[3-8-22-2]]**

उद्गातारमपरुध्य।
अश्वमुद्गीथाय वृणीते।
यथा क्षेत्रज्ञोऽञ्जसा नयति।
एवमेवैनमश्वः सुवर्गं लोकमञ्जसा नयति।
पुच्छमन्वारभन्ते।
सुवर्गस्य लोकस्य समष्ट्यै।
हिं करोति।
सामैवाकः।
हिं करोति।
उद्गीथ एवास्य सः॥ २॥

((udgātārámaparuddhyá ।
aśvámudgīthāyá vṛṇīte ।
yathā kṣetrajño'ñjásā nayáti ।
evamevainamaśváḥ suvargaṃ lokamañjásā nayati ।
pucchámanvārábhante ।
suvargasyá lokasya samáṣṭyai ।
hiṃ károti ।
sāmaivākáḥ ।
hiṃ károti ।
udgītha evāsya saḥ ॥ 2 ॥))

**[[3-8-22-3]]**

वडबा उपरुन्धन्ति।
मिथुनत्वाय प्रजात्यै।
अथो यथोपगातार उपगायन्ति।
तादृगेव तत्।
उदगासीदश्वो मेध्य इत्याह।
प्राजापत्यो वा अश्वः।
प्रजापतिरुद्गीथः।
उद्गीथमेवावरुन्धे।
अथो ऋक्सामयोरेव प्रतितिष्ठति।
हिरण्येनोपाकरोति।
ज्योतिर्वै हिरण्यम्।
ज्योतिरेव मुखतो दधाति।
यजमाने च प्रजासु च।
अथो हिरण्यज्योतिरेव यजमानः सुवर्गं लोकमेति॥ ३॥
तत्स उपाकरोति चत्वारि च॥ २२॥

((vaḍábā upárundhanti ।
mithunatvāya prajātyai ।
atho yathópagātārá upagāyánti ।
tādṛgeva tat ।
udágāsīdaśvo medhya ityáha ।
prājāpatyo vā aśváḥ ।
prajāpátirudgīthaḥ ।
udgīthamevāvárundhe ।

athò ṛksā̱mayò̱re̱va pratitiṣṭhati |
hira̍ṇyeno̱pāka̍roti |
jyoti̱rvai hira̍ṇyam |
jyoti̍re̱va mu̍kha̱to da̍dhāti |
yaja̍māne ca pra̱jāsu̍ ca |
atho̱ hira̍ṇyajyotire̱va yaja̍mānaḥ suva̱rgaṃ lo̱kame̍ti
|| 3 ||
tatsa u̱pāka̍roti ca̱tvāri̍ ca || 22 ||))

**[[3-8-23-1]]**

पुरु॑षो॒ वै य॒ज्ञः।
य॒ज्ञः प्र॒जाप॑तिः।
यदश्वे॑ प॒शून्नि॑यु॒ञ्जन्ति॑।
य॒ज्ञादे॒व तद्य॒ज्ञं प्रयु॑ङ्क्ते।
अश्वं॑ तूप॒रं गो॑मृ॒गम्।
तान॑ग्नि॒ष्ठ आल॑भते।
से॒ना॒मु॒खमे॒व तत्सꣳश्य॑ति।
तस्मा᳚द्राजमु॒खं भी॒ष्मं भावु॑कम्।
आ॒ग्ने॒यं कृ॒ष्णग्री॑वं पु॒रस्ता᳚ल्ल॒ला॒टे॑।
पू॒र्वा॒ग्निमे॒व तं कु॑रुते॥ १॥

((puru̍ṣo̱ vai ya̱jñaḥ |
ya̱jñaḥ pra̱jāpa̍tiḥ |
yadaśve̍ pa̱śūnni̍yu̱ñjanti̍ |
ya̱jñāde̱va tadya̱jñaṃ prayu̍ṅkte |
aśvaṃ̍ tūpa̱raṃ go̍mṛ̱gam |
tāna̍gni̱ṣṭha āla̍bhate |
se̱nā̱mu̱khame̱va tatsam̐śya̍ti |
tasmā̎drājamu̱khaṃ bhī̱ṣmaṃ bhāvu̍kam |
ā̱gne̱yaṃ kṛ̱ṣṇagrī̍vaṃ pu̱rastā̎lla̱lā̱ṭe̍ |
pū̱rvā̱gnime̱va taṃ ku̍rute || 1 ||))

**[[3-8-23-2]]**

तस्मा᳚त्पूर्वा॒ग्निं पु॒रस्ता᳚त्स्थापयन्ति।
पौ॒ष्ण॒म॒न्वञ्चा᳚म्।
अन्नं॒ वै पू॒षा।
तस्मा᳚त्पूर्वा॒ग्नाव॑हा॒र्य॑माह॑रन्ति।
ऐ॒न्द्रा॒पौ॒ष्णमु॒परि॑ष्टात्।
ऐ॒न्द्रो वै रा॑ज॒न्यो॑ऽन्नं॒ पूषा।
अ॒न्ना॒द्ये॑नै॒वैन॑मु॒भ॒य॒तः परि॑गृह्णाति।
तस्मा᳚द्राज॒न्यो᳚ऽन्ना॒दो भावु॑कः।
आ॒ग्ने॒यौ कृ॒ष्णग्री॑वौ बा॒हु॒वोः।
बा॒हु॒वोरे॒व वी॒र्यं॑ धत्ते॥ २॥

((tasmā̎tpūrvā̱gniṃ pu̱rastā̎tsthāpayanti |
pau̱ṣṇa̱ma̱nvañcā̎m |
anna̱ṃ vai pū̱ṣā |
tasmā̎tpūrvā̱gnāva̍hā̱rya̍māha̍ranti |
ai̱ndrā̱pau̱ṣṇamu̱pari̍ṣṭāt |
ai̱ndro vai rā̍ja̱nyo̍'nnaṃ̱ pū̱ṣā |
a̱nnā̱dye̍nai̱vaina̍mubha̱ya̱taḥ pari̍gṛhṇāti |
tasmā̎drāja̱nyo̎'nnādo bhāvu̍kaḥ |
ā̱gne̱yau kṛ̱ṣṇagrī̍vau bāhu̱voḥ |
bā̱hu̱vore̱va vī̱ryaṃ̍ dhatte || 2 ||))

**[[3-8-23-3]]**

तस्मा᳚द्राज॒न्यो॑ बाहुब॒ली भावु॑कः।
त्वा॒ष्ट्रौ लो॑मश॒स॒क्थौ स॒क्थ्योः।
स॒क्थ्योरे॒व वी॒र्यं॑ धत्ते।
तस्मा᳚द्राज॒न्य॑ ऊरुब॒ली भावु॑कः।
शि॒ति॒पृ॒ष्ठौ बा॑र्हस्प॒त्यौ पृ॒ष्ठे।
ब्र॒ह्म॒व॒र्च॒सम॒मे॒वोपरि॑ष्टाद्धत्ते।
अथो॑ क॒वचे॑ ए॒वैते अ॒भि॒तः पर्यू॑हते।
तस्मा᳚द्राज॒न्यः॑ संन॑द्धो वी॒र्यं॑ करोति।
धा॒त्रे पृ॑षोद॒रम॒धस्ता᳚त्।
प्र॒ति॒ष्ठामे॒वैतां कु॑रुते।
अथो॑ इ॒यं वै धा॒ता।
अ॒स्यामे॒व प्रति॑तिष्ठति।
सौ॒र्यं॑ ब॒ल॒क्षं पु॒च्छे᳚।
उ॒त्से॒धमे॒व तं कु॑रुते।
तस्मा॑दुत्से॒धं भये॒ प्र॒जा अ॒भिसꣳश्र॑यन्ति॥ ३॥
कु॒रु॒ते॒ ध॒त्ते॒ कु॒रु॒ते॒ पञ्च॑ च॥ २३॥
सा॒ङ्ग्र॒ह॒ण्या च॒तु॒ष्ट॒य्यो॒ यो वै यः पि॒तुश्च॒त्वारो॒ यथा॑ नि॒रुक्तं
प्र॒जाप॑तये त्वा॒ यथा॒ प्रोक्षि॑तं वि॒भूरा॑ह
प्र॒जाप॑तिरकामयताश्वमे॒धेन॑ प्र॒जाप॑तिर्न किञ्च॒ न
सा॑वित्रमाब्रह्म॒न्प्र॒जाप॑तिर्दे॒वेभ्यः॑ प्र॒जप॑ती॒ रक्षाꣳ॑सि
प्र॒जाप॑तिमीप्सति वि॒भूर॑श्वनामान्यम्भाꣳ॑स्येकयूपो
रा॒ज्जु॒दा॒लमेकवि॒ꣳ॒शो दे॒वाः पु॒रु॑षस्त्रयो॑विꣳशतिः॥ २३॥
सा॒ङ्ग्र॒ह॒ण्या तस्मा॑दश्वमे॒धया॒जी यत्परि॑मिता॒ यद्य॒ज्ञमु॒खे यो
दी॒क्षां दे॒वाने॒व त्र॒यं इ॒मे सि॒ताय॑
प्राणापानावे॒वास्मि॒न्तस्मा᳚द्राज॒न्य॑ एक॑नवतिः॥ ९१॥

((tasmā̎drāja̱nyo̍ bāhuba̱lī bhāvu̍kaḥ |
tvā̱ṣṭrau lo̍maśasa̱kthau sa̱kthyoḥ |
sa̱kthyore̱va vī̱ryaṃ̍ dhatte |
tasmā̎drāja̱nya̍ ūruba̱lī bhāvu̍kaḥ |
śi̱ti̱pṛ̱ṣṭhau bā̍rhaspa̱tyau pṛ̱ṣṭhe |

bra̲hma̲va̲rca̲same̲vopari̍ṣṭāddhatte ।
atho̍ ka̲vace̍ e̲vaite a̲bhita̲ḥ paryū̍hate ।
tasmā̎drāja̲nya̍ḥ saṃna̍ddho vī̲rya̍ṃ karoti ।
dhā̲tre pṛ̍ṣoda̲rama̲dhastā̎t ।
pra̲ti̲ṣṭhāme̲vaitāṃ ku̍rute ।
atho̍ i̲yaṃ vai dhā̲tā ।
a̲syāme̲va prati̍tiṣṭhati ।
sau̲ryaṃ ba̲lakṣa̲ṃ pucche̎ ।
u̲tse̲dhame̲va taṃ ku̍rute ।
tasmā̍dutse̲dhaṃ bha̲ye pra̲jā a̲bhisa̱ṃ̍śra̍yanti ॥ 3 ॥
ku̲ru̲te̲ dha̲tte̲ ku̲ru̲te̲ pañca̍ ca ॥ 23 ॥
sā̲ṅgra̲ha̲ṇyā catu̍ṣṭa̲yyo̲ yo vai yaḥ pi̲tuśca̲tvāro̲
yathā̍ ni̲ktaṃ pra̲jāpa̍taye tvā̲ yathā̲ prokṣi̍taṃ
vi̲bhūrā̍ha pra̲jāpa̍tirakāmayatāśvame̲dhena̍
pra̲jāpa̍ti̲rna kiñca̲ na
sa̍vi̲tramābrahma̍npra̲jāpa̍tirde̲vebhya̍ḥ pra̲japa̍tī̲
rakṣā̱ṃ̍si pra̲jāpa̍timīpsati
vi̲bhūra̍śvanā̲mānyambhā̱ṃ̍syekayū̲po
rājju̍dālamekavi̲ṃ̍śo de̲vāḥ puru̍ṣa̲strayo̍vi̱ṃ̍śatiḥ ॥
23 ॥
sā̲ṅgra̲ha̲ṇyā tasmā̍daśvamedhayā̲jī yatpari̍mitā̲
yadya̍jñamu̲khe yo dī̲kṣāṃ de̲vāne̲va traya̍ i̲me
si̲tāya̍ prā̲ṇāpā̲nāve̲vāsmi̲ntasmā̎drāja̲nya̍
eka̍navatiḥ ॥ 91 ॥))

# Taittirīya-Brāhmaṇa

# Book 3, Chapter 9

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[3-9-1-1]]**

प्र॒जाप॑तिरश्वमे॒धम॑सृजत।
सो᳚ऽस्मात्सृ॒ष्टोऽपा᳚क्रामत्।
तम॑ष्टाद॒शिभि॒रनु॒ प्रायु॑ङ्क्त।
तमा᳚प्नोत्।
तमा॒प्त्वाऽष्टा॑द॒शिभि॒रवा॑रुन्ध।
यद॑ष्टाद॒शिन॑ आल॒भ्यन्ते᳚।
य॒ज्ञमे॒व तैरा॒प्त्वा यज॑मा॒नोऽव॑रुन्धे।
सं॒व॒त्स॒रस्य॒ वा ए॒षा प्रति॒मा।
यद॑ष्टाद॒शिनः॑।
द्वाद॑श॒ मासाः॒ पञ्च॒र्तवः॑॥ १॥

((prạjāpátiraśvamẹdhamásr̥jata |
sȫ'smātsr̥̥ṣṭo'pā̎krāmat |
tamáṣṭādạśibhịranụ prāyúṅkta |
tamā̎pnot |
tamāptvā'ṣṭā́daśibhiravā́rundha |
yadáṣṭādạśiná ālạbhyantē |
yajñamẹva tairāptvā yajámānọ'várundhe |
saṃvatsarasyạ vā eṣā prátịmā |
yadáṣṭādạśináḥ |
dvādáśạ māsāḥ pañcartaváḥ || 1 ||))

**[[3-9-1-2]]**

सं॒व॒त्स॒रो᳚ऽष्टाद॒शः।
यद॑ष्टाद॒शिन॑ आल॒भ्यन्ते᳚।
सं॒व॒त्स॒रमे॒व तैरा॒प्त्वा यज॑मा॒नोऽव॑रुन्धे।
अ॒ग्नि॒ष्ठे᳚ऽन्यान्प॒शूनु॑पाक॒रोति॑।
इत॑रेषु॒ यूपे᳚ष्वष्टाद॒शिनोऽजा॑मित्वाय।
नव॑ न॒वाल॑भ्यन्ते सवीर्य॒त्वाय॑।
यदा॑र॒ण्यैः स॒ꣳस्था॒पये᳚त्।
व्यव॑स्येतां पितापु॒त्रौ।
व्यध्वा॑नः क्रामेयुः।
वि॒दू॒रं ग्राम॑योर्ग्रामा॒न्तौ स्या॑ताम्॥ २॥

((saṃvatsarȫ'ṣṭādaśaḥ |
yadáṣṭādạśiná ālạbhyantē |
saṃvatsaremẹva tairāptvā yajámānọ'várundhe |
agnịṣṭhē'nyānpaśūnúpākaroti |
itáreṣụ yūpē̎ṣvaṣṭādạśino'jámitvāya |
navá nạvālábhyante savīryatvāyá |
yadā́raṇyaiḥ sam̐sthāpayē̎t |
vyavásyetām pitāpụtrau |
vyadhvā́naḥ krāmeyuḥ |
vidū́raṃ grāmáyorgrāmāntau syā́tām || 2 ||))

**[[3-9-1-3]]**

ऋ॒क्षीका᳚ः पुरुषव्या॒घ्राः परि॑मो॒षिण॑ आव्या॒धिनी᳚स्तस्क॑रा॒
अ॒र॒ण्ये॒ष्वाजा॑येरन्।
तदा॑हुः।
अ॒प॒शवो॒ वा ए॒ते।
यदा॑र॒ण्याः।
यदा॑र॒ण्यैः स॒ꣳस्था॒पये᳚त्।
क्षि॒प्रे यज॑मान॒मर॑ण्यं मृ॒तꣳ हरे॑युः।
अर॑ण्यायतना॒ ह्या॑र॒ण्याः प॒शव॒ इति॑।
यत्प॒शून्नाल॒भेत॑।
अन॑वरुद्धा अस्य प॒शवः॑ स्युः।
यत्पर्य॑ग्निकृतानुत्सृ॒जेत्॥ ३॥

((r̥kṣīkā̎ḥ puruṣavyāghrāḥ párimọṣiṇá
āvyādhinịstaskárā aráṇyeṣvājā́yeran |
tadā́huḥ |
apáśavọ vā ẹte |
yadā́raṇyāḥ |
yadā́raṇyaiḥ sam̐sthāpayē̎t |
kṣipre yajámānạmáraṇyaṃ mr̥tam̐ háreyuḥ |
aráṇyāyatanā hyā́raṇyāḥ pạśavạ ití |
yatpaśūnnālabhéta |
anávaruddhā asya paśaváḥ syuḥ |
yatparyágnikr̥tānutsr̥jet || 3 ||))

**[[3-9-1-4]]**

य॒ज्ञवै॒श॒सं कु॑र्यात्।
यत्प॒शूना॒लभ॑ते।
तेनै॒व प॒शूनव॑रुन्धे।
यत्पर्य॑ग्निकृतानुत्सृ॒जत्यय॑ज्ञवैशसाय।
अव॑रुद्धा अस्य प॒शवो॒ भव॑न्ति।
न य॑ज्ञवे॒श॒सं भ॑वति।
न यज॑मान॒मर॑ण्यं मृ॒तꣳ हर॑न्ति।
ग्रा॒म्यैः स॒ꣳस्था॑पयति।

एते वै पशवः क्षेमो नाम।
सं पितापुत्राववस्यतः।
समध्वानः क्रामन्ति।
समन्तिकं ग्रामयोर्ग्रामान्तौ भवतः।
नार्क्षीकाः पुरुषव्याघ्राः परिमोषिण आव्याधिनीस्तस्करा
अरण्येष्वाजायन्ते॥ ४॥
ऋतवः स्याटामुत्सृजेत्स्यतस्त्रीणि च॥ १॥

((yajñavaiśasaṃ kuryāt ।
yatpaśūnālabhate ।
tenaiva paśūnavarundhe ।
yatparyagnikṛtānutsṛjatyayajñavaiśasāya ।
avaruddhā asya paśavo bhavanti ।
na yajñaveśasaṃ bhavati ।
na yajamānamaraṇyaṃ mṛtam̐ haranti ।
grāmyaiḥ sam̐sthāpayati ।
ete vai paśavaḥ kṣemo nāma ।
saṃ pitāputrāvavasyataḥ ।
samadhvānaḥ krāmanti ।
samantikaṃ grāmayorgrāmāntau bhavataḥ ।
nārkṣīkāḥ puruṣavyāghrāḥ parimoṣiṇa
āvyādhinīstaskarā araṇyeṣvājāyante ॥ 4 ॥
ṛtavaḥ syāṭāmutsṛjetsyatastrīṇi ca ॥ 1 ॥))

**[[3-9-2-1]]**

प्रजापतिरकामयतोभौ लोकाववरुन्धीयेति।
स एतानुभयान्पशूनपश्यत्।
ग्राम्याꣳश्चारण्याꣳश्च।
तानालभत।
तैर्वै स उभौ लोकाववारुन्ध।
ग्राम्यैरेव पशुभिरिमं लोकमवारुन्ध।
आरण्यैरमुम्।
यद्ग्राम्यान्पशूनालभते।
इममेव तैर्लोकमवरुन्धे।
यदारण्यान्॥ १॥

((prajāpatirakāmayatobhau lokāvavarundhīyeti ।
sa etānubhayānpaśūnapaśyat ।
grāmyām̐ścāraṇyām̐śca ।
tānālabhata ।
tairvai sa ubhau lokāvavārundha ।
grāmyaireva paśubhirimaṃ lokamavārundha ।
āraṇyairamum ।
yadgrāmyānpaśūnālabhate ।
imameva tairlokamavarundhe ।
yadāraṇyān ॥ 1 ॥))

**[[3-9-2-2]]**

अमुं तैः।
अनवरुद्धो वा एतस्य संवत्सर इत्याहुः।
य इत इतश्चातुर्मास्यानि संवत्सरं प्रयुङ्क्त इति।
एतावान्वै संवत्सरः।
यच्चातुर्मास्यानि।
यदेते चातुर्मास्याः पशव आलभ्यन्ते।
प्रत्यक्षमेव तैः संवत्सरं यजमानोऽवरुन्धे।
वि वा एष प्रजया पशुभिर्ऋध्यते।
यः संवत्सरं प्रयुङ्क्ते।
संवत्सरः सुवर्गो लोकः॥ २॥

((amuṃ taiḥ ।
anavaruddho vā etasya saṃvatsara ityāhuḥ ।
ya ita itaścāturmāsyāni saṃvatsaraṃ prayuṅkta iti ।
etāvānvai saṃvatsaraḥ ।
yaccāturmāsyāni ।
yadete cāturmāsyāḥ paśava ālabhyante ।
pratyakṣameva taiḥ saṃvatsaraṃ
yajamāno'varundhe ।
vi vā eṣa prajayā paśubhirṛddhyate ।
yaḥ saṃvatsaraṃ prayuṅkte ।
saṃvatsaraḥ suvargo lokaḥ ॥ 2 ॥))

**[[3-9-2-3]]**

सुवर्गं तु लोकं नापराध्नोति।
प्रजा वै पशव एकादशिनी।
यदेत ऐकादशिनाः पशव आलभ्यन्ते।
साक्षादेव प्रजां पशून्यजमानोऽवरुन्धे।
प्रजापतिर्विराजमसृजत।
सा सृष्टाऽश्वमेधं प्राविशत्।
तां दशिभिरनु प्रायुङ्क्त।
तामाप्नोत्।
तामाप्त्वा दशिभिरवारुन्ध।
यद्दशिन आलभ्यन्ते॥ ३॥

((suvargaṃ tu lokaṃ nāparādhnoti ।
prajā vai paśava ekādaśinī ।
yadeta aikādaśināḥ paśava ālabhyante ।
sākṣādeva prajāṃ paśūnyajamāno'varundhe ।
prajāpatirvirājamasṛjata ।
sā sṛṣṭā'śvamedhaṃ prāviśat ।
tāṃ daśibhiranu prāyuṅkta ।
tāmāpnot ।
tāmāptvā daśibhiravārundha ।
yaddaśina ālabhyante ॥ 3 ॥))

**[[3-9-2-4]]**

वि॒राज॑मे॒व तैरा॒प्त्वा यज॑मा॒नोऽव॑रुन्धे।

एका॑दश द॒श॒त आल॑भ्यन्ते।

एका॑दशाक्षरा त्रि॒ष्टुप्।

त्रै॒ष्टु॑भाः प॒शवः॑।

प॒शू॒नेवाव॑रुन्धे।

वै॒श्व॒दे॒वो वा अश्वः॑।

ना॒ना॒दे॒व॒त्याः᳚ प॒शवो॑ भवन्ति।

अश्व॑स्य सर्व॒त्वाय॑।

नाना॑रूपा भवन्ति।

तस्मा॒न्नाना॑रूपाः प॒शवः॑।

ब॒हु॒रू॒पा भ॑वन्ति।

तस्मा॑द्बहुरू॒पाः प॒शव॒ः समृ॑द्ध्यै॥ ४॥

आ॒र॒ण्यान्लो॒को द॒शिना॑ आल॒भ्यन्ते॒ नाना॑रूपाः प॒शवो॒ द्वे च॑॥ २॥

((vi̱rājámeva tairā̱ptvā yajámā̱no'várundhe |
ekā́daśa da̱śata̱ ālábhyante |
ekā́daśākṣarā tri̱ṣṭup |
traiṣṭúbhāḥ pa̱śaváḥ |
pa̱śūne̱vāvárundhe |
vaiśva̱de̱vo vā aśváḥ |
nā̱nā̱de̱va̱tyā̎ḥ pa̱śavó bhavanti |
aśvásya sarva̱tvāyá |
nānā́rūpā bhavanti |
tasmā̱nnānā́rūpāḥ pa̱śaváḥ |
ba̱hu̱rū̱pā bhávanti |
tasmā́dbahurū̱pāḥ pa̱śava̱ḥ samṛ́ddhyai || 4 ||
ā̱ra̱ṇyānlo̱ko da̱śiná āla̱bhyante̱ nānā́rūpāḥ pa̱śavo̱ dve cá || 2 ||))

**[[3-9-3-1]]**

अ॒स्मै वै लो॒काय॑ ग्रा॒म्याः प॒शव॒ आल॑भ्यन्ते।

अ॒मुष्मा॑ आ॒र॒ण्याः।

यद्ग्रा॒म्यान्प॒शू॒नाल॒भ॑ते।

इ॒म॒मे॒व तैर्लो॒कम॒व॑रुन्धे।

यदा॑र॒ण्यान्।

अ॒मुं तैः।

उ॒भया᳚न्प॒शूनाल॑भते।

ग्रा॒म्याꣳश्चा॑र॒ण्याꣳश्च॑।

उ॒भयो᳚र्लो॒कयो॒रव॑रुद्ध्यै।

उ॒भया᳚न्प॒शूनाल॑भते॥ १॥

((a̱smai vai lo̱kāyá grā̱myāḥ pa̱śava̱ ālábhyante |
a̱muṣmā́ āra̱ṇyāḥ |
yadgrā̱myānpa̱śūnā̱labháte |
i̱ma̱meva tairlo̱kamavárundhe |
yadā́ra̱ṇyān |
a̱muṃ taiḥ |
u̱bhayā̎npa̱śūnālábhate |
grā̱myām̐ścā́ra̱ṇyām̐ścá |
u̱bhayö̎rlo̱kayo̱ravāruddhyai |
u̱bhayā̎npa̱śūnālábhate || 1 ||))

**[[3-9-3-2]]**

ग्रा॒म्याꣳश्चा॑र॒ण्याꣳश्च॑।

उ॒भय॑स्या॒न्नाद्य॒स्याव॑रुद्ध्यै।

उ॒भया᳚न्प॒शूनाल॑भते।

ग्रा॒म्याꣳश्चा॑र॒ण्याꣳश्च॑।

उ॒भयै॑षां प॒शू॒नामव॑रुद्ध्यै।

त्रय॑स्त्रयो भवन्ति।

त्रय॑ इ॒मे लो॒काः।

ए॒षां लो॒काना॒माप्त्यै᳚।

ब्र॒ह्म॒वा॒दिनो॑ वदन्ति।

तस्मा᳚त्स॒त्यात्॥ २॥

((grā̱myām̐ścā́ra̱ṇyām̐ścá |
u̱bhayásyā̱nnādya̱syāváruddhyai |
u̱bhayā̎npa̱śūnālábhate |
grā̱myām̐ścā́ra̱ṇyām̐ścá |
u̱bhayéṣām paśū̱nāmaváruddhyai |
trayástrayo bhavanti |
trayá i̱me lo̱kāḥ |
e̱ṣām lo̱kānā̱māptyai̎ |
bra̱hma̱vā̱dinó vadanti |
tasmā̎tsa̱tyāt || 2 ||))

**[[3-9-3-3]]**

अ॒स्मिꣳल्लो॒के ब॒ह॒वः कामा॒ इति॑।

यत्स॑मा॒नीभ्यो॑ दे॒वता᳚भ्यो॒ऽन्यैऽन्ये प॒शव॑ आल॒भ्यन्ते᳚।

अ॒स्मिन्ने॒व तꣳल्लो॒के कामा᳚न्दधाति।

तस्मा॑द॒स्मिꣳल्लो॒के ब॒ह॒वः कामाः᳚।

त्र॒या॒णां त्र॒याणाꣳ स॒ह व॒पा जु॑होति।

त्र्या॑वृ॒तो वै दे॒वाः।

त्र्या॑वृत इ॒मे लो॒काः।

ए॒षां लो॒काना॒माप्त्यै᳚।

ए॒षां लो॒काना॒ं क्लृप्त्यै᳚।
पर्य॑ग्निकृतानार॒ण्यानुत्सृ॒जन्त्यहि॑ꣳसायै॥ ३॥
अव॑रुद्ध्या उ॒भया॑न्प॒शूनाल॑भते स॒त्यादहि॑ꣳसायै॥ ३॥

((a̱smim̐llo̱ke ba̱hava̱ḥ kāmā̱ iti̍ |
yatsa̍mānī̱bhyo̍ de̱vatā̎bhyo̱'nye̎'nye pa̱śava̍
āla̱bhyante̎ |
a̱sminne̱va tam̐llo̱ke kāmā̎ndadhāti |
tasmā̍da̱smim̐llo̱ke ba̱hava̱ḥ kāmā̎ḥ |
tra̱yā̱ṇāṃ tra̍yāṇām̐ sa̱ha va̱pā ju̍hoti |
tryā̍vṛto̱ vai de̱vāḥ |
tryā̍vṛta i̱me lo̱kāḥ |
e̱ṣāṃ lo̱kānā̱māptyai̎ |
e̱ṣāṃ lo̱kānā̱ṃ klptyai̎ |
parya̍gnikṛtānāra̱ṇyānutsṛ̱jantyahim̐sāyai || 3 ||
ava̍ruddhyā u̱bhayā̎npa̱śūnāla̍bhate
sa̱tyādahim̐sāyai || 3 ||))

**[[3-9-4-1]]**

यु॒ञ्जन्ति॑ ब्र॒ध्नमित्या॑ह।
अ॒सौ वा आ॑दि॒त्यो ब्र॒ध्नः।
आ॒दि॒त्यमे॒वास्मै॑ युनक्ति।
अ॒रु॒षमित्या॑ह।
अ॒ग्निर्वा अ॑रु॒षः।
अ॒ग्निमे॒वास्मै॑ युनक्ति।
चर॑न्त॒मित्या॑ह।
वा॒युर्वै चर॑न्।
वा॒युमे॒वास्मै॑ युनक्ति।
परि॑त॒स्थुष॒ इत्या॑ह॥ १॥

((yu̱ñjanti̍ bra̱dhnamityā̍ha |
a̱sau vā ā̎di̱tyo bra̱dhnaḥ |
ā̱di̱tyame̱vāsmai̍ yunakti |
a̱ru̱ṣamityā̍ha |
a̱gnirvā a̍ru̱ṣaḥ |
a̱gnime̱vāsmai̍ yunakti |
cara̍nta̱mityā̍ha |
vā̱yurvai cara̍n |
vā̱yume̱vāsmai̍ yunakti |
pari̍ta̱sthuṣa̱ ityā̍ha || 1 ||))

**[[3-9-4-2]]**

इ॒मे वै लो॒काः परि॑त॒स्थुषः॑।
इ॒मने॒वास्मै॑ लो॒कान्यु॑नक्ति।
रोच॑न्ते रोच॒ना दि॒वीत्या॑ह।
नक्ष॑त्राणि॒ वै रोच॑ना दि॒वि।
नक्ष॑त्राण्ये॒वास्मै॑ रोचयति।
यु॒ञ्जन्त्य॑स्य॒ काम्येत्या॑ह।
कामा॑ने॒वास्मै॑ युनक्ति।
हरी॒ विप॑क्ष॒सेत्या॑ह।
इ॒मे वै हरी॒ विप॑क्षसा।
इ॒मे ए॒वास्मै॑ युनक्ति॥ २॥

((i̱me vai lo̱kāḥ pari̍ta̱sthuṣa̍ḥ |
i̱mane̱vāsmai̍ lo̱kānyu̍nakti |
roca̍nte roca̱nā di̱vītyā̍ha |
nakṣa̍trāṇi̱ vai roca̍nā di̱vi |
nakṣa̍trāṇye̱vāsmai̍ rocayati |
yu̱ñjantya̍sya̱ kāmyetyā̍ha |
kāmā̍ne̱vāsmai̍ yunakti |
harī̱ vipa̍kṣa̱setyā̍ha |
i̱me vai harī̱ vipa̍kṣasā |
i̱me e̱vāsmai̍ yunakti || 2 ||))

**[[3-9-4-3]]**

शोणा॑ धृ॒ष्णू नृ॒वाह॒सेत्या॑ह।
अ॒हो॒रा॒त्रे वै नृ॒वाह॑सा।
अ॒हो॒रा॒त्रे ए॒वास्मै॑ युनक्ति।
ए॒ता ए॒वास्मै॑ दे॒वता॑ युनक्ति।
सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै।
के॒तुं कृ॒ण्वन्न॑के॒तव॒ इति॑ ध्व॒जं प्रति॑मुञ्चति।
यश॑ ए॒वैन॒ꣳ राज्ञा᳚ं गमयति।
जी॒मू॒त॑स्येव भवति॒ प्रती॑क॒मित्या॑ह।
य॒था य॒जु॒रे॒वैतत्।
ये ते॒ पन्था॑नः सवितः पू॒र्व्यास॒ इत्य॑ध्व॒र्युर्यज॑मानं
वाचयत्य॒भिजि॑त्यै॥ ३॥

((śoṇā̍ dhṛ̱ṣṇū nṛ̱vāha̱setyā̍ha |
a̱ho̱rā̱tre vai nṛ̱vāha̍sā |
a̱ho̱rā̱tre e̱vāsmai̍ yunakti |
e̱tā e̱vāsmai̍ de̱vatā̍ yunakti |
su̱va̱rgasya̍ lo̱kasya̱ sama̍ṣṭyai |
ke̱tuṃ kṛ̱ṇvanna̍ke̱tava̱ iti̍ dhva̱jaṃ prati̍muñcati |
yaśa̍ e̱vaina̱m̐ rājñā̎m̐ gamayati |
jī̱mūta̍syeva bhavati̱ pratī̍ka̱mityā̍ha |
ya̱thā ya̱jure̱vaitat |
ye te̱ panthā̍naḥ savitaḥ pū̱rvyāsa̱
ityá̍dhva̱ryuryaja̍mānaṃ vācayatya̱bhiji̍tyai || 3 ||))

**[[3-9-4-4]]**

परा॒ वा ए॒तस्य॑ य॒ज्ञ ए॑ति।
यस्य॑ प॒शुरु॒पाकृ॑तो॒ऽन्यत्र॒ वेद्या॒ ए॑ति॑।
ए॒तꣳ स्तो॑तरे॒तेन॑ प॒था पुन॒रश्व॒मावर्त॑यासि॒ न॒ इत्या॑ह।

वा॒युर्वै स्तो॒ता᳚ ।
वा॒यु॒मे॒वास्य॑ प॒रस्ता᳚द्दध॒त्यावृ॑त्त्यै ।
यथा॒ वै ह॒विषो॑ गृही॒तस्य॒ स्कन्द॑ति ।
ए॒वं वा ए॒तद॑श्व॑स्य स्कन्दति ।
यद॑स्यो॒पाकृ॑तस्य॒ लोमा॑नि॒ शीय॑न्ते ।
यद्वाले॑षु का॒चाना॒वय॑न्ति ।
लोमा᳚न्ये॒वास्य॒ तत्संभ॑रन्ति ॥ ४ ॥

((parạ̄ vā ẹtasyá yạjña éti ।
yasyá pạśurupạ̄kṛ́tọ'nyatrạ vedyā etí ।
ẹtaṁ̐ stótarẹtená pạthā punạraśvạmāvártayāsi nạ ityáha ।
vāyurvai stotā̎ ।
vāyumẹvāsyá pạrastā̎ddadhạtyāvṛ́ttyai ।
yathạ̄ vai hạviṣó gṛhị̄tasyạ skandáti ।
ẹvaṃ vā ẹtadaśvásya skandati ।
yadásyọpākṛ́tasyạ lomā́nị śīyánte ।
yadvāléṣu kạ̄cānạ̄vayánti ।
lomā̎nyẹvāsyạ tatsaṃbháranti ॥ 4 ॥))

**[[3-9-4-5]]**
भूर्भु॑व॒: सुव॒रिति॑ प्राजाप॒त्याभि॒राव॑यन्ति ।
प्रा॒जा॒प॒त्यो वा अश्व॑: ।
स्वयै॒वैनं॑ दे॒वत॑या॒ सम॑र्धयन्ति ।
भूरि॑ति॒ महि॑षी ।
भुव॒ इति॑ वा॒वाता᳚ ।
सुव॒रिति॑ परिवृ॒क्ती ।
ए॒षां लो॒काना॑म॒भिजि॑त्यै ।
हि॒र॒ण्यया᳚: का॒चा भ॑वन्ति ।
ज्योति॒र्वै हिर॑ण्यम् ।
रा॒ष्ट्रम॑श्वमे॒धः ॥ ५ ॥

((bhūrbhuvạḥ suvạrití prājāpạtyābhịrāváyanti ।
prạ̄jạ̄pạtyo vā aśváḥ ।
svayạivainaṃ dẹvatáyạ̄ samárdhayanti ।
bhūritị mahíṣī ।
bhuvạ ití vạ̄vātā̎ ।
suvạrití parivṛ̣ktī ।
ẹṣāṃ lọkānā́mạbhijítyai ।
hịraṇyayā̎ḥ kạ̄cā bhávanti ।
jyotịrvai hiráṇyam ।
rạ̄ṣṭramáśvamẹdhaḥ ॥ 5 ॥))

**[[3-9-4-6]]**
ज्योति॑श्चै॒वास्मै॑ रा॒ष्ट्रं च॑ स॒मीची॑ दधाति ।
स॒हस्रं॑ भवन्ति ।
स॒हस्र॑संमितः सुव॒र्गो लो॒कः ।
सु॒व॒र्गस्य॑ लो॒कस्या॒भिजि॑त्यै ।
अप॒ वा ए॒तस्मा॒त्तेज॑ इन्द्रि॒यं प॒शव॒: श्रीः क्रा॑मन्ति ।
यो᳚ऽश्वमे॒धेन॒ यज॑ते ।
वस॑वस्त्वाऽञ्जन्तु गाय॒त्रेण॒ छन्द॒सेति॒ महि॑ष्य॒भ्य॑नक्ति ।
तेजो॒ वा आज्य᳚म् ।
तेजो॑ गाय॒त्री ।
तेज॑सै॒वास्मै॒ तेजोऽव॑रुन्धे ॥ ६ ॥

((jyotíścaịvāsmaí rāṣṭraṃ cá sạmīcí dadhāti ।
sạhasraṃ́ bhavanti ।
sạhasrásaṃmitaḥ suvạrgo lọkaḥ ।
suvạrgasyá lọkasyạ̄bhijítyai ।
apạ vā ẹtasmạ̄tteja indrịyaṃ pạśavạḥ śrīḥ krā́manti ।
yo̎'śvamẹdhenạ yajáte ।
vasávastvā'ñjantu gāyạtreṇạ chandạsetị mahíṣyạbhyánakti ।
tejọ vā ājyā̎m ।
tejó gāyạtrī ।
tejásaịvāsmaị tejo'várundhe ॥ 6 ॥))

**[[3-9-4-7]]**
रु॒द्रास्त्वा᳚ऽञ्जन्तु॒ त्रैष्टु॑भेन॒ छन्द॒सेति॑ वा॒वाता᳚ ।
तेजो॒ वा आज्य᳚म् ।
इ॒न्द्रि॒यं त्रि॒ष्टुप् ।
तेज॑सै॒वास्मा॑ इन्द्रि॒यमव॑रुन्धे ।
आ॒दि॒त्यास्त्वा᳚ऽञ्जन्तु॒ जाग॑तेन॒ छन्द॒सेति॑ परिवृ॒क्ती ।
तेजो॒ वा आज्य᳚म् ।
प॒शवो॒ जग॑ती ।
तेज॑सै॒वास्मै॑ प॒शूनव॑रुन्धे ।
पत्न॑यो॒ऽभ्य॑ञ्जन्ति ।
श्रि॒या वा ए॒तद्रू॒पम् ॥ ७ ॥

((rụdrāstvā̎'ñjantụ traiṣṭúbhenạ chandạsetí vạ̄vātā̎ ।
tejọ vā ājyā̎m ।
ịndrịyaṃ trịṣṭup ।
tejásaịvāsmā́ indrịyamavárundhe ।
ạ̄dịtyāstvā̎'ñjantụ jāgátenạ chandạsetí parivṛ̣ktī ।
tejọ vā ājyā̎m ।
pạśavọ jagátī ।
tejásaịvāsmaí pạśūnavárundhe ।
patnáyọ'bhyáñjanti ।
śrịyā vā ẹtadrụ̄pam ॥ 7 ॥))

**[[3-9-4-8]]**
यत्पत्न॑यः ।

श्रि॒यं॑मे॒वास्मि॒न्तद्द॑धति।
नास्मा॒त्तेज॑ इन्द्रि॒यं प॒शव॑ श्रीरप॑कामन्ति।
लाजी३ञ्छाची३न्यशो॑म॒माँ४
इत्यति॑रिक्त॒मन्न॒मश्वा॑यो॒पाह॑रन्ति।
प्र॒जामे॒वान्ना॒दीं कु॑र्वते।
ए॒तद्दे॑वा॒ अन्न॑मत्तै॒तदन्न॑मद्धि प्रजापत॒ इत्या॑ह।
प्र॒जाया॑मे॒वान्नाद्यं॑ दधते।
यदि॒ नाव॒जिघ्रे॑त्।
अ॒ग्निः प॒शुरा॑सी॒दित्यव॑घ्रापयेत्।
अव॑ है॒व जि॑घ्रति।
आक्रा॑न्वा॒जी क्र॒मैरत्य॑क्रमीद्वा॒जी द्यौस्ते॑ पृ॒ष्ठं पृ॑थि॒वी
स॒धस्थ॒मित्यश्व॒मनु॑मन्त्रयते।
ए॒षां लो॒काना॑म॒भिजि॑त्यै।
समि॑द्धो अ॒ञ्जन्कृद॑रं मती॒नामित्यश्व॑स्या॒प्रियो॑ भवन्ति
सरूप॒त्वाय॑॥ ८॥
परि॑त॒स्थुष॒ इत्या॑हे॒मे ए॒वास्मै॑ युनक्त्य॒भिजि॑त्यै
भरन्त्यश्वमे॒धो रु॑न्धे रू॒पं जि॑घ्रति॒ त्रीणि॑ च॥ ४॥

((yatpatnáyaḥ |
śriyámeva̱smi̱ntaddádhati |
nāsmā̱tteja̍ indri̱yaṃ pa̱śava̱ḥ śrīrapa̍kāmanti |
lājī3ñchācī3nyaśo̍ma̱mām̐4
ityati̍rikta̱manna̱maśva̍yo̱pāha̍ranti |
pra̱jāme̱vānnā̱dīṃ ku̍rvate |
e̱tadde̍vā̱ anna̍mattai̱tadanna̍maddhi prajāpata̱ ityā̍ha |
prajāyā̍me̱vānnādyaṃ dadhate |
yadi̱ nāva̱jighre̍t |
a̱gniḥ pa̱śurā̍sī̱dityava̍ghrāpayet |
ava̍ hai̱va ji̍ghrati |
ākrā̍nvā̱jī krama̱iratya̍kramīdvā̱jī dyauste̍ pṛ̱ṣṭhaṃ
pṛ̍thi̱vī sa̱dhastha̱mityaśva̱manu̍mantrayate |
e̱ṣāṃ lo̱kānā̍ma̱bhiji̍tyai |
sami̍ddho a̱ñjankṛda̍raṃ matī̱nāmityaśva̍syā̱priyo̍
bhavanti sarūpa̱tvāya̍ || 8 ||
pari̍ta̱sthuṣa̱ ityā̍he̱me e̱vāsmai̍ yunaktya̱bhiji̍tyai
bharantyaśvame̱dho ru̍ndhe rū̱paṃ ji̍ghrati̱ trīṇi̍ ca ||
4 ||))

## [[3-9-5-1]]

तेज॑सा॒ वा ए॒ष ब्र॑ह्मवर्च॒सेन॒ व्यृ॑ध्यते।
यो॑ऽश्वमे॒धेन॒ यज॑ते।
होता॑ च ब्र॒ह्मा च॑ ब्रह्मो॒द्यं॑ वदतः।
तेज॑सा चै॒वैनं॑ ब्रह्मवर्च॒सेनं॑ च॒ सम॑र्धयतः।
द॒क्षि॒ण॒तो ब्र॒ह्मा भ॑वति।
द॒क्षि॒ण॒त आय॑तनो॒ वै ब्र॒ह्मा।
बा॒र्ह॒स्प॒त्यो वै ब्र॒ह्मा।
ब्र॒ह्म॒व॒र्च॒सम॒वास्य॑ दक्षिण॒तो द॑धाति।
तस्मा॒द्दक्षि॒णोऽर्धो॑ ब्रह्मवर्च॒सित॑रः॥
उ॒त्त॒र॒तो होता॑ भवति॥ १॥

((tejásā̱ vā e̱ṣa bráhmavarca̱sena̱ vyṛ̍ddhyate |
yo̍'śvame̱dhena̱ yajáte |
hotá ca bra̱hmā cá bra̱hmodyaṃ̍ vadataḥ |
tejásā ca̱ivainaṃ̍ brahmavarca̱sená ca̱
samárdhayataḥ |
da̱kṣi̱ṇa̱to bra̱hmā bhávati |
da̱kṣi̱ṇa̱ta áyatano̱ vai bra̱hmā |
bā̱rha̱spa̱tyo vai bra̱hmā |
bra̱hma̱va̱rca̱same̱vāsyá dakṣi̱ṇa̱to dádhāti |
tasmā̱ddakṣi̱ṇo̱'rdho̍ brahmavarca̱sitáraḥ ||
u̱tta̱ra̱to hotá bhavati || 1 ||))

## [[3-9-5-2]]

उ॒त्त॒र॒त आय॑तनो॒ वै होता॑।
आ॒ग्ने॒यो वै होता॑।
तेजो॒ वा अ॒ग्निः।
तेज॑ ए॒वास्यो॑त्तर॒तो द॑धाति।
तस्मा॒दुत्त॒रोऽर्ध॑स्तेज॒स्वित॑रः।
यू॒प॑म॒भितो॑ वदतः।
य॒ज॒मा॒न॒दे॒व॒त्यो॑ वै यूपः॑।
यज॑मानमे॒व तेज॑सा च ब्रह्मवर्च॒सेन॑ च॒ सम॑र्धयतः।
किँ॒स्वि॑दासी॒त्पू॒र्वचि॑त्ति॒रित्या॑ह।
द्यौर्वै॑ वृ॒ष्टिः पू॒र्वचि॑त्तिः॥ २॥

((u̱tta̱ra̱ta áyatano̱ vai hotá |
ā̱gne̱yo vai hotá |
tejo̱ vā a̱gniḥ |
tejá e̱vāsyo̍tta̱ra̱to dádhāti |
tasmā̱dutta̱ro'rdhástejasvitáraḥ |
yūpáma̱bhito vadataḥ |
ya̱ja̱mā̱na̱de̱va̱tyo vai yūpáḥ |
yajámānam̱eva tejásā ca brahmavarca̱sená ca̱
samárdhayataḥ |
kim̐svidāsītpū̱rvaci̍tti̱rityáha |
dyaurvai vṛ̱ṣṭi̱ḥ pū̱rvaci̍ttiḥ || 2 ||))

## [[3-9-5-3]]

दिव॑मे॒व वृ॒ष्टिमव॑रुन्धे।
किँ॒ स्वि॑दासीद्बृ॒हद्वय॒ इत्या॑ह।

अश्वो॒ वै बृ॒हद्व॑यः।
अश्व॑मे॒वाव॑रुन्धे।
कि॒ꣳस्वि॑दासीत्पिशङ्गि॒लेत्या॑ह।
रात्रि॒र्वै पि॑शङ्गि॒ला।
रात्रि॑मे॒वाव॑रुन्धे।
कि॒ꣳस्वि॑दासीत्पिलिप्पि॒लेत्या॑ह।
श्रीर्वै पि॑लिप्पि॒ला।
अ॒न्नाद्य॑मे॒वाव॑रुन्धे॥ ३॥

((divámẹva vṛṣṭịmavárundhe |
kiṁ̐ svídāsīdbṛ̣hadvayạ ityā́ha |
aśvọ vai bṛ̣hadvayáḥ |
aśvámẹvāvárundhe |
kiṁ̐svídāsītpiśaṅgịletyā́ha |
rātrịrvai píśaṅgịlā |
rātrímẹvāvárundhe |
kiṁ̐svídāsītpilippịletyā́ha |
śrīrvai pílippịlā |
ạnnādyámẹvāvárundhe || 3 ||))

**[[3-9-5-4]]**

कः स्वि॑देका॒की च॑रतीत्या॑ह।
अ॒सौ वा आ॑दि॒त्य ए॑का॒की च॑रति।
तेज॑ ए॒वाव॑रुन्धे।
क उ॑ स्विज्जा॑यते॒ पुन॒रित्या॑ह।
च॒न्द्रमा॒ वै जा॑यते॒ पुनः॑।
आयु॑रे॒वाव॑रुन्धे।
कि॒ꣳस्वि॑द्धि॒मस्य॑ भेष॒जमित्या॑ह।
अ॒ग्निर्वै हि॒मस्य॑ भेष॒जम्।
ब्र॒ह्म॒व॒र्च॒सम॑मे॒वाव॑रुन्धे।
कि॒ꣳस्वि॑दा॒वप॑नं म॒हदित्या॑ह॥ ४॥

((kaḥ svídekạ̄kī cáraṭītyā́ha |
ạsau vā ā́dịtya ékạ̄kī cárati |
tejá ẹvāvárundhe |
ka ú svijjāyatẹ punạrityā́ha |
cạndramā̱ vai jā́yatẹ punáḥ |
āyúrẹvāvárundhe |
kiṁ̐sviddhịmasyá bheṣạjamityā́ha |
ạgnirvai hịmasyá bheṣạjam |
brạhmạvạrcạsamẹvāvárundhe |
kiṁ̐svídạ̄vapánaṃ mạhadityā́ha || 4 ||))

**[[3-9-5-5]]**

अ॒यं वै लो॒क आ॒वप॑नं म॒हत्।
अ॒स्मिन्ने॒व लो॒के प्रति॑तिष्ठति।
पृ॒च्छामि॑ त्वा॒ पर॒मं तं॑ पृथि॒व्या इत्या॑ह।
वे॒दिर्वै प॒रोऽन्तः॑ पृथि॒व्याः।
वेदि॑मे॒वाव॑रुन्धे।
पृ॒च्छामि॑ त्वा॒ भुव॑नस्य॒ नाभि॒मित्या॑ह।
य॒ज्ञो वै भुव॑नस्य॒ नाभिः॑।
य॒ज्ञमे॒वाव॑रुन्धे।
पृ॒च्छामि॑ त्वा॒ वृष्णो॒ अश्व॑स्य॒ रेत॒ इत्या॑ह।
सोमो॒ वै वृष्णो॒ अश्व॑स्य॒ रेतः॑।
सो॒म॒पी॒थमे॒वाव॑रुन्धे।
पृ॒च्छामि॑ वा॒चः प॑र॒मं व्यो॑मेत्या॑ह।
ब्र॒ह्म वै वा॒चः प॑र॒मं व्यो॑म।
ब्र॒ह्म॒व॒र्च॒सम॑मे॒वाव॑रुन्धे॥ ५॥
होता॑ भवति॒ वै वृ॒ष्टिः पूर्व॑चित्ति॒रन्नाद्य॑मे॒वाव॑ रुन्धे
म॒हदित्या॑ह॒ सोमो॒ वै वृष्णो॒ अश्व॑स्य॒ रेत॑श्च॒त्वारि॑ च॥ ५॥

((ạyaṃ vai lọka āvapánaṃ mạhat |
ạsminnẹva lọke pratítiṣṭhati |
pṛ̣cchāmí tvạ̄ parạmaṃ taṁ́ pṛthịvyā ityā́ha |
vedịrvai paro'ntáḥ pṛthịvyāḥ |
vedímẹvāvárundhe |
pṛ̣cchāmí tvạ̄ bhuvánasyạ nābhịmityā́ha |
yạjño vai bhuvánasyạ nābhíḥ |
yạjñamẹvāvárundhe |
pṛ̣cchāmí tvạ̄ vṛṣṇọ aśvásyạ retạ ityā́ha |
somọ vai vṛṣṇọ aśvásyạ retáḥ |
sọmạpīthamẹvāvárundhe |
pṛ̣cchāmí vạ̄caḥ páramaṃ vyómetyā́ha |
brahmạ vai vạ̄caḥ páramaṃ vyóma |
brạhmạvạrcạsamẹvāvárundhe || 5 ||
hotá bhavatị vai vṛṣṭịḥ pūrvacíttirạnnādyámẹvāvá
rundhe mạhadityā́hạ somọ vai vṛṣṇọ aśvásyạ
retáścạtvārí ca || 5 ||))

**[[3-9-6-1]]**

अप॒ वा ए॒तस्मा॑त्प्रा॒णाः क्रा॑मन्ति।
यो॑ऽश्वमे॒धेन॒ यज॑ते।
प्रा॒णाय॒ स्वाहा॑ व्या॒नाय॒ स्वाहेति॑ संज्ञा॒प्यमा॑न॒
आहु॑तीर्जु॒होति।
प्रा॒णाने॒वास्मि॑न्दधाति।
नास्मा॑त्प्रा॒णा अप॑क्रामन्ति।
अव॑न्ती॒ स्थाव॑न्तीस्त्वाऽवन्तु।
प्रि॒यं त्वा॑ प्रि॒याणा॑म्।

वर्षि॑ष्ठ॒माप्या॑नाम्।
नि॒धी॒नां त्वा॑ निधि॒पति॑ꣳ हवामहे वसो म॒मेत्या॑ह।
अपै॒वास्मै॒ तद्ध्नु॑वते॥ १॥

((apa̱ vā e̱tasmā᳚tprā̱ṇā̱ḥ krā̍manti ।
yo᳚'śvame̱dhena̱ yajā̍te ।
prā̱ṇāya̱ svāhā᳚ vyā̱nāya̱ svāheti̍ saṃjña̱pyamā̍na̱
āhu̍tīrjuhoti ।
prā̱ṇāne̱vāsmi̍ndadhāti ।
nāsmā᳚tprā̱ṇā apa̍krāmanti ।
avā̍ntī̱ sthāvā̍ntīstvā'vantu ।
priya̱ṃ tvā᳚ pri̱yā̱ṇā᳚m ।
varṣi̍ṣṭha̱māpyā̍nām ।
ni̱dhī̱nāṃ tvā̍ nidhi̱patiꣳ̍ havāmahe vaso
ma̱metyā̍ha ।
apai̱vāsmai̱ taddhnu̍vate ॥ 1 ॥))

**[[3-9-6-2]]**
अथो॑ धु॒वन्त्ये॒वैना᳚म्।
अथो॒ न्ये॑वास्मै᳚ ह्नुवते।
त्रिः परि॑यन्ति।
त्रय॑ इ॒मे लो॒काः।
ए॒भ्य ए॒वैनं॑ लो॒केभ्यो॑ धुवते।
त्रिः पुन॒ः परि॑यन्ति।
षट्संप॑द्यन्ते।
षड्वा ऋ॒तव॑ः।
ऋ॒तुभि॑रे॒वैनं॑ धुवते।
अप॒ वा ए॒तेभ्य॑ः प्रा॒णाः क्रा᳚मन्ति॥ २॥

((atho̍ dhu̱vantye̱vainā᳚m ।
atho̱ nye̍vāsmai᳚ hnuvate ।
triḥ pari̍yanti ।
traya̍ i̱me lo̱kāḥ ।
e̱bhya e̱vainaṃ̍ lo̱kebhyo̍ dhuvate ।
triḥ puna̱ḥ pari̍yanti ।
ṣaṭsaṃpa̍dyante ।
ṣaḍvā ṛ̱tava̍ḥ ।
ṛ̱tubhi̍re̱vainaṃ̍ dhuvate ।
apa̱ vā e̱tebhya̍ḥ prā̱ṇāḥ krā᳚manti ॥ 2 ॥))

**[[3-9-6-3]]**
ये य॒ज्ञे धुव॑नं त॒न्वते᳚।
न॒व॒कृत्व॑ः परि॑यन्ति।
न॒व वै पुरु॑षे प्रा॒णाः।
प्रा॒णाने॒वात्मन्द॑धते।
नैभ्य॑ः प्रा॒णा अप॑क्रामन्ति।
अम्बे॒ अम्बा॒ल्यम्बि॑क॒ इ॒ति॒ पत्नी॑मु॒दान॑यति।
अह्व॑तै॒वैना᳚म्।
सुभ॑गे॒ काम्पी॑लवासि॒नीत्या॑ह।
तप॑ ए॒वैना॒मुप॑नयति।
सु॒व॒र्गे लो॒के संप्रोर्ण्वा॑था॒मित्या॑ह॥ ३॥

((ye ya̱jñe dhuva̍naṃ ta̱nvate᳚ ।
na̱va̱kṛtva̱ḥ pari̍yanti ।
nava̱ vai puru̍ṣe prā̱ṇā̱ḥ ।
prā̱ṇāne̱vātmanda̍dhate ।
naibhya̍ḥ prā̱ṇā apa̍krāmanti ।
ambe̱ ambā̱lyambi̍ka̱ iti̱ patni̍mu̱dāna̍yati ।
ahva̍tai̱vainā᳚m ।
subha̍ge̱ kāmpi̍lavāsi̱nītyā̍ha ।
tapa̍ e̱vainā̱mupa̍nayati ।
su̱va̱rge lo̱ke saṃprorṇva̍thā̱mityā̍ha ॥ 3 ॥))

**[[3-9-6-4]]**
सु॒व॒र्गमे॒वैना᳚ꣳ लो॒कं ग॑मयति।
आऽहम॑जानि गर्भ॒धमा त्वम॑जासि गर्भ॒धमित्या॑ह।
प्र॒जा वै प॒शवो॒ गर्भ॑ः।
प्र॒जामे॒व प॒शूना॒त्मन्ध॑त्ते।
दे॒वा वा अश्व॑मे॒धे पव॑माने।
सु॒व॒र्गं लो॒कं न प्राजा॑नन्।
तमश्व॑ः प्राजा॑नात्।
यत्सू॒चीभि॑रसिप॒थान्क॒ल्पय॑न्ति।
सु॒व॒र्गस्य॑ लो॒कस्य॒ प्रज्ञा᳚त्यै।
गा॒य॒त्री त्रि॒ष्टुब्ज॒गतीत्या॑ह॥ ४॥

((su̱va̱rgame̱vainā᳚ꣳ lo̱kaṃ ga̍mayati ।
ā'hama̍jāni garbha̱dhamā tvama̍jāsi
garbha̱dhamityā̍ha ।
pra̱jā vai pa̱śavo̱ garbha̍ḥ ।
pra̱jāme̱va pa̱śūnā̱tmandha̍tte ।
de̱vā vā a̍śvame̱dhe pava̍māne ।
su̱va̱rgaṃ lo̱kaṃ na prājā̍nan ।
tamaśva̱ḥ prājā̍nāt ।
yatsū̱cībhi̍rasipa̱thānka̱lpaya̍nti ।
su̱va̱rgasya̍ lo̱kasya̱ prajñā᳚tyai ।
gā̱ya̱trī tri̱ṣṭubjaga̱tītyā̍ha ॥ 4 ॥))

**[[3-9-6-5]]**
य॒था य॒जुरे॒वैतत्।
त्र॒य्यः सू॒च्यो॑ भवन्ति।
अ॒य॒स्मय्यो॑ रज॒ता हरि॑ण्यः।
अ॒स्य वै लो॒कस्य॑ रू॒पम॑य॒स्मय्य॑ः।

अन्तरिक्षस्य रजताः।
दिवो हरिण्यः।
दिशो वा अयस्मय्यः।
अवान्तरदिशा रजताः।
ऊर्ध्वा हरिण्यः।
दिश एवास्मै कल्पयति।
कस्त्वाँ छ्यति कस्त्वा विशास्तीत्याहाहिꣳसायै॥ ५॥
ह्नुवते क्रामन्त्यूर्णवाथामित्याह जगतीत्याह कल्पयत्येकं च॥ ६॥

((yathā yajurevaitat |
trayyaḥ sūcyo bhavanti |
ayasmayyo rajatā hariṇyaḥ |
asya vai lokasya rūpamayasmayyaḥ |
antarikṣasya rajatāḥ |
divo hariṇyaḥ |
diśo vā ayasmayyaḥ |
avāntaradiśā rajatāḥ |
ūrdhvā hariṇyaḥ |
diśa evāsmai kalpayati |
kastvā̐ chyati kastvā viśāstītyāhāhiṁ̐sāyai || 5 ||
hnuvate krāmantyūrṇvāthāmityāha jagatītyāha kalpayatyekaṁ ca || 6 ||))

**[[3-9-7-1]]**

अप वा एतस्माच्छ्री राष्ट्रं क्रामति।
योँऽश्वमेधेन यजते।
ऊर्ध्वामेनामुच्छ्रयतादित्याह।
श्रीर्वै राष्ट्रमश्वमेधः।
श्रियमेवास्मै राष्ट्रमूर्ध्वमुच्छ्रयति।
वेणुभारं गिराविवेत्याह।
राष्ट्रं वै भारः।
राष्ट्रमेवास्मै पर्यूहति।
अथाँस्या मध्यमेधतामित्याह।
श्रीर्वै राष्ट्रस्य मध्यँम्॥ १॥

((apa vā etasmācchrī rāṣṭraṃ krāmati |
yo̐'śvamedhena yajate |
ūrdhvāmenāmucchrayatādityāha |
śrīrvai rāṣṭramaśvamedhaḥ |
śriyamevāsmai rāṣṭramūrdhvamucchrayati |
veṇubhāraṃ girāvivetyāha |
rāṣṭraṃ vai bhāraḥ |
rāṣṭramevāsmai paryūhati |
athā̐syā madhyamedhatāmityāha |
śrīrvai rāṣṭrasya madhyā̐m || 1 ||))

**[[3-9-7-2]]**

श्रियमेवावरुन्धे।
शीते वाते पुनन्निवेत्याह।
क्षेमो वै राष्ट्रस्य शीतो वातः।
क्षेममेवावरुन्धे।
यद्धरिणी यवमत्तीत्याह।
विड्वै हरिणी।
राष्ट्रं यवः।
विशं चैवास्मै राष्ट्रं च समीची दधाति।
न पुष्टं पशुमन्यत इत्याह।
तस्माद्राजा पशून्न पुष्यति॥ २॥

((śriyamevāvarundhe |
śīte vāte punannivetyāha |
kṣemo vai rāṣṭrasya śīto vātaḥ |
kṣemamevāvarundhe |
yaddhariṇī yavamattītyāha |
viḍvai hariṇī |
rāṣṭraṃ yavaḥ |
viśaṃ caivāsmai rāṣṭraṃ ca samīcī dadhāti |
na puṣṭaṃ paśumanyata ityāha |
tasmādrājā paśūnna puṣyati || 2 ||))

**[[3-9-7-3]]**

शूद्रा यदर्यजारा न पोषाय धनायतीत्याह।
तस्माँद्वैशीपूत्रं नाभिषिञ्चन्ते।
इयं यका शकुन्तिकेत्याह।
विड्वै शकुन्तिका।
राष्ट्रमश्वमेधः।
विशं चैवास्मै राष्ट्रं च समीची दधाति।
आहलमिति सर्पतीत्याह।
तस्माँद्राष्ट्राय विशः सर्पन्ति।
आहतं गभे पस इत्याह।
विड्वै गभः॥ ३॥

((śūdrā yadaryajārā na poṣāya dhanāyatītyāha |
tasmā̐dvaiśīpūtraṃ nābhiṣiñcante |
iyaṃ yakā śakuntiketyāha |
viḍvai śakuntikā |
rāṣṭramaśvamedhaḥ |
viśaṃ caivāsmai rāṣṭraṃ ca samīcī dadhāti |
āhalamiti sarpatītyāha |
tasmā̐drāṣṭrāya viśaḥ sarpanti |
āhataṃ gabhe pasa ityāha |

viḍvai gabhȧḥ || 3 ||))

**[[3-9-7-4]]**

राष्ट्रं पसः।
राष्ट्रमेव विश्याहन्ति।
तस्माद्राष्ट्रं विशं घातुकम्।
माता च ते पिता च त इत्याह।
इयं वै माता।
असौ पिता।
आभ्यामेवैनं परिददाति।
अग्रं वृक्षस्य रोहत इत्याह।
श्रीर्वै वृक्षस्याग्रम्।
श्रियमेवावरुन्धे॥ ४॥

((rāṣṭram pasȧḥ |
rāṣṭrameva viśyāhȧnti |
tasmȧdrāṣṭram viśam ghātu̇kam |
mātā cȧ te pitā cȧ ta ityȧha |
iyam vai mātā |
asau pitā |
ābhyāmevainam parȧdadāti |
agraṁ vṛkṣasyȧ rohata ityȧha |
śrīrvai vṛkṣasyāgrȧm |
śriyȧmevāvȧrundhe || 4 ||))

**[[3-9-7-5]]**

प्रसुलामीति ते पिता गभे मुष्टिमतꣳसयदित्याह।
विड्वै गभः।
राष्ट्रं मुष्टिः।
राष्ट्रमेव विश्याहन्ति।
तस्माद्राष्ट्रं विशं घातुकम्।
अप वा एतेभ्यः प्राणाः क्रामन्ति।
ये यज्ञेऽपूतं वदन्ति।
दधिक्राव्णो अकारिषमिति सुरभिमतीमृचं वदन्ति।
प्राणा वै सुरभयः।
प्राणानेवात्मन्दधते।
नैभ्यः प्राणा अपक्रामन्ति।
आपो हि ष्ठा मयोभुव इत्यद्भिर्मार्जयन्ते।
आपो वै सर्वा देवताः।
देवताभिरेवात्मानं पवयन्ते॥ ५॥
राष्ट्रस्य मध्यं पुष्यति गभो रुन्धे दधते चत्वारि च॥ ७॥

((prasu̇lāmīti te pitā gabhe muṣṭimȧtaṁsayadityȧha |
viḍvai gabhȧḥ |
rāṣṭram muṣṭiḥ |
rāṣṭrameva viśyāhȧnti |
tasmȧdrāṣṭram viśam ghātu̇kam |
apa vā etebhyȧḥ prāṇāḥ krȧmanti |
ye yajñe'pu̇tam vadȧnti |
dadhikrāvṇȯ akāriṣamiti surabhimatīmṛcaṁ vadanti |
prāṇā vai su̇rabhayȧḥ |
prāṇānevātmandȧdhate |
naibhyȧḥ prāṇā apȧkrāmanti |
āpo hi ṣṭhā mȧyobhuva ityadbhirmȧrjayante |
āpo vai sarvȧ devatȧḥ |
devatȧbhirevātmānaṁ pavayante || 5 ||
rāṣṭrasya madhyam puṣyȧti gabhȯ rundhe dadhate catvārȧ ca || 7 ||))

**[[3-9-8-1]]**

प्रजापतिः प्रजाः सृष्ट्वा प्रेणाऽनुप्राविशत्।
ताभ्यः पुनः संभवितुं नाशक्नोत्।
सोऽब्रवीत्।
ऋध्नवदित्सः।
यो मेतः पुनः संभरदिति।
तं देवा अश्वमेधेनैव समभरन्।
ततो वै त आर्ध्नुवन्।
योऽश्वमेधेन यजते।
प्रजापतिमेव संभरत्यृध्नोति।
पुरुषमालभते॥ १॥

((prajāpȧtiḥ prajāḥ sṛṣṭvā preṇā'nuprāvȧśat |
tābhyaḥ punaḥ sambhȧvitum nāśȧknot |
sȯ'bravīt |
ṛdhnavaditsaḥ |
yo metaḥ punȧḥ sambharaditȧ |
tam devā ȧśvamedhenaiva samȧbharan |
tato vai ta ȧrdhnuvan |
yȯ'śvamedhena yajȧte |
prajāpȧtimeva sambhȧratyṛdhnotȧ |
puru̇ṣamālȧbhate || 1 ||))

**[[3-9-8-2]]**

वैराजो वै पुरुषः।
विराजमेवालभते।
अथो अन्नं वै विराट्।
अन्नमेवावरुन्धे।
अश्वमालभते।

प्रा॒जा॒प॒त्यो वा अश्वः॑।
प्र॒जाप॑तिमे॒वाल॑भते।
अथो॒ श्रीर्वा एक॑शफम्।
श्रिय॑मे॒वाव॑रुन्धे।
गामाल॑भते॥ २॥

((vai̱rā̱jo vai puru̍ṣaḥ ।
vi̱rāja̍me̱vālā̍bhate ।
atho̱ anna̱ṃ vai vi̱rāṭ ।
anna̍me̱vāvā̍rundhe ।
aśva̱mālā̍bhate ।
prā̱jā̱pa̱tyo vā aśva̍ḥ ।
pra̱jāpa̍time̱vālā̍bhate ।
atho̱ śrīrvā eka̍śapham ।
śriya̍me̱vāvā̍rundhe ।
gāmālā̍bhate ॥ 2 ॥))

**[[3-9-8-3]]**

य॒ज्ञो वै गौः।
य॒ज्ञमे॒वाल॑भते।
अथो॒ अन्नं॒ वै गौः।
अन्न॑मे॒वाव॑रुन्धे।
अ॒जावी आल॑भते भू॒म्ने।
अथो॒ पु॒ष्टिर्वै भू॒मा।
पु॒ष्टिमे॒वाव॑रुन्धे।
प॒र्य॑ग्निकृ॒तं पुरु॑षं चार॒ण्या॑श्चोत्सृ॒ज॒न्त्यहि॑ꣳसायै।
उ॒भौ वा ए॒तौ प॒शू आल॑भ्येते।
यश्चा॑व॒मो यश्च॑ प॒रमः।
तेँऽस्यो॒भये॑ य॒ज्ञे ब॒द्धाः।
अ॒भीष्टा॑ अ॒भिप्री॑ताः।
अ॒भिजि॑ता अ॒भिहु॑ता भवन्ति।
नैनं॑ दं॒क्ष्णव॑ः प॒शवो॑ य॒ज्ञे ब॒द्धाः।
अ॒भीष्टा॑ अ॒भिप्री॑ताः।
अ॒भिजि॑ता अ॒भिहु॑ता हि॑ꣳसन्ति।
योँऽश्वमे॒धेन॒ यज॑ते।
य उ॑ चैनमे॒वं वेद॑॥ ३॥
ल॒भ॒ते॒ गामाल॑भते प॒रमौँऽष्टौ च॑॥ ८॥

((ya̱jño vai gauḥ ।
yajñame̱vālā̍bhate ।
atho̱ anna̱ṃ vai gauḥ ।
anna̍me̱vāvā̍rundhe ।
a̱jā̱vī ālā̍bhate bhū̱mne ।
atho̱ pu̱ṣṭi̱rve bhū̱mā ।
pu̱ṣṭi̱me̱vāvā̍rundhe ।
parya̍gnikṛ̱ta̱ṃ puru̍ṣaṃ
cāra̱ṇyā̱ṃ̍ścotsṛ̱ja̱ntyahi̱ṃ̍sāyai ।
u̱bhau vā e̱tau pa̱śū ālā̍bhyete ।
yaśca̍va̱mo yaśca̍ para̱maḥ ।
te̍'syo̱bhaye̍ ya̱jñe ba̱ddhāḥ ।
a̱bhīṣṭā̍ a̱bhiprī̍tāḥ ।
a̱bhiji̍tā a̱bhihu̍tā bhavanti ।
naina̍ṃ da̱ṃkṣṇava̍ḥ pa̱śavo̍ ya̱jñe ba̱ddhāḥ ।
a̱bhīṣṭā̍ a̱bhiprī̍tāḥ ।
a̱bhiji̍tā a̱bhihu̍tā hi̱ṃ̍santi ।
yo̍'śvame̱dhena̱ yaja̍te ।
ya u̍ cainame̱vaṃ veda̍ ॥ 3 ॥
la̱bha̱te̱ gāmālā̍bhate para̱mo̍'ṣṭau ca̍ ॥ 8 ॥))

**[[3-9-9-1]]**

प्र॒थ॒मेन॒ वा ए॒ष स्तोमे॑न रा॒ध्वा।
च॒तु॒ष्टो॒मेन॑ कृ॒तेनाया॑ना॒मुत्त॒रेऽह॑न्।
ए॒क॒वि॒ꣳशे प्र॑ति॒ष्ठाया॒ं प्रति॑तिष्ठति।
ए॒क॒वि॒ꣳशात्प्र॑ति॒ष्ठाया॑ ऋ॒तून॒न्वारो॑हति।
ऋ॒तवो॒ वै पृ॒ष्ठानि॑।
ऋ॒तव॑ः संव॒त्स॒रः।
ऋ॒तुष्वे॒व सं॑वत्स॒रे प्र॑ति॒ष्ठाय॑।
दे॒वता॑ अ॒भ्यारो॑हति।
शक्व॑रयः पृ॒ष्ठं भ॑वन्त्य॒न्यद॑न्य॒च्छन्द॑ः।
अ॒न्येँऽन्ये॒ वा ए॒ते प॒शव॒ आल॑भ्यन्ते॥ १॥

((pra̱tha̱mena̱ vā e̱ṣa stome̍na rā̱dhvā ।
ca̱tu̱ṣṭo̱mena̍ kṛ̱tenāya̍nā̱muttare'ha̍n ।
e̱ka̱vi̱ṃ̍śe pra̍ti̱ṣṭhāyā̱ṃ prati̍tiṣṭhati ।
e̱ka̱vi̱ṃ̍śātpra̍ti̱ṣṭhāyā̍ ṛ̱tūna̱nvāro̍hati ।
ṛ̱tavo̱ vai pṛ̱ṣṭhāni̍ ।
ṛ̱tava̍ḥ sa̱ṃvatsa̱raḥ ।
ṛ̱tuṣve̱va sa̍ṃvatsa̱re pra̍ti̱ṣṭhāya̍ ।
de̱vatā̍ a̱bhyāro̍hati ।
śakva̍rayaḥ pṛ̱ṣṭha̱ṃ bha̍vantya̱nyada̍nya̱cchanda̍ḥ ।
a̱nye̍'nye̱ vā e̱te pa̱śava̱ ālā̍bhyante ॥ 1 ॥))

**[[3-9-9-2]]**

उ॒तेव॑ ग्रा॒म्याः।
उ॒तेवा॑र॒ण्याः।
अह॑रे॒व रू॒पेण॒ सम॑र्धयति।
अथो॒ अह्न॑ ए॒वैष ब॒लिर्ह्रि॑यते।
तदा॑हुः।
अप॑शवो॒ वा ए॒ते।
यद॑जा॒वय॑श्चार॒ण्याश्च॑।

ए॒ते वै सर्वे॑ प॒शव॑ः।
यद्ग॒व्या इति॑।
ग॒व्यान्प॒शूनुत्त॒मेऽह॒न्नाल॑भते॥ २॥

((u̱tevȧ grā̱myāḥ ǀ
u̱tevȧra̱ṇyāḥ ǀ
ahȧre̱va rūpe̱ṇa̱ samȧrdhayati ǀ
atho̱ ahnȧ e̱vaiṣa ba̱lirhriẏate ǀ
tadȧhuḥ ǀ
apȧśavo̱ vā e̱te ǀ
yadȧjā̱vayȧścāra̱ṇyāścȧ ǀ
e̱te vai sarvė pa̱śavȧḥ ǀ
yadga̱vyā itiė ǀ
ga̱vyānpa̱śūnȧtta̱me'ha̱nnālȧbhate ǁ 2 ǁ))

**[[3-9-9-3]]**

तेनै॒वोभया॑न्प॒शूनव॑रुन्धे।
प्रा॒जा॒प॒त्या भ॑वन्ति।
अन॑भिजितस्या॒भिजि॑त्यै।
सौ॒रीर्नव॑ श्वे॒ता व॒शा अ॑नूब॒न्ध्या॑ भवन्ति।
अ॒न्त॒त ए॒व ब्र॑ह्मवर्च॒सम॑वरुन्धे।
सोमा॑य स्व॒राज्ञे॑ऽनोवा॒हाव॑न॒ड्वाहा॒विति॑ द्व॒न्द्विन॑ः
प॒शूनाल॑भते।
अ॒हो॒रा॒त्राणा॑म॒भिजि॑त्यै।
प॒शुभि॒र्वा ए॒ष व्यृ॑ध्यते।
यो॑ऽश्वमे॒धेन॒ यज॑ते।
छ॒ग॒लं क॒ल्माषं॑ किकिदी॒विं वि॑दी॒गय॒मिति॑
त्वा॒ष्ट्रान्प॒शूनाल॑भते।
प॒शुभि॑रे॒वात्मान॒ꣳ सम॑र्धयति।
ऋ॒तुभि॒र्वा ए॒ष व्यृ॑ध्यते।
यो॑ऽश्वमे॒धेन॒ यज॑ते।
पि॒शङ्गा॒स्त्रयो॑ वास॒न्ता इत्यृ॑तुप॒शूनाल॑भते।
ऋ॒तुभि॑रे॒वात्मान॒ꣳ सम॑र्धयति।
आ वा ए॒ष प॒शुभ्यो॑ वृश्च्यते।
यो॑ऽश्वमे॒धेन॒ यज॑ते।
पर्य॑ग्निकृता॒ उत्सृ॑ज॒न्त्यना॑व्रस्काय॥ ३॥
ल॒भ्य॒न्ते॒ ल॒भ॒ते॒ त्वा॒ष्ट्रान्प॒शूनाल॑भते॒ऽष्टौ च॑॥ ९॥

((tenai̱vobhayǡnpa̱śūnavȧrundhe ǀ
prā̱jā̱pa̱tyā bhȧvanti ǀ
anȧbhijitasyā̱bhijiėtyai ǀ
sa̱urīrnavȧ śve̱tā va̱śā ȧnūba̱ndhyȧ bhavanti ǀ
a̱nta̱ta e̱va brȧhmavarca̱samavȧrundhe ǀ
somȧya sva̱rājñė'novā̱hāvȧna̱dvāhā̱viti dva̱ndvinȧḥ
pa̱śūnālȧbhate ǀ
a̱ho̱rā̱trā̱ṇȧma̱bhijiėtyai ǀ
paśubhi̱rvā e̱ṣa vyṙddhyate ǀ
yȍ'śvame̱dhena̱ yajȧte ǀ
chaga̱laṃ ka̱lmāṣaṁ kikidī̱viṃ viėdī̱gaya̱mitiė
tvā̱ṣṭrānpa̱śūnālȧbhate ǀ
pa̱śubhiėre̱vātmāna̱m̐ samȧrdhayati ǀ
ṛtubhi̱rvā e̱ṣa vyṙddhyate ǀ
yȍ'śvame̱dhena̱ yajȧte ǀ
pi̱śaṅgā̱strayȯ vāsa̱ntā ityṙtupa̱śūnālȧbhate ǀ
ṛtubhiėre̱vātmāna̱m̐ samȧrdhayati ǀ
ā vā e̱ṣa pa̱śubhyȯ vṛścyate ǀ
yȍ'śvame̱dhena̱ yajȧte ǀ
paryȧgnikṛtā̱ utsṙja̱ntyanǡvraskāya ǁ 3 ǁ
la̱bhya̱nte̱ la̱bha̱te̱ tvā̱ṣṭrānpa̱śūnālȧbhate̱'ṣṭau cȧ ǁ 9 ǁ))

**[[3-9-10-1]]**

प्र॒जाप॑तिरकामयत म॒हान॑न्ना॒दः स्या॒मिति॑।
स ए॒ताव॑श्वमे॒धे म॑हि॒माना॑वपश्यत्।
ताव॑गृह्णीत।
तत॒ो वै स म॒हान॑न्ना॒दो॑ऽभवत्।
यः का॒मये॑त म॒हान॑न्ना॒दः स्या॒मिति॑।
स ए॒तव॑श्वमे॒धे म॑हि॒मानौ॑ गृह्णीत।
म॒हाने॒वान्ना॒दो भ॑वति।
य॒ज॒मा॒न॒दे॒व॒त्या॑ वै व॒पा।
रा॒जा॑ महि॒मा।
यद्व॒पां म॑हि॒म्नोभ॒यत॑ः परि॒यज॑ति।
यज॑मानमे॒व रा॒ज्येनो॒भयत॑ः परि॑गृह्णाति।
पु॒रस्ता॑त्स्वाहाका॒रा वा अ॒न्ये दे॒वाः।
उ॒परि॑ष्टात्स्वाहाकारा अ॒न्ये।
ते वा ए॒तेऽश्वे॑ ए॒व मेध्ये॑ उ॒भये॑ऽवरुध्यन्ते।
यद्व॒पां म॑हि॒म्नोभ॒यत॑ः परि॒यज॑ति।
ता॒ने॒वोभया॑न्प्रीणाति॥ १॥
प॒रि॒यज॑ति॒ षट् च॑॥ १०॥

((pra̱jā̱pȧtirakāmayata ma̱hānȧnnā̱daḥ syā̱mitiė ǀ
sa e̱tāvȧśvame̱dhe mȧhi̱mānȧvapaśyat ǀ
tāvȧgṛhṇīta ǀ
tato̱ vai sa ma̱hānȧnnā̱dȯ'bhavat ǀ
yaḥ kā̱mayėta ma̱hānȧnnā̱daḥ syā̱mitiė ǀ
sa e̱tavȧśvame̱dhe mȧhi̱mānaȧ gṛhṇīta ǀ
ma̱hāne̱vānnā̱do bhȧvati ǀ
ya̱ja̱mā̱na̱de̱va̱tyȧ vai va̱pā ǀ
rā̱jȧ mahi̱mā ǀ
yadva̱pāṃ mȧhi̱mnobha̱yatȧḥ pari̱yajȧti ǀ

yaja̍mānam̱eva rā̱jyeno̍bha̱yata̱ḥ pari̍gṛhṇāti ।
pu̱ra̱stā̎tsvāhākā̱rā̱ vā a̱nye de̱vāḥ ।
u̱pari̍ṣṭātsvāhākārā a̱nye ।
te vā e̱te'śva̍ e̱va medhya̍ u̱bhaye'va̍rudhyante ।
yadva̱pām̱ ma̍hi̱mnobha̱yata̍ḥ pari̱yajā̍ti ।
tāne̱vobhayā̎nprīṇāti ॥ 1 ॥
pa̱ri̱yajā̍ti̱ ṣaṭca̍ ॥ 10 ॥))

**[[3-9-11-1]]**

वै॒श्व॒दे॒वो वा अश्व॑ः।
तं यत्प्रा॑जाप॒त्यं कु॒र्यात्।
या दे॒वता॑ अपि॑भागाः।
ता भा॑ग॒धेये॑न॒ व्य॑र्धयेत्।
दे॒वता॒॑भ्यः स॒मदं॑ दध्यात्।
स्ते॒गान्द॒ꣳष्ट्रा॒॑भ्यां म॒ण्डूका॒ञ्जम्भ्ये॑भि॒रिति॑।
आज्य॑मव॒दानं॑ कृ॒त्वा प्र॑तिसं॒ख्याय॒माहु॑तीर्जुहोति।
या ए॒व दे॒वता॑ अपि॑भागाः।
ता भा॑ग॒धेये॑न॒ सम॑र्धयति।
न दे॒वता॒॑भ्यः स॒मदं॑ दधाति॥ १॥

((vai̱śva̱de̱vo vā aśva̍ḥ ।
taṃ yatprā̍jāpa̱tyaṃ ku̱ryāt ।
yā de̱vatā̱ api̍bhāgāḥ ।
tā bhā̍ga̱dheye̍na̱ vya̍rdhayet ।
de̱vatā̎bhyaḥ sa̱madaṃ̍ dadhyāt ।
ste̱gānda̱ꣳṣṭrā̎bhyām ma̱ṇḍūkā̱ñjambhye̍bhi̱riti̍ ।
ājya̍mava̱dānaṃ̍ kṛ̱tvā pra̍tisaṃ̱khyāya̱māhu̍tīrjuhoti ।
yā e̱va de̱vatā̱ api̍bhāgāḥ ।
tā bhā̍ga̱dheye̍na̱ sama̍rdhayati ।
na de̱vatā̎bhyaḥ sa̱madaṃ̍ dadhāti ॥ 1 ॥))

**[[3-9-11-2]]**

च॒तु॒र्द॒शै॒ताननु॒वा॒काञ्जु॑हो॒त्यन॑न्तरित्यै।
प्र॒यासा॑य॒ स्वाहेति॑ पञ्च॒द॒शम्।
पञ्च॑दश॒ वा अ॑र्धमा॒सस्य॒ रात्र॑यः।
अ॒र्ध॒मा॒स॒शः सं॑वत्स॒र आ॒॑प्यते।
दे॒वा॒सु॒राः संय॑त्ता आसन्।
ते॑ऽब्रुवन्न॒ग्नय॑ः स्विष्ट॒कृत॑ः।
अश्व॑स्य॒ मेध्य॑स्य व॒यमु॑द्धा॒रमु॒द्धरा॑महै।
अथै॒ता॒न॒भिभ॑वा॒मेति॑।
ते लोहि॑त॒मुद॑हरन्त।
ततो॑ दे॒वा अभ॑वन्॥ २॥

((catu̍rdaśa̱itāna̍nuvā̱kāñju̍ho̱tyana̍ntarityai ।
pra̱yā̱sāya̱ svāheti̍ pañcada̱śam ।
pañca̍da̱śa vā a̍rdhamā̱sasya̱ rātra̍yaḥ ।
a̱rdha̱mā̱sa̱śaḥ sa̍ṃvatsa̱ra ā̎pyate ।
de̱vā̱su̱rāḥ saṃya̍ttā āsan ।
te̎'bruvanna̱gnaya̍ḥ sviṣṭa̱kṛta̍ḥ ।
aśva̍sya̱ medhya̍sya va̱yamu̍ddhā̱ramuddha̍rāmahai
।
atha̱itāna̱bhibha̍vā̱meti̍ ।
te lohi̍ta̱muda̍haranta ।
tato̍ de̱vā abha̍van ॥ 2 ॥))

**[[3-9-11-3]]**

परा॑ऽसु॑राः।
यत्स्वि॑ष्ट॒कृद्भ्यो॒ लोहि॑तं जु॒होति॒ भ्रातृ॑व्याभिभूत्यै।
भव॑त्या॒त्मना॒॑।
परा॒॑ऽस्य॒ भ्रातृ॑व्यो भवति।
गो॒मृ॒ग॒क॒ण्ठेन॑ प्रथ॒मामाहु॑तिं जुहोति।
प॒शवो॒ वै गो॑मृ॒गः।
रु॒द्रो॒॑ऽग्निः स्वि॑ष्ट॒कृत्।
रु॒द्राद्दे॒व प॒शून॒न्तर्द॑धाति।
अथो॒ यत्रै॒षाऽऽहु॑ति॒र्हूयते॑।
न तत्र॑ रु॒द्रः प॒शून॒भिम॑न्यते॥ ३॥

((parā'su̍rāḥ ।
yatsvi̍ṣṭa̱kṛdbhyo̱ lohi̍taṃ ju̱hoti̱
bhrātṛ̍vyābhibhūtyai ।
bhava̍tyātmanā̎ ।
parā̎'sya̱ bhrātṛ̍vyo bhavati ।
go̱mṛ̱ga̱ka̱ṇṭhena̍ pratha̱māmāhu̍tiṃ juhoti ।
pa̱śavo̱ vai go̍mṛ̱gaḥ ।
ru̱dro̎'gniḥ svi̍ṣṭa̱kṛt ।
ru̱drāde̱va pa̱śūna̱ntarda̍dhāti ।
atho̱ yatrai̱ṣā''hu̍ti̱rhūyate̍ ।
na tatra̍ ru̱draḥ pa̱śūna̱bhima̍nyate ॥ 3 ॥))

**[[3-9-11-4]]**

अ॒श्व॒श॒फेन॑ द्वि॒तीया॒माहु॑तिं जुहोति।
प॒शवो॒ वा एक॑शफम्।
रु॒द्रो॒॑ऽग्निः स्वि॑ष्ट॒कृत्।
रु॒द्राद्दे॒व प॒शून॒न्तर्द॑धाति।
अथो॒ यत्रै॒षाऽऽहु॑ति॒र्हूयते॑।
न तत्र॑ रु॒द्रः प॒शून॒भिम॑न्यते।
अ॒य॒स्मये॑न कम॒ण्डलु॑ना तृ॒तीया॒॑म्।
आहु॑तिं जुहोत्याया॒स्यो॑ वै प्र॒जाः।
रु॒द्रो॒॑ऽग्निः स्वि॑ष्ट॒कृत्।

रु॒द्रादे॒व प्र॒जा अ॒न्तर्द॑धाति।
अथो॒ यत्रै॒षाऽऽहु॑ति॒र्हू॒यते᳚।
न तत्र॑ रु॒द्रः प्र॒जा अ॒भिम॑न्यते॥ ४॥
द॒धा॒त्यभ॑वन्मन्यते प्र॒जा अ॒न्तर्द॑धाति॒ द्वे च॑॥ ११॥

((a̱śva̱śaphena̍ dvi̱tīyā̱māhu̍tiṃ juhoti ǀ
pa̱śavo̱ vā eka̍śapham ǀ
ru̱drö'gniḥ svi̍ṣṭa̱kṛt ǀ
ru̱drāde̱va pa̱śūna̱ntarda̍dhāti ǀ
atho̱ yatrai̱ṣā''hu̍ti̱rhūyatë ǀ
na tatra̍ ru̱draḥ pa̱śūna̱bhima̍nyate ǀ
a̱yasmaye̍na kama̱ṇḍalu̍nā tṛtīyä̆m ǀ
āhu̍tiṃ juhotyāyā̱syo̍ vai pra̱jāḥ ǀ
ru̱drö'gniḥ svi̍ṣṭa̱kṛt ǀ
ru̱drāde̱va pra̱jā a̱ntarda̍dhāti ǀ
atho̱ yatrai̱ṣā''hu̍ti̱rhū̱yatë ǀ
na tatra̍ ru̱draḥ pra̱jā a̱bhima̍nyate ǁ 4 ǁ
da̱dhā̱tyabha̍vanmanyate pra̱jā a̱ntarda̍dhāti̱ dve ca̍ ǁ 11 ǁ))

**[[3-9-12-1]]**

अश्व॑स्य॒ वा आल॑ब्धस्य॒ मेध॒ उद॑क्रामत्।
तद॑श्वस्तो॒मीय॑मभवत्।
यद॑श्वस्तो॒मीयं॑ जु॒होति॑।
स मेध॑मे॒वैन॒माल॑भते।
आज्ये॑न जुहोति।
मेधो॒ वा आज्य᳚म्।
मेधो᳚ऽश्वस्तो॒मीय᳚म्।
मेधे॑नै॒वास्मि॒न्मेधं॑ दधाति।
षट्त्रि॑ꣳशतं जुहोति।
षट्त्रि॑ꣳशदक्षरा बृह॒ती॥ १॥

((aśva̍sya̱ vā āla̍bdhasya̱ medha̱ uda̍krāmat ǀ
tada̍śvasto̱mīya̍mabhavat ǀ
yada̍śvasto̱mīya̍ṃ ju̱hoti̍ ǀ
sa me̍dhame̱vaina̱mālabhate ǀ
ājye̍na juhoti ǀ
medho̱ vā ājyä̆mǀ
medhö'śvasto̱mīyä̆m ǀ
medhe̍nai̱vāsmi̱nmedha̍ṃ dadhāti ǀ
ṣaṭtri̍m̐śataṃ juhoti ǀ
ṣaṭtri̍m̐śadakṣarā bṛha̱tī ǁ 1 ǁ))

**[[3-9-12-2]]**

बार्ह॑ताः प॒शव॑ः।
सा प॑शू॒नां मात्रा᳚।
प॒शू॒नेव मात्र॑या॒ सम॑र्धयति।
ता यद्भूय॑सीर्वा॒ कनी॑यसीर्वा जु॒हु॒यात्।
प॒शून्मात्र॑या॒ व्य॑र्धयेत्।
षट्त्रि॑ꣳशतं जुहोति।
षट्त्रि॑ꣳशदक्षरा बृह॒ती।
बार्ह॑ताः प॒शव॑ः।
सा प॑शू॒नां मात्रा᳚।
प॒शू॒नेव मात्र॑या॒ सम॑र्धयति॥ २॥

((bārha̍tāḥ pa̱śava̍ḥ ǀ
sā pa̍śū̱nāṃ māträ̆ ǀ
pa̱śūne̱va mātra̍yā̱ sama̍rdhayati ǀ
tā yadbhūya̍sīrvā̱ kanī̍yasīrvā juhu̱yāt ǀ
pa̱śūnmātra̍yā̱ vya̍rdhayet ǀ
ṣa̱ṭtrim̐̍śataṃ juhoti ǀ
ṣa̱ṭtrim̐̍śadakṣarā bṛha̱tī ǀ
bārha̍tāḥ pa̱śava̍ḥ ǀ
sā pa̍śū̱nāṃ māträ̆ ǀ
pa̱śūne̱va mātra̍yā̱ sama̍rdhayati ǁ 2 ǁ))

**[[3-9-12-3]]**

अ॒श्व॒स्तो॒मीय॑ꣳ हुत्वा द्वि॒पदा॑ जुहोति।
द्वि॒पाद्वै पुरु॑षो॒ द्विप्र॑तिष्ठः।
तदे॑नं प्रति॒ष्ठया॒ सम॑र्धयति।
तदा॑हुः।
अ॒श्व॒स्तो॒मीयं पूर्व॑ꣳ होत॒व्या३ꣳ द्वि॒पदा३ इति॑।
अश्वो॒ वा अ॑श्वस्तो॒मीय᳚म्।
पुरु॑षो द्वि॒पदा᳚ः।
अ॒श्व॒स्तो॒मीय॑ꣳ हुत्वा द्वि॒पदा॑ जुहोति।
तस्मा᳚द्द्वि॒पाच्चतु॑ष्पादमत्ति।
अथो᳚ द्वि॒पद्ये॒व चतु॑ष्पदः॒ प्रति॑ष्ठापयति।
द्वि॒पदा॑ हु॒त्वा।
नान्यामुत्त॑रा॒माहु॑तिं जुहुयात्।
यद॒न्यामुत्त॑रा॒माहु॑तिं जु॒हु॒यात्।
प्र प्र॑ति॒ष्ठाया᳚श्च्यवेत।
द्वि॒पदा॑ अन्ततो॒ जु॑होति॒ प्रति॑ष्ठित्यै॥ ३॥
बृ॒ह॒त्य॑र्धयति स्थापयति॒ पञ्च॑ च॥ १२॥

((a̱śva̱sto̱mīyam̐̍ hu̱tvā dvi̱padā̍ juhoti ǀ
dvi̱pādvai puru̍ṣo̱ dvipra̍tiṣṭhaḥ ǀ
tade̍naṃ prati̱ṣṭhayā̱ sama̍rdhayati ǀ
tadā̍huḥ ǀ
a̱śva̱sto̱mīya̱ṃ pūrvam̐̍ hota̱vyā3m̐̍ dvi̱padā3 iti̍ ǀ
aśvo̱ vā a̍śvasto̱mīyä̆m ǀ

puru̍ṣo dvi̱padā̎ḥ |
a̱śva̱sto̱mīya̎m hu̱tvā dvi̱padā̍ juhoti |
tasmā̎ddvi̱pāccatu̍ṣpādamatti |
atho̎ dvi̱padye̱va catu̍ṣpada̱ḥ prati̍ṣṭhāpayati |
dvi̱padā̍ hu̱tvā |
nānyāmutta̍rā̱māhu̍ti̱m juhuyāt |
yada̱nyāmutta̍rā̱māhu̍ti̱m juhu̱yāt |
pra prati̍ṣṭhāyā̎ścyaveta |
dvi̱padā̍ anta̱to ju̍hoti̱ prati̍ṣṭhityai || 3 ||
bṛ̱ha̱tyardhayati sthāpayati̱ pañca̍ ca || 12 ||))

**[[3-9-13-1]]**

प्र॒जाप॑तिरश्वमे॒धम॑सृजत।
सो॑ऽस्मात्सृ॒ष्टोऽपा॑क्रामत्।
तं य॑ज्ञक्र॒तुभि॒रन्वै॑च्छत्।
तं य॑ज्ञक्र॒तुभि॒र्नान्व॑विन्दत्।
तमिष्टि॑भि॒रन्वै॑च्छत्।
तमिष्टि॑भि॒रन्व॑विन्दत्।
तदिष्टी॑नामिष्टि॒त्वम्।
यत्सं॑वत्स॒रमिष्टि॑भि॒र्यज॑ते।
अश्व॑मे॒व तद॒न्वि॑च्छति।
सा॒वि॒त्रियो॑ भवन्ति॥ १॥

((pra̱jāpa̍tiraśvame̱dhama̍sṛjata |
so̎'smātsṛ̱ṣṭo'pā̎krāmat |
taṃ ya̍jñakra̱tubhi̱ranvai̎cchat |
taṃ ya̍jñakra̱tubhi̱rnānva̍vindat |
tamiṣṭi̍bhi̱ranvai̎cchat |
tamiṣṭi̍bhi̱ranva̍vindat |
tadiṣṭi̍nāmiṣṭi̱tvam |
yatsa̍ṃvatsa̱ramiṣṭi̍bhi̱ryaja̍te |
aśva̍me̱va tadanvi̍cchati |
sā̱vi̱triyo̍ bhavanti || 1 ||))

**[[3-9-13-2]]**

इ॒यं वै स॑वि॒ता।
यो वा अ॒स्यां न॒श्य॑ति॒ यो नि॒लय॑ते।
अ॒स्यां वाव तं वि॑न्दन्ति।
न वा इ॒मां कश्च॒नेत्या॑हुः।
ति॒र्यङ्नोर्ध्वो॑ऽत्येतुमर्ह॒तीति॑।
यत्सा॑वि॒त्रियो॒ भव॑न्ति।
स॒वि॒तृप्र॑सूत ए॒वैन॑मिच्छति।
ई॒श्व॒रो वा अश्वः॑ प्रमु॑क्तः परां॑ परा॒वतं॒ गन्तोः॑।
यत्सा॒यंधृती॑र्जु॒होति॑।
अश्व॑स्य॒ यत्यै॒ धृत्यै॑॥ २॥

((i̱yaṃ vai sa̍vi̱tā |
yo vā a̱syāṃ naśya̍ti̱ yo ni̱laya̍te |
a̱syāṃ vāva taṃ vi̍ndanti |
na vā i̱māṃ kaśca̱netyā̍huḥ |
ti̱ryaṅnordhvo'tye̍tumarha̱tīti̍ |
yatsā̍vi̱triyo̱ bhava̍nti |
sa̱vi̱tṛpra̍sūta e̱vaina̍micchati |
ī̱śva̱ro vā aśva̱ḥ pramu̍kta̱ḥ parā̎ṃ parā̱vata̱ṃ ganto̍ḥ |
yatsā̱yaṃdhṛtī̎rju̱hoti̍ |
aśva̍sya̱ yatyai̱ dhṛtyai̎ || 2 ||))

**[[3-9-13-3]]**

यत्प्रा॒तरिष्टि॑भि॒र्यज॑ते।
अश्व॑मे॒व तद॒न्वि॑च्छति।
यत्सा॒यंधृती॑र्जु॒होति॑।
अश्व॑स्यै॒व यत्यै॒ धृत्यै॑।
तस्मा॑त्सा॒यं प्र॒जाः क्षे॒म्या॑ भवन्ति।
यत्प्रा॒तरिष्टि॑भि॒र्यज॑ते।
अश्व॑मे॒व तद॒न्वि॑च्छति।
तस्मा॒द्दिवा॑ न॒ष्टैष ए॑ति।
यत्प्रा॒तरिष्टि॑भि॒र्यज॑ते सा॒यंधृती॑र्जु॒होति॑।
अ॒हो॒रा॒त्राभ्या॑मे॒वैन॒मन्वि॑च्छति।
अथो॑ अहोरा॒त्राभ्या॑मे॒वास्मै॑ योगक्षे॒मं क॑ल्पयति॥ ३॥
भ॒व॒न्ति॒ धृत्या॑ ए॒नमन्वि॑च्छ॒त्येकं॑ च॥ १३॥

((yatprā̱tariṣṭi̍bhi̱ryaja̍te |
aśva̍me̱va tadanvi̍cchati |
yatsā̱yaṃdhṛtī̎rju̱hoti̍ |
aśva̍syai̱va yatyai̱ dhṛtyai̎ |
tasmā̎tsā̱yaṃ pra̱jāḥ kṣe̱myā̍ bhavanti |
yatprā̱tariṣṭi̍bhi̱ryaja̍te |
aśva̍me̱va tadanvi̍cchati |
tasmā̱ddivā̍ na̱ṣṭaiṣa e̍ti |
yatprā̱tariṣṭi̍bhi̱ryajate̍ sā̱yaṃdhṛtī̎rju̱hoti̍ |
a̱horā̱trābhyā̍me̱vaina̱manvi̍cchati |
atho̍ ahorā̱trābhyā̍me̱vāsmai̍ yogakṣe̱maṃ ka̍lpayati || 3 ||
bha̱va̱nti̱ dhṛtyā̍ ena̱manvi̍ccha̱tyeka̍ṃ ca || 13 ||))

**[[3-9-14-1]]**

अप॒ वा ए॒तस्मा॒च्छ्री रा॒ष्ट्रं क्रा॑मति।
यो॑ऽश्वमे॒धेन॒ यज॑ते।
ब्रा॒ह्म॒णौ वी॑णागा॒थिनौ॑ गायतः।
श्रि॒या वा ए॒तद्रू॒पम्।
यद्वीणा॑।

श्रियमेवास्मिन्तद्धत्तः।
यदा खलु वै पुरुषः श्रियमश्नुते।
वीणाँऽस्मै वाद्यते।
तदाहुः।
यदुभौ ब्राँह्मणौ गायेताम्॥ १॥

((apa̱ vā e̱tasmā̱cchrī rā̱ṣṭram kra̍mati |
yŏ'śvame̱dhena̱ yaja̍te |
brā̱hma̱ṇau vi̍ṇāgā̱thinau̍ gāyataḥ |
śri̱yā vā e̱tadrū̱pam |
yadvīṇā̎ |
śriya̍me̱vāsmi̱ntaddha̍ttaḥ |
ya̱dā khalu̱ vai puru̍ṣaḥ śriya̍maśnu̱te |
vīṇā̎'smai vādyate |
tadā̍huḥ |
yadu̱bhau brā̎hma̱ṇau gāye̍tām || 1 ||))

**[[3-9-14-2]]**

प्रभ्रꣳशुकाऽस्माच्छ्रीः स्याँत्।
न वै ब्राँह्मणे श्री रमत इति।
ब्राह्मणोँऽन्यो गायेँत्।
राजन्योँऽन्यः।
ब्रह्म वै ब्राँह्मणः।
क्षत्त्रꣳ राजन्यः।
तथा हास्य ब्रह्मणा च क्षत्त्रेण चोभयतः श्रीः परिगृहीता भवति।
तदाहुः।
यदुभौ दिवा गायेताम्।
अपाँस्माद्राष्ट्रं क्रामेत्॥ २॥

((pra̱bhraṁ̐śu̍kā'smā̱cchrīḥ syā̎t |
na vai brā̎hma̱ṇe śrī ra̍mata̱ iti̍ |
brā̱hma̱ṇŏ'nyo gāyĕ̎t |
rā̱ja̱nyŏ'nyaḥ |
brahma̱ vai brā̎hma̱ṇaḥ |
kṣa̱ttraṁ̐ rā̍ja̱nya̍ḥ |
tathā̍ hāsya̱ brahma̍ṇā ca kṣa̱ttre̍ṇa cobha̱yata̱ḥ śrīḥ pari̍gṛhītā bhavati |
tadā̍huḥ |
yadu̱bhau divā̱ gāye̍tām |
apā̎smādrā̱ṣṭram krā̍met || 2 ||))

**[[3-9-14-3]]**

न वै ब्राँह्मणे राष्ट्रꣳ रमत इति।
यदा खलु वै राजा कामयते।
अथ ब्राह्मणं जिनाति।
दिवाँ ब्राह्मणो गायेत्।
नक्तꣳ राजन्यः।
ब्रह्मणो वै रूपमहः।
क्षत्त्रस्य रात्रिः।
तथा हास्य ब्रह्मणा च क्षत्त्रेण चोभयतो राष्ट्रं परिगृहीतं भवति।
इत्यददा इत्ययजथा इत्यपच इति ब्राह्मणो गायेँत्।
इष्टापूर्तं वै ब्राँह्मणस्य॥ ३॥

((na vai brā̎hma̱ṇe rā̱ṣṭraṁ̐ ra̍mata̱ iti̍ |
ya̱dā khalu̱ vai rājā̍ kā̱maya̍te |
atha̍ brāhma̱ṇam ji̍nāti |
divā̎ brāhma̱ṇo gā̍yet |
nakta̍ṁ̐ rāja̱nya̍ḥ |
brahma̍ṇo̱ vai rū̱pamaha̍ḥ |
kṣa̱ttrasya̱ rātri̍ḥ |
tathā̍ hāsya̱ brahma̍ṇā ca kṣa̱ttre̍ṇa cobha̱yato̍ rā̱ṣṭram pari̍gṛhītam bhavati |
itya̍dadā̱ itya̍yajathā̱ itya̍paca̱ iti̍ brāhma̱ṇo gāyĕ̎t |
i̱ṣṭā̱pū̱rtam vai brā̎hma̱ṇasya̍ || 3 ||))

**[[3-9-14-4]]**

इष्टापूर्तेनैवैनꣳ स समर्धयति।
इत्यजिना इत्ययुध्यथा इत्यमुꣳ संग्राममहन्निति राजन्यः।
युद्धं वै राजन्यस्य।
युद्धेनैवैनꣳ स समर्धयति।
अक्लृप्ता वा एतस्यर्तव इत्याहुः।
योँऽश्वमेधेन यजत इति।
तिस्रोँऽन्यो गायति तिस्रोँऽन्यः।
षट्त्संपद्यन्ते।
षड्वा ऋतवः।
ऋतूनेवास्मै कल्पयतः।
ताभ्याꣳ सꣳस्थायाम्।
अनोयुक्ते च शते च ददाति।
शतायुः पुरुषः शतेन्द्रियः।
आयुष्येवेन्द्रिये प्रतितिष्ठति॥ ४॥
गायेतां क्रामेद्ब्राह्मणस्य कल्पयतश्चत्वारि च॥ १४॥

((i̱ṣṭā̱pū̱rtenai̱vainaṁ̐ sa sama̍rdhayati |
itya̍jinā̱ itya̍yudhyathā̱ itya̱muṁ̐ sa̍ṁgrā̱mama̍ha̱nniti̍ rāja̱nya̍ḥ |

yu̱ddhaṃ vai rā̍ja̱nya̍sya |
yu̱ddhenai̱vaina̍m̐ sa sama̍rdhayati |
akḷ̍ptā̱ vā e̱tasya̱rtava̱ ityā̍huḥ |
yo̍'śvame̱dhena̱ yaja̍ta̱ iti̍ |
ti̱sro̍'nyo gāya̍ti ti̱sro̍'nyaḥ |
ṣa̱ṭtsam̱pa̍dyante |
ṣa̱ḍvā ṛ̱tava̍ḥ |
ṛ̱tūne̱vāsmai̍ kalpayataḥ |
tābhyā̍m̐ sa̱m̐sthāyā̍m |
a̱no̱yu̱kte ca̍ śa̱te ca̍ dadāti |
śa̱tāyu̱ḥ puru̍ṣaḥ śa̱tendri̍yaḥ |
āyu̍ṣye̱vendri̱ye prati̍tiṣṭhati || 4 ||
gāye̍tāṃ krāmedbrāhma̱ṇa̱sya̍ kalpayataśca̱tvāri̍ ca
|| 14 ||))

**[[3-9-15-1]]**

स॒र्वे॑षु॒ वा ए॒षु लो॒केषु॑ मृ॒त्यवो॒ऽन्वाय॑त्ताः।
तेभ्यो॒ यदाहु॑ती॒र्न जु॒हु॒यात्।
लो॒के लो॑क एनं मृ॒त्युर्वि॑न्देत्।
मृ॒त्यवे॒ स्वाहा॑ मृ॒त्यवे॒ स्वाहेत्य॑भिपू॒र्वमाहु॑तीर्जु॒होति।
लो॒काल्लो॑कादे॒व मृ॒त्युमव॑यजते।
नैनं॑ लो॒के लो॑के मृ॒त्युर्वि॑न्दति।
यद॒मुष्मै॒ स्वाहा॒ऽमुष्मै॒ स्वाहेति॒ जुह्व॒त्संच॒क्षी॑त।
ब॒हुं मृ॒त्युम॒मित्रं॑ कुर्वीत।
मृ॒त्यवे॒ स्वाहेत्येक॑स्मा ए॒वैकां॑ जुहु॒यात्।
एको॒ वा अ॒मुष्मि॑ँल्लो॒के मृ॒त्युः॥ १॥

((sarve̍ṣu̱ vā e̱ṣu lo̱keṣu̍ mṛ̱tyavo̱'nvāya̍ttāḥ |
tebhyo̱ yadāhu̍tī̱rna ju̍hu̱yāt |
lo̱ke lo̍ka ena̱ṃ mṛ̱tyurvi̍ndet |
mṛ̱tyave̱ svāhā̍ mṛ̱tyave̱
svāhetya̍bhipū̱rvamāhu̍tīrjuhoti |
lo̱kāllo̍kāde̱va mṛ̱tyumava̍yajate |
naina̍ṃ lo̱ke lo̍ke mṛ̱tyurvi̍ndati |
yada̱muṣmai̱ svāhā̱'muṣmai̱ svāheti̱
juhva̍tsa̱ṃcakṣi̍ta |
ba̱huṃ mṛ̱tyuma̱mitra̍ṃ kurvīta |
mṛ̱tyave̱ svāhetyeka̍smā e̱vaikā̍m̐ juhuyāt |
eko̱ vā a̱muṣmi̍m̐llo̱ke mṛ̱tyuḥ || 1 ||))

**[[3-9-15-2]]**

अ॒श॒न॒या मृ॒त्युरे॒व।
तमे॒वामुष्मि॑ँल्लो॒केऽव॑यजते।
भ्रू॒ण॒ह॒त्यायै॒ स्वाहेत्य॑वभृ॒थ आहु॑तिं जुहोति।
भ्रू॒ण॒ह॒त्यामे॒वाव॑यजते॥
तदा॑हुः।
यद्भ्रू॒णह॒त्याऽपा॒त्र्याऽथ॑।
कस्मा॑द्य॒ज्ञेऽपि॑ क्रियत॒ इति॑।
अमृ॑त्यु॒र्वा॑ अ॒न्यो भ्रू॒णह॒त्याया॒ इत्या॑हुः।
भ्रू॒ण॒ह॒त्या वाव मृ॒त्युरिति॑।
यद्भ्रू॒णह॒त्यायै॒ स्वाहेत्य॑वभृ॒थ आहु॑तिं जु॒होति॑॥ २॥

((a̱śa̱na̱yā̱ mṛ̱tyure̱va |
tame̱vāmuṣmi̍m̐llo̱ke'va̍yajate |
bhrū̱ṇa̱ha̱tyāyai̱ svāhetya̍vabhṛ̱tha āhu̍tiṃ juhoti |
bhrū̱ṇa̱ha̱tyāme̱vāva̍yajate ||
tadā̍huḥ |
yadbhrū̍ṇaha̱tyā'pā̱tryā'tha̍ |
kasmā̍dya̱jñe'pi̍ kriyata̱ iti̍ |
ami̍tyu̱rvā a̱nyo bhrū̍ṇaha̱tyāyā̱ ityā̍huḥ |
bhrū̱ṇa̱ha̱tyā vāva mṛ̱tyuriti̍ |
yadbhrū̍ṇaha̱tyāyai̱ svāhetya̍vabhṛ̱tha āhu̍tiṃ ju̱hoti̍
|| 2 ||))

**[[3-9-15-3]]**

मृ॒त्युमे॒वाहु॑त्या तर्प॑यि॒त्वा प॑रि॒पाणं॑ कृ॒त्वा।
भ्रू॒ण॒घ्ने भे॑ष॒जं क॑रोति।
ए॒ताꣳ ह॒ वै मुं॑ण्डिभ औं॑दन्य॒वः।
भ्रू॒ण॒ह॒त्यायै॒ प्राय॑श्चित्तिं वि॒दाञ्च॑कार।
यो हा॒स्यापि॑ प्र॒जायां॑ ब्राह्म॒णꣳ हन्ति॑।
सर्व॑स्मै॒ तस्मै॑ भेष॒जं क॑रोति।
जु॒म्ब॒काय॒ स्वाहेत्य॑वभृ॒थ उ॑त्त॒मामाहु॑तिं जुहोति।
वरु॑णो॒ वै जु॑म्ब॒कः।
अ॒न्त॒त ए॒व वरु॑ण॒मव॑यजते।
ख॒ल॒तेर्वि॑क्लि॒धस्य॑ शु॒क्लस्य॑ पिङ्गा॒क्षस्य॑ मू॒र्धञ्जु॑होति।
ए॒तद्वै वरु॑णस्य रू॒पं।
रू॒पेणै॒व वरु॑णमव॑यजते॥ ३॥
लो॒के मृ॒त्युर्जु॒होति॑ मू॒र्धञ्जु॑होति॒ द्वे च॑॥ १५॥

((mṛ̱tyume̱vāhu̍tyā tarpayi̱tvā pa̍ri̱pāṇa̍ṃ kṛ̱tvā |
bhrū̱ṇa̱ghne bhe̍ṣa̱jaṃ ka̍roti |
e̱tām̐ ha̱ vai mu̍ṇḍi̱bha au̍danya̱vaḥ |
bhrū̱ṇa̱ha̱tyāyai̱ prāya̍ścittiṃ vi̱dāñcakāra |
yo hā̱syāpi̍ pra̱jāyā̍m̐ brāhma̱ṇam̐ hanti̍ |
sarva̍smai̱ tasmai̍ bheṣa̱jaṃ ka̍roti |
ju̱mba̱kāya̱ svāhetya̍vabhṛ̱tha u̍tta̱māmāhu̍tiṃ
juhoti |
varu̍ṇo̱ vai ju̍mba̱kaḥ |
a̱nta̱ta e̱va varu̍ṇa̱mava̍yajate |
kha̱la̱tervi̍kli̱dhasya̍ śu̱klasya̍ piṅgā̱kṣasya̍
mū̱rdhañju̍hoti |
e̱tadvai varu̍ṇasya rū̱paṃ |
rū̱peṇai̱va varu̍ṇa̱mava̍yajate || 3 ||
lo̱ke mṛ̱tyurju̱hoti̍ mū̱rdhañju̍hoti̱ dve ca̍ || 15 ||))

**[[3-9-16-1]]**

वा॒रु॒णो वा अश्व॑ः।
तं दे॒वत॑या॒ व्यर्ध॑यति।
यत्प्रा॑जाप॒त्यं क॒रोति॑।
नमो॒ राज्ञे॒ नमो॒ वरु॑णा॒येत्या॑ह।
वा॒रु॒णो वा अश्व॑ः।
स्वयै॒वैनं॑ दे॒वत॑या॒ सम॑र्धयति।
नमोऽश्वा॑य॒ नम॑ः प्र॒जाप॑तय॒ इत्या॑ह।
प्रा॒जा॒प॒त्यो वा अश्व॑ः।
स्वयै॒वैनं॑ दे॒वत॑या॒ सम॑र्धयति।
नमोऽधि॑पतय॒ इत्या॑ह॥ १॥

((vā̱ru̱ṇo vā aśva̍ḥ |
taṃ de̱vata̍yā̱ vya̍rdhayati |
yatprā̍jāpa̱tyaṃ ka̱roti̍ |
namo̱ rājñe̱ namo̱ varu̍ṇā̱yetyā̍ha |
vā̱ru̱ṇo vā aśva̍ḥ |
svaya̱ivainaṃ̍ de̱vata̍yā̱ sama̍rdhayati |
namo'śvā̍ya̱ nama̍ḥ pra̱jāpa̍taya̱ ityā̍ha |
prā̱jā̱pa̱tyo vā aśva̍ḥ |
svaya̱ivainaṃ̍ de̱vata̍yā̱ sama̍rdhayati |
namo'dhi̍pataya̱ ityā̍ha || 1 ||))

**[[3-9-16-2]]**

धर्मो॒ वा अधि॑पतिः।
धर्म᳚मे॒वाव॑रुन्धे।
अधि॑पतिर॒स्यधि॑पतिं मा कु॒र्वधि॑पतिर॒हं प्र॒जाना᳚ं
भूया॒समित्या॑ह।
अधि॑पतिमे॒वैनꣳ॑ समा॒नानां᳚ करोति॥
मां धे॑हि॒ मयि॑ धे॒हीत्या॑ह।
आ॒शिष॑मे॒वैतामाशा᳚स्ते।
उ॒पाकृ॑ताय॒ स्वाहेत्यु॒पाकृ॑ते जुहोति।
आल॑ब्धाय॒ स्वाहेति॒ नियु॑क्ते जुहोति।
हु॒ताय॒ स्वाहेति॑ हु॒ते जु॑होति।
ए॒षां लो॒काना॑म॒भिजि॑त्यै॥ २॥

((dharmo̱ vā adhi̍patiḥ |
dharma̍me̱vāva̍rundhe |
adhi̍patira̱syadhi̍patiṃ mā ku̱rvadhi̍patira̱haṃ
pra̱jānā᳚ṃ bhūyā̱samityā̍ha |
adhi̍patime̱vainaꣳ̍ samā̱nānā᳚ṃ karoti ||
māṃ dhe̍hi̱ mayi̍ dhe̱hītyā̍ha |
ā̱śiṣa̍me̱vaitāmāśā᳚ste |
u̱pākṛ̍tāya̱ svāhetyu̱pākṛ̍te juhoti |
āla̍bdhāya̱ svāheti̱ niyu̍kte juhoti |
hu̱tāya̱ svāheti̍ hu̱te ju̍hoti |
e̱ṣāṃ lo̱kānā̍ma̱bhiji̍tyai || 2 ||))

**[[3-9-16-3]]**

प्र वा ए॒ष ए॒भ्यो लो॒केभ्य॑श्च्यवते।
यो᳚ऽश्वमे॒धेन॒ यज॑ते।
आ॒ग्ने॒यमै᳚न्द्रा॒ग्नमा᳚श्विनम्।
तान्प॒शूनाल॑भते॒ प्रति॑ष्ठित्यै।
यदा᳚ग्ने॒यो भव॑ति।
अ॒ग्निः सर्वा॑ दे॒वता᳚ः।
दे॒वता॑ ए॒वाव॑रुन्धे॥
ब्रह्म॒ वा अ॒ग्निः।
क्ष॒त्त्रमिन्द्र॑ः।
यदै᳚न्द्रा॒ग्नो भव॑ति॥ ३॥

((pra vā e̱ṣa e̱bhyo lo̱kebhya̍ścyavate |
yo᳚'śvame̱dhena̱ yaja̍te |
ā̱gne̱yamai᳚ndrā̱gnamā᳚śvinam |
tānpa̱śūnāla̍bhate̱ prati̍ṣṭhityai |
yadā᳚gne̱yo bhava̍ti |
a̱gniḥ sarvā̍ de̱vatā᳚ḥ |
de̱vatā̍ e̱vāva̍rundhe ||
brahma̱ vā a̱gniḥ |
kṣa̱ttramindra̍ḥ |
yadai᳚ndrā̱gno bhava̍ti || 3 ||))

**[[3-9-16-4]]**

ब्र॒ह्म॒क्ष॒त्त्रे ए॒वाव॑रुन्धे।
यदा᳚श्विनो भव॑ति।
आ॒शिषा॒मव॑रुद्ध्यै।
त्रयो॑ भवन्ति।
त्रय॑ इ॒मे लो॒काः।
ए॒ष्वेव लो॒केषु॒ प्रति॑तिष्ठति।
अ॒ग्नयेऽꣳ॑हो॒मुचे॒ऽष्टाक॑पाल॒ इति॒ दश॑हविष॒मिष्टिं॒ निर्व॑पति।
दशा᳚क्षरा वि॒राट्।
अन्नं॑ वि॒राट्।
वि॒रा॒जैवान्नाद्य॒मव॑रुन्धे।
अ॒ग्नेर्म॑न्वे प्रथ॒मस्य॒ प्रचे॑तस॒ इति॑ याज्यानुवा॒क्या॑ भवन्ति
सर्व॑त्वाय॥ ४॥
अधि॑पतय॒ इत्या॑हा॒भिजि॑त्या ऐन्द्रा॒ग्नो भवति रुन्ध॒ एकं॑
च॥ १६॥

((bra̱hma̱kṣa̱ttre e̱vāva̍rundhe |

yadā̎śvino bhavati ।
āśiṣāmavaruddhyai ।
trayo bhavanti ।
traya ime lokāḥ ।
eṣveva lokeṣu pratitiṣṭhati ।
agnaye'm̐homuce'ṣṭākapāla iti daśahaviṣamiṣṭim nirvapati ।
daśā̎kṣarā virāṭ ।
annaṃ virāṭ ।
virājaivānnādyamavarundhe ।
agnermanve prathamasya pracetasa iti
yājyānuvākyā bhavanti sarvatvāya ॥ 4 ॥
adhipataya ityāhābhijityā aindrāgno bhavati rundha ekaṃ ca ॥ 16 ॥))

**[[3-9-17-1]]**

यद्यश्वमुपतपद्विन्देत्।
आग्नेयमष्टाकपालं निर्वपेत्।
सौम्यं चरुम्।
सावित्रमष्टाकपालम्।
यदाग्नेयो भवति।
अग्निः सर्वा देवताः।
देवताभिरेवैनं भिषज्यति।
यत्सौम्यो भवति।
सोमो वा ओषधीनाꣳ राजा।
याभ्य एवैनं विन्दति॥ १॥

((yadyaśvamupatapadvindet ।
āgneyamaṣṭākapālam nirvapet ।
saumyam carum ।
sāvitramaṣṭākapālam ।
yadā̎gneyo bhavati ।
agniḥ sarva devatā̎ḥ ।
devatābhirevainaṃ bhiṣajyati ।
yatsaumyo bhavati ।
somo vā oṣadhīnā̎m̐ rājā̎ ।
yābhya evainaṃ vindati ॥ 1 ॥))

**[[3-9-17-2]]**

ताभिरेवैनं भिषज्यति।
यत्सावित्रो भवति।
सवितृप्रसूत एवैनं भिषज्यति।
एताभिरेवैनं देवताभिर्भिषज्यति।
अगदो हैव भवति।
पौष्णं चरुं निर्वपेत्।
यदि श्लोणः स्यात्।
पूषा वै श्लौण्यस्य भिषक्।
स एवैनं भिषज्यति।
अश्लोणो हैव भवति॥ २॥

((tābhirevainaṃ bhiṣajyati ।
yatsāvitro bhavati ।
savitṛprasūta evainaṃ bhiṣajyati ।
etābhirevainaṃ devatābhirbhiṣajyati ।
agado haiva bhavati ।
pauṣṇam carum nirvapet।
yadi ślonaḥ syāt ।
pūṣā vai ślauṇyasya bhiṣak ।
sa evainaṃ bhiṣajyati ।
aślono haiva bhavati ॥ 2 ॥))

**[[3-9-17-3]]**

रौद्रं चरुं निर्वपेत्।
यदि महती देवताऽभिमन्येत।
एतद्देवत्यो वा अश्वः।
स्वयैवैनं देवतया भिषज्यति।
अगदो हैव भवति।
वैश्वानरं द्वादशकपालं निर्वपेन्मृगाखरे यदि नागच्छेत्।
इयं वा अग्निर्वैश्वानरः।
इयमेवैनमर्चिभ्यां परिरोधमानयति।
आ हैव सुत्यमहर्गच्छति।
यद्यधीयात्॥ ३॥

((raudram carum nirvapet ।
yadi mahatī devatā'bhimanyeta ।
etaddevatyo vā aśvaḥ ।
svayaivainaṃ devatayā bhiṣajyati ।
agado haiva bhavati ।
vaiśvānaram dvādaśakapālam nirvapenmṛgākhare yadi nāgacchet ।
iyam vā agnirvaiśvānaraḥ ।
iyamevainamarcibhyām̐ parirodhamānayati ।
ā haiva sutyamahargacchati ।
yadyadhīyāt ॥ 3 ॥))

**[[3-9-17-4]]**

अग्नयेऽꣳहोमुचेऽष्टाकपालः।
सौर्यं पयः।
वायव्य आज्यभागः।
यजमानो वा अश्वः।
अꣳहसा वा एष गृहीतः।
यस्याश्वो मेधाय प्रोक्षितोऽध्येति।
यदꣳहोमुचे निर्वपति।

अꣳह॑स ए॒व तेन॑ मुच्यते।
यज॑मानो॒ वा अश्व॑ः।
रेत॑सा॒ वा ए॒ष व्यृ॑ध्यते॥ ४॥

((a̱gnaye'm̐ho̱muce̱'ṣṭākapā̍laḥ ।
sa̱uryaṃ̱ payā̍ḥ ।
vā̱ya̱vya̍ ājyā̍bhāgaḥ ।
yajā̍māno̱ vā aśvā̍ḥ ।
am̐hā̍sā̱ vā e̱ṣa gṛ̍hī̱taḥ ।
yasyāśvo̱ medhā̍ya̱ prokṣi̍to̱'dhyeti̍ ।
yadam̐ho̱muce̍ ni̱rvapā̍ti ।
am̐hā̍sa e̱va tenā̍ mucyate ।
yajā̍māno̱ vā aśvā̍ḥ ।
retā̍sā̱ vā e̱ṣa vyṛ̍dhyate ॥ 4 ॥))

**[[3-9-17-5]]**

यस्याश्वो॒ मेधा॑य॒ प्रोक्षि॑तो॒ऽध्येति॑।
सौ॒र्यꣳ रेत॑ः।
यत्सौ॒र्यं पयो॒ भव॑ति।
रेत॑सै॒वैन॒ꣳ स सम॑र्धयति।
यज॑मानो॒ वा अश्व॑ः।
गर्भै॒र्वा ए॒ष व्यृ॑ध्यते।
यस्याश्वो॒ मेधा॑य॒ प्रोक्षि॑तो॒ऽध्येति॑।
वा॒य॒व्या॑ गर्भा॑ः।
यद्वा॑य॒व्य॑ आज्य॑भागो॒ भव॑ति।
गर्भै॑रे॒वैन॒ꣳ स सम॑र्धयति।
अथो॒ यस्यै॒षाऽश्व॑मे॒धे प्राय॑श्चित्तिः क्रि॒यते॑।
इ॒ष्ट्वा वसी॑यान्भवति॥ ५॥
वि॒न्दत्यश्लो॑णो है॒व भ॑वत्यधी॒यादृ॑द्धयते॒ गर्भै॑रे॒वन॒ꣳ सम॑र्धयति॒ द्वे च॑॥ १७॥

((yasyāśvo̱ medhā̍ya̱ prokṣi̍to̱'dhyeti̍ ।
sa̱uryam̐ retā̍ḥ ।
yatsa̱uryaṃ̱ payo̱ bhavā̍ti ।
retā̍sa̱ivainam̐ sa samā̍rdhayati ।
yajā̍māno̱ vā aśvā̍ḥ ।
garbha̱irvā e̱ṣa vyṛ̍dhyate ।
yasyāśvo̱ medhā̍ya̱ prokṣi̍to̱'dhyeti̍ ।
vā̱ya̱vya̍ garbhā̍ḥ ।
yadvā̍ya̱vya̍ ājyā̍bhāgo̱ bhavā̍ti ।
garbhai̍re̱vainam̐ sa samā̍rdhayati ।
atho̱ yasyai̱ṣā'śvā̍me̱dhe prāyā̍ścitiḥ kri̱yate̍ ।
i̱ṣṭvā vasī̍yānbhavati ॥ 5 ॥
vi̱ndatyaślo̍ṇo ha̱iva bhā̍vatyadhī̱yādṛ̍ddhayate̱ garbhai̍re̱vanam̐ samā̍rdhayati̱ dve ca̍ ॥ 17 ॥))

**[[3-9-18-1]]**

तदा॑हुः।
द्वाद॑श ब्रह्मौ॒द॒नान्त्सꣳस्थि॑ते॒ निर्व॑पेत्।
द्वा॒द॒शभि॒र्वेष्टि॑भि॒र्यज॒तेति॑।
यदि॒ष्टिभि॒र्यजे॑त।
उ॒प॒नामु॑क एनं॒ य॒ज्ञः स्या॑त्।
पापी॑या॒ꣳस्तु स्या॑त्।
आ॒प्तानि॒ वा ए॒तस्य॒ छन्दा॒ꣳसि।
य ई॑जा॒नः।
तानि॒ क ए॒ताव॑दाशु॒ पुन॒ः प्रयु॑ञ्जी॒तेति॑।
सर्वा॒ वै सꣳस्थि॑ते य॒ज्ञे वागा॑प्यते॥ १॥

((tadā̍huḥ ।
dvādā̍śa brahmauda̱nāntsam̐sthi̍te̱ nirvā̍pet ।
dvā̱da̱śabhi̱rveṣṭi̍bhiryaje̱teti̍ ।
yadi̍ṣṭibhi̱ryaje̍ta ।
u̱pa̱nāmu̍ka enaṃ̱ ya̱jñaḥ syā̍t ।
pāpī̍yā̱m̐stu syā̍t ।
ā̱ptāni̱ vā e̱tasya̱ chandā̍m̐si ।
ya ī̍jā̱naḥ ।
tāni̱ ka e̱tāvā̍dāśu̱ puna̱ḥ prayu̍ñjī̱teti̍ ।
sarvā̱ vai sam̐sthi̍te ya̱jñe vāgā̍pyate ॥ 1 ॥))

**[[3-9-18-2]]**

साऽऽप्ता भ॑वति या॒तया॑म्नी।
क्रू॒रीकृ॑तेव॒ हि भ॑वत्यरु॒ष्कृता।
सा न पुन॑ः प्र॒युज्येत्या॑हुः।
द्वाद॑शैव ब्र॑ह्मौ॒द॒नान्त्सꣳस्थि॑ते॒ निर्व॑पेत्।
प्र॒जाप॑ति॒र्वा ओ॑द॒नः।
य॒ज्ञः प्र॒जाप॑तिः।
उ॒प॒नामु॑क एनं॒ य॒ज्ञो भ॑वति।
न पापी॑यान्भवति।
द्वाद॑श भवन्ति।
द्वाद॑श॒ मासा॑ः संवत्स॒रः।
संवत्स॒र ए॒व प्रति॑तिष्ठति॥ २॥
आ॒प्य॒ते सं॒वत्स॒र एकं॑ च॥ १८॥

((sā''ptā bhā̍vati yā̱tayā̍mnī ।
krū̱rīkṛ̍teva̱ hi bhava̱tyaru̍ṣkṛ̱tā ।
sā na puna̍ḥ pra̱yujyetyā̍huḥ ।
dvādā̍śa̱iva brā̍hmauda̱nāntsam̐sthi̍te̱ nirvā̍pet ।
pra̱jāpā̍ti̱rvā o̍da̱naḥ ।
ya̱jñaḥ pra̱jāpā̍tiḥ ।
u̱pa̱nāmu̍ka enaṃ̱ ya̱jño bhā̍vati ।
na pāpī̍yānbhavati ।

dvādáśa bhavanti |
dvādáśa̱ māsā̎ḥ saṃvatsa̱raḥ |
saṃvatsa̱ra e̱va prati̍tiṣṭhati || 2 ||
ā̱pya̱te̱ saṃva̱tsa̱ra ekaṃ ca || 18 ||))

**[[3-9-19-1]]**

ए॒ष वै वि॒भूर्नाम॑ य॒ज्ञः।
सर्वꣳ॑ ह॒ वै तत्र॑ वि॒भु भ॑वति।
यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते।
ए॒ष वै प्र॒भूर्नाम॑ य॒ज्ञः।
सर्वꣳ॑ ह॒ वै तत्र॑ प्र॒भु भ॑वति।
यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते।
ए॒ष वा ऊर्ज॑स्वा॒न्नाम॑ य॒ज्ञः।
सर्वꣳ॑ ह॒ वै तत्रोर्ज॑स्वद्भवति।
यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते।
ए॒ष वै पय॑स्वा॒न्नाम॑ य॒ज्ञः॥ १॥

((e̱ṣa vai vi̱bhūrnāmá ya̱jñaḥ |
sarvam̐ ha̱ vai tatrá vi̱bhu bhávati |
yatra̱itená ya̱jñena̱ yajánte |
e̱ṣa vai pra̱bhūrnāmá ya̱jñaḥ |
sarvam̐ ha̱ vai tatrá pra̱bhu bhávati |
yatra̱itená ya̱jñena̱ yajánte |
e̱ṣa vā ūrjásvā̱nnāmá ya̱jñaḥ |
sarvam̐ ha̱ vai tatrorjásvadbhavati |
yatra̱itená ya̱jñena̱ yajánte |
e̱ṣa vai payásvā̱nnāmá ya̱jñaḥ || 1 ||))

**[[3-9-19-2]]**

सर्वꣳ॑ ह॒ वै तत्र॒ पय॑स्वद्भवति।
यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते।
ए॒ष वै विधृ॑तो॒ नाम॑ य॒ज्ञः।
सर्वꣳ॑ ह॒ वै तत्र॒ विधृ॑तं भवति।
यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते।
ए॒ष वै व्यावृ॑त्तो॒ नाम॑ य॒ज्ञः।
सर्वꣳ॑ ह॒ वै तत्र॒ व्यावृ॑त्तं भवति।
यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते।
ए॒ष वै प्रति॑ष्ठितो॒ नाम॑ य॒ज्ञः।
सर्वꣳ॑ ह॒ वै तत्र॒ प्रति॑ष्ठितं भवति॥ २॥

((sarvam̐ ha̱ vai tatra̱ payásvadbhavati |
yatra̱itená ya̱jñena̱ yajánte |
e̱ṣa vai vidhṛ́to̱ nāmá ya̱jñaḥ |
sarvam̐ ha̱ vai tatra̱ vidhṛ́taṃ bhavati |
yatra̱itená ya̱jñena̱ yajánte |
e̱ṣa vai vyāvṛ́tto̱ nāmá ya̱jñaḥ |
sarvam̐ ha̱ vai tatra̱ vyāvṛ́ttaṃ bhavati |
yatra̱itená ya̱jñena̱ yajánte |
e̱ṣa vai pratíṣṭhito̱ nāmá ya̱jñaḥ |
sarvam̐ ha̱ vai tatra̱ pratíṣṭhitaṃ bhavati || 2 ||))

**[[3-9-19-5]]**

यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते।
ए॒ष वै ते॑ज॒स्वी नाम॑ य॒ज्ञः।
सर्वꣳ॑ ह॒ वै तत्र॑ तेज॒स्वि भ॑वति।
यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते।
ए॒ष वै ब्र॑ह्मवर्च॒सी नाम॑ य॒ज्ञः।
आ ह॒ वै तत्र॑ ब्राह्म॒णो ब्र॑ह्मवर्च॒सी जा॑यते।
यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते।
ए॒ष वा अ॑तिव्या॒धी नाम॑ य॒ज्ञः।
आ ह॒ वै तत्र॑ राज॒न्यो॑ऽतिव्या॒धी जा॑यते।
यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते।
ए॒ष वै दी॒र्घो नाम॑ य॒ज्ञः।
दी॒र्घायु॑षो ह॒ वै तत्र॑ मनु॒ष्या॑ भवन्ति।
यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते।
ए॒ष वै क्लृ॒प्तो नाम॑ य॒ज्ञः।
कल्प॑ते ह॒ वै तत्र॑ प्र॒जाभ्यो॑ योगक्षे॒मः।
यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते॥ ३॥
पय॑स्वा॒न्नाम॑ य॒ज्ञः प्रति॑ष्ठितं भवति॒ यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते॒ षड्॥ १९॥
ए॒ष वै वि॒भूः प्र॒भूरूर्ज॑स्वा॒न्पय॑स्वा॒न्विधृ॑तो॒ व्यावृ॑त्तः प्रति॑ष्ठितस्तेज॒स्वी ब्र॑ह्मवर्च॒स्य॑तिव्या॒धी दी॒र्घः क्लृ॒प्तो द्वाद॑श॥

((yatra̱itená ya̱jñena̱ yajánte |
e̱ṣa vai téja̱svī nāmá ya̱jñaḥ |
sarvam̐ ha̱ vai tatrá teja̱svi bhávati |
yatra̱itená ya̱jñena̱ yajánte |
e̱ṣa vai bráhmavarca̱sī nāmá ya̱jñaḥ |
ā ha̱ vai tatrá brāhma̱ṇo bráhmavarca̱sī jā́yate |
yatra̱itená ya̱jñena̱ yajánte |
e̱ṣa vā átivyā̱dhī nāmá ya̱jñaḥ |
ā ha̱ vai tatrá rāja̱nyó'tivyā̱dhī jā́yate |
yatra̱itená ya̱jñena̱ yajánte |
e̱ṣa vai dī̱rgho nāmá ya̱jñaḥ |
dī̱rghāyúṣo ha̱ vai tatrá manu̱ṣyā́ bhavanti |
yatra̱itená ya̱jñena̱ yajánte |
e̱ṣa vai kḷ̱pto nāmá ya̱jñaḥ |
kalpáte ha̱ vai tatrá pra̱jābhyó yogakṣe̱maḥ |
yatra̱itená ya̱jñena̱ yajánte || 3 ||

payásvānnāmá yajñaḥ pratiṣṭhitam bhavati
yatraitena yajñena yajánte ṣaṭcá || 19 ||
eṣa vai vibhūḥ prabhūrūrjásvānpayásvānvidhṛto
vyāvṛttaḥ pratiṣṭhitastejasvī
bráhmavarcasyátivyādhī dīrghaḥ klpto dvādáśa ||))

**[[3-9-20-1]]**

ताप्र्येणाश्वꣳ संज्ञपयन्ति।
यज्ञो वै ताप्र्यम्।
यज्ञेनैवैनꣳ समर्धयन्ति।
यामेन साम्ना प्रस्तोताऽनूपतिष्ठते।
यमलोकमेवैनं गमयति॥
ताप्र्ये च कृत्त्यधीवासे चाश्वꣳ संज्ञपयन्ति।
एतद्वै पशूनाꣳ रूपम्।
रूपेणैव पशूनवरुन्धे।
हिरण्यकशिपु भवति।
तेजसोऽवरुद्ध्यै॥ १॥

((tārpyeṇāśvam̐ saṃjñápayanti |
yajño vai tārpyam |
yajñenaivainam̐ samárdhayanti |
yāmena sāmnā prastotā'nūpátiṣṭhate |
yamalokamevainaṃ gamayati ||
tārpye cá kṛttyadhīvāse cāśvam̐ saṃjñápayanti |
etadvai páśūnām̐ rūpam |
rūpeṇaiva paśūnavárundhe |
hiraṇyakaśipu bhávati |
tejaso'váruddhyai || 1 ||))

**[[3-9-20-2]]**

रुक्मो भवति।
सुवर्गस्य लोकस्यानुख्यात्यै।
अश्वो भवति।
प्रजापतेराप्त्यै।
अस्य वै लोकस्य रूपं ताप्र्यम्।
अन्तरिक्षस्य कृत्त्यधीवासः।
दिवो हिरण्यकशिपु।
आदित्यस्य रुक्मः।
प्रजापतेरश्वः।
इममेव लोकं ताप्र्येणाप्नोति।

((rukmo bhávati |
suvargasyá lokasyānúkhyātyai |
aśvó bhavati |
prajāpáterāptyai |
asya vai lokasyá rūpaṃ tārpyam |
antarikṣasya kṛttyadhīvāsaḥ |
divo hiraṇyakaśipu |
ādityasyá rukmaḥ |
prajāpáteraśváḥ |
imameva lokaṃ tārpyeṇāpnoti |))

**[[3-9-20-3]]**

अन्तरिक्षं कृत्यधीवासेन।
दिवꣳ हिरण्यकशिपुना।
आदित्यꣳ रुक्मेण।
अश्वेनैव मेध्येन प्रजापतेः सायुज्यꣳ सलोकतामाप्नोति।
एतासामेव देवतानाꣳ सायुज्यम्।
सार्ष्टिताꣳ समानलोकतामाप्नोति।
योऽश्वमेधेन यजते।
य उ चैनमेवं वेद॥ ३॥
अवरुद्ध्या आप्नोत्यष्टौ च॥ २०॥

((antarikṣam kṛtyadhīvāsená |
divam̐ hiraṇyakaśipunā |
ādityam̐ rukmeṇá |
aśvénaiva medhyéna prajāpáteḥ sāyújyam̐
salokatámāpnoti |
etāsámeva devatánām̐ sāyújyam |
sārṣṭitām̐ samānalokatámāpnoti |
yo'śvamedhena yajáte |
ya ú cainamevaṃ vedá || 3 ||
avároddhyā āpnotyaṣṭau cá || 20 ||))

**[[3-9-21-1]]**

आदित्याश्चाङ्गिरसश्च सुवर्गे लोकेऽस्पर्धन्त।
तेऽङ्गिरस आदित्येभ्यः।
अमुमादित्यमश्वꣳ श्वेतं भूतं दक्षिणामनयन्।
तेऽब्रुवन्।
यं नोऽनैष्ट।
स वर्योऽभूदिति।
तस्मादश्वꣳ सवर्येत्याह्वयन्ति।
तस्माद्यज्ञे वरो दीयते।
यत्प्रजापतिरालब्धोऽश्वोऽभवत्।
तस्मादश्वो नाम॥ १॥

((ādityāścāṅgirasaśca suvarge lokë'spardhanta |
te'ṅgirasa ādityebhyáḥ |
amumádityamaśvam̐ śvetaṃ bhūtaṃ
dakṣiṇāmanayan |
të'bruvan |

yaṃ no'nē̎ṣṭa |
sa varyo̍'bhū̠diti̍ |
tasmā̠daśva̠m̎ sava̠ryetyāhva̍yanti |
tasmā̎dya̠jñe varo̍ dīyate |
yatpra̠jāpa̍ti̠rāla̠bdho'śvo'bhava̍t |
tasmā̠daśvo̠ nāma̍ || 1 ||))

**[[3-9-21-2]]**

यच्छ्वय॒दरु॒रासी᳚त्।
तस्मा॒दर्वा॒ नाम॑।
यत्स॒द्यो वाजा᳚न्त्स॒मज॑यत्।
तस्मा᳚द्वा॒जी नाम॑।
यदसु॑राणां लो॒कानाद॑त्त।
तस्मा॑दादि॒त्यो नाम॑।
अ॒ग्निर्वा अ॑श्वमे॒धस्य॒ योनि॑रा॒यत॑नम्।
सूर्यो॒ऽग्नेर्योनि॑रा॒यत॑नम्।
यद॑श्वमे॒धे᳚ऽग्नौ चित्य॑ उत्तरवे॒दिमु॑प॒वप॑ति।
योनि॑मन्तमे॒वैन॑मा॒यत॑नवन्तं करोति॥ २॥

((yacchvaya̠daru̠rāsī̎t |
tasmā̠darvā̠ nāma̍ |
yatsa̠dyo vājā̎ntsa̠maja̍yat |
tasmā̎dvā̠jī nāma̍ |
yadasu̍rāṇāṃ lo̠kānāda̍tta |
tasmā̍dādi̠tyo nāma̍ |
a̠gnirvā a̍śvame̠dhasya̠ yoni̍rā̠yata̍nam |
sūryo̠'gneryoni̍rā̠yata̍na̍m |
yada̍śvame̠dhē̎'gnau citya̍ uttarave̠dimu̍pa̠vapa̍ti |
yoni̍mantame̠vaina̍mā̠yata̍navantaṃ karoti || 2 ||))

**[[3-9-21-3]]**

योनि॑माना॒यत॑नवान्भवति।
स ए॒वं वेद॑।
प्रा॒णा॒पा॒नौ वा ए॒तौ दे॒वाना᳚म्।
यद॑र्काश्वमे॒धौ।
प्रा॒णा॒पा॒नावे॒वाव॑रुन्धे।
ओजो॒ बलं॒ वा ए॒तौ दे॒वाना᳚म्।
यद॑र्काश्वमे॒धौ।
ओजो॒ बल॑मे॒वाव॑रुन्धे।
अ॒ग्निर्वा अ॑श्वमे॒धस्य॒ योनि॑रा॒यत॑नम्।
सूर्यो॒ऽग्नेर्योनि॑रा॒यत॑नम्।
यद॑श्वमे॒धे᳚ऽग्नौ चित्य॑ उत्तरवे॒दिं चि॒नोति॑।
ताव॑र्काश्वमे॒धौ।
अ॒र्का॒श्व॒मे॒धावे॒वाव॑रुन्धे।
अथो॑ अर्काश्वमे॒धयो॑रे॒व प्रति॑तिष्ठति॥ ३॥
नाम॑ करोति॒ सूर्यो॒ऽग्नेर्योनि॑रा॒यत॑नं च॒त्वारि॑ च॥ २१॥

((yoni̍mānā̠yata̍navānbhavati |
sa e̠vaṃ veda̍ |
prā̠ṇā̠pā̠nau vā e̠tau de̠vānā̎m |
yada̍rkāśvame̠dhau |
prā̠ṇā̠pā̠nāve̠vāva̍rundhe |
ojo̠ bala̠ṃ vā e̠tau de̠vānā̎m |
yada̍rkāśvame̠dhau |
ojo̠ bala̍me̠vāva̍rundhe |
a̠gnirvā a̍śvame̠dhasya̠ yoni̍rā̠yata̍nam |
sūryo̠'gneryoni̍rā̠yata̍nam |
yada̍śvame̠dhē̎'gnau citya̍ uttarave̠diṃ ci̠noti̍ |
tāva̍rkāśvame̠dhau |
a̠rkā̠śva̠me̠dhāve̠vāva̍rundhe |
atho̍ arkāśvame̠dhayo̍re̠va prati̍tiṣṭhati || 3 ||
nāma̍ karoti̠ sūryo̠'gneryoni̍rā̠yata̍naṃ ca̠tvāri̍ ca || 21 ||))

**[[3-9-22-1]]**

प्र॒जाप॑तिं॒ वै दे॒वाः पि॒तर᳚म्।
प॒शुं भू॒तं मेधा॒याल॑भन्त।
त॒मा॒लभ्योपा॑वसन्।
प्रा॒तर्य॑ष्टा᳚स्मह॒ इति॑।
एकं॒ वा ए॒तद्दे॒वाना॒मह॑ः।
यत्सं॑वत्स॒रः।
तस्मा॒दश्व॑ः पु॒रस्ता᳚त्संवत्स॒र आल॑भ्यते।
यत्प्र॒जाप॑तिरा॒लब्धोऽश्वोऽभ॑वत्।
तस्मा॒दश्व॑ः।
यत्स॒द्यो मेधोऽभ॑वत्॥ १॥

((pra̠jāpa̍ti̠ṃ vai de̠vāḥ pi̠tarā̎m |
pa̠śuṃ bhū̠taṃ medhā̠yāla̍bhanta |
ta̠mā̠labhyopā̍vasan |
prā̠taryaṣṭā̎smaha̠ iti̍ |
eka̠ṃ vā e̠tadde̠vānā̠maha̍ḥ |
yatsa̍ṃvatsa̠raḥ |
tasmā̠daśva̍ḥ pu̠rastā̎tsaṃvatsa̠ra āla̍bhyate |
yatpra̠jāpa̍tirā̠labdho'śvo'bha̍vat |
tasmā̠daśva̍ḥ |
yatsa̠dyo medho'bha̍vat || 1 ||))

**[[3-9-22-2]]**

तस्मा॑दश्वमे॒धः।
वे॒दु॒कोऽश्व॑मा॒शुं भ॑वति।
य ए॒वं वेद॑।

यद्वै तत्प्रजापतिरालब्धोऽश्वोऽभवत्।
तस्मादश्वः प्रजापतेः पशूनामनुरूपतमः॥
आऽस्य पुत्रः प्रतिरूपो जायते।
य एवं वेद।
सर्वाणि भूतानि संभृत्यालभते।
समेनं देवास्तेजसे ब्रह्मवर्चसाय भरन्ति।
यौऽश्वमेधेन यजते॥ २॥

((tasmādaśvamedhaḥ I
veduko'śvāmāśuṃ bhavati I
ya evaṃ veda I
yadvai tatprajāpatirālabdho'śvo'bhavat I
tasmādaśvaḥ prajāpateḥ paśūnāmanurūpatamaḥ II
ā'sya putraḥ pratirūpo jāyate I
ya evaṃ veda I
sarvāṇi bhūtāni saṃbhṛtyālabhate I
samenaṃ devāstejase brahmavarcasāya bharanti I
yo'śvamedhena yajate II 2 II))

**[[3-9-22-3]]**

य उ चैनमेवं वेद।
एतद्वै तद्देवा एतां देवताम्।
पशुं भूतं मेधायालभन्त।
यज्ञमेव।
यज्ञेन यज्ञमयजन्त देवाः।
कामप्रं यज्ञमकुर्वत।
तेऽमृतत्वमकामयन्त।
तेऽमृतत्वमगच्छन्।
यौऽश्वमेधेन यजते।
देवानामेवायनेनैति॥ ३॥

((ya u cainamevaṃ veda I
etadvai taddevā etāṃ devatām I
paśuṃ bhūtaṃ medhāyālabhanta I
yajñameva I
yajñena yajñamayajanta devāḥ I
kāmapraṃ yajñamakurvata I
te'mṛtatvamakāmayanta I
te'mṛtatvamagacchan I
yo'śvamedhena yajate I
devānāmevāyanenaiti II 3 II))

**[[3-9-22-4]]**

प्राजापत्येनैव यज्ञेन यजते कामप्रेण।
अपुनर्मारमेव गच्छति।
एतस्य वै रूपेण पुरस्तात्प्राजापत्यमृषभं तूपरं बहुरूपमालभते।
सर्वेभ्यः कामेभ्यः।
सर्वस्याप्त्यै।
सर्वस्य जित्यै।
सर्वमेव तेनाप्नोति।
सर्वं जयति।
यौऽश्वमेधेन यजते।
य उ चैनमेवं वेद॥ ४॥
मेधोऽभवद्यजत एति वेद॥ २२॥

((prājāpatyenaiva yajñena yajate kāmapreṇa I
apunarmārameva gacchati I
etasya vai rūpeṇa purastātprājāpatyamṛṣabhaṃ tūparaṃ bahurūpamālabhate I
sarvebhyaḥ kāmebhyaḥ I
sarvasyāptyai I
sarvasya jityai I
sarvameva tenāpnoti I
sarvaṃ jayati I
yo'śvamedhena yajate I
ya u cainamevaṃ veda II 4 II
medho'bhavadyajata eti veda II 22 II))

**[[3-9-23-1]]**

यो वा अश्वस्य मेध्यस्य लोमनी वेद।
अश्वस्यैव मेध्यस्य लोमँल्लोमञ्जुहोति।
अहोरात्रे वा अश्वस्य मेध्यस्य लोमनी।
यत्सायं प्रातर्जुहोति।
अश्वस्यैव मेध्यस्य लोमँल्लोमञ्जुहोति।
एतदनुकृति ह स्म वै पुरा।
अश्वस्य मेध्यस्य लोमँल्लोमञ्जुह्वति।
यो वा अश्वस्य मेध्यस्य पदे वेद।
अश्वस्यैव मेध्यस्य पदे पदे जुहोति।
दर्शपूर्णमासौ वा अश्वस्य मेध्यस्य पदे॥ १॥

((yo vā aśvasya medhyasya lomanī veda I
aśvasyaiva medhyasya lomamllomañjuhoti I
ahorātre vā aśvasya medhyasya lomanī I
yatsāyaṃ prātarjuhoti I
aśvasyaiva medhyasya lomamllomañjuhoti I
etadanukṛti ha sma vai purā I
aśvasya medhyasya lomamllomañjuhvati I
yo vā aśvasya medhyasya pade veda I
aśvasyaiva medhyasya pade pade juhoti I

darśapūrṇamāsau vā aśvásya medhyásya pade || 1 ||))

**[[3-9-23-2]]**

यद्दर्शपूर्णमासौ यजते।
अश्वस्यैव मेध्यस्य पदे पदे जुहोति।
एतदनुकृति ह स्म वै पुरा।
अश्वस्य मेध्यस्य पदे पदे जुह्वति।
यो वा अश्वस्य मेध्यस्य विवर्तनं वेद।
अश्वस्यैव मेध्यस्य विवर्तने विवर्तने जुहोति।
असौ वा आदित्योऽश्वः।
स आहवनीयमागच्छति।
तद्विवर्तते।
यदग्निहोत्रं जुहोति।
अश्वस्यैव मेध्यस्य विवर्तने विवर्तने जुहोति।
एतदनुकृति ह स्म वै पुरा।
अश्वस्य मेध्यस्य विवर्तने विवर्तने जुह्वति॥ २॥
पदे अग्निहोत्रं जुहोति त्रिणि च॥ २३॥
प्रजापतिस्तमष्टादशिभिः प्रजापतिरकामयतो भावस्मै युञ्जन्ति तेजसाऽप प्राणा अप श्रीरूर्ध्वां प्रजापतिः प्रेणाऽणु प्रथमेन प्रजापतिरकामयत महान्वैँश्वदेवो वा अश्वस्य प्रजापतिस्तं यज्ञक्रतुभिरप श्रीर्ब्राँह्मणौ सर्वेषु वारुणो यद्यश्वं तदाहुरेष वै विभूस्तार्प्येणादित्याः प्रजापतिं पितरं यो वा अश्वस्य मेध्यस्य लोमनी त्रयोविꣳशतिः॥ २३॥
प्रजापतिरस्मिँल्लोक उत्तरतः श्रियमेव प्रजापतिरकामयत महान्यत्प्रातः प्र वा एष एभ्यो लोकेभ्यः सर्वꣳ ह वै तत्र पयस्वद्य उ चैनमेवं वेद चत्वार्यशीतिः॥ ८४॥

((yaddárśapūrṇamāsau yajáte |
aśvásyaiva medhyásya pade páde juhoti |
etadánukṛti ha sma vai purā |
aśvásya medhyásya pade páde juhvati |
yo vā aśvásya medhyásya vivartánam vedá |
aśvásyaiva medhyásya vivartáne vivartane juhoti |
asau vā ádityo'śváḥ |
sa áhavanīyamāgácchati |
tadvivártate |
yadágnihotraṃ juhoti |
aśvásyaiva medhyásya vivartáne vivartane juhoti |
etadánukṛti ha sma vai purā |
aśvásya medhyásya vivartáne vivartane juhvati || 2 ||
pade ágnihotraṃ juhoti triṇi ca || 23 ||
prajāpátistamáṣṭādaśibhiḥ prajāpátirakāmayato bhāvasmai yuñjanti tejasā'pá prāṇā apa śrīrūrdhvāṃ prajāpátiḥ preṇā'ṇú prathamená prajāpátirakāmayata mahānvaiśvadevo vā aśvásya prajāpátistaṃ yajñakratubhirapa śrīrbrāhmaṇau sarvéṣu vāruṇo yadyaśvaṃ tadáhureṣa vai vibhūstārpyeṇádityāḥ prajāpátiṃ pitaraṃ yo vā aśvásya medhyásya lomáṇī trayóviṃśatiḥ || 23 ||
prajāpátirasmiṃlloka úttarataḥ śriyámeva prajāpátirakāmayata mahānyatprātaḥ pra vā eṣa ebhyo lokebhyaḥ sarvaṃ ha vai tatra payásvadya u cainamevaṃ vedá catvāryaśītiḥ || 84 ||))

# Taittirīya-Brāhmaṇa

# Book 3, Chapter 10

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[3-10-1-1]]**

संज्ञानं विज्ञानं प्रज्ञानं जानदभिजानत्।
संकल्पमानं प्रकल्पमानमुपकल्पमानमुपक्लृप्तं क्लृप्तम्।
श्रेयो वसीय आयत्संभूतं भूतम्।
चित्रः केतुः प्रभानाभान्त्संभान्।
ज्योतिष्माꣳ स्तेजस्वानातपꣳ स्तपन्नभितपन्।
रोचनो रोचमानः शोभनः शोभमानः कल्याणः।
दर्शा दृष्टा दर्शता विश्वरूपा सुदर्शना।
आप्यायमाना प्यायमाना प्याया सूनृतेरा।
आपूर्यमाणा पूर्यमाणा पूरयन्ती पूर्णा पौर्णमासी।
दाता प्रदाताऽऽनन्दो मोदः प्रमोदः॥ १॥

((saṃjñānaṃ vijñānaṃ prajñānaṃ jānadabhijānat ǀ
saṃkalpamānaṃ
prakalpamānamupakalpamānamupaklṛptaṃ klṛptam ǀ
śreyo vasīya āyatsambhūtaṃ bhūtam ǀ
citraḥ ketuḥ prabhānābhāntsambhān ǀ
jyotiṣmām̐ stejasvānātapam̐ stapannabhitapan ǀ
rocano rocamānaḥ śobhanaḥ śobhamānaḥ kalyāṇaḥ ǀ
darśā dṛṣṭā darśatā viśvarūpā sudarśanā ǀ
āpyāyamānā pyāyamānā pyāyā sūnṛterā ǀ
āpūryamāṇā pūryamāṇā pūrayantī pūrṇā paūrṇamāsī ǀ
dātā pradātā''nando modaḥ pramodaḥ ǁ 1 ǁ))

**[[3-10-1-2]]**

आवेशयन्निवेशयन्त्संवेशनः सꣳशान्तः शान्तः।
आभवन्प्रभवन्त्संभवन्त्संभूतो भूतः।
प्रस्तुतं विष्टुतꣳ सꣳस्तुतं कल्याणं विश्वरूपम्।
शुक्रममृतं तेजस्वि तेजः समिद्धम्।
अरुणं भानुमन्मरीचिमदभितपत्तपस्वत्।
सविता प्रसविता दीप्तो दीपयन्दीप्यमानः।
ज्वलञ्ज्वलिता तपन्वितपन्त्संतपन्।
रोचनो रोचमानः शुम्भूः शुम्भमानो वामः।
सुता सुन्वती प्रसुता सूयमानाऽभिषूयमाणा।
पीती प्रपा संपा तृप्तिस्तर्पयन्ती॥ २॥

((āveśayannniveśayantsaṃveśanaḥ sam̐śāntaḥ
śāntaḥ ǀ
ābhavanprabhavantsambhavantsambhūto bhūtaḥ ǀ
prastutaṃ viṣṭutam̐ sam̐stutaṃ kalyāṇaṃ
viśvarūpam ǀ
śukramamṛtaṃ tejasvi tejaḥ samiddham ǀ
aruṇaṃ bhānumanmarīcimadabhitapattapasvat ǀ
savitā prasavitā dīpto dīpayandīpyamānaḥ ǀ
jvalañjvalitā tapanvitapantsaṃtapan ǀ
rocano rocamānaḥ śumbhūḥ śumbhamāno vāmaḥ ǀ
sutā sunvatī prasutā sūyamānā'bhiṣūyamāṇā ǀ
pītī prapā sampā tṛptistarpayantī ǁ 2 ǁ))

**[[3-10-1-3]]**

कान्ता काम्या कामजाताऽऽयुष्मती कामदुघा।
अभिशास्ताऽनुमन्ताऽऽनन्दो मोदः प्रमोदः।
आसादयन्निषादयन्त्सꣳसादनः सꣳसन्नः सन्नः।
आभूर्विभूः प्रभूः शंभूर्भुवः।
पवित्रं पवियिष्यन्पूतो मेध्यः।
यशो यशस्वानायुरमृतः।
जीवो जीविष्यन्त्स्वर्गो लोकः।
सहस्वान्त्सहीयानोजस्वान्त्सहमानः।
जयन्नभिजयन्त्सुद्रविणो द्रविणोदाः।
आर्द्रपवित्रो हरिकेशो मोदः प्रमोदः॥ ३॥

((kāntā kāmyā kāmajātā''yuṣmatī kāmadughā ǀ
abhiśāstā'numantā''nando modaḥ pramodaḥ ǀ
āsādayanniṣādayantsam̐sādanaḥ sam̐sannaḥ
sannaḥ ǀ
ābhūrvibhūḥ prabhūḥ śambhūrbhuvaḥ ǀ
pavitraṃ paviyiṣyanpūto medhyaḥ ǀ
yaśo yaśasvānāyuramṛtaḥ ǀ
jīvo jīviṣyantsvargo lokaḥ ǀ
sahasvāntsahīyānojasvāntsahamānaḥ ǀ
jayannabhijayantsudraviṇo draviṇodāḥ ǀ
ārdrapavitro harikeśo modaḥ pramodaḥ ǁ 3 ǁ))

**[[3-10-1-4]]**

अरुणोऽरुणरजाः पुण्डरीको विश्वजिदभिजित्।
आर्द्रः पिन्वमानोऽन्नवान्रसवानिरावान्।
सर्वौषधः संभरो महस्वान्।
एजत्का जोवत्काः।
क्षुल्लकाः शिपिविष्टकाः।
सरिस्रराः सुशेरवः।
अजिरासो गमिष्णवः।

इ॒दानीं॑ त॒दानी॑मे॒तर्हि॑ क्षि॒प्रम॑जि॒रम्।
आ॒शुर्नि॑मे॒षः फ॒णो द्र॒वन्न॑ति॒द्रव॑न्।
त्व॒रꣳस्त्व॒रमा॑ण आ॒शुरा॒शीया॑ञ्ज॒वः।
अ॒ग्नि॒ष्टो॒म उ॒क्थ्यो॑ऽतिरा॒त्रो द्वि॑रा॒त्रस्त्रि॑रा॒त्रश्च॑तूरा॒त्रः।
अ॒ग्निरृ॒तुः सूर्य॑ ऋ॒तुश्च॒न्द्रमा॑ ऋ॒तुः।
प्र॒जाप॑तिः संवत्स॒रो म॒हान्कः॥ ४॥
प्र॒मो॒दस्त॒र्पय॑न्ती प्रमो॒दो ज॒वस्त्रीणि॑ च॥ १॥

((a̱ru̱ṇo̍'ru̱ṇarā̍jāḥ pu̱ṇḍarī̍ko viśvajidā̍bhijit ।
ā̱rdraḥ pinva̍mā̱no'nna̍vā̱nrasa̍vā̱nirā̍vān ।
sa̱rvau̱ṣa̱dhaḥ sa̍mbha̱ro mahā̍svān ।
e̱ja̱tkā jo̍va̱tkāḥ ।
kṣu̱lla̱kāḥ śi̍piviṣṭa̱kāḥ ।
sa̱ri̱sra̱rāḥ su̱śera̍vaḥ ।
a̱ji̱rāso̍ gami̱ṣṇava̍ḥ ।
i̱dānī̍m̐ ta̱dānī̍me̱tarhi̍ kṣi̱prama̍jiram ।
ā̱śurni̍me̱ṣaḥ pha̱ṇo drava̍nnati̱dravan̍ ।
tvara̱m̐stvara̍mā̱ṇa ā̱śurā̱śī̍yāñja̱vaḥ ।
a̱gni̱ṣṭo̱ma u̱kthyo̍'tirā̱tro
dvi̍rā̱trastri̍rā̱traśca̍tūrā̱traḥ ।
a̱gnirṛ̱tuḥ sūrya̍ ṛ̱tuśca̱ndramā̍ ṛ̱tuḥ ।
pra̱jāpa̍tiḥ saṃvatsa̱ro ma̱hānkaḥ ॥ 4 ॥
pra̱mo̱dasta̱rpaya̍ntī pramo̱do ja̱vastrīṇi̍ ca ॥ 1 ॥))

**[[3-10-2-1]]**

भू॒र॒ग्निं च॑ पृथि॒वीं च॒ मां च॑।
त्रीꣳश्च॑ लो॒कान्त्सं॑वत्स॒रं च॑।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द।
भुवो॑ वा॒युं चा॒न्तरि॑क्षं च॒ मां च॑।
त्रीꣳश्च॑ लो॒कान्त्सं॑वत्स॒रं च॑।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द।
स्व॑रादि॒त्यं च॒ दिवं॑ च॒ मां च॑।
त्रीꣳश्च॑ लो॒कान्त्सं॑वत्स॒रं च॑।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द।
भूर्भु॒वः स्व॑श्च॒न्द्रम॑सं च॒ दिश॑श्च मां च॑।
त्रीꣳश्च॑ लो॒कान्त्सं॑वत्स॒रं च॑।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ १॥
सं॒व॒त्स॒रं च॒ षट्च॑॥ २॥

((bhū̱ra̱gniṃ ca̍ pṛthi̱vīṃ ca̱ māṃ ca̍ ।
trīm̐śca̍ lo̱kāntsa̍ṃvatsa̱raṃ ca̍ ।
pra̱jāpa̍tistvā sādayatu ।
tayā̍ de̱vata̍yā'ṅgira̱svaddhru̱vā sī̍da ।
bhuvo̍ vā̱yuṃ cā̱ntari̍kṣaṃ ca̱ māṃ ca̍ ।
trīm̐śca̍ lo̱kāntsa̍ṃvatsa̱raṃ ca̍ ।
pra̱jāpa̍tistvā sādayatu ।
tayā̍ de̱vata̍yā'ṅgira̱svaddhru̱vā sī̍da ।
sva̍rādi̱tyaṃ ca̱ divaṃ̍ ca̱ māṃ ca̍ ।
trīm̐śca̍ lo̱kāntsa̍ṃvatsa̱raṃ ca̍ ।
pra̱jāpa̍tistvā sādayatu ।
tayā̍ de̱vata̍yā'ṅgira̱svaddhru̱vā sī̍da ।
bhūrbhuva̱ḥ sva̍ścandrama̍saṃ ca̱ diśa̍śca̱ māṃ ca̍ ।
trīm̐śca̍ lo̱kāntsa̍ṃvatsa̱raṃ ca̍ ।
pra̱jāpa̍tistvā sādayatu ।
tayā̍ de̱vata̍yā'ṅgira̱svaddhru̱vā sī̍da ॥ 1 ॥
sa̱ṃva̱tsa̱raṃ ca̱ ṣaṭca̍ ॥ 2 ॥))

**[[3-10-3-1]]**

त्वमे॒व त्वां वे॑त्थ॒ यो॑ऽसि॒ सो॑ऽसि॑।
त्वमे॒व त्वाम॑चैषीः।
चि॒तश्चा॑सि॒ सं॑चि॒तश्चा॑स्यग्ने।
ए॒तावा॒ꣳश्चासि॒ भूया॒ꣳश्चास्यग्ने।
यत्ते॑ अग्ने॒ न्यू॒नं यदु॒ ते॑ऽतिरि॑क्तम्।
आ॒दि॒त्यास्तद॑ङ्गि॒रस॑श्चि॒न्वन्तु।
विश्वे॑ ते दे॒वाश्चिति॒मापू॑रयन्तु।
चि॒तश्चा॑सि॒ सं॑चि॒तश्चा॑स्यग्ने।
ए॒तावा॒ꣳश्चासि॒ भूया॒ꣳश्चास्यग्ने।
मा ते॑ अग्ने॒ऽचये॑न॒ माऽति॑ च॒ येनायु॒रावृ॑क्षि।
सर्वे॑षां॒ ज्योति॑षां॒ ज्योति॒र्यद्द॒दावु॒देति॑।
तप॑सो जा॒तमनि॑भृष्ट॒मोजः॑।
तत्ते॒ ज्योति॑रिष्टके।
तेन॑ मे तप।
तेन॑ मे ज्वल।
तेन॑ मे दीदिहि।
यव॑द्दे॒वाः।
याव॒दसा॑ति॒ सूर्यः॑।
याव॑दु॒तापि॒ ब्रह्म॑॥ १॥
आवृ॑क्षि॒ नव॑ च॥ ३॥

((tvame̱va tvāṃ ve̍ttha̱ yo̍'si̱ so'si̍ ।
tvame̱va tvāma̍caiṣīḥ ।
ci̱taścāsi̱ saṃci̍taścāsyagne ।
e̱tāvā̱m̐ścāsi̱ bhūyā̱m̐ścāsyagne ।

yatte̍ agne̱ nyū̍nam̱ yadu̱ te'ti̍riktam |
ā̱dityāstadaṅgi̍rasaścinvantu |
viśve̍ te de̱vāściti̱māpū̍rayantu |
ci̱taścāsi̱ saṃci̍taścāsyagne |
e̱tāvā̱m̐ścāsi̱ bhūyām̐ścāsyagne |
mā te̍ agne'ca̱yena̱ mā'ti̍ ca̱ yenāyu̱rāvṛ̍kṣi |
sarve̍ṣā̱ṃ jyoti̍ṣā̱ṃ jyoti̱ryada̱dāvu̱deti̍ |
tapa̍so jā̱tamani̍bhṛṣṭa̱moja̍ḥ |
tatte̱ jyoti̍riṣṭake |
tena̍ me tapa |
tena̍ me jvala |
tena̍ me dīdihi |
yava̍dde̱vāḥ |
yāva̱dasā̍ti̱ sūrya̍ḥ |
yāva̍du̱tāpi̱ brahma̍ || 1 ||
āvṛ̍kṣi̱ nava̍ ca || 3 ||))

**[[3-10-4-1]]**

सं॒व॒त्स॒रो॑ऽसि परिवत्स॒रो॑ऽसि।
इ॒दा॒व॒त्स॒रो॑ऽसीदुवत्स॒रो॑ऽसि।
इ॒द्व॒त्स॒रो॑ऽसि वत्स॒रो॑ऽसि।
तस्य॑ ते वस॒न्तः शिर॑ः।
ग्री॒ष्मो दक्षि॑णः प॒क्षः।
व॒र्षाः पुच्छ᳚म्।
श॒रदुत्त॑रः प॒क्षः।
हे॒म॒न्तो मध्य᳚म्।
पू॒र्व॒प॒क्षाश्चित॑यः।
अ॒प॒र॒प॒क्षाः पुरी॑षम्॥ १॥

((sa̱ṃva̱tsa̱ro̍'si parivatsa̱ro̍'si |
i̱dā̱va̱tsa̱ro̍'sīduvatsa̱ro̍'si |
i̱dva̱tsa̱ro̍'si vatsa̱ro̍'si |
tasya̍ te vasa̱ntaḥ śira̍ḥ |
grī̱ṣmo dakṣi̍ṇaḥ pa̱kṣaḥ |
va̱rṣāḥ puccha̎m |
śa̱radutta̍raḥ pa̱kṣaḥ |
he̱ma̱nto madhya̎m |
pū̱rva̱pa̱kṣāścita̍yaḥ |
a̱pa̱ra̱pa̱kṣāḥ purī̍ṣam || 1 ||))

**[[3-10-4-2]]**

अ॒हो॒रा॒त्राणी॑ष्ट॒काः।
ऋ॒ष॒भो॑ऽसि स्व॒र्गो लो॒कः।
यस्याँ᳚ दि॒शि म॒हीय॑से।
तत॑ो नो॒ मह॒ आव॑ह।
वा॒युर्भू॒त्वा सर्वा॒ दिश॒ आवा॑हि।
सर्वा॒ दिशो॑ऽनु॒ विवा॑हि।
सर्वा॒ दिशो॑ऽनु॒ संवा॑हि।
चित्या॒ चिति॒माप॑ृण।
अचि॑त्या॒ चिति॒माप॑ृण।
चिद॑सि समु॒द्रयो॑निः॥ २॥

((a̱ho̱rā̱trāṇī̍ṣṭa̱kāḥ |
ṛ̱ṣa̱bho̍'si sva̱rgo lo̱kaḥ |
yasyā̎m̐ di̱śi ma̱hīya̍se |
tato̍ no̱ maha̱ āva̍ha |
vā̱yurbhū̱tvā sarvā̱ diśa̱ āvā̍hi |
sarvā̱ diśo'nu̱ vivā̍hi |
sarvā̱ diśo'nu̱ saṃvā̍hi |
cityā̱ citi̱māpṛ̍ṇa |
aci̍tyā̱ citi̱māpṛ̍ṇa |
cida̍si samu̱drayo̍niḥ || 2 ||))

**[[3-10-4-3]]**

इन्दु॒र्दक्ष॑ः श्ये॒न ऋ॒तावा᳚।
हिर॑ण्यपक्षः शकु॒नो भु॑र॒ण्युः।
म॒हान्त्स॒धस्थे᳚ ध्रु॒व आनिष॑त्तः।
नम॑स्ते अस्तु॒ मा मा॑ हिꣳसीः।
ए॒ति॒ प्रेति॒ वीति॒ समित्युदिति॑।
दिव॑ं मे यच्छ।
अ॒न्तरि॑क्षं मे यच्छ।
पृ॒थि॒वीं मे॑ यच्छ।
पृ॒थि॒वीं मे॑ यच्छ।
अ॒न्तरि॑क्षं मे यच्छ।
दिव॑ं मे यच्छ।
अह्ना॒ प्रसा॑रय।
रात्र्या॒ सम॑ञ्च।
रात्र्या॒ प्रसा॑रय।
अह्ना॒ सम॑ञ्च।
काम॒ं प्रसा॑रय।
काम॒ꣳ सम॑ञ्च॥ ३॥
पुरी॑षꣳ समु॒द्रयो॑निः पृथि॒वीं मे॑ यच्छा॒न्तरि॑क्षं मे यच्छ स॒प्त च॑॥ ४॥

((indu̱rdakṣa̍ḥ śye̱na ṛ̱tāvā̎ |
hira̍ṇyapakṣaḥ śaku̱no bhu̍ra̱ṇyuḥ |
ma̱hāntsa̱dhasthe̎ dhru̱va āniṣa̍ttaḥ |
nama̍ste astu̱ mā mā̍ him̐sīḥ |
eti̱ preti̱ vīti̱ samityuditi̍ |
divam̱ me yaccha |
a̱ntari̍kṣam̱ me yaccha |
pṛ̱thi̱vīm̱ me̍ yaccha |

pṛthi̱vīṃ me̍ yaccha |
a̱ntari̍kṣaṃ me yaccha |
diva̱ṃ me yaccha |
ahnā̱ prasā̍raya |
rātryā̱ samā̍ca |
rātryā̱ prasā̍raya |
ahnā̱ samā̍ca |
kāma̱ṃ prasā̍raya |
kāma̱ṃ̎ samā̍ca || 3 ||
purī̍ṣa̱ṃ sa̱mu̱drayo̍niḥ pṛthi̱vīṃ me̍
yacchā̱ntari̍kṣaṃ me yaccha sa̱pta ca̍ || 4 ||))

**[[3-10-5-1]]**

भूर्भुव॒ः स्व॑ः।

ओजो॒ बल᳚म्।

ब्रह्म॑ क्ष॒त्त्रम्।

यशो᳚ म॒हत्।

स॒त्यं तपो॒ नाम॑।

रू॒पम॒मृत᳚म्।

चक्षु॒ः श्रोत्र᳚म्।

मन॒ आयु॑ः।

विश्वं॒ यशो᳚ म॒हः।

स॒मं तपो॒ हरो॒ भाः।

जा॒तवे॑दा॒ यदि॑ वा पाव॒कोऽसि॑।

वै॒श्वा॒न॒रो यदि॑ वा वैद्यु॒तोऽसि॑।

शं प्र॒जाभ्यो॒ यज॑मानाय लो॒कम्।

ऊर्जं॒ पुष्टिं॒ दद॑द॒भ्याव॑वृत्स्व॥ १॥

भाश्च॒त्वारि॑ च॥ ५॥

((bhūrbhuva̱ḥ sva̍ḥ |
ojo̱ bala̎m |
brahma̍ kṣa̱ttram |
yaśo̍ ma̱hat |
sa̱tyaṃ tapo̱ nāma̍ |
rū̱pama̱mṛta̎m |
cakṣu̱ḥ srotra̎m |
mana̱ āyu̍ḥ |
viśva̱ṃ yaśo̍ ma̱haḥ |
sa̱ma̱ṃ tapo̱ haro̱ bhāḥ |
jā̱tave̍dā̱ yadi̍ vā pāva̱ko'si̍ |
vai̱śvā̱na̱ro yadi̍ vā vaidyu̱to'si̍ |
śa̱ṃ pra̱jābhyo̱ yaja̍mānāya lo̱kam |
ūrja̱ṃ puṣṭi̱ṃ dada̍da̱bhyāva̍vṛtsva || 1 ||
bhāśca̱tvāri̍ ca || 5 ||))

**[[3-10-6-1]]**

राज्ञी॑ वि॒राज्ञी᳚।

स॒म्राज्ञी᳚ स्व॒राज्ञी᳚।

अ॒र्चिः शो॒चिः।

तपो॒ हरो॒ भाः।

अ॒ग्निरिन्द्रो॒ बृह॒स्पति॑ः।

विश्वे॑ दे॒वा भुव॑नस्य गो॒पाः।

ते मा॒ सर्वे॒ यश॑सा॒ सꣳसृ॑जन्तु॥ १॥

राज्ञीन्द्रो॑ मा स॒प्त॥ ६॥

((rājñī̍ vi̱rājñī̎ |
sa̱mrājñī̎ sva̱rājñī̎ |
a̱rciḥ śo̱ciḥ |
tapo̱ haro̱ bhāḥ |
a̱gnirindro̱ bṛha̱spati̍ḥ |
viśve̍ de̱vā bhuva̍nasya go̱pāḥ |
te mā̱ sarve̱ yaśa̍sā̱ saṃ̍sṛjantu || 1 ||
rājñīndro̍ mā sa̱pta || 6 ||))

**[[3-10-7-1]]**

अस॑वे॒ स्वाहा॒ वस॑वे॒ स्वाहा᳚।

वि॒भुवे॒ स्वाहा॒ विव॑स्वते॒ स्वाहा᳚।

अ॒भि॒भुवे॒ स्वाहाऽधि॑पतये॒ स्वाहा᳚।

दि॒वांप॑तये॒ स्वाहाऽꣳहस्प॒त्याय॒ स्वाहा᳚।

चा॒क्षु॒ष्म॒त्याय॒ स्वाहा᳚ ज्योतिष्म॒त्याय॒ स्वाहा᳚।

राज्ञे॒ स्वाहा॑ वि॒राज्ञे॒ स्वाहा᳚।

सं॒राज्ञे॒ स्वाहा᳚ स्व॒राज्ञे॒ स्वाहा᳚।

शू॒षाय॒ स्वाहा॒ सूर्या॑य॒ स्वाहा᳚।

च॒न्द्रम॑से॒ स्वाहा॒ ज्योति॑षे॒ स्वाहा᳚।

स॒ꣳ॒सर्पा॑य॒ स्वाहा॑ क॒ल्याणा॑य॒ स्वाहा᳚।

अर्जु॑नाय॒ स्वाहा᳚॥ १॥

क॒ल्याणा॑य॒ स्वाहैकं॑ च॥ ७॥

((asa̍ve̱ svāhā̱ vasa̍ve̱ svāhā̎ |
vibhu̍ve̱ svāhā̱ viva̍svate̱ svāhā̎ |
a̱bhi̱bhuve̱ svāhā'dhi̍pataye̱ svāhā̎ |
di̱vāṃpata̍ye svāhā'ṃ̍haspa̱tyāya̱ svāhā̎ |
cā̱kṣu̱ṣma̱tyāya̱ svāhā̎ jyotiṣma̱tyāya̱ svāhā̎ |
rājñe̱ svāhā̍ vi̱rājñe̱ svāhā̎ |
sa̱ṃrājñe̱ svāhā̎ sva̱rājñe̱ svāhā̎ |
śū̱ṣā̍ya̱ svāhā̱ sūryā̍ya̱ svāhā̎ |
ca̱ndrama̍se̱ svāhā̱ jyoti̍ṣe̱ svāhā̎ |
sa̱ṃ̍sarpā̍ya̱ svāhā̍ ka̱lyāṇā̍ya̱ svāhā̎ |
arju̍nāya̱ svāhā̎ || 1 ||
ka̱lyāṇā̍ya̱ svāhaikaṃ̍ ca || 7 ||))

**[[3-10-8-1]]**

वि॒प॒श्चिते॒ पव॑मानाय गायत।

म॒ही न धारा॒ऽत्यन्धो॑ अर्षति।
अहि॑र्ह जी॒र्णाम॑ति॒सर्प॑ति त्वच᳚म्।
अत्यो॒ न क्रीड॑न्नसर॒द्वृषा॒ हरि॑ः।
उ॒प॒या॒मगृ॑हीतोऽसि मृ॒त्यवे᳚ त्वा॒ जुष्टं॑ गृह्णा॒मि।
ए॒ष ते॒ योनि॑र्मृ॒त्यवे᳚ त्वा।
अप॑मृ॒त्युम॑प॒क्षुध᳚म्।
अपे॒तः श॒पथं॑ जहि।
अधा॑ नो अग्न॒ आव॑ह।
रा॒यस्पोष॑ꣳ सह॒स्रिण᳚म्॥ १॥

((vi̱pa̱ścite̱ pavámānāya gāyata |
ma̱hī na dhārā'tyandhó arṣati |
ahírha jīrṇāmatísarpati̱ tvacā̎m |
atyo̱ na krīḍánnasara̱dvṛṣā̱ hariḥ́ |
u̱pa̱yā̱magṛ́hīto'si mṛ̱tyave̎ tvā̱ juṣṭaṃ́ gṛhṇā̱mi |
e̱ṣa te̱ yonírmṛ̱tyave̎ tvā |
apámṛ̱tyumapa̱kṣudhā̎m |
ape̱taḥ śa̱pathaṃ́ jahi |
adhá no agna̱ āváha |
rā̱yaspoṣaṃ́ saha̱sriṇā̎m || 1 ||))

**[[3-10-8-2]]**

ये ते॑ स॒हस्र॑म॒युतं॒ पाशा᳚ः।
मृत्यो॒ मर्त्या॑य॒ हन्त॑वे।
तान्य॒ज्ञस्य॑ मा॒यया᳚।
सर्वा॒नव॑यजामहे।
भ॒क्षो᳚ऽस्यमृतभ॒क्षः।
तस्य॑ ते मृत्युपी॑तस्यामृत॑वतः।
स्व॒गाकृ॑तस्य॒ मधु॑मतः।
उप॑हूत॒स्योप॑हूतो भक्षयामि।
म॒न्द्राऽभिभू॑तिः के॒तुर्य॒ज्ञानां॒ वाक्।
असा॒वेहि॑॥ २॥

((ye té sa̱hasráma̱yuta̱ṃ pāśā̎ḥ |
mṛtyo̱ martyáya̱ hantáve |
tānya̱jñasyá mā̱yayā̎ |
sarvā̱naváyajāmahe |
bha̱kṣo̎'syamṛtabha̱kṣaḥ |
tasyá te mṛtyupítasyā̱mṛtávataḥ |
sva̱gākṛ́tasya̱ madhúmataḥ |
upáhūta̱syopáhūto bhakṣayāmi |
ma̱ndrā'bhibhū́tiḥ ke̱turya̱jñānā̱ṃ vāk |
asā̱vehí || 2 ||))

**[[3-10-8-3]]**

अ॒न्धो जागृ॑विः प्राण।
असा॒वेहि॑।
ब॒धि॒र आ᳚क्रन्दयितरपान।
असा॒वेहि॑।
अ॒ह॒स्तोऽस्त्वा॒ चक्षु॑ः।
असा॒वेहि॑।
अ॒पा॒दाशो॒ मन॑ः।
असा॒वेहि॑।
कवे॒ विप्र॑चित्ते॒ श्रोत्र॑।
असा॒वेहि॑।

((a̱ndho jāgṛ́viḥ prāṇa |
asā̱vehí |
ba̱dhi̱ra ā̎krandayitarapāna |
asā̱vehí |
a̱hasto'stvā̱ cakṣúḥ |
asā̱vehí |
a̱pā̱dāśo̱ manáḥ |
asā̱vehí |
kave̱ viprácitte̱ śrotrá |
asā̱vehí |))

**[[3-10-8-4]]**

सु॒ह॒स्तः सु॑वा॒साः।
शू॒षो नामा᳚स्य॒मृतो॒ मर्त्ये॑षु।
तं त्वा॒ऽहं तथा॒ वेद॑।
असा॒वेहि॑।
अ॒ग्निर्मे॑ वा॒चि श्रि॒तः।
वाग्घृद॑ये।
हृद॑यं॒ मयि॑।
अ॒हम॒मृते᳚।
अ॒मृतं॒ ब्रह्म॑णि।
वा॒युर्मे᳚ प्रा॒णे श्रि॒तः॥ ४॥

((su̱ha̱staḥ suvā̱sāḥ |
śū̱ṣo nāmā̎sya̱mṛto̱ martyéṣu |
taṃ tvā̱'haṃ tathā̱ vedá |
asā̱vehí |
a̱gnirmé vā̱ci śri̱taḥ |
vāgghṛdáye |
hṛdáya̱ṃ mayí |
a̱hama̱mṛte̎ |
a̱mṛta̱ṃ brahmáṇi |
vā̱yurme̎ prā̱ṇe śri̱taḥ || 4 ||))

**[[3-10-8-5]]**

प्राणो हृद॑ये।
हृद॑यं॒ मयि॑।
अ॒हम॒मृते॑।
अ॒मृतं॒ ब्रह्म॑णि।
सूर्यो॑ मे॒ चक्षु॑षि श्रि॒तः।
चक्षु॒र्हृद॑ये।
हृद॑यं॒ मयि॑।
अ॒हम॒मृते॑।
अ॒मृतं॒ ब्रह्म॑णि।
च॒न्द्रमा॑ मे॒ मन॑सि श्रि॒तः॥ ५॥

((prāṇo hṛdáye |
hṛdáyam̱ mayí |
a̱hamamṛtĕ |
a̱mṛtam̱ brahmáṇi |
sūryó me̱ cakṣúṣi śri̱taḥ |
cakṣurhṛdáye |
hṛdáyam̱ mayí |
a̱hamamṛtĕ |
a̱mṛtam̱ brahmáṇi |
ca̱ndramá me̱ manási śri̱taḥ || 5 ||))

**[[3-10-8-6]]**

मनो॒ हृद॑ये।
हृद॑यं॒ मयि॑।
अ॒हम॒मृते॑।
अ॒मृतं॒ ब्रह्म॑णि।
दिशो॑ मे॒ श्रोत्रे॑ श्रि॒ताः।
श्रोत्र॒ꣳ॒ हृद॑ये।
हृद॑यं॒ मयि॑।
अ॒हम॒मृते॑।
अ॒मृतं॒ ब्रह्म॑णि।
आपो॑ मे॒ रेत॑सि श्रि॒ताः॥ ६॥

((mano̱ hṛdáye |
hṛdáyam̱ mayí |
a̱hamamṛtĕ |
a̱mṛtam̱ brahmáṇi |
diśó me̱ śrotrĕ śri̱tāḥ |
śrotram̱̆ hṛdáye |
hṛdáyam̱ mayí |
a̱hamamṛtĕ |
a̱mṛtam̱ brahmáṇi |
āpó me̱ retási śri̱tāḥ || 6 ||))

**[[3-10-8-7]]**

रेतो॒ हृद॑ये।
हृद॑यं॒ मयि॑।
अ॒हम॒मृते॑।
अ॒मृतं॒ ब्रह्म॑णि।
पृ॒थि॒वी मे॒ शरी॑रे श्रि॒ता।
शरी॑र॒ꣳ॒ हृद॑ये।
हृद॑यं॒ मयि॑।
अ॒हम॒मृते॑।
अ॒मृतं॒ ब्रह्म॑णि।
ओ॒ष॒धि॒व॒न॒स्प॒तयो॑ मे॒ लोम॑सु श्रि॒ताः॥ ७॥

((reto̱ hṛdáye |
hṛdáyam̱ mayí |
a̱hamamṛtĕ |
a̱mṛtam̱ brahmáṇi |
pṛ̱thi̱vī me̱ śarīre śri̱tā |
śarīram̱̆ hṛdáye |
hṛdáyam̱ mayí |
a̱hamamṛtĕ |
a̱mṛtam̱ brahmáṇi |
o̱ṣa̱dhi̱va̱na̱spa̱tayó me̱ lomásu śri̱tāḥ || 7 ||))

**[[3-10-8-8]]**

लोमा॑नि॒ हृद॑ये।
हृद॑यं॒ मयि॑।
अ॒हम॒मृते॑।
अ॒मृतं॒ ब्रह्म॑णि।
इन्द्रो॑ मे॒ बले॑ श्रि॒तः।
बल॒ꣳ॒ हृद॑ये।
हृद॑यं॒ मयि॑।
अ॒हम॒मृते॑।
अ॒मृतं॒ ब्रह्म॑णि।
प॒र्जन्यो॑ मे मू॒र्ध्नि श्रि॒तः॥ ८॥

((lománi̱ hṛdáye |
hṛdáyam̱ mayí |
a̱hamamṛtĕ |
a̱mṛtam̱ brahmáṇi |
indró me̱ balĕ śri̱taḥ |
bala̱m̆ hṛdáye |
hṛdáyam̱ mayí |
a̱hamamṛtĕ |
a̱mṛtam̱ brahmáṇi |

parjanyo me mūrdhni śritaḥ ‖ 8 ‖))

**[[3-10-8-9]]**

मूर्धा हृदये।
हृदयं मयि।
अहममृतेँ।
अमृतं ब्रह्मणि।
ईशानो मे मन्यौ श्रितः।
मन्युर्हृदये।
हृदयं मयि।
अहममृतेँ।
अमृतं ब्रह्मणि।
आत्मा म आत्मनि श्रितः॥ ९॥

((mūrdhā hṛdaye ।
hṛdayam mayi ।
ahamamṛte ।
amṛtam brahmaṇi ।
īśāno me manyau śritaḥ ।
manyurhṛdaye ।
hṛdayam mayi ।
ahamamṛte ।
amṛtam brahmaṇi ।
ātmā ma ātmani śritaḥ ‖ 9 ‖))

**[[3-10-8-10]]**

आत्मा हृदये।
हृदयं मयि।
अहममृतेँ।
अमृतं ब्रह्मणि।
पुनर्म आत्मा पुनरायुरागाँत्।
पुनः प्राणः पुनराकूतमागाँत्।
वैश्वानरो रश्मिभिर्वावृधानः।
अन्तस्तिष्ठत्वमृतस्य गोपाः॥ ९॥
सहस्त्रिणमिहि श्रोत्रासावेहि प्राणे श्रितो मनसि श्रितो रेतसि श्रिता लोमसु श्रिता मूर्ध्नि श्रित आत्मनि श्रितोँऽष्टौ च॥ ८॥
अग्निर्वायुः सूर्यश्चन्द्रमा दिश आपः पृथिव्योषधिवनस्पतय इन्द्रः पर्जन्य ईशान आत्मा पुनर्मे त्रयोदश॥

((ātmā hṛdaye ।
hṛdayam mayi ।
ahamamṛte ।
amṛtam brahmaṇi ।
punarma ātmā punarāyurāgāt ।
punaḥ prāṇaḥ punarākūtamāgāt ।
vaiśvānaro raśmibhirvāvṛdhānaḥ ।
antastiṣṭhatvamṛtasya gopāḥ ‖ 9 ‖
sahasriṇamihi śrotrāsāvehi prāṇe śrito manasi śrito retasi śritā lomasu śritā mūrdhni śrita ātmani śrito'ṣṭau ca ‖ 8 ‖
agnirvāyuḥ sūryaścandramā diśa āpaḥ pṛthivyoṣadhivanaspataya indraḥ parjanya īśāna ātmā punarme trayodaśa ‖))

**[[3-10-9-1]]**

प्रजापतिर्देवानसृजत।
ते पाप्मना संदिता अजायन्त।
तान्व्यद्यत्।
यद्व्यद्यत्।
तस्माद्विद्युत्।
तमवृश्चत्।
यदवृश्चत्।
तस्माद्वृष्टिः।
तस्माद्यत्रैते देवते अभिप्राप्नुतः।
वि च हैवास्य तत्र पाप्मानं द्यतः॥ १॥

((prajāpatirdevānasṛjata ।
te pāpmanā saṃditā ajāyanta ।
tānvyadyat ।
yadvyadyat ।
tasmādvidyut ।
tamavṛścat ।
yadavṛścat।
tasmādvṛṣṭiḥ ।
tasmādyatraite devate abhiprāpnutaḥ ।
vi ca haivāsya tatra pāpmānam dyataḥ ‖ 1 ‖))

**[[3-10-9-2]]**

वृश्चतश्च।
सैषा मीमाꣳसाऽग्निहोत्र एव संपन्ना।
अथो आहुः।
सर्वेषु यज्ञक्रतुष्विति।
होष्यन्नप उपस्पृशेत्।
विद्युदसि विद्य मे पाप्मानमिति।
अथ हुत्वोपस्पृशेत्।
वृष्टिरसि वृश्च मे पाप्मानमिति।
यक्ष्यमाणो वेष्ट्वा वा।

वि च॑ हैवास्यैते दे॒वते॑ पा॒प्मान॑ं द्यतः॥ २॥

((vṛ́ścatáśca ।
saiṣā mi̍mā̍m̐sā'gni̍ho̱tra e̱va sa̍mpannā ।
athó āhuḥ ।
sarvéṣu yajñakra̱tuṣviti̍ ।
hoṣyánna̱pa upáspṛśet ।
vidyúdasi̱ vidyá me pā̱pmāna̱miti̍ ।
athá hu̱tvopáspṛśet ।
vṛṣṭi̍rasi̱ vṛ́ścá me pā̱pmāna̱miti̍ ।
ya̱kṣyamá̱ṇo ve̱ṣṭvā vā̎ ।
vi cá hai̱vāsyai̱te de̱vaté pā̱pmānam̱ dyatáḥ ॥ 2 ॥))

**[[3-10-9-3]]**

वृश्चत॑श्च।

अ॒त्य॒ꣳहो हारु॑णिः।

ब्र॒ह्म॒चा॒रिणे॑ प्र॒श्नान्प्रोच्य॒ प्रजि॑घाय।

परे॑हि।

प्ल॒क्षं दय्या॑म्पातिं पृच्छ।

वेत्थ॑ सावि॒त्रा ३ न्न वे॒त्था ३ इति॑।

तमा॒गत्य॑ पप्रच्छ।

आ॒चार्यो॑ मा॒ प्राहै॑षीत्।

वेत्थ॑ सावि॒त्रा ३ न्न वे॒त्था ३ इति॑।

स हो॑वाच॒ वेदेति॑॥ ३॥

((vṛ́ścatáśca ।
a̱tyam̐ho hārúṇiḥ ।
bra̱hma̱cā̱riṇe̎ pra̱śnānprocya̱ prajíghāya ।
paréhi ।
pla̱kṣam̱ dayyā̎mpātim̱ pṛccha ।
vetthá sāvi̱trā 3 nna ve̱tthā 3 iti̍ ।
tamā̱gatyá papraccha ।
ā̱cāryó mā̱ prāhai̍ṣīt ।
vetthá sāvi̱trā 3 nna ve̱tthā 3 iti̍ ।
sa hóvāca̱ vedeti̍ ॥ 3 ॥))

**[[3-10-9-4]]**

स क॒स्मि॒न्प्रति॑ष्ठित॒ इति॑।

प॒रोर॑ज॒सीति॑।

कस्तद्यत्प॒रोर॑जा॒ इति॑।

ए॒ष वाव स प॒रोर॑जा॒ इति॑ होवाच।

य ए॒ष तप॑ति।

ए॒षो॑ऽर्वाग्र॑जा॒ इति॑।

स क॒स्मि॑न्त्वे॒ष इति॑।

स॒त्य इति॑।

कि॒ं तत्स॒त्यमिति॑।

त॒प॒ इति॑॥ ४॥

((sa kasmi̱npratiṣṭhita̱ iti̍ ।
pa̱rorája̱sīti̍ ।
kastadyatpa̱rorájā̱ iti̍ ।
e̱ṣa vāva sa pa̱rorájā̱ iti̍ hovāca ।
ya e̱ṣa tapáti ।
e̱ṣo̎'rvāgrájā̱ iti̍ ।
sa kasmíntve̱ṣa iti̍ ।
sa̱tya iti̍ ।
kiṃ tatsa̱tyamiti̍ ।
tapa̱ iti̍ ॥ 4 ॥))

**[[3-10-9-5]]**

कस्मि॒न्नु तप॒ इति॑।

बल॒ इति॑।

किं तद्बल॒मिति॑।

प्रा॒ण इति॑।

मा स्म॑ प्रा॒णमति॑ पृच्छ॒ इति॑ माऽऽचा॒र्यो॑ऽब्रवी॒दिति॑

होवाच ब्रह्मचा॒री।

स हो॑वाच प्ल॒क्षो दय्या॑म्पातिः।

यद्वै ब्र॑ह्मचारिन्प्रा॒णमत्य॑प्रक्ष्यः।

मू॒र्धा ते॒ व्यप॑तिष्यत्।

अ॒हमु॑त आचा॒र्या॒च्छ्रेया॑न्भविष्यामि।

यो मा॑ सावि॒त्रे स॒मवा॑दि॒ष्टेति॑॥ ५॥

((kasmi̱nnu tapa̱ iti̍ ।
bala̱ iti̍ ।
kiṃ tadbala̱miti̍ ।
prā̱ṇa iti̍ ।
mā smá prā̱ṇamati̍ pṛccha̱ iti̍ mā''cā̱ryo̎'bravī̱diti̍
hovāca brahmacā̱rī ।
sa hóvāca pla̱kṣo dayyā̎mpātiḥ ।
yadvai bráhmacārinprā̱ṇamatyáprakṣyaḥ ।
mū̱rdhā te̱ vyapátiṣyat ।
a̱hamúta ācā̱ryācchreyā̎nbhaviṣyāmi ।
yo má sāvi̱tre sa̱mavádi̱ṣṭeti̍ ॥ 5 ॥))

**[[3-10-9-6]]**

तस्मा॑त्सावि॒त्रे न संव॑देत।

स यो ह॒ वै सा॑वि॒त्रं वि॒दुषा॑ सावि॒त्रे सं॒वद॑ते।

सहा॑स्मि॒ञ्छ्रियं॑ दधाति।

अनु॑ ह॒ वा अ॑स्मा अ॒सौ तप॒ञ्छ्रियं॑ मन्यते।

अन्व॑स्मै श्रीस्तपो॑ मन्यते।

अन्व॑स्मै॒ तपो॒ बलं॑ मन्यते।

अन्व॑स्मै बलं॑ प्रा॒णं म॑न्यते।
स य॒दाह॑।
सं॒ज्ञानं॑ वि॒ज्ञानं॑ दर्शा᳚द्दृ॒ष्टेति॑।
ए॒ष ए॒व तत्॥ ६॥

((tasmā᳚tsāvi̱tre na saṃva̍deta |
sa yo ha̱ vai sa̍vi̱traṃ vi̱duṣa̍ sāvi̱tre saṃvada̍te |
saha̍smi̱ñchriyaṃ̍ dadhāti |
anu̍ ha̱ vā a̍smā a̱sau tapañchriyaṃ̍ manyate |
anva̍smai̱ śrīstapo̍ manyate |
anva̍smai̱ tapo̱ balaṃ̍ manyate |
anva̍smai̱ balaṃ̍ prā̱ṇaṃ ma̍nyate |
sa yadāha̍ |
saṃjñānaṃ̍ vi̱jñānaṃ̱ darśa᳚dṛ̱ṣṭeti̍ |
e̱ṣa e̱va tat || 6 ||))

**[[3-10-9-7]]**

अथ॒ यदाह॑।
प्रस्तु॑तं॒ विष्टु॑त॒ꣳ सु॒ता सुन्व॒तीति॑।
ए॒ष ए॒व तत्।
ए॒ष ह्ये॑व तान्यहा॑नि।
ए॒ष रात्र॑यः।
अथ॒ यदाह॑।
चि॒त्रः के॒तुर्दा॒ता प्र॑दा॒ता स॑वि॒ता
प्र॑सवि॒ताऽभि॑शा॒स्ताऽनु॑म॒न्तेति॑।
ए॒ष ए॒व तत्।
ए॒ष ह्ये॑व तेऽह्नो॑ मुहू॒र्ताः।
ए॒ष रात्रेः᳚॥ ७॥

((atha̱ yadāha̍ |
prastu̍taṃ̱ viṣṭu̍taꣳ su̱tā su̍nva̱tīti̍ |
e̱ṣa e̱va tat |
e̱ṣa hye̍va tānyaha̍ni |
e̱ṣa rātra̍yaḥ |
atha̱ yadāha̍ |
ci̱traḥ ke̱turdā̱tā pra̍dā̱tā sa̍vi̱tā
pra̍savi̱tā'bhi̍śā̱stā'nu̍ma̱nteti̍ |
e̱ṣa e̱va tat |
e̱ṣa hye̍va te'hno̍ muhū̱rtāḥ |
e̱ṣa rātre᳚ḥ || 7 ||))

**[[3-10-9-8]]**

अथ॒ यदाह॑।
प॒वित्रं॑ पवयि॒ष्यन्त्सह॑स्वा॒न्त्सही॑यानरु॒णो॑ऽरु॒णर॑जा॒ इति॑।
ए॒ष ए॒व तत्।
ए॒ष ह्ये॑व ते᳚ऽर्धमा॒साः।
ए॒ष मा॒साः᳚।
अथ॒ यदाह॑।
अ॒ग्नि॒ष्टो॒म उ॒क्थ्यो᳚ऽग्निर्ऋ॒तुः प्र॒जाप॑तिः संवत्स॒र इति॑।
ए॒ष ए॒व तत्।
ए॒ष ह्ये॑व ते य॑ज्ञक्र॒तव॑ः।
ए॒ष ऋ॒तव॑ः।

((atha̱ yadāha̍ |
pa̱vitraṃ̍
pavayi̱ṣyantsaha̍svā̱ntsahī̍yānaru̱ṇo̍'ru̱ṇara̍jā̱ iti̍ |
e̱ṣa e̱va tat |
e̱ṣa hye̍va te᳚'rdhamā̱sāḥ |
e̱ṣa māsā᳚ḥ |
atha̱ yadāha̍ |
a̱gni̱ṣṭo̱ma u̱kthyo᳚'gnirṛ̱tuḥ pra̱jāpa̍tiḥ saṃvats̱ara iti̍ |
e̱ṣa e̱va tat |
e̱ṣa hye̍va te ya̍jñakra̱tava̍ḥ |
e̱ṣa ṛ̱tava̍ḥ |))

**[[3-10-9-9]]**

ए॒ष सं॑वत्स॒रः।
अथ॒ यदाह॑।
इ॒दानीं᳚ त॒दानी॒मिति॑।
ए॒ष ए॒व तत्।
ए॒ष ह्ये॑व ते मु॑हू॒र्ताना᳚ं मुहू॒र्ताः।
ज॒नको॑ ह॒ वैदे॑हः।
अ॒हो॒रा॒त्रैः स॒माज॑गाम।
तꣳ हो॑चुः।
यो वा अ॒स्मान्वेद॑।
वि॒जह॑त्पा॒प्मान॑मेति॥ ९॥

((e̱ṣa sa̍ṃvats̱araḥ |
atha̱ yadāha̍ |
i̱dānī᳚m ta̱dānī̱miti̍ |
e̱ṣa e̱va tat |
e̱ṣa hye̍va te mu̍hū̱rtānā᳚m muhū̱rtāḥ |
ja̱nako ha̱ vaide̍haḥ |
a̱ho̱rā̱traiḥ sa̱māja̍gāma |
taꣳ ho̍cuḥ |
yo vā a̱smānveda̍ |
vijaha̍tpā̱pmāna̍meti || 9 ||))

**[[3-10-9-10]]**

स॒र्व॑मायु॑रेति।
अ॒भि स्व॒र्गं लो॒कं ज॑यति।

नास्यामुष्मिँल्लो॒केऽन्नं॑ क्षीयत॒ इति॑।
वि॒जह॑द्ध॒ वै पा॒प्मान॑मेति।
सर्व॒मायु॑रेति।
अ॒भि स्व॒र्गं लो॒कं ज॑यति।
नास्या॒मुष्मिँल्लो॒केऽन्नं॑ क्षीयते।
य ए॒वं वेद॑।
अही॑ना॒ हाश्व॑थ्यः।
सा॒वि॒त्रं वि॒दांच॑कार॥ १०॥

((sarva̱māyu̍reti |
a̱bhi sva̱rgaṃ lo̱kaṃ ja̍yati |
nāsyā̱muṣmim̐llo̱ke'nnaṃ̍ kṣīyata̱ iti̍ |
vijaha̍ddha̱ vai pā̱pmāna̍meti |
sarva̱māyu̍reti |
a̱bhi sva̱rgaṃ lo̱kaṃ ja̍yati |
nāsyā̱muṣmim̐llo̱ke'nnaṃ̍ kṣīyate |
ya e̱vaṃ veda̍ |
ahī̍nā̱ hāśva̍thyaḥ |
sā̱vi̱traṃ vi̱dāṃca̍kāra || 10 ||))

**[[3-10-9-11]]**
स ह॑ ह॒ꣳसो हि॑र॒ण्मयो॑ भू॒त्वा।
स्व॒र्गं लो॒कमि॑याय।
आ॒दि॒त्यस्य॒ सायु॑ज्यम्।
ह॒ꣳसो ह॒ वै हि॑र॒ण्मयो॑ भू॒त्वा।
स्व॒र्गं लो॒कमे॑ति।
आ॒दि॒त्यस्य॒ सायु॑ज्यम्।
य ए॒वं वेद॑।
दे॒व॒भा॒गो ह॑ श्रौत॒र्षः।
सा॒वि॒त्रं वि॒दांच॑कार।
तꣳ ह॒ वाग॒दृश्य॑मा॒नाऽभ्यु॑वाच॥ ११॥

((sa ha̍ ha̱m̐so hi̍ra̱ṇmayo̍ bhū̱tvā |
sva̱rgaṃ lo̱kami̍yāya |
ā̱di̱tyasya̱ sāyu̍jyam |
ha̱m̐so ha̱ vai hi̍ra̱ṇmayo̍ bhū̱tvā |
sva̱rgaṃ lo̱kame̍ti |
ā̱di̱tyasya̱ sāyu̍jyam |
ya e̱vaṃ veda̍ |
de̱va̱bhā̱go ha̍ śrauta̱rṣaḥ |
sā̱vi̱traṃ vi̱dāṃca̍kāra |
tam̐ ha̱ vāga̱dṛśya̍mā̱nā'bhyu̍vāca || 11 ||))

**[[3-10-9-12]]**
सर्वं॑ बत गौत॒मो वेद॑।
यः सा॑वि॒त्रं वेदेति॑।
स हो॑वाच।
कैषा वाग॒सीति॑।
अ॒यम॒हꣳ सा॑वि॒त्रः।
दे॒वाना॑मुत्त॒मो लो॒कः।
गुह्यं॑ महो॒ बिभ्र॒दिति॑।
ए॒तावा॑ति ह गौत॒मः।
य॒ज्ञो॒प॒वी॒तं कृ॒त्वाऽधो निप॑पात।
नमो॒ नम॒ इति॑॥ १२॥

((sarvaṃ̍ bata gauta̱mo veda̍ |
yaḥ sā̍vi̱traṃ vedeti̍ |
sa ho̍vāca |
kaiṣā vāga̱sīti̍ |
a̱yama̱ham̐ sā̍vi̱traḥ |
de̱vānā̍mutta̱mo lo̱kaḥ |
guhya̱ṃ maho̱ bibhra̱diti̍ |
e̱tāva̍ti ha gauta̱maḥ |
ya̱jño̱pa̱vī̱taṃ kṛ̱tvā'dho nipa̍pāta |
namo̱ nama̱ iti̍ || 12 ||))

**[[3-10-9-13]]**
स हो॑वाच।
मा भै॑षीर्गौ॑तम।
जि॒तो वै ते॑ लो॒क इति॑।
तस्मा॒द्ये के च॑ सावि॒त्रं वि॒दुः।
सर्वे॒ ते जि॒तलो॑काः।
स यो ह॒ वै सा॑वि॒त्रस्या॒ष्टा॒क्ष॑रं प॒दꣳ श्रि॒याऽभिषि॑क्तं॒ वेद॑।
श्रि॒या है॒वाभिषि॑च्यते।
घृ॒णि॒रि॒ति॒ द्वे अ॒क्षरे॑।
सूर्य॒ इति॒ त्रीणि॑।
आ॒दि॒त्य इति॒ त्रीणि॑॥ १३॥

((sa ho̍vāca |
mā bhai̍ṣīrgautama |
ji̱to vai te̍ lo̱ka iti̍ |
tasmā̱dye ke ca̍ sāvi̱traṃ vi̱duḥ |
sarve̱ te ji̱talo̍kāḥ |
sa yo ha̱ vai sā̍vi̱trasyā̱ṣṭā̱kṣa̍raṃ pa̱dam̐
śri̱yā'bhiṣikta̱ṃ veda̍ |
śri̱yā ha̱ivābhiṣi̍cyate |
ghṛ̱ṇi̱riti̱ dve a̱kṣare̍ |
sūrya̱ iti̱ trīṇi̍ |
ā̱di̱tya iti̱ trīṇi̍ || 13 ||))

**[[3-10-9-14]]**

ए॒तद्वै सा॑वि॒त्रस्या॒ष्टाक्ष॑रं प॒दꣳ श्रि॒याऽभिषि॑क्तम्।
य ए॒वं वेद॑।
श्रि॒या है॒वाभिषि॑च्यते।
तदे॒तदृ॒चाऽभ्यु॑क्तम्।
ऋ॒चो अ॒क्षरे॑ पर॒मे व्यो॑मन्।
यस्मि॑न्दे॒वा अधि॒ विश्वे॑ निषे॒दुः।
यस्तं न वे॒द किमृ॒चा क॑रिष्यति।
य इत्तद्वि॒दुस्त इ॒मे समा॑सत॒ इति॑।
न ह॒ वा ए॒तस्य॒र्चा न यजु॑षा॒ न साम्नाऽर्थो॑ऽस्ति।
यः सा॑वि॒त्रं वेद॑॥ १४॥

((e̱tadvai sȧvi̱trasyā̱ṣṭākṣȧraṃ pa̱daꣳ śri̱yā'bhiṣi̍ktam ।
ya e̱vaṃ veda̍ ।
śri̱yā ha̱ivābhiṣi̍cyate ।
tade̱tadṛ̱cā'bhyu̍ktam ।
ṛ̱co a̱kṣare̍ para̱me vyo̍man ।
yasmi̍nde̱vā adhi̱ viśve̍ niṣe̱duḥ ।
yastaṃ na ve̱da kimṛ̱cā ka̍riṣyati ।
ya ittadvi̱dusta i̱me samȧsata̱ iti̍ ।
na ha̱ vā e̱tasya̱rcā na yaju̍ṣā̱ na sāmnā'rtho̍'sti ।
yaḥ sȧvi̱traṃ veda̍ ॥ 14 ॥))

**[[3-10-9-15]]**
तदे॒तत्परि॒ यद्दे॑वच॒क्रम्।
आ॒र्द्रं पिन्व॑मानꣳ स्व॒र्गे लो॒क ए॑ति।
वि॒जह॒द्विश्वा॑ भू॒तानि॑ सं॒पश्य॑त्।
आ॒र्द्रो ह॒ वै पिन्व॑मानः स्व॒र्गे लो॒क ए॑ति।
वि॒जह॒न्विश्वा॑ भू॒तानि॑ सं॒पश्य॑न्।
य ए॒वं वेद॑।
शू॒षो ह॒ वै वा॑र्ष्णे॒यः।
आ॒दि॒त्येन॑ स॒माज॑गाम।
तꣳ हो॑वाच।
एहि॑ सावि॒त्रं वि॑द्धि।
अ॒यं वै स्व॒र्ग्यो॑ऽग्निः।
पा॑रयि॒ष्णुर॒मृता॒त्संभू॑त॒ इति॑।
ए॒ष वाव स सा॑वि॒त्रः।
य ए॒ष तप॑ति।
एहि॒ मां वि॑द्धि।
इति॑ है॒वैन॒ं तदु॑वाच॥ १५॥

((tade̱tatpȧri̱ yadde̍vaca̱kram ।
ā̱rdraṃ pinva̍mānaꣳ sva̱rge lo̱ka e̍ti ।
vi̱jaha̱dviśva̍ bhū̱tāni̍ sa̱ṃpaśya̍t ।
ā̱rdro ha̱ vai pinva̍mānaḥ sva̱rge lo̱ka e̍ti ।
vi̱jaha̱nviśva̍ bhū̱tāni̍ sa̱ṃpaśya̍n ।
ya e̱vaṃ veda̍ ।
śū̱ṣo ha̱ vai vā̍rṣṇe̱yaḥ ।
ā̱di̱tyena̍ sa̱mājȧgāma ।
taꣳ ho̍vāca ।
ehi̍ sāvi̱traṃ vi̍ddhi ।
a̱yaṃ vai sva̱rgyo̍'gniḥ ।
pȧrayi̱ṣṇura̱mṛtā̱tsaṃbhu̍ta̱ iti̍ ।
e̱ṣa vāva sa sȧvi̱traḥ ।
ya e̱ṣa tapa̍ti ।
ehi̱ māṃ vi̍ddhi ।
iti̍ ha̱ivainaṃ tadu̍vāca ॥ 15 ॥
dyato̱ dyato̱ vedeti̱ tapa̱ iti̍ sa̱mavȧdi̱ṣṭeti̱ tadrātrerṛ̱tava̍ eti cakārovāca̱ nama̱ ityādi̱tya iti̱ trīṇi̍ sāvi̱traṃ veda̍ viddhi̱ pañca̍ ca ॥ 9 ॥
pra̱jāpa̍tirde̱vāntsa̱ṃjñāna̱ṃ prastu̍ta̱ṃ tānyahā̍nye̱ṣa rātra̍yaści̱traḥ ke̱tuste'hno̍ muhū̱rtā rātre̍ḥ pa̱vitra̱ṃ te̍'rdhamāsā a̍gniṣṭo̱mā ya̍jñakra̱tava̍ i̱dānī̱ṃ muhū̱rtānā̱ṃ jana̱ko'hi̍nā devabhā̱gaḥ kaiṣā vāṅmā śū̱ṣo ha̱ vai ṣoḍa̍śa ॥))

द्यतो॒ द्यतो॒ वेदेति॒ तप॒ इति॑ स॒मवा॑दि॒ष्टेति॒ तद्रात्रेर्ऋ॒तव॑ एति चकारोवाच॒ नम॒ इत्यादि॒त्य इति॒ त्रीणि॑ सावि॒त्रं वेद॑ विद्धि॒ पञ्च॑ च॥ ९॥
प्र॒जाप॑तिर्दे॒वान्त्सं॒ज्ञान॒ं प्रस्तु॑त॒ं तान्यहा॑न्ये॒ष रात्र॑यश्चि॒त्रः के॒तुस्तेऽह्नो॑ मुहू॒र्ता रात्रे॑ः प॒वित्र॒ं ते॑ऽर्धमासा अ॑ग्निष्टो॒मा य॑ज्ञक्र॒तव॑ इ॒दानी॒ं मुहू॒र्ताना॒ं जन॒कोऽही॑ना देवभा॒गः कैषा वाङ्मा शू॒षो ह॒ वै षोड॑श॥

**[[3-10-10-1]]**
इ॒यं वाव स॒रघा॑।
तस्या॑ अ॒ग्निरे॒व सा॑र॒घं मधु॑।
या ए॒ताः पू॑र्वपक्षापरप॒क्षयो॒ रात्र॑यः।
ता म॑धु॒कृत॑ः।
यान्यहा॑नि।
ते म॑धुवृ॒षाः।
स यो ह॒ वा ए॒ता म॑धु॒कृत॑श्च मधुवृ॒षाꣳश्च॒ वेद॑।
कु॒र्वन्ति॑ हास्यै॒ता अ॒ग्नौ मधु॑।
नास्ये॑ष्टापू॒र्तं ध॑यन्ति।
अथ॒ यो न वेद॑॥ १॥

((i̱yaṃ vāva sa̱raghā̍ ।
tasya̍ a̱gnire̱va sȧra̱ghaṃ madhu̍ ।
yā e̱tāḥ pū̍rvapakṣāparapa̱kṣayo̱ rātra̍yaḥ ।

tā ma̍dhu̱kṛta̍ḥ ।
yānyaha̍ni ।
te ma̍dhuvṛ̱ṣāḥ ।
sa yo ha̱ vā e̱tā ma̍dhu̱kṛta̍śca madhuvṛ̱ṣām̐śca̱ veda̍
।
ku̱rvanti̍ hāsyai̱tā a̱gnau madhu̍ ।
nāsye̱ṣṭāpū̱rtam̱ dha̍yanti ।
atha̱ yo na veda̍ ॥ 1 ॥))

**[[3-10-10-2]]**

न हा॒॑स्यै॒ता अ॒ग्नौ मधु॑ कु॒र्वन्ति।
धय॑न्त्यस्ये॒ष्टापू॒र्तम्।
यो ह॒ वा अ॑होरा॒त्राणा॒॑ नाम॒धेया॑नि॒ वेद॑।
नाहो॑रा॒त्रेष्वार्ति॒माच्र्छ॑ति।
सं॒ज्ञानं॑ वि॒ज्ञानं॒ द॒र्शा॑ दृ॒ष्टेति॑।
ए॒ताव॑नुवा॒कौ पू॑र्वप॒क्षस्या॑होरा॒त्राणा॒॑ नाम॒धेया॑नि।
प्रस्तु॒तं॑ विष्टु॒तꣳ सु॒ता सु॒न्वतीति॑।
ए॒ताव॑नुवा॒काव॑परप॒क्षस्या॑होरा॒त्राणा॒॑ नाम॒धेया॑नि।
नाहो॑रा॒त्रेष्वार्ति॒माच्र्छ॑ति।
य ए॒वं वेद॑॥ २॥

((na hā̱̍syai̱tā a̱gnau madhu̍ kurvanti ।
dhaya̍ntyasye̱ṣṭāpū̱rtam ।
yo ha̱ vā a̍horā̱trāṇā̱̍m̐ nāma̱dheyā̍ni̱ veda̍ ।
nāho̍rā̱treṣvārti̱mārccha̍ti ।
sa̱mjñāna̍ṃ vi̱jñāna̱ṃ da̱rśā̍ dṛ̱ṣṭeti̍ ।
e̱tāva̍nuvā̱kau pū̍rvapa̱kṣasyā̍horā̱trāṇā̱̍m̐
nāma̱dheyā̍ni ।
prastu̱taṃ̍ vi̱ṣṭu̱tam̐ su̱tā su̱nva̱tīti̍ ।
e̱tāva̍nuvā̱kāva̍pa̱rapakṣasyā̍horā̱trāṇā̱̍m̐
nāma̱dheyā̍ni ।
nāho̍rā̱treṣvārti̱mārccha̍ti ।
ya e̱vaṃ veda̍ ॥ 2 ॥))

**[[3-10-10-3]]**

यो ह॒ वै मु॑हू॒र्ताना॒॑ नाम॒धेया॑नि॒ वेद॑।
न मु॑हू॒र्तेष्वार्ति॒माच्र्छ॑ति।
चि॒त्रः के॒तुर्दा॒ता प्र॒दा॒ता स॑वि॒ता
प्रसवि॒ताऽभि॑शा॒स्ताऽनु॑म॒न्तेति॑।
ए॒ते॑ऽनुवा॒का मु॑हू॒र्ताना॒॑ नाम॒धेया॑नि।
न मु॑हू॒र्तेष्वार्ति॒माच्र्छ॑ति।
य ए॒वं वेद॑।
यो ह॒ वा अ॑र्धमा॒साना॒॑ च॒ मासा॑नां च नाम॒धेया॑नि॒ वेद॑।
नार्ध॑मा॒सेषु॒ न मासे॒ष्वार्ति॒माच्र्छ॑ति।
प॒वित्रं॑ पवि॒यि॒ष्यन्त्सह॑स्वा॒न्त्सही॑यानरु॒णो॑ऽरु॒णर॑जा॒ इति॑।
ए॒ते॑ऽनुवा॒का अ॑र्धमा॒साना॒॑ च॒ मासा॑नां च नाम॒धेया॑नि॥
३॥

((yo ha̱ vai mu̍hū̱rtānā̍m̱ nāma̱dheyā̍ni̱ veda̍ ।
na mu̍hū̱rteṣvārti̱mārccha̍ti ।
ci̱traḥ ke̱turdā̱tā pra̍dā̱tā sa̍vi̱tā
prasavi̱tā'bhi̍śā̱stā'nu̍ma̱nteti̍ ।
e̱te̍'nuvā̱kā mu̍hū̱rtānā̱̍m̐ nāma̱dheyā̍ni ।
na mu̍hū̱rteṣvārti̱mārccha̍ti ।
ya e̱vaṃ veda̍ ।
yo ha̱ vā a̍rdhamā̱sānā̱̍m̐ ca̱ māsā̍nāṃ ca
nāma̱dheyā̍ni̱ veda̍ ।
nārdha̍mā̱seṣu̱ na māse̱ṣvārti̱mārccha̍ti ।
pa̱vitra̍ṃ
paviyi̱ṣyantsaha̍svā̱ntsahī̍yānaru̱ṇo̍'ru̱nara̍jā̱ iti̍ ।
e̱te̍'nuvā̱kā a̍rdhamā̱sānā̱̍m̐ ca̱ māsā̍nāṃ ca
nāma̱dheyā̍ni ॥ 3 ॥))

**[[3-10-10-4]]**

नार्ध॑म॒सेषु॒ न मासे॒ष्वार्ति॒माच्र्छ॑ति।
य ए॒वं वेद॑।
यो ह॒ वै य॑ज्ञक्र॒तूनां॒ च॑र्तू॒नां च॑ संवत्स॒रस्य॑ च नाम॒धेया॑नि॒
वेद॑।
न य॑ज्ञक्र॒तुषु॒ न॑र्तु॒षु न सं॑वत्स॒र आर्ति॒माच्र्छ॑ति।
अ॒ग्नि॒ष्टो॒म उ॒क्थ्यो॑ऽग्निर्ऋ॒तुः प्र॒जाप॑तिः संवत्स॒र इति॑।
ए॒ते॑ऽनुवा॒का य॑ज्ञक्र॒तूनां॒ च॑र्तू॒नां च॑ संवत्स॒रस्य॑ च
नाम॒धेया॑नि।
न य॑ज्ञक्र॒तुषु॒ न॑र्तु॒षु न सं॑वत्स॒र आर्ति॒माच्र्छ॑ति।
य ए॒वं वेद॑।
यो ह॒ वै मु॑हू॒र्ताना॒॑ मु॒हू॒र्तान्वेद॑।
न मु॑हू॒र्ताना॒॑ मु॒हू॒र्तेष्वार्ति॒माच्र्छ॑ति।
इ॒दानीं॑ त॒दानी॒मिति॑।
ए॒ते वै मु॑हू॒र्ताना॒॑ मु॒हू॒र्ताः।
न मु॑हू॒र्ताना॒॑ मु॒हू॒र्तेष्वार्ति॒माच्र्छ॑ति।
य ए॒वं वेद॑।
अथो॒ यथा॑ क्षेत्र॒ज्ञो भू॒त्वाऽनु॒प्रवि॑श्या॒न्नमत्ति॑।
ए॒वमे॒वैतान्क्षे॑त्र॒ज्ञो भू॒त्वाऽनु॒प्रवि॑श्या॒न्नमत्ति।
स ए॒तेषा॑मेव स॑लो॒कता॒ꣳ सायु॑ज्यमश्नुते।
अप॑ पुनर्मृ॒त्युं ज॑यति।
य ए॒वं वेद॑॥ ४॥
न वे॒दै॒वं वेदा॑नुवा॒का अ॑र्धमा॒साना॒॑ च॒ मासा॑नां च
नाम॒धेया॑नि मु॒हू॒र्तेष्वार्ति॒माच्र्छ॑ति॒ नव॑ च॥ १०॥

इ॒यम॑होरा॒त्राणा॒ꣳ॒ सं॒ज्ञान॑ं पू॒र्वप॑क्षस्य॒ प्रस्तु॑तमपरप॒क्षस्य॑
मु॒हू॒र्ताना॑ँ चि॒त्रः के॒तुर॑र्धमा॒साना॑ँ प॒वित्र॑ं
य॒ज्ञक्र॒तू॒नाम॑ग्निष्टो॒मो य॑ज्ञक्रतू॒नामि॒दानी॑ँ मु॒हू॒र्ताना॑ँ
मु॒हू॒र्तान्वे॒दे॒दानी॒मथो॒ द्वाद॑श॥

((nārdhámaseṣu na māseṣvārtimārcchati ।
ya evaṃ vedá ।
yo ha vai yájñakratūnāṃ cártūnāṃ cá
saṃvatsarasyá ca nāmadheyāni vedá ।
na yájñakratuṣu nartuṣu na saṃvatsara
ārtimārcchati ।
agniṣṭoma ukthyo'gnirṛtuḥ prajāpatiḥ saṃvatsara iti
।
eté'nuvākā yájñakratūnāṃ cártūnāṃ cá
saṃvatsarasyá ca nāmadheyāni ।
na yájñakratuṣu nartuṣu na saṃvatsara
ārtimārcchati ।
ya evaṃ vedá ।
yo ha vai múhūrtānāṃ muhūrtānvedá ।
na múhūrtānāṃ muhūrteṣvārtimārcchati ।
idānīṃ tadānīmiti ।
ete vai múhūrtānāṃ muhūrtāḥ ।
na múhūrtānāṃ muhūrteṣvārtimārcchati ।
ya evaṃ vedá ।
atho yathā kṣetrajño bhūtvā'núpraviśyānnamatti ।
evamevaitānkṣetrajño bhūtvā'núpraviśyānnámatti ।
sa eteṣāmeva sálokatāṃ sāyújyamaśnute ।
apá punarmṛtyuṃ jáyati ।
ya evaṃ vedá ॥ 4 ॥
na vedaivaṃ vedānuvākā árdhamāsānāṃ ca
māsānāṃ ca nāmadheyāni muhūrteṣvārtimārcchati
navá ca ॥ 10 ॥
iyamáhorātrāṇāṃ saṃjñānaṃ pūrvapakṣasya
prastútamaparapakṣasyá muhūrtānāṃ citraḥ
keturárdhamāsānāṃ pavitraṃ
yajñakratūnāmágniṣṭomo yájñakratūnāmidānīṃ
muhūrtānāṃ muhūrtānvededānīmatho dvādáśa ॥))

**[[3-10-11-1]]**

क॒श्चि॒द्ध॒ वा अ॒स्माल्लो॒कात्प्रेत्य॑।
आ॒त्मान॑ं वेद।
आ॒यम॒हम॒स्मीति॑।
क॒श्चि॒त्स्वं लो॒कं न प्र॒तिप्रजा॑नाति।
अ॒ग्निर्मु॑ग्धो है॒व धू॒मता॑न्तः।
स्वं लो॒कं न प्र॒तिप्रजा॑नाति।
अथ॒ यो है॒वैतम॒ग्निꣳ॑ सा॑वि॒त्रं वेद॑।
स ए॒वास्माल्लो॒कात्प्रेत्य॑।
आ॒त्मान॑ं वेद।
अ॒यम॒हम॒स्मीति॑॥ १॥

((kaściddha vā asmāllokātpretyá ।
ātmānaṃ veda ।
āyamahamasmīti ।
kaścitsvaṃ lokaṃ na pratiprajānāti ।
agnimúgdho haiva dhūmatāntaḥ ।
svaṃ lokaṃ na pratiprajānāti ।
atha yo haivaitamagniṃ sāvitraṃ vedá ।
sa evāsmāllokātpretyá ।
ātmānaṃ veda ।
ayamahamasmīti ॥ 1 ॥))

**[[3-10-11-2]]**

स स्वं लो॒कं प्र॒तिप्रजा॑नाति।
ए॒ष उ॑ वे॒वैन॑ं तत्सा॑वि॒त्रः।
स्व॒र्गं लो॒कम॒भिव॑हति।
अ॒हो॒रा॒त्रैर्वा॑ इ॒दꣳ स॒युग्भि॑ः क्रियते।
इ॒ति॒रा॒त्राया॑दीक्षिषत।
इ॒ति॒रा॒त्राय॑ व्र॒तमुपा॑गु॒रिति॑।
तानि॒हाने॑वंवि॒दुष॑ः।
अ॒मुष्मि॑ँल्लो॒के शे॑व॒धिं ध॑यन्ति।
धी॒तꣳ है॒व स शे॑व॒धिमनु॒ परै॑ति।
अथ॒ यो है॒वैतम॒ग्निꣳ सा॑वि॒त्रं वेद॑॥ १॥

((sa svaṃ lokaṃ pratiprajānāti ।
eṣa ú vevainaṃ tatsāvitraḥ ।
svargaṃ lokamabhiváhati ।
ahorātrairvā idaṃ sayugbhiḥ kriyate ।
itirātrāyádīkṣiṣata ।
itirātrāyá vratamupāguriti ।
tānihānévaṃviduṣáḥ ।
amuṣmiṃlloke śévadhiṃ dháyanti ।
dhītaṃ haiva sa śévadhimanu paraíti ।
atha yo haivaitamagniṃ sāvitraṃ vedá ॥ 1 ॥))

**[[3-10-11-3]]**

तस्य॑ है॒वाहो॑रा॒त्राणि॑।
अ॒मुष्मि॑ँल्लो॒के शे॑व॒धिं न ध॑यन्ति।
अधी॑तꣳ है॒व स शे॑व॒धिमनु॒ परै॑ति।
भ॒रद्वा॑जो ह त्रि॒भिरायु॑र्भि॒र्ब्रह्म॒चर्य॑मुवास।
तꣳ ह॒ जीर्णि॒ꣳ॒ स्थवि॑र॒ꣳ॒ शया॑नम्।
इन्द्र॑ उप॒व्रज्यो॑वाच।
भर॑द्वाज।
यत्ते॑ चतु॒र्थमायु॑र्द॒द्याम्।
किमे॑नेन कु॒र्या॒ इति॑।
ब्र॒ह्म॒चर्य॑मे॒वैने॑न चरे॒यमिति॑ होवाच॥ ३॥

((tasya̍ ha̱ivāho̍rātrā̱ṇi̍ |
a̱muṣmi̍m̐llo̱ke śe̍va̱dhiṃ na dha̍yanti |
adhi̍taṁ̐ ha̱iva sa śe̍va̱dhimanu̱ para̍iti |
bha̱radvā̍jo ha tri̱bhirāyu̍rbhirbrahma̱carya̍muvāsa |
taṁ̐ ha̱ jīrṇi̱ṁ̐ sthavi̍ra̱ṁ̐ śaya̍nam |
indra̍ upa̱vrajyo̍vāca |
bhara̍dvāja |
yatte̍ catu̱rthamāyu̍rda̱dyām |
kime̍nena kuryā̱ iti̍ |
bra̱hma̱carya̍me̱vaine̍na careya̱miti̍ hovāca || 3 ||))

**[[3-10-11-4]]**

तꣳ ह॒ त्रीन्गि॒रिरू॑पा॒नवि॑ज्ञातानिव द॒र्श॒यांच॑कार।
तेषा॒ꣳ॒ है॒कै॑कस्मान्मु॒ष्टिनाऽऽद॑दे।
स हो॑वाच।
भर॑द्वाजेत्या॒मन्त्र्य॑।
वेदा॒ वा ए॒ते।
अ॒न॒न्ता वै वेदाः॑।
ए॒तद्वा ए॒तैस्त्रि॒भिरायु॑र्भि॒रन्व॑वोचथाः।
अथ॑ त॒ इत॑र॒दन॑नूक्तमे॒व।
एही॒मं वि॑द्धि।
अ॒यं वै स॑र्ववि॒द्येति॑॥ ४॥

((taṁ̐ ha̱ trīngi̱riru̍pā̱navi̍jñātāniva darśa̱yāṃca̍kāra |
te̱ṣā̱ṁ̐ haikai̍kasmānmu̱ṣṭinā''da̍de |
sa ho̍vāca |
bhara̍dvājetyā̱mantrya̍ |
vedā̱ vā e̱te |
a̱na̱ntā vai vedā̍ḥ |
e̱tadvā e̱taistri̱bhirāyu̍rbhi̱ranva̍vocathāḥ |
atha̍ ta̱ ita̍ra̱dana̍nūktame̱va |
ehī̱maṃ vi̍ddhi |
a̱yaṃ vai sa̍rvavi̱dyeti̍ || 4 ||))

**[[3-10-11-5]]**

तस्मै॑ है॒तम॒ग्निꣳ सा॑वि॒त्रमु॑वाच।
तꣳ स वि॑दि॒त्वा।
अ॒मृतो॑ भू॒त्वा।
स्व॒र्गं लो॒कमि॑याय।
आ॒दि॒त्यस्य॒ सायु॑ज्यम्।
अ॒मृतो॑ है॒व भू॒त्वा।
स्व॒र्गं लो॒कमे॑ति।
आ॒दि॒त्यस्य॒ सायु॑ज्यम्।
य ए॒वं वेद॑।
ए॒षो ए॒व त्रयी॑ वि॒द्या॥ ५॥

((tasmai̍ ha̱itama̱gniṁ̐ sā̍vi̱tramu̍vāca |
taṁ̐ sa vi̍di̱tvā |
a̱mṛto̍ bhū̱tvā |
sva̱rgaṃ lo̱kami̍yāya |
ā̱di̱tyasya̱ sāyu̍jyam |
a̱mṛto̍ ha̱iva bhū̱tvā |
sva̱rgaṃ lo̱kame̍ti |
ā̱di̱tyasya̱ sāyu̍jyam |
ya e̱vaṃ veda̍ |
e̱ṣo e̱va trayī̍ vi̱dyā || 5 ||))

**[[3-10-11-6]]**

याव॑न्तꣳ ह॒ वै त्र॒य्या वि॒द्यया॑ लो॒कं ज॑यति।
ताव॑न्तं लो॒कं ज॑यति।
य ए॒वं वेद॑।
अ॒ग्नेर्वा ए॒तानि॑ नाम॒धेया॑नि।
अ॒ग्नेरे॒व सायु॑ज्यꣳ सलो॒कता॑माप्नोति।
य ए॒वं वेद॑।
वा॒योर्वा ए॒तानि॑ नाम॒धेया॑नि।
वा॒योरे॒व सायु॑ज्यꣳ सलो॒कता॑माप्नोति।
य ए॒वं वेद॑।
इन्द्र॑स्य॒ वा ए॒तानि॑ नाम॒धेया॑नि॥ ६॥

((yāva̍ntaṁ̐ ha̱ vai tra̱yyā vi̱dyayā̍ lo̱kaṃ ja̍yati |
tāva̍ntaṃ lo̱kaṃ ja̍yati |
ya e̱vaṃ veda̍ |
a̱gnervā e̱tāni̍ nāma̱dheyā̍ni |
a̱gnere̱va sāyu̍jyaṁ̐ salo̱katā̍māpnoti |
ya e̱vaṃ veda̍ |
vā̱yorvā e̱tāni̍ nāma̱dheyā̍ni |
vā̱yore̱va sāyu̍jyaṁ̐ salo̱katā̍māpnoti |
ya e̱vaṃ veda̍ |
indra̍sya̱ vā e̱tāni̍ nāma̱dheyā̍ni || 6 ||))

**[[3-10-11-7]]**

इन्द्र॑स्यै॒व सायु॑ज्यꣳ सलो॒कता॑माप्नोति।
य ए॒वं वेद॑।
बृ॒हस्पते॒र्वा ए॒तानि॑ नाम॒धेया॑नि।
बृ॒हस्पते॒रे॒व सायु॑ज्यꣳ सलो॒कता॑माप्नोति।
य ए॒वं वेद॑।
प्र॒जाप॑ते॒र्वा ए॒तानि॑ नाम॒धेया॑नि।
प्र॒जाप॑ते॒रे॒व सायु॑ज्यꣳ सलो॒कता॑माप्नोति।
य ए॒वं वेद॑।

ब्रह्म॑णो॒ वा ए॒तानि॑ नाम॒धेया॑नि।
ब्रह्म॑ण ए॒व सायु॑ज्यꣳ सलो॒कता॑माप्नोति।
य ए॒वं वेद॑।
स वा ए॒षो᳚ऽग्निर॑पक्षपु॒च्छो वा॒युरे॒व।
तस्या॒ग्निर्मुखँ᳚म्।
अ॒सावा॑दि॒त्यः शिर॑ः।
स यदे॒ते दे॒वते॒ अन्त॑रेण।
त॒त्सर्व॑ꣳ सीव्यति।
तस्मा॑त्सावि॒त्रः॥ ७॥
अ॒यम॒हम॒स्मीति॒ वेद॑ होवाच सर्ववि॒द्येति॑ वि॒द्येन्द्र॑स्य॒ वा
ए॒तानि॑ नाम॒धेया॑नि॒ ब्रह्म॑ण ए॒व सायु॑ज्यꣳ
सलो॒कता॑माप्नोति स॒प्त च॑॥ ११॥
अ॒ग्नेर्वा॒योरिन्द्र॑स्य॒ बृह॒स्पते᳚ः प्र॒जाप॑ते॒र्ब्रह्म॑णः॒ वै स॒प्त॥
सं॒ज्ञानं॒ भूस्त्वमे॒व सं॑वत्स॒रो॑सि॒ भू राज्ञ्यस॑वे विप॒श्चिते᳚
प्र॒जाप॑तिर्दे॒वानि॒यं वाव स॒रघा॒ कश्चि॒द्धैका॑दश॥ ११॥
सं॒ज्ञान॒ꣳ॒ राज्ञी॑ मूर्धा हृद॑य ए॒ष सं॑वत्स॒रो नार्ध॑मा॒से॒षु॒
नव॑चत्वारिꣳशत्॥ ४९॥

((indrásyaịva sāyújyam̐ salọkatā́māpnoti ।
ya ẹvaṃ vedá ।
bṛhạspatẹrvā ẹtānị́ nāmạdheyā́ni ।
bṛhạspatérẹva sāyújyam̐ salọkatā́māpnoti ।
ya ẹvaṃ vedá ।
prạjāpátẹrvā ẹtānị́ nāmạdheyā́ni ।
prạjāpátereva sāyújyam̐ salọkatā́māpnoti ।
ya ẹvaṃ vedá ।
brahmáṇọ vā ẹtānị́ nāmạdheyā́ni ।
brahmáṇa ẹva sāyújyam̐ salọkatā́māpnoti ।
ya ẹvaṃ vedá ।
sa vā ẹṣö'gnirápakṣapụccho vāyurẹva ।
tasyāgnirmukhä̀m ।
ạsāvā́dịtyaḥ śiráḥ ।
sa yadẹte dẹvatẹ antáreṇa ।
tạtsarvam̐ sīvyati ।
tasmā́tsāvịtraḥ ॥ 7 ॥
ạyamạhamạsmītị vedá hovāca sarvavịdyetị́
vịdyendrásyạ vā ẹtānị́ nāmạdheyā́nị brahmáṇa ẹva
sāyújyam̐ salọkatā́māpnoti sạpta cá ॥ 11 ॥
ạgnervāyorindrásyạ bṛhạspatë́ḥ
prạjāpátẹrbrahmáṇạḥ vai sạpta ॥
saṃjñānaṃ bhūstvamẹva saṃ́vatsạrósị bhū
rājñyasáve vipạścitë́ prạjāpátirdẹvānịyaṃ vāva
sạraghā kaścịddhaikā́daśa ॥ 11 ॥
saṃjñānạm̐ rājñī́ mūrdhā hṛdáya ẹṣa saṃ́vatsạro
nārdhámāsẹṣụ navácatvārim̐śat ॥ 49 ॥))

# Taittirīya-Brāhmaṇa

# Book 3, Chapter 11

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[3-11-1-1]]**

लो॒को॑ऽसि स्व॒र्गो॑ऽसि।

अ॒न॒न्तो᳚ऽस्यपा॒रो॑ऽसि।

अक्षि॑तोऽस्यक्ष॒य्यो॑ऽसि।

तप॑सः प्रति॒ष्ठा।

त्वयी॒दम॒न्तः।

विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्वꣳ॑ सु॒भूत॑म्।

विश्व॑स्य भ॒र्ता विश्व॑स्य जन॒यिता।

तं त्वोप॑दधे काम॒दुघ॒मक्षि॑तम्।

प्र॒जाप॑तिस्त्वा सादयतु।

तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ १॥

((lo̱ko̍'si sva̱rgo̍'si ।
a̱na̱nto̎'syapā̱ro'si ।
akṣi̍to'syakṣa̱yyo̍'si ।
tapa̍saḥ prati̱ṣṭhā ।
tvayī̱dama̱ntaḥ ।
viśva̍ṃ ya̱kṣaṃ viśva̍ṃ bhū̱taṃ viśva̍ṃ̐ subhū̱tam ।
viśva̍sya bha̱rtā viśva̍sya janayi̱tā ।
taṃ tvopa̍dadhe kāma̱dugha̱makṣi̍tam ।
pra̱jāpa̍tistvā sādayatu ।
taya̍ de̱vataya̍'ṅgira̱svaddhru̱vā sī̍da ॥ 1 ॥))

**[[3-11-1-2]]**

तपो॑ऽसि लो॒के श्रि॒तम्।

तेज॑सः प्रति॒ष्ठा।

त्वयी॒दम॒न्तः।

विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्वꣳ॑ सु॒भूत॑म्।

विश्व॑स्य भ॒र्तृ विश्व॑स्य जन॒यितृ।

तत्त्वोप॑दधे काम॒दुघ॒मक्षि॑तम्।

प्र॒जाप॑तिस्त्वा सादयतु।

तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ २॥

((tapo̍'si lo̱ke śri̱tam ।
teja̍saḥ prati̱ṣṭhā ।
tvayī̱dama̱ntaḥ ।
viśva̍ṃ ya̱kṣaṃ viśva̍ṃ bhū̱taṃ viśva̍ṃ̐ subhū̱tam ।
viśva̍sya bha̱rtṛ viśva̍sya janayi̱tṛ ।
tattvopa̍dadhe kāma̱dugha̱makṣi̍tam ।
pra̱jāpa̍tistvā sādayatu ।
taya̍ de̱vata̍yā'ṅgira̱svaddhru̱vā sī̍da ॥ 2 ॥))

**[[3-11-1-3]]**

तेजो॑ऽसि॒ तप॑सि श्रि॒तम्।

स॒मु॒द्रस्य॑ प्रति॒ष्ठा।

त्वयी॒दम॒न्तः।

विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्वꣳ॑ सु॒भूत॑म्।

विश्व॑स्य भ॒र्तृ विश्व॑स्य जन॒यितृ।

तत्त्वोप॑दधे काम॒दुघ॒मक्षि॑तम्।

प्र॒जाप॑तिस्त्वा सादयतु।

तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ ३॥

((tejo̍'si̱ tapa̍si śri̱tam ।
sa̱mu̱drasya̍ prati̱ṣṭhā ।
tvayī̱dama̱ntaḥ ।
viśva̍ṃ ya̱kṣaṃ viśva̍ṃ bhū̱taṃ viśva̍ṃ̐ subhū̱tam ।
viśva̍sya bha̱rtṛ viśva̍sya janayi̱tṛ ।
tattvopa̍dadhe kāma̱dugha̱makṣi̍tam।
pra̱jāpa̍tistvā sādayatu ।
taya̍ de̱vata̍yā'ṅgira̱svaddhru̱vā sī̍da ॥ 3 ॥))

**[[3-11-1-4]]**

स॒मु॒द्रो॑ऽसि॒ तेज॑सि श्रि॒तः।

अ॒पां प्र॑ति॒ष्ठा।

त्वयी॒दम॒न्तः।

विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्वꣳ॑ सु॒भूत॑म्।

विश्व॑स्य भ॒र्ता विश्व॑स्य जन॒यिता।

तं त्वोप॑दधे काम॒दुघ॒मक्षि॑तम्।

प्र॒जाप॑तिस्त्वा सादयतु।

तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ ४॥

((sa̱mu̱dro̍'si̱ teja̍si śri̱taḥ ।
a̱pāṃ pra̍ti̱ṣṭhā ।
tvayī̱dama̱ntaḥ ।
viśva̍ṃ ya̱kṣaṃ viśva̍ṃ bhū̱taṃ viśva̍ṃ̐ subhū̱tam ।
viśva̍sya bha̱rtā viśva̍sya janayi̱tā ।
taṃ tvopa̍dadhe kāma̱dugha̱makṣi̍tam ।
pra̱jāpa̍tistvā sādayatu ।
taya̍ de̱vata̍yā'ṅgira̱svaddhru̱vā sī̍da ॥ 4 ॥))

**[[3-11-1-5]]**

आप॑ः स्थ समु॒द्रे श्रि॒ताः।

पृ॒थि॒व्याः प्र॑ति॒ष्ठा यु॒ष्मासु॑।

इ॒दम॒न्तः।
विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्व॑ꣳ सु॒भूत॑म्।
विश्व॑स्य भ॒र्त्र्यौ॑ विश्व॑स्य जन॒यित्र्यः॑।
ता व॒ उप॑दधे काम॒दुघा॒ अक्षि॑ताः।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ ५॥

((āpaḥ stha samudre śritāḥ |
pṛthivyāḥ pratiṣṭhā yuṣmāsu |
idamantaḥ |
viśvaṃ yakṣaṃ viśvaṃ bhūtaṃ viśvaṁ subhūtam |
viśvasya bhartryo viśvasya janayitryaḥ |
tā va upadadhe kāmadughā akṣitāḥ |
prajāpatistvā sādayatu |
tayā devatayā'ṅgirasvaddhruvā sīda || 5 ||))

**[[3-11-1-6]]**

पृ॒थि॒व्य॑स्य॒प्सु श्रि॒ता।
अ॒ग्नेः प्र॑ति॒ष्ठा।
त्वयी॒दम॒न्तः।
विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्व॑ꣳ सु॒भूत॑म्।
विश्व॑स्य भ॒र्त्री विश्व॑स्य जन॒यित्री।
तां त्वोप॑दधे काम॒दुघा॒मक्षि॑ताम्।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ ६॥

((pṛthivyasyapsu śritā |
agneḥ pratiṣṭhā |
tvayīdamantaḥ |
viśvaṃ yakṣaṃ viśvaṃ bhūtaṃ viśvaṁ subhūtam |
viśvasya bhartrī viśvasya janayitrī |
tāṃ tvopadadhe kāmadughāmakṣitām |
prajāpatistvā sādayatu |
tayā devatayā'ṅgirasvaddhruvā sīda || 6 ||))

**[[3-11-1-7]]**

अ॒ग्निर॑सि पृथि॒व्याꣳ श्रि॒तः।
अ॒न्तरि॑क्षस्य प्रति॒ष्ठा।
त्वयी॒दम॒न्तः।
विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्व॑ꣳ सु॒भूत॑म्।
विश्व॑स्य भ॒र्ता विश्व॑स्य जन॒यिता।
तं त्वोप॑दधे काम॒दु॒घमक्षि॑तम्।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ ७॥

((agnirasi pṛthivyāṁ śritaḥ |
antarikṣasya pratiṣṭhā |
tvayīdamantaḥ |
viśvaṃ yakṣaṃ viśvaṃ bhūtaṃ viśvaṁ subhūtam |
viśvasya bhartā viśvasya janayitā |
taṃ tvopadadhe kāmadughamakṣitam |
prajāpatistvā sādayatu |
tayā devatayā'ṅgirasvaddhruvā sīda || 7 ||))

**[[3-11-1-8]]**

अ॒न्तरि॑क्षमस्य॒ग्नौ श्रि॒तम्।
वा॒योः प्र॑ति॒ष्ठा।
त्वयी॒दम॒न्तः।
विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्व॑ꣳ सु॒भूत॑म्।
विश्व॑स्य भ॒र्तृ विश्व॑स्य जन॒यितृ।
तत्त्वोप॑दधे काम॒दु॒घमक्षि॑तम्।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ ८॥

((antarikṣamasyagnau śritam |
vāyoḥ pratiṣṭhā |
tvayīdamantaḥ |
viśvaṃ yakṣaṃ viśvaṃ bhūtaṃ viśvaṁ subhūtam |
viśvasya bhartṛ viśvasya janayitṛ |
tattvopadadhe kāmadughamakṣitam |
prajāpatistvā sādayatu |
tayā devatayā'ṅgirasvaddhruvā sīda || 8 ||))

**[[3-11-1-9]]**

वा॒युर॑स्य॒न्तरि॑क्षे श्रि॒तः।
दि॒वः प्र॑ति॒ष्ठा।
त्वयी॒दम॒न्तः।
विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्व॑ꣳ सु॒भूत॑म्।
विश्व॑स्य भ॒र्ता विश्व॑स्य जन॒यिता।
तं त्वोप॑दधे काम॒दु॒घमक्षि॑तम्।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ ९॥

((vāyurasyantarikṣe śritaḥ |
divaḥ pratiṣṭhā |
tvayīdamantaḥ |
viśvaṃ yakṣaṃ viśvaṃ bhūtaṃ viśvaṁ subhūtam |
viśvasya bhartā viśvasya janayitā |
taṃ tvopadadhe kāmadughamakṣitam |
prajāpatistvā sādayatu |

tayá dḙvatáyā'ṅgirḁsvaddhrḁvā sída || 9 ||))

**[[3-11-1-10]]**
द्यौर॑सि वा॒यौ श्रि॒ता।
आ॒दि॒त्यस्य॑ प्रति॒ष्ठा।
त्वयी॒द॒मन्तः।
विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्वꣳ॑ सु॒भूतम्।
विश्व॑स्य भ॒र्त्री विश्व॑स्य जनयि॒त्री।
तं त्वोप॑दधे काम॒दु॒घमक्षि॑तम्।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गि॒रस्वद्ध्रु॒वा सी॑द॥ १०॥

((dyaurási vāyau śrḁtā |
āḁdityasyá pratiḁṣṭhā |
tvayīdamḁntaḥ |
viśvaṃ yḁkṣaṃ viśvaṃ bhūtaṃ viśvaṁ subhūtam |
viśvásya bhḁrtrī viśvásya janayḁtrī |
taṃ tvopádadhe kāmḁdughḁmakṣítam |
prḁjāpátistvā sādayatu |
tayá dḙvatáyā'ṅgirḁsvaddhrḁvā sída || 10 ||))

**[[3-11-1-11]]**
आ॒दि॒त्योऽसि दि॒वि श्रि॒तः।
च॒न्द्रम॑सः प्रति॒ष्ठा।
त्वयी॒द॒मन्तः।
विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्वꣳ॑ सु॒भूतम्।
विश्व॑स्य भ॒र्ता विश्व॑स्य जनयि॒ता।
तं त्वोप॑दधे काम॒दु॒घमक्षि॑तम्।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गि॒रस्वद्ध्रु॒वा सी॑द॥ ११॥

((āḁdityó'si dḁivi śrḁtaḥ |
cḁndramásaḥ pratiḁṣṭhā |
tvayīdamḁntaḥ |
viśvaṃ yḁkṣaṃ viśvaṃ bhūtaṃ viśvaṁ subhūtam |
viśvásya bhḁrtā viśvásya janayḁtā |
taṃ tvopádadhe kāmḁdughḁmakṣítam |
prḁjāpátistvā sādayatu |
tayá dḙvatáyā'ṅgirḁsvaddhrḁvā sída || 11 ||))

**[[3-11-1-12]]**
च॒न्द्रमा॑ अस्यादि॒त्ये श्रि॒तः।
नक्ष॑त्राणां प्रति॒ष्ठा।
त्वयी॒द॒मन्तः।
विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्वꣳ॑ सु॒भूतम्।
विश्व॑स्य भ॒र्ता विश्व॑स्य जनयि॒ता।
तं त्वोप॑दधे काम॒दु॒घमक्षि॑तम्।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गि॒रस्वद्ध्रु॒वा सी॑द॥ १२॥

((cḁndramá asyādḁitye śrḁtaḥ |
nakṣátrāṇāṃ pratiḁṣṭhā |
tvayīdamḁntaḥ |
viśvaṃ yḁkṣaṃ viśvaṃ bhūtaṃ viśvaṁ subhūtam |
viśvásya bhḁrtā viśvásya janayḁtā |
taṃ tvopádadhe kāmḁdughḁmakṣítam |
prḁjāpátistvā sādayatu |
tayá dḙvatáyā'ṅgirḁsvaddhrḁvā sída || 12 ||))

**[[3-11-1-13]]**
नक्ष॑त्राणि स्थ च॒न्द्रम॑सि श्रि॒तानि॑।
सं॒व॒त्स॒रस्य॑ प्रति॒ष्ठा यु॒ष्मासु॑।
इ॒द॒मन्तः।
विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्वꣳ॑ सु॒भूतम्।
विश्व॑स्य भ॒र्तॄणि॒ विश्व॑स्य जनयि॒तॄणि॑।
तानि॑ व॒ उप॑दधे काम॒दु॒घान्यक्षि॑तानि।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गि॒रस्वद्ध्रु॒वा सी॑द॥ १३॥

((nakṣátrāṇi stha cḁndramási śrḁtāní |
saṃvḁtsḁrasyá pratiḁṣṭhā yḁṣmāsú |
iḁdamḁntaḥ |
viśvaṃ yḁkṣaṃ viśvaṃ bhūtaṃ viśvaṁ subhūtam |
viśvásya bhḁrtṝṇi viśvásya janayḁtṝṇí |
tāní vḁ upádadhe kāmḁdughḁnyakṣítāni |
prḁjāpátistvā sādayatu |
tayá dḙvatáyā'ṅgirḁsvaddhrḁvā sída || 13 ||))

**[[3-11-1-14]]**
सं॒व॒त्स॒रो॑ऽसि॒ नक्ष॑त्रेषु श्रि॒तः।
ऋ॒तू॒नां प्र॑ति॒ष्ठा।
त्वयी॒द॒मन्तः।
विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्वꣳ॑ सु॒भूतम्।
विश्व॑स्य भ॒र्ता विश्व॑स्य जनयि॒ता।
तं त्वोप॑दधे काम॒दु॒घमक्षि॑तम्।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गि॒रस्वद्ध्रु॒वा सी॑द॥ १४॥

((saṃvḁtsḁró'sḁi nakṣátreṣu śrḁtaḥ |
ṛḁtūḁnāṃ prátiḁṣṭhā |

tvayī̠dama̠ntaḥ ।
viśvaṃ̍ ya̠kṣaṃ viśvaṃ̍ bhū̠taṃ viśvagͫ̍ subhū̠tam ।
viśva̍sya bha̠rtā viśva̍sya janayi̠tā ।
taṃ tvopa̍dadhe kāma̠dugha̠makṣi̍tam ।
pra̠jāpa̍tistvā sādayatu ।
taya̍ de̠vata̍yā'ṅgira̠svaddhru̠vā sī̍da ॥ 14 ॥))

**[[3-11-1-15]]**

ऋ॒तव॑ः स्थ संवत्स॒रे श्रि॒ताः ।
मासा॑नां प्रति॒ष्ठा यु॒ष्मासु॑ ।
इ॒दम॒न्तः ।
विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्वꣳ॑ सुभू॒तम् ।
विश्व॑स्य भ॒र्तारो॒ विश्व॑स्य जनयि॒तार॑ः ।
तान्व॒ उप॑दधे काम॒दुघा॒नक्षि॑तान् ।
प्र॒जाप॑तिस्त्वा सादयतु ।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द ॥ १५ ॥

((ṛ̠tava̍ḥ stha saṃvatsa̠re śri̠tāḥ ।
māsā̍nāṃ prati̠ṣṭhā yu̠ṣmāsu̍ ।
i̠dama̠ntaḥ ।
viśvaṃ̍ ya̠kṣaṃ viśvaṃ̍ bhū̠taṃ viśvagͫ̍ subhū̠tam ।
viśva̍sya bha̠rtāro̠ viśva̍sya janayi̠tāra̍ḥ ।
tānva̠ upa̍dadhe kāma̠dughā̠nakṣi̍tān ।
pra̠jāpa̍tistvā sādayatu ।
taya̍ de̠vata̍yā'ṅgira̠svaddhru̠vā sī̍da ॥ 15 ॥))

**[[3-11-1-16]]**

मासा॑ः स्थ॒र्तुषु॑ श्रि॒ताः ।
अ॒र्ध॒मा॒साना॑ं प्रति॒ष्ठा यु॒ष्मासु॑ ।
इ॒दम॒न्तः ।
विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्वꣳ॑ सुभू॒तम् ।
विश्व॑स्य भ॒र्तारो॒ विश्व॑स्य जनयि॒तार॑ः ।
तान्व॒ उप॑दधे काम॒दुघा॒नक्षि॑तान् ।
प्र॒जाप॑तिस्त्वा सादयतु ।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द ॥ १६ ॥

((māsā̍ḥ stha̠rtuṣu̍ śri̠tāḥ ।
a̠rdha̠mā̠sānā̍ṃ prati̠ṣṭhā yu̠ṣmāsu̍ ।
i̠dama̠ntaḥ ।
viśvaṃ̍ ya̠kṣaṃ viśvaṃ̍ bhū̠taṃ viśvagͫ̍ subhū̠tam ।
viśva̍sya bha̠rtāro̠ viśva̍sya janayi̠tāra̍ḥ ।
tānva̠ upa̍dadhe kāma̠dughā̠nakṣi̍tān ।
pra̠jāpa̍tistvā sādayatu ।
taya̍ de̠vata̍yā'ṅgira̠svaddhru̠vā sī̍da ॥ 16 ॥))

**[[3-11-1-17]]**

अ॒र्ध॒मा॒साः स्थ॑ मा॒सु श्रि॒ताः ।
अ॒हो॒रा॒त्रयो॑ः प्रति॒ष्ठा यु॒ष्मासु॑ ।
इ॒दम॒न्तः ।
विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्वꣳ॑ सुभू॒तम् ।
विश्व॑स्य भ॒र्तारो॒ विश्व॑स्य जनयि॒तार॑ः ।
तान्व॒ उप॑दधे काम॒दुघा॒नक्षि॑तान् ।
प्र॒जाप॑तिस्त्वा सादयतु ।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द ॥ १७ ॥

((a̠rdha̠mā̠sāḥ stha̍ mā̠su śri̠tāḥ ।
a̠ho̠rā̠trayo̍ḥ prati̠ṣṭhā yu̠ṣmāsu̍ ।
i̠dama̠ntaḥ ।
viśvaṃ̍ ya̠kṣaṃ viśvaṃ̍ bhū̠taṃ viśvagͫ̍ subhū̠tam ।
viśva̍sya bha̠rtāro̠ viśva̍sya janayi̠tāra̍ḥ ।
tānva̠ upa̍dadhe kāma̠dughā̠nakṣi̍tān ।
pra̠jāpa̍tistvā sādayatu ।
taya̍ de̠vata̍yā'ṅgira̠svaddhru̠vā sī̍da ॥ 17 ॥))

**[[3-11-1-18]]**

अ॒हो॒रा॒त्रे स्थो॑ऽर्धमा॒सेषु॑ श्रि॒ते ।
भू॒तस्य॑ प्रति॒ष्ठे भव्य॑स्य प्रति॒ष्ठे ।
यु॒वयो॑रि॒दम॒न्तः ।
विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्वꣳ॑ सुभू॒तम् ।
विश्व॑स्य भ॒र्त्र्यौ॑ विश्व॑स्य जनयि॒त्र्यौ॑ ।
ते वा॒मुप॑दधे काम॒दुघे॒ अक्षि॑ते ।
प्र॒जाप॑तिस्त्वा सादयतु ।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द ॥ १८ ॥

((a̠ho̠rā̠tre stho̍'rdhamā̠seṣu̍ śri̠te ।
bhū̠tasya̍ prati̠ṣṭhe bhavya̍sya prati̠ṣṭhe ।
yu̠vayo̍ri̠dama̠ntaḥ ।
viśvaṃ̍ ya̠kṣaṃ viśvaṃ̍ bhū̠taṃ viśvagͫ̍ subhū̠tam ।
viśva̍sya bha̠rtryau̍ viśva̍sya janayi̠tryau̍ ।
te vā̠mupa̍dadhe kāma̠dughe̠ akṣi̍te ।
pra̠jāpa̍tistvā sādayatu ।
taya̍ de̠vata̍yā'ṅgira̠svaddhru̠vā sī̍da ॥ 18 ॥))

**[[3-11-1-19]]**

पौ॒र्ण॒मा॒स्य॑ष्ट॒काऽमा॑वा॒स्या॑ः ।
अ॒न्ना॒दाः स्था॑न्न॒दुघो॑ यु॒ष्मासु॑ ।
इ॒दम॒न्तः ।
विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्वꣳ॑ सुभू॒तम् ।
विश्व॑स्य भ॒र्त्र्यो॑ विश्व॑स्य जनयि॒त्र्य॑ः ।
ता व॒ उप॑दधे काम॒दुघा॒ अक्षि॑ताः ।

प्रजापतिस्त्वा सादयतु।
तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद॥ १९॥

((pau̱rṇa̱mā̱syaṣṭa̍kā'māvā̱syā̎ |
a̱nnā̱dāḥ sthā̎nna̱dugho̍ yu̱ṣmāsu̍ |
i̱dama̱ntaḥ |
viśva̍ṃ ya̱kṣaṃ viśva̍ṃ bhū̱taṃ viśva̍ṃ̐ subhū̱tam |
viśva̍sya bha̱rtryo̍ viśva̍sya jana̱yi̱trya̍ḥ |
tā va̱ upa̍dadhe kāma̱dughā̱ akṣi̍tāḥ |
pra̱jāpa̍tistvā sādayatu |
taya̍ de̱vata̍yā'ṅgira̱svaddhru̱vā sī̍da || 19 ||))

**[[3-11-1-20]]**

राडसि बृहती श्रीरसीन्द्रपत्नी धर्मपत्नी।
विश्वं भूतमनुप्रभूता।
त्वयीदमन्तः।
विश्वं यक्षं विश्वं भूतं विश्वꣳ सुभूतम्।
विश्वस्य भर्त्री विश्वस्य जनयित्री।
तां त्वोपदधे कामदुघामक्षिताम्।
प्रजापतिस्त्वा सादयतु।
तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद॥ २०॥

((rā̱ḍa̍si bṛ̱ha̱tī śrīra̱sīndra̍patnī dharma̍patnī |
viśva̍ṃ bhū̱tamanu̱prabhū̍tā |
tvayī̱dama̱ntaḥ |
viśva̍ṃ ya̱kṣaṃ viśva̍ṃ bhū̱taṃ viśva̍ṃ̐ subhū̱tam |
viśva̍sya bha̱rtrī viśva̍sya jana̱yi̱trī |
tāṃ tvopa̍dadhe kāma̱dughā̱makṣi̍tām |
pra̱jāpa̍tistvā sādayatu |
taya̍ de̱vata̍yā'ṅgira̱svaddhru̱vā sī̍da || 20 ||))

**[[3-11-1-21]]**

ओजोऽसि सहोऽसि।
बलमसि भ्राजोऽसि।
देवानां धामामृतम्।
अमर्त्यस्तपोजाः।
त्वयीदमन्तः।
विश्वं यक्षं विश्वं भूतं विश्वꣳ सुभूतम्।
विश्वस्य भर्ता विश्वस्य जनयिता।
तं त्वोपदधे कामदुघमक्षितम्।
प्रजापतिस्त्वा सादयतु।
तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद॥ २१॥
लोकस्तपस्तेजः समुद्र आपः पृथिव्यग्निरन्तरिक्षं
वायुर्द्यौरादित्यश्चन्द्रमा नक्षत्राणि संवत्सर ऋतवो मासा
अर्धमासा अहोरात्रे पौर्णमासी
राडस्योजोस्येकविꣳशतिः॥ १॥
लोकोऽसि भर्ता तम्।
तपस्तेजोऽसि भर्तृ तत्।
समुद्रोऽसि भर्ता तम्।
आपः स्थ भर्त्र्यस्ता वः।
पृथिवी भर्त्री ताम्।
अग्निरसि भर्ता तम्।
अन्तरिक्षं भर्तृ तत्।
वायुरसि भर्ता तम्।
द्यौरसि भर्त्री ताम्।
आदित्यश्चन्द्रमा भर्ता तम्।
नक्षत्राणि स्थ भर्तृणि तानि वः।
संवत्सरोसि भर्ता तम्।
ऋतवो मासा अर्धमासा भर्तारस्तान् वः।
अहोरात्रे भर्त्र्यौ ते वाम्।
पौर्णमासी भर्त्र्यस्ता वः।
राडसि भर्त्री ताम्।
ओजोऽसि भर्ता तमेकविꣳशतिः॥

((ojo̍'si̱ saho̍'si |
bala̍masi̱ bhrājo̍'si |
de̱vānā̱ṃ dhāmā̱mṛta̎m |
ama̍rtyastapo̱jāḥ |
tvayī̱dama̱ntaḥ |
viśva̍ṃ ya̱kṣaṃ viśva̍ṃ bhū̱taṃ viśva̍ṃ̐ subhū̱tam |
viśva̍sya bha̱rtā viśva̍sya jana̱yi̱tā |
taṃ tvopa̍dadhe kāma̱dugha̱makṣi̍tam |
pra̱jāpa̍tistvā sādayatu |
taya̍ de̱vata̍yā'ṅgira̱svaddhru̱vā sī̍da || 21 ||
lo̱kastapa̱stejaḥ̍ sa̱mu̱dra āpa̍ḥ
pṛ̱thi̱vya̍gnira̱ntari̍kṣaṃ
vā̱yurdyaurā̍di̱tyaśca̱ndramā̱ nakṣa̍trāṇi̱ saṃvatsa̱ra
ṛ̱tavo̱ māsā̍ ardhamā̱sā a̍horā̱tre pau̍rṇamā̱sī
rāḍa̱syojo̱syekā̍viṃ̐śatiḥ || 1 ||
lo̱ko̍'si bha̱rtā tam |
tapa̱stejo̍'si bha̱rtṛ tat |
sa̱mu̱dro̍'si bha̱rtā tam |
āpa̍ḥ stha bha̱trya̍stā va̍ḥ |
pṛ̱thi̱vī bha̱rtrī tām |
a̱gnira̍si bha̱rtā tam |
a̱ntari̍kṣaṃ bha̱rtṛ tat |
vā̱yura̍si bha̱rtā tam |
dyaura̍si bha̱rtrī tām |
ā̱di̱tyaśca̱ndramā̍ bha̱rtā tam |))

nakṣatrāṇi stha bhaṭṝṇi tāni vaḥ |
saṃvatsarosi bhartā tam |
ṛtavo māsā ardhamāsā bhartārastān vaḥ |
ahorātre bhartryau te vā̐m |
paurṇamāsī bhartryastā vaḥ |
rādasi bhartrī tām |
ojo'si bhartā tamekaviṃ̐śatiḥ ||))

**[[3-11-2-1]]**

त्वमग्ने रुद्रो असुरो महो दिवः।
त्वꣳ शर्धो मारुतं पृक्ष ईशिषे।
त्वं वातैररुणैर्यासि शङ्गयः।
त्वं पूषा विधतः पासि नु त्मना॑।
देवा देवेषु श्रयध्वम्।
प्रथमा द्वितीयेषु श्रयध्वम्।
द्वितीयास्तृतीयेषु श्रयध्वम्।
तृतीयाश्चतुर्थेषु श्रयध्वम्।
चतुर्थाः पञ्चमेषु श्रयध्वम्।
पञ्चमाः षष्ठेषु श्रयध्वम्॥ १॥

((tvamagne rudro asuro maho divaḥ |
tvaṃ̐ śardho mārutaṃ pṛkṣa īśiṣe |
tvaṃ vātairaruṇairyāsi śaṅgayaḥ |
tvaṃ pūṣā vidhataḥ pāsi nu tmanā̐ |
devā deveṣu śrayadhvam |
prathamā dvitīyeṣu śrayadhvam |
dvitīyāstṛtīyeṣu śrayadhvam |
tṛtīyāścaturtheṣu śrayadhvam |
caturthāḥ pañcameṣu śrayadhvam |
pañcamāḥ ṣaṣṭheṣu śrayadhvam || 1 ||))

**[[3-11-2-2]]**

षष्ठाः सप्तमेषु श्रयध्वम्।
सप्तमा अष्टमेषु श्रयध्वम्।
अष्टमा नवमेषु श्रयध्वम्।
नवमा दशमेषु श्रयध्वम्।
दशमा एकादशेषु श्रयध्वम्।
एकादशा द्वादशेषु श्रयध्वम्।
द्वादशास्त्रयोदशेषु श्रयध्वम्।
त्रयोदशाश्चतुर्दशेषु श्रयध्वम्।
चतुर्दशाः पञ्चदशेषु श्रयध्वम्।
पञ्चदशाः षोडशेषु श्रयध्वम्॥ २॥

((ṣaṣṭhāḥ saptameṣu śrayadhvam |
saptamā aṣṭameṣu śrayadhvam |
aṣṭamā navameṣu śrayadhvam |
navamā daśameṣu śrayadhvam |
daśamā ekādaśeṣu śrayadhvam |
ekādaśā dvādaśeṣu śrayadhvam |
dvādaśāstrayodaśeṣu śrayadhvam |
trayodaśāścaturdaśeṣu śrayadhvam |
caturdaśāḥ pañcadaśeṣu śrayadhvam |
pañcadaśāḥ ṣoḍaśeṣu śrayadhvam || 2 ||))

**[[3-11-2-3]]**

षोडशाः सप्तदशेषु श्रयध्वम्।
सप्तदशा अष्टादशेषु श्रयध्वम्।
अष्टादशा एकान्नविꣳशेषु श्रयध्वम्।
एकान्नविꣳशा विꣳशेषु श्रयध्वम्।
विꣳशा एकविꣳशेषु श्रयध्वम्।
एकविꣳशा द्वाविꣳशेषु श्रयध्वम्।
द्वाविꣳशास्त्रयोविꣳशेषु श्रयध्वम्।
त्रयोविꣳशाश्चतुर्विꣳशेषु श्रयध्वम्।
चतुर्विꣳशाः पञ्चविꣳशेषु श्रयध्वम्।
पञ्चविꣳशाः षड्विꣳशेषु श्रयध्वम्॥ ३॥

((ṣoḍaśāḥ saptadaśeṣu śrayadhvam |
saptadaśā aṣṭādaśeṣu śrayadhvam |
aṣṭādaśā ekānnaviṃ̐śeṣu śrayadhvam |
ekānnaviṃ̐śā viṃ̐śeṣu śrayadhvam |
viṃ̐śā ekaviṃ̐śeṣu śrayadhvam |
ekaviṃ̐śā dvāviṃ̐śeṣu śrayadhvam |
dvāviṃ̐śāstrayoviṃ̐śeṣu śrayadhvam |
trayoviṃ̐śāścaturviṃ̐śeṣu śrayadhvam |
caturviṃ̐śāḥ pañcaviṃ̐śeṣu śrayadhvam |
pañcaviṃ̐śāḥ ṣaḍviṃ̐śeṣu śrayadhvam || 3 ||))

**[[3-11-2-4]]**

षड्विꣳशाः सप्तविꣳशेषु श्रयध्वम्।
सप्तविꣳशा अष्टाविꣳशेषु श्रयध्वम्।
अष्टाविꣳशा एकान्नत्रिꣳशेषु श्रयध्वम्।
एकान्नत्रिꣳशास्त्रिꣳशेषु श्रयध्वम्।
त्रिꣳशा एकत्रिꣳशेषु श्रयध्वम्।
एकत्रिꣳशा द्वात्रिꣳशेषु श्रयध्वम्।
द्वात्रिꣳशास्त्रयस्त्रिꣳशेषु श्रयध्वम्।
देवास्त्रिरेकादशास्त्रिस्त्रयस्त्रिꣳशाः।
उत्तरे भवत।
उत्तरवर्त्मान उत्तरसत्वानः।
यत्काम इदं जुहोमि।

तन्मे॒ समृ॑द्ध्यताम्।
व॒यꣳ स्या॑म॒ पत॑यो रयी॒णाम्।
भूर्भु॒वः स्वः॑ स्वाहा᳚॥ ४॥
ष॒ष्ठेषु॑ श्रयध्वꣳ षोड॒शेषु॑ श्रयध्वꣳषड्वि॒ꣳ॒शेषु॑
श्रयध्व॒मुत्त॑रसत्वानश्च॒त्वारि॑ च॥ २॥

((ṣa̱ḍvi̱m̐śāḥ sa̍ptavi̱m̐śeṣu̍ śrayadhvam I
sa̱pta̱vi̱m̐śā a̍ṣṭā̱vi̱m̐śeṣu̍ śrayadhvam I
a̱ṣṭā̱vi̱m̐śā e̍kānnatri̱m̐śeṣu̍ śrayadhvam I
e̱kā̱nna̱tri̱m̐śāstri̱m̐śeṣu̍ śrayadhvam I
tri̱m̐śā e̍katri̱m̐śeṣu̍ śrayadhvam I
e̱ka̱tri̱m̐śā dvā̎tri̱m̐śeṣu̍ śrayadhvam I
dvā̱tri̱m̐śāstra̍yastri̱m̐śeṣu̍ śrayadhvam I
de̱vā̎strirekāda̱śā̱stristra̍yastri̱m̐śāḥ I
utta̍re bhavata I
utta̍ravartmāna̱ utta̍rasatvānaḥ I
yatkā̍ma i̱daṃ ju̱homi̍ I
tanme̱ samṛ̍ddhyatām I
va̱yam̐̎ syā̍ma̱ pata̍yo rayī̱ṇām I
bhūrbhuva̱ḥ sva̍ḥ svāhā̎ II 4 II
ṣa̱ṣṭhe̱ṣu̍ śrayadhvam̐ ṣo̱ḍa̱śe̱ṣu̍
śrayadhvam̐ṣa̱ḍvi̱m̐śe̱ṣu̍
śrayadhva̱mutta̍rasatvānaśca̱tvāri̍ ca II 2 II))

**[[3-11-3-1]]**
अ॒ग्नावि॑ष्णू स॒जोष॑सा।
इ॒मा व॑र्धन्तु वां॒ गिर॑ः।
द्यु॒म्नैर्वाजे॑भि॒राग॑तम्।
राज्ञी॑ वि॒राज्ञी᳚।
स॒म्राज्ञी᳚ स्व॒राज्ञी᳚।
अ॒र्चिः शो॒चिः।
तपो॒ हरो॒ भाः।
अ॒ग्निः सोमो॒ बृह॒स्पति॑ः।
विश्वे॑ दे॒वा भुव॑नस्य गो॒पाः।
ते सर्वे॑ स॒ंगत्य॑।
इ॒दं मे॒ प्राव॑ता॒ वच॑ः।
व॒यꣳ स्या॑म॒ पत॑यो रयी॒णाम्।
भूर्भु॒वः स्वः॑ स्वाहा᳚॥ १॥
स॒ंगत्य॒ त्रीणि॑ च॥ ३॥

((agnā̎viṣṇū sa̱joṣa̍sā I
i̱mā va̍rdhantu vā̱ṃ gira̍ḥ I
dyu̱mnairvāje̍bhi̱rāga̍tam I
rājñī̍ vi̱rājñī̎ I
sa̱mrājñī̎ sva̱rājñī̎ I
a̱rciḥ śo̱ciḥ I
tapo̱ haro̱ bhāḥ I
a̱gniḥ somo̱ bṛha̱spati̍ḥ I
viśve̍ de̱vā bhuva̍nasya go̱pāḥ I
te sarve̍ sa̱ṃgatya̍ I
i̱daṃ me̱ prāva̍tā̱ vaca̍ḥ I
va̱yam̐̎ syā̍ma̱ pata̍yo rayī̱ṇām I
bhūrbhuva̱ḥ sva̍ḥ svāhā̎ II 1 II
sa̱ṃgatya̱ trīṇi̍ ca II 3 II))

**[[3-11-4-1]]**
अन्न॑पते॒ऽन्नस्य॑ नो देहि।
अ॒न॒मी॒वस्य॑ शु॒ष्मिण॑ः।
प्र प्र॑दा॒तारं॑ तारिषः।
ऊर्जं॑ नो धेहि द्वि॒पदे॒ चतु॑ष्पदे।
अग्ने॑ पृथिवीपते।
सोम॑ वीरुधां पते।
त्वष्ट॑ः समिधां पते।
विष्ण॑वाशानां पते।
मित्र॑ सत्यानां पते।
वरु॑ण धर्मणां पते॥ १॥

((annā̍pa̱te'nnā̍sya no dehi I
a̱na̱mī̱vasya̍ śu̱ṣmiṇa̍ḥ I
pra pra̍dā̱tāra̍ṃ tāriṣaḥ I
ūrja̍ṃ no dhehi dvi̱pade̱ catu̍ṣpade I
agne̍ pṛthivīpate I
soma̍ vīrudhāṃ pate I
tvaṣṭa̍ḥ samidhāṃ pate I
viṣṇa̍vāśānāṃ pate I
mitra̍ satyānāṃ pate I
varu̍ṇa dharmaṇāṃ pate II 1 II))

**[[3-11-4-2]]**
म॒रुतो॑ गणानां पतयः।
रुद्र॑ पशूनां पते।
इन्द्रौ॑जसां पते।
बृह॒स्पते ब्रह्मणस्पते।
आ रु॒चा रो॑चे॒ऽहꣳ स्व॒यम्।
रु॒चा रु॑रु॒चे रोच॑मानः।
अ॒तीत्यादः स्व॑राभ॑रे॒ह।
तस्मि॒न्योनौ᳚ प्रज॒नौ प्रजा॑येय।
व॒यꣳ स्या॑म॒ पत॑यो रयी॒णाम्।
भूर्भु॒वः स्वः॑ स्वाहा᳚॥ २॥
वरु॑ण धर्म॑णां पते॒ स्वः॑ स्वाहा᳚॥ ४॥

((ma̱ruto̍ gaṇānāṃ patayaḥ |
rudra̍ paśūnāṃ pate |
indra̍ujasāṃ pate |
bṛha̍spate brahmaṇaspate |
ā ru̱cā ro̍ce̱'ha̱gṃ sva̱yam |
ru̱cā ru̍ru̱ce roca̍mānaḥ |
a̱tītyā̱daḥ sva̍rābha̍re̱ha |
tasmi̱nyonau̍ praja̱nau prajā̍yeya |
va̱ya̱gṃ syā̍ma̱ pata̍yo rayī̱ṇām |
bhūrbhuva̱ḥ sva̍ḥ svāhā̎ || 2 ||
varu̍ṇa dharmaṇāṃ pate̱ sva̍ḥ svāhā̎ || 4 ||))

**[[3-11-5-1]]**

स॒प्त ते॑ अग्ने स॒मिध॑ः स॒प्त जि॒ह्वाः।
स॒प्तर्ष॑यः स॒प्त धाम॑ प्रि॒याणि॑।
स॒प्त होत्रा॑ अनुवि॒द्वान्।
स॒प्त योनी॒रापृ॑णस्वा घृ॒तेन॑।
प्राची॒ दिक्।
अ॒ग्निर्दे॒वता᳚।
अ॒ग्निꣳ स दि॒शां दे॒वं दे॒वता॑नामृच्छतु।
यो मै॒तस्यै॑ दि॒शो॑ऽभि॒दास॑ति।
द॒क्षि॒णा दिक्।
इन्द्रो॑ दे॒वता᳚॥ १॥

((sa̱pta te̍ agne sa̱midha̍ḥ sa̱pta ji̱hvāḥ |
sa̱ptarṣa̍yaḥ sa̱pta dhāma̍ pri̱yāṇi̍ |
sa̱pta hotra̍ anuvi̱dvān |
sa̱pta yonī̱rāpṛ̍ṇasvā ghṛ̱tena̍ |
prācī̱ dik |
a̱gnirde̱vatā̎ |
a̱gnigṃ sa di̱śāṃ de̱vaṃ de̱vata̍nāmṛcchatu |
yo ma̱itasyai̍ di̱śo̍'bhi̱dāsa̍ti |
da̱kṣi̱ṇā dik |
indro̍ de̱vatā̎ || 1 ||))

**[[3-11-5-2]]**

इन्द्र॒ꣳ स दि॒शां दे॒वं दे॒वता॑नामृच्छतु।
यो मै॒तस्यै॑ दि॒शो॑ऽभि॒दास॑ति।
प्र॒तीची॒ दिक्।
सोमो॑ दे॒वता᳚।
सोम॒ꣳ स दि॒शां दे॒वं दे॒वता॑नामृच्छतु।
यो मै॒तस्यै॑ दे॒शो॑ऽभि॒दास॑ति।
उदी॑ची॒ दिक्।
मि॒त्रावरु॑णौ दे॒वता᳚।
मि॒त्रावरु॑णौ॒ स दि॒शां दे॒वौ दे॒वता॑नामृच्छतु।
यो मै॒तस्यै॑ दि॒शो॑ऽभि॒दास॑ति॥ २॥

((indra̱gṃ sa di̱śāṃ de̱vaṃ de̱vata̍nāmṛcchatu |
yo ma̱itasyai̍ di̱śo̍'bhi̱dāsa̍ti |
pra̱tīcī̱ dik |
somo̍ de̱vatā̎ |
soma̱gṃ sa di̱śāṃ de̱vaṃ de̱vata̍nāmṛcchatu |
yo ma̱itasyai̍ de̱śo̍'bhi̱dāsa̍ti |
udi̍cī̱ dik |
mi̱trāvaru̍ṇau de̱vatā̎ |
mi̱trāvaru̍ṇa̱u sa di̱śāṃ de̱vau de̱vata̍nāmṛcchatu |
yo ma̱itasyai̍ di̱śo̍'bhi̱dāsa̍ti || 2 ||))

**[[3-11-5-3]]**

ऊ॒र्ध्वा दिक्।
बृ॒ह॒स्पति॑र्दे॒वता᳚।
बृ॒ह॒स्पति॒ꣳ स दि॒शां दे॒वं दे॒वता॑नामृच्छतु।
यो मै॒तस्यै॑ दि॒शो॑ऽभि॒दास॑ति।
इ॒यं दिक्।
अदि॑तिर्दे॒वता᳚।
अदि॑ति॒ꣳ स दि॒शां दे॒वीं दे॒वता॑नामृच्छतु।
यो मै॒तस्यै॑ दि॒शो॑ऽभि॒दास॑ति।
पुरु॑षो॒ दिक्।
पुरु॑षो मे॒ कामा॒न्त्सम॑र्धयतु॥ ३॥

((ū̱rdhvā dik |
bṛ̱ha̱spati̱rde̱vatā̎ |
bṛ̱ha̱spati̱gṃ sa di̱śāṃ de̱vaṃ de̱vata̍nāmṛcchatu |
yo ma̱itasyai̍ di̱śo̍'bhi̱dāsa̍ti |
i̱yaṃ dik |
adi̍tirde̱vatā̎ |
adi̍ti̱gṃ sa di̱śāṃ de̱vīṃ de̱vata̍nāmṛcchatu |
yo ma̱itasyai̍ di̱śo̍'bhi̱dāsa̍ti |
puru̍ṣo̱ dik |
puru̍ṣo me̱ kāmā̱ntsama̍rdhayatu || 3 ||))

**[[3-11-5-4]]**

अ॒न्धो जागृ॑विः प्राण।
अ॒सा॒वेहि॑।
ब॒धिर आ᳚क्रन्दयितरपान।
अ॒सा॒वेहि॑।
उ॒षस॑मुषसमशीय।
अ॒हमसो॒ ज्योति॑रशीय।
अ॒हमसो॒ऽपो॑ऽशीय।
व॒यꣳ स्या॑म॒ पत॑यो र॒यी॒णाम्।

भूर्भुव॒ः स्व॑ः स्वाहा᳚॥ ३॥
द॒क्षि॒णा दिगिन्द्रो॑ दे॒वता॑ मि॒त्रावरु॑णौ॒ स दि॒शां दे॒वौ दे॒वता॑नामृच्छतु॒ यो मै॒तस्यै॑ दि॒शो॑ऽभि॒दास॑त्यर्धयतु॒ नव॑ च॥ ५॥

((a̱ndho jāgṛ̍viḥ prāṇa ।
asā̱vehi̍ ।
ba̱dhi̱ra ā̎krandayitarapāna ।
asā̱vehi̍ ।
u̱ṣasa̍muṣasamaśīya ।
a̱hamaso̱ jyoti̍raśīya ।
a̱hamaso̱'po̍'śīya ।
va̱yam̐̎ syā̍ma̱ pata̍yo rayī̱ṇām ।
bhūrbhuva̱ḥ sva̍ḥ svāhā̎ ॥ 3 ॥
da̱kṣi̱ṇā digindro̍ de̱vatā̍ mi̱trāvaru̍ṇau̱ sa di̱śāṃ de̱vau de̱vatā̍nāmṛcchatu̱ yo mai̱tasyai̍ di̱śo̍'bhi̱dāsa̍tyardhayatu̱ nava̍ ca ॥ 5 ॥))

**[[3-11-6-1]]**
यत्तेऽचि॑तं॒ यदु॑ चि॒तं ते॑ अग्ने।
यत्त॑ ऊ॒नं यदु॒ तेऽति॑रिक्तम्।
आदि॒त्यास्त॒दङ्गि॑रसश्चिन्वन्तु।
विश्वे॑ ते दे॒वाश्चिति॒मापू॑रयन्तु।
चि॒तश्चासि॒ संचि॑तश्चास्यग्ने।
ए॒तावा॒ꣳ॒श्चासि॒ भूया॑ꣳश्चास्यग्ने।
लो॒कं पृ॑ण च्छि॒द्रं पृ॑ण।
अथो॑ सीद शि॒वा त्वम्।
इ॒न्द्रा॒ग्नी त्वा॒ बृह॒स्पति॑ः।
अ॒स्मिन्योना॑वसीषदन्॥ १॥

((yatte'ci̍taṃ̱ yadu̍ ci̱taṃ te̍ agne ।
yatta̍ ū̱naṃ yadu̱ te'ti̍riktam ।
ādi̱tyāsta̱daṅgi̍rasaścinvantu ।
viśve̍ te de̱vāściti̱māpū̍rayantu ।
ci̱taścāsi̱ saṃci̍taścāsyagne ।
e̱tāvā̱m̐̍ścāsi̱ bhūyām̐̍ścāsyagne ।
lo̱kaṃ pṛ̍ṇa cchi̱draṃ pṛ̍ṇa ।
atho̍ sīda śi̱vā tvam ।
i̱ndrā̱gnī tvā̱ bṛha̱spati̍ḥ ।
a̱sminyonā̍vasīṣadan ॥ 1 ॥))

**[[3-11-6-2]]**
तया॑ दे॒वत॑याऽङ्गि॒रस्वद्ध्रु॒वा सी॑द।
ता अ॑स्य॒ सूद॑दोहसः।
सोम॑ꣳ श्रीणन्ति॒ पृश्न॑यः।
जन्म॑न्दे॒वाना॒ं विश॑ः।
त्रि॒ष्वारो॑च॒ने दि॒वः।
तया॑ दे॒वत॑याऽङ्गि॒रस्वद्ध्रु॒वा सी॑द।
अग्ने॑ दे॒वाꣳ इ॒हाव॑ह।
ज॒ज्ञा॒नो वृ॒क्तब॑र्हिषे।
असि॒ होता॑ न॒ ईड्य॑ः।
अग॑न्म म॒हा मन॑सा॒ यवि॑ष्ठम्॥ २॥

((tayā̍ de̱vata̍yā'ṅgira̱svaddhru̱vā sī̍da ।
tā a̍sya̱ sūda̍dohasaḥ ।
soma̍m̐̎ śrīṇanti̱ pṛśna̍yaḥ ।
janma̍nde̱vānā̱m viśa̍ḥ ।
tri̱ṣvāro̍ca̱ne di̱vaḥ ।
tayā̍ de̱vata̍yā'ṅgira̱svaddhru̱vā sī̍da ।
agne̍ de̱vām̐̍ i̱hāva̍ha ।
ja̱jñā̱no vṛ̱ktaba̍rhiṣe ।
asi̱ hotā̍ na̱ īḍya̍ḥ ।
aga̍nma ma̱hā mana̍sā̱ yavi̍ṣṭham ॥ 2 ॥))

**[[3-11-6-3]]**
यो दी॒दाय॒ समि॑द्ध॒ स्वे दु॑रो॒णे।
चि॒त्रभा॑नू॒ रोद॑सी अ॒न्तरु॒र्वी।
स्वा॑हुतं वि॒श्वत॑ः प्र॒त्यञ्च᳚म्।
मे॒धा॒का॒रं वि॒दथ॑स्य प्र॒साध॑नम्।
अ॒ग्निꣳ होता॑रं परि॒भूत॑मं म॒तिम्।
त्वामर्भ॑स्य ह॒विष॑ः समा॒नमित्।
त्वां म॒हो वृ॑णते॒ नरो॒ नान्यं त्वत्।
म॒नु॒ष्वत्त्वा॒ निधी॑महि।
म॒नु॒ष्वत्समि॑धीमहि।
अग्ने॑ मनु॒ष्वद॑ङ्गिरः॥ ३॥

((yo dī̱dāya̱ sami̍ddha̱ sve du̍ro̱ṇe ।
ci̱trabhā̍nū̱ roda̍sī a̱ntaru̱rvī ।
svā̍hutaṃ vi̱śvata̍ḥ pra̱tyañcā̎m ।
me̱dhā̱kā̱raṃ vi̱datha̍sya pra̱sādha̍nam ।
a̱gnim̐̍ hotā̍raṃ pari̱bhūta̍mam ma̱tim ।
tvāmarbha̍sya ha̱viṣa̍ḥ samā̱namit ।
tvāṃ ma̱ho vṛ̍ṇate̱ naro̱ nānyaṃ tvat ।
ma̱nu̱ṣvattvā̱ nidhī̍mahi ।
ma̱nu̱ṣvatsami̍dhīmahi ।
agne̍ manu̱ṣvada̍ṅgiraḥ ॥ 3 ॥))

**[[3-11-6-4]]**
दे॒वान्दे॑वाय॒ते यज।
अ॒ग्निर्हि वा॒जिन॑ं वि॒शे।
ददा॑ति वि॒श्वच॑र्षणिः।

अ॒ग्नी रा॒ये स्वा॒भुवँ᳚म्।
स प्री॒तो या॑ति॒ वार्यँ᳚म्।
इष॒ꣳ॒ स्तो॒तृभ्य॒ आभ॑र।
पृ॒ष्टो दि॒वि पृ॒ष्टो अ॒ग्निः पृ॑थि॒व्याम्।
पृ॒ष्टो विश्वा॒ ओष॑धी॒रावि॑वेश।
वै॒श्वा॒न॒रः सह॑सा पृ॒ष्टो अ॒ग्निः।
स नो॒ दिवा॒ स रि॒षः पा॑तु॒ नक्तँ᳚म्॥ ४॥
अ॒सी॒ष॒द॒न्यवि॑ष्ठामङ्गिरो॒ नक्तँ᳚म्॥ ६॥

((de̱vānde̍vāya̱te ya̍ja ।
a̱gnirhi vā̱jinaṃ vi̱śe ।
dada̍ti vi̱śvaca̍rṣa̱ṇiḥ ।
a̱gnī rā̱ye svā̱bhuva̐m ।
sa prī̱to ya̍ti̱ vārya̐m ।
iṣa̐ṃ sto̱tṛbhya̱ ābha̍ra ।
pṛ̱ṣṭo di̱vi pṛ̱ṣṭo a̱gniḥ pṛ̍thi̱vyām ।
pṛ̱ṣṭo viśvā̱ oṣa̍dhī̱rāvi̍veśa ।
vai̱śvā̱na̱raḥ saha̍sā pṛ̱ṣṭo a̱gniḥ ।
sa no̱ divā̱ sa ri̱ṣaḥ pa̍tu̱ nakta̐m ॥ 4 ॥
a̱sī̱ṣa̱da̱nyavi̍ṣṭhāmaṅgiro̱ nakta̐m ॥ 6 ॥))

**[[3-11-7-1]]**

अ॒यं वाव यः पव॑ते।
सो॑ऽग्निर्ना॑चिके॒तः।
स यत्प्राङ्पव॑ते।
तद॑स्य॒ शिरः॑।
अथ॒ यद्द॑क्षि॒णा।
स द॑क्षि॒णः प॒क्षः।
अथ॒ यत्प्र॒त्यक्।
तत्पुच्छँ᳚म्।
यदु॒द॒ङ्।
स उत्त॑रः प॒क्षः॥ १॥

((a̱yaṃ vāva yaḥ pava̍te ।
so̐'gnirnā̍cike̱taḥ ।
sa yatprāṅpava̍te ।
tada̍sya̱ śira̍ḥ ।
atha̱ yadda̍kṣi̱ṇā ।
sa dakṣi̱ṇaḥ pa̱kṣaḥ ।
atha̱ yatpra̱tyak ।
tatpuccha̐m ।
yaduda̍ṅ ।
sa utta̍raḥ pa̱kṣaḥ ॥ 1 ॥))

**[[3-11-7-2]]**

अथ॒ यत्सं॒वाति॑।
तद॑स्य स॒मञ्च॑नं च प्र॒सार॑णं च।
अथो॑ स॒म्पदे॒वास्य॒ सा।
सꣳ ह॒ वा अ॑स्मै स काम॑ः पद्यते।
यत्का॑मो॒ यज॑ते।
यो॑ऽग्निं ना॑चिके॒तं चि॑नु॒ते।
य उ॑ चैनमे॒वं वेद॑।
यो ह॒ वा अ॒ग्नेर्ना॑चिके॒तस्या॒यत॑नं प्रति॒ष्ठां वेद॑।
आ॒यत॑नवान्भवति।
गच्छ॑ति प्रति॒ष्ठाम्॥ २॥

((atha̱ yatsa̱ṃvāti̍ ।
tada̍sya sa̱mañca̍naṃ ca pra̱sāra̍ṇaṃ ca ।
atho̍ sa̱mpade̱vāsya̱ sā ।
sa̐ṃ ha̱ vā a̍smai sa kāma̍ḥ padyate ।
yatka̍mo̱ yaja̍te ।
yo̐'gniṃ na̍cike̱taṃ ci̍nu̱te ।
ya u̍ cainame̱vaṃ veda̍ ।
yo ha̱ vā a̱gnerna̍ciketasyā̱yata̍naṃ prati̱ṣṭhāṃ veda̍ ।
ā̱yata̍navānbhavati ।
gaccha̍ti prati̱ṣṭhām ॥ 2 ॥))

**[[3-11-7-3]]**

हि॒र॑ण्यं॒ वा अ॒ग्नेर्ना॑चिके॒तस्या॒यत॑नं प्रति॒ष्ठा।
य ए॒वं वेद॑।
आ॒यत॑नवान्भवति।
गच्छ॑ति प्रति॒ष्ठाम्।
यो ह॒ वा अ॒ग्नेर्ना॑चिके॒तस्य॒ शरी॑रं॒ वेद॑।
सश॑रीर ए॒व स्व॒र्गं लो॒कमे॑ति।
हि॒र॑ण्यं॒ वा अ॒ग्नेर्ना॑चिके॒तस्य॒ शरी॑रम्।
य ए॒वं वेद॑।
सश॑रीर ए॒व स्व॒र्गं लो॒कमे॑ति।
अथो॒ यथा॑ रु॒क्म उत्त॑प्तो भा॒य्यात्॥ ३॥

((hira̍ṇya̱ṃ vā a̱gnerna̍ciketasyā̱yata̍naṃ prati̱ṣṭhā ।
ya e̱vaṃ veda̍ ।
ā̱yata̍navānbhavati ।
gaccha̍ti prati̱ṣṭhām ।
yo ha̱ vā a̱gnerna̍cike̱tasya̱ śarī̍raṃ veda̍ ।
saśa̍rīra e̱va sva̱rgaṃ lo̱kame̍ti ।
hira̍ṇya̱ṃ vā a̱gnerna̍cike̱tasya̱ śarī̍ram ।
ya e̱vaṃ veda̍ ।
saśa̍rīra e̱va sva̱rgaṃ lo̱kame̍ti ।
atho̱ yatha̍ ru̱kma utta̍pto bhā̱yyāt ॥ 3 ॥))

**[[3-11-7-4]]**

ए॒वमे॒व स तेज॑सा॒ यश॑सा।
अ॒स्मिꣳ॑श्च॑ लो॒के॑ऽमुष्मिꣳ॑श्च भाति।
उ॒रवो॑ ह॒ वै नामै॒ते लो॒काः।
येऽव॑रेणादि॒त्यम्।
अथ॑ है॒ते वरी॑याꣳसो लो॒काः।
ये परे॑णादि॒त्यम्।
अन्त॑वन्तꣳ ह॒ वा ए॒ष क्ष॒य्यं लो॒कं ज॑यति।
योऽव॑रेणादि॒त्यम्।
अथ॑ है॒षो॑ऽन॒न्तम॑पा॒रम॑क्ष॒य्यं लो॒कं ज॑यति।
यः परे॑णादि॒त्यम्॥ ४॥

((e̱vame̱va sa teja̍sā̱ yaśa̍sā |
a̱smim̐̍śca̍ lo̱ke̍'muṣmim̐̍śca bhāti |
u̱ravo̍ ha̱ vai nāmai̱te lo̱kāḥ |
ye'va̍reṇādi̱tyam |
atha̍ hai̱te vari̍yām̐so lo̱kāḥ |
ye pare̍ṇādi̱tyam |
anta̍vantam̐ ha̱ vā e̱ṣa kṣa̱yyaṃ lo̱kaṃ ja̍yati |
yo'va̍reṇādi̱tyam |
atha̍ hai̱ṣo̍'na̱ntama̍pā̱rama̍kṣa̱yyaṃ lo̱kaṃ ja̍yati |
yaḥ pare̍ṇādi̱tyam || 4 ||))

**[[3-11-7-5]]**

अ॒न॒न्तꣳ ह॒ वा अ॑पा॒रम॑क्ष॒य्यं लो॒कं ज॑यति।
यो᳚ऽग्निं ना॑चिके॒तं चि॑नु॒ते।
य उ॑ चैनमे॒वं वेद॑।
अथो॑ यथा॒ रथे॒ तिष्ठ॑न्पक्ष॒सी प॑र्या॒वर्त॑माने प्र॒त्यपे᳚क्षते।
ए॒वम॑होरा॒त्रे प्र॒त्यपे᳚क्षते।
नास्या॑होरा॒त्रे लो॒कमा᳚प्नुतः।
यो᳚ऽग्निं ना॑चिके॒तं चि॑नु॒ते।
य उ॑ चैनमे॒वं वेद॑॥ ५॥
उत्त॑रः प॒क्षो गच्छ॑ति प्रति॒ष्ठां भाय्याद्यः परे॑णादि॒त्यम॒ष्टौ च॑॥ ७॥

((a̱na̱ntam̐ ha̱ vā a̍pā̱rama̍kṣa̱yyaṃ lo̱kaṃ ja̍yati |
yo̎'gniṃ nā̍cike̱taṃ ci̍nu̱te |
ya u̍ cainame̱vaṃ veda̍ |
atho̱ yathā̱ rathe̱ tiṣṭha̍npakṣa̱sī pa̍ryā̱varta̍māne pra̱tyape̎kṣate |
e̱vama̍horā̱tre pra̱tyape̎kṣate |
nāsyā̍horā̱tre lo̱kamā̎pnutaḥ |
yo̎'gniṃ nā̍cike̱taṃ ci̍nu̱te |
ya u̍ cainame̱vaṃ veda̍ || 5 ||
utta̍raḥ pa̱kṣo gaccha̍ti prati̱ṣṭhāṃ bhāyyādyaḥ pare̍ṇādi̱tyama̱ṣṭau ca̍ || 7 ||))

**[[3-11-8-1]]**

उ॒शन्ह॒ वै वा॑जश्रव॒सः स॑र्ववेद॒सं द॑दौ।
तस्य॑ ह॒ नचि॑केता॒ नाम॑ पु॒त्र आ॑स।
तꣳ ह॑ कुमा॒रꣳ सन्त᳚म्।
दक्षि॑णासु नी॒यमा॑नासु श्र॒द्धाऽऽवि॑वेश।
स हो॑वाच।
तत॒ कस्मै॒ मां दा᳚स्य॒सीति॑।
द्वि॒तीय॑ं तृ॒तीय᳚म्।
तꣳ ह॒ परी॑त उवाच।
मृ॒त्यवे᳚ त्वा ददा॒मीति॑।
तꣳ ह॒ स्मोत्थि॑तं॒ वाग॒भिव॑दति॥ १॥

((u̱śanha̱ vai vā̍jaśrava̱saḥ sa̍rvaveda̱saṃ da̍dau |
tasya̍ ha̱ naci̍ketā̱ nāma̍ pu̱tra ā̍sa |
tam̐ ha̍ kumā̱ram̐ santa̎m |
dakṣi̍ṇāsu nī̱yamā̍nāsu śra̱ddhā''vi̍veśa |
sa ho̍vāca |
tata̱ kasmai̱ māṃ dā̎sya̱sīti̍ |
dvi̱tīya̍ṃ tṛ̱tīya̎m |
tam̐ ha̱ pari̍ta uvāca |
mṛ̱tyave̎ tvā dadā̱mīti̍ |
tam̐ ha̱ smotthi̍taṃ̱ vāga̱bhiva̍dati || 1 ||))

**[[3-11-8-2]]**

गौत॑म कुमा॒रमिति॑।
स हो॑वाच।
परे॑हि मृ॒त्योर्गृ॒हान्।
मृ॒त्यवे॒ वै त्वा॑ऽदा॒मिति॑।
तं वै प्र॒वस॑न्तं ग॒न्तासीति॑ होवाच।
तस्य॑ स्म ति॒स्रो रात्री॒रना᳚श्वान्गृ॒हे व॑सतात्।
स यदि॑ त्वा पृ॒च्छेत्।
कुमा॑र॒ कति॒ रात्री॑रवात्सी॒रिति॑।
ति॒स्र इति॒ प्रति॑ब्रूतात्।
किं प्र॑थ॒माꣳ रात्रि॑माश्ना॒ इति॑॥ २॥

((gauta̍ma kumā̱ramiti̍ |
sa ho̍vāca |
pare̍hi mṛ̱tyorgṛ̱hān |
mṛ̱tyave̱ vai tvā̍'dā̱miti̍ |
taṃ vai pra̱vasa̍ntaṃ ga̱ntāsīti̍ hovāca |
tasya̍ sma ti̱sro rātrī̱ranā̎śvāngṛ̱he va̍satāt |
sa yadi̍ tvā pṛ̱cchet |
kumā̍ra̱ kati̱ rātrī̍ravātsī̱riti̍ |
ti̱sra iti̱ prati̍brūtāt |

kiṃ pra̍tha̱māṁ rātri̍māśnā̱ iti̍ || 2 ||))

**[[3-11-8-3]]**

प्र॒जां त॒ इति॑।
किं द्वि॒तीया॒मिति॑।
प॒शूꣳस्त॒ इति॑।
किं तृ॒तीया॒मिति॑।
सा॒धु॒कृ॒त्यां त॒ इति॑।
तं वै प्र॒वस॑न्तं जगाम।
तस्य॑ ह ति॒स्रो रात्री॒रना॑श्वान्गृ॒ह उ॑वास।
तमा॒गत्य॑ पप्रच्छ।
कुमा॑र॒ कति॒ रात्री॑रवात्सी॒रिति॑।
ति॒स्र इति॒ प्रत्यु॑वाच॥ ३॥

((pra̱jāṃ ta̱ iti̍ |
kiṃ dvi̱tīyā̱miti̍ |
pa̱śūṁsta̱ iti̍ |
kiṃ tṛ̱tīyā̱miti̍ |
sā̱dhu̱kṛ̱tyāṃ ta̱ iti̍ |
taṃ vai pra̱vasa̍ntaṃ jagāma |
tasya̍ ha ti̱sro rātrī̱ranā̍śvāngṛ̱ha u̍vāsa |
tamā̱gatya̍ papraccha |
kumā̍ra̱ kati̱ rātrī̍ravātsī̱riti̍ |
ti̱sra iti̱ pratyu̍vāca || 3 ||))

**[[3-11-8-4]]**

किं प्र॑थ॒माꣳ रात्रि॑माश्ना॒ इति॑।
प्र॒जां त॒ इति॑।
किं द्वि॒तीया॒मिति॑।
प॒शूꣳस्त॒ इति॑।
किं तृ॒तीया॒मिति॑।
सा॒धु॒कृ॒त्यां त॒ इति॑।
नम॑स्ते अस्तु भगव॒ इति॑ होवाच।
वरं॑ वृणी॒ष्वेति॑।
पि॒तर॑मे॒व जीव॑न्नया॒नीति॑।
द्वि॒तीयं॑ वृणी॒ष्वेति॑॥ ४॥

((kiṃ pra̍tha̱māṁ rātri̍māśnā̱ iti̍ |
pra̱jāṃ ta̱ iti̍ |
kiṃ dvi̱tīyā̱miti̍ |
pa̱śūṁsta̱ iti̍ |
kiṃ tṛ̱tīyā̱miti̍ |
sā̱dhu̱kṛ̱tyāṃ ta̱ iti̍ |
nama̍ste astu bhagava̱ iti̍ hovāca |
vara̍ṃ vṛṇī̱ṣveti̍ |
pi̱tara̍me̱va jīva̍nnayā̱nīti̍ |
dvi̱tīya̍ṃ vṛṇī̱ṣveti̍ || 4 ||))

**[[3-11-8-5]]**

इ॒ष्टा॒पू॒र्तयो॒र्मेऽक्षि॑तिं ब्रू॒हीति॑ होवाच।
तस्मै॑ है॒तम॒ग्निं ना॑चिके॒तमु॑वाच।
तत॒ो वै तस्यैँ॒ष्टापू॒र्ते ना क्षी॑येते।
नास्यैँ॒ष्टापू॒र्ते क्षी॑येते।
योँ॑ऽग्निं ना॑चिके॒तं चि॑नु॒ते।
य उ॑ चैनमे॒वं वेद॑।
तृ॒तीयं॑ वृणी॒ष्वेति॑।
पु॒न॒र्मृ॒त्योर्मेऽप॑जितिं ब्रू॒हीति॑ होवाच।
तस्मै॑ है॒तम॒ग्निं ना॑चिके॒तमु॑वाच।
तत॒ो वै सोऽप॑ पुनर्मृ॒त्युम॑जयत्॥ ५॥

((i̱ṣṭā̱pū̱rtayo̱rme'kṣi̍tiṃ brū̱hīti̍ hovāca |
tasmai̍ hai̱tama̱gniṃ nā̍cike̱tamu̍vāca |
tato̱ vai tasyĕ̱ṣṭāpū̱rte nā kṣī̍yete |
nāsyĕ̱ṣṭāpū̱rte kṣī̍yete |
yŏ̍'gniṃ nā̍cike̱taṃ ci̍nu̱te |
ya u̍ cainame̱vaṃ veda̍ |
tṛ̱tīya̍ṃ vṛ̱ṇī̱ṣveti̍ |
pu̱na̱rmṛ̱tyorme'pa̍jitiṃ brū̱hīti̍ hovāca |
tasmai̍ hai̱tama̱gniṃ nā̍cike̱tamu̍vāca |
tato̱ vai so'pa̍ punarmṛ̱tyuma̍jayat || 5 ||))

**[[3-11-8-6]]**

अप॑ पुनर्मृ॒त्युं ज॑यति।
योँ॑ऽग्निं ना॑चिके॒तं चि॑नु॒ते।
य उ॑ चैनमे॒वं वेद॑।
प्र॒जाप॑ति॒र्वै प्र॒जाका॑म॒स्तपो॑ऽतप्यत।
स हि॑रण्य॒मुदा॑स्यत्।
तद॒ग्नौ प्रास्य॑त्।
तद॑स्मै॒ नाच्छ॑दयत्।
तद्द्वि॒तीयं॒ प्रास्य॑त्।
तद॑स्मै॒ नैवाच्छ॑दयत्।
तत्तृ॒तीयं॒ प्रास्य॑त्॥ ६॥

((apa̍ punarmṛ̱tyuṃ ja̍yati |
yŏ̍'gniṃ nā̍cike̱taṃ ci̍nu̱te |
ya u̍ cainame̱vaṃ veda̍ |
pra̱jāpa̍ti̱rvai pra̱jākā̍ma̱stapo̍'tapyata |
sa hi̍raṇya̱mudā̍syat |
tada̱gnau prāsya̍t |
tada̍smai̱ nāccha̍dayat |

taddvi̱tīyam̱ prāsya̍t ।
tada̍smai̱ naivācchā̍dayat ।
tattṛ̱tīyam̱ prāsya̍t ॥ 6 ॥))

**[[3-11-8-7]]**

तद॑स्मै॒ नैवाच्छा॑दयत् ।
तदा॒त्मन्ने॒व हृ॑द॒य्ये॑ऽग्नौ वै॑श्वान॒रे प्रास्य॑त् ।
तद॑स्मा अच्छदयत् ।
तस्मा॒द्धिर॑ण्यं॒ कनि॑ष्ठं॒ धना॑नाम् ।
भु॒ञ्जत्प्रि॒यत॑मम् ।
हृ॒द॒य॒जꣳ हि ।
स वै तमे॒व नावि॑न्दत् ।
यस्मै॒ तां दक्षि॑णा॒मने॑ष्यत् ।
ताꣳ स्वायै॒व हस्ता॑य॒ दक्षि॑णायानयत् ।
तां प्रत्य॑गृह्णात् ॥ ७ ॥

((tada̍smai̱ naivācchā̍dayat ।
tadā̱tmanne̱va hṛ̍da̱yye̍'gnau vai̍śvāna̱re prāsya̍t ।
tada̍smā acchadayat ।
tasmā̱ddhira̍ṇyam̱ kani̍ṣṭham̱ dhanā̍nām ।
bhu̱ñjatpri̱yata̍mam ।
hṛ̱da̱ya̱jam̐ hi ।
sa vai tame̱va nāvi̍ndat ।
yasmai̱ tām dakṣi̍ṇā̱mane̍ṣyat ।
tām̐ svāyai̱va hastā̍ya̱ dakṣi̍ṇāyānayat ।
tām pratya̍gṛhṇāt ॥ 7 ॥))

**[[3-11-8-8]]**

दक्षा॑य त्वा॒ दक्षि॑णां॒ प्रति॑गृह्णा॒मीति॑ ।
सो॑ऽदक्षत॒ दक्षि॑णां॒ प्रति॒गृह्य॑ ।
दक्ष॑ते ह॒ वै दक्षि॑णां॒ प्रति॒गृह्य॑ ।
य ए॒वं वेद॑ ।
ए॒तद्ध॑ स्म॒ वै तद्वि॒द्वाꣳसो॑ वाजश्र॒वसा गोत॑माः ।
अप्य॑नू॒देश्या॑ँ॒ दक्षि॑णां॒ प्रति॑गृह्णन्ति ।
उ॒भये॑न व॒यं द॑क्षिष्यामह ए॒व दक्षि॑णां॒ प्रति॒गृह्ये॑ति॒ ।
ते॑ऽदक्षन्त॒ दक्षि॑णां॒ प्रति॒गृह्य॑ ।
दक्ष॑ते ह॒ वै दक्षि॑णां॒ प्रति॒गृह्य॑ ।
य ए॒वं वेद॑ ।
प्रहा॒न्यं व्ली॑नाति ॥ ८ ॥
व॒द॒त्या॒श्ना॒ इत्युवा॑च द्वि॒तीय॑ं वृणी॒ष्वेत्य॑जयत्तृ॒तीय॒ं
प्रास्य॑दगृह्णा॒द्य ए॒वं वेदै॑कं॒ च ॥ ८ ॥

((dakṣa̍ya tvā̱ dakṣi̍ṇām̱ prati̍gṛhṇā̱mīti̍ ।
so̍'dakṣata̱ dakṣi̍ṇām̱ prati̱gṛhya̍ ।
dakṣa̍te ha̱ vai dakṣi̍ṇām̱ prati̱gṛhya̍ ।
ya e̱vam̱ veda̍ ।
e̱taddha̍ sma̱ vai tadvi̱dvām̐so̍ vājaśrava̱sā gota̍māḥ ।
apya̍nūde̱śyām̐ dakṣi̍ṇām̱ prati̍gṛhṇanti ।
u̱bhaye̍na va̱yam̱ da̍kṣiṣyāmaha e̱va dakṣi̍ṇām̱ prati̱gṛhyeti̍ ।
te̍'dakṣanta̱ dakṣi̍ṇām̱ prati̱gṛhya̍ ।
dakṣa̍te ha̱ vai dakṣi̍ṇām̱ prati̱gṛhya̍ ।
ya e̱vam̱ veda̍ ।
prahā̱nyam̱ vlī̍nāti ॥ 8 ॥
va̱da̱tyā̱śnā̱ ityuvā̍ca dvi̱tīya̍m̐ vṛṇī̱ṣvetya̍jayattṛ̱tīya̱m̐ prāsya̍dagṛhṇā̱dya e̱vam̱ vedaika̍m̐ ca ॥ 8 ॥))

**[[3-11-9-1]]**

तꣳ है॒तमे॑के॒ पशुब॒न्ध ए॒वोत्त॑रवे॒द्यां चि॑न्वते ।
उ॒त्त॒र॒वे॒दिस॑म्मित ए॒षो॑ऽग्निरिति॒ वद॑न्तः ।
तन्न तथा॑ कु॒र्या॑त् ।
ए॒तम॒ग्निं कामे॑न॒ व्यर्द्ध॑येत् ।
स ए॑न॒ं कामे॑न॒ व्यृ॑द्धः ।
कामे॑न॒ व्यर्द्ध॑येत् ।
सौ॒म्ये वावैन॑मध्व॒रे चि॑न्वीत ।
यत्र॑ वा॒ भूयि॑ष्ठा॒ आहु॑तयो हू॒येर॑न् ।
ए॒तम॒ग्निं कामे॑न॒ सम॑र्द्धयति ।
स ए॑न॒ं कामे॑न॒ समृ॑द्धः ॥ १ ॥

((tam̐ hai̱tameke̍ paśuba̱ndha e̱votta̍rave̱dyām̱ ci̍nvate ।
u̱tta̱ra̱ve̱disa̍mmita e̱ṣo̍'gniriti̱ vada̍ntaḥ ।
tanna tathā̍ ku̱ryāt ।
e̱tama̱gnim̱ kāme̍na̱ vya̍rddhayet ।
sa e̍nam̱ kāme̍na̱ vyṛ̍ddhaḥ ।
kāme̍na̱ vya̍rddhayet ।
sau̱mye vāvainā̍madhva̱re ci̍nvīta ।
yatra̍ vā̱ bhūyi̍ṣṭhā̱ āhu̍tayo hū̱yera̍n ।
e̱tama̱gnim̱ kāme̍na̱ sama̍rddhayati ।
sa e̍nam̱ kāme̍na̱ samṛ̍ddhaḥ ॥ 1 ॥))

**[[3-11-9-2]]**

कामे॑न॒ सम॑र्द्धयति ।
अथ॑ है॒नं पु॒रर्ष॑यः ।
उ॒त्त॒र॒वे॒द्यामे॒व स॒त्रिय॑मचिन्वत ।
तत॒ो वै ते॑ऽविन्दन्त प्र॒जाम् ।
अ॒भि स्व॒र्गं लो॒कम॑जयन् ।
वि॒न्दत॑ ए॒व प्र॒जाम् ।
अ॒भि स्व॒र्गं लो॒कं ज॑यति ।

योऽग्निं नाचिकेतं चिनुते।
य उ चैनमेवं वेद।
अथ हैनं वायुर्ऋद्धिकामः॥ २॥

((kāmena samarddhayati |
atha hainaṃ purarṣayaḥ |
uttaravedyāmeva satriyāmacinvata |
tato vai te'vindanta prajām |
abhi svargaṃ lokamajayan |
vindata eva prajām |
abhi svargaṃ lokaṃ jayati |
yo'gniṃ nāciketaṃ cinute |
ya u cainamevaṃ veda |
atha hainaṃ vāyurṛddhikāmaḥ || 2 ||))

**[[3-11-9-3]]**

यथान्युप्तमेवोपदधे।
ततो वै स एतामृद्धिमार्ध्नोत्।
यामिदं वायुर्ऋद्धः।
एतामृद्धिमृध्नोति।
यामिदं वायुर्ऋद्धः।
योऽग्निं नाचिकेतं चिनुते।
य उ चैनमेवं वेद।
अथ हैनं गोबलो वार्ष्णः पशुकामः।
पाङ्क्तमेव चिक्ये।
पञ्च पुरस्तात्॥ ३॥

((yathānyuptamevopadadhe |
tato vai sa etāmṛddhimārdhnot |
yāmidaṃ vāyurṛddhaḥ |
etāmṛddhimṛdhnoti |
yāmidaṃ vāyurṛddhaḥ |
yo'gniṃ nāciketaṃ cinute |
ya u cainamevaṃ veda |
atha hainaṃ gobalo vārṣṇaḥ paśukāmaḥ |
pāṅktameva cikye |
pañca purastāt || 3 ||))

**[[3-11-9-4]]**

पञ्च दक्षिणतः।
पञ्च पश्चात्।
पञ्चोत्तरतः।
एकां मध्ये।
ततो वै स सहस्रं पशून्प्राप्नोत्।
प्र सहस्रं पशूनाप्नोति।
योऽग्निं नाचिकेतं चिनुते।
य उ चैनमेवं वेद।
अथ हैनं प्रजापतिर्ज्यैष्ठ्यकामो यशस्कामः प्रजननकामः।
त्रिवृतमेव चिक्ये॥ ४॥

((pañca dakṣiṇataḥ |
pañca paścāt |
pañcottarataḥ |
ekāṃ madhye |
tato vai sa sahasraṃ paśūnprāpnot |
pra sahasraṃ paśūnāpnoti |
yo'gniṃ nāciketaṃ cinute |
ya u cainamevaṃ veda |
atha hainaṃ prajāpatirjyaiṣṭhyakāmo yaśaskāmaḥ prajananakāmaḥ |
trivṛtameva cikye || 4 ||))

**[[3-11-9-5]]**

सप्त पुरस्तात्।
तिस्रो दक्षिणतः।
सप्त पश्चात्।
तिस्र उत्तरतः।
एकां मध्ये।
ततो वै स प्र यशो ज्यैष्ठ्यमाप्नोत्।
एतां प्रजातिं प्राजायत।
यामिदं प्रजाः प्रजायन्ते।
त्रिवृद्वै ज्यैष्ठ्यम्।
माता पिता पुत्रः॥ ५॥

((sapta purastāt |
tisro dakṣiṇataḥ |
sapta paścāt |
tisra uttarataḥ |
ekāṃ madhye |
tato vai sa pra yaśo jyaiṣṭhyamāpnot |
etāṃ prajātiṃ prājāyata |
yāmidaṃ prajāḥ prajāyante |
trivṛdvai jyaiṣṭhyam |
mātā pitā putraḥ || 5 ||))

**[[3-11-9-6]]**

त्रिवृत्प्रजननम्।
उपस्थो योनिर्मध्यमा।
प्र यशो ज्यैष्ठ्यमाप्नोति।
एतां प्रजातिं प्रजायते।
यामिदं प्रजाः प्रजायन्ते।

यो॑ऽग्निं ना॑चिके॒तं चि॑नु॒ते।
य उ॑ चैनमे॒वं वेद॑।
अथ॑ हैन॒मिन्द्रो॒ ज्यैष्ठ्य॑कामः।
ऊ॒र्ध्वा ए॒वोप॑दधे।
ततो॒ वै स ज्यैष्ठ्य॑मगच्छत्॥ ६॥

((tri̠vṛtpra̠jana̍nam ।
u̠pastho̠ yoni̍rmadhya̠mā ।
pra yaśo̠ jyaiṣṭhya̍māpnoti ।
e̠tāṃ prajā̍ti̠ṃ prajā̍yate ।
yāmi̠daṃ pra̠jāḥ pra̠jāya̍nte ।
yŏ'gni̠ṃ nā̍cike̠taṃ ci̍nu̠te ।
ya u̍ cainame̠vaṃ veda̍ ।
atha̍ haina̠mindro̠ jyaiṣṭhya̍kāmaḥ ।
ū̠rdhvā e̠vopa̍dadhe ।
tato̠ vai sa jyaiṣṭhya̍magacchat ॥ 6 ॥))

**[[3-11-9-7]]**

ज्यैष्ठ्यं॑ गच्छति।
यो॑ऽग्निं ना॑चिके॒तं चि॑नु॒ते।
य उ॑ चैनमे॒वं वेद॑।
अथ॑ हैनम॒सावा॑दि॒त्यः स्व॒र्गका॑मः।
प्राची॑रे॒वोप॑दधे।
ततो॒ वै सो॑ऽभि स्व॒र्गं लो॒कम॑जयत्।
अ॒भि स्व॒र्गं लो॒कं ज॑यति।
यो॑ऽग्निं ना॑चिके॒तं चि॑नु॒ते।
य उ॑ चैनमे॒वं वेद॑।
स यदी॒च्छेत्॥ ७॥

((jyaiṣṭhya̍ṃ gacchati ।
yŏ'gni̠ṃ nā̍cike̠taṃ ci̍nu̠te ।
ya u̍ cainame̠vaṃ veda̍ ।
atha̍ hainama̠sāvā̍di̠tyaḥ sva̠rgakā̍maḥ ।
prāci̍re̠vopa̍dadhe ।
tato̠ vai so̍'bhi sva̠rgaṃ lo̠kamā̍jayat ।
a̠bhi sva̠rgaṃ lo̠kaṃ ja̍yati ।
yŏ'gni̠ṃ nā̍cike̠taṃ ci̍nu̠te ।
ya u̍ cainame̠vaṃ veda̍ ।
sa yadī̠cchet ॥ 7 ॥))

**[[3-11-9-8]]**

ते॒जस्वी य॑श॒स्वी ब्र॑ह्मवर्च॒सी स्या॒मिति॑।
प्राङाहोतु॒र्धिष्ण्या॒दुत्स॑र्पेत्।
येयं प्रागा॒द्यश॑स्वती।
सा मा॒ प्रोर्णो॑तु।
तेज॑सा॒ यश॑सा ब्रह्मवर्च॒सेनेति॑।
ते॒जस्व्ये॑व य॑श॒स्वी ब्र॑ह्मवर्च॒सी भ॑वति।
अथ॒ यदी॒च्छेत्।
भूयि॑ष्ठं मे॒ श्रद्द॑धीरन्।
भूयि॑ष्ठा॒ दक्षि॑णा नयेयु॒रिति॑।
दक्षि॑णासु नी॒यमा॑नासु॒ प्राच्येहि॒ प्राच्ये॒हीति॒ प्राची॑ जुषा॒णा
वेत्वाज्य॑स्य॒ स्वाहेति॑ स्रु॒वेणो॑प॒हत्या॑हव॒नीये॑ जुहुयात्॥
८॥

((te̠ja̠svī ya̍śa̠svī brā̍hmavarca̠sī syā̠miti̍ ।
prā̍ṅāhotu̠rdhiṣṇyā̠dutsa̍rpet ।
yeyaṃ prāgā̠dyaśa̍svatī ।
sā mā̠ prorṇo̍tu ।
tejā̍sā̠ yaśa̍sā brahmavarca̠seneti̍ ।
te̠jasvye̍va ya̍śa̠svī brā̍hmavarca̠sī bha̍vati ।
atha̠ yadī̠cchet ।
bhūyi̍ṣṭhaṃ me̠ śraddā̍dhīran ।
bhūyi̍ṣṭhā̠ dakṣi̍ṇā nayeyu̠riti̍ ।
dakṣi̍ṇāsu nī̠yamā̍nāsu̠ prācye̠hi prācye̠hīti̠ prāci̍
juṣā̠ṇā vetvājya̍sya̠ svāheti̍
sru̠veṇo̍pa̠hatyā̍hava̠nīye̍ juhuyāt ॥ 8 ॥))

**[[3-11-9-9]]**

भूयि॑ष्ठमे॒वास्मै॒ श्रद्द॑धते।
भूयि॑ष्ठा॒ दक्षि॑णा नयन्ति।
पुरी॑षमुप॒धाय॑।
चि॒ति॒क्लृ॒प्तिभि॑रभि॒मृश्य॑।
अ॒ग्निं प्र॒णीयो॑पसमा॒धाय॑।
चत॑स्र ए॒ता आहु॑तीर्जुहोति।
त्वम॑ग्ने रु॒द्र इति॑ शतरु॒द्रीय॑स्य रू॒पम्।
अग्ना॑विष्णू॒ इति॑ वसो॒र्धारा॑याः।
अन्न॑पत॒ इत्य॑न्नहो॒मः।
स॒प्त ते॑ अग्ने स॒मिधः॑ स॒प्त जि॒ह्वा इति॑ विश्वप्रीः॥ ९॥
समृ॑द्ध ऋद्धि॑कामः पु॒रस्ता॑च्चिक्ये
पु॒त्रोऽगच्छ॑दि॒च्छेज्जु॑हुयाद्विश्वप्रीः॥ ९॥
पु॒रषी॑यो वा॒युर्गो॑ब॒लः स॒हस्रं॑
प्र॒जाप॑तिस्त्रि॒वृदिन्द्रो॒सावा॑दि॒त्यः स यदी॒च्छेत्॥

((bhūyi̍ṣṭhame̠vāsmai̠ śraddā̍dhate ।
bhūyi̍ṣṭhā̠ dakṣi̍ṇā nayanti ।
purī̍ṣamupa̠dhāya̍ ।
ci̠ti̠klṛ̠ptibhi̍rabhi̠mṛśya̍ ।
a̠gniṃ pra̠ṇīyo̍pasamā̠dhāya̍ ।
catā̍sra e̠tā āhu̍tīrjuhoti ।))

tvamágne rudra iti śatarudrīyásya rūpam ।
agnâviṣṇū iti vasordhārâyāḥ ।
annápata ityánnahomaḥ ।
sapta té agne samidháḥ sapta jihvā iti viśvaprīḥ ॥ 9 ॥
samṛddha ṛddhikāmaḥ purastâccikye
putró'gacchadicchejjúhuyādviśvaprīḥ ॥ 9 ॥
purarṣáyo vāyurgóbalaḥ sahasraṃ
prajāpátistrivṛdindrosāvâdityaḥ sa yadīcchet ॥))

**[[3-11-10-1]]**

यां प्रथमामिष्टकामुपदधाति।
इमं तया लोकमभिजयति।
अथो या अस्मिँल्लोके देवताः।
तासाꣳ सायुज्यꣳ सलोकतामाप्नोति।
यां द्वितीयामुपदधाति।
अन्तरिक्षलोकं तयाऽभिजयति।
अथो या अन्तरिक्षलोके देवताः।
तासाꣳ सायुज्यꣳ सलोकतामाप्नोति।
यां तृतीयामुपदधाति।
अमुं तया लोकमभिजयति॥ १॥

((yāṃ práthamāmiṣṭákāmupadadhâti ।
imaṃ tayâ lokamabhijáyati ।
atho yā asmimॅlloke devatâḥ ।
tāsāṁ sāyújyaṁ salokatâmāpnoti ।
yāṃ dvitīyâmupadadhâti ।
antarikṣalokaṃ tayā'bhijáyati ।
atho yā ántarikṣaloke devatâḥ ।
tāsāṁ sāyújyaṁ salokatâmāpnoti ।
yāṃ tṛtīyâmupadadhâti ।
amuṃ tayâ lokamabhijáyati ॥ 1 ॥))

**[[3-11-10-2]]**

अथो या अमुष्मिँल्लोके देवताः।
तासाꣳ सायुज्यꣳ सलोकतामाप्नोति।
अथो या अमूरितरा अष्टादश।
य एवामी उरवश्च वरीयाꣳसश्च लोकाः।
तानेव ताभिरभिजयति।
कामचारो ह वा अस्योरुषु च वरीयःसु च लोकेषु भवति।
योऽग्निं नाचिकेतं चिनुते।
य उ चैनमेवं वेद।
संवत्सरो वा अग्निर्नाचिकेतः।
तस्य वसन्तः शिरः॥ २॥

((atho yā amuṣmimॅlloke devatâḥ ।
tāsāṁ sāyújyaṁ salokatâmāpnoti ।
atho yā amūritárā aṣṭādáśa ।
ya evāmī uravásca variyāṁsaśca lokāḥ ।
tāneva tābhirabhijáyati ।
kāmacāró ha vā ásyoruṣú ca variyaḥsu ca lokeṣú bhavati ।
yo'gniṃ nâciketaṃ cinute ।
ya ú cainamevaṃ vedá ।
saṃvatsaro vā agnirnâciketaḥ ।
tasyá vasantaḥ śiráḥ ॥ 2 ॥))

**[[3-11-10-3]]**

ग्रीष्मो दक्षिणः पक्षः।
वर्षा उत्तरः।
शरत्पुच्छम्।
मासाः कर्मकाराः।
अहोरात्रे शतरुद्रीयम्।
पर्जन्यो वसोर्धारा।
यथा वै पर्जन्यः सुवृष्टं वृष्ट्वा।
प्रजाभ्यः सर्वान्कामान्त्संपूरयति।
एवमेव स तस्य सर्वान्कामान्त्संपूरयति।
योऽग्निं नाचिकेतं चिनुते॥ ३॥

((grīṣmo dakṣiṇaḥ pakṣaḥ ।
varṣā uttáraḥ ।
śaratpucchám ।
māsâḥ karmakārāḥ ।
ahorātre śátarudrīyám ।
parjanyo vasordhārâ ।
yathā vai parjanyaḥ suvṛ́ṣṭaṃ vṛṣṭvā ।
prajābhyaḥ sarvānkāmântsampūrayáti ।
evameva sa tasya sarvānkāmāntsampūrayati ।
yo'gniṃ nâciketaṃ cinute ॥ 3 ॥))

**[[3-11-10-4]]**

य उ चैनमेवं वेद।
संवत्सरो वा अग्निर्नाचिकेतः।
तस्य वसन्तः शिरः।
ग्रीष्मो दक्षिणः पक्षः।
वर्षाः पुच्छम्।
शरदुत्तरः पक्षः।
हेमन्तो मध्यम्।
पूर्वपक्षाश्चितयः।
अपरपक्षाः पुरीषम्।

अ॒हो॒रा॒त्राणीष्ट॑काः।
ए॒ष वाव सो᳚ऽग्निर॑ग्नि॒मयः॑ पुन॒र्णवः।
अ॒ग्नि॒मयो॑ ह॒ वै पु॑नर्ण॒वो भू॒त्वा।
स्व॒र्गं लो॒कमे॑ति।
आ॒दि॒त्यस्य॒ सायु॑ज्यम्।
यो᳚ऽग्निं ना॑चिके॒तं चि॑नु॒ते।
य उ॑ चैनमे॒वं वेद॑॥ ४॥
अ॒मुं तया॑ लो॒कम॒भि ज॑यति॒ शिर॑श्चिनु॒त इष्ट॑का॒ष्षट्च॑॥
१०॥
लो॒कस्त्वम॒ग्नेऽग्ना॑विष्णू॒ अन्न॑पते स॒प्त ते॑ अग्ने॒ यत्ते चि॑तम॒यं
वावोशन् ह॒ वै तꣳ है॒तं यां प्र॑थ॒मामिष्ट॑कां॒ दश॑॥ १०॥
लो॒क आ॑दि॒त्य ओजो᳚स्यू॒र्ध्वा दिग॑न॒न्तꣳ ह॒ वै कामे॑न
ग्री॒ष्मो द्विष॑ष्टिः॥ ६२॥

((ya u̍ cainame̱vaṃ veda̍ |
saṃ̱va̱tsa̱ro vā a̱gnirnā̍ciketa̱ḥ |
tasya̍ vasa̱ntaḥ śira̍ḥ |
grī̱ṣmo dakṣi̍ṇaḥ pa̱kṣaḥ |
va̱rṣāḥ puccha̎m |
śa̱raduttara̍ḥ pa̱kṣaḥ |
he̱ma̱nto madhya̎m |
pū̱rva̱pa̱kṣāścita̍yaḥ |
a̱pa̱ra̱pa̱kṣāḥ purī̍ṣam |
a̱ho̱rā̱trāṇīṣṭa̍kāḥ |
e̱ṣa vāva so̎'gnira̍gni̱maya̍ḥ punaṟṇavaḥ |
a̱gni̱mayo̍ ha̱ vai pu̍narṇa̱vo bhū̱tvā |
sva̱rgaṃ lo̱kame̍ti |
ā̱di̱tyasya̱ sāyu̍jyam |
yo̎'gniṃ nā̍ciketa̱ṃ ci̍nu̱te |
ya u̍ cainame̱vaṃ veda̍ || 4 ||
a̱muṃ tayā̍ lo̱kama̱bhi ja̍yati̱ śira̍ścinu̱ta
iṣṭa̍kā̱ṣṣaṭca̍ || 10 ||
lo̱kastvama̱gne'gnā̍viṣṇū̱ anna̍pate sa̱pta te̍ agne̱
yatte ci̍tama̱yaṃ vāvośan ha̱ vai taꣳ hai̱taṃ yāṃ
pra̍tha̱māmiṣṭa̍kā̱ṃ daśa̍ || 10 ||
lo̱ka ā̍di̱tya ojo̎syū̱rdhvā diga̍na̱ntaꣳ ha̱ vai kāme̍na
grī̱ṣmo dviṣa̍ṣṭiḥ || 62 ||))

# Taittirīya-Brāhmaṇa
# Book 3, Chapter 12

Edited by Subramania Sarma, Chennai

Final proofread version, May 2005

**[[3-12-1-1]]**

तुभ्यं ता अंङ्गिरस्तमाऽश्याम तं काममग्ने।
आशानां त्वा विश्वा आशाः।
अनु नोऽद्यानुमतिरन्विदनुमते त्वम्।
कामो भूतस्य कामस्तदग्रे।
ब्रह्म जज्ञानं पिता विराजाम्।
यज्ञो रायोऽयं यज्ञः।
आपो भद्रा आदित्पश्यामि।
तुभ्यं भरन्ति यो देह्यः।
पूर्वं देवा अपरेण प्राणापानौ।
हव्यवाहꣳ स्विष्टम्॥ १॥
तुभ्यं दश॥ १॥

((tubhyaṃ tā aṅgirastamā'śyāma taṃ kāmamagne |
āśānāṃ tvā viśvā āśāḥ |
anu no'dyānumatiranvidanumate tvam |
kāmo bhūtasya kāmastadagre |
brahma jajñānaṃ pitā virājām |
yajño rāyo'yaṃ yajñaḥ |
āpo bhadrā āditpaśyāmi |
tubhyaṃ bharanti yo dehyaḥ |
pūrvaṃ devā apareṇa prāṇāpānau |
havyavāhaṃ sviṣṭam || 1 ||
tubhyaṃ daśa || 1 ||))

**[[3-12-2-1]]**

देवेभ्यो वै स्वर्गो लोकस्तिरोऽभवत्।
ते प्रजापतिमब्रुवन्।
प्रजापते स्वर्गो वै नो लोकस्तिरोऽभूत्।
तमन्विच्छेति।
तं यज्ञक्रतुभिरन्वैच्छत्।
तं यज्ञक्रतुभिर्नान्वविन्दत्।
तमिष्टिभिरन्वैच्छत्।
तमिष्टिभिरन्वविन्दत्।
तदिष्टीनामिष्टित्वम्।
एष्टयो ह वै नाम।
ता इष्टय इत्याचक्षते परोक्षेण।
परोक्षप्रिया इव हि देवाः॥ १॥

((devebhyo vai svargo lokastiro'bhavat |
te prajāpatimabruvan |
prajāpate svargo vai no lokastiro'bhūt |
tamanviccheti |
taṃ yajñakratubhiranvaicchat |
taṃ yajñakratubhirnānvavindat |
tamiṣṭibhiranvaicchat |
tamiṣṭibhiranvavindat |
tadiṣṭīnāmiṣṭitvam |
eṣṭayo ha vai nāma |
tā iṣṭaya ityācakṣate parokṣeṇa |
parokṣapriyā iva hi devāḥ || 1 ||))

**[[3-12-2-2]]**

तमाशाऽब्रवीत्।
प्रजापत आशया वै श्राम्यसि।
अहमु वा आशाऽस्मि।
मां नु यजस्व।
अथ ते सत्याऽऽशा भविष्यति।
अनु स्वर्गं लोकं वेत्स्यसीति।
स एतमग्नये कामाय पुरोडाशमष्टाकपालं निरवपत्।
आशायै चरुम्।
अनुमत्यै चरुम्।
ततो वै तस्य सत्याऽऽशाऽभवत्।
अनु स्वर्गं लोकमविन्दत्।
सत्या ह वा अस्याशा भवति।
अनु स्वर्गं लोकं विन्दति।
य एतेन हविषा यजते।
य उ चैनदेवं वेद।
सोऽत्र जुहोति।
अग्नये कामाय स्वाहाऽऽशायै स्वाहा।
अनुमत्यै स्वाहा प्रजापतये स्वाहा।
स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते स्वाहेति॥ २॥

((tamāśā'bravīt |
prajāpata āśayā vai śrāmyasi |
ahamu vā āśā'smi |
māṃ nu yajasva |
atha te satyā''śā bhaviṣyati |
anu svargaṃ lokaṃ vetsyasīti |

sa e̱tama̱gnaye̱ kāmā̍ya puro̱ḍāśa̍ma̱ṣṭāka̍pāla̱ṃ
nira̍vapat ।
ā̱śāyai̱ ca̱rum ।
anu̍matyai ca̱rum ।
tato̱ vai tasya̍ sa̱tyā''śā̍'bhavat ।
anu̍ sva̱rgaṃ lo̱kama̍vindat ।
sa̱tyā ha̱ vā a̱syāśā̍ bhavati ।
anu̍ sva̱rgaṃ lo̱kaṃ vi̍ndati ।
ya e̱tena̍ ha̱viṣā̱ yaja̍te ।
ya u̍ cainade̱vaṃ veda̍ ।
so'tra̍ juhoti ।
a̱gnaye̱ kāmā̍ya̱ svāhā̱''śāyai̱ svāhā̎ ।
anu̍matyai̱ svāhā̎ pra̱jāpa̍taye̱ svāhā̎ ।
sva̱rgāya̍ lo̱kāya̱ svāhā̱'gnaye̎ sviṣṭa̱kṛte̱ svāheti̍ ॥ 2 ॥))

**[[3-12-2-3]]**

तं कामो᳚ऽब्रवीत्।
प्रजा॑पते॒ कामे॑न॒ वै श्रा᳚म्यसि।
अ॒हमु॒ वै कामो᳚ऽस्मि।
मां नु य॑जस्व।
अथ॑ ते स॒त्यः कामो॑ भविष्यति।
अनु॑ स्व॒र्गं लो॒कं वे॒त्स्यसीति॑।
स ए॒तम॒ग्नये॒ कामा॑य पुरो॒डाश॑म॒ष्टाक॑पालं॒ निर॑वपत्।
कामा॑य च॒रुम्।
अनु॑मत्यै च॒रुम्।
त॒तो वै तस्य॑ स॒त्यः कामो॑ऽभवत्।
अनु॑ स्व॒र्गं लो॒कम॑विन्दत्।
स॒त्यो ह॒ वा अ॑स्य॒ कामो॑ भवति।
अनु॑ स्व॒र्गं लो॒कं वि॑न्दति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
अ॒ग्नये॒ कामा॑य॒ स्वाहा॒ कामा॑य॒ स्वाहा᳚।
अनु॑मत्यै॒ स्वाहा᳚ प्र॒जाप॑तये॒ स्वाहा᳚।
स्व॒र्गाय॑ लो॒काय॒ स्वाहा॒ऽग्नये᳚ स्विष्ट॒कृते॒ स्वाहेति॑॥ ३॥

((ta̱ṃ kāmo̎'bravīt ।
prajā̍pate̱ kāme̍na̱ vai śrā̎myasi ।
a̱hamu̱ vai kāmo̎'smi ।
māṃ nu ya̍jasva ।
atha̍ te sa̱tyaḥ kāmo̍ bhaviṣyati ।
anu̍ sva̱rgaṃ lo̱kaṃ ve̱tsyasīti̍ ।
sa e̱tama̱gnaye̱ kāmā̍ya puro̱ḍāśa̍ma̱ṣṭāka̍pāla̱ṃ
nira̍vapat ।
kāmā̍ya ca̱rum ।
anu̍matyai ca̱rum ।
tato̱ vai tasya̍ sa̱tyaḥ kāmo̍'bhavat ।
anu̍ sva̱rgaṃ lo̱kama̍vindat ।
sa̱tyo ha̱ vā a̍sya̱ kāmo̍ bhavati ।
anu̍ sva̱rgaṃ lo̱kaṃ vi̍ndati ।
ya e̱tena̍ ha̱viṣā̱ yaja̍te ।
ya u̍ cainade̱vaṃ veda̍ ।
so'tra̍ juhoti ।
a̱gnaye̱ kāmā̍ya̱ svāhā̱ kāmā̍ya̱ svāhā̎ ।
anu̍matyai̱ svāhā̎ pra̱jāpa̍taye̱ svāhā̎ ।
sva̱rgāya̍ lo̱kāya̱ svāhā̱'gnaye̎ sviṣṭa̱kṛte̱ svāheti̍ ॥ 3 ॥))

**[[3-12-2-4]]**

तं ब्रह्मा᳚ऽब्रवीत्।
प्रजा॑पते॒ ब्रह्म॑णा॒ वै श्रा᳚म्यसि।
अ॒हमु॒ वै ब्रह्मा᳚ऽस्मि।
मां नु यज॑स्व।
अथ॑ ते ब्र॒ह्मण्वान्य॒ज्ञो भ॑विष्यति।
अनु॑ स्व॒र्गं लो॒कं वे॒त्स्यसीति॑।
स ए॒तम॒ग्नये॒ कामा॑य पुरो॒डाश॑म॒ष्टाक॑पालं॒ निर॑वपत्।
ब्रह्म॑णे च॒रुम्।
अनु॑मत्यै च॒रुम्।
त॒तो वै तस्य॑ ब्र॒ह्मण्वान्य॒ज्ञो॑ऽभवत्।
अनु॑ स्व॒र्गं लो॒कम॑विन्दत्।
ब्र॒ह्मण्वान्ह॒ वा अ॑स्य य॒ज्ञो भ॑वति।
अनु॑ स्व॒र्गं लो॒कं वि॑न्दति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
अ॒ग्नये॒ कामा॑य॒ स्वाहा॒ ब्रह्म॑णे॒ स्वाहा᳚।
अनु॑मत्यै॒ स्वाहा᳚ प्र॒जाप॑तये॒ स्वाहा᳚।
स्व॒र्गाय॑ लो॒काय॒ स्वाहा॒ऽग्नये᳚ स्विष्ट॒कृते॒ स्वाहेति॑॥ ४॥

((ta̱ṃ brahmā̎bravīt ।
prajā̍pate̱ brahma̍ṇā̱ vai śrā̎myasi ।
a̱hamu̱ vai brahmā̎smi ।
māṃ nu yaja̍sva ।
atha̍ te brahma̱ṇvānya̱jño bha̍viṣyati ।
anu̍ sva̱rgaṃ lo̱kaṃ ve̱tsyasīti̍ ।
sa e̱tama̱gnaye̱ kāmā̍ya puro̱ḍāśa̍ma̱ṣṭāka̍pāla̱ṃ
nira̍vapat ।
brahma̍ṇe ca̱rum ।
anu̍matyai ca̱rum ।
tato̱ vai tasya̍ brahma̱ṇvānya̱jño̍'bhavat ।
anu̍ sva̱rgaṃ lo̱kama̍vindat ।

brahmaṇvānha vā asya yajño bhavati |
anu svargaṃ lokaṃ vindati |
ya etena haviṣā yajate |
ya u cainadevaṃ veda |
so'tra juhoti |
agnaye kāmāya svāhā brahmaṇe svāhā |
anumatyai svāhā prajāpataye svāhā |
svargāya lokāya svāhā'gnaye sviṣṭakṛte svāheti || 4 ||))

**[[3-12-2-5]]**

तं यज्ञोऽब्रवीत्।
प्रजापते यज्ञेन वै श्राम्यसि।
अहमु वै यज्ञोऽस्मि।
मां नु यजस्व।
अथ ते सत्यो यज्ञो भविष्यति।
अनु स्वर्गं लोकं वेत्स्यसीति।
स एतमग्नये कामाय पुरोडाशमष्टाकपालं निरवपत्।
यज्ञाय चरुम्।
अनुमत्यै चरुम्।
ततो वै तस्य सत्यो यज्ञोऽभवत्।
अनु स्वर्गं लोकमविन्दत्।
सत्यो ह वा अस्य यज्ञो भवति।
अनु स्वर्गं लोकं विन्दति।
य एतेन हविषा यजते।
य उ चैनदेवं वेद।
सोऽत्र जुहोति।
अग्नये कामाय स्वाहा यज्ञाय स्वाहा।
अनुमत्यै स्वाहा प्रजापतये स्वाहा।
स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते स्वाहेति॥ ५॥

((taṃ yajño'bravīt |
prajāpate yajñena vai śrāmyasi |
ahamu vai yajño'smi |
māṃ nu yajasva |
atha te satyo yajño bhavaṣyati |
anu svargaṃ lokaṃ vetsyasīti |
sa etamagnaye kāmāya puroḍāśamaṣṭākapālaṃ niravapat |
yajñāya carum |
anumatyai carum |
tato vai tasya satyo yajño'bhavat |
anu svargaṃ lokamavindat |
satyo ha vā asya yajño bhavati |
anu svargaṃ lokaṃ vindati |
ya etena haviṣā yajate |
ya u cainadevaṃ veda |
so'tra juhoti |
agnaye kāmāya svāhā yajñāya svāhā |
anumatyai svāhā prajāpataye svāhā |
svargāya lokāya svāhā'gnaye sviṣṭakṛte svāheti || 5 ||))

**[[3-12-2-6]]**

तमापोऽब्रुवन्।
प्रजापतेऽप्सु वै सर्वे कामाः श्रिताः।
वयमु वा आपः स्मः।
अस्मान्नु यजस्व।
अथ त्वयि सर्वे कामाः श्रयिष्यन्ते।
अनु स्वर्गं लोकं वेत्स्यसीति।
स एतमग्नये कामाय पुरोडाशमष्टाकपालं निरवपत्।
अद्भ्यश्चरुम्।
अनुमत्यै चरुम्।
ततो वै तस्मिन्त्सर्वे कामा अश्रयन्त।
अनु स्वर्गं लोकमविन्दत्।
सर्वे ह वा अस्मिन्कामाः श्रयन्ते।
अनु स्वर्गं लोकं विन्दति।
य एतेन हविषा यजते।
य उ चैनदेवं वेद।
सोऽत्र जुहोति।
अग्नये कामाय स्वाहाऽद्भ्यः स्वाहा।
अनुमत्यै स्वाहा प्रजापतये स्वाहा।
स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते स्वाहेति॥ ६॥

((tamāpo'bruvan |
prajāpate'psu vai sarve kāmāḥ śritāḥ |
vayamu vā āpaḥ smaḥ |
asmānnu yajasva |
atha tvayi sarve kāmāḥ śrayiṣyante |
anu svargaṃ lokaṃ vetsyasīti |
sa etamagnaye kāmāya puroḍāśamaṣṭākapālaṃ niravapat |
adbhyaścarum |
anumatyai carum |
tato vai tasmintsarve kāmā aśrayanta |
anu svargaṃ lokamavindat |
sarve ha vā asminkāmāḥ śrayante |
anu svargaṃ lokaṃ vindati |
ya etena haviṣā yajate |
ya u cainadevaṃ veda |
so'tra juhoti |
agnaye kāmāya svāhā'dbhyaḥ svāhā |

anúmatyai̱ svāhā̎ pra̱jāpa̍taye̱ svāhā̎ ।
sva̱rgāya̍ lo̱kāya̱ svāhā̱'gnaye̎ sviṣṭa̱kṛte̱ svāheiti̍ ॥ 6 ॥))

**[[3-12-2-7]]**

त॒मग्निर्ब॑लि॒मान॑ब्रवीत्।
प्र॒जाप॑ते॒ऽग्नये॒ वै ब॑लि॒मते॒ सर्वा॑णि भू॒तानि॑ ब॒लिꣳ ह॑रन्ति।
अ॒हमु॒ वा अ॒ग्निर्ब॑लि॒मान॑स्मि।
मां नु य॑जस्व।
अथ॑ ते॒ सर्वा॑णि भू॒तानि॑ ब॒लिꣳ ह॑रिष्यन्ति।
अनु॑ स्व॒र्गं लो॒कं वे॒त्स्यसीति॑।
स ए॒तम॒ग्नये॒ कामा॑य पुरो॒डाश॑म॒ष्टाक॑पालं॒ निर॑वपत्।
अ॒ग्नये॑ बलि॒मते॑ च॒रुम्।
अनु॑मत्यै च॒रुम्।
त॒तो॒ वै तस्मै॒ सर्वा॑णि भू॒तानि॑ ब॒लिम॑हरन्।
अनु॑ स्व॒र्गं लो॒कम॑विन्दत्।
सर्वा॑णि ह॒ वा अ॑स्मै भू॒तानि॑ ब॒लिꣳ ह॑रन्ति।
अनु॑ स्व॒र्गं लो॒कं वि॑न्दति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
अ॒ग्नये॒ कामा॑य॒ स्वाहा॒ऽग्नये॑ बलि॒मते॒ स्वाहा॑।
अनु॑मत्यै॒ स्वाहा᳚ प्र॒जाप॑तये॒ स्वाहा᳚।
स्व॒र्गाय॑ लो॒काय॒ स्वाहा॒ऽग्नये᳚ स्विष्ट॒कृते॒ स्वाहेति॑॥ ७॥

((tama̱gnirba̍li̱mānábravīt ।
prajā̍pate̱'gnaye̱ vai ba̍li̱mate̱ sarvā̍ṇi bhū̱tāni̍ ba̱liṁ ha̍ranti ।
a̱hamu̱ vā a̱gnirba̍li̱mānasmi ।
māṃ nu ya̍jasva ।
atha̍ te̱ sarvā̍ṇi bhū̱tāni̍ ba̱liṁ ha̍riṣyanti ।
anu̍ sva̱rgaṃ lo̱kaṃ ve̱tsyasīti̍ ।
sa e̱tama̱gnaye̱ kāmā̍ya puro̱ḍāśa̍ma̱ṣṭāka̍pālaṃ̱ nira̍vapat ।
a̱gnaye̍ bali̱mate̍ ca̱rum ।
anu̍matyai ca̱rum ।
tato̱ vai tasmai̱ sarvā̍ṇi bhū̱tāni̍ ba̱lima̍haran ।
anu̍ sva̱rgaṃ lo̱kama̍vindat ।
sarvā̍ṇi ha̱ vā a̍smai bhū̱tāni̍ ba̱liṁ ha̍ranti ।
anu̍ sva̱rgaṃ lo̱kaṃ vi̍ndati ।
ya e̱tena̍ ha̱viṣā̱ yaja̍te ।
ya u̍ cainade̱vaṃ veda̍ ।
so'tra̍ juhoti ।
a̱gnaye̱ kāmā̍ya̱ svāhā̱'gnaye̍ bali̱mate̱ svāhā̍ ।
anu̍matyai̱ svāhā̎ pra̱jāpa̍taye̱ svāhā̎ ।
sva̱rgāya̍ lo̱kāya̱ svāhā̱'gnaye̎ sviṣṭa̱kṛte̱ svāheti̍ ॥ 7 ॥))

**[[3-12-2-8]]**

तमनु॑वित्तिरब्रवीत्।
प्र॒जाप॑ते स्व॒र्गं वै लो॒कमनु॑विवित्ससि।
अ॒हमु॒ वा अनु॑वित्तिरस्मि।
मां नु य॑जस्व।
अथ॑ ते स॒त्याऽनु॑वित्तिर्भ॑विष्यति।
अनु॑ स्व॒र्गं लो॒कं वे॒त्स्यसीति॑।
स ए॒तम॒ग्नये॒ कामा॑य पुरो॒डाश॑म॒ष्टाक॑पालं॒ निर॑वपत्।
अनु॑वित्त्यै च॒रुम्।
अनु॑मत्यै च॒रुम्।
त॒तो॒ वै तस्य॑ स॒त्याऽनु॑वित्तिरभवत्।
अनु॑ स्व॒र्गं लो॒कम॑विन्दत्।
स॒त्या ह॒ वा अ॒स्यानु॑वित्तिर्भ॑वति।
अनु॑ स्व॒र्गं लो॒कं वि॑न्दति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
अ॒ग्नये॒ कामा॑य॒ स्वाहाऽनु॑वित्त्यै॒ स्वाहा᳚।
अनु॑मत्यै॒ स्वाहा᳚ प्र॒जाप॑तये॒ स्वाहा᳚।
स्व॒र्गाय॑ लो॒काय॒ स्वाहा॒ऽग्नये᳚ स्विष्ट॒कृते॒ स्वाहेति॑॥ ८॥

((tamanu̍vittirabravīt ।
prajā̍pate sva̱rgaṃ vai lo̱kamanu̍vivitsasi ।
a̱hamu̱ vā anu̍vittirasmi ।
māṃ nu ya̍jasva ।
atha̍ te sa̱tyā'nu̍vittirbhaviṣyati ।
anu̍ sva̱rgaṃ lo̱kaṃ ve̱tsyasīti̍ ।
sa e̱tama̱gnaye̱ kāmā̍ya puro̱ḍāśa̍ma̱ṣṭāka̍pālaṃ̱ nira̍vapat ।
anu̍vittyai ca̱rum ।
anu̍matyai ca̱rum ।
tato̱ vai tasya̍ sa̱tyā'nu̍vittirabhavat ।
anu̍ sva̱rgaṃ lo̱kama̍vindat ।
sa̱tyā ha̱ vā a̱syānu̍vittirbhavati ।
anu̍ sva̱rgaṃ lo̱kaṃ vi̍ndati ।
ya e̱tena̍ ha̱viṣā̱ yaja̍te ।
ya u̍ cainade̱vaṃ veda̍ ।
so'tra̍ juhoti ।
a̱gnaye̱ kāmā̍ya̱ svāhā'nu̍vittyai̱ svāhā̎ ।
anu̍matyai̱ svāhā̎ pra̱jāpa̍taye̱ svāhā̎ ।
sva̱rgāya̍ lo̱kāya̱ svāhā̱'gnaye̎ sviṣṭa̱kṛte̱ svāheti̍ ॥ 8 ॥))

**[[3-12-2-9]]**

ता वा ए॒ताः स॒प्त स्व॒र्गस्य॑ लो॒कस्य॒ द्वार॑ः।
दि॒वःश्ये॑न॒योऽनु॑वित्तयो॒ नाम॑।
आशाँ॑ प्रथ॒माꣳ र॑क्षति।
कामौँ॑ द्वि॒तीया॑म्।
ब्रह्म॑ तृ॒तीया॑म्।
य॒ज्ञश्च॑तु॒र्थीम्।
आप॑ः पञ्च॒मीम्।
अ॒ग्निर्ब॑लि॒मान्त्ष॒ष्ठीम्।
अनु॑वित्तिः सप्त॒मीम्।
अनु॑ ह॒ वै स्व॒र्गं लो॒कं वि॑न्दति।
का॒म॒चारौँ॑ऽस्य स्व॒र्गे लो॒के भ॑वति।
य ए॒ताभि॑रि॒ष्टिभि॒र्यज॑ते।
य उ॑ चैना ए॒वं वेद॑।
तास्व॑न्वि॒ष्टि।
प॒ष्ठौ॒ही॒वरां द॑द्यात्क॒ꣳसं च॑।
स्त्रि॒यै॑ चाभा॒रꣳ समृ॑द्ध्यै॥ ९॥ ॥ २॥

((tā vā e̱tāḥ sa̱pta sva̱rgasya̍ lo̱kasya̱ dvārā̍ḥ ।
di̱vaḥśye̍na̱yo'nu̍vittayo̱ nāma̍ ।
āśā̐ pratha̱mā̐ ra̍kṣati ।
kāmō̐ dvi̱tīyā̐m ।
brahma̍ tṛ̱tīyā̐m ।
ya̱jñaśca̍tu̱rthīm ।
āpa̍ḥ pañca̱mīm ।
a̱gnirba̍li̱māntṣa̱ṣṭhīm ।
anu̍vittiḥ sapta̱mīm ।
anu̍ ha̱ vai sva̱rgaṃ lo̱kaṃ vi̍ndati ।
kā̱ma̱cārō̐'sya sva̱rge lo̱ke bha̍vati ।
ya e̱tābhi̱riṣṭi̱bhi̱ryaja̍te ।
ya u̍ cainā e̱vaṃ veda̍ ।
tāsva̍nvi̱ṣṭi̱ ।
pa̱ṣṭhau̱hī̱va̱rāṃ da̍dyātka̱ꣳsaṃ ca̍ ।
striya̍i cābhā̱ra̐ṃ sami̍ddhyai ॥ 9 ॥ ॥ 2 ॥))

**[[3-12-3-1]]**

तप॑सा दे॒वा दे॒वता॒मग्र॑ आयन्।
त॒प॒सर्ष॑यः स्व॑रन्व॑विन्दन्।
तप॑सा स॒पत्ना॒न्प्रणु॑दा॒मारा॑तीः।
ये॒नेदं विश्वं॒ परि॑भूतं॒ यद॑स्ति।
प्र॒थ॒म॒जं दे॒वꣳ ह॒विषा॑ विधेम।
स्व॒यं॒भु ब्रह्म॑ पर॒मं तपो॒ यत्।
स ए॒व पु॒त्रः स पि॒ता स मा॒ता।
तपो॑ ह य॒क्षं प्र॑थ॒मꣳ सं ब॑भूव।
श्र॒द्धया दे॑वो दे॒वत्वम॑श्नुते।
श्र॒द्धा प्र॑ति॒ष्ठा लो॒कस्य॑ दे॒वी॥ १॥

((tapa̍sā de̱vā de̱vatā̱magra̍ āyan ।
tapa̱sarṣa̍ya̱ḥ sva̍ranva̍vindan ।
tapa̍sā sa̱patnā̱npraṇu̍dā̱mārā̍tīḥ ।
yene̱daṃ viśva̱ṃ pari̍bhūta̱ṃ yadasti̍ ।
pra̱tha̱ma̱jaṃ de̱va̐ṃ ha̱viṣā̍ vidhema ।
sva̱yam̱bhu brahma̍ para̱maṃ tapo̱ yat ।
sa e̱va pu̱traḥ sa pi̱tā sa mā̱tā ।
tapo̍ ha ya̱kṣaṃ pra̍tha̱ma̐ṃ saṃbabhūva ।
śra̱ddhayā de̍vo deva̱tvama̍śnute ।
śra̱ddhā pra̍ti̱ṣṭhā lo̱kasya̍ de̱vī ॥ 1 ॥))

**[[3-12-3-2]]**

सा नो॑ जुषा॒णोप॑ य॒ज्ञमागा॑त्।
काम॑वत्सा॒ऽमृतं॒ दुहा॑ना।
श्र॒द्धा दे॒वी प्र॑थम॒जा ऋ॒तस्य॑।
विश्व॑स्य भ॒र्त्री जग॑तः प्रति॒ष्ठा।
ताꣳ श्र॒द्धाꣳ ह॒विषा॑ यजामहे।
सा नो॑ लो॒कम॒मृतं॑ दधातु।
ईशा॑ना दे॒वी भुव॑न॒स्याधि॑पत्नी।
आगा॑त्स॒त्यꣳ ह॒विरि॒दं जु॑षा॒णम्।
यस्मा॑द्दे॒वा ज॑ज्ञि॒रे भुव॑नं च॒ विश्वे॑।
तस्मै॑ विधेम ह॒विषा॑ घृ॒तेन॑॥ २॥

((sā no̍ juṣā̱ṇopa̍ ya̱jñamāgā̍t ।
kāma̍vatsā'mṛta̱ṃ duhā̍nā ।
śra̱ddhā de̱vī pra̍thama̱jā ṛ̱tasya̍ ।
viśva̍sya bha̱rtrī jaga̍taḥ prati̱ṣṭhā ।
tā̐ṃ śra̱ddhā̐ṃ ha̱viṣā̍ yajāmahe ।
sā no̍ lo̱kama̱mṛta̱ṃ dadhātu ।
īśā̍nā de̱vī bhuva̍na̱syādhi̍patnī ।
āgā̍tsa̱tya̐ṃ ha̱viri̱daṃ ju̍ṣā̱ṇam ।
yasmā̍dde̱vā ja̍jñire̱ bhuva̍naṃ ca̱ viśve̍ ।
tasmai̍ vidhema ha̱viṣā̍ ghṛ̱tena̍ ॥ 2 ॥))

**[[3-12-3-3]]**

यथा॑ दे॒वैः स॑ध॒माद॑ं मदेम।
यस्य॑ प्रति॒ष्ठोर्व॑न्तरि॑क्षम्।
यस्मा॑द्दे॒वा ज॑ज्ञि॒रे भुव॑नं च॒ सर्वे॑।
तत्स॒त्यमर्च॑दु॒प॑ य॒ज्ञं न॒ आगा॑त्।
ब्र॒ह्माहु॑तीरु॒पमोद॑मानम्।
मन॑सो॒ वशे॒ सर्व॑मि॒दं ब॑भूव।

नान्यस्य॒ मनो॒ व॒शमन्वि॑याय।
भीष्मो॒ हि दे॒वः सह॑सः॒ सही॑यान्।
स नो॑ जुषा॒ण उप॑ य॒ज्ञमागा॑॑त्।
आकू॑तीना॒मधि॑पतिं॒ चेत॑सां च॥ ३॥

((yathā̍ de̱vaiḥ sa̍dha̱mādam̐ madema ।
yasyā̍ prati̱ṣṭhorvā̍ntari̍kṣam ।
yasmā̍̍ddevā jā̍jñire̱ bhuvā̍nam̐ ca̱ sarve̍̍ ।
tatsa̱tyamarca̱dupā̍ ya̱jñam̐ na̱ āgā̍̍t ।
brahmāhū̍tī̱rupa̱modā̍mānam ।
manā̍so̱ vaśe̱ sarvā̍mi̱dam̐ bā̍bhūva ।
nānyasya̱ mano̱ vaśa̱manvi̍yāya ।
bhīṣmo hi de̱vaḥ sahā̍sa̱ḥ sahī̍yān ।
sa nō̍ juṣā̱ṇa upā̍ ya̱jñamāgā̍̍t ।
ākū̍tīnā̱madhi̍pati̱m cetā̍sām̐ ca ॥ 3 ॥))

**[[3-12-3-4]]**

सं॒क॒ल्पजू॑तिं दे॒वं वि॑प॒श्चिम्।
मनो॒ राजा॑नमि॒ह व॒र्धय॑न्तः।
उ॒प॒ह॒वे॑॑ऽस्य सुम॒तौ स्या॑म।
चर॑णं प॒वित्रं॒ वित॑तं पुरा॒णम्।
येन॑ पू॒तस्तर॑ति दु॒ष्कृता॑नि।
तेन॑ प॒वित्रे॑ण शु॒द्धेन॑ पू॒ताः।
अति॑ पा॒प्मान॒मरा॑तिं तरेम।
लो॒कस्य॒ द्वार॑मर्चि॒मत्प॒वित्र॑॑म्।
ज्योति॑ष्म॒द्भ्राज॑मा॒नं मह॑स्वत्।
अ॒मृत॑स्य॒ धारा॑ बहु॒धा दोह॑मानम्।
चर॑णं नो लो॒के सुधि॑तां दधातु।
अ॒ग्निर्मू॒र्धा भुव॑ः।
अनु॑ नो॒ऽद्यानु॑मति॒रन्वि॒द॑नुमते॒ त्वम्।
ह॒व्य॒वाह॒ꣳ॒॑ स्वि॑ष्टम्॥ ४॥
दे॒वी घृ॒तेन॒ चेत॑सां च॒ दोह॑मानं च॒त्वारि॑ च॥ ३॥

((sam̐ka̱lpajū̍tim̐ de̱vam̐ vi̍pa̱ścim ।
mano̱ rājā̍nami̱ha va̱rdhayā̍ntaḥ ।
u̱pa̱ha̱ve̍̍'sya suma̱tau syā̍ma ।
carā̍ṇam̐ pa̱vitram̐ vitā̍tam̐ purā̱ṇam ।
yenā̍ pū̱tastarā̍ti du̱ṣkṛtā̍ni ।
tenā̍ pa̱vitre̱ṇa śu̱ddhenā̍ pū̱tāḥ ।
ati̍ pā̱pmāna̱marā̍tim̐ tarema ।
lo̱kasya̱ dvārā̍marci̱matpa̱vitrā̍̍m ।
jyoti̍ṣma̱dbhrājā̍māna̱m mahā̍svat ।
a̱mṛtā̍sya̱ dhārā̍ bahu̱dhā dohā̍mānam ।
carā̍ṇam̐ no lo̱ke sudhi̍tām̐ dadhātu ।
a̱gnirmū̱rdhā bhuvā̍ḥ ।
anu̍ no̱'dyānu̍mati̱ranvidā̍numate̱ tvam ।
ha̱vya̱vāha̱m̐̍ svi̍ṣṭam ॥ 4 ॥
de̱vī ghṛ̱tena̱ cetā̍sām̐ ca̱ dohā̍mānam̐ ca̱tvāri̍ ca ॥ 3 ॥))

**[[3-12-4-1]]**

दे॒वेभ्यो॒ वै स्व॒र्गो लो॒कस्ति॒रो॑ऽभवत्।
ते प्र॒जाप॑तिमब्रुवन्।
प्रजा॑पते स्व॒र्गो वै नो॑ लो॒कस्ति॒रो॑ऽभूत्।
तमन्वि॒च्छेति॑।
तं य॑ज्ञक्र॒तुभि॒रन्वै॑॑च्छत्।
तं य॑ज्ञक्र॒तुभि॒र्नान्व॑विन्दत्।
तमिष्टि॑भि॒रन्वै॑च्छत्।
तमिष्टि॑भि॒रन्व॑विन्दत्।
तदिष्टी॑नामिष्टि॒त्वम्।
एष्ट॑यो ह॒ वै नाम॑।
ता इष्ट॑य इत्याच॑क्षते प॒रोक्षे॑ण।
प॒रोक्ष॑प्रिया इ॒व हि दे॒वाः॥ १॥

((de̱vebhyo̱ vai sva̱rgo lo̱kasti̱rō̍'bhavat ।
te pra̱jāpā̍timabruvan ।
prajā̍pate sva̱rgo vai nō̍ lo̱kasti̱rō̍'bhūt ।
tamanvi̱ccheti̍ ।
tam̐ yā̍jñakra̱tubhi̱ranvai̍̍cchat ।
tam̐ yā̍jñakra̱tubhi̱rnānvā̍vindat ।
tamiṣṭi̍bhi̱ranvai̍cchat ।
tamiṣṭi̍bhi̱ranvā̍vindat ।
tadiṣṭī̍nāmiṣṭi̱tvam ।
eṣṭā̍yo ha̱ vai nāmā̍ ।
tā iṣṭā̍ya̱ ityācā̍kṣate pa̱rokṣe̍ṇa ।
pa̱rokṣā̍priyā iva̱ hi de̱vāḥ ॥ 1 ॥))

**[[3-12-4-2]]**

तं तपो॑॑ऽब्रवीत्।
प्रजा॑पते॒ तप॑सा॒ वै श्रा॑॑म्यसि।
अ॒हमु॒ वै तपो॑॑ऽस्मि।
मां नु य॑जस्व।
अथ॑ ते स॒त्यं तपो॑ भविष्यति।
अनु॑ स्व॒र्गं लो॒कं वे॒त्स्यसीति॑।
स ए॒तमा॑॑ग्नेयम॒ष्टाक॑पाल॒ं निर॑वपत्।
तप॑से च॒रुम्।
अनु॑मत्यै च॒रुम्।
तता॒ वै तस्य॑ स॒त्यं तपो॑ऽभवत्।
अनु॑ स्व॒र्गं लो॒कम॑विन्दत्।

स॒त्यꣳ ह॒ वा अ॑स्य॒ तपो॑ भवति।
अनु॑ स्व॒र्गं लो॒कं वि॑न्दति।
य ए॒तेन॑ ह॒विषा॑ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
अ॒ग्नये॒ स्वाहा॒ तप॑से॒ स्वाहा᳚।
अनु॑मत्यै॒ स्वाहा᳚ प्र॒जाप॑तये॒ स्वाहा᳚।
स्व॒र्गाय॑ लो॒काय॒ स्वाहा॒ऽग्नये᳚ स्विष्ट॒कृते॒ स्वाहेति॑॥ २॥

((taṃ tapo''bravīt ।
prajāpate tapasā vai śrāmyasi ।
ahamu vai tapo'smi ।
māṃ nu yajasva ।
atha te satyaṃ tapo bhaviṣyati ।
anu svargaṃ lokaṃ vetsyasīti ।
sa etamāgneyamaṣṭākapālaṃ niravapat ।
tapase carum ।
anumatyai carum ।
tato vai tasya satyaṃ tapo'bhavat ।
anu svargaṃ lokamavindat ।
satyam̐ ha vā asya tapo bhavati ।
anu svargaṃ lokaṃ vindati ।
ya etena haviṣā yajate ।
ya u cainadevaṃ veda ।
so'tra juhoti ।
agnaye svāhā tapase svāhā ।
anumatyai svāhā prajāpataye svāhā ।
svargāya lokāya svāhā'gnaye sviṣṭakṛte svāheti ॥ 2 ॥))

**[[3-12-4-3]]**

तꣳ श्र॒द्धाऽब्र॑वीत्।
प्र॒जाप॑ते श्र॒द्धया॒ वै श्रा᳚म्यसि।
अ॒हमु॒ वै श्र॒द्धाऽस्मि॑।
मां नु यज॑स्व।
अथ॑ ते स॒त्या श्र॒द्धा भ॑विष्यति।
अनु॑ स्व॒र्गं लो॒कं वे॒त्स्यसीति॑।
स ए॒तमा᳚ग्ने॒यम॒ष्टाक॑पालं॒ निर॑वपत्।
श्र॒द्धायै᳚ च॒रुम्।
अनु॑मत्यै च॒रुम्।
त॒तो वै तस्य॑ स॒त्या श्र॒द्धाऽभ॑वत्।
अनु॑ स्व॒र्गं लो॒कम॑विन्दत्।
स॒त्या ह॒ वा अ॑स्य॒ श्र॒द्धा भ॑वति।
अनु॑ स्व॒र्गं लो॒कं वि॑न्दति।
य ए॒तेन॑ ह॒विषा॑ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
अ॒ग्नये॒ स्वाहा᳚ श्र॒द्धायै॒ स्वाहा᳚।
अनु॑मत्यै॒ स्वाहा᳚ प्र॒जाप॑तये॒ स्वाहा᳚।
स्व॒र्गाय॑ लो॒काय॒ स्वाहा॒ऽग्नये᳚ स्विष्ट॒कृते॒ स्वाहेति॑॥ ३॥

((tam̐ śraddhā'bravīt ।
prajāpate śraddhayā vai śrāmyasi ।
ahamu vai śraddhā'smi ।
māṃ nu yajasva ।
atha te satyā śraddhā bhaviṣyati ।
anu svargaṃ lokaṃ vetsyasīti ।
sa etamāgneyamaṣṭākapālaṃ niravapat ।
śraddhāyai carum ।
anumatyai carum ।
tato vai tasya satyā śraddhā'bhavat ।
anu svargaṃ lokamavindat ।
satyā ha vā asya śraddhā bhavati ।
anu svargaṃ lokaṃ vindati ।
ya etena haviṣā yajate ।
ya u cainadevaṃ veda ।
so'tra juhoti ।
agnaye svāhā śraddhāyai svāhā ।
anumatyai svāhā prajāpataye svāhā ।
svargāya lokāya svāhā'gnaye sviṣṭakṛte svāheti ॥ 3 ॥))

**[[3-12-4-4]]**

तꣳ स॒त्यम॑ब्रवीत्।
प्र॒जाप॑ते स॒त्येन॒ वै श्रा᳚म्यसि।
अ॒हमु॒ वै स॒त्यम॑स्मि।
मां नु यज॑स्व।
अथ॑ ते स॒त्यꣳ स॒त्यं भ॑विष्यति।
अनु॑ स्व॒र्गं लो॒कं वे॒त्स्यसीति॑।
स ए॒तमा᳚ग्ने॒यम॒ष्टाक॑पालं॒ निर॑वपत्।
स॒त्याय॑ च॒रुम्।
अनु॑मत्यै च॒रुम्।
त॒तो वै तस्य॑ स॒त्यꣳ स॒त्यम॑भवत्।
अनु॑ स्व॒र्गं लो॒कम॑विन्दत्।
स॒त्यꣳ ह॒ वा अ॑स्य स॒त्यं भ॑वति।
अनु॑ स्व॒र्गं लो॒कं वि॑न्दति।
य ए॒तेन॑ ह॒विषा॑ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।

सोऽत्र जुहोति।
अग्नये स्वाहा सत्याय स्वाहा।
अनुमत्यै स्वाहा प्रजापतये स्वाहा।
स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते स्वाहेति॥ ४॥

((taṃ satyamabravīt |
prajāpate satyena vai śrāmyasi |
ahamu vai satyamasmi |
māṃ nu yajasva |
atha te satyaṃ satyaṃ bhaviṣyati |
anu svargaṃ lokaṃ vetsyasīti |
sa etamāgneyamaṣṭākapālaṃ niravapat |
satyāya carum |
anumatyai carum |
tato vai tasya satyaṃ satyamabhavat |
anu svargaṃ lokamavindat |
satyaṃ ha vā asya satyaṃ bhavati |
anu svargaṃ lokaṃ vindati |
ya etena haviṣā yajate |
ya u cainadevaṃ veda |
so'tra juhoti |
agnaye svāhā satyāya svāhā |
anumatyai svāhā prajāpataye svāhā |
svargāya lokāya svāhā'gnaye sviṣṭakṛte svāheti || 4 ||))

**[[3-12-4-5]]**

तं मनोऽब्रवीत्।
प्रजापते मनसा वै श्राम्यसि।
अहमु वै मनोऽस्मि।
मां नु यजस्व।
अथ ते सत्यं मनो भविष्यति।
अनु स्वर्गं लोकं वेत्स्यसीति।
स एतमाग्नेयमष्टाकपालं निरवपत्।
मनसे चरुम्।
अनुमत्यै चरुम्।
ततो वै तस्य सत्यं मनोऽभवत्।
अनु स्वर्गं लोकमविन्दत्।
सत्यꣳ ह वा अस्य मनो भवति।
अनु स्वर्गं लोकं विन्दति।
य एतेन हविषा यजते।
य उ चैनदेवं वेद।
सोऽत्र जुहोति।
अग्नये स्वाहा मनसे स्वाहा।
अनुमत्यै स्वाहा प्रजापतये स्वाहा।
स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते स्वाहेति॥ ५॥

((taṃ mano'bravīt |
prajāpate manasā vai śrāmyasi |
ahamu vai mano'smi |
māṃ nu yajasva |
atha te satyaṃ mano bhaviṣyati |
anu svargaṃ lokaṃ vetsyasīti |
sa etamāgneyamaṣṭākapālaṃ niravapat |
manase carum |
anumatyai carum |
tato vai tasya satyaṃ mano'bhavat |
anu svargaṃ lokamavindat |
satyaṃ ha vā asya mano bhavati |
anu svargaṃ lokaṃ vindati |
ya etena haviṣā yajate |
ya u cainadevaṃ veda |
so'tra juhoti |
agnaye svāhā manase svāhā |
anumatyai svāhā prajāpataye svāhā |
svargāya lokāya svāhā'gnaye sviṣṭakṛte svāheti || 5 ||))

**[[3-12-4-6]]**

तं चरणमब्रवीत्।
प्रजापते चरणेन वै श्राम्यसि।
अहमु वै चरणमस्मि।
मां नु यजस्व।
अथ ते सत्यं चरणं भविष्यति।
अनु स्वर्गं लोकं वेत्स्यसीति।
स एतमाग्नेयमष्टाकपालं निरवपत्।
चरणाय चरुम्।
अनुमत्यै चरुम्।
ततो वै तस्य सत्यं चरणमभवत्।
अनु स्वर्गं लोकमविन्दत्।
सत्यꣳ ह वा अस्य चरणं भवति।
अनु स्वर्गं लोकं विन्दति।
य एतेन हविषा यजते।
य उ चैनदेवं वेद।
सोऽत्र जुहोति।
अग्नये स्वाहा चरणाय स्वाहा।
अनुमत्यै स्वाहा प्रजापतये स्वाहा।
स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते स्वाहेति॥ ६॥

((taṃ caráṇamabravīt |
prajā́pate caráṇena vai śrāmyasi |
a̱hamu̱ vai caráṇamasmi |
māṃ nu yájasva |
athá te sa̱tyaṃ caráṇaṃ bhaviṣyati |
anú sva̱rgaṃ lo̱kaṃ ve̱tsyasī́ti |
sa e̱tamā̐gne̱yama̱ṣṭākápālaṃ̱ niravapat |
caráṇāya ca̱rum |
anúmatyai ca̱rum |
tato̱ vai tasyá sa̱tyaṃ caráṇamabhavat |
anú sva̱rgaṃ lo̱kamávindat |
sa̱tyaṁ ha̱ vā ásya̱ caráṇaṃ bhavati |
anú sva̱rgaṃ lo̱kaṃ vindati |
ya e̱tená ha̱viṣā̱ yajáte |
ya u cainade̱vaṃ vedá |
so'trá juhoti |
a̱gnaye̱ svāhā̱ caráṇāya̱ svāhā̐ |
anúmatyai̱ svāhā̐ pra̱jāpátaye svāhā̐ |
sva̱rgāyá lo̱kāya̱ svāhā̱'gnayē sviṣṭa̱kṛte̱ svāhetí || 6 ||))

**[[3-12-4-7]]**

ता वा ए̱ताः पञ्च॑ स्व̱र्गस्य॑ लो̱कस्य̱ द्वार॑ः।
अपा॑घा अनु॑वित्तयो॒ नाम॑।
तप॑ः प्र॒थमा॑ꣳ र॑क्षति।
श्र॒द्धा द्वि॒तीया॑म्।
स॒त्यं तृ॒तीया॑म्।
मन॑श्चतु॒र्थीम्।
चर॑णं पञ्च॒मीम्।
अनु॑ ह॒ वै स्व॒र्गं लो॒कं वि॑न्दति।
का॒म॒चारो॑ऽस्य स्व॒र्गे लो॒के भ॑वति।
य ए॒ताभि॑रि॒ष्टिभि॑र्यज॑ते।
य उ॑ चैना ए॒वं वेद॑।
तास्व॑न्वि॒ष्टि।
प॒ष्ठौ॒ही॒वरां॑ द॑द्यात्क॒ꣳसं च॑।
स्त्रियै॑ चाभा॒रꣳ सम॑ृद्ध्यै॥ ७॥ ॥ ४॥

((tā vā e̱tāḥ pañcá sva̱rgasyá lo̱kasya̱ dvārá̱ḥ |
apághā̱ anúvittayo̱ nāmá |
tapáḥ pratha̱māṁ rákṣati |
śra̱ddhā dvi̱tīyā̐m |
sa̱tyaṃ tṛ̱tīyā̐m |
manáścatu̱rthīm |
caráṇaṃ pañca̱mīm |
anú ha̱ vai sva̱rgaṃ lo̱kaṃ víndati |
kā̱ma̱cārō'sya sva̱rge lo̱ke bhávati |
ya e̱tābhi̱riṣṭí̱bhi̱ryajáte |
ya u cainā e̱vaṃ vedá |
tāsvánvi̱ṣṭi |
pa̱ṣṭhau̱hī̱va̱rāṃ dádyātka̱ṁsaṃ cá |
striyaí cābhā̱raṁ samṛ́ddhyai || 7 || || 4 ||))

**[[3-12-5-1]]**

ब्रह्म॒ वै चतु॑र्होता॒रः।
चतु॑र्होतृ॒भ्योऽधि॑य॒ज्ञो निर्मि॑तः।
नैन॑ꣳ श॒प्तम्।
नाभिच॑रित॒माग॑च्छति।
य ए॒वं वेद॑।
यो ह॒ वै चतु॑र्होतृणां चतु॑र्होतृ॒त्वं वेद॑।
अथो॒ पञ्च॑होतृत्वम्।
सर्वा॑ हास्मै॒ दिश॑ः कल्पन्ते।
वा॒चस्पति॒र्होता॒ दश॑होतृणाम्।
पृ॒थि॒वी होता॒ चतु॑र्होतृणाम्॥ १॥

((brahma̱ vai catúrhotāraḥ |
catúrhotṛ̱bhyo'dhíya̱jño nirmítaḥ |
nainaṁ śa̱ptam |
nābhicárita̱māgácchati |
ya e̱vaṃ vedá |
yo ha̱ vai catúrhotṛṇāṃ caturhotṛ̱tvaṃ vedá |
atho̱ pañcáhotṛtvam |
sarvá hāsmai̱ diśáḥ kalpante |
vā̱caspati̱rhotā̱ daśáhotṝṇām |
pṛ̱thi̱vī hotā̱ catúrhotṝṇām || 1 ||))

**[[3-12-5-2]]**

अ॒ग्निर्होता॒ पञ्च॑होतृणाम्।
वाग्घोता॒ षड्ढो॑तृणाम्।
म॒हाह॑वि॒र्होता॑ स॒प्तहो॑तृणाम्।
ए॒तद्वै चतु॑र्होतृणां चतु॑र्होतृ॒त्वम्।
अथो॒ पञ्च॑होतृत्वम्।
सर्वा॑ हास्मै॒ दिश॑ः कल्पन्ते।
य ए॒वं वेद॑।
ए॒षा वै स॑र्ववि॒द्या।
ए॒तद्भे॑ष॒जम्।
ए॒षा प॒ङ्क्तिः स्व॒र्गस्य॑ लोकस्या॑ञ्ज॒साऽय॑निः स्रु॒तिः॥ २॥

((a̱gnirhotā̱ pañcáhotṝṇām |
vā̱gghotā̱ ṣa̱ḍḍhótṝṇām |
ma̱hāhávi̱rhotá sa̱ptahótṝṇām |
e̱tadvai catúrhotṛṇāṃ caturhotṛ̱tvam |
atho̱ pañcáhotṛtvam |
sarvá hāsmai̱ diśáḥ kalpante |
ya e̱vaṃ vedá |
e̱ṣā vai sárvavi̱dyā |
e̱tadbhéṣa̱jam |

e̱ṣā pa̱ṅktiḥ sva̱rgasya̍ lo̱kasya̍̄ñja̱sā'ya̍niḥ sru̱tiḥ || 2 ||))

**[[3-12-5-3]]**

ए॒तान्योऽध्यैत्यच्छ॑दिर्द॒र्शे॑ याव॑त्त॒रस॑म्।
स्व॑रेति।
अ॒न॒प॒ब्र॒वः स॒र्व॑मायु॑रेति।
वि॒न्द॒ते॑ प्र॒जाम्।
रा॒यस्पोष॑ं गौप॒त्यम्।
ब्र॒ह्म॒व॒र्च॒सी भ॑वति।
ए॒तान्योऽध्यैति॑।
स्पृ॒णोत्या॒त्मान॑म्।
प्र॒जां पि॒तॄन्।
ए॒तान्वा अ॑रु॒ण औ॑पवे॒शिर्वि॒दाञ्च॑कार॥ ३॥

((e̱tānyo'dhyaityacchȧdirda̱rśe yāvȧtta̱rasam̐ |
svȧreti |
a̱na̱pa̱bra̱vaḥ sarva̱māyu̇reti |
vi̱ndate̐ pra̱jām |
rā̱yaspoṣam̐ gaupa̱tyam |
bra̱hma̱va̱rca̱sī bhȧvati |
e̱tānyo'dhyaiti̍ |
spr̥̱ṇotyā̱tmānam̐ |
pra̱jāṃ pi̱tr̥̄n |
e̱tānvā ȧru̱ṇa au̇pave̱śirvi̱dāñcȧkāra || 3 ||))

**[[3-12-5-4]]**

ए॒तैर॑धिवा॒दमपा॑जयत्।
अथो॒ विश्व॑ं पा॒प्मान॑म्।
स्व॑र्ययौ।
ए॒तान्योऽध्यैति॑।
अ॒धि॒वा॒दं ज॑यति।
अथो॒ विश्व॑ं पा॒प्मान॑म्।
स्व॑रेति।
ए॒तैर॒ग्निं चि॑न्वीत स्व॒र्गका॑मः।
ए॒तैरायु॑ष्कामः।
प्र॒जाप॒शुका॑मो वा॥ ४॥

((e̱tairȧdhivā̱damapȧjayat |
atho̱ viśvaṃ̇ pā̱pmānam̐ |
svȧryayau |
e̱tānyo'dhyaiti̍ |
a̱dhi̱vā̱daṃ jȧyati |
atho̱ viśvaṃ̇ pā̱pmānam̐ |
svȧreti |
e̱taira̱gniṃ ci̇nvīta sva̱rgakȧmaḥ |
e̱tairāyu̇ṣkāmaḥ |
pra̱jāpa̱śukȧmo vā || 4 ||))

**[[3-12-5-5]]**

पु॒रस्ता॒द्दश॑होता॒रमु॒दञ्च॑मु॒पद॑धाति याव॑त्प॒दम्।
हृद॑यं॒ यजु॑षी॒ पत्न्यौ॑ च।
द॒क्षि॒ण॒तः प्राञ्च॑ं चतु॑र्होतारम्।
प॒श्चादु॒दञ्च॑ं पञ्च॑होतारम्।
उ॒त्त॒र॒तः प्राञ्च॒ꣳ॒ षड्ढो॑तारम्।
उ॒परि॑ष्टा॒त्प्राञ्चꣳ॑ स॒प्तहो॑तारम्।
हृद॑यं॒ यजूꣳ॑षि॒ पत्न्य॑श्च।
य॒था॒व॒का॒शं ग्रहा॑न्।
य॒था॒व॒का॒शं प्र॑तिग्र॒हाँल्लो॑कंपृ॒णाश्च॑।
सर्वा॑ हास्यै॒ता दे॒वता॑ः प्री॒ता अ॒भीष्टा॑ भवन्ति॥ ५॥

((pu̱rastā̱ddaśȧhotā̱ra̱mudȧñca̱mupȧdadhāti
yāvatpa̱dam |
hr̥̱dȧyaṃ̱ yaju̇ṣī̱ patnyau̇ ca |
da̱kṣi̱ṇa̱taḥ prāñca̱ṃ catu̇rhotāram |
pa̱ścādu̱dȧñca̱ṃ pañcȧhotāram |
u̱tta̱ra̱taḥ prāñca̱m̐ ṣa̱ḍḍhȯtāram |
u̱pari̇ṣṭā̱tprāñca̱m̐ sa̱ptahȯtāram |
hr̥̱dȧyaṃ̱ yajūm̐ṣi̱ patnyȧśca |
ya̱thā̱va̱kā̱śaṃ̱ grahān̍ |
ya̱thā̱va̱kā̱śaṃ̱ prȧtigra̱hām̐llȯkaṃ̱pr̥̱ṇāścȧ |
sarvȧ hāsyai̱tā de̱vatām̐ḥ prī̱tā a̱bhīṣṭȧ bhavanti || 5 ||))

**[[3-12-5-6]]**

सदे॑वम॒ग्निं चि॑नुते।
र॒थसं॑मितश्चे॒तव्य॑ः।
वज्रो॒ वै रथ॑ः।
वज्रे॑णै॒व पा॒प्मानं॒ भ्रातृ॑व्यꣳ स्तृणुते।
प॒क्षःसं॑मितश्चे॒तव्य॑ः।
ए॒तावा॒न्वै रथ॑ः।
याव॑त्प॒क्षः।
र॒थसं॑मितमे॒व चि॑नुते।
इ॒मम॒व लो॒कं प॑शुबन्धेना॒भिज॑यति।
अथो॑ अग्निष्टो॒मेन॑॥ ६॥

((sadėvama̱gniṃ ci̇nute |
ra̱thasaṃ̇mitaścetavyȧḥ |
vajro̱ vai rathȧḥ |
vajre̱ṇa̱iva pā̱pmānaṃ̱ bhrātṙ̥vyam̐ str̥̱ṇute |
pa̱kṣaḥsaṃ̇mitaścetavyȧḥ |

ẹtāvā̠nvai rathá̍ḥ ।
yāvá̍tpa̠kṣaḥ ।
ra̠thasa̠m̐mitame̠va ci̍nute ।
i̠mame̠va lo̠kaṃ pa̍śuba̠ndhenā̠bhija̍yati ।
athó̍ agniṣṭo̠mena̍ ॥ 6 ॥))

**[[3-12-5-7]]**

अ̠न्तरि̍क्षमु̠क्थ्ये̍न।
स्व̍रतिरा̠त्रेण̍।
सर्वा̠ँल्लो̠कान॑ही̠नेन̍।
अथो̍ स̠त्रेण̍।
वरो̠ दक्षि̍णा।
वरे̍णै̠व वर॒ꣳ स्पृणोति।
आ̠त्मा हि वर̍ः।
एक̍विꣳशति̠र्दक्षि̍णा ददाति।
ए̠क̠वि̠ꣳशो वा इ̠तः स्व॒र्गो लो̠कः।
प्र स्व̠र्गं लो̠कमा॑प्नोति॥ ७॥

((a̠ntari̍kṣamu̠kthye̍na ।
svá̍ratirā̠treṇa̍ ।
sarvā̠m̐llo̠kāná̍hī̠nena̍ ।
athó̍ sa̠treṇa̍ ।
varo̠ dakṣi̍ṇā ।
varé̍ṇai̠va varam̐ spṛṇoti ।
ā̠tmā hi vará̍ḥ ।
eká̍vim̐śati̠rdakṣi̍ṇā dadāti ।
e̠ka̠vi̠m̐śo vā i̠taḥ sva̠rgo lo̠kaḥ ।
pra sva̠rgaṃ lo̠kamā̎pnoti ॥ 7 ॥))

**[[3-12-5-8]]**

अ̠सावा̍दि̠त्य ए̍कवि̠ꣳशः।
अ̠मुमे̠वादि̠त्यमा॑प्नोति।
श̠तं द̍दाति।
श̠तायु̍ः पुरु̍षः श̠तेन्द्रि̍यः।
आयु̍ष्ये̠वेन्द्रि̠ये प्रति̍तिष्ठति।
स̠ह॒स्रं ददाति।
स̠ह॒स्र॑संमितः स्व̠र्गो लो̠कः।
स्व̠र्गस्य̍ लो̠कस्या̍भि̠जित्यै।
अ̠न्वि̠ष्ट̠कं दक्षि̍णा ददाति।
सर्वा̍णि̠ वयाꣳ॑सि॥ ८॥

((a̠sāvā̍di̠tya e̍kavi̠m̐śaḥ ।
a̠mume̠vādi̠tyamā̎pnoti ।
śa̠taṃ da̍dāti ।
śa̠tāyu̠ḥ puru̍ṣaḥ śa̠tendri̍yaḥ ।
āyu̍ṣye̠vendri̠ye prati̍tiṣṭhati ।
sa̠hasraṃ dadāti ।
sa̠hasra̍sammitaḥ sva̠rgo lo̠kaḥ ।
sva̠rgasya̍ lo̠kasyā̠bhiji̍tyai ।
a̠nvi̠ṣṭa̠kaṃ dakṣi̍ṇā dadāti ।
sarvā̍ṇi̠ vayām̐si ॥ 8 ॥))

**[[3-12-5-9]]**

सर्व̠स्याप्त्यै̎।
सर्व̠स्याव̍रुद्ध्यै।
यदि̠ न वि̠न्देत̍।
म̠न्थाने̍ताव̠तो द̍द्यादोद̠नान्वा̎।
अ̠श्नुते तं काम॑म्।
यस्मै̠ कामा̍याग्नि̠श्चीयते̎।
प̠ष्ठौ̠हीं त्व̠न्तर्व॑तीं दद्यात्।
सा हि सर्वा̍णि̠ वयाꣳ॑सि।
सर्व̠स्याप्त्यै̎।
सर्व̠स्याव̍रुद्ध्यै॥ ९॥

((sarva̠syāptyai̎ ।
sarva̠syāvá̍ruddhyai ।
yadi̠ na vi̠ndeta̍ ।
ma̠nthāne̍tāva̠to da̍dyādoda̠nānvā̎ ।
a̠śnu̠te taṃ kāmā̎m ।
yasmai̠ kāmā̍yā̠gniścī̠yate̎ ।
pa̠ṣṭhau̠hīṃ tva̠ntarva̍tīṃ dadyāt ।
sā hi sarvā̍ṇi̠ vayām̐si ।
sarva̠syāptyai̎ ।
sarva̠syāvá̍ruddhyai ॥ 9 ॥))

**[[3-12-5-10]]**

हिर̍ण्यं ददाति।
हिर̍ण्यज्योतिरे̠व स्व̠र्गं लो̠कमे̍ति।
वासो̍ ददाति।
तेनायु̠ः प्रति̍रते।
वे̠दि̠तृ̠ती̠ये य̍जेत।
त्रिष॑त्या̠ हि दे̠वाः।
स स॑त्यम̠ग्निं चि॑नुते।
तदे̠तत्प॑शुब̠न्धे ब्रा̍ह्म॒णं ब्रूयात्।
नेत॑रेषु य̠ज्ञेषु।
यो ह̠ वै चतु̍र्होतृननुसव̠नं त॑र्पयित̠व्यान्वेद̍॥ १०॥

((hirá̍ṇyaṃ dadāti ।
hirá̍ṇyajyotire̠va sva̠rgaṃ lo̠kame̍ti ।
vāsó̍ dadāti ।

te̱nāyu̱ḥ prati̍rate ।
ve̱di̱tṛ̱tīye ya̍jeta ।
triṣa̍tyā̱ hi de̱vāḥ ।
sa sa̍tyama̱gniṃ ci̍nute ।
tade̱tatpa̍śuba̱ndhe brāhma̍ṇaṃ brūyāt ।
neta̍reṣu ya̱jñeṣu̍ ।
yo ha̱ vai catu̍rhotṝ̱nanusava̱naṃ ta̍rpayita̱vyā̍nveda̍
॥ 10 ॥))

**[[3-12-5-11]]**

तृप्य॑ति प्र॒जया॑ प॒शुभि॑ः।
उपै॑नꣳ सोमपी॒थो न॑मति।
ए॒ते वै चतु॑र्होतारोऽनुसव॒नं त॑र्पयित॒व्या॑ः।
ये ब्रा॑ह्म॒णा ब॑हुवि॒द॑ः।
तेभ्यो॒ यद्दक्षि॑णा॒ न नये॑त्।
दुरि॑ष्टꣳ स्यात्।
अ॒ग्निम॑स्य वृञ्जीरन्।
तेभ्यो॑ यथाश्र॒द्धं द॑द्यात्।
स्वि॑ष्टमे॒वैतत्क्रि॑यते।
नास्या॒ग्निं वृ॑ञ्जते॥ ११॥

((tṛpya̍ti pra̱jayā̍ pa̱śubhi̍ḥ ।
upai̍naṁ somapī̱tho na̍mati ।
e̱te vai catu̍rhotāro'nusava̱naṃ ta̍rpayita̱vyā̍ḥ ।
ye brā̍hma̱ṇā ba̍hu̱vida̍ḥ ।
tebhyo̱ yaddakṣi̍ṇā̱ na naye̍t ।
duri̍ṣṭaṁ syāt ।
a̱gnima̍sya vṛñjīran ।
tebhyo̍ yathāśra̱ddhaṃ da̍dyāt ।
svi̍ṣṭame̱vaitatkri̍yate ।
nāsyā̱gniṃ vṛ̍ñjate ॥ 11 ॥))

**[[3-12-5-12]]**

हि॒रण्ये॒ष्टको भ॑वति।
याव॑दुत्तममं॑गुलिका॒ण्डं य॑ज्ञप॒रुषा॒ संमि॑तम्।
तेजो॒ हिर॑ण्यम्।
यदि॒ हिर॑ण्यं॒ न वि॒न्देत्।
शर्क॑रा अ॒क्ता उप॑दध्यात्।
तेजो॑ घृ॒तम्।
सते॑जसमे॒वाग्निं चि॑नुते।
अ॒ग्निं चि॒त्वा सौत्रा॒मण्या य॑जेत मैत्रावरु॒ण्या वा᳚।
वी॒र्ये॑ण वा ए॒ष व्यृ॑ध्यते।
यो᳚ऽग्निं चि॑नु॒ते।
याव॑दे॒व वी॒र्य᳚म्।
तद॑स्मिन्दधाति।
ब्रह्म॑णः सायु॑ज्यꣳ सलो॒कता॑माप्नोति।
ए॒तासा॑मे॒व दे॒वता॑ना॒ꣳ सायु॑ज्यम्।
सा॒र्ष्टि॑ताꣳ समानलो॒कता॑माप्नोति।
य ए॒तम॒ग्निं चि॑नु॒ते।
य उ॑ चैनमे॒वं वेद॑।
ए॒तदे॒व सा॑वित्रे ब्राह्म॑णम्।
अथो॑ नाचिके॒ते॥ १२॥
होता॒ चतु॑र्होतृणाꣳ स्रु॒तिश्च॑कार वा भवन्त्यग्निष्टो॒मेना॑प्नोति॒ वया॑ꣳसि॒ वया॑ꣳसि॒ सर्व॒स्याप्त्यै॒ सर्व॒स्याव॑रुध्यै॒ वेद॑ वृञ्जते चिनु॒ते नव॑ च॥ ५॥

((hi̱ra̱ṇye̱ṣṭako bha̍vati ।
yāva̍dutta̱mamaṁ̍gulikā̱ṇḍaṃ ya̍jñapa̱ruṣā̱ saṃmi̍tam ।
tejo̱ hira̍ṇyam ।
yadi̱ hira̍ṇya̱ṃ na vi̱ndet ।
śarka̍rā a̱ktā upa̍dadhyāt ।
tejo̍ ghṛ̱tam ।
sate̍jasame̱vāgniṃ ci̍nute ।
a̱gniṃ ci̱tvā sau̍trāma̱ṇyā ya̍jeta maitrāvaru̱ṇyā vā̎ ।
vī̱rye̍ṇa̱ vā e̱ṣa vyṛ̍ddhyate ।
yo̎'gniṃ ci̍nu̱te ।
yāva̍de̱va vī̱ryā̎m ।
tada̍smindadhāti ।
brahma̍ṇaḥ sāyu̍jyaṁ salo̱katā̍māpnoti ।
e̱tāsā̍me̱va de̱vatā̍nā̱ṁ sāyu̍jyam ।
sā̱rṣṭitā̍ṁ samānalo̱katā̍māpnoti ।
ya e̱tama̱gniṃ ci̍nu̱te ।
ya u̍ cainame̱vaṃ veda̍ ।
e̱tade̱va sā̍vitre brāhma̍ṇam ।
atho̍ nācike̱te ॥ 12 ॥
hotā̱ catu̍rhotṝ̱ṇāṁ sru̱tiśca̍kāra vā
bhavantyagniṣṭo̱menā̍pnoti̱ vayā̍ṁsi̱ vayā̍ṁsi̱
sarva̱syāptyai̱ sarva̱syāva̍rudhyai̱ veda̍ vṛñjate
cinu̱te nava̍ ca ॥ 5 ॥))

**[[3-12-6-1]]**

यच्चा॒मृतं॑ यच्च॒ मर्त्य᳚म्।
यच्च॒ प्राणि॑ति॒ यच्च॒ न।
सर्वा॑स्ता इष्ट॑काः कृ॒त्वा।
उप॑ काम॒दुघा॑ द॒धे।
तेनर्षि॑णा॒ तेन॒ ब्रह्म॑णा।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द।
सर्वा॒ः स्त्रिय॒ः सर्वा᳚न्पु॒ꣳसः।
सर्व॒ꣳ न स्त्रीपु॑मं॒ च यत्।

सर्वा॒स्ताः।

याव॑न्तः पा॒ꣳस॒वो॒ भूमे᳚ः॥ १॥

((yaccā̱mṛtam̱ yacca̱ marty̎am |
yacca̱ prāṇ̍iti̱ yacca̱ na |
sarvā̱stā iṣṭ̍akā̱ḥ kṛ̱tvā |
up̍a kāma̱dugh̎a dadhe |
tenarṣ̍iṇā̱ tena̱ brahm̍aṇā |
tay̍a de̱vat̍ayā'ṅgira̱svaddhru̱vā s̍īda |
sarvā̱ḥ striya̱ḥ sarv̎ānpu̱ṁ̆saḥ |
sarvam̱ na str̍īpumam̱ ca̱ yat |
sarvā̱stāḥ |
yāv̍antaḥ pā̱ṁ̆savo̱ bhūm̎eḥ || 1 ||))

**[[3-12-6-2]]**

संख्या॑ता दे॒वमा॒यया᳚।

सर्वा॒स्ताः।

याव॑न्त॒ ऊषा᳚ः पशू॒नाम्।

पृ॒थि॒व्यां पुष्टि॑र्हि॒ताः।

सर्वा॒स्ताः।

याव॑ती॒ः सिक॑ता॒ः सर्वा᳚ः।

अ॒प्स्वन्त॑श्च॒ याः श्रि॒ताः।

सर्वा॒स्ताः।

याव॑ती॒ः शर्क॑रा॒ धृत्यै᳚।

अ॒स्यां पृ॑थि॒व्याम॑धि॥ २॥

((saṃkhy̍atā devamā̱yay̎ā |
sarvā̱stāḥ |
yāv̍anta̱ ūṣ̎āḥ paśū̱nām |
pṛ̱thi̱vyām̱ puṣṭ̍irhi̱tāḥ |
sarvā̱stāḥ |
yāv̍atī̱ḥ sik̍atā̱ḥ sarv̎āḥ |
a̱psv̍antaśca̱ yāḥ śri̱tāḥ |
sarvā̱stāḥ |
yāv̍atī̱ḥ śark̍arā̱ dhṛtya̎i |
a̱syām̱ p̍ṛthi̱vyāmadh̍i || 2 ||))

**[[3-12-6-3]]**

सर्वा॒स्ताः।

याव॒न्तोऽश्मा॑नो॒ऽस्यां पृ॑थि॒व्याम्।

प्र॒ति॒ष्ठासु॒ प्रति॑ष्ठिताः।

सर्वा॒स्ताः।

याव॑तीर्वी॒रुध॒ः सर्वा᳚ः।

विष्ठि॑ताः पृ॒थि॒वीमनु॑।

सर्वा॒स्ताः।

याव॑तीरोष॑धी॒ः सर्वा᳚ः।

विष्ठि॑ताः पृ॒थि॒वीमनु॑।

सर्वा॒स्ताः॥ ३॥

((sarvā̱stāḥ |
yāva̱nto'śm̍āno̱'syām̱ p̍ṛthi̱vyām |
pra̱ti̱ṣṭhāsu̱ prat̍iṣṭhitāḥ |
sarvā̱stāḥ |
yāv̍atīrvī̱rudha̱ḥ sarv̎āḥ |
viṣṭh̍itāḥ pṛ̱thi̱vīmanu̍ |
sarvā̱stāḥ |
yāv̍atīroṣ̍adhī̱ḥ sarv̎āḥ |
viṣṭh̍itāḥ pṛ̱thi̱vīmanu̍ |
sarvā̱stāḥ || 3 ||))

**[[3-12-6-4]]**

याव॑न्तो॒ व॒न॒स्पत॑यः।

अ॒स्यां पृ॑थि॒व्याम॑धि।

सर्वा॒स्ताः।

याव॑न्तो ग्रा॒म्याः प॒शव॒ः सर्वे᳚।

आ॒र॒ण्याश्च॒ ये।

सर्वा॒स्ताः।

ये द्वि॒पाद॒श्चतु॑ष्पादः।

अ॒पाद॑ उ॒द॒र॒स॒र्पिण॑ः।

सर्वा॒स्ताः।

याव॒दाञ्ज॑नमु॒च्यते᳚॥ ४॥

((yāv̍anto̱ vana̱spat̍ayaḥ |
a̱syām̱ p̍ṛthi̱vyāmadh̍i |
sarvā̱stāḥ |
yāv̍anto grā̱myāḥ pa̱śava̱ḥ sarv̎e |
ā̱ra̱ṇyāśca̱ ye |
sarvā̱stāḥ |
ye dvi̱pāda̱ścat̍uṣpādaḥ |
a̱pād̍a udarasa̱rpiṇ̍aḥ |
sarvā̱stāḥ |
yāva̱dāñj̍anamu̱cyat̎e || 4 ||))

**[[3-12-6-5]]**

दे॒व॒त्रा यच्च॑ मानु॒षम्।

सर्वा॒स्ताः॥

याव॑त्कृ॒ष्णाय॑स॒ꣳ सर्वा॑म्।

दे॒व॒त्रा यच्च॑ मानु॒षम्।

सर्वा॒स्ताः।

याव॑ल्लो॒हाय॑स॒ꣳ सर्वा॑म्।

देवत्रा यच्च मानुषम्।
सर्वास्ताः।
सर्वꣳ सीसꣳ सर्वं त्रपु।
देवत्रा यच्च मानुषम्॥ ५॥

((devatrā yacca mānuṣam |
sarvāstāḥ ||
yāvatkṛṣṇāyasam̐ sarvam |
devatrā yacca mānuṣam |
sarvāstāḥ |
yāvallohāyasam̐ sarvam |
devatrā yacca mānuṣam |
sarvāstāḥ |
sarvam̐ sīsam̐ sarvam trapu |
devatrā yacca mānuṣam || 5 ||))

**[[3-12-6-6]]**

सर्वास्ताः।
सर्वꣳ हिरण्यꣳ रजतम्।
देवत्रा यच्च मानुषम्।
सर्वास्ताः।
सर्वꣳ सुवर्णꣳ हरितम्।
देवत्रा यच्च मानुषम्।
सर्वास्ता इष्टकाः कृत्वा।
उप कामदुघा दधे।
तेनर्षिणा तेन ब्रह्मणा।
तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद॥ ६॥
भूमेरधि विष्ठिताः पृथिवीमनु सर्वास्ता उच्यते मानुषꣳ सीद॥ ६॥
यच्च स्त्रियः पाꣳसव ऊषाः सिकताः शर्करा अश्मानो वीरुध ओषधीर्वनस्पतयो ग्राम्या ये द्विपादो यावदाञ्जनं यावत्कृष्णायसꣳ लोहायसꣳ सीसꣳ हिरण्यꣳ सुवर्णꣳ हरितमष्टादश॥

((sarvāstāḥ |
sarvam̐ hiraṇyam̐ rajatam |
devatrā yacca mānuṣam |
sarvāstāḥ |
sarvam̐ suvarṇam̐ haritam |
devatrā yacca mānuṣam |
sarvāstā iṣṭakāḥ kṛtvā |
upa kāmadughā dadhe |
tenarṣiṇā tena brahmaṇā |
tayā devatayā'ṅgirasvaddhruvā sīda || 6 ||
bhūmeradhi viṣṭhitāḥ pṛthivīmanu sarvāstā ucyate mānuṣam̐ sīda || 6 ||
yacca striyaḥ pām̐sava ūṣāḥ sikatāḥ śarkarā aśmāno vīrudha oṣadhīrvanaspatayo grāmyā ye dvipādo yāvadāñjanam yāvatkṛṣṇāyasam̐ lohāyasam̐ sīsam̐ hiraṇyam̐ suvarṇam̐ haritamaṣṭādaśa ||))

**[[3-12-7-1]]**

सर्वा दिशो दिक्षु।
यच्चान्तर्भूतं प्रतिष्ठितम्।
सर्वास्ता इष्टकाः कृत्वा।
उप कामदुघा दधे।
तेनर्षिणा तेन ब्रह्मणा।
तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद।
अन्तरिक्षं च केवलम्।
यच्चास्मिन्नन्तराहितम्।
सर्वास्ताः।
आन्तरिक्ष्यश्च याः प्रजाः॥ १॥

((sarvā diśo dikṣu |
yaccāntarbhūtam pratiṣṭhitam |
sarvāstā iṣṭakāḥ kṛtvā |
upa kāmadughā dadhe |
tenarṣiṇā tena brahmaṇā |
tayā devatayā'ṅgirasvaddhruvā sīda |
antarikṣam ca kevalam |
yaccāsminnantarāhitam |
sarvāstāḥ |
āntarikṣyaśca yāḥ prajāḥ || 1 ||))

**[[3-12-7-2]]**

गन्धर्वाप्सरसश्च ये।
सर्वास्ताः।
सर्वानुदारान्त्सलिलान्।
अन्तरिक्षे प्रतिष्ठितान्।
सर्वास्ताः।
सर्वानुदारान्त्सलिलान्।
स्थावराः प्रोष्यांश्च ये।
सर्वास्ताः।
सर्वां धुनिꣳ सर्वान्ध्वꣳसान्।
हिमो यच्च शीयते॥ २॥

((gandharvāpsarasaśca ye |
sarvāstāḥ |
sarvānudārāntsalilān |
antarikṣe pratiṣṭhitān |

sarva̱stāḥ |
sarvā̍nuda̱rāntsa̍li̱lān |
sthā̱va̱rāḥ pro̱ṣyā᳚śca̱ ye |
sarva̱stāḥ |
sarvā̱ṃ dhuni̱gͫ sarvā᳚ndhva̱gͫsān |
hi̱mo yacca̍ śī̱yate̎ || 2 ||))

**[[3-12-7-3]]**

सर्वा̱स्ताः।
सर्वा̱न्मरी̍ची̱न्वित॑तान्।
नीहा̱रो यच्च॑ शी̱यते᳚।
सर्वा̱स्ताः।
सर्वा॑ वि̱द्युतः॒ सर्वा᳚न्त्स्तनयि̱त्नून्।
ह्रा̱दुनी̱र्यच्च॑ शी̱यते᳚।
सर्वा̱स्ताः।
सर्वाः᳚ स्रव॑न्तीः स̱रित॑ः।
सर्व॑मप्सु̱चरं॑ च̱ यत्।
सर्वा̱स्ताः॥ ३॥

((sarva̱stāḥ |
sarvā̱nmarī̍cī̱nvita̍tān |
nīhā̱ro yacca̍ śī̱yate̎ |
sarva̱stāḥ |
sarva̍ vi̱dyuta̱ḥ sarvā᳚ntstanayi̱tnūn |
hrā̱dunī̱ryacca̍ śī̱yate̎ |
sarva̱stāḥ |
sarvā̱ḥ srava̍ntīḥ sa̱rita̍ḥ |
sarva̍mapsuca̱ra̱ṃ ca̱ yat |
sarva̱stāḥ || 3 ||))

**[[3-12-7-4]]**

याश्च॒ कूप्या̱ याश्च॑ ना̱द्याः᳚ समु̱द्रियाः᳚।
याश्च॑ वैश̱न्तीरु̱त प्रा॑स̱चीर्याः᳚।
सर्वा̱स्ताः।
ये चो̱त्तिष्ठ॑न्ति जी̱मूताः᳚।
याश्च̱ वर्ष॑न्ति वृ̱ष्टय॑ः।
सर्वा̱स्ताः।
तप̱स्तेज॑ आका̱शम्।
यच्चा॑का̱शे प्रति॑ष्ठितम्।
सर्वा̱स्ताः।
वा̱युं वया॒ꣳसि॒ सर्वा॑णि॥ ४॥

((yāśca̱ kūpyā̱ yāśca̍ nā̱dyā᳚ḥ samu̱driyā᳚ḥ |
yāśca̍ vaiśa̱ntīru̱ta prā̍sa̱cīryāḥ |
sarva̱stāḥ |
ye co̱ttiṣṭha̍nti jī̱mūtā᳚ḥ |
yāśca̱ varṣa̍nti vṛ̱ṣṭaya̍ḥ |
sarva̱stāḥ |
tapa̱steja̍ ākā̱śam |
yaccā̍kā̱śe prati̍ṣṭhitam |
sarva̱stāḥ |
vā̱yuṃ vayā̍gͫsi̱ sarvā̍ṇi || 4 ||))

**[[3-12-7-5]]**

अ̱न्त॒रि̱क्ष॒चरं॑ च̱ यत्।
सर्वा̱स्ताः।
अ̱ग्निꣳ सूर्यं॑ च̱न्द्रम्।
मि̱त्रं वरु॑णं॒ भगं᳚म्।
सर्वा̱स्ताः।
स̱त्यꣳ श्र॒द्धां तपो̱ दमं᳚म्।
नाम॑ रू॒पं च॑ भू̱ताना᳚म्।
सर्वा̱स्ता इ॒ष्ट॑काः कृ̱त्वा।
उप॑ काम̱दुघा॑ दधे।
तेनर्षि॑णा̱ तेन̱ ब्रह्म॑णा।
तया॑ दे̱वत॑याऽङ्गिर̱स्वद्ध्रु̱वा सी॑द॥ ५॥
प्र̱जा हि̱मो यच्च॑ शी̱यते̱ सर्वा̱स्ताः सर्वा॑णि ब्र̱ह्म̱णैकं॑ च॥ ७॥
दिशो̱ऽन्तरि॑क्षमान्तरि̱क्ष्य॑ उदा̱रानु॑दा̱रान्धुनिं॑ मरी॑चीन्वि̱द्युतः॒ स्रव॑न्ती̱र्याश्च̱ ये च̱ तपो॑ वा̱युम̱ग्निꣳ स̱त्यं पञ्च॑दश॥

((a̱nta̱ri̱kṣa̱cara̱ṃ ca̱ yat |
sarva̱stāḥ |
a̱gnigͫ sūrya̍ṃ ca̱ndram |
mi̱traṃ varu̍ṇa̱ṃ bhagā̎m |
sarva̱stāḥ |
sa̱tyagͫ śra̱ddhāṃ tapo̱ damā̎m |
nāma̍ rū̱paṃ ca̍ bhū̱tānā᳚m |
sarva̱stā i̱ṣṭa̍kāḥ kṛ̱tvā |
upa̍ kāma̱dughā̍ dadhe |
tenarṣi̍ṇā̱ tena̱ brahma̍ṇā |
tayā̍ de̱vata̍yā'ṅgira̱svaddhru̱vā sī̍da || 5 ||
pra̱jā hi̱mo yacca̍ śī̱yate̱ sarva̱stāḥ sarvā̍ṇi̱ brahma̱ṇaika̍ṃ ca || 7 ||
diśo̱'ntari̍kṣamāntari̱kṣya̍ udā̱rānu̍dā̱rāndhuni̱ṃ marī̍cīnvi̱dyuta̱ḥ srava̍ntī̱ryāśca̱ ye ca̱ tapo̍ vā̱yuma̱gnigͫ sa̱tyaṃ pañca̍daśa ||))

**[[3-12-8-1]]**

सर्वा̱न्दिव̱ꣳ सर्वा᳚न्दे̱वान्दि̱वि।
यच्चा̱न्तर्भू॑तं प्रति॑ष्ठितम्।

सर्वा॒स्ता इष्ट॑काः कृ॒त्वा।
उप॑ का॒म॒दुघा॑ दधे।
तेन॒र्षिणा॑ तेन॒ ब्रह्म॑णा।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द।
याव॑ती॒स्तार॑काः॒ सर्वा᳚ः।
वित॑ता रोच॒ने दि॒वि।
सर्वा॒स्ताः।
ऋ॒चो य॒जूꣳषि॒ सामा॑नि॥ १॥

((sarvā̱ndiva̱m̐ sarvā̐nde̱vāndi̱vi ।
yaccā̱ntarbhū̱tam̱ pratiṣṭhitam ।
sarvā̱stā iṣṭakāḥ kṛ̱tvā ।
upa kāma̱dughā dadhe ।
tenarṣiṇā tena̱ brahmaṇā ।
tayā de̱vatayā'ṅgira̱svaddhru̱vā sīda ।
yāvatī̱stārakā̱ḥ sarvā̐ḥ ।
vitatā roca̱ne di̱vi ।
sarvā̱stāḥ ।
ṛco̱ yajūm̐ṣi̱ sāmāni ॥ 1 ॥))

**[[3-12-8-2]]**
अ॒थ॒र्वा॒ङ्गि॒र॒सश्च॒ ये।
सर्वा॒स्ताः।
इ॒ति॒हा॒स॒पु॒रा॒णं च॑।
स॒र्प॒दे॒व॒ज॒नाश्च॒ ये।
सर्वा॒स्ताः।
ये च॑ लो॒का ये चा॑लो॒काः।
अ॒न्त॒र्भू॒तं प्रति॑ष्ठितम्।
सर्वा॒स्ताः।
यच्च॒ ब्रह्म॒ यच्चा᳚ब्र॒ह्म।
अ॒न्त॒र्ब्र॒ह्मन्प्रति॑ष्ठितम्॥ २॥

((a̱tha̱rvā̱ṅgi̱rasaśca̱ ye ।
sarvā̱stāḥ ।
i̱ti̱hā̱sa̱pu̱rā̱ṇam̱ ca ।
sa̱rpa̱de̱va̱ja̱nāśca̱ ye ।
sarvā̱stāḥ ।
ye ca lo̱kā ye cālo̱kāḥ ।
a̱ntarbhū̱tam̱ pratiṣṭhitam ।
sarvā̱stāḥ ।
yacca̱ brahma̱ yaccā̐bra̱hma ।
a̱ntarbra̱hmanpratiṣṭhitam ॥ 2 ॥))

**[[3-12-8-3]]**
सर्वा॒स्ताः।
अ॒हो॒रा॒त्राणि॒ सर्वा॑णि।
अ॒र्ध॒मा॒साꣳश्च॒ केव॑लान्।
सर्वा॒स्ताः।
सर्वा॑नृ॒तून्त्सर्वा᳚न्मा॒सान्।
सं॒व॒त्स॒रं च॒ केव॑लम्।
सर्वा॒स्ताः।
सर्वं॒ भू॒तꣳ सर्वं॒ भव्य᳚म्।
यच्चा॒तोऽधि॑भवि॒ष्यति॑।
सर्वा॒स्ता इष्ट॑काः कृ॒त्वा।
उप॑ का॒म॒दुघा॑ दधे।
तेन॒र्षिणा॑ तेन॒ ब्रह्म॑णा।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ ३॥
सामा॑नि ब्र॒ह्मन्प्रति॑ष्ठितं कृ॒त्वा त्रीणि॑ च॥ ८॥
दि॒वं तार॑का॒ ऋच॑ इतिहास्पुरा॒णं च॒ ये च॒
यच्चा॑होरा॒त्राण्यृ॒तून्भू॒तं नव॑॥

((sarvā̱stāḥ ।
a̱ho̱rā̱trā̱ṇi̱ sarvāṇi ।
a̱rdha̱mā̱sām̐śca̱ kevalān ।
sarvā̱stāḥ ।
sarvānṛ̱tūntsarvā̐nmā̱sān ।
sa̱mva̱tsa̱ram̱ ca̱ kevalam ।
sarvā̱stāḥ ।
sarvam̱ bhūta̱m̐ sarvam̱ bhavyam̐ ।
yaccā̱to'dhibhavi̱ṣyati ।
sarvā̱stā iṣṭakāḥ kṛ̱tvā ।
upa kāma̱dughā dadhe ।
tenarṣiṇā tena̱ brahmaṇā ।
tayā de̱vatayā'ṅgira̱svaddhru̱vā sīda ॥ 3 ॥
sāmāni bra̱hmanpratiṣṭhitam̱ kṛ̱tvā trīṇi ca ॥ 8 ॥
diva̱m̱ tārakā̱ ṛca itihāspurā̱ṇam̱ ca̱ ye ca̱
yaccāhorā̱trāṇyṛ̱tūnbhūta̱m̱ nava ॥))

**[[3-12-9-1]]**
ऋ॒चां प्राची॑ मह॒ती दिगु॑च्यते।
द॒क्षि॒णामा॑हु॒र्यजु॑षामपा॒राम्।
अथ॑र्वणा॒मङ्गि॑रसां प्र॒तीची᳚।
साम्ना॒मुदी॑ची मह॒ती दिगु॑च्यते।
ऋ॒ग्भिः पू᳚र्वा॒ह्णे दि॒वि दे॒व ई᳚यते।
य॒जु॒र्वे॒दे ति॑ष्ठति॒ मध्ये॒ अह्नः॑।
सा॒म॒वे॒देना᳚स्तम॒ये मही᳚यते।
वे॒दैरशू᳚न्यस्त्रि॒भिरे॑ति॒ सूर्य॑ः।

ऋ॒ग्भ्यो जा॒ता॒ꣳ सर्व॑शो मू॒र्ति॑माहुः।
सर्वा॑ ग॒तिर्या॑जु॒षी है॒व शश्व॑त्॥ १॥

((r̥cāṃ prāci mahatī digucyate |
dakṣiṇāmāhuryajuṣāmapārām |
atharvaṇāmaṅgirasāṃ pratīcī |
sāmnāmudīcī mahatī digucyate |
r̥gbhiḥ pūrvāhṇe divi deva īyate |
yajurvede tiṣṭhati madhye ahnaḥ |
sāmavedenāstamaye mahīyate |
vedairaśūnyastribhireti sūryaḥ |
r̥gbhyo jātāṃ sarvaśo mūrtimāhuḥ |
sarvā gatiryājuṣī haiva śaśvat || 1 ||))

**[[3-12-9-2]]**

सर्वं॒ तेजः॒ सामरू॒प्य॒ꣳ ह॒ शश्व॑त्।
सर्व॒ꣳ हे॒दं ब्रह्म॑णा है॒व सृ॒ष्टम्।
ऋ॒ग्भ्यो जा॒तं वैश्य॒ं वर्ण॑माहुः।
य॒जु॒र्वे॒दं क्ष॒त्रिय॑स्याहु॒र्योनि॑म्।
सा॒म॒वे॒दो ब्रा॑ह्म॒णाना॒ं प्रसू॑तिः।
पूर्वे॒ पूर्वे॑भ्यो॒ वच॑ ए॒तदू॑चुः।
आ॒द॒र्श॒म॒ग्निं चि॑न्वा॒नाः।
पूर्वे॒ वि॑श्व॒सृजो॒ऽमृताः॑।
श॒तं व॑र्षसह॒स्राणि॑।
दी॒क्षि॒ताः स॒त्त्रमा॑सत॥ २॥

((sarvaṃ tejaḥ sāmarūpyaṃ ha śaśvat |
sarvaṃ hedaṃ brahmaṇā haiva sr̥ṣṭam |
r̥gbhyo jātaṃ vaiśyaṃ varṇamāhuḥ |
yajurvedaṃ kṣatriyasyāhuryonim |
sāmavedo brāhmaṇānāṃ prasūtiḥ |
pūrve pūrvebhyo vaca etaducuḥ |
ādarśamagniṃ cinvānāḥ |
pūrve viśvasr̥jo'mr̥tāḥ |
śataṃ varṣasahasrāṇi |
dīkṣitāḥ sattramāsata || 2 ||))

**[[3-12-9-3]]**

तप॑ आसीद्गृ॒हप॑तिः।
ब्रह्म॑ ब्र॒ह्माऽभ॑वत्स्व॒यम्।
स॒त्यꣳ ह॒ होतै॑षा॒मासी॑त्।
यद्वि॑श्व॒सृज॒ आस॑त।
अ॒मृत॑मेभ्य॒ उद॑गायत्।
स॒ह॒स्रं॑ परिवत्स॒रान्।
भू॒तꣳ ह॑ प्रस्तो॒तैषा॒मासी॑त्।
भ॒वि॒ष्यत्प्रति॑ चाहरत्।
प्रा॒णो अ॑ध्व॒र्यु॑रभवत्।
इ॒दꣳ सर्व॒ꣳ सिषा॑सताम्॥ ३॥

((tapa āsīdgr̥hapatiḥ |
brahma brahmā'bhavatsvayam |
satyaṃ ha hotaiṣāmāsīt |
yadviśvasr̥ja āsata |
amr̥tamebhya udagāyat |
sahasraṃ parivatsarān |
bhūtaṃ ha prastotaiṣāmāsīt |
bhaviṣyatprati cāharat |
prāṇo adhvaryurabhavat |
idaṃ sarvaṃ siṣāsatām || 3 ||))

**[[3-12-9-4]]**

अ॒पा॒नो वि॒द्वाना॒वृतः॑।
प्र॒ति॒प्राति॑ष्ठद॒ध्व॒रे।
आ॒र्त॒वा उ॑पगा॒तारः॑।
स॒द॒स्या॑ ऋ॒तवो॑ऽभवन्।
अ॒र्ध॒मा॒साश्च॑ मासा॑श्च।
च॒म॒सा॒ध्व॒र्य॒वोऽभ॑वन्।
अ॒शꣳ॑स॒द्ब्रह्म॑ण॒स्तेजः॑।
अ॒च्छा॒वा॒कोऽभ॑व॒द्यशः॑।
ऋ॒तमे॑षां प्रशा॒स्ताऽऽसी॑त्।
यद्वि॑श्व॒सृज॒ आस॑त॥ ४॥

((apāno vidvānāvr̥taḥ |
pratiprātiṣṭhadadhvare |
ārtavā upagātāraḥ |
sadasyā r̥tavo'bhavan |
ardhamāsāśca māsāśca |
camasādhvaryavo'bhavan |
aśaṃsadbrahmaṇasteјaḥ |
acchāvāko'bhavadyaśaḥ |
r̥tameṣāṃ praśāstā''sīt|
yadviśvasr̥ja āsata || 4 ||))

**[[3-12-9-5]]**

ऊ॒र्जा॒ऽऽजान॑मु॒द्व॑हत्।
ध्रु॒वगो॑पः स॒होऽभवत्।
ओ॒जो॒ऽभ्य॑ष्टौद्ग्रा॒व॒ण्णाः।
यद्वि॑श्व॒सृज॒ आस॑त।
अप॑चितिः पो॒त्रीया॒मयजत्।
ने॒ष्ट्रीया॒मयज॒त्त्विषिः॑।

आग्नी॑द्ध्राद्वि॒दुषी॑ स॒त्यम्।
श्र॒द्धा है॒वाय॑जत्स्व॒यम्।
इरा॒ पत्नी॑ विश्वसृजा॑म्।
आकू॑तिरपिनद्ध॒विः॥ ५॥

((ūrgrājā̍nạmudā̍vahat ।
dhrụvạgọpaḥ sahȯ'bhavat ।
ojọ'bhyā̍ṣṭaụdgrāvṇṇā̍ḥ ।
yadvi̍śvạsṛjạ āsā̍ta ।
apā̍citiḥ pọtrīyā̍mayajat ।
neṣṭrīyā̍mayajạttviṣi̍ḥ ।
āgni̍ddhrādvịduṣi̍ sạtyam ।
śrạddhā haịvāyā̍jatsvạyam ।
irạ̄ patni̍ viśvạsṛjā̍m।
ākū̍tirapinaḍḍhạviḥ ॥ 5 ॥))

**[[3-12-9-6]]**

इ॒ध्मꣳ ह॒ क्षुच्चै॑भ्य उ॒ग्रे।
तृ॒ष्णा चाव॑हतामु॒भे।
वागे॑षाꣳ सुब्रह्म॒ण्याऽऽसी॑त्।
छन्दो॒योगान्वि॑जान॒ती।
क॒ल्प॒त॒न्त्राणि॑ तन्वा॒नाऽह॑ः।
स॒ꣳस्थाश्च॑ सर्व॒शः।
अ॒हो॒रा॒त्रे प॑शुपा॒ल्यौ।
मु॒हूर्ताः॑ प्रे॒ष्या॑ अभवन्।
मृ॒त्युस्तद॑भवद्धा॒ता।
श॒मि॒तोग्रो वि॒शां पति॑ः॥ ६॥

((ịdhmamꣳ hạ kṣuccai̍bhya ụgre ।
tṛ̱ṣṇā cāvȧhatāmụbhe ।
vāgė̍ṣāmꣳ subrahmạṇyā''si̍t ।
chạndọyọgānvi̍jānạtī ।
kạlpạtạntrāṇi̍ tanvạ̄nā'hȧḥ ।
sạmꣳsthāśca̍ sarvạśaḥ ।
ạhọrạ̄tre pȧśupạ̄lyau ।
mụhūrtāḥ prẹṣyā̍ abhavan ।
mṛ̱tyustadȧbhavaddhạ̄tā ।
śạmịtogro vịśāṃ pati̍ḥ ॥ 6 ॥))

**[[3-12-9-7]]**

वि॒श्वसृज॑ः प्रथ॒माः स॒त्त्रमा॑सत।
स॒हस्र॑सम॒ं प्रसु॑तेन॒ यन्त॑ः।
ततो॑ ह जज्ञे भुव॑नस्य गो॒पाः।
हि॒र॒ण्मय॑ः शकु॒निर्ब्रह्म॒ नाम॑।
येन॒ सूर्य॒स्तप॑ति॒ तेज॑से॒द्धः।

पि॒ता पु॒त्रेण॑ पितृमान्योनि॑योनौ।
नावे॑दविन्मनु॒ते तं बृ॒हन्त॑म्।
स॒र्वा॒नु॒भु॒मा॒त्मान॑ꣳ संप॒रा॒ये।
ए॒ष नि॒त्यो म॑हि॒मा ब्रा॑ह्म॒णस्य॑।
न कर्म॑णा वर्धते॒ नो कनी॑यान्॥ ७॥

((vịśvạsṛjā̍ḥ prathạmāḥ sạttramā̍sata ।
sạhasrā̍samaṃ prasū̍tenạ yantā̍ḥ ।
tatȯ ha jajñe bhuvā̍nasya gọpāḥ ।
hịrạṇmayā̍ḥ śạkunịrbrahmạ nāmȧ ।
yenạ sūryạstapā̍tị tejā̍sẹddhaḥ ।
pịtā pụtreṇā̍ pitṛmānyoni̍yonau ।
nāvė̍davinmanutẹ taṃ bṛhantā̍m ।
sạrvạ̄nụbhumạ̄tmānamꣳ saṃparạ̄ye ।
ẹṣa nịtyo mȧhịmā brā̍hmaṇạsyȧ ।
na karmā̍ṇā vardhatẹ no kani̍yān ॥ 7 ॥))

**[[3-12-9-8]]**

तस्यै॒वात्मा प॑द॒वित्तं वि॑दि॒त्वा।
न कर्म॑णा लिप्यते॒ पाप॑केन।
पञ्च॑पञ्चाशत॑स्त्रि॒वृत॑ः संवत्स॒राः।
पञ्च॑पञ्चाशत॑ः पञ्चद॒शाः।
पञ्च॑पञ्चाशत॑ः सप्तद॒शाः।
पञ्च॑पञ्चाशत॑ एकवि॒ꣳ॒शाः।
वि॒श्वसृजा॑ꣳ स॒हस्र॑संवत्सरम्।
ए॒तेन॒ वै वि॑श्व॒सृज॑ इ॒दं विश्व॑मसृजन्त।
यद्विश्व॒मसृ॑जन्त।
तस्मा॑द्विश्व॒सृज॑ः।
विश्व॑मेना॒ननु प्रजा॑यते।
ब्रह्म॑णः सायु॑ज्यꣳ सलो॒कतां॑ यन्ति।
ए॒तासा॑मेव दे॒वता॑नाꣳ सायु॑ज्यम्।
सार्ष्टि॑ताꣳ समानलो॒कतां॑ यन्ति।
य ए॒तद॑ु॒पयन्ति॑।
ये चैन॒त्प्राहु॑ः।
येभ्य॑श्चैन॒त्प्राहु॑ः।
ओम्॥ ८॥
शश्व॑दासत॒ सिषा॑सतामास॑त ह॒विष्पति॒ः
कनी॑यान्तस्मा॑द्विश्व॒सृजो॒ऽष्टौ च॑॥ ९॥
तुभ्यं॑ दे॒वेभ्य॒स्तप॑सा दे॒वेभ्यो॒ ब्रह्म॒ वै च॒तुर्हो॑तारो॒ यच्चा॒मृत॒ꣳ
सर्वा॒ दिशो॑ दि॒क्षु सर्वा॑ दिव॑मृचां प्राची॒ नव॑॥ ९॥

तुभ्य॒ं तप॑सा॒ ता वा ए॒ताः पञ्च॒ हिर॑ण्यं ददा॒ति  सर्वा॒᳚
दि॒शास्तप॑ आसीद्गृ॒हप॑ति॒ष्षद॑ञ्चा॒शात्॥ ५६॥
तुभ्य॒मोम्॥

((tasyai̱vātmā pa̍da̱vittaṃ vi̍ditvā ।
na karma̍ṇā lipyate̱ pāpa̍kena ।
pañca̍pañcā̱śata̍stri̱vṛta̍ḥ saṃvatsa̱rāḥ ।
pañca̍pañcā̱śata̍ḥ pañcada̱śāḥ ।
pañca̍pañcā̱śata̍ḥ saptada̱śāḥ ।
pañca̍pañcā̱śata̍ ekavi̱ṃ̱śāḥ ।
vi̱śva̱sṛjā̱ṃ̍ sa̱hasra̍saṃvatsaram ।
e̱tena̱ vai vi̍śva̱sṛja̍ i̱daṃ viśva̍masṛjanta ।
yadviśva̱masṛ̍janta ।
tasmā̎dviśva̱sṛja̍ḥ ।
viśva̍menā̱nanu̱ prajā̍yate ।
brahma̍ṇa̱ḥ sāyu̍jyaṃ̍ salo̱katā̎ṃ yanti ।
e̱tāsā̍me̱va de̱vatā̍nā̱ṃ̱ sāyu̍jyam ।
sā̱rṣṭitā̱ṃ̍ samānalo̱katā̎ṃ yanti ।
ya e̱tadu̍pa̱yanti̍ ।
ye cai̍na̱tprāhu̍ḥ ।
yebhya̍ścaina̱tprāhu̍ḥ ।
om ॥ 8 ॥
śaśva̍dāsata̱ siṣā̍sata̱māsa̍ta ha̱viṣpati̱ḥ
kanī̍yā̱ntasmā̎dviśva̱sṛjo̱'ṣṭau ca̍ ॥ 9 ॥
tubhyaṃ̍ de̱vebhya̱stapa̍sā de̱vebhyo̱ brahma̱ vai
catu̍rhotāro̱ yaccā̱mṛta̱ṃ̍ sarvā̱ diśo̍ di̱kṣu sarvāṃ̱
diva̍mṛ̱cāṃ prācī̱ nava̍ ॥ 9 ॥
tubhyaṃ̱ tapa̍sā̱ tā vā e̱tāḥ pañca̱ hira̍ṇyaṃ dadāti̱
sarvā̱ diśa̱stapa̍ āsīdgṛ̱hapa̍ti̱ṣṣaṭpa̍ñcā̱śat ॥ 56 ॥
tubhya̱mom ॥))